NYĀYASŪTRAS

VOLUME - II

Edited by
PRABAL KUMAR SEN

THE ASIATIC SOCIETY
KOLKATA

Nyāyarahasya is a commentary by Rāmabhadra Sārvabhauma on Chapters I-IV of *Nyāyasūtra*-s of Gautama, while *Ānvīkṣikītattvavivaraṇa* is a commentary by Jānakīnātha Cūḍāmaṇi, the father of Rāmabhadra Sārvabhauma on Chapter V of *Nyāyasūtra*-s. These important commentaries are being published for the first time in the *Bibliotheca Indica* series.

NYĀYASŪTRAS
WITH
NYĀYARAHASYA OF
RĀMABHADRA SĀRVABHAUMA
AND
ĀNVĪKṢIKĪTATTVAVIVARAṆA
OF JĀNAKĪNĀTHA CŪḌĀMAṆI

VOLUME II

Edited by

PRABAL KUMAR SEN

THE ASIATIC SOCIETY
1 PARK STREET □ KOLKATA

Bibliotheca Indica Series No. 324

NYĀYASŪTRAS WITH NYĀYARAHASYA OF RĀMABHADRA SĀRVABHAUMA AND ĀNVĪKṢIKĪTATTVAVIVARAṆA OF JĀNAKĪNĀTHA CŪḌĀMAṆI, Volume II

Edited by: Prabal Kumar Sen

ISBN 81 7236 148 3

Published in December 2003

Published by

Professor Dilip Coomer Ghose
General Secretary
The Asiatic Society
1 Park Street
Kolkata 700 016

Printed at

M/s. Modern Printers
12 Ultadanga Main Road
Kolkata 700 067

Price : Rs. 700.00
$ 70

FOREWORD

I have great pleasure in presenting to the world of scholars the present volume on "Nyāyasūtras with Nyāyarahasya of Rāmabhadra Sārvabhauma and Ānvīkṣikītattvavivaraṇa of Jānakīnātha Cūḍāmaṇi" critically edited by Professor Prabal Kumar Sen. The present publication will be in two volumes. The first volume comprises the Introduction and the text of Nyāyarahasya by Rāmabhadra Sārvabhauma on Nyāyasūtras Chapter I-IV. The second volume would contain the text of Ānvīkṣikītattvavivaraṇa of Jānakīnātha Cūḍāmaṇi on Nyāyasūtras, Chapter V with textual notes and appendices.

Professor Sen deserves our gratitude for undertaking the work and for exhaustive and painstaking efforts in presenting the readers with a complete and critically edited Nyāyasūtras.

I shall be failing in my duty if I do not acknowledge the keen interest evinced by two of my friends, late Dr. Chandan Roy Choudhury and late Dr. Ashin Dasgupta, in the publication of these volumes.

I hope and trust the present publication would go a long way in furthering research on Indology.

Kolkata
4 December 2003

Dilip Coomer Ghose
General Secretary

CONTENTS

॥ आन्वीक्षिकीतत्त्वविवरणम् ॥

॥ पञ्चमाध्याये प्रथमाह्निकम् ॥

[1]परीक्षितानि प्रमाणादीनि। इदानीमवसरतो जातिनिग्रहस्थानविशेषलक्षणं वाच्यम्[2], स एव चाध्यायार्थः। न चैवमुत्तरसूत्रानुपपत्तेः परीक्षैवार्थः[3], लक्षणवचनं तु परीक्षाविषयसमर्पकतयेति [4]सानातनिप्रभृतीनां मतं युक्तम्, निग्रहस्थानविशेषलक्षणानुपपत्तेः। उत्तरसूत्राणि च लक्षणविषयत्वरूपसमर्पणाय, अलौकिकानि हि लक्षणानि कथं पदमात्रात् शक्यपरिचयानि भवेयुः[5], शिष्यशिक्षायै वा, प्रसङ्गात् षट्पक्षीकथनवदित्याचार्याः। लक्षणवचने सति विशेषलक्षणपरीक्षाऽप्यध्यायार्थः, अविशेषात्, एकवाक्यता तु यत्किञ्चिदेकधर्मं जातिनिग्रहस्थानयोरेवाश्रित्येति नव्याः।

[6]तत्र जातित्वं तावन्न[7] दूषणासमर्थोत्तरत्वम्, [8]असदुक्तिकाव्याप्तेः, छलनिरनुयोज्यानुयोगयोरतिव्याप्तेश्च[9]। अथ सिद्धत्वे सति [10]तत्त्वं तत्[11]; तथाहि—द्विविधमसदुत्तरं[12] [13]सिद्धमसिद्धञ्च, असिद्धमपि [14]कल्पितदूष्यमन्यच्च, [15]द्वितीयं छलम्, तृतीयं केवलनिरनुयोज्यानुयोगः[16]; आद्यं जातिरिति चेन्न, असिद्धस्यापि दूषणासमर्थस्य जातित्वात्, यथा घटसाधर्म्यात् [17]कृतकत्वादनित्यः शब्दस्तथा गगनसाधर्म्याद्

---

* C starts this chapter with a verse, which, in our opinion, is misplaced. The same is found at the end of this chapter in A, and we have adopted it. The variants in C have been noted there. 1. ओं नमो गणेशाय add. A, ओम् add. C. 2. वाक्यग् A. 3. परीक्षैवार्थः om. C. 4. शाना० C. 5. भवेयुः C. 6—7. भ्रूजातित्वं तावद् C. 8. अमम्० C. 9. च om. C. 10—11. तन्नेत C. 12. ०मसंयुक्तत्वम् C. 13. सिद्धञ्च C. 14—15. किञ्चिदुष्यमनाच्च A. कल्पितत्वष्यमत्यष्ट C. 16. ०निरर्थयोभ्यानुयोगः C. 17. कृतिक० C.

विभुत्वान्नित्यः[18] किं न स्यादिति। नापि स्वव्याघातकोत्तरत्वं[19] [A]व्याघातकर्तृत्वं (वा); व्याघातो हि न विनाशः, जन्यमात्रस्य तथात्वात्; नापि विरोधोऽकार्यत्वात्। नापि स्वव्याघातज्ञापकत्वम्[A], यदि [20]लोष्टसाधर्म्यात् कार्यत्वादनित्यो नित्यसाधर्म्यादस्पर्शत्वान्नित्यः कथं न [21]स्यादित्यादेः [22]स्वव्याघाताप्रतिपादकत्वात्। अथ [23]स्वासाधकतासिद्धिप्रयोजकरूपेण परासाधकतासाधकलिङ्गप्रतिपादकत्वं [24]स्वव्याघातकत्वम्; [25]जात्युत्तरं हि 'इदमसाधकं प्रतिधर्मप्रतिहतत्वादि'-त्यादिकं[26] [27]प्रतिधर्मवत्पक्षमात्रं पुरस्कृत्य स्थापनां व्याहन्ति; अस्ति च स्वस्मिन्नपि [28]प्रतिधर्मवन्मेयत्वादिपक्षकमिति वर्धमानोपाध्यायाः[29] इति चेन्न, उक्तरूपस्य स्वपरासाधकतासिद्ध्यप्रयोजकत्वात्, उपायत्वे वा[30] [31]तदापत्तेर्दुर्वारत्वात्। तत्प्रयोजकत्वं तत्त्वेनाभिमतत्वमिति चेन्न; प्रतिधर्मवत्पक्षकत्वस्य [32]स्वासाधकतासिद्धिप्रयोजकत्वेन[33] [34]वाद्यभिमतत्वात्, प्रतिधर्मवत्पक्षकत्वस्य [35]वाद्युक्तस्य तत्राभावाच्च, प्रतिधर्मभेदात्। अथ दोषप्रयोजकत्वाभिमतरूपतदसाधकतासाधकत्वाभिमतलिङ्गोत्तरत्वं तत्; न च [36]सत्प्रतिपक्षेऽतिव्याप्तिः, तत्र सत्प्रतिपक्षितत्वस्य [37]असत्प्रतिपक्षितत्वादिति[38] चेन्न[39], [40]सद्धेतावसिद्धोत्तरेऽतिव्याप्तेः[41], साध्याभावसहचरितधर्मवत्पक्षकत्वस्य वाद्यभिमतस्य नित्यत्वरूपसाध्याभावशब्दरूपपक्षघटितमूर्त्तिकस्यासाधकत्वेनाभिमतेऽभा-

---

18. ०धर्माच्चभुत्वा०० A. 19. स्वव्याघातोत्तरत्वं A. A–A. in A only. 20. नो साधर्म्यात् C. 21. स्यानित्यादेः C. 22. स्वव्याघातप्रति० C. 23. स्वसाधकता० A, स्वासाधना० C. 24. स्वव्याघातकत्वं om. C. 25. हात्युत्तरं C. 26. ०हतत्वादिकं C. 27. प्रतिकर्म० C. 28. प्रतिकर्म० C. 29. वत्त्व मानोपध्यात्वा C. 30. उपायद्वेव C. 31. भेदापत्ते० C. 32–33. ०प्रयोजकत्वं न A, ०साधकताप्रयोजकत्वेन C. 34. वलभिमत० C. 35. वा मुक्तस्य C. 36. सप्रति० C. 37–38. सत्प्रतिपक्षत्वादिति C. 39. न om. C. 40–41. सत्वे तदपि ओ ओरतिव्याप्तेः C.

वादव्याप्तेश्च[42]। अङ्गवैकल्योपन्यासं विना प्रमाणदूषणोद्भावनं[43] जातिरिति चेन्न, अधिकोद्भावनाद्यतिव्याप्तेः[44]। असाधकत्वाव्याप्येन[45] [A]असाधकतासाधनं जातिरिति चेन्न[A], [46]असाधकतासाधनस्यानियमात्, [47]असदुक्तिकाव्यापनाच्च।

अत्रोच्यते—दूषणाप्रयोजकत्वाभिमतरूपकमुत्तरं[48] जातिः; भवति हि पक्षे प्रतिधर्मसहचरितधर्मवत्त्वं न [49]दूषणप्रयोजकमथ च[50] तत्त्वेनाभिमतम्; न च च्छलमेव तत्र, व्यभिचारित्वादेव तत्त्वेनाभिमतत्वात्, क्वचित् [51]संकरेऽप्यदोषात्; न च [52]निरनुयोज्यानुयोगस्तथा, दूषकत्वप्रयोजकत्वाद् व्यभिचारादेः; न च 'इदं निरालम्बनं व्यभिचारि वा [53]वस्तुत्वादि'त्यत्रातिव्याप्तिः[54], न हि सा जातिश्चतुर्विंशतिजातावनन्तर्भावादिति वाच्यम्, उपपत्तिसमायामन्तर्भावादिति संक्षेपः।

अथ कियत्यस्ता[55] इत्याकाङ्क्षायामाह—

साधर्म्यवैधर्म्योत्कर्षापकर्षवर्ण्यावर्ण्यविकल्पसाध्यप्राप्त्यप्राप्ति[56]प्रसङ्गप्रतिदृष्टान्तानुत्पत्तिसंशयप्रकरणाहेत्वर्थापत्त्य[57]विशेषोपपत्त्यु[58]पलब्ध्यनुपलब्धि[59]नित्यानित्यकार्यसमाः ॥ १ ॥

समशब्दः प्रत्येकमभिसम्बध्यते, तेन [60]साधर्म्यसमादयो बोध्याः। [61]साम्यञ्च समीकरणाभिप्रायप्रयुक्तत्वम्, 'अन्यथा [62]सदुत्तरास्फुर्त्तावहमेवापकृष्टः[63] स्याम्' इत्यभिप्रेत्य तत्प्रयोगात्, एतेनोक्तिसम्भवोऽपि

---

42. ०भावादिव्याप्तेश्च C. 43. ०दूषणोत्तरणं C. 44. अधिकोत्तरेणातिव्याप्तेः C. 45. असाधकतां बाप्येन C. A—A in A only. 46. साधकता A. 47. सत्वत्विका० C. 48. ०त्वाभिमतरूपकमुत्तरं occurs in A as a later insertion. 49—50. तूच्चाप्रयोजकनरवच C. 52. निरर्थयोज्यान्० C. 53—54. वर्णत्वातिव्याप्तिः C. 55. किरभ्यस्ता C. 56. ०प्राप्तव्याप्ति० C. 57. ०हेत्वन्नायत्त्य० C. 58. ०उपपत्ति० om. C. 59. ०लब्धनुलब्धि C. 60. साध्यसमा० C. 61. साध्यञ्च C. 62-63. सत्वत्तरान्मूर्त्तावहापकृष्टः C.

दर्शित इति वार्त्तिककृतां सरणिः[64]। परदूषकताप्रयोजकत्वाभिमतरूप-सजातीयरूपवत्त्वं स्वव्याघातकत्वं साम्यम्[65], एतेन [66]साधारणदुष्टता-बीजमपि[67] सूचितमित्याचार्याः। असाधारणन्तु तत्र तत्र [68]वक्ष्यते ॥२॥

तत्र प्रथमोपदिष्टौ साधर्म्यवैधर्म्यसमौ लक्षयति—

साधर्म्यवैधर्म्याभ्यामुपसंहारे तद्धर्मविपर्ययोपपत्तेः साधर्म्यवैधर्म्यसमौ ॥ २ ॥

[69]साधर्म्यवैधर्म्यसमाविति लक्ष्यनिर्देशः[70]। समशब्दः प्रत्येकमभि-सम्बध्यते, तेन साधर्म्यसम[71]वैधर्म्यसमावित्यर्थः। संज्ञाशब्दाविमौ विशेष्यपदासमवहितौ पुंलिङ्गौ, शुक्लादिपदवत्। जाती[72] इति सम्बद्धेऽपि[73] पुंस्त्वम्, जातिपदस्य [74]क्तिजन्तत्वेन पुंस्त्वादिति[75] तु न, "जातेः संक्षेपेणोक्तायाः" इति वार्त्तिकविरोधात्, "ताः खल्विमाः जातय" इति[76] भाष्यविरोधाच्च। "प्रतिषेधा"विति शेषात् पुंस्त्वमित्याचार्याः। उपसंहार इति विषयनिर्देशः वादिना साध्यसाधने कृत इत्यर्थकः, न तूपसंहारान्तः[77], साधर्म्यवैधर्म्याभ्यामित्यस्य लक्षणेऽसम्बन्धापत्तेः; न चावृत्तिः, [78]गौरवान्मानाभावाच्च। शेषं यथासंख्यं लक्षणद्वयपरम्, प्रत्यवस्थानपद[79]मर्थवशाद्विभक्ति[80]विपरिणामेनानुवर्तनीयम्। तद्धर्मस्य साध्यधर्मस्य विपर्ययोपपत्तेः तद्व्यतिरेकोपपत्त्यर्थं, तादर्थ्यस्य[81] सम्बन्धेन विवक्षितत्वात् 'कृते' इति तु विशेषयन्ति[82] टीकाकृतः, तेन

---

64. स वाल: A, शवाल:C. 65. साध्यम् C. 66—67. साधारणत्वष्ट-भावीमपि C. 68. एव A. 69. साधर्मयवैधर्म्यसमौ om. C. 70. लक्षणानिर्देशः C. 71. ०सम० om. C. 72. जातिः C. 73. सम्बन्धेऽपि C 74—75. व्यक्तिजन्यत्वेन पुंस्त्वादिति तु A, क्तिजन्तत्वेन पुंस्त्वादिति C. Jānakīnātha probably refers to the rule क्तिच् क्तौ च संज्ञायाम् (पाणिणि ३।३।१७४). 76. जातयाति C. 77. ०संहाराच्चः C. 78. गौरवात्मा० C. 79-80. C is faint. 81. तदर्थस्य C. 82. विशेषंति C.

साधर्म्येण तद्धर्मविपर्ययोपपत्त्यर्थ[83] प्रत्यवस्थानं साधर्म्यसमः, वैधर्म्येण [84]तद्धर्मविपर्ययोपपत्त्यर्थं प्रत्यवस्थानं वैधर्म्यसम[85] इत्युक्तम् ।

[86]नन्विमे सत्प्रतिपक्षयो[?]रतिव्याप्ते ; न च साहचार्यमात्रेण गमकमित्यभिमानेनेति विवक्षणीयम्, पक्षधर्मताया अपि पुरस्कारात् ; अथ साध्यहेतुभावमपुरस्कृत्य[87] साधर्म्येण तद्धर्मविपर्ययोपपत्त्यर्थं प्रत्यवस्थानमित्याद्यर्थं इति चेन्न, प्रकरणसमेऽतिव्याप्तेः ।

उच्यते—साध्यहेतुव्यापकतामपुरस्कृत्य जातित्वे सति वा सहचरितधर्मवत्ताज्ञानेन साक्षात् प्रत्यवस्थानं साध्यसमा, व्यापकतामपुरस्कृत्य साध्याभावसहचराभावप्रतियोगिमत्ताज्ञानेन साक्षात् प्रत्यवस्थानं वैधर्म्यसमा । प्रकरणसमायां तु न तेन साक्षात् प्रत्यवस्थानं किन्तु बाधज्ञानद्वारा[88], अतएव "इयं सत्प्रतिपक्षदेशनाभासा, सा तु[89] बाधदेशनाभासे"त्याचार्याः । साधनमात्रप्रयुक्ततद्धर्मकत्व[90]पुरस्कारेण सत्प्रतिपक्षदेशना साध्यसमेत्यादिकं तु शूलपाणिप्रभृतयः । प्रत्येकं चैते द्विधा, [91]सद्विपयेऽसद्विषये च ; [92]अन्त्योऽपि द्विधा, [93]सदुक्तिकतदन्यभेदात्[94] । विपयः स्थापना । [95]असदुक्तिकमुक्तिदोषादेव दुष्टं[96] [97]न तूच्यमानादर्थात्[98] । तत्राद्योदाहरणम्[99]—'शब्दोऽनित्यः कृतकत्वाद्घटवत्'[100] इति स्थापनायाम् अस्पर्शत्वान्नित्याकाशसाधर्म्यादनित्यघटवैधर्म्याद्वा[101] नित्यः किं न स्यादिति । द्वितीयोदाहरणम्—'आत्मा क्रियावान् क्रियाहेतुगुणवत्त्वात्' इत्युपसंहारे विभुत्वान्निष्क्रियाकाशसाधर्म्यात् [102]क्रियावद्वैधर्म्याद्वाऽक्रिय एवास्त्विति । अन्त्योदाहरणम्

83. विपर्ययसिद्धयर्थं C. 84. तद्धर्मेण यद्धर्मविप० C. 85. वैधर्म्यसमः om. C. 86. न विमे C. 87. ०भावं न पुर० C. 88. ०ज्ञानत्वावा C. 89. सत्वे C. 90. ०तदकत्व० C. 91. सविषये० C. 92. अन्त्येऽपि A, अन्त्योऽस्त्वपि C. 93—94. असत्त्वक्तिकज्ञान्य० C. 95—96. असत्त्वक्तिकं उक्तिदोषादेवत्वक्तं C. 97—98. ष्टंतदूष्यमान्यतोत् C. 99. तत्राद्योहरणम् C. 100. कृतकत्वाद्यावत् C. 101. ०वैधर्म्यात्वा C. 102. क्रियावत्त्वेधर्म्या० C.

—'शब्दो नित्योऽस्पर्शत्वादि'त्युक्ते [103]प्रत्यक्षत्वादनित्यसाधर्म्यान्नित्याकाशवैधर्म्याद्वा [104]नित्यताविधुरः किं न स्यादविशेषादि'ति।

अन्ये तु—साधर्म्यवैधर्म्याभ्यामुपसंहारे कृते तद्धर्मविपर्ययोपपत्तेः तद्धर्मव्यतिरेकप्रतिपत्त्या प्रत्यवस्थानं[105] लक्षणार्थः[106]। जात्योर्भेदस्तु विषयद्वैविध्यकृतो बोध्यः। एवञ्च प्रमाणान्तरेण बाधदेशनाभासोऽपि संगृहीत एव। यदि च प्रकरणसमा बाधदेशनाभासा[107] स्यात्तदा तत्सूत्र"स्थोभयसाधर्म्यादि"ति † पदस्वरसादनुमानमात्रेण बाधदेशनाभासस्य [108]संग्रहः स्यानु[? स्यान्नानु]मानान्तरेण। प्रकरणसमा तु सत्प्रतिपक्षदेशनाभासा[109], "प्रक्रियासिद्धे"रिति तदीयसूत्रे[110] वचनात्[111] प्रक्रिया प्रकृता [112]साध्यतदभाववत्तयाऽनिश्चयरूपा, तत्सिद्धेरित्यूचिरे।

अत्राचार्यादयः—एवं प्रत्युत्तरसूत्रं नोपपद्येत, तथा हि—तुल्यबलमपि यदि बाधकं[112] तदा स्थापनयैव[113] किं नोत्तरं बाध्यत[114] इति प्रकरणसमप्रत्युत्तरसूत्रतात्पर्यं वक्ष्यते[115]। न चैतत् प्रतिसाधनसद्भावमात्रवादिनं[116] प्रत्युपपद्यते, "प्रक्रियासिद्धे"रिति त्वन्यथैव व्याख्यास्यते। प्रमाणान्तरबाधदेशनाभासवच्च[117] प्रमाणान्तरसत्प्रतिपक्षदेशनाभासोऽपि[118] संग्राह्यः, न चैतत् साधर्म्यपदस्य यथाश्रुतार्थत्वे सम्भवति[119], साधर्म्यपदस्य मानमात्रोपलक्षणार्थत्वे[120] वृथा विद्वेषोऽस्मासु। अत्रत्यश्च[121] प्रत्युत्तरसूत्रं विशेषदर्शनात्तुल्यबलत्वमपवदत्[122] [123]सत्-

---

103. अप्रत्यक्षत्वा स नित्य० C. 104. ०नित्याकाश्यवधर्म्यात्वा C. 105. जातिरूपं add. A. 106. लक्षणानु C. 107. ०देशलाभासा C. †. उभयसाधर्म्यात् प्रक्रिया- सिद्धेः प्रकरणसमः, न्या. सू. ५।१।१६. 108. स्तुग्रगहस्यानु० C. 109. ०दशलाभासा C. 110. तदीयसूत्रे om. A. 111. इत्यर्थः add. A. 112. साध्ये तद० C. 112. बाधकः C. 113. स्थापयैव C. 114. वाच्यत C. 115. वक्ष्यति C. 116. ०सत्तावसत्तावादिनं C. 117. ०वच्च smudged in C. 118. ०देशलाभासमपि C. 119. ससति C. 120. ०लक्षणानत्वे C. 121. अत्र तयो C. 122. ०दर्शनाच्छुन्यबलत्वमपरकृत C. 123. सत्पक्ष० C.

प्रतिपक्षतामेव तिरस्करोति[124], न बाधम् ; तुल्यबलेन बाधाभिधायिनि तदपवादेन बाधमेव बाधते तदिति चेन्न, व्याघातस्यैवोद्भटापराधतया [125]वक्तुमुचितत्वात् । उद्भटत्वं[126] चोभयप्रतिपन्नत्वम्, अशक्तिविशेषोन्नायकतया वा निग्रहस्थानान्तरसम्भवे व्याघातस्यैवोद्भाव्यत्वमिति समयसम्प्रतिपत्तेरिति वदन्ति ।

अत्रोच्यते—तवापि कथं प्रमाणान्तरेण सत्प्रतिपक्षदेशनाभासः संग्राह्यः ; न कथञ्चित्, प्रतिपक्षस्य [127]प्रत्यनुमानरूपत्वादनुमानेनैव तदाभासस्य संग्राह्यत्वादिति चेत् ; तदेतदस्माकमपि यदि स्यात्तदा कतमद्दूषणम्[128] ? तथापि वैधर्म्येण[129] सत्प्रतिपक्षदेशनायाः संग्रहो न स्यादिति चेन्न, न ह्युभयसाधर्म्यपदं साध्यतदभावयोः साहचर्यपरम्, किन्तु प्रतिस्थापनासाध्यान्वयव्यतिरेकयोः साहचर्यपरम्, तेनान्वयव्यतिरेकाभ्यामिति तदर्थात् ; प्रकरणसमप्रत्युत्तरसूत्रस्यापि[130] प्रतिपक्षात्[131] सत्प्रतिपक्षात् प्रकरणसिद्धेर्यः[132] प्रतिषेधः [133]स नोपपद्यते, तत्प्रतिपक्षस्य स्थापनानुमानस्योपपत्तेः व्याप्तिग्राहकसम्पत्तेरधिकबलत्वात्[134] [इत्यर्थः] । यद् वा—प्रतिपक्षो हि व्याप्तिग्रहादिरूपोपपत्तिमान्भवत्ययश्च[135] न तथेति[136] हेत्वर्थः । व्याघातश्च साधारणं [137]दुष्टताबीजमित्यसाधारणमत्र प्रत्युत्तरितमिति [138]नात्रत्योत्तरसूत्रानुपपत्तिरपि । तस्मात् प्रकरणसमप्रत्युत्तरसूत्रे "प्रतिपक्षात्[139] प्रकरणसिद्धे"रित्यस्य वैयर्थ्यमेव अन्येषां व्याख्याप्रत्याख्यानाय [140]ज्यायः । किञ्च नाम्नि प्राचां व्यवहारोऽप्यपेक्षितः[141], स चैवं व्याहन्येत, [142]अनैकान्तिक-

---

124. ०स्कारेति C. 125—126. वक्तुसूचितत्वाद्भटत्वं C. 127. प्रत्यनुस्मन० C. 128. ०भूषणं C. 129. तु add. C. 130. This refers to प्रतिपक्षात् प्रकरणसिद्धेः प्रतिषेधानुपपत्तिः प्रतिपक्षोपपत्तेः, न्या.सू. ५।१।१७. 131. प्रतिपक्ष C. 132. यः om. C. 133. समोपपद्यते C. 134. ०सम्पत्ते बाधकबलत्वात् C. 135. ०मानवत्ययं C. 136. कथेति C. 137. स्वष्टताबीजनित्य० C. 138. ना प्रत्यात्तर० C. 139. प्रतिपक्षात् om. C. 140. Writing in C effaced. 141. ०पयेक्षितः C. 142. अन्येका० C.

देशनाभासेयमिति हि वार्त्तिककृतां व्यवहारः। अयं व्याघातस्तवापि तुल्य इति[143] चेन्न, अनैकान्तिकपदस्य योगेन सत्प्रतिपक्षे प्रवृत्तेः—एकस्मिन्नन्ते नियत ऐकान्तिकस्तद्विपरीतोऽनेकसाधक इत्यर्थात्। तदनयोः स्थापनाहेतुदूष्यः, प्रतिसाधनबुद्धिर्द्वारम्, सत्प्रतिपक्षत्वमारोप्यम्, वादिमध्यस्थयोस्तद्भ्रान्तिः फलम्; अपुरस्कृतप्रयोजकरूपसाध्याभावसहचरितसाध्यवद्वृत्तिव्यतिरेकप्रतियोगिनोः प्रतिसन्धानं बीजम्; अबुद्धिपूर्वके प्रमादो बुद्धिपूर्वके प्रतिभाक्षयो[144] 'मयि वदति[145] कः समर्थ' इति [146]स्वप्रौढिचिख्यापयिषा[147] वाऽवसरः[148]; दुष्टताबीजन्तु चिन्त्यते। द्विविधं तत्—साधारणमसाधारणञ्च। तत्र प्रथमो नानाप्रकारो व्याघातो वक्ष्यते। द्वितीयं [149]युक्ताङ्गहीनत्वमयुक्ताङ्गाधिकत्वमविषयवृत्तित्वं वा ॥ २ ॥

तत्र युक्ताङ्गहीनत्वमनयोः प्रदर्शयति—

गोत्वाद्गोसिद्धिवत्तत्सिद्धिः ॥ ३ ॥

यथा गोत्वात्[150] तन्नियतात्[151]गोः सास्नादिमत्त्वादेः[152] सिद्धिः, तथा साधर्म्यादपि[153] नियतादेव साध्यसिद्धिः, न सहचरितमात्रादेरतो[154] न युक्तमेतदित्यर्थः। यदि ब्रूयात्—[155]तवैवायमभ्युपगमः न त्वस्माकम्, तदोच्यते—यदेत्तव[156] नियममनपेक्ष्य तत् किं[157] स्वेच्छया पराभ्युपगमेन वा। नाद्यो व्याघातात्। तथा हि—नेदं[158] साधकं साध्याभावसहचरितधर्मवत्पक्षकत्वादित्यादिकं[159] हि तवाभिमतम्, तच्चेदं[160] जात्युत्तरमपि व्याप्नोति—नेदमसाधकं तदभावसहचरितधर्मवत्पक्षकत्वा-

143. तुल्यताति C. 144. प्रतिभा अयो A, प्रतिभास्कयो C. 145. वगंति C. 146-147. स्वप्नौ ति चिख्यायरिवा C. 148. रात् वसवः C. 149. युक्ताङ्गाङ्ग० C. 150. गोत्वा C. 151-152. गो संवादिमत्त्वादेः C. 153. साधर्म्यादि A. 154. ०मात्रादेवातो C. 155. तदेवायम० A. 156. यदे उत्तर C. 157. तदि C. 158. मङ्ग C. 159. ०दित्यादि A. 160. तद्भेदं C.

दिति[161] प्रयोगसौकर्यात् । [A]किञ्च, दूषण(ा)समर्थोयमिति चेन्न जानासि, प्रयोगो व्याहन्येत, बुद्धिपूर्वकत्वात् प्रयोगस्य ; अथ जानादि[? जानासि], न तल्लिङ्गम् ; तिरस्कृत्य लिङ्गापेक्षणे च समानधर्मवत्त्वज्ञानं प्रतिरोधकमिति व्याहन्येत, तद्व्याघाते च कृतस्तज्ज्ञानत[? कृतं तज्ज्ञानेन] ; एतत्सिद्धिर्लैङ्गिकी तद्धर्मवत्ताज्ञानकाले एव तदवगतमिति चेत्तर्हि तदवगमकाले किमपि न सिध्यति त[? तव] ; ओमिति ब्रुवतश्चानुभवलोकव्यवहारव्याघातः स्वपक्षसिद्धिमात्रव्याघातश्च ; तस्मादयुक्तमेतत्तन्मात्राङ्गत्वमधिकमभ्युपगतम्[A] । न द्वितीयः, परेणास्यानङ्गीकरणात्, तस्मान्नियममपेक्ष्य[162] साधकः तदेव [? स एव] च प्रतिरोधकः[163] ; स चेन्नास्ति, स्फुटं युक्ताङ्गहीनत्वमिति । असाधकता चान्यत्र [164]विस्तृतेति नेह निरूपिता[165] ॥ ३ ॥

॥ समाप्तं [166]सत्प्रतिपक्षदेशनाभासप्रकरणम् ॥

161. ०पक्षकत्वा C. A—A in A only. 162. तस्मान्निगम० C. 163. प्रतिबोधकं C. 164-165. विस्मन्ति नेहन्ति रूपिता C. 166. सुप्रतिपक्षदेशला० C.

क्रमप्राप्तं जातिषट्कं लक्षयति—

साध्यदृष्टान्तयोर्धर्मविकल्पा[1]दुभयसाध्यत्वाच्चोत्कर्षापकर्षवर्ण्यावर्ण्यविकल्पसाध्यसमाः ॥ ४ ॥

प्रत्यवस्थानमिति प्रकृतम्। साध्यं पक्षः, तेन पक्षदृष्टान्तयोः पक्षे दृष्टान्ते वा[2] साध्यसाधनयोरेकस्माद्[3] [4]धर्मविशेषज्ञानाद्वा[5] प्रत्यवस्थानमविद्यमानधर्मप्रसञ्जनमुत्कर्षसमः। निष्कर्षस्तु—[6]व्यापकतामपुरस्कृत्य जातित्वे सति वा पक्षदृष्टान्तान्यतरस्मिन्, साध्यसाधनयोरन्यतरेणाविद्यमानधर्मप्रसञ्जनमुत्कर्षसमः। उदाहरणम्—शब्दोऽनित्यः कृतकत्वादित्युक्तेऽनित्यं कृतकं वा घटादि रूपवत्क्रियावदश्रौत्रं[7] दृष्टमिति शब्दोऽप्येवं स्यादविशेषात्। एवं यद्यनित्यदृष्टान्तसाधर्म्याच्छब्दस्यानित्यत्वं हन्त [8]नीरूपपक्षसाधर्म्यात् कृतकत्वान्नीरूपसाधर्म्यादनित्यत्वादेरपि कुतो न[9] दृष्टान्तस्य नीरूपत्वम्—इति सद्विषये। असद्विषये तु—यदि क्रियाहेतुगुणयोगाल्लोष्टवत्[10] क्रियावान् आत्मा तद्वत्[11] क्रियावत्त्वात् क्रियाहेतुगुणयोगाद्वा[12][13]स्पर्शवानपि स्यात्, साहचर्याविशेषात्; लोष्टादि वा नीरूपसाधर्म्यात्तत एव नीरूपं किं न स्यादविशेषात्। असदुक्तिकृता च न सम्भवति, अविद्यमानधर्मप्रसञ्जनस्य सत्त्वा[? तत्त्वा]नुपपत्तेः। 'यदि निर्वह्निः [13]स्यान्निर्धूमः स्यादि'त्यत्रातिव्याप्तिवारणाय सत्यन्तम्।

परिशिष्टकृतस्तु—पक्षदृष्टान्तयोर्धर्मविकल्पः[14] व्याप्यव्यापकयोरन्यतरेण धर्मान्तरस्य योगवियोगौ[15], उभयत्रापि योगे[16] वियोगे [17]चोत्कर्षासम्भवात्। अनित्यं घटादि रूपादिमदश्रौत्रञ्च दृष्टम्[18], शब्दोऽपि

1. ०दृष्टान्तयोत्वस्मारकं पा० C. 2. वा om. A. 3. तरस्याद् A. 4—5. धर्मविशिष्टक्षानत्वो C. व्यापकसम० A. 7. ०वदश्रोत्नं C. 8. नीरूपक्ष० A. 9. न om. A. 10. ०योगाघ्रोष्टवद् C. 11. तत्तत् C. 12. ०योगात्वा C. 13. स्या निर्धूमः C. 14. दृष्टान्तवोधर्म० C. 15. योगवियोगे A. 16. योग A. 17. चाकर्षा० C. 18. ०अश्रोत्नं चतुष्टं C.

तथा स्यादविशेषात्। तथा च विवक्षितविपरीतसाधनाद्विरुद्धो हेतुस्तद्देशनाभासा[19] चेयम्। तदस्याः साध्यधर्मिवियुक्तस्य[20] धर्मस्य दृष्टान्तधर्मिणि सिसाधयिषितधर्मयोगोपलम्भो मूलमिति[21] प्रोचुः। इतश्च यद्यपि पक्षे[22] [23]तदवृत्तिदृष्टान्तवृत्तिधर्मस्य साध्यसाधनयोरन्यतरेण सह [? साह]चर्यबलादुपपादनात्मिका [24]जातिरुत्कर्षसम इति वाक्यार्थः[25] प्रतीयते, तथापि [26]दृष्टान्तोत्कर्षाव्यापकं लक्ष्यञ्च तदप्यभिमतम्, यतोऽपकर्षो दृष्टान्ते न [27]सम्भवतीत्युक्तम्। तस्मात् साध्यसाधनयोरन्यतरेण [28]पक्षदृष्टान्तयोरन्यतरस्मिन् [29]स्वावृत्त्यन्यतरवृत्तिधर्मोपपादनात्मिका जातिरुत्कर्षसमेति तेषामाशयः।

भास्करादौ त्वन्यतरवृत्तीति शून्यमेतदेव लक्षणमेतन्मते दृश्यते[30], तत्त्[31] न युक्तम्, तदवृत्तिधर्मप्रसञ्जनस्य[32] निरुक्तधर्माविकल्पानुत्थत्वात्। तदेतदस्मभ्यं न रोचते, पक्षदृष्टान्तयोरित्यस्यावृत्त्यापत्तेः। [33]तदत्रानभिमतधर्मसहचरितधर्मदर्शनं कारणम्[34], हेतुर्दूष्यः, प्रतिकूलतर्कत्वमारोप्यम्[35], तद्भ्रान्तिः फलम्, तदाभासा[36] चेयम्।

सहचरितधर्मव्यावृत्ता[?०वृत्त्या] पक्षे [37]साध्यसाधनयोरन्यतराभावसाधनात्मिका [38]जातिरपकर्षसमा। उदाहरणम्—'शब्दोऽनित्यः कृतकत्वादि'त्युक्ते 'घटः[39] कृतकोऽनित्यो वा मूर्त्तः, शब्दस्तु न तथेति न कृतकः[40] अनित्यो वे'ति। अत्र साध्यापकर्षे बाधदेशना सत्प्रतिपक्षदेशना वा, [41]हेत्वपकर्षेऽसिद्धिदेशना। दृष्टान्ते तु नापकर्षः, पक्षे

---

19. ०भाय सा C. 20. ०विभुक्तस्य C. 21. ०लम्भो नमिति C. 22. भेदवृत्तिपक्षे add. C. 23. भेदवृत्ति० C. 24. ०वलामुपदेनात्मिका C. 25. वाक्यानु C. 26. दृष्टान्तेरुत्कर्षा० C. 27. स्तं भवति० C. 28. ०दृष्टान्तयोतरन्य० C. 29. स्ववृत्त्य० C. 30. दृश्यते om. C. 31. तत C. 32. ०प्रसनस्य C. 33–34. तदावृत्तिमतधर्मसहचरितधर्मधर्मदर्शनकरणं C. 35. ०तर्कत्व नारोप्य C. 36. तदभावा C. 37. साध्य० om. C. 38. इ वपकर्ष० C. 39. घटक C. 40. कृतको C. 41. हेतु तुपकर्षे C.

साध्यस्य सन्दिग्धत्वात्, तद्वृत्तिसाध्यसहचाराग्रहेण तद्व्यावृत्त्या[42] Aदृष्टान्ते साध्यव्यावृत्तेरयुक्ति[? ०रनुक्ति]सम्भवत्वात्, धर्मान्तरापकर्षे च प्रकृAतादूषणेऽर्थान्तरं निग्रहस्थानं, न जातिरित्याचार्याः। यद्यपि साध्यव्यापकापकर्षे नार्थान्तरम्, व्यापकानुपलब्धिबाधात्मत्वात्[43], पक्षतावच्छेदकापकर्षस्तु स्फुट एव दूषणम्, तथापि तस्याकृतिगणान्तर्भाव इत्याशयः।

नव्यास्तु—दृष्टान्तेऽपि पक्षे[44] [45]गृहीतहेतुसाहचर्यधर्मव्यतिरेकात् Aसाधनापकर्षोऽन्यत्रगृहीतसाध्यसाहचर्यधर्मव्यतिरेकात्A, साध्यापकर्षश्च हेतुसाध्यविकलत्वदृशनाभासः सम्भवतीति नैपः युक्तः पन्थाः ; किन्तु पक्षदृष्टान्तयोरन्यतरस्मिन् सहचरितधर्मव्यतिरेकात् साध्यसाधनयोरन्यतराभावापादनात्मिका[46] जातिरपकर्षसमेत्याहुः[47]। [48]यद्यप्येवं वैधर्म्यसमा[49] दत्तजलाञ्जलिः स्यात्तथापि तत्र स्थापना(याः) साध्यसहचारतद्व्यतिरेकप्रतियोगिधर्मत्वपुरस्कारः, इह तु साध्यसहचरितधर्मव्यावृत्तित्वपुरस्कारो भेदक इत्यवसेयम। एतदप्यस्मभ्यं[50] न रोचते[51], [52]धर्मान्तरापकर्षबहिर्भावे मानाभावात्। तस्मात् साध्यदृष्टान्तयोरन्यतरस्मिन् सहचरितधर्मव्यतिरेकाद्धर्मव्यतिरेकसाधनात्मिका जातिरपकर्षसमेत्येवं परं ज्यायो न त्वेतौ पन्थानाविति संक्षेपः।

[53]गमकतौपयिककिञ्चिद्धर्मविशिष्टहेतुव्यतिरेकाव्यतिरेकान्यतरेण[54] दृष्टान्ते [55]दृष्टान्तौपयिकधर्मविरहस्यापादनं प्रत्यवस्थानात्मिका वा जातिः वर्ण्यसमा। उदाहरणम्—'[56]शब्दोऽनित्यः कृतकत्वाद् घटवदि'त्युक्ते

---

42. ०व्यावृता C. A—A in A only. 43. ०बाधार्थत्वात् C. 44. पक्षो C. 45. ०हेतुस्मह० A. A—A in A only. 46. ०भावनापादना० A. 47. समेत्याङ्ग A. 48. अन्यप्येवं C. 49. न तु add. C. 50. ०असस्मयं C. 51. रोचिते C. 42. धर्मानरा० C. 53. गणक० C. 54. ०हेतुव्यातिरेकान्य० A. 55. दृप्टं तौ० C. 56. शक्ताऽनित्यः C.

[57]पक्षधर्मत्वविशिष्टहेतुः[58] दृष्टान्ते वर्त्तते[59] चेत्, दृष्टान्ते पक्षत सिद्ध्यभावरूपा प्राप्तेत्यसिद्धसाध्यकत्वम, नो चेद्धेतुवैकल्यमेव[60] दृष्टान्तस्य[61]। गमकतौपयिकत्वञ्च तत्त्वेनाभिमतत्वम्, तेन सन्दिग्ध-साध्यकवृत्तित्वं साध्यवत्तया[62] [63]सिसाधयिपितसाध्यकवृत्तित्वरूप-विशेपादीनां[64] संग्रहः, अन्यथा तद्विशिष्टहेत्वसत्त्वादिना[65] प्रत्यव-स्थानासंग्रहापत्तेः। तद् यथा—शब्दवृत्तित्वविशिष्टहेतोर्घटेऽसत्त्वात् साधनवैकल्यम्, तत्सत्त्वे च दृष्टान्तस्यापि शब्दत्वात् साध्यासिद्धिः, शब्दमात्रे विवादादित्यादि। अस्यास्तु[66] धर्मविशेपविशिष्टहेतुद्वारम्[67], दृष्टान्तस्तद्द्वारा हेतुर्वा दूष्यः। यत्र हेतुरुपदर्शनीयस्तत्र [68]साध्यानिर्णये सन्देहे वा[69] साध्यव्याप्यत्वस्य तदभावव्याप्यत्वस्य [70]वा सन्देहात् सन्दिग्धव्याप्यत्वं सन्दिग्धविरुद्धत्वं वा ; अथ यथोक्तरूपवान् हेतुः पक्ष एव, तदाऽसाधारण्यमिति प्रत्यवस्थानात् तद्भ्रान्तिः फलम्, तद्देशना-भासा चेयम्। कथमिदं सूत्रपदाल्लभ्यत[71] इति चेत्, दृष्टान्ते धर्म-विकल्पाद्धर्मविशेपाद्विशिष्टहेतुसत्त्वासत्त्वयोर्धर्मयोरन्यतरस्मात् प्रत्य-वस्थानमित्यर्थात्। साध्यदृष्टान्तपदे च वर्ण्यावर्ण्यसमयोर्यथासंख्य-मन्वीयेते[72]। वर्ण्यत्वञ्च [73]ख्यापनीयत्वं साधनायोग्यत्वमसिद्धत्वम्, तेन यथा पक्षे साध्योऽसिद्धस्तथा दृष्टान्तेऽपि साध्यादीति वर्ण्यसमार्थः।

आचार्यादयस्तु—पक्षदृष्टान्तयोर्धर्मस्य विशिष्टहेतोर्विकल्पो वैचित्र्यं सत्त्वासत्त्वे, तत्प्रयोज्यं प्रत्यवस्थानमित्यर्थः। लक्षणन्तु—यद्विशिष्ट-हेतोर्दृष्टान्ते गमकत्वमित्यभिमानेन दृष्टान्तस्य ख्यापनीयत्वापादनं वर्ण-समेत्याहुः।

---

57. पक्षे धर्म० C. 58. विशिष्टा हेतुः C. 59. वर्णते C. 60. एव om A. 61. दृष्टान्तस्य om. A. 62. साध्यवत्तया om. C. 63—64. सिसाधयिषिततद्वृत्तित्वस्वरूपं० A. 65. ०हेतुसत्त्वा० A. 66. अस्य A. 67. ०हेतुत्वावं C. 68—69. साध्यनिर्णयसन्देहेन A. 70. चासन्देहात् C. 71. पदादत्यत C. 72. ०संख्यमन्नीते C. 73. अख्याप० A.

पक्षे [74]यत् किञ्चिद्गमकतौपयिकरूपविशिष्टहेतोः सत्त्वासत्त्वान्यतरेणानुमित्यौपयिकधर्मविरहापादनं[75] प्रत्यवस्थानात्मिका वा जातिरवर्ण्यसमा। यथा साध्यवत्तया निश्चीयमानधर्मिगतत्वेन निश्चीयमानत्वं गमकतौपयिकम्, तद्विशिष्टहेतोः पक्षेऽसत्त्वे हेत्वसिद्धिः, सत्त्वे पक्षस्यापक्षत्वं साध्यनिश्चयात्, शेषं पूर्ववत्। अवर्ण्यत्वमख्यापनीयत्वम्, यथा हि दृष्टान्तो[76] न साध्यवत्तया[77] ख्यापनीयोऽनेन तथा[78] पक्षोऽपीत्यवर्ण्यसमार्थः। [79]तदत्रोक्तगमकतौपयिकधर्मवान् हेतुर्द्वारम्; हेतुर्दूष्यः, असिद्धत्वमारोप्यम्, तद्देशनाभासा चेयम्।

प्राञ्चस्तु—[80]यद्गमकतौपयिकरूपविशिष्टस्य हेतोः पक्षे सत्त्वमप्रयोजकं तद्विशिष्टहेतोः पक्षे सत्त्वासत्त्वापादनेनाख्यापनीयत्वापादानायमवर्ण[? ०दानमवर्ण्य]समा; उत्थानं तु दृष्टान्ते गमकतयौपयिकधर्मस्यात्तस्य [?   ] पक्षे सत्त्वे नेदं ख्यापनीयं सिद्धत्वात्, न चेत्तथापि [81]हेत्वनुपसंहारादिति धर्मविकल्पः पूर्ववदित्याहुः।

साध्यदृष्टान्तान्यतरवृत्तिधर्मे दोषदर्शनात् प्रकृते हेतोः [? प्रकृतहेतोः] प्रकृतसाध्यं प्रति दोषापादनात्मिका जातिर्विकल्पसमा। धर्मविकल्पपदस्य[82] धर्मदोषपरत्वात्, स च दोषो व्यभिचारोऽन्यश्च। व्यभिचारमात्राभिधानन्तु प्राचामुदाहरणमात्रम्, अन्यथा हेत्वन्तरस्येत्थमुद्भावनेऽधिकतापत्तेः। व्यभिचारोऽपि त्रेधा—हेतोर्धर्मान्तरं प्रति, [A]धर्मान्तरस्य साध्यं प्रति[A], धर्मान्तरस्य धर्मान्तरं प्रति च। आद्यमपि दृष्टान्तभेदेन, पक्षदृष्टान्तभेदेन, पक्षभेदेन वा। तत्राद्यं[83] यथा भाष्ये—'क्रियाहेतुगुणयोगात् क्रियावानात्मा लोष्टवदि'त्युक्ते यथा [84]तद्युक्तं

---

74. यत् कि गम० C. 75. ०विरहात्म्यापादनं C. 76. दृष्टान्तो C. 77. ०वत्ताया C. 78. यथा C. 79. तदवोक्त० C. 80. यद्गामक० C. 81. हेत्वत्वप० A. 82. ०विकल्पे पदस्य A. A—A in A only. 83. तत्राद्यं om. A. 84. तत्=क्रियाहेतुगुणः.

लोष्टं गुरु [85]समीरणश्च न तथा[86], तथा तद्युक्तं लोष्टं क्रियावदक्रियश्चात्मा स्यात्, विशेषाभावात्। द्वितीयं यथा वार्त्तिके—'शब्दोऽनित्यः [87] उत्पत्तिधर्मकत्वाद्घटवदित्युक्ते[88] यथोत्पत्तिधर्मकः शब्दो विभागजो घटस्तु न तथा, एवं घटोऽनित्यः शब्दस्तु न तथेति। तृतीयं यथा—वाङ्मनसे[? ०मनसि] अनित्ये निःस्पर्शत्वादित्युक्ते[89] यथा निःस्पर्शं मनो मूर्त्तं [90]वाक् तु न तथा[91], किञ्चिदस्पर्शमनित्यं किञ्चिन्न नित्यमस्त्वविशेषात्। एवं द्वितीयतृतीयेऽपि त्रिधा उदाहार्ये। न चाकाशं[92] शब्दविधुरं मेयत्वादनाकाशवदि'त्यत्रान्यतराप्रसिद्धिः, पक्षत्वदृष्टान्तत्वान्यतरधर्मवत्त्वस्य वाच्यत्वात्, उदाहरणार्थं वा तत्[93], प्रकृतेऽनन्वयि वा[94], यत्किञ्चित् प्रति यस्य कस्यचिद् दुष्टत्वेन प्रकृतसाध्ये प्रकृतहेतोः सदोषत्वापत्त्या[95] प्रत्यवस्थानमात्रस्य विवक्षितत्वात्। अतएव विपक्षधर्मो [? ०धर्म] दोषदर्शनात्[96] प्रत्यवस्थानमपि नाधिकम्। तदत्र दोषदर्शनं मूलम्, हेतुर्दूष्यः, अनैकान्तिकत्वाद्यारोप्यम्, तदाभासा [98]चेयम्।

तद्धेतुसिद्धस्यैव तद्धेतुकानुमित्यङ्गत्वम्[99] इत्यभिमानेन प्रत्यवस्थानं साध्यसमा[100]। तदिदमुक्तम्—उभयसाध्यत्वादिति। पक्षदृष्टान्तौ तद्धर्महेत्वादि [101]चेत्युभयम्, तस्य साध्यत्वाभिमानात्[102] प्रकृतहेतुकानुमितिविषयत्वाभिमानादित्यर्थः। [103]चकार इह धर्म-

---

85-86. समीरणश्चातथा A, समीवलञ्च न तथा C. 88—89. ०धर्मकत्वादित्युक्ते C. 90—91. न तु वाक्यं तथा C. 92. च कोशं C. 93. ०हरणव्यधा वातत् C. 94. वा om. C. 95. सदोषत्वापत्त्या om. C. 96. ०दर्शना C. 97. नाधिकन C. 98. च om. C. 99. ०कानुनित्य० C. 100. C contains the additional reading तददियुक्तमुभयसाध्यत्वादिति। पक्षधर्मोदरे दर्शनात् प्रत्यवस्थानमपि नाधिकं तदत्र दोषदर्शनं न हेतुर्द्रव्यः अनेकान्तिकत्वाद्यारोप्यं तदाभासा चेयं तद्धेतुसिद्धस्यैव तद्धेतुधानुनित्यभिमानेन प्रत्यभिस्थानं साध्यसमा. 101. चत्यभयं C. 102. ०भिमानी C. 103. तदत्र द्रष्ट च० C.

विकल्पं समुच्चिनोतीति परमाचार्यवचनमनादेयम्, व्यर्थत्वात्। प्रवर्त्तते [104]चेयमित्थम्—पक्षदृष्टान्तलिङ्गानामेतत्[105] प्रयोगान्तर्भूतानामपि चेन्नैतत् [?] प्रयोगसाध्यता तदा साध्यांशेऽपि न स्यादविशेषात्। अथ तस्य प्रकृतप्रयोगसाध्यता, तदा पक्षादेरपि स्यादविशेषात्। एवञ्च प्रकृतप्रयोगाधीनानुमितेः पूर्वं पक्षाद्यज्ञाने कुतः[106] सा, [107]हेत्वभावात्; तज्ज्ञानेऽपि[108] कुतः सा, हेत्वभावात्; एवं पक्षादावपि बोध्यम्। तदत्र यथोक्ताभिमानो मूलम्, हेतुर्दूष्यः, लिङ्गाद्यसिद्धौ स्वरूपासिद्धत्वादिकमारोप्यम्[109], तद्भ्रान्तिः फलम्, तदाभासा चेयम्॥ ४॥

आसां दुष्टत्वबीजं कथयति—

किञ्चित्साधर्म्यादुपसंहारसिद्धेर्वैधर्म्यादप्रतिषेधः॥ ५॥

अत्रैव प्रत्युत्तरक्रमः—[110] भवेदप्येवं यदि वयमनित्यसहचरितं कृतकत्वं घटे दृष्टमित्येवोपसंहरामः, किन्तु तद्व्याप्यं तदिति। एवं यदि रूपादिमत्त्वेनापि व्याप्तं भवेत्[111] भवेदप्यसौ रूपादिमान्, न [112]त्वेवम्। तदिदमुक्तम्—किञ्चित्साधर्म्यान्नियतादुपसंहारस्य साध्यस्य सिद्धेः वैधर्म्याद् विशेषादनियतात् [113]प्रतिषेधो नेति[114]। अव्यापकमपि साधकमिति[115] चेत्तर्हीदमसाधकम्, पक्षावृत्तिधर्मसहचरितधर्मवत्पक्षकत्वादिति[116] विवक्षितम्, तथा च पूर्ववद् व्याघातः। तदत्र युक्ताङ्गहीनत्वं दुष्टत्वबीजम्, एवमपकर्षसमेऽपि, वैधर्म्यादनियामकधर्मव्यावृत्तिरिति तु सूत्रार्थे विशेषः, वर्ण्यसमे तु पक्षसपक्षगतयोर्हेत्वोः[117] [118]किञ्चित्साधर्म्याद् व्याप्यतावच्छेदकरूपादुपसंहारसिद्धेरपक्षवृत्तित्वादिरूपाद् [119]वैधर्म्यादप्रतिषेध इति सूत्रार्थः।

---

104. चेदमित्थं A. 105, ०लिङ्गानादेतत् C. 106. कृत: C.
107—108. हेतुतावन्नेजज्ञानेऽपि C. 109. ०सिद्धत्वाद्यारोप्यं C.
110. भवेदेप्येवं C. 111. भवेत् om. A. 112. स्वेवम् C.
113—114. प्रतिषेधेनेति A, C. 115. साधकमिति om. C.
116. ०पक्षत्वादिति A. 117. ०सपक्षताया हेतो: C. 118. किं चेत् C.
119. वैधर्म्यपद० C.

इदमुक्तं भवति—व्याप्यतावच्छेदकावच्छिन्नस्य हि सपक्षसत्त्वं [120]दृष्टान्तताप्रयोजकम्, [121]न तु सिद्धार्थकत्वम्[122], तच्चेह[123] नास्ति, तद्रूपावच्छिन्नहेतुमत्वात्, दृष्टान्तस्यैवमनभ्युपगमे [124]तवापि व्याघात इति। तदत्रायुक्ताङ्गाधिक्यं दुष्टताबीजम्[125], अविषयवृत्तित्वञ्च [126]दृष्टान्तेऽनुक्तस्यासिद्धार्थत्वस्याङ्गत्वाभ्युपगमात् असिद्धार्थत्वस्याविषये[127] तदुपसंहारात्[128]। एवमवर्ण्यसमेऽपि, वैधर्म्यं तु [129]सिद्धार्थकत्वादिविशेषः[130], न हि तत् पक्षे लिङ्गम्[131]। विकल्पसमेऽपि साध्यं प्रति विलक्षणसहचरितत्वादुक्त[132]दोषविधुरसहचरितत्वाद्धेत्वोः[133] पक्षोपसंहारे सिद्धे[134] वैधर्म्यादिर्थान्तरेण व्यभिचारादेरप्रतिषेधः[135]। न ह्यन्यं प्रति व्यभिचारः प्रकृते दोषः, न वा [136]यत् किञ्चिद्[137] व्यभिचरति[138] तत् [139]सर्वमेव, व्याघातात्। एवं दोषान्तरदेशनायामपि [140]वाच्यम्। तदत्राविषयवृत्तित्वं दुष्टत्वबीजम्। [141]व्यभिचारादेरसाधकत्वमुचितम्, किन्तु तत्रैव तस्यैव, न त्वन्यत्रान्यस्य वेति। साध्यसमे तु मानान्तरसिद्धेन दृष्टान्तेन[142] मानान्तरसिद्धस्य पक्षस्य किञ्चित्साधर्म्यात् मानान्तरसिद्धव्याप्यत्वरूपत्वात् पक्षे विधेयधर्मोपसंहारसिद्धेर्वैधर्म्यात्[143] तल्लिङ्गासिद्धत्वाद्[144]धेतोरप्रतिषेधः, न हि पक्षादीनां तत एव सिद्धिः, अनुमित्यङ्गव्याघातात्, नाप्यनुमितिविषयसिद्धिमात्रं विरोधि, तत एव।

---

120. दृष्टान्तचाप्रयो० C. 121—122. ननु सिद्धार्थत्वं A. 123. तच्चेत् C. 124. कवादि C. 125. ०बाज C. 126. दृष्टान्तेऽयुक्तं C. 127. असिद्धार्थत्वविषये A, असिद्धार्थत्वाविशेष C. 128. च add. C. 139—130. सिद्धानुकत्वादिति शेषः C. 131. शूङ्गं A. 132. ०चरितत्वात्युक्तं C. 133. ०चरितत्वाद्धेतोः C. 134. ०संहारसिद्ध C. 135. ०देव प्रति० C. 136—137. अयं एकं प्रति A. 138. ०चारात् C. 139. गन्धमेव C. 140. बाच्यम् A. 141. चारादेव साध० C. 142. दृष्टान्तेन om. A. 143. ०सिद्धे धर्मेन्न C. 144. ०सिद्धाद् C.

तदिदमयुक्ताङ्गाधिक्यम्, तत्सिद्धत्वस्यानङ्गस्य[145] [164]पुरस्कारात्, अविषयवृत्तित्वञ्च, असिद्धसाधने तत्सञ्चारात् ॥ ५ ॥

[147]वर्ण्यावर्ण्यसाध्यसमासु[148] समाध्यन्तरमाह—

साध्यातिदेशाच्च दृष्टान्तोपपत्तेः ॥ ६ ॥

दृष्टान्तस्योपपत्तेः साधनवत्तया निश्चिते साध्यातिदेशाद् साध्यस्य पक्षे ज्ञापनाच्च अप्रतिषेध इत्यर्थः, अन्यथा भवदभिमतासिद्धेरिति भावः ॥ ६ ॥

॥ समाप्तं जातिषट्कप्रकरणम् ॥

॥ [149]तदिदं धर्मविकल्पोत्थजातिप्रकरणमामनन्ति[150] ॥

145. ०अनङ्गस्य om. A. 146. अपुरस्कारात् C. 147-148. वर्ण्यावर्ण्यसमेषु A. 149—150. तदिदं धर्मविकल्पोऽर्थजात्यप्रकरणमामनं A, यदिदं धर्मविकल्पोऽथजातिप्रकरणसमे नं ति C.

क्रमप्राप्ते[1] प्राप्त्यप्राप्तिसमे लक्षयति—

प्राप्य साध्यमप्राप्य वा हेतोः प्राप्त्याऽविशेषादप्राप्त्याऽसाधकत्वाच्च प्राप्त्यप्राप्तिसमौ ॥ ७ ॥

साध्यं कार्यम्, हेतोः कारणस्य, साधकत्वमिति शेषः। सोऽयं विकल्पः जात्युत्थानकथनार्थमतिरिक्तः[2] ; शेषं लक्षणपरम्, तदर्थस्तु—प्राप्त्याऽविशेषात् प्रत्यवस्थानं प्राप्तिसमः, अप्राप्त्याऽसाधकत्वात् प्रत्यवस्थानमप्राप्तिसमः, अविशेषः सिद्धत्वम्। तत्रायं निष्कर्षः—कार्यसम्बन्ध [? ०सम्बद्ध०]मेव जनकमित्यभिमानेन प्रत्यवस्थानं प्राप्तिसमः ; स चैवं प्रवर्त्तते—लिङ्गज्ञानस्य हि कार्यमनुमितिरूपम्, तच्च नातत्प्राप्तं [न तदप्राप्तं] जनकमतिप्रसङ्गात्, किन्तु प्राप्तमेव ; सच्च प्राप्यते नासदिति कार्यकारणयोः सत्त्वाविशेषान्न कार्यकारणभावः, न हि सदेव जन्यते ; तथा तत्प्राप्तञ्चेत्तदभिन्नमेव[3], यथा सागरं प्राप्ता गङ्गा न ततो भिन्ना, तथा च न[4] [5]हेतुहेतुमद्भावोऽभेदादिति। अप्राप्तिमात्रेण जन्यजनकभावातिप्रसङ्गात् प्रत्यवस्थानमप्राप्तिसमः ; स[6] चैवं प्रवर्त्तते—प्राप्तस्य तावज्जनकत्वं[7] न सम्भवति[8] [9]किन्त्वप्राप्तस्यैव[10], तथा चाप्राप्तत्वाविशेषाद्बाधबुद्धिमेव किं न जनयेत् (इति)। साध्यहेतुपदयोर्ज्ञाप्यज्ञापकपरत्वे [11]चापरे प्राप्त्यप्राप्तिसमे[12], तत्र सिद्धत्वं ज्ञातत्वम्, लक्षणन्तु जनकपदस्थाने ज्ञापकपदप्रक्षेपात् [13]पूर्ववत्। प्रवर्त्तते चेत्थम्[14]—अप्राप्य परामर्शो न [15]ज्ञापकोऽतिप्रसङ्गात्, किन्तु प्राप्य ; न चास्य लिङ्गिना[16] संयोगादिः[17] प्राप्तिरस्तीति [18]विषयित्वरूपा वाच्या ; तथा च परामर्श एव लिङ्गिस्फुरणात् ज्ञातत्वाविशेषान्न

---

1. ०प्राप्त A. 2. कथनार्थवतिरिक्त A, ०कथमानं च प उक्त C. 3. ०प्राप्तं चेतदभिप्रमे व C. 4. न om. C. 5. हेतुः हेतु० C. 6. न A. 7-8. मसम्भवात् A. 9-10. om. A. 11. च परे C. 12. ०समे om. C. 13. om. A. 14. प्रवर्ता चात्थम् C. 15. ज्ञापक इति० C. 16. लिङ्गेन C. 17. संयोगादिः om. A, असंयोगादि C. 18. विषयत्व C.

लिङ्गलिङ्गिनोः[19] [20]ज्ञाप्यज्ञापकभावः। अप्राप्तिसमस्त्व[१ ०समे त्व०] यमित्थं प्रवर्त्तते—लिङ्गज्ञानं न प्राप्तं किन्त्वप्राप्तम्, तथा चातिप्रसङ्गः, विपरीतमेव[21] किं न ज्ञापयेदिति[22]। कार्यज्ञाप्यसाधारणं साध्यत्वं कारणज्ञापकसाधारणञ्च साधकत्वं [23]नैकमस्तीति चेत्; ततः किम्, एकसंग्रहेऽपरासंग्रह[24] इति चेन्न, उभयघटिताभ्यां [25]लक्षणाभ्यामुभयसंग्रहात्। चतुर्विंशतिप्रवादस्तु संज्ञागतं [26]तमादाय, अतएव [27]प्रतिषेध्यप्राप्त्यप्राप्तिभ्यामप्रतिषेधातिप्रसक्त्या[28] प्रत्यवस्थानमपि साध्यहेतुपदयोः प्रतिषेध्यप्रतिषेधकपरतयाऽनेनैव संगृह्णन्ति[29]। तदत्र प्राप्तिसमायां द्वारम् अप्राप्तावसाधनत्वव्यपदेशविशेषः[30], हेतुर्दूष्यः, [31]साधनन्यायातिपातेनासामर्थ्यमारोप्यम्[32], [33]तच्चोचितकालसहकारिविरहादसिद्धत्वम्, तद्देशनाभासा चेयम्। अप्राप्तिसमायां तु द्वारं प्राप्तावविशेषपरिशेषो[१०विशेषव्यपदेशविशेषो] वाऽकारकत्वं वा, हेतुर्दूष्यः, प्रतिकूलतर्कोपहतत्वमारोप्यम्, तद्देशनाभासा चेयम्॥ ७॥

प्रत्युत्तरमाह—

घटादिनिष्पत्तिदर्शनात् पीडने चाभिचारादप्रतिषेधः ॥ ८ ॥

इहैव प्रत्युत्तरक्रमः—केयं[34] कार्येण प्राप्तिरभिमता, समानकालत्वं वा, कार्यकारणभावो[35] वा, अव्यवहितप्राक्काल[36]सत्त्वं वा, सम्बन्धमात्रं वा। आद्ये प्राप्तं जनयतीति कः सचेता अभ्युपगच्छेत, तदाऽसत एव घटादेर्निष्पत्तिदर्शनात्, तदेतदयुक्ताङ्गाधिकत्वम्। [37]द्वितीयस्त्वभ्युपगत एव, न ह्यकारणं[38] जनयतीति भ्रमः। [39]कार्यस्य त्वेवं सत्त्वमनुपपन्नम्[40]

19. ०लिङ्गानां A. 20. ज्ञाप्ये ज्ञापक० C. 21. ०रीता व C. 22. इति add A. 23. मेकमस्तीति A. 24. एकसंसर्गे उप वा संग्रह C. 25. लक्षणामुभय० A. 26. तदादाय C. 27-28. प्रतिषेधाप्राप्त्यस्यामप्रतिषेधा अतिप्रसक्तया C. 29. संगृह्णन्ति C. 30. ०साधनत्वपरिशेषः A. 31-32. साधनान्यप्रतिपातेना० A, साधनन्यायातिप्यतेना० C. 33. तच्चेति च काल० A. 34. केयं om. A. 35. कार्यकाकाभावो C. 36. ०परकाल० A. 37-38. द्वितीयस्तुभ्युपगमा कारणं A. 39-40. कार्यसत्त्वेव सत्त्वमत्त्वपपन्नं C.

असत एव घटादेरुत्पत्तिदर्शनात्, [41]एवमनभ्युपगमे च तवाप्यभिलषितसिद्धिर्न स्यात्। तदेतदुक्तम्—आदीति। तदेतद-विषयबुद्धित्वं [? ०वृत्तित्वं] प्राप्त्यन्तरधर्मस्य प्राप्त्यन्तरे सञ्चारात्[42]। तृतीयस्त्वनभ्युपगमादेव निरस्तः, न ह्यव्यवहितप्राक्सदेव जनयति, चिरविनष्टादभिचारात् पीडनदर्शनात्। तदेतदयुक्ताङ्गाधिकत्वम्। एतेन चतुर्थो व्याख्यातः। एवमप्राप्तिसमायामपि योज्यमुत्तरम्। ज्ञप्तिपक्षे तु लिङ्गस्य धर्मिणा संयोगादेः साध्यधर्मेण च [43]प्राप्तिरस्ति[44], ज्ञायते च। लिङ्गज्ञानस्य नास्तीति चेत्, तत् किं विषयत्वलक्षणा नास्ति, आहोस्विदन्याऽपि। नाद्यः, प्रतिपत्त्यनुबन्धाभावेऽपि व्यापारा-नुबन्धस्य सत्त्वात्। स एव कथमिति चेत्, तद्व्याप्यविषयत्वनिय-मात्। अतएव न द्वितीयः, एवंभूतायाः[45] प्राप्तेः सत्त्वात्; विशिष्य प्रतिपत्त्यनुबन्धिनी विषयता नास्तीति चेत्, ततः किम्, न हि तादृश-मेव तज्ज्ञापयति; कुत इति चेत्, अतादृशादप्यनुमित्युत्पत्तिदर्शनात्। तदिदमुक्तमादीति। तदेतदयुक्ताङ्गाधिकत्वम्॥ ८॥

(॥ इति प्राप्त्यप्राप्तिसमजातिद्वयप्रकरणम्॥)

---

41. पूवमन० C. 42. सम्भवात् A. 43-44. व्याप्तिरस्ति A, प्राप्ति C.
45. ०भूतयोः A.

क्रमप्राप्ते जाती लक्षयति—

दृष्टान्तस्य कारणानपदेशात् प्रत्यवस्थानाच्च प्रतिदृष्टान्तेन प्रसङ्गप्रतिदृष्टान्तसमौ ॥ ९ ॥

दृष्टान्तस्य कारणानपदेशात् प्रत्यवस्थानमिति [1]पूर्वप्रतीकार्थः। ननु कारणं जनकं ज्ञापकं वा; नाद्यः, तदपदेशस्यानङ्गत्वेन प्रत्यवस्थानान्तरात्, न हि [2]युक्त्याभासमप्यन्तर्भाव्य[3] जातिं[4] प्रयुञ्जते; अतएव न द्वितीयः, नचानपदेशोऽभावः, प्रमाणाभावेन प्रत्यवस्थानस्य सदुत्तरत्वात्। अथ प्रमाणानपदेशः प्रमाणानवस्था, ततो दृष्टान्तप्रत्यवस्थानमित्यर्थः; तथा हि—दृष्टान्तता प्रमितो न वा; अन्त्ये[5] दृष्टान्तासिद्धिः; आद्ये प्रमाणमप्रमितं चेदसदेव स्यात्, सच्चेत्तत्रापि प्रमाणमावश्यकमित्यनवस्थाना(द्)दृष्टान्तप्रत्यवस्थानमिति चेद्धन्तैवं[6] तथा प्रत्यवस्थानं [7]चेद्धत्वादौ तदाधिक्यं स्यात्। उच्यते। दृष्टः प्रमितोऽन्तः[8] कार्यं तेन कारणानवस्थानात् प्रमितकार्यस्य प्रत्यवस्थानमित्यर्थः। अन्तकारणपदं च निदर्शनार्थं, न तु लक्षणपदं देयं। यद् वा—दृष्टोऽन्तोऽवसानमवस्था यस्य स दृष्टान्तः अनवस्थाविधुरः, तस्मिन्ननपदेशेनानवस्थया प्रत्यवस्थानमित्यर्थः। तदुक्तमाचार्यैः—"अनवस्थाभासः प्रसङ्गसमः"। एवं वीजाङ्कुरादावनवस्थया प्रत्यवस्थानं न प्रसङ्गसमः[9] स्यादिति चेन्न, अनवस्थापदस्य प्रथमस्य दूषकानवस्थापरत्वात्। अनवस्था च चरमसूत्रे[10] लक्ष्ययिष्यते[11]। तत्रायमित्थं प्रवर्त्तते—लिङ्गसिद्धिरपि लिङ्गान्तराधीना, एवं दृष्टान्तसिद्धिरपि दृष्टान्तान्तराधीनेत्यनवस्थेति। किं पुनरेतदुत्थानबीजम्? अनिश्चितस्यानिश्चायकत्वाभिमानः; लिङ्गस्य [12]विशेषणान्तरवत् ज्ञातत्वमपि विशेषणम्, तथा च

1. पूर्व० om. A. 2. युक्त्यासम० A. 3. र्भाव्या C. 4. After this, A has the following words in brackets : नाच्च प्रवृत्तिदृष्टान्तेन प्रसङ्गप्रतिदृष्टान्तसमौ. 5. अन्ते C. 6. चेदुत्तरं C. 7. चाद्धत्वादौ C. 8. प्रमितोऽर्थः A. 9. प्रसङ्गस्याः C. 10. ०शूत्रे C. 11. ०यिस्यात् C. 12. विशेषान्तर० A.

तदपि ज्ञेयमित्यभिमानो वा। सेयमापाततोऽनवस्थादेशनाभासा, तन्मुखेन पूर्वत्रानेकासिद्धिः [?] उत्तरत्र विशेषणासिद्धिरारोप्या। एवम् 'इदं सकारणकमुत्पत्तिमत्त्वादि'त्यादौ कारणस्यापि कारणान्तरं वाच्यम्, न [13]हि तन्नित्यमेव[14], कार्यस्यापि सदातनत्वप्रसङ्गात्, एवं कारणे [?कारणान्तरे]ऽपीति। किं [15]पुनरेतदुत्थानवीजम्? कारण-प्रतिषेधमुखेन [16]व्यभिचारारोपो बाधारोपो वा[17]। एवं[18] व्यभि-चारादिनाऽसाधकताऽनुमानेऽपि प्रवर्त्तते। व्यभिचार एव किं मान-मिति, न ह्यसिद्धो[?०]सिद्धिव्यभिचारादिरसाधकतालिङ्ग[19]मित्या-शयात् [20]कृतिज्ञप्तिवद् विपरीतप्रसक्तिकाऽपि, यतो[21] नाप्रसक्तं हि प्रतिषेध्यमिति भूतले घटप्राप्तिप्रसङ्ग इति चेन्न, अनवस्थया प्रत्यवस्थाना-भावात्। †

प्रत्यवस्थानाच्च प्रतिदृष्टान्तेन प्रतिदृष्टान्तसमः। प्रतीपमवस्थानं[22] प्रत्यवस्थानम् साध्यविपरीतधर्मावस्थानम्, [23]तच्छ्रमत्त्वमिति यावत्। चोऽवधारणे, तेन तन्मात्रबलात् प्रतिदृष्टान्ते प्रत्यवस्थानं प्रतिदृष्टान्त-समः। पञ्चम्यन्तं साधर्म्यसमादिवारणाय।

आचार्यास्तु—प्रतिदृष्टान्तेन केवलेन [24]प्रतिपक्षावस्थानात् स्थापना-हेतोः प्रतिषेध इत्यर्थः। चस्त्वर्थो [25]लक्षणभेदं सूचयति। तत्र प्रत्यवस्थानपदं तदभिमानपरम्, लक्षणन्तु—हेतुमपुरस्कृत्य[26] प्रति-दृष्टान्तवलेन बाधप्रतिरोधान्यतराभिधानं[27] प्रत्यवस्थानं वा प्रतिदृष्टान्त-समः[28]। भाष्ये तु [29]'शब्दोऽनित्यः ऐन्द्रियकत्वादि'त्युक्ते 'सामान्य-

---

13-14. न ति तद्विमर्श C. 15. पुनरवेतत्वत्थानं० C. 16-17. ०चारा-रूपोपबाधारोपावाधे C. 18. नं C. 19. चारादिव साधकता० C. 20. कृति तु दृष्टिवत् C. 21. यथा हि A. † Some portion of the text seems to be missing. 22. ०मनवस्थानं C. 23. तदुत्वं० C. 24. Should this be प्रतीपावस्थानात्? 25. न क्षण० A. 26. ०पुरस्ततो C. 27. रोधाद्यन्यतरा० C. 28. ०दृम्टान्ते समः C. 29. एवोऽनित्य C.

मैन्द्रियकं नित्यमि'ति प्रत्यवस्थानमुदाहृतम्, इतश्च प्रतिदृष्टान्तेन हेतोः[30] सम्बन्धात् प्रत्यवस्थानमित्यर्थो लभ्यते, अनैकान्तिकतया प्रत्यवस्थानस्य सदुत्तरत्वात्। एवञ्चैष प्रवर्त्तते—यदि घटदृष्टान्तबलेनानित्यः शब्दः अथाकाशदृष्टान्तबलेन नित्यः किं न स्यात्, न [31]ह्यस्ति [32]कश्चिद्विशेषः[33]। यद् वा—घटदृष्टान्तबले(न) नानित्यः[34] Cशब्दः, आकाशदृष्टान्तबलेनC नित्यस्यैव सिद्धेः। मूलञ्चात्र हेतोरनङ्गत्वाभिमानम्, [35]दूष्यो दृष्टान्तः, बाधः प्रतिरोधो वाऽरोप्यः, तद्देशनाभासा[36] चेयम् ॥ ९ ॥

प्रसङ्गसमे प्रत्युत्तरमाह—

प्रदीपोपादानप्रसङ्गविनिवृत्तिवत्तन्निवृत्तिः ॥ १० ॥

इहैवं प्रत्युत्तरक्रमः—निश्चितमेव निश्चायकमिति किं युक्तिसिद्धं लोकसिद्धं वा, नाद्यः, तयैव[37] व्यभिचारात्[38], नेतरः, प्रदीपे उपादीयमाने प्रसङ्गाभावात्, भावे वा दृश्यदर्शनं लोके न स्यात्। [39]ओमिति चेत्, तर्हि जातेरप्युत्थानं व्याहन्येत। लिङ्गस्य ज्ञातत्वं [40]तावदवश्यं ज्ञेयम्, विशेषणत्वादिति चेत्; न, विशेषणमात्रस्य ज्ञातोपयोगित्वानभ्युपगमात्, अन्यथा तवापि व्याघातात्; तद्यथा लोके घटादिप्रतिपत्त्यर्थं तन्निश्चायकपरम्परां प्रसञ्जयति, तथा हेतुदृष्टान्तोपादानमपि। [41]तदिदमयुक्ताङ्गाधिकत्वम्, ज्ञातत्वज्ञानस्य ज्ञप्त्यनङ्गस्याङ्गत्वस्वीकारात्; [42]अविषयवृत्तित्वं वा, लिङ्गधर्मस्यान्यत्र सद्भावात्। क्षतौ तु [43]विजातीयपरम्परापेक्षायामविच्छेदमात्रं न किञ्चिद्बाधते, न ह्येवमसिद्धिर्बाधो

---

30. प्रत्यवस्थानात् add. A. 31. ह्यन्ति A. 32-33. काञ्चद्विशेष: A, काश्चावसेय: C. 34. ०बले नानित्य: A, ०बलनलानि C. C–C in C only. 35. घटदूष्यो A. 36. ०देशालाभास्ता C. 37. तयैव=युक्त्यैव. 38. ०चारा: C. 39. तुमिति C. 40. तावत् om. A. 41. तदुक्तमयुक्ता० C. 42. स्वविषय० A. 43. जातायपरम्परा० C.

वा ; सजातीयापेक्षा तु नेष्टा, यथा प्रदीपोपादाने । तत्र प्रथमे युक्ताङ्ग-त्यागः, प्रसञ्जनीयस्यानिष्टत्वमवधार्य[44] प्रसङ्गात् ; द्वितीये [45]त्वयु-क्ताङ्गाधिकत्वम्[46], सजातीयापेक्षत्वस्यानङ्गत्वारोपात् ॥ १० ॥

प्रतिदृष्टान्तसमे प्रत्युत्तरमाह—

प्रतिदृष्टान्तहेतुत्वे च नाहेतुर्दृष्टान्तः ॥ ११ ॥

इहैवं प्रत्युत्तरक्रमः—किं प्रतिदृष्टान्तस्याधिकरण[१०धिकबल]त्वमभिमन्य [१०मत्य] तेन बाध आपाद्यते, अन्यथा वा । नाद्यः, विवक्षितधर्म-वत्तामात्रेणोभयोरविशेषात् ; न द्वितीयः, तुल्यबलयोस्तदभावात्, तथात्वे वा दृष्टान्ते न प्रतिदृष्टान्तबाधोऽभ्युपगम्यः स्यादिति व्याघातः । तदिदमुक्तम्—नाहेतुर्न [47]स्वसाध्यासाधक इति । साधारणं दुष्टता-बीजमुक्तम्, तात्पर्यन्तु युक्ताङ्गहीनत्वे [48]बाधाधिकबलत्वानपेक्षणात् ; प्रतिरोधे तु समबलयोरेव प्रतिषेधो न न्यूनाधिकबलयोः, [49]अधिक-बलश्च[50] दृष्टान्तः, हेतुमत्त्वात् । तदेतदुक्तम्—प्रतिदृष्टान्तमात्रहेतुत्वे च दृष्टान्तस्तथाविध एव समबलः स्यात्, न [51]चायं [51]दृष्टान्तो-ऽधिकबलशून्यः[52] । हेतुमत्त्वं न बलमिति चेत्, तर्हि बाधे स[53] यथा[54] न[55] दूषणं तथा प्रतिदृष्टान्तेऽपीति व्याघातः । तदिदं युक्ताङ्गहीनत्वम् । चोऽप्यर्थः, वस्तुतः प्रतिदृष्टान्तः प्रतिरोधहेतुरेव, व्याप्यवत्ताबुद्धेरेव तथात्वादन्यथा व्याघातादिति सूचयति ॥ ११ ॥

(॥ समाप्तं प्रसङ्गप्रतिदृष्टान्तसमप्रकरणम् ॥)

---

44. ०निष्ठमवधार्य A. 45. युक्ताङ्गा० A. 46. ०धिक्यं C, which is also acceptable. 47. असाध्या० A. 48. बाधाङ्गाधिक० A. 49-50. बाधकबल: C.5 1, स्या नु चायं C. 52. ०करणशून्य: C. 53. बाधे स C. 54. अथा A. 55. न om. C. 56. व्याप्यबुद्धे० A.

क्रमप्राप्तमनुत्पत्तिसमं लक्षयति—

प्रागुत्पत्तेः कारणाभावादनुत्पत्तिसमः ॥ १२ ॥

यस्य कस्यचित् साधनाङ्गस्योत्पत्तेः [1]प्राक् कारणस्य हेतोरभावात्[2] प्रत्यवस्थानमनुत्पत्तिसम इत्यर्थः। [3]प्रागिति चोपलक्षणम्, तेन ध्वंसदशायामपि हेतुवैकल्येन प्रत्यवस्थानसंग्रहः। लक्षणन्तु—तद्वति कदाचिदपि तद्विरहेण प्रत्यवस्थानात्मिका जातिरनुत्पत्तिसमः, तच्च धर्मिलिङ्गसाध्यदृष्टान्तानां [4]तज्ज्ञानानां[5] [A]तद्विशेषणानाञ्च[A] कदाचिदसत्त्वात्। धर्मिणो यथा'ऽनित्यः शब्दः, उत्पत्तिमत्त्वादि'त्युक्ते तदनुत्पत्तिध्वंसदशायामुत्पत्तेस्तत्राभावाद्धेत्वसिद्धिः[6]। द्वितीयं यथा 'इदं गुरु, पतनवत्त्वा'दित्युक्ते पतनोत्पत्तिविनाशदशायां पतनाभावाद्धेत्वसिद्धिः। तृतीयं [7]यथाऽत्रैवाद्यकाले गुरुत्वाभावाद् बाधः। चतुर्थं यथाऽत्रैव लोष्टदृष्टान्तानुत्पत्तिविनाशदशायां [8]हेतुसाध्यानुत्पत्तिविनाशदशायाञ्च हेत्वाद्यसत्त्वात्तद्वैकल्यम्। पञ्चमी [? पञ्चमं] यथा [9]सुषुप्तिकाले तत्र[10] हेत्वादिज्ञानाभावादसिद्धिः। षष्ठं यथा 'नीलो घटो[11] घटो द्रव्यम्' इत्यादौ पक्षानुत्पत्तिदशायां तद्विशेषणासिद्धिः। बीजञ्चात्र[12] तदनुत्पत्तिदशायां तत्र धर्मसत्त्वाभिमानः, पक्षादौ यदा [13]कदाचिद्धेत्वाद्यभाव[14] एव चासिद्ध्यादिरित्यभिमानः (च), सेयसेयमसिद्ध्यादिशना। एवं पतनानुत्पत्तिदशायां तदपतनधर्मकम्, न चापतनधर्मकं पतनधर्मकं भवति, व्याघातात्; एवं गुरुत्वानुत्पत्तिदशायां[15] तदगुरु, न चागुरुधर्मकं [16]पतनवद्भवति—इत्यादि बहुप्रकारं प्रत्यवस्थानमुन्नेयम्[17]। आद्यकालावच्छिन्नो घटो[18] [19]गन्धवानित्य'त्र बाधेन प्रत्यवस्थाने[20] नातिव्याप्तिरजातित्वात् ॥ १२ ॥

---

1. प्रकारणस्य C. 2. कृतारसत्त्वात् A, हेतोबलत्वात् C. 3. प्राणिति C. 4-5. उक्तज्ञानानाञ्च C. A–A in A only. 6. ०स्तत्राभाजेत्वसिद्धिः C. 7. यथा तत्रैवा० C. 8. हेत्वसाध्योत्पत्ति० C. 9-10. स्वस्वान्तकालेतर C. 11. घटो om. A. 12. बीजमात्रे A. 13-14. दातिभेत्याद्यभाव A. 15 ०नुपपत्तिदशायां A. 16. पतव वद्भवति C. 17. ०मन्नेयम् A. 18. न चो C. 19. गन्ध० om. A. 20. ०स्थानेन A.

प्रत्युत्तरमाह—

तथाभावादुत्पन्नस्य कारणोपपत्तेर्न कारणप्रतिषेधः ॥ १३ ॥

उत्पन्नस्य तथाभावाद्धर्मभावाभावत्वात्[21] उत्पत्तेः पूर्वं तत्र हेत्वभावोऽयुक्तः ; एवञ्च कारणोपपत्तेरयुक्तः[22] प्रतिषेध[23] इत्यर्थः । अथवा —उत्पन्नस्य तथाभावादुत्पत्तिमत्त्वादुपपद्यते कारणमतो नासिद्धिः[24] । इदमुक्तं भवति—पक्षे हेतुमत्ताज्ञानं कारणम् , तद्विरोधी च पक्षे सर्वदा तद्विरहो न कादाचित्कः, न चेह तथोत्पन्नस्य तथाभावात् । एतेन साध्यहेत्वनुत्पत्तिर्व्याख्याता, उत्पन्नस्य [25]पतनादेस्तथाभावात् पक्षवृत्तित्वादिति सूत्र[?सौत्र]प्रतीकारस्तु[26] विशेषः । एतेन दृष्टान्तानुत्पत्तिर्व्याख्याता[27], सिद्धिश्चाव्यवहितपूर्वकालीना उपपद्यते[28] तत्र, न कादाचित्कस्तद्विरहो विरोधी । एतेन व्याघातो व्याख्यातः, [29]एकधर्मिप्रमितत्वात् । तदिदमुक्तम्—उत्पन्नस्य तथाभावादिति ॥ १३ ॥

(॥ समाप्तमनुत्पत्तिसमप्रकरणम् ॥)

---

21. ०भावकत्वात् A. 22. ०पत्तेरसतः A. 23. प्रतिस्यध A, प्रतिषेधा C. 24. न सिद्धिः C. 25. पतनादौस्तथा० A. तेनादेस्तथा० C. 26. ०कालस्तु C. 27. व्याप्यतो C. 28. उपयुज्यन्ते C. 29. एकं धर्मि० C.

क्रमप्राप्तं संशयसमं लक्षयति—

सामान्यदृष्टान्तयोरैन्द्रियकत्वे समाने नित्यानित्यसाधर्म्यात् संशयः ॥ १४ ॥

संशय इति [1]लक्ष्यपदनिर्देशः, नित्यानित्यसाधर्म्यादि लक्षणपरम्, तच्च संशयकारणमात्रोपलक्षणम्। तेन संशययत्किञ्चित् (कारण)बलेन[2] संशयेन [3]प्रत्यवस्थानं संशयसमजातिलक्षणमिति[4]। सप्तम्यन्तमुदाहरणपरं[5] यथा[6] सामान्यदृष्टान्तयोः[7] साधारणेन्द्रियत्वनिमित्तकं प्रत्यवस्थानमित्यर्थकम्[8]। प्रवर्त्तते चैवम्—यदि निर्णयकारणसत्त्वान्निर्णयोऽन्त[१०निर्णयो हन्त] संशयकारणसमानधर्माद्यन्यतरसत्त्वात् संशय एव किं न स्यात्; अन्यथा निर्णयोऽपि [9]न स्यादविशेषात्[10]; न चोभयमप्यस्तु, विरुद्धयोरेकदाऽसम्भवात्। तदत्र संशयकारणं द्वारम्, हेतुर्दुष्टः, कार्यापेक्षया सत्प्रतिपक्षत्वमारोप्यम्, ज्ञाप्यापेक्षया विशेषणासिद्धिः[11], तदाभासा चेयम्[12] ॥ १४ ॥

प्रत्युत्तरमाह—

[13]साधर्म्यात् संशये न संशयो वैधर्म्यादुभयथा[14] वा संशयेऽत्यन्तसंशयप्रसङ्गो नित्यत्वानभ्युपगमाच्च सामान्यस्याप्रतिषेधः[15] ॥ १५ ॥

साधर्म्यात् संशयकारणात् संशयेऽभ्युपगम्यमानेऽपि[16] नेह संशयो वैधर्म्याद् विशेषदर्शनादेस्तदभावे हि संशायकं संशय करोति,[17], सहकारित्वात्; यदि च [18]तत्सद्भावेऽपि संशयं कुर्यादत्यन्तसंशयः स्यात्; अस्त्वेवेति चेन्न, नित्यं संशयजनकत्वानभ्युपगमात्[19] साधर्म्य-

---

1. लक्षपदा० C. 2. ०हलेन C. 3. त्ववस्थानं A. 4. ०सम इति लक्षणमयोभि C. 5. ०हरणसर्वं A. 6. यघा om. A. 7. सामान्यदृष्टयो A. 8. ०मित्यनर्थकम् A. 9-10. न स्याद्विशेषात् A, किन्न स्यादविशेषात् C. 11. विशेषा A. 12. चेदम् A. 13. साधर्म्मसंशये A. 14. वै दुभयथा A. 15. सामान्यस्यापसंशयः A. 16. ०भ्युपगमस्य ज्ञानेऽपि A. 17. करोति C. 18. तत्० om. C. 19. ०जनकत्वाभ्युपगमात् A.

ज्ञानादेरतोऽयं[20] न प्रतिषेध इत्यर्थः। तदिदं युक्ताङ्गहीनत्वं[21] संशयबीजस्य [22]निर्णायकविरहस्यानपेक्षणात्। तस्मान्न कार्यापेक्षया [23]सत्प्रतिपक्षः, संशयहेतोर्व्यङ्गत्वात्। नापि ज्ञाप्यापेक्षयाऽसिद्धिः, संशयकारणविरहस्य हेतुविशेषणतयाऽनभ्युपगमात्॥ १५॥

(॥ समाप्तं संशयसमप्रकरणम्॥)

20. ०ज्ञानादे A. ०ज्ञानादेव तोयं C. 21. युक्तदेहानत्वं C.
22. निर्णायकरिवतस्या० C. 23. सूप्रति० C.

क्रमप्राप्तं प्रकरणसमं लक्षयति—

उभयसाधर्म्यात् प्रक्रियासिद्धेः प्रकरणसमः ।। १६ ।।

उभयसाधर्म्यात् अन्वयेन सहचरितात् व्यतिरेकेण सहचरिताच्च प्रकरणस्य [? प्रक्रियायाः] प्रक्रियमाणस्य सिद्धेः प्रत्यवस्थानमित्यर्थः । पञ्चम्यन्तञ्च प्रतिप्रमाणोपलक्षणम्[1], तेनाधिकबलत्वेनानभ्युपगतप्रमाणान्तरेण हेतोर्बाधाभिधानत्वं [2]लक्षणमुक्तमवसेयम् । उदाहरणम्—'अनित्यः शब्दः कृतकत्वादि'त्युक्ते 'नैतदेवम्, [3]श्रावणत्वेन बाधात्; न चेदिदं बाधकम्, कृतकत्वमपि न साधकम्, प्रमाणत्वाविशेषात्' । एवं प्रत्यक्षादिना बाधे, यथात्रैव प्रत्यभिज्ञानबाधात्, न [4]चेदिदं बाधकम्, तदपि न साधकं स्यादविशेषात् । तदत्र प्रतिप्रमाणं द्वारम्, हेतुर्दूष्यः, बाधितत्वमारोप्यम्, तदाभासा[5] चेयम् ।। १६ ।।

प्रत्युत्तरमाह—

प्रतिपक्षात्[6] प्रकरणसिद्धेः प्रतिषेधानुपपत्तिः प्रतिपक्षोपपत्तेः ।। १७ ।।

प्रतिपक्षात् प्रकरणसिद्धिद्वारा प्रतिषेधस्यानुपपत्तिः; कुत इति चेत्, प्रतिपक्षोपपत्तेः[7] अन्यूनतयाऽभ्युपगतसाध्यसाधकसम्पत्तेः । इदमुक्तम्भवति—साध्यसिद्धिं प्रति [8]ह्यधिकबलत्वमङ्गम्, समबलप्रतिसाधकाभावो वा, न चेह [9]सोऽस्तीति कुतः प्रकरणसिद्धिः । [10]प्रकृतमुक्ताङ्गहीनत्वम्, इदमेव नाभ्युपगच्छाम इति चेदत्राप्येतदेवोत्तरम् । अनधिकबलात्[11] प्रतिपक्षसाधनात् प्रकरणासिद्धेरभ्युपगमे प्रतिषेधो नोपपद्यते, स्थापनाधीनसिद्धेः प्रतिपक्षस्य त्वत्साध्यप्रतिपक्षस्य स्थापनापक्षस्यापि अनधिकबलात्[12] प्रतिसाधनसमवहितादपि साध्यसिद्धिरिति [13]त्वदभ्युपगमवशेनोपपत्तेः सिद्धेः, सोऽयं व्याघातः ।। १७ ।।

(।। समाप्तं प्रकरणसमप्रकरणम् ।।)

1. ०प्रमाणमात्रोपलक्ष० C. 2. ०मुक्तसमव० C. 3. द्रावणत्वेन C. 4. देदिदं C. 5. तदाभावा C. 6. प्रतिपन्न तत् A. 7. प्रतिपक्षसम्पत्तेः C. 8. ह्यधिकरणत्व० C. 9. सास्तीति C. 10. इदमुक्ताङ्ग० C. 11, 12. अनधिकरणात् C. 13. दुपध्युपगम० C.

[1]क्रमप्राप्तमहेतुसमं लक्षयति—

त्रैकाल्यासिद्धेर्हेतोरहेतुसमः ॥ १८ ॥

हेतोः कार्यपूर्वापरसमकालसम्बन्धखण्डनेन प्रत्यवस्थानमित्यर्थः। ज्ञप्तिहेतोरपि हेतुत्वान्न तदसंग्रहः। तद् यथा—यदिदं घटादिसाधनं दण्डादि, तत् साध्यपूर्वभावि चेद्[A]साधनत्वं प्रसज्येत, साध्यघटित[A]-मूर्त्तिकत्वात् [2]साधनस्य; उत्तरकालवर्त्ति चेत्, तथापि; तत्-समसमयश्चेदेवं रूपरसयोरिव (साध्यसाधनभावानुपपत्तिः;)[3] विशेषा-भावात्; न च प्रकारान्तरं सम्भवतीति। ननु 'तत् कार्यसम-कालञ्चेत्[4] कथं साधनम्, (अ)समकालञ्चेत् कथमि'ति प्रत्यवस्थाना-संग्रह इति चेन्न, हेत्वभिमतस्य समयमात्रसम्बन्धानुपपत्त्या प्रत्य-वस्थानं हेतुत्वखण्डनं वा [5]तदिति विवक्षणात्। नन्वाद्ये कालस्य-[?कारणस्य] [6]समयवृत्तित्वसाधकं प्रति 'यदि समयवृत्तिः स्यात् कारणं न स्यात्' इत्युत्तरेऽतिव्याप्तिरिति चेन्न, [7]जातित्वेन विशेषणात्। प्राप्तिः समान[8] [?च] कार्यसम्बन्ध[A]निरूप्या, इयन्तु समयसम्बन्ध[A]निरूप्येति ततो भेदः।

परमन्यायाचार्यास्तु—ते[9]ऽर्थद्वारिके इयन्तु शब्दद्वारिका; ते [10]द्विविकल्पोपक्रमे इयं त्रिविकल्पोपक्रमा[11]; तत्र सहकारिशक्ति-दूष्या, इह स्वरूपशक्तिः; ते विशेषणासिद्धिदेशनाभासे इयं प्रतिकूल-तर्कदेशनाभासे [?॰भासा]—इति भेदमाहुः[12]।

---

1. प्राप्तनहेतु॰ C. A—A in A only. 2. ॰मुक्तिक॰ C. 3. The text within brackets added in the light of ANTB (p. 41). 4. ॰कालञ्च A. 5. ॰खण्डलखा C. 6. समयावृत्तित्व॰ C. 7. न om. C. 8. न om. C. A—A in A only. 9. ते om. A. 10-11. तेद्विकल्पोप-क्रमे इयं त्रियीत्रविकल्पोपक्रमा A, तेत्विकाविकल्पोपक्रमे इयं त्रिविकरण-पापक्रमा C. Text emended in the light of NP (pp. 41-42). 12. भेदमार्गः C.

तत्रोच्यते—[13]इहापि कारणतापदार्थ[14] एव खण्ड्यते, न तु परम्, यदि तत् पूर्वं कथं [15]तत्घटितधर्मवदिति प्रत्यवस्थानात्; सम्भवति चेयं द्विविकल्पेनापि, न केवल[?त्वेव]मिति चेत्, ते [?तयोः] अपि कार्यसमसन्निकृष्टमेव [16]सञ्जनयति [17]सन्निकृष्टमपि वा, सन्निकृष्टमेव वेति विकल्पत्रयेणावतारात्[18]। का च सहकारिशक्तिः, सहकारिरूपा शक्तिर्वा [19]फलोपधानं वा; नाद्यः, सन्निकर्षस्यासहकारित्वात्, तत्त्वमारोप्य प्रत्यवस्थानमिति चेन्न[20], तदनारोपेऽपि विपरीतसाधनोपपत्तेः; न द्वितीयः; तत्रापि योग्यत्वस्य, इहापि फलोपधानस्य [21]दूष्यतोपपत्तेः। प्रतिकूलतर्कदेशना च तत्र न हस्तपिधेयेत्यलमसद्ग्रहेण। तदत्र प्रतिकूलतर्को द्वारम्, क्वचिद् बाधादयश्च[22], [23]हेतुफलभावश्च दूष्यः[24], तद्द्वारा हेतुः, [25]तदुपहतत्वमारोप्यम, तदाभासा चेयम॥१८॥

प्रत्युत्तरमाह—

न हेतुतः साध्यसिद्धेस्त्रैकाल्यासिद्धिः ॥ १९ ॥

त्रैकाल्यासिद्ध्या हि जातिवादी हेतुफलभावमाक्षिपति, न च त्रैकाल्यासिद्धिः, पूर्वसतो हेतोः साध्यसिद्धिदर्शनात्। असति साध्ये कस्य साधनमिति चेत्, साध्यस्यैव। [26]असतः कथमुपाधित्वमिति चेत्, प्रतियोगितया प्रागभावोपलक्षणात्। तयोरेव भिन्नकालयोः कथं सम्बन्ध इति चेत्[27], सम्बन्धस्यैवंस्वभावत्वात्। तदिदमनङ्गाधिकत्वम्, सम्बन्धं प्रति [28]सहभावस्यानङ्गत्वात्; युक्ताङ्गहीनत्वं वा, सम्बन्धस्य सहभावेनाव्याप्तेः, अविषयवृत्तित्वं वा,

---

13. इहापि A. 14. ०पदर्थे C. 15. तद्० om. A. 16. सज्जन० C. 17. तन्निकृष्ट० C. 18. ०णावभावा C. 19. कालाप्रधानं C. 20. चेतन C. 21. दुष्टतो० C. 22. ०बाधादयः A, ०बाधयश्च C. 23-24. हेतुफन भावश्च दुष्टः C. 25. तवत्वमारोप्यं C. 26. स्वतः C. 27. कुतः A. 28. सद्भाव० C.

सहभावेन हि सम्बन्धो व्याप्यत एव, [29]परन्त्व[A]विरुद्धो न तु[A] विरुद्धो-ऽपि व्याप्तिविषयः ॥ १९ ॥

व्याघातमाह—

प्रतिषेधानुपपत्तेश्च प्रतिषेद्धव्याप्रतिषेधः ॥ २० ॥

एवं कार्यकारणभावखण्डने प्रतिषेध एवासम्भवी, कुतः प्रतिषेध इत्यर्थः । चकार उक्तं समुच्चिनोति[30] ॥ २० ॥

(॥ समाप्तमहेतुसमप्रकरणम् ॥)

---

29. समस्त C. A–A in A only. 30. Vardhamāna also adopts this interpretation (cf. "चकारः प्रत्युत्तरसमुच्चयार्थः" ANTB, p. 43).

क्रमप्राप्तमर्थापत्तिसमं लक्षयति—

अर्थापत्तितः प्रतिपक्षसिद्धे[1]रर्थापत्तिसमः ।। २१ ।।

अर्थापत्तेस्तदाभासात् प्रतिपक्षस्य प्रत्यनीकस्य सिद्धेः प्रतिषेधो यः सोऽर्थापत्तिसम इत्यर्थः । अत्रोक्तस्यानुक्ताक्षेपसामर्थ्यकल्पनमर्थापत्त्याभास इति न युक्तम्, 'कृतकञ्चेदव्यभिचारि प्राप्तमिदं व्यभिचारी'त्युदाहरिष्यमाणाव्याप्तेः, कृतकत्वाद्[2] व्यभिचारस्यानुक्तस्यैवाक्षेपकत्वात् । तत्रापि विकल्पानन्तरमिदमयुक्तमेवेति[3] चेत्, तथापि 'शब्दोऽनित्यः कृतकत्वादि'त्युक्ते 'यद्यनित्यः स्यात् श्रावणो न स्यादि'त्यत्रातिव्याप्तेः । ततः [4]प्रत्यनीकसिद्धेर्नैतत् प्रत्यवस्थानं किन्तु तेनैवेति[5] चेत्, 'शब्दत्वान्नायं जन्यमात्रधर्मवान्, तथा [6]चासिद्धि'रित्यत्रैवमप्यस...[7] दुर्वारेति चेन्न, [8]जातित्वेन विशेषणात् । उत्थानवीजञ्च विशेषणविशेष्यभावोऽन्ययोगव्यवच्छेदेनैव भवतीत्यभिमानः, स च [9]बहुप्रकारः । तथा हि—'शब्दोऽनित्य' इत्युक्तेऽर्थादापन्नं[10] नान्योऽनित्य इति, [11]विशेषविधेः शेषनिषेधविषयत्वात्, तथा च साध्यविकलो दृष्टान्तः; 'अनित्यसाधर्म्यादनित्य' इत्युक्ते'ऽर्थादापद्यते[12] नित्यसाधर्म्यादन्यस्माद्वा[13] नित्य' इति प्रतिरोधः; 'अनुमानादनित्यसिद्धे [? ०दनित्यः शब्द] इत्युक्ते 'प्रत्यक्षान्नित्य' इति बाधः; 'कृतकत्वादनित्यत्वमि'त्युक्ते 'प्रत्यक्षगुणत्वमनित्यत्वसाधकं न वा, न चेदिदमपि कथं [14]साधकमविशेषात्, साधकत्वे प्राप्तमन्यदसाधकमि'ति सर्वदोषोपसंहारः, एवमनैकान्तिकं न [15]वेत्यादिः । [16]तदस्यानुक्ताक्षेपो द्वारम्, हेतुद्व्यः, क्वचित् किञ्चिदारोप्यम्, तदाभासा चेयम् ।। २१ ।।

---

1. ०पक्षासिद्धे० A. 2. कृतकत्वा C. 3. ०मिदमुक्तमेवेति C. 4. प्राच्यनीक० A. 5. तेन=उक्तस्यानुक्तत्वपुरस्कारेण. 6. च सिद्धिं० C. 7. There is a gap in all the available Mss. 8. जाती त्वेन C. 9. वत्प्रकार: C. 10. इत्युक्ते अनुदोपन्नं C. 11. विशेषबोधः C. 12. ०अथापदापद्यते C. 13. ०अन्यस्मा C. 14. कत्वं A. 15. चेत्यादिः C. 16. ०तदस्यात्युक्ता० C.

प्रत्युत्तरमाह—

अनुक्तस्यार्थापत्तेः[17] [18]पक्षहानेरुपपत्तिरनुक्तत्वादनैकान्तिकत्वाच्चार्थापत्तेः ॥ २२ ॥

[19]किमुक्तेनानुक्तमात्रमाक्षिप्यते[20] तदुपपादकम्वा[21] ? आद्ये [22]अनुक्तस्यार्थस्यार्थादापत्तिर्यदि, [23]तस्मात्त्वत्पक्षहानेरापत्तिस्तस्यानुक्तत्वादिति स्वव्याघातः। [24]नान्त्योऽर्थापत्तेरुक्तरूपाया अनैकान्तिकत्वात् तत्तदनुक्ताव्यापनात्, अव्यापकस्य चानुपपादकत्वात्। चकारो [25]बाधादिकं[26] समुच्चिनोति। तदिदमुक्ताङ्ग [? तदिदं युक्ताङ्ग]-हीनत्वं। वादजल्पयोस्तु [27]त्वत्पक्षेऽपीयमर्थापत्तिः[28] संप्रवर्त्तत इति नैकान्तव्यवस्थितेयम्, तथाच [29]प्रत्याख्येयत्वाददूपणाभ्युपगमेन व्याघातः, अप्रत्याख्येयत्वे वा [30]स्वपक्षव्याघात इत्यर्थः ॥ २२ ॥

(॥ समाप्तमर्थापत्तिसमप्रकरणम ॥)

17. ०अनुक्तस्यार्थादापत्तेः A. 18. पक्षज्ञाने० A. 19. किमुक्तेनामुक्त० A. 20. ०क्षिपते A. 21. ०पादको वा C. 22. अनुत्वमार्थं० A. 23. तस्मानुत्-पक्ष० C. 24. नान्योऽन्नापत्ति० C. 25-26. वावादिकं A. 27. दुपक्षे० C. 28. ०मर्थाद्धिः C. 29. प्रत्याख्याय० A. 30. नुपक्ष० C.

[1]क्रमप्राप्तमविशेषसमं लक्षयति—

एकधर्मोपपत्तेरविशेषे सर्वाविशेषप्रसङ्गात् सद्भावोपपत्तेरविशेषसमः ॥ २३ ॥

अत्र[2] [3]अविशेषसम इति लक्ष्यनिर्देशः। सर्वाविशेषप्रसङ्गात् सद्भावोपपत्तेरिति लक्षणपरम्। तत्र सन्[4] [5]पूर्वविनियुक्तो भावो[6] धर्मः सद्भावः[7] साध्यसाधनान्यो धर्मस्तस्मात् तद्वति[8] सर्वस्मिन्नविशेषप्रसङ्गात् [9]प्रसञ्जकात्तत्प्रसङ्गरूपः प्रतिषेध इत्यर्थः। सत्पदानुत्कर्ष-[? ०पदेनोत्कर्ष-]समव्यवच्छेदः, तद्वतीति वचनाद् द्रव्यत्वलक्षणैकधर्मोपपत्तेर्नवानां[10] क्रियावत्त्वं किं न स्यादित्यस्य विग्रहः [? परिग्रहः]। सप्तम्यन्ततश्च जातिवादिनोऽनुशयोद्घाटनं [?] [11]जात्युत्थानक्रमोपदर्शनस्य[? ०नश्च]। एवं हि प्रवर्त्तते—यदि कृतकत्वलक्षणैकधर्मोपपत्तेर्घटशब्दयोरनित्यत्वलक्षणोऽविशेषः, अथ [12]सत्त्वप्रमेयत्वादेCस्त्रैलोक्यस्य किंC न स्यात्, किञ्चातस्तादात्म्येनाविशेषे[13]पक्षाद्यविभागः, तज्जातीयत्वेनाविशेषेऽवान्तरजात्युच्छेदः, अनित्यत्वधर्मवत्त्वेनाविशेषे[14] गुणकर्मादेर्द्रव्यत्वापत्तिः, अनित्यत्वेनाविशेषे जात्युच्छेद इति।[15] ननु यदि घटशब्दयोः[16] कृतकत्वेनानित्यत्वलक्षणोऽविशेषः[17] सत्त्वेनात्मनोऽपि[18] स स्यात्, द्रव्यत्वेन तस्यापि [19]क्रियावत्त्वलक्षणोऽविशेषः स्यादित्यत्र का गतिरिति चेन्न, तद्वति स्वावृत्तिधर्मप्रसञ्जनात्मकजातेर्विवक्षितत्वात्। न च [20]प्रतिधर्मसमाद्यतिव्याप्तिरप्रसङ्गात्मकत्वात्। पक्षदृष्टान्तयोरन्यत्र साध्यसाधनाभ्यामविद्यमानसाधनं [21]कुत्रान्तर्भव-

---

1. क्रमप्राप्तविशेष० A. 2. अतो C. 3. विशेष० C. 4. सम C. 5. पूर्वाविनि० C. 6. ०युक्ताभावो C. 7. सत्तार: C. 8. तदति C. 9. प्रसान्तरक० A. 10. ०र्नराणां A. 11. इत्युत्थान० C. 12. मत्व० C. C–C in C only. 13. ०स्तादाद्यविशेष A. 14. ०वत्त्वेन विशेषे A. 15. इति om. C. 16. घटशब्दयोः om. A. 17. लक्षणाविशेषः A. 18. सत्त्वेनानन्तरोपि A. 19. जिवत्त्वेलक्षणो० A. 20. प्रतिधर्मसमयेऽति० A. 21. यत्रान्तार्भवत्विति A, कुत्रांतात्तरद्विती C.

तीति चेत्, उत्कर्षसमायामेव[22], तत्रत्य[23]दृष्टान्तपदस्य पक्षान्यपरत्वात्, [24]यत्र क्वचनेति तदर्थात्। तदस्य कस्यचिद्धर्मस्य [25]किञ्चित् प्रत्यसाधकत्वदर्शनं बीजम्, हेतुर्दूष्यः, [26]प्रतिकूलतर्कोपहतत्वमसाधकत्वं[27] वाऽरोप्यम्, तदाभासा चेयम्॥ २३॥

प्रत्युत्तरमाह—

कचित्तद्धर्मोपपत्तेः क्वचिच्चानुपलब्धेरप्रतिषेधः॥ २४॥

क्वचित् कृतकत्वादौ तद्धर्मस्य साधनोप[? ०नौप]यिकधर्मस्य व्याप्त्यादेरुपपत्तेः क्वचिच्च सत्त्वादौ तदनुपलब्धेः[28] अयं प्रतिषेधो न युक्तः, व्याप्त्याद्यनपेक्षणे[29] च व्याघात इत्यर्थः। इदमुक्तं भवति—किं सत्त्वादिवत् कृतकत्वस्य समानधर्मत्वेनासाधकत्वमभिमतम्; उत[30] कृतकत्ववत् (सत्त्वादेरपि)† साधकत्वम्; अथ[31] [32]यदि कृतकत्वेन शब्दोऽनित्यस्तर्हि सत्त्वादिना सर्वमनित्यं स्यादिति[33] प्रसङ्गमात्रम्; यद्वा—सत्त्वेन सर्वमनित्यं किं न स्यात्, कृतकत्वेन शब्दानित्यत्ववदिति प्रश्नमात्रम्? नान्त्योऽर्थान्तरत्वात्, कृतकत्ववद्व्याप्त्यसिद्धेः। न तृतीयः, कृतकत्वेन शब्दानित्यत्वस्य सत्त्वेन सर्वानित्यत्वाव्याप्तेः। न द्वितीयः, दृष्टान्ते साधकत्वाभ्युपगमे व्याघातः, अन्यथा दृष्टान्तस्य साध्यवैकल्याद् व्याप्त्यसिद्धिश्च[34]। अतएव[35] न प्रथमः[36]। तदिदं युक्ताङ्गहीनत्वम्। एतेनेश्वरानुमाने 'शशश्च[37] पशुत्वादेरेवं शृङ्गी स्यादि'त्यादयो निरस्ताः॥ २४॥

(॥ समाप्तविशेषसमप्रकरणम्॥)

---

22. ०समयोमेव C. 23. तत्रत्य om. A. 24. पत्र० A. 25. कञ्चित्० C. 26-27. प्रतिकूलतर्कोप इति न साधकत्वं A, प्रतिकूलतर्कोय इति व साधकत्व C. 28. तदनुपपत्तेः A, C. 29. न add. C. 30. ततः A. † added in the light of ANTB (p. 47). 31. अहो C. 32. सन्नि कृतक० A. 33. स्यात् प्रति C. 34. व्याप्त्यसिद्धेः A. 25. अतएव om. A. 36. व्याप्त्यसिद्धेः add. A. 37. शवश्च A.

क्रमप्राप्तमुपपत्तिसमं लक्षयति—

उभयकारणोपपत्तेरुपपत्तिसमः ।। २५ ।।

उभयस्मिन् पक्षे प्रतिपक्षे च, पक्षवत् प्रतिपक्षेऽपि कारणस्य प्रमाणस्योपपत्तेः साधनात् प्रत्यवस्थानमित्यर्थः। पक्षोपादानं विषयप्रदर्शनाय, तेन स्थापनायां कृतायामित्यर्थो लभ्यते, साम्यप्रदर्शनेनोत्थानबीजप्रदर्शनाय च। लक्षणस्तु [? ०न्तु]—जातित्वे सति यत्किञ्चिद्धर्मबलेन स्वपक्षे [1]प्रमाणोपपादनेन प्रत्यवस्थानम्—इत्येके। येन केनचिद् धर्मेण स्वपक्षे प्रमाणोपपादनात् प्रत्यवस्थानम्—इत्यन्ये। एवञ्च प्रकरणसमादिभ्यो भेदः स्फुट एव; तत्र[2] हि विपरीतसिद्ध्यादेः प्रत्यवस्थानम्, इह तत्साधकप्रमाणसिद्धेः; तथा च वार्त्तिकम्—"नित्यानित्यकारणञ्चैकत्रोपपद्यत इत्युपपत्तिसमार्थः, नित्यानित्वपक्षाभ्यां प्रत्ववस्थानमिति प्रकरणसमार्थः"।[3] तदियमेवं प्रवर्त्तते—'अनित्यः शब्दः कृतकत्वादि'त्युक्ते यद्यनित्यपक्षे कृतकत्वं प्रमाणमस्तीत्यनित्यः, हन्त नित्यपक्षेऽपि किञ्चित् प्रमाणं भविष्यति, [4]मदुक्तत्वात्, [5]त्वत्पक्षमत्पक्षयोरन्यतरत्वात्, विप्रतिपत्तिविषयत्वात्, [6]त्वत्पक्षवदित्यादि [7]बृहस्पतिमतानुशिष्टमन्यदपि [8]हेतुजातमवसेयम्; तथा च [9]त्वत्पक्षस्य बाधो प्रतिरोधो वा। तदत्र [10]सामान्यसम्भावना द्वारम्, हेतुदूष्यः, [11]बाधप्रतिरोधौ वाऽरोप्यौ[12], तदाभासा चेयम्—इत्याचार्याः। उभयम् उक्तं वक्ष्यमाणञ्च, तद्वत् कारणोपपत्तेः तदन्यकारणाभासोप-

---

1. समानोपादनेन A, प्रमाणापादनेन C. 2. अत्र A, त C. 3. The reading of NV in printed text reads as follows: नित्यकारणञ्चानित्यकारणञ्चैकत्रोपपद्यत इत्युपपत्तिसमः, नित्यानित्यपक्षाभ्यां प्रत्यवस्थानात् प्रकरणसम इति भेदः (NV, p. 1136). 4. मनुक्त० A. 5. त्वत्पक्षे मत्पक्ष० A. 6. कृत्पक्ष० A. 7. बृहस्पतिमनु० A. 8. जातिमवसेयम् A. 9. तत्पक्षस्य C. 10. तद्वत्र A. 11-12. बाधा प्रतिरोधो वान्बोप्यौ A, बाधः प्रतिरोधो वाऽरोप्यो C. See NP (p. 51).

पत्तेः प्रत्यवस्थानमित्यर्थः, तेन तद्[? त्रयोविंशतिजात्य]न्यजातित्वं[13] लक्षणमायातमित्यन्ये ॥ २५ ॥

प्रत्युत्तरमाह—

उपपत्तिकारणाभ्यनुज्ञानादप्रतिषेधः ॥ २६ ॥

वाद्यभिमतसाध्यस्योपपत्तौ यत् कारणं[14] प्रमाणं [15]तस्याभ्यनुज्ञानादयं प्रतिषेधो न युज्यते, न [16]ह्यनुज्ञानिषेधौ सह सम्भवतो विरोधादित्यर्थः, सोऽयं व्याघातः। प्रातिस्विकदुष्टत्वमूलन्तु युक्ताङ्गहीनत्वम्, [16]उक्तहेतोर्व्याप्तिहीनत्वात् उपपाद्यप्रामाण्यस्य चानधिकबलस्याबाधकत्वात्[17], अस्याधिकबलत्वाभ्युपगमे[18] स्थापनाहेतोः दोषान्तरत्वं वाच्यम्, न च तुल्यबलत्वे प्रतिरोधकत्वम्। तुल्यबलत्वं हि न वास्तवम्, [19]वस्तुनोर्विरुद्धद्वैरूप्यापत्तेः[20]। ततो विशेषजिज्ञासायां स्थापनाहेतोर्विशिष्योपस्थापितस्य[21] निर्दोषत्वनिश्चयान्नास्य[22] अङ्गान्तरवैकल्यं किन्तु तस्यैवेति युक्तमत्रापि[23] युक्ताङ्गहीनत्वम् ॥ २६ ॥

(॥ समाप्तमुपपत्तिसमप्रकरणम् ॥)

---

13. Text emended in the light of ANTB (p. 49). 14. प्रमाणं om. C. 15. तच्चानुज्ञा० A. 16-17. उक्तहेतोर्व्याप्तिज्ञानत्वानुपगमात् स्वगृह्यमाण्यस्य चानधि कबलस्याबाधकत्वात् A, उक्तहेतोर्व्याप्तिहीनत्वात् वेपपाद्य प्रमाणस्य चानधिकरणस्याबाधकत्वात् C. 18. ०अधिकरणत्वा० C. 19-20. वस्तुतो विरुद्धत्वैरूपापत्तेः C. 21. ०विशिष्योपस्थितस्य A. 22. ०निश्चयाद्वास्य A, निश्चयात्वास्य C. 23. अत्रादि युक्तापि A, अत्रापि C.

क्रमप्राप्तमुपलब्धिसमं लक्षयति—

निर्दिष्टकारणाभावेऽप्युपलम्भादुपलब्धिसमः[1] ॥ २७ ॥

वादिना निर्दिष्टस्य[2] किञ्चित्सम्बन्धित्वेनोपन्यस्तस्य[3] कारणस्य सम्बन्धिनोऽभावे भेदे संसर्गाभावे च सम्बन्धान्तरोपलब्धेः, 'अपि'कारादन्यस्य च तत्रोपलब्धेः प्रत्यवस्थानमित्यर्थः। तदेतत् प्रत्यवस्थानरूपं [? ०नस्वरूपं] वदन [? वदन्] जातित्वे सत्युपन्यस्तानामवधारणदूषणेन प्रत्यवस्थानत्वं लक्षणमाह स्म ; सत्यन्तं 'वह्निमानेन [? ०मानतो] धूमवानिति नास्ति तदभावेऽप्युपलब्धि [? ०लब्धे] रि'ति सदुत्तरवारणाय। तदाहुरार्याः —पञ्चमी [4]त्वन्वयसम्भवे जातिसामान्यलक्षणव्यवच्छिन्नेति[5] नातिप्रसङ्गः"। उत्थानबीजन्तु सर्वत्र विशेषणविशेष्यभावेनान्वयः, स चायोगव्यवच्छेदेन[6], ᶜअन्ययोगव्यवच्छेदेन वेत्यᶜभिमानः। अतएव प्रत्युत्तरसूत्रे भाष्यम्—"न तु नियम्यत" इति, वार्त्तिकञ्च—"न कारणान्तरं प्रतिषिध्यत" इति। प्रवर्त्तते चेयमित्थं—'वह्निमान् धूमादि'त्युक्ते किं धूमादेव वह्निमान्, उत[7] धूमाद् वह्निमानेव, [8]न त्वन्यवान्। नाद्यः, आलोकादपि तद्वत्त्वात्। नान्त्यः, ततो द्रव्यान्तराच्च। एवं 'पर्वतो वह्निमान्' इत्युक्ते किं पर्वत एव वह्निमान्, उत[9] पर्वतो वह्निमात्रवान्[10], उत वह्निमानेव न कदाचित्तद्विधुर इति। नाद्यः, दृष्टान्तेऽप्युपलब्धेः ; न द्वितीयः, वृक्षादीनामप्युपलब्धेः ; न तृतीयः,

---

1. ०लम्भानुपलब्धि० A. 2. निर्दिष्टतस्य C. 3. ०त्वेलोपस्य तस्य C. 4. त्वन्वयि० C. 5. ०लक्षणस्य वस्थानेति C. 6. ०व्यवच्छेद A. C–C in C only. †. See NB p. 1139 and NV, p. 1139, which, however, gives the reading न साध्यान्तराणां कारणान्तरं प्रतिषिध्यते. The reading of NV accepted· by Jānakīnātha is, however, found in NP (p. 53). NB also gives the reading न कार्यस्य कारणनियमः, while NP (p. 53) has the line—अतएव प्रत्युत्तरसूत्रे भाष्यं—न तु नियम उच्यते. 7. तत C. 8. नत्वन्यवान् C. 9. तत A, 10. ०मात्रन A.

अग्निविधुरस्याप्युपलब्धेः। एवं 'धूमवत्त्वादि'त्युक्ते धूमः किमन्ययोगव्यवच्छेदेन सम्बध्यतेऽयोगव्यवच्छेदेन वा ; नाद्यो वृक्षादीनामप्युपलब्धेः[11], न द्वितीयो निर्धूमस्याप्युपलब्धेरित्यादि। तदत्रावधारणविकल्पानुपपत्तिर्द्वारम्, हेतुदूष्यः, यथायथं बाधादिकमारोप्यम्, तदाभासा चेयम्॥ २७॥

प्रत्युत्तरमाह—

कारणान्तरादपि तद्धर्मोपपत्तेरप्रतिषेधः॥ २८॥

न वयमवधारणमन्वयाङ्गमभ्युपगच्छामो धूमादेव वह्निमानित्यादि[12], अतो नायं प्रतिषेध इत्यर्थः। अनभ्युपगमश्चैकस्मिन्नवधारणविकल्पे पञ्चम्यन्तेन दर्शयन्नुपलक्षणतया विकल्पान्तरेऽप्युक्तवान्। तदिदमयुक्ताङ्गाधिकत्वम्। मया तावदेवमुपेयमिति चेन्न, [13]अभ्युपगमविषयाभावात्, व्याघाताच्च, अवधारणविकल्पानुपत्तेरात्मनोऽपि व्याप्तेः[14]॥ २८॥

(॥ समाप्तमुपलब्धिसमप्रकरणम्॥)

---

11. च add. A. 12. ०मानेत्यादि C. 13. चभ्युपगम० A. 14. ०रात्मनोऽव्याप्तेः C.

क्रमप्राप्तमनुपलब्धिसमं लक्षयति—

तदनुपलब्धेरनुपलम्भादभावसिद्धौ[1] तद्विपरीतोपपत्तेरनुपलब्धिसमः ॥ २९ ॥

अनुपलब्धिः [2]स्वात्मनि यदि नानुपलब्धिस्तदा कथं स्वविषयेऽनुपलब्धिः स्यात्, विधिनिषेधयोर्विरोधात्; तथा चानुपलब्ध्युच्छेदे कुतो विषयाभावावधारणम्। अथ स्वात्मन्यनुपलब्धिस्तदा तस्याः सिद्धमभावेनुत्यनुपलम्भविपरीतस्य प्रतियोग्युपलम्भस्य सिद्धेः कुतो निषेधः प्रत्युत विधिरेवेति प्रत्यवस्थानमित्यर्थः। एवञ्चानुपलब्धेः स्वात्मनि [3]तदतद्रूपताविकल्पानुपपत्त्या तन्निरासेन प्रत्यवस्थानमनुपलब्धिसमजातिलक्षणमवसीयते। उपलब्ध्यादावप्येवं प्रत्यवस्थानं सम्भवतीति चेत्, ततः किम्; आधिक्यमिति चेत्, न, निराकरिष्यमाणत्वात्।

आचार्यास्तु—अनया[4] विषयिधर्मोपलक्षणात् अनुपलब्धेरपि [5]परम्परया [6]मविषयत्वाद्विषयितत्व्यतिरेकान्यतरस्मिन् प्रत्यवस्थानमित्यर्थः, तेन ज्ञानेच्छाप्रयत्नद्वेषशक्तिव्यवहृतितद्विरहाणामेवं प्रत्यवस्थानं सर्वमेव संगृहीतम्। प्रवर्त्तते चेयमित्थम्—उपलब्धिः [7]स्वात्मन्युपलब्धिर्न वा; आद्ये उपलब्धेर्यं नानुपलब्धिः, [8]क्रियाकर्मत्वयोर्विरोधात्; अन्त्ये स्वात्मन्यनुपलब्धिः कथमुपलब्धिः स्यात्, तथा च विषयस्यापि कथमुपलब्धत्व[9]मित्यज्ञानलक्षणाऽसिद्धि[10]रापतितेत्यादि। उपलक्षणायाश्च मानं पारम्पर्यमेव, तदेषा[11] उपलक्षणेनोक्तनाम्नी निमित्ततश्च [12]विषयिधर्मसमानाम्नीत्यक्षरतात्पर्यमाहुः।

[13]भास्करकृतस्तु—[14]अन्यतरान्तमप्यनुपादेयमेव; धूमः[15] स्वात्मनि धूमो न वा, न चेत्[16] पर्वत एव कथं तद्रूपः; आद्ये धूमवानयम्, न

1. ०अभावसिद्धिः A. 2. आत्मनि C. 3. तदतद्रूपता C. 4. अनयोः A. 5. परस्परया C. 6. मविषय० C. 7. स्वात्मं त्युप० C. 8. ०कर्मद्वयो० C. 9. ०उपलब्धि० C. 10. ०लक्षणसिद्धि० C. 11. तदैषा A. 12. विषयी धर्म० C. 13. अक्षरकृत० C. 14. अन्यतवास्तम० C. 15. धूमधूमः C. 16. लब्धे C.

धूमः, तथा च पर्वतोऽपि कथं धूमवानित्येवं प्रत्यवस्थानाव्यापनात्; सूत्रे त्वनुपलब्धिपदमुदाहरणार्थम्, न तु लक्षणे विवक्षणीयम्, अन्यत्रापीदृशप्रत्यवस्थानस्य जातित्वं न [? जातित्वेन] तद्बहिर्भावानौचित्यादिति प्राहुः ॥ २९ ॥

क्वचित् प्रत्युत्तरमाह--

[17]अनुपलम्भात्मकत्वादनुपलब्धेरहेतुः[18] ॥ ३० ॥

अनुपलब्धिः [19]स्वात्मन्यनुपलब्धिरिति चेन्न। [20]स्वात्मन [21]उपलब्धिव्यतिरेक इति चेन्न; कथमित्थं भविष्यति, तत् किं [22]स्वात्मन्यनुपलब्धिरिति चेत्, [23]कोऽस्यार्थः; स्वात्मोपलब्धिव्यतिरेकान्यत्वमिति चेद् वाढम्[24]; तथा सति कथमनुपलब्धिरिति चेत्, किमत्र विरुद्धम्, किमुपलब्धिसामान्यव्यतिरेकत्वम्, उपलम्भव्यतिरेकत्वं वा, घटोपलम्भव्यतिरेकत्वं वा? आद्ये न[25] [26]काऽपि क्षतिः, प्रकृतप्रतियोग्यनुपलब्धेरेवाङ्गत्वात्। न द्वितीयः, [27]तत्किञ्चिद्विशेषाभावस्य [28]सामान्यपरिपन्थित्वात्,[29] अन्यथा तवैव व्याघातात्। नान्त्यः, एकविशेषाभावस्यापरविशेषाभावाव्यापकत्वेनाविरोधात्। इत्थञ्चानुपलब्ध्यविषयत्वेऽपि[30] [31]अनुपलब्धितादात्म्यात् कुतः प्रतिषेधः, न हि [32]सा स्वाविषयं प्रतिषेधति, तथा सति सैव न स्यात्, का प्रतिषेधमातनुयात्[33], न स्याच्च [34]त्वत्पक्ष इति व्याघात इत्यर्थः। तदिदं युक्ताङ्गहीनत्वम्, निषेधकप्रमाणमनपेक्ष्य[35] निषेधसाधनात्; अविषयवृत्तित्वं वा, स्वविषये हि[36] निषेधकत्वम्, न तु तदविषये[37] ॥ ३० ॥

---

17. अनुलम्भ० C. 18. लब्धिरहेतुः A. 19. आत्मन्युप० A. 20. आत्मन A. 21. उपलब्धिरिति व्यति० A. 22. वात्मन्यनुप० C. 23. अस्यार्थः A. 24. चेद् वाचं A, चेत्वात् C. 25. न add. A. 26. कोऽपि A. 27. न किञ्चिद्० A. 28-29. सामान्यापरिपन्तित्वात् C. 30. अपि om. C. 31. नानुपलब्धितादात्म्यते C. 32. षार्थाविषयं C. 33. ०मातन्वयात् C. 34. त्वपक्ष C. 35. ०मनापक्ष C. 36. हि om. A. 37. ०विषयोयः A.

अस्तु वा तदनुपलब्धिः[38], तथापि न क्षतिः, न हि सा [39]स्वाभाव-
नियतेत्यत आह—

ज्ञानविकल्पानाञ्च भावाभावसंवेदनादध्यात्मम् ॥ ३१ ॥

ज्ञानविकल्पानां ज्ञानविशेषाणामात्मनि भाववदभावसंवेदनात्[40] अभावस्य
साक्षात्प्रमितेश्चाप्रतिषेध इत्यर्थः। [41]हन्तैवमनुपलब्धिरभावग्राहिका न
स्यात्, तत्सत्त्वेऽप्यप्रमितेरिति[42](चेन्न), तन्मात्रमेव मेव[43][? नैवम्],
योग्या हि स ग्राहिका[44], योग्यता च सहकारिसम्पत्तिरधिकन्तु[45]
मणिमरीचावनुसन्धेयम्।

आचार्यास्तु—तथाऽपि भावाभावयोर्विधिनिषेधगम्यता[46] कथमव-
गम्यत[47] इत्यत्राह—ज्ञानेति; 'अस्ति' 'नास्ति' 'उपलभे' 'नोपलभ'
इत्यादिनां ज्ञानविकल्पानामध्यात्मं[48] [49]मनसा भावाभावविषयत्वं संवे
[? ०विषयसंवे]दनान्नेदमुपपत्तिसाध्यमित्यर्थ इत्याहुः।

अन्ये तु—यः पुनरुपलब्धेरभावश्चोपलब्धिसम्बन्धो[50] विरुद्ध इति
[51]नोपलब्धेरनुपलम्भः स्यात्, अनुपलम्भात्तदभावसिद्धौ[52] तद्विप-
रीतोत्पत्तेरिति प्रत्याचष्टे[53], तं प्रत्याह—ज्ञानेति; न प्रतिषेधः प्रकृत-
मिति वर्णयन्ति। एवमुपलब्ध्यादावपि बोध्यम्; तथा[54] हि—उपलब्धिः
स्वात्मन्युपलब्धिरित्यस्य कोऽर्थः, स्वोपलब्धिरिति चेत्ततः किम्, न
[55]ह्युपलब्धत्वमुपलब्धिविरोधात्, तथा च सति [56]तत्प्रतिपादनप्रयास-
व्याघातः[57], काचिच्च स्वोपलब्धिर्न[58], न चैवमुपलब्धित्वव्याघातः,

38. तदनुपलम्भः A. 39. स्वभाव० A. 40. ०सांवदनात् C. 41. अन्तैव० C. 42. ०प्रमितिरिति C. 43. मेव om. C. 44. हि का C. 45. ०सम्पत्ति-वाधकन्तु C. 46. ०निषेधगम्यते A. 47. ०गव्यत C. 48. ०मव्यात्मं A. 49. ममसतो वा भावाविषयत्वं C. Text emended in the light of NP (p. 62). 50. ०लब्धिश्च सम्बन्धो A. 51-52. नोपलब्धिरनुपलभ्य स्याता अनुपलम्भो तुद्भावसिद्धौ A. सोपलभ्यस्य तौ नुपलम्भान्तद्भाव-सिद्धौ C. 53. प्रत्यचोष्टं C. 54. तत्रा A. 55. ह्यपलब्ध० C. 56-57. तत्पादनप्रयासव्याघातात् A. 58. ०लब्धिधर्मं A.

विशेषभेदस्य सामान्याविरोधित्वादिति। सेयं [59]जातिरंशतः [? ०रन्ततः] [60]कीर्त्तिमपि व्यामोहितवती[61], यदाह—

"अप्रत्यक्षोपलम्भस्य नार्थदृष्टिः प्रसिध्यती"ति † ॥ ३१ ॥

॥ समाप्तमनुपलब्धिसमप्रकरणम् ॥

---

59. जातिविंशतः C. 60-61. कीर्त्तिव्यामोहि भवती A, कीर्त्तिमपि व्यामोहित-रति C. Text emended in the light fo NP (p. 62). A similar sentence is also found in न्यायरत्न of मणिकण्ठ मिश्र—तदनयोः कीर्त्तेरपि वचनं व्यामोहनकृतम्, यदाह—अप्रत्यक्षोपलम्भस्य नार्थदृष्टिः प्रसिध्यति। (p. 216). † This famous half-verse is from प्रमाणविनिश्चय of Dharmakīrti. This has also been quoted in ANTB (p. 59).

अनित्यसमं[1] लक्षयति—

साधर्म्यात्तुल्यधर्मोपपत्तेः सर्वानित्यत्वप्रसङ्गादनित्यसमः ॥ ३२ ॥

साधर्म्यमिहोपलक्षणम्, वैधर्म्येणापि[2] तथा[3] प्रत्यवस्थानसम्भवात्। अनित्यत्वपदं [4]साध्यमात्रपरमत एव तुल्यधर्मोपपत्तेरित्याह, न [5]त्वनित्योपपत्तेरिति। तुल्यधर्मः [6]सपक्षधर्मः साध्यवत्त्वम्, सर्वस्य सपक्षवद्विपक्षस्यापि तेन [7]साधनमात्रादेः साध्यधर्मवत्त्वमुपपद्यते, अतो विपक्षस्यापि सपक्षत्वप्रसङ्गात् प्रतिषेध इत्यर्थः। लक्षणन्तु—यत्किञ्चिद्धर्मबलेन[8] विपक्षस्य साध्यवत्त्वप्रसङ्गात्मकजातित्वम्; न [9]चाविशेषसमैवेयम्, अविशेषत्वेनानापादनादित्याचार्याः। विपक्षमात्रे साधर्म्येणानित्यत्वप्रसङ्गत्वाभावत्वेन[? भावेन] तत्र विशेषणं देयम्, व्याप्तिमपुरस्कृत्य साधर्म्येण विपक्षस्यानित्यत्वप्रसङ्गश्चानित्यसम इति तु तत्त्वम्। साध्यधर्मान्यत्वेन च तत्रापाद्यं विशेष्यम्[?], तथा चोपलक्षणेनैव लक्षणं [10]श्रेय इत्यन्ये। परिकरः सर्वस्तद्वदेव बोध्यः ॥ ३२ ॥

प्रत्युत्तरमाह—

साधर्म्यादसिद्धेः प्रतिषेधासिद्धिः प्रतिषेधसाधर्म्यात् ॥ ३३ ॥

असिद्धेरभ्युपगमे यदि घटसाधर्म्यादनित्यः शब्दस्तर्हि तादृशप्रमेयत्वाद्व्योमाद्यपि[11] अनित्यं स्यादिति [12]वदतः कोऽभिप्रायः[13], यथा समानधर्मप्रमेयत्वादेर्न सिद्धिस्तथा कृतकत्वादपि, तुल्यत्वादिति चेत्; तर्हि प्रतिषेधस्य साधकत्वप्रतिषेधस्याप्युक्तहेतोरसिद्धिः, प्रतिषेध्येन[14] स्थापनाहेतुना त्वदभ्युपगतो साधकभावो न, [15]प्रतिपाद्यत्वादिरूपसाधर्म्यादित्यर्थः, सोऽयं व्याघातः ॥ ३३ ॥

1. अनित्यसमं om. A. 2. वैधर्मादि A. 3. तता C. 4. साध्यपर॰ C. 5. त्वन्यनित्यो॰ A. 6. सम्बन्धधर्मः A. 7. साधर्म्यमात्रादेः C. 8. ॰धर्ममनेन A. 9. वाविशेष॰ A. 10. श्रय C. 11. ॰प्रमेयत्वात्वोमाद्यपि C. 12-13. वदस्ताभिप्रायस्तस्माच्च A. 14. प्रतियोध्येन C. 15. प्रतिपाद्यत्वोदिरूप॰ C.

युक्ताङ्गहीनत्वमप्याह—

दृष्टान्ते च साध्यसाधनभावेन प्रज्ञातस्य धर्मस्य हेतुभावात् तस्य चोभयथा भावान्नाविशेषः ।। ३४ ।।

साध्यव्याप्यत्वेन दृष्टान्ते प्रमितस्य धर्मस्य हेतुभावात्तस्य उभयथाऽन्वयेन व्यतिरेकेण च प्रकृत एव भावात् । उभयथापि त्वदुक्ते विरहान्नाविशेषः[16] ।। ३४ ।।

(।। समाप्तमनित्यसमप्रकरणम् ।।)

16. विरहाद्वा विशेषः A, विरहात्वा नाविशेषः C.

नित्यसमं लक्षयति—

नित्यमनित्यभावादनित्ये नित्यतोपपत्तेर्नित्यसमः ॥ ३५ ॥

अनित्ये शब्दादौ नित्यं सर्वदाऽनित्यभावादनित्यत्वं यतोऽतोऽनित्यत्वे नित्यत्वस्योपपत्तिः सिद्धिः, तस्यासदातनत्वे सदा धर्मसम्बन्धस्यानुपपत्तेः, ततः प्रत्यवस्थानं नित्यसम इत्यर्थः; लक्षणन्तु—सदाऽनित्यत्वसम्बन्धेनानित्ये नित्यतोपपत्त्या प्रत्यवस्थानत्वम्; उदाहरणं व्याख्यानेनैव स्फुटमिति यथाश्रुतानुरोधिनः[1]। सम्प्रदायमनुबन्धा[? ०मनुरुन्धा]नास्तु—नित्यमनित्यभावादिति धर्मस्य [2]तदतद्रूपताविकल्पोपलक्षणपरम्, अनित्य इति धर्मिमात्रपरम्, नित्यत्वपदं स्वीकृतविरुद्धपरम्; एवञ्च धर्मस्य यत्किञ्चिद्विरुद्धं विकल्प्य धर्मिणि स्वीकृतविरुद्धापादानात्मिका तद्वैशिष्ट्यनिराकरणात्मिका वा जातिर्नित्यसमेत्यागतम्; तेन नित्यत्वानित्यत्वकार्यत्वाकार्यत्वभिन्नत्वाभिन्नत्वाश्रितत्वानाश्रितत्वसत्त्वासत्त्वादयः सर्व एव विकल्पाः संगृहीताः। [3]तदियमित्थं प्रवर्त्तते—'शब्दोऽनित्यः कृतकत्वादि'त्युक्ते तदिदमनित्यत्वं नित्यमनित्यं वा, अन्त्ये [4]तन्नाशे नित्यत्वप्रसङ्गः; नाद्यो धर्मनित्यत्वे धर्मिणोऽपि नित्यत्वप्रसङ्गात्, न हि धर्मिनिरपेक्षा धर्मस्थितिः, नित्यत्वे च गतमनित्यत्वेन, विरोधात्। एवमनित्यत्वं यदि नित्यं [5]कथमतदाकारं धर्मिणि तदाकारतामासञ्जयेत्, अन्यथा नीलीपुष्पस्य[6] स्फटिके रक्ताकारासञ्जनापत्तेः; अथानित्यमेव तदा [7]रक्तजपायोगात् [8]स्फटिकमणेरवदातत्वप्रसङ्गः[9]। एवं वैरूप्येण[?द्वैरूप्येण] विकल्पे द्रष्टव्यम्—अनित्यत्वं शब्दाद् भिन्नं न वा; आद्ये धर्मधर्मिभावानुपपत्तिः[10], भिन्नत्वञ्च Cभेदान्तरयोगाच्चेदनवस्थाC, स्वरूपञ्चेदा-

1. ०श्रुतार्थबोधिनः A, ०श्रुतात्तावाधिनः C. 2. तदद्रूप० A. 3. तदीय० A, तदाय० C. 4. ढन्नाशे C. 5. कथमं दाकारं A. 6. नीलीत्वपस्य C. 7. रक्तयथायोगात् C. 8-9. स्फटिकारुणे यवद्वान्तत्वप्रसङ्गात् A, स्फटिकारुणे मवदांतमवदातत्वप्रसङ्गः C. 10. ०भावादुपपत्तिः A. C—C in C only.

त्माश्रयः ; द्वितीये पक्षसाध्यान्यतराभावः । तथा साध्यं साधनाद्भिन्नं न वा ; न चेत् साध्याविशेषः ; आद्ये भेदो न स्वरूपम्, सहप्रयोगानुपपत्तेः, तयोर्दर्शने भेदनिश्चये संशयाद्यनुपपत्तेश्च[11] ; नान्योऽन्याभावः, स हि भिन्नोऽभिन्नो वा[12], आद्येऽनवस्था, [13]अन्त्ये प्रथमपक्षप्रवेशात्— इत्यादि [14]कुतर्कानुशीलननिपुणानां [15]माध्यमिकचार्वाकवेदान्तिगणानामतिनिर्भरेण प्रत्यवस्थानमुदाहार्यम् । तदस्याः[16] धर्मधर्मिभावो द्वारम्, स एव दूष्यः, प्रतिकूलतर्कत्वमारोप्यम्, तदाभासा चेयमापाततः, ^पर्यन्ततो बाधादिदेशनाभासा चेत्याहुः ॥ ३५ ॥

प्रत्युत्तरमाह—

प्रतिषेध्ये नित्यमनित्यभावादनित्यत्वोपपत्तेः प्रतिषेधाभावः ॥ ३६ ॥

अनित्यतया त्वया प्रतिषेध्ये शब्दे नित्यं सकलस्वावच्छिन्नकालेऽनित्ये नित्यभावात् [? ०कालेऽनित्यभावात्] नित्यः शब्द इति यो प्रतिषेधस्तस्याभावः^ ; न ह्यनित्यत्वं तत्र सर्वदा नित्यत्वञ्चेति सम्भवति, व्याघातात् ; अथ सर्वदैवानित्यत्वं तत्रासिद्धं ततो हेत्वसिद्धिरित्यक्षरार्थः ; तात्पर्यन्तु स्वोक्तिव्यापकतया यथायथं स्वव्याघातकत्वे । अनित्यत्वञ्च [17]सदातनभिन्नत्वम्, तच्च नित्यमेव । न च धर्मनित्यत्वे[18] धर्मिणोऽपि[19] नित्यता, तयोरत्यन्तभेदात्, भेदेऽपि च धर्मधर्मिभावः क्वाचित्कः, क्वचिदेव प्रमाणप्रसरात् । तदेतद् युक्ताङ्गहीनत्वम् ।

यत्तु—अन्याकारस्य कथं तदाकारासञ्जकत्वमिति, तन्न, [20]धर्मत एव[21] हि धर्मिणस्तदाकारता, तदासञ्जकत्वं त[? च] तद्बुद्धिजन-

---

11. च om. C. 12. सः A. 13. अन्ये A. 14. सतर्का० C. 15. साध्यमाचार्वाक० A. 16. तदन्याः A. A—A in A only. 17. सदाचन० A. 18. कथं add. A, C. 19. अपि om. C. 20-21. धर्मत्व हि A. धर्मत वहि C.

कत्वम्, स्वत एव [22]तदुत्पादकत्वञ्चासिद्धम्। तदिदमयुक्ताङ्गाधिकत्वं, तदाकारतासञ्जकत्वमयुक्तमङ्गीकृत्यासञ्जनात्। [23]भेदश्चान्योन्याभाव एव, स च भिन्न एव, अनवस्था च प्रामाणिकी न दोषमावहतीति दिक्।

उद्देशक्रमोल्लङ्घनप्रयोजनञ्च चिन्त्यम्॥ ३६॥

(॥ समाप्तं नित्यसमप्रकरणम्॥)

22. तेद्वत्पादक० A. 23. भेदस्त्वान्योन्या० A.

क्रमप्राप्तं कार्यसमं लक्षयति—

प्रयत्नकार्यानेकत्वात् कार्यसमः ॥ ३७ ॥

प्रयत्नकार्यस्य प्रयत्नसम्पाद्यस्य जातिरूपप्रत्यवस्थानबीजस्यानेकत्वम् उक्तहेतुकान्यत्वम्[1], तस्मात्तद्वतः[2] प्रतिषेधः उक्तान्यहेतुका[3] जातिरित्यर्थः। यद्वा[4]—न विद्यते एकत्वं यत्रानेकत्वम्, अनेकं निखिलं यत् प्रयत्नकार्यं प्रयत्नसम्पाद्यं प्रयत्नप्रतिपादितं वा प्रत्यवस्थानम्; ततो भिन्न इति शेषः, "कार्यान्यत्व" इत्युत्तरसूत्रदृष्टेः[5]; तेनोक्ताशेषान्यजातित्वं लक्षणमवसेयम्[6]। प्रयत्नकार्यस्योत्पत्त्यभिव्यक्तिरूपत्वेनानेकत्वात् कृत(क)त्वहेतोः प्रत्यवस्थानमित्यर्थः; तद् यथा—'शब्दोऽनित्यः प्रयत्नकार्यत्वादि'त्युक्ते कार्यत्वं जन्यत्वञ्चेदसिद्धिः, ज्ञाप्यत्वञ्चेद्व्यभिचारः—इति व्याख्यानन्तु न युक्तम्, [7]सदुत्तरत्वात्; असिद्धाया असिद्धेरुद्भावनं न जातिः, (अ)व्याघातकत्वात्, किन्तु [8]केवलनिरनुयोज्यानुयोगः।

आचार्यास्तु—परोक्ते [9]स्वापेक्षितप्रमाणदूषणेन[10] प्रत्यवस्थानं कार्यसमः, कथमिदं सूत्रलभ्यमिति[11] चेत्, प्रयत्नकार्यस्य प्रयत्नविषयस्य [12]व्यवहर्त्तव्यस्यानेकत्वं [13]पारमार्थिकापारमार्थिकत्वं तस्मात् प्रत्यवस्थानमित्यर्थात्[14]। प्रवर्त्तते चैवम्—'अनित्यः शब्दः कार्यत्वादि'त्युक्तेऽसिद्धं कार्यत्वं न साधनायालम्, ततः प्रयत्नान्तरोपलब्ध्या[15] साध्यम्, सा चानैकान्तिकीति, एवं धूमादावपि बोध्यम्। यदि च प्रयत्नकार्यपदं कार्यत्वमात्रपरं भवेत्तदा धूमाद्यसंग्रहः स्यात्, असंग्रहश्च[16] स्याद्[17] दृष्टान्ताद्युत्प्रेक्षित-

---

1. उक्तवत्तदन्यत्वं A, उक्तञ्च तदन्यत्वं B. 2. तस्मात्तु यतः A. 3. उक्ताहेतुत्वा C. 4. मत्वा C. 5. This refers to न्या. सू. ५।१।३८. 6. ०मवदेयम् C. 7. सत्वत्तर० C. 8. ०निरर्थयोज्या० C. 9-10. स्वान्तप्रक्षितप्रमाणभूषणेन C. 11. सूत्रनद्यामिति C. 12. व्यवहर्त्तव्यस्या० om. C. 13. पारमार्थी पारमार्थिकत्वं A. 14. ०मित्यर्थः A. 15. ०रोपलब्ध्या C. 16. च om. A. 17. ०दृष्टान्ताद्युत्प्रोक्षित० A, ०दृष्टान्तोद्युत्प्रेक्षित० C.

प्रमाणदूषणेन प्रत्यवस्थानस्य। न चेयं प्रसङ्गसमाऽनवस्थाऽनुत्थानात्[18]; न च च्छलम्, शब्दवृत्त्याद्यसञ्चारात्; न च सदुत्तरम्, स्वयमुत्थापित-हेतौ दूषणेऽपि [19]वस्तुतोऽदोषात्, अन्यथाऽसाधकतासाधनस्यापि व्याघातात्, भाष्यादेरप्यत्रैव तात्पर्यमित्याहुः।

(ननु) एवं सति विभागव्याघातः, उक्तान्यासामपि[20] जातीनां सम्भवात्। तथा हि—'जीवच्छरीरं सात्मकं प्राणादिमत्त्वादि'त्युक्ते जातिवाद्याह—प्राणादिमत्त्वतद्विरहवैधर्म्यस्थितावपि यथा न सदसत्त्व-विकल्पः, तथा [21]सात्मकत्वनैरात्म्यविकल्पोऽपि न स्यात्, सेयम-विकल्पसमा। एवं प्रत्यक्षादिसमा, यथा—प्रत्यक्षान्तराद् विपरीतमेव किं न स्यात्। तथा वह्निधूमयोर्व्याप्तिर्दृश्ययोरदृश्ययोर्वा दृश्यादृश्य-साधारणयोर्वा, दृश्यव्याप्तौ [22]कारीषो न सिद्ध्येत्, द्वितीये तार्णः [न सिद्ध्येत्], तृतीये चैत्रकोऽपि सिध्येत्[23], [24]सेयमव्याप्तिसमा। तथा बुद्धिनित्यत्वे शरीरानुपयोगवत् प्रयत्ननित्यत्वे बुद्धरनुपयोगः स्यात्, सेयं प्रतिवन्दिसमा। [25]तथाऽनुपलभ्यमानमेव किञ्चिद्[26] दूषणं स्यात्, सेयं[27] शङ्कापिशाचीसमा। तथा कार्यकारणभावस्योपकार[28]नियतत्वेऽ-नवस्थाऽन्यथाऽव्यवस्था, सेयमनुपकारसमा। तथा सकर्तृकत्वेऽदृष्टद्वारा[29] अस्मदादिभिः सिद्धसाधनमिति सिद्धसाधनसमा। तथा मत्पक्षवत्त्वत्-पक्षेऽपि किञ्चिद्दूषणं स्यादितित्यनुपपत्तिसमा। तथा यदि लक्षणाद्वि-शेषः येन केनचिद्वैशिष्ट्येन त्रैलोक्यं विशिष्टं स्यादिति विशेषसमा। तथाऽवधारणानुपपत्तेः पर्वतोऽपि दहनवानिति साध्यार्थः, 'अपि' तु

---

18. ०वस्थानुपनात् C. 19. वर्णनोऽदोषात्. C. 20. उक्तान्यादामपि A. 21. सात्मकत्वनैवात्म० C. 22-23. शरीरो न स्यात् द्वितीये अर्णः ......A, कारीयो न स्यात् द्वितीये तां तुः ..... C (कारीषः=शुष्कगोमयजातः, तार्णः=तृणजातः, चैत्रकः=एरण्डकाष्ठजातः). 24. देयमव्याप्ति० A. 25. तथात्वपमान० C. 26. कि चि C. 27. देयंA. 28. ०भावस्य नुपकार० C. 29. ०दृष्टत्वावा C. 30. अन्यासाव्यक्तान्तर्भावात् C.

दृष्टान्तं समुच्चिनोतीति दृष्टान्तस्यापि प्रतिज्ञाविषयत्वाद्दृष्टान्ताभाव इति (चेत्)। न। इष्टापादनरूपाणां मतानुज्ञात्वात्, [30]अन्यासामुक्तान्तर्भावात्, अन्यत्र [31]अनन्तर्भूतानाञ्चोपपत्तिसमायामन्तर्भावः[32], [33]उक्तान्योपपत्तेः प्रत्यवस्थानत्वञ्च तल्लक्षणमवसेयमिति [34]निबन्धकारः।

[35]दिङ्नागस्त्वाह—

कार्यत्वान्यत्वलेशेन यत्साध्यासिद्धिदर्शनम्।
तत्तत्सम्बन्धिनां भेदादसौ कार्यसमो मतः ॥[36] [ ]

तदेतत् स्फुटयति कीर्त्तिः—

साध्येनानुगमात् कार्यसामान्येनापि साधने।
सम्बन्धिभेदाद् भेदोक्तिदोषः कार्यसमो मतः ॥

[प्रमाणवार्त्तिकम् १।१६]

इदमुक्तं[37] भवति—'शब्दोऽनित्यः कार्यत्वादि'त्यादौ प्रयुक्ते—अन्यत् कार्यत्वं घटस्य [38]मृद्दण्डादिपूर्वकत्वम्, अन्यच्च[39] शब्दस्य [40]ताल्वादिसंयोगविभागपूर्वकत्वमिति कथं शब्दानित्यत्वमिदं साधयेत्[41], पक्षदृष्टान्तसाधारणहेत्वभावात्; उभयत्र कार्यशब्दप्रयोगस्तु नानार्थवत् [? ०वान्], न च तावन्मात्रादनुमितिः, [42]अतोह्यलिङ्गम। तदाह—

वस्तुभेदे[43] प्रसिद्धेऽपि [44]शब्दसाम्यादभेदिनः।
न [45]युक्तानुमितिः [46]पाण्डुद्रव्यादिव हुताशने ॥

[प्रमाणवार्त्तिकम १।१४]

31-32. अन्तर्भूता पत्तिसमा० C. 33. उक्तस्योपपत्तेः C. 34. निबन्धावः A, निरस्कारः C. 35. दिङ्याग० A. 36. This verse is also quoted in तात्पर्यटीका. 37. इदयुक्तं C. 38. मूलकं पूर्वकत्वं A, मृदं पूर्वकत्वं C. Text emended in the light of NP, pp. 69-70. 39. अन्यश्च C. 40. तात्वादि० C. 41. साधनेत C. 42. अथो हि लिङ्गम् A, अर्थो हि लिङ्गम् C. 43. अर्थभेदे A, नुतेदि C. 44. शब्दभेदादभेदिनः A, C. 45. न om. A. 46. साहृद्रव्या० A. Reading emended in the light of प्रमाणवार्त्तिकवृत्ति by मनोरथनन्दी (p. 14).

इति ।

नन्विदं कार्यत्वस्य दृष्टान्तगतस्य व्यावृत्त्या पक्षे साध्याभावपरश्चेदप-कर्षसमत्वम्, भेदोक्तिमात्रपर्यवसानश्चेदवर्ण्यसमत्वमिति[47] परमन्यायाचार्याः । न युक्तमेतत्, व्याप्यत्वासिद्धिपरत्वे तदसम्भवात्, न वा भेदोक्तिमात्रपर्यवसानेऽवर्ण्यसमत्वमुक्तलक्षणविरहात् । नन्विदं सदुत्तरमेव, अननुगमे व्याप्तेरुपपादयितुमशक्यत्वादिति चेन्न[48], सम्बन्धिभेदाद्भेदप्रयुक्ताव्याप्त्यभिधानस्य मत्त्वा [?तत्त्वा]नुपपत्तेः, प्रयोजकत्वस्य दुष्टत्वात् । स्वव्याघातकश्चेदं स्फुटमिति नाजातित्वमिति । Cतत्तु तस्य[49] स्वचरितC विरुद्धम्, यदीश्वरानुमाने [50]अन्यच्च घटादेः कार्यत्वमन्यच्च [51]तनुवनभुवनादीनामित्याह स्म ॥ ३७ ॥

प्रत्युत्तरसूत्रमाह—

कार्यान्यत्वे प्रयत्नाहेतुत्वमनुपलब्धिकारणोपपत्तेः ॥ ३८ ॥

कार्यस्य उक्तरूपप्रयत्नकार्यस्यान्यत्ववति प्रत्यवस्थानम्, [52]प्रयत्नाहेतुकं [53]नैतत् प्रयत्ननिर्वाह्यमित्यर्थः; कुत इति चेत्, अनुपलब्धिकारणोपपत्तेः, कारणोपपत्तेरनुपपत्ते[? ०रनुपलब्धे]रित्यर्थः, [54]राजदन्तादित्वात् पूर्वनिपातः ।

आचार्यास्तु—कार्यान्यत्वेऽभिव्यक्तिलक्षणे प्रयत्नस्याहेतुत्वम्, अनुपलब्धिकारणोपपत्तेः हि तथा स्यात्; न च[55] शब्दस्यानुपलब्धिकारणं किञ्चिदुपपद्यत इति । एतेनोपलब्धौ हेतुर्नायम्, इत्थञ्च प्रयत्नपूर्वसत्त्वे [56]तदानीमप्युपलभ्येतेति तत्कार्यत्वमेवेत्यसिद्धो नायमित्युक्तम्[?], त्वदुत्प्रेक्षितञ्च नास्मदभ्युपगतमिति तद्दूषणस्थितावपि नास्माकं क्षति-

---

47. पर्यवशात् हवर्ण्य० A. 48. चेत्ननु A. C—C in C only. 49. तस्य= दिङ्नागस्य (see ANTB, p. 66). 50. अस्याच्च A, अस्य तु C. 51. तत्रवर्णवशादीनाम्० C. 52. प्रयत्नहेतुक A. 53. चैतत् C. 54. राजा दण्डादि० C. 55. ल भ C. 56. तदानीमभ्युप० C.

रिति च, तथाऽनुक्ते दूषणमविषयवृत्तीति प्राहुः। कार्यान्यत्वे उत्पत्तिलक्षणे[?]प्रकृष्टो[57] यत्न यत्रासौ [58]प्रयत्नः त्वदुत्प्रेक्षितं प्रमाणम्, तस्य न हेतुत्वम, अनुपलब्धिकारणोपपत्तेः, अनुपलब्धिः कारणं प्रमाणं यत्र तस्मात्, तद्व्यतिरेकात् [59]तत्सहकृतप्रत्यक्षात् तदुपपत्तेरिति तु ज्यायः। यद् वा—[A]कार्यसमया हेतु[A]कार्यस्य त्वदुक्तप्रमाणादन्यत्वे प्रयत्नस्य यथोक्तरीत्या त्वदुक्तप्रतिषेधस्याहेतुत्वं [A]न दूषणहेतुत्वं[A] तत्र तस्यानुपलब्धेरित्यर्थः, [60]एवञ्चाविषयवृत्तित्वं स्फुटमेव ॥ ३८ ॥

(॥ समाप्तं कार्यसमप्रकरणम् ॥)

---

57. ०लक्षणप्रकृष्टो C. 58. प्रयत्नस्त्वत्वत्प्रेक्षितं C. 59. तुमूत्रकृत० A. A—A in A only. 60. एवञ्च विषय० C.

एवं तावत् परेण जातौ प्रयुक्तायां मदुत्तरेणैवोद्धारः कर्त्तव्यः, एवं हि तत्त्वनिर्णयविजयव्यवस्थे स्याताम् , अन्यथा तु [1]षण्डमैथुनवन्नैकमपीति तत्प्रदर्शनार्थं कथाभासरूपां [2]षट्पक्षीमाह—

प्रतिषेधेऽपि समानो दोषः ॥ ३९ ॥

अयं हेतुरसिद्धस्तत्साधकप्रयत्नान्तरमुपलभ्यमानत्वहेतोरनैकान्तिकत्वादिति योऽयं प्रतिषेधः स प्रतिषेधेऽपि भवत्पक्षेऽपि समानः, तत्रापि प्रयत्नाभिव्यङ्ग्यत्वमसिद्धम् , तत्सिद्धिहेतोः प्रयत्नान्तरमुपलभ्यमानत्वस्यानैकान्तिकत्वादिति समानः कार्यसमो दोषः। यद् वा—प्रतिषेधे[3] प्रतिषेधहेतावसाधकनानुमानेऽपि[4] समानोऽनैकान्तिकत्वरूपो[5] दोषः, न [6]ह्येतदैकान्तिकम् , स्वसत्ताप्रतिक्षेपात्, तदिदं शब्दसाम्येन वाक्छलम्। अथवा—दोषमात्रेण साम्यम् , [7]मत्पक्षवत्त्वत्पक्षेऽपि कश्चिद्दोषोऽस्तीति, सेयं मतानुज्ञा ॥ ३९ ॥

तत् किं[8] कार्यसमायामेव प्रत्यवस्थानम् ? नेत्याह—

सर्वत्रैवम् ॥ ४० ॥

सर्वत्र उत्कर्षसमादौ एवं सजातीयेन[9] विजातीयेन वा प्रत्यवस्थानाभासो बोध्य इत्यर्थः[10]। यद्यपि [11]षट्पक्ष्यनन्तरमेवायमतिदेशो [12]युज्यते, तथापि [13]त्रिपक्ष्यादिसूचनायेदानीमेवातिदेशः कृत इत्यवसेयम्। उभयासुज्ञत्वाप्रतिपत्तिफलाद्धि[14] षट्पक्षी, तच्च[15] फलं त्रिचतुःपञ्चपक्षेऽपि समानम्। हन्तैवं चतुर्थकक्षादि[16] नावततेरदेव, त्रिपक्षीवत्तदनन्तरमेव

---

1. पशुमैथुन० A. 2. षट्पक्षमाह A, षटपक्षीमाह C. 3. प्रतिषेधे om. C. 4. ०साधकमानु० C. 5. ०कत्वा रूपे C. 6. ज्यै तदैका० C. 7. सत्पक्षव त्वत्० C. 8. तदेतत् किं A, तत् कं C. 9. सजातीये C. 10. इत्यर्थः om. C. 11. षट्पक्षनन्तर० A, षटपक्ष्यनन्तर० C. 12. मुह्यते C. 13. त्रिपक्षादि० C. 14. ०पत्तिकना हि A. 15. तत्र च C. 16. कक्षादौ A.

पर्यनुयोज्योपेक्षणस्य [17]मध्यस्थेनोद्भावनसम्भवात्[18], [19]अनुद्भावने वा [20]मध्यस्थस्यैवासुज्ञत्वापत्तेः, मध्यस्थासुज्ञत्वनिबन्धने तु तदभावे[21] गतं षट्पक्षीनियमेन, सप्तमादेरपि सम्भवात्, [22]मृदुतममृदुमध्यम[मृदु] ᶜनिक्षुवद्धृदय[॰निष्ठुरहृदय]तया सप्तमषष्ठपञ्चमचतुर्थेषु दोषाᶜभिधाने षट्पक्षीप्रभृतीनां त्रिपक्षीपर्यन्तानां सर्वासां सम्भव इति चेत्, तदयुक्तम्[23]। मध्यस्थो हि [24]पिण्डपतिरिव धर्माधर्मनिभयोर्दोषगुणयोरनुरूपफलप्रतिपादनाध्यक्षः कथमिव तादृशमवसरं दद्यात्, दाने वा सप्तपक्ष्यादिरप्यापद्येत। उच्यते[25]। ᴬपर्यनुयोज्योपेक्षणं मध्यस्थैरेव किमुद्भाव्यते, न वादिना ? †स्वकौपीनविवरणानौचित्यादिति चेन्न, परनिग्रहाय 'मयि दुष्टं वक्तर्यपि न भवतां दूषणक्षमते'ति प्रौढिविकाशाय च तस्याप्यौचित्यात्; शास्त्रसमयादिति चेत्तर्हि तत एव नानुपपत्तिरिहापि। तथा हि—अवसरेᴬ मध्यस्थैरिदमुद्भाव्यमित्येव [26]शास्त्रसमयः परम्पराप्राप्तः; अवसरश्च वादिनियोगस्तदसम्भवे सति तस्य प्रलापे[27] परवादिनियोगः, तदसम्भवे प्रलापेऽनुविधेयनियोगः[28]; तदसम्भवे प्रलापः समयसिद्धः। तत्र त्रिपक्षां[? त्रिपक्ष्यां] वृत्तायां यदा प्रतिवादी नियुङ्क्ते ᴬतदा त्रिपक्षी ; यदा तु नैवं तदा तुष्णीम्भवितरि मध्यस्थे प्रतिवादी प्रलपति, तदन्तरञ्च वादी नियुङ्क्ते तदा चतुःपक्षी ; अथ सोऽपि न नियुङ्क्ते तदाऽवसराभावान्मध्यस्थेन दूषणानुद्भावने वादिनि प्रलपति अनुविधेयश्च नियुङ्क्तेᴬ तदा पञ्चपक्षी ; अथ [29]सोऽपि न नियुङ्क्ते तदाऽवसरा-

---

17-18. मध्यस्थानाद्भावनसम्भवात् A, मध्यस्थेनोद्भावलरसंभवात् C. 19. अनुत्तावने C. 20. मध्यस्तस्यैवा॰ A. 21. तदवतारं C. 22. मृत्वतममृद्धमध्यम॰ C. C—C in C only. Text emended in the light of NP (p. 76). 23. तदशुद्धं C. 24. पितृपति॰ C. 25. रुच्यते C. A—A in A only. †"अकार्यगुह्ये कौपीने" इत्यमरः 26. मध्यस्थै विद ताद्भाव्य॰ C. 27. प्रमाणेय C. 28. ॰विधेरनियोगः A. A—A in A only 29. लोपि C.

भावान्मूकभाववति[30] मध्यस्थे भवितरि[31] [32]षष्ठस्थानस्थः प्रतिवादी प्रलपति, तदा तदुत्तरमप्राप्तावसरः सभ्योऽनियुक्त एव [33]वादिनो निवार्य कुकथात्वमावेदयति, अन्यथा [34]तस्यासुज्ञत्वापत्तेरिति [35]षट्पक्षी। एतदुत्तरकालश्च [36]सद्वादोऽपि [37]नोपपद्यते, [38]प्राप्तोद्भावनावसरदोषोपेक्षणस्यासमाधेयत्वात्। वादे तु परेण तृतीयपदे [39]निरनुयोज्यानुयोगोद्भावनम्; चतुर्थे स्वयमपि स्वदोषोद्भावनम्, [40]तत्त्वबुभुत्सुत्वात्; [41]पञ्चमेऽपि तथा, एवं षष्ठादावपीति; तत्र नायं नियमः। यदि च कदाचिन्मध्यस्थ आपद्येत[?आपतेत्][42] तत्र सतीर्थ्ये[43] समये [44]षट्पक्ष्युत्तरं पर्यनुयोज्योपेक्षणोद्भावने [45]सद्वादसम्भवेन तद्विनिवृत्तिः, तत्र[? तत्त्व]निर्वाहार्थं प्रवृत्तेः, एवं चतुर्थादावपि [46]सद्वादसम्भवे वादे दुष्टपरिहारेण [47]कथाऽनुवर्तत एव। अन्यत्र [48]हेत्वन्तरहानिसन्न्यासवत् [48a]उत्तरान्तरप्रवृत्ते[49]र्निग्रह एव, तस्याप्यनुद्भावने[50]त्ववष्टम्भविजयमात्रम्, एकस्यातिशयेनापकृष्टत्वात्, तदपेक्षया द्वितीयस्योत्कृष्टत्वात्—[51]इत्याचार्याः। नेदं सर्वत्र, 'दुष्टमुक्त्वाऽपि [52]विजेष्याम' इति प्रौढिमुद्भाव्य प्रवृत्तौ तन्निर्वाहेनात्यन्तोत्कृष्टत्वादिति तु तत्त्वम् ॥ ४० ॥

चतुर्थं पक्षमाह—

प्रतिषेधविप्रतिषेधे [53]प्रतिषेधदोषवद्दोषः ॥ ४१ ॥

---

30. ०भावान्मूलकर्तृव A, ०भावान्मूकभाव C. 31 भवितविस्त C. 32. षष्ठ० om. C. 33. मादिनो C. 34. तस्बास्यज्ञ० A. 35. मतपक्षी C. 36. सत्त्वादोपि C. 37. लोप C. 38. प्राप्तोद्भावानावसर० C. 39. निरर्थयोज्या० C. 40. तत्त्वछन्नत्सुत्वात् C. 41. पञ्चादपि A. 42. ०मध्यस्थमुपेते C. 43. सतीर्थं C. 44. घटपत्त्यु० C. 45. सत्वाद० A, C. 46. सत्वाद C. 47. कथानुप्रवर्तते A. 48. हेत्वन्तहानिसत्यास० C. 48a-49. तदुत्तरान्तरप्रवृत्ते A, नमृत्कान्तरप्रवृत्ते C. 50. न्ववम्भ० A, त्ववस्तु० C. Text emended in the light of NP (p. 77). 51. प्रत्याचार्याः C. 52. विद्यो स्याम C.
53. प्रतिषेघयोकरणदोषः C.

प्रतिषेधविप्रतिषेधस्तृतीयः पक्षस्तत्रापि तुल्यो दोषः, तुल्यता च तज्जातीयतया वा तन्नामकतया वा दोषमात्रेण वेति पूर्ववन्नेयम् ॥ ४१ ॥

[54]पञ्चमं पक्षमाह—

प्रतिषेधं सदोषमभ्युपेत्य प्रतिषेधविप्रतिषेधे समानदोषप्रसङ्गः मतानुज्ञा ॥४२॥

प्रतिषेधं द्वितीयं पक्षं [55]सदोषमभ्युपेत्यानुद्धृत्य यः प्रतिषेधस्तृतीयः पक्षस्तस्य विप्रतिषेधश्चतुर्थः पक्षस्तत्र[56] समानदोषप्रसङ्गात्मिका मतानुज्ञा पञ्चमीति भास्करकृतः। आचार्यास्तु—प्रतिषेधस्य दोषमनुद्धृत्य तस्य विप्रतिषेधो योऽयं भवता कृतः स मतानुज्ञेत्यर्थमाहुः। नन्विदं न शोभनम्, सदुत्तरत्वापत्तौ षट्पक्षीबहिर्भावापत्तेः, न ह्येवं[57] षष्ठ-पक्षानन्तरं मध्यस्थस्य पर्यनुयोज्योपेक्षणोद्भावनेन [58]द्वयोर्निवारणं सम्भवतीति चेन्नः, इष्टापादनरूपत्वाभावेन मतानुज्ञात्वाभावेन[59] षष्ठे पर्यनुयोगोपेक्षणस्यावश्यम्भावात् ॥ ४२ ॥

षष्ठं पक्षमाह—

स्वपक्षलक्षणापेक्षोपपत्त्युपसंहारे हेतुनिर्देशे परपक्षदोषाभ्युपगमात् समानो दोषः ॥ ४३ ॥

स्वपक्षः स्थापना, तल्लक्षणस्तद्विषयो द्वितीयः पक्षः, [60]तस्यापेक्षा दृष्टान्तत्वेन, सैवोपपत्तिः, तया[61] उपसंहारे 'प्रतिपक्षेऽपि [?प्रतिषेधेऽपि] समानो दोष' इत्यत्र तृतीयपक्षे यो दूषणरूपो हेतुर्मया निर्दिष्टश्चतुर्थक-क्षास्तेन [? ०कक्षास्थेन] तत्र परपक्षस्य तस्य पक्षस्य दोषं [62]त्वयाभ्युप-गम्य यो दोषः उक्तः स तवापि समान इत्यर्थः। अपेक्षा

54. पक्षसपक्षमाह A. पञ्चमी पक्षमाह C. 55. पदोयमुपेत्या० A. 56. पक्षः तन्न C. 57. न त्वेवं A. 58. द्वयोर्भानवारणं A. 59. ०ज्ञात्वाभान C. 60. तेस्यापेक्षा C. 61. तयो A. 62. तदाभ्युप० A तमभ्युप० C.

उपेक्षाऽनुद्धारश्च[63], तदनन्तरमुपपत्तेः 'प्रतिषेधेऽपि समानो दोष' इत्यस्या उपसंहारे प्रतिपादनविषये—इत्यपि कश्चित्। आचार्यास्तु—तदपेक्षा तदनुद्धारस्तत उपपत्त्युपसंहारः परापादितदोषोपसंहारः 'प्रतिषेधेऽपि समानो दोष' इति हेतुनिर्देश इत्थमिति तस्मिन्नुपपत्त्युपसंहारे [64]तत्र च हेतुनिर्देशे[65] तवापि मतानुज्ञारूपदोष इत्यर्थमाहुः।

इत्येतत्प्रतिपक्षदेशनपरं[66] दृष्टान्तसाध्यस्फुरद्
धर्म-[A]ग्राहिविकल्पसम्भवलसत् षड्जातिमष्टोऽष्टभिः।
प्राप्त्यप्राप्तिसमं प्रसङ्गप्रतिदृष्टान्तद्वयं द्वादशं
प्रत्येकं परिलक्षितं प्रकरणैर्गीता च षट्पक्षिका: ॥[A]
(॥ समाप्तं षट्पक्षीरूपकथाभासप्रकरणम् ॥)

॥ [67]इत्याद्यमाह्निमम् ॥

---

63. ०धारञ्च A. ०धार C. 64-65. तु हेतुनिर्देशे च C. 66. ०देशमपरं C. A–A in A only. The third *pāda* of this verse is metrically defective. 67. प्रत्याद्य० C.

।। पञ्चमाध्याये द्वितीयाह्निकम् ।।

अथेदानीं निग्रहस्थानविशेषलक्षणम् । तत्र कथायां पराहङ्कारखण्डनं न निग्रहः, पराजितस्याहन्त्वानपायात् । नापि प्रकृतविषये [1]विप्रतिपत्त्यप्रतिपत्ती, अननुगमात्; प्रकृतविषये सम्यक्प्रतिपत्तिमतोऽपि सभाक्षोभादेरननुभाषणे[2] तदभावाच्च । [3]अथोद्देश्यकथाहेतुसम्यग्ज्ञानविरहो निग्रहः, इह तु सदपि सम्य(ग्)ज्ञानं न कथां [4]निष्पादयति; विशिष्टाभावोऽस्त्येवेति चेन्न, झटिति सम्वरणेऽतिव्याप्तेः ।

उच्यते । कथायां तत्कथकोद्देश्यकथाफलविरोधी[5] कथाहेतुयथार्थज्ञानविरहस्तस्य निग्रहः, तल्लिङ्गत्वं निग्रहस्थानत्वम्; झटिति सम्वरणे च [6]सन्नपि स न विरोधीति[7] नातिव्याप्तिः । तदिदमुक्तम्[8]—"[9]विप्रतिपत्तिरप्रतिपत्ति"रिति [न्या. सू. १।२।१९] । प्रतिपत्तिः फलप्रतिपत्तिः, तद्विरुद्धोऽप्रतिपत्तिर्यत उन्नीयत इत्यर्थः । केचित्तु—लक्षणद्वये[10] तात्पर्यम्, कथकोद्देश्येकथाफलप्रयोजककथाहेतुतत्त्वज्ञानविरहलिङ्गत्वमेकम्, तादृशज्ञानविरुद्धज्ञानत्वञ्चापरमित्याहुः । प्रतिज्ञाहान्याद्यवृत्तिधर्मवत्तया प्रमितिविरहस्तदभाववत्तयाऽप्रमितिश्च लक्षणे—इत्यपि वर्णयन्ति[11] ।।

तत्र प्रथमतो धर्मिण [12]उद्दिशति—

प्रतिज्ञाहानिः प्रतिज्ञान्तरं प्रतिज्ञाविरोधः प्रतिज्ञासन्न्यासो हेत्वन्तरमर्थान्तरं निरर्थकमविज्ञातार्थमपार्थकमप्राप्तकालं न्यूनमधिकं पुनरुक्तमननुभाषणमज्ञानमप्रतिभा विक्षेपो [13]मतानुज्ञा पर्यनुयोज्योपेक्षणं[14] निरनुयोज्यानुयोगोऽपसिद्धान्तो[15] हेत्वाभासाश्च निग्रहस्थानानि ।। १ ।।

---

1. विप्रतिपद्य॰ C. 2. ॰भासने C. 3. अथोद्देश्य कथं हेतुमस्य ज्ञानं A. 4. निस्यादयतीति C. 5. ॰विरोधा C. 6-7. स च अपि समविरोधा इति C. 8. तदिदयुक्त C. 9. अप्रतिपत्तिविप्रति॰ C. 10. ॰द्वयो C. 11. वस्तूयन्ति C. 12 तद्दिशति C. 13-14. om. A, which leaves a gap here. 15. ॰योगोऽहेतूपसिद्धान्तो A.

भिन्नविभक्तिनिर्देशः स्वकार्ये परस्परनैरपेक्ष्यसूचनाय। चकारस्त्वनुक्तदृष्टान्तसाधनविकलत्वादिसमुच्चयार्थः, यल्लक्षणं [16]चरमचकारेण समुच्चेष्यते।

आचार्यास्तु—चस्त्वर्थे, तेनैषामेव कथाबाह्यानामबाह्यानाञ्चापस्मारोन्मादादिदशापन्नानां झटिति संवरणेन [17]निरोहितावसराणां पुरःस्फूर्त्तिकानधिकृतोद्भावितानाञ्च[18] निरासः, तथाविधानां [19]तात्कालिकातत्त्वज्ञानलिङ्गत्वेऽपि [20]प्रतियोग्यपेक्षयाऽसुज्ञत्वलिङ्गत्वभावात्, तद्धि निग्रहस्थानम्, अन्यथाऽतिप्रसङ्गादित्याहुः॥ १॥

प्रथमोदिष्टां प्रतिज्ञाहानिं लक्षयति—

प्रतिदृष्टान्तधर्माभ्यनुज्ञा स्वदृष्टान्ते प्रतिज्ञाहानिः॥ २॥

प्रतिदृष्टान्तः साध्याभाववत्तया उभयसम्प्रतिपन्नः, तद्धर्मः साध्याभाववत्त्वम्, तस्य स्वदृष्टान्तेऽभ्युपगमः[21]—इति न युक्तम्, पक्षहान्याद्यव्याप्तेः; नापि—दृष्टश्चासावन्ते[22] निगमने व्यवस्थित इति दृष्टान्तः पक्षः, तत्र प्रतिदृष्टान्तधर्मस्य साध्याभावस्याभ्युपगम इति, [23]हेतुहान्याद्यव्याप्तेः; न च सा (न)निग्रहस्थानम्, अविशेषात्; किन्तु दृष्टान्तपदं[24] तद्वत्तया [25]निर्दिष्टपरम्, धर्मान्तश्च तद्विपरीतपरम्, तेन यो यथा [26]निर्दिष्टस्तस्य तद्विपरीतधर्माभ्युपगम इत्यर्थः। उदाहरणम्—'अनित्यः शब्दः' इत्युक्ते बाधेन च प्रत्युक्ते 'अस्तु तर्हि नित्य एव शब्द' इत्यादिः। नन्विदम् 'अनित्यः शब्दः प्रमेयत्वादि'त्युक्तेऽनैकान्तिकत्वेन च दूषिते

---

16. चरमकारेण C. Here चरमचकार stands for च in हेत्वाभासाश्च यथोक्ताः [न्या. सू. ५।२।२४]. 17-18. तिरोहिहापसराणाम्परस्फूर्तिकाल० A, तिरोहितत्वावासराणास्त्वरस्कृतिकाल० C. Text emended in the light of NP (p. 80). 19. ०कालिकत्वज्ञान० A. 20. ०पेक्षयां स्वज्ञत्वा० C. 21. ०गता C. 22. दृष्टश्चास्मवन्ते A. 23. हेतुत्वान्या० C. 24. च add. A. 25. लिङ्गिष्ट० C. 26. लिङ्गिष्ट० C.

‘अस्तु तर्हि कृतकत्वादि’त्यत्राव्याप्तम्, न हि प्रमेयत्वविपरीतार्थोऽभ्युपेतः ; उद्भावितव्याप्तेर्विपरीतमनैकान्तिकत्वमुररीकृतमेवेति[27] चेन्न, तदनुद्भाव्यानैकान्तेन प्रत्यवस्थितस्यैव प्रयोगे तदभावात्[28], अव्याप्तश्च ‘पूर्वः पर्वतोऽग्निमानि’त्युक्ते [29]व्यर्थविशेषणतया च प्रत्यवस्थितेऽ‘स्तु तर्हि पर्वतोऽग्निमान्’ इत्यत्र ; न हि [30]तत्रोद्भावितविपरीतमभ्युपगतम् ; सिद्धसाधनेन[31] च प्रत्यवस्थितेऽ‘स्तु तर्हि महानसं वह्निमत्’ इत्यत्र च। यत्र यो धर्मः स्वीकृतस्तत्र तद्विपर्ययाभ्युपगमः [32]सा, अस्ति [33]चात्राभ्युपगतव्याप्यत्वपक्षतावच्छेदकत्वपक्षतानां व्यतिरेकस्याभ्युपगम इति चेन्न, [34]अपसिद्धान्तातिप्रसक्तेः। कथाकाले स्वीकृतं विवक्षितमिति चेन्न, ‘न्यायमतं [35]ममे’ति कथाकालीनमभ्युपगतमादाय तद्दोषतादवस्थ्यात्, संयोगवत्यवच्छेदकान्तरेण तदभ्युपगमेऽतिव्याप्तेः[36] ; न च[37] प्रतियोगिविरुद्धत्वं विशेषणम्, मूलावच्छेदेनाभ्युपगमस्य[38] तदवच्छेदेन विपरीताभ्युपगमाव्याप्तेः[39] ; यदवच्छेदेन [40]यद् यत्राभ्युपगतं तत्र तदवच्छेदेन तद्विपरीताभ्युपगम इति चेन्न, विनाऽवच्छेदमुपगमत्यागयोरव्याप्तेः ; एवं कालभेदेनापि बोध्यम्। किञ्चैवं ‘शब्दोऽनित्य’ इत्युक्त्वा ‘सर्वं नित्यमि’त्यु [? ०मित्यभ्यु]पगच्छतः सा[41] न स्यात्।

उच्यते। कथायां स्वीकृतस्य[42] तेन रूपेण कथायामस्वीकारः [43]तदुन्नायको वा व्यापारः प्रतिज्ञाहानिः। न चापसिद्धान्तातिव्याप्तिः, तस्य विपरीताभ्युपगमरूपत्वात्[44]। न चाभ्युपगमविनाशदशायामतिव्याप्तिः[45], तस्य विपरीताभ्युपगमरूपत्वात्। एतेन झटिति सम्वरणेऽति-

---

27. ०न्तिकत्वं वरीकृत नैवेति C. 28. ०स्यैव भावात् A. 29. व्यर्थवि शेषण० C. 30. त्रोद्भावि० C. 31. ०साधने A. 32. सायास्ति C. 33. ताभ्युप० C. 34. असिद्धान्ता० A. 35. सामति C. 36. ०गमवति० C. 37. च om. C. 38. ०गमा C. 39. ०गमाव्याप्तः C. 40. सम्बन्धाभ्युपगतं A. 41. मा A. 42. स्वीकृत्य A. 43. तत्त्वन्यायको C. 44. ०भ्युपत्वात् C. 45. ०व्याप्तेः C. 46. ०व्याप्तिः परस्ता A.

व्याप्तिरपास्ता[46], [47]तादृशाभ्युपगमविरोधी वाऽभ्युपगमः[48] सा, न च मध्यदशायां सोऽस्ति, झटिति संवरणे च निग्रहस्थानलक्षणवन्नातिव्याप्तिः ।

अन्ये तु—[49]सम्वरणानवसरे कथायां [50]विशिष्योक्तस्य स्वीकृतस्य त्यागः प्रतिज्ञाहानिः, सप्तम्यन्तान्न[51] झटिति सम्वरणे, [52]'विशिष्य' पदार्थो [?पदान्ना०]पसिद्धान्तेऽतिव्याप्तिरित्याहुः । पार्श्ववर्त्तिनः[53] [54]पुरत उद्भाविता प्रतिज्ञाहानिरपि प्रतिज्ञाहानिरेव, अनुद्भावनञ्च तस्य [55]समयबन्धवहिर्भावात्, कथकतान्त्रिकाभ्यामाधुनिकसमयबहिष्कृतनिग्रहस्थानवदिति वर्णयन्ति ।

सेयं पक्षहेतुदृष्टान्तसाध्यतदन्यभेदात् पञ्चधा । तत्र पक्षहानिर्यथा[56]—'गिरिरग्निमानि'त्युक्ते सिद्धसाधनेन च परिहृते[57] 'मा भूदयं पक्षस्तरुरस्त्वि'ति[58] । हेतुहानिस्तु तत्रैव 'द्रव्यत्वादि'त्युक्तेऽनैकान्तिकया दूषितेऽस्तु धूमादि'ति । दृष्टान्तहानिर्यथा—तत्रैव [59]'तप्तायः पिण्डवदि'त्युक्ते साधनवैकल्येन च प्रत्युक्ते 'अस्तु महानसवदि'ति । साध्यहानिर्यथा—तत्रैव सिद्धसाधनत्वेन प्रत्युक्ते 'अस्तु इन्धनवानि'ति । अन्यहानिस्तु पक्षविशेषणादिहानिस्तदन्या च[60] । पक्षविशेषणहानिर्यथा—'विवादाध्यासितं क्षित्यादि सकर्त्तृकमि'त्युक्ते व्यर्थविशेषणत्वेन प्रत्युक्ते'ऽस्तु क्षित्यादी'ति । हेतोर्यथा—तत्रैव 'प्रयत्नजन्यत्वादि'त्युक्तेऽसिद्ध्यादिना[61]च दूषिते'ऽस्तु तर्हि जन्यत्वादि'ति । दृष्टान्तस्य यथा—तत्रैव 'कुलालनिर्मितघटवदि'त्युक्ते व्यर्थविशेषणत्वेन प्रत्युक्ते'ऽस्तु

47. तादृशभ्युप० A, C. 48. विरोधावऽभ्युप० C. 49. संवरणोनवसरे C. 50. विशिष्टोक्तस्य C. 51. सप्तम्यन्तान् C. 52. विशिष्ट C. 53. ०वर्त्तिना C. 54. पुर उद्भाविता A, परतद्भाविता C. 55. समयबन्धु० C. 56. तत्र पक्षहानिर्यथा add A, a case of dittography. 57. परिकृते C. 58. ०तरुवस्त्विति C. 59. तप्तायपिण्डादित्युक्ते A. 60. ०स्तदन्यात् C. 61. ०इत्युक्त सिद्ध्यादिना C.

'घटवदि'ति। साध्यस्य यथा—तत्रैव 'बुद्धिमत्कृतिजन्यमि'त्युक्ते व्यर्थविशेषण(त्व)ादिना च प्रत्युक्ते'ऽस्तु कृतिजन्यमि'ति।

[62]धूमहेतौ 'यो वह्निमान् स धूमवानि'त्युक्ते [63]विपरीतोपदर्शितान्वयेन प्रत्यवस्थिते'ऽस्तु तर्हि यो यो धूमवानि'त्यादि, यथा वा [? ०त्यादि, तथा] जन्यत्वहेतौ व्यभिचारेण प्रत्युक्ते तस्मिन् निरस्ते'ऽस्तु तर्ह्यसिद्धि'रिति दूषणहानिर्हेतुहानिरेवेत्यपि कश्चित्[64]। पूर्वनिग्रहप्राप्तावनवसरत्वादप्रवृत्तौ[65] [66]हान्ययोगात् कुत्रेदमुद्भाव्यमिति चेत्, सत्वानौ [?सद्धानौ]; पूर्वदोषस्याभासत्वाद्धान्युद्भावनस्यैवौचित्यात्। तत्र पर्यनुयोज्योपेक्षणमस्तीति चेन्न, तस्य [67]स्ववचनदुष्टतासमर्पकत्वेनातो जघन्यत्वात्। इत्थञ्चासद्धानौ[68] दोषान्तरसम्भवेऽप्येतदेवोद्भाव्यम्, व्यवस्थाया अप्रयोजकत्वात्।

आचार्यास्तु—नैतद् युक्तम्, त्यागेनैव पूर्वस्य परिहारात्, दुष्टपरिग्रहो हि निग्रहः[69], न तु [70]तत्त्यागः। अथेदानीमेव त्यक्तः[71], पूर्वस्तु स्वीकृत एवेति चेत्, तर्हि त्यागमनुद्भाव्य [72]तद्व्यवस्थापनमशक्यमिति स्व एवोद्भाव्यः, सूचयति ह्येषा [73]स्वयमप्यशक्तिमिति प्राहुः। Cसेयं हानिः पूर्वदोषपरिजिहीर्षाCहेतुका [74]सद्विपर्ये पर्यनुयोज्योपेक्षासहचारिणी उद्भाविताष्टम्भविजयमावहतीत्यवश्यमुद्भाव्या; सर्वत्र दूषणपूर्विका चेत् तृतीयकक्षापातिनी; पक्षपरिग्रहे सति

62. धूमे हेतौ A. 63. विपरीतोप्रद० C. 64. Vardhamāna Upādhyāya seems to have rejected this view, as can be seen from his remark—साध्यादिहानीनां दृष्टान्तहानौ प्रवेशः। दूषणहानिस्तु निरनुयोज्यानुयोगोद्भावनानन्तरं दूषणान्तरपरिग्रहे द्रष्टव्या (ANTB p. 82). 65. ०प्राप्तत्वेन वसरत्वा प्रवृत्तौ C. 66. तान्य० C. 67. स्ववचत्वप्टता C. 68. असंधानौ C. 68a. दुष्टपरिग्रहे A, त्वष्टपरिग्रहां C. 69. निग्राहृकः C. 70. त्यागः A, तत्यागः C. 71. ०दानीमेवेत्युक्तः A, ०दानीसेवत्यक्तः C. 72. तद्वारस्तुपनमशक्य० C. 73. अयमप्य० A, C-C in C only. 74. असद्० A,

[75]कातरतया तत्त्यागश्चेत्[76] प्रथमकक्षापातिन्यपि तदुत्तरकक्षोद्भाव्या। [77]अत्रापेक्षिता (सा) निग्रहस्थानहेतुर्वादे Cतु सद्विषयाC [78]सम्भाविताऽप्युपेक्षणीया, उद्भावनस्य तत्त्वज्ञानानङ्गत्वात्; असद्विषया तूद्भाव्यैव, तत्त्वज्ञानाङ्गत्वात्। उक्तं निर्वाहयेदेवेति [79]रहस्यम्॥ २॥

क्रमप्राप्तं प्रतिज्ञान्तरं लक्षयति—

प्रतिज्ञातार्थप्रतिषेधे धर्मविकल्पात्तदर्थनिर्देशः प्रतिज्ञान्तरम्[80] ॥ ३॥

धर्मविकल्पो धर्मविशेषः, पञ्चमी च प्रक्षिप्येति गम्यमानल्यबन्तयोगात्, तेन प्रतिज्ञातार्थेऽविशिष्टे परेण दूषिते धर्मान्तरं प्रक्षिप्य तस्यार्थस्य पुनर्निर्देशः प्रतिज्ञान्तरमित्यर्थः; 'परेण दूषित' इत्यभिधानान्निगमनव्यवच्छेदः, लक्षणन्तु—परोक्तदूषणोद्धाराय पूर्वायुक्त-[? ०नुक्त]विशेषणवतः पूर्वोक्तस्य साध्यांशस्य प्रतिपादनम्—इति भास्करतत्त्वबोधौ। तन्न, हेत्वसिद्ध्या दूषिते 'हेतुमानयमि'त्यत्रातिव्याप्तेः, 'शब्दोऽनित्य' इत्यत्र दूषिते'ऽस्तु तर्हि शब्दो नित्य' इत्यत्रातिव्याप्तेश्च; किञ्च 'गन्धसमानाधिकरणोऽयं गुरुः Aगन्धसमानाधिकरणद्रव्यत्ववत्त्वाAदि'त्युक्ते व्यर्थविशेषणतया दूषिते 'गन्धसमानाधिकरणगुरुत्ववानयमि'त्यत्राव्याप्तिः[81], गन्धसामानाधिकरण्यस्य पूर्वमुक्तत्वात्[82]।

अन्ये तु—परोक्तदूषणोद्दिधीर्षया तद्विशेषणतया [83]अनुक्तविधेयविशेषणवत्तया प्रतिज्ञाविषयार्थस्य तस्य निर्देशः प्रतिज्ञान्तरम्। 'अस्तु तर्हि शब्दो नित्य' इत्यत्र नित्यत्वं विधेयतया निर्दिष्टः, 'हेतुमानि'त्यत्र हेतुः [;] गन्धसमानाधिकरणत्वञ्च[84] पूर्वं न गुरुत्वविशेषणतया निर्दिष्टम्।

75. कायभतया C. 76. ०चेत् om. A. 77. तत्रोपेक्षिता C. C-C in C only. 78. सद्भाविता० C. 79. तु तत्त्वम् A. 80. प्रतिज्ञानान्तरं C, A-A in A only. 81. व्याप्तेः C 82. पूर्वेत्युक्तत्वात् A, पूर्वयुक्तत्वात् C. 83. अनुक्तविधेय A, अनुक्तविधेया० C. 84. करणञ्च C.

तदेतद् द्विविधम्—साध्यविशेषणान्तरपक्षविशेषणान्तरभेदात्। आद्य यथा—'पर्वतो वह्निमान्[85] C सुरभिधूमादि'त्युक्ते व्यर्थविशेषणहेतूद्भाविते C [? ०षणत्व उद्भाविते] 'पर्वतोऽगुरुप्रभववह्निमानि'ति। अन्त्यश्च—'शब्दो नित्य' इत्युक्ते ध्वनावंशतो[86] बाध उद्भाविते 'वर्णात्मकः शब्दो नित्य' इति। [87] नन्वनयोर्वह्निशब्दान्तरयोः साध्यपक्षभावेन[88] पूर्वमभ्युपगतयोस्तद्रूपेण [89]त्यागाद्धानिरेवेति चेन्न, [90]विशिष्टस्यैव तद्रूपेण साध्यपक्षतया प्राङ्निर्देशे तदभावात्, [91]क्वचिच्च साङ्कर्येऽप्यदोषात्। साध्यान्तरमपि चतुर्द्धा, प्रतिज्ञायामुदाहरणे उपनये निगमने च। तत्र द्वितीयं यथा—विशिष्टवह्नौ साध्ये 'य एवं स वह्निमानि'त्युक्ते न्यूनतया च दूषिते 'य एवं सोऽगुरुप्रभववह्निमानि'ति। एवं परे [92]अपि नेये[93]।

आचार्यास्तु—चतुर्द्धा प्रतिज्ञान्तरम्[94], [95]साध्यान्तरपक्षान्तरयोरपि सम्भवात्[96], तत्र साध्यान्तरं यथा—'अग्निमानयं सुरभिधूमादि'त्युक्ते C व्यर्थविशेषणतया च दूषिते C 'पर्वतोऽग्निमान् कृष्णागुरुप्रभवधूमवांश्चे'ति; द्वितीयश्च—'वर्णात्मकः शब्दो नित्यः श्रावणत्वादि'त्युक्तौ ध्वनौ व्यभिचारेण दूषिते 'अस्तु तर्हि वर्णध्वनी नित्या'विल्यक्षरान्तरेण प्राहुः। न चैतयोरन्यत्र प्रवेशः सम्भवतीति न [97]युक्तोऽन्येषामपीति; किन्तर्हि लक्षणमस्येति[98] चेत्, उच्यते—यद्विशेषणतया यस्मिन्नवयवतया यत्प्रतिज्ञातं निर्दिष्टं तद्विशेषणकतया तदत्यागे सति पूर्वोक्तदूषणोद्धाराय तद्विशेषणतयाऽनुक्तविशेषणवत्तया तन्निर्देशत्वं प्रतिज्ञान्तरत्वम्, विशेषणपदञ्च [99]विशेष्यविशेषणान्यतरपरं केनचिद् [illegible] रूपेण,

85. ०मानित्युक्त A. C-C in C only. 86. ध्वनकांशतः C. 87. ननु तयो० C. 88. पक्षतारेण C. 89. त्यागाक्कानि० C. 90. विशेषस्यैव C. 91. क्षतिश्च C. 92-93. आपि नोम आचार्या C. 94. प्रतिज्ञास्तानम् C. 95. साध्यान्त रायावपि C. 96. सम्भवा C. C-C in C only. 97. युक्तस्यमन्ये० A, युक्तस्मतमन्ये० C. 98. लक्षणसाम्येति C. 99. विशेष्यविशेष्यान्यतरपरं A, विशेषणविशेष्यपरं C.

नातः स्ववचनाव्याप्तिरतिव्याप्तिर्वा। अतएव 'शब्दोऽनित्य ऐन्द्रिय-कत्वादि'त्यत्रानैकान्तिकतया दूषिते 'शब्दोऽनित्योऽसर्वगतश्चे'ति भाष्यकारः प्रतिज्ञान्तरमुदाजहार[100]। न [101]चास्यानुक्तिसम्भवः, यावत्साध्याभाववद्वृत्तित्वाभावेन नेदमनैकान्तिकमित्यभिमानेनोक्तेः।

स्यादेतत्, स्वयमेव पञ्चावयवं वाक्यमुच्चार्य कथं प्रतिज्ञातार्थसाधनाय प्रतिज्ञामेवरचयति [? ०मेवोच्चारयति]; सभाक्षोभादिति चेत्, तर्हि न्यूनेनैव कथं न निगृह्णीयात्; पूर्वप्रक्रान्तहेत्वादेर्विद्यमानत्वान्न[102] न्यूनत्वमिति चेन्न, साध्यविशेषणोपादाने उदाहरणस्य पूर्वोक्तस्या-नन्वयात्।

उच्यते। यत्र पक्षान्तरत्वं तत्रैव प्रतिज्ञान्तरं न्यूनासङ्कीर्णम्, अन्यत्र [103]सङ्कर इष्ट एव। साङ्कर्ये किमुद्भाव्यमिति चेत्, प्रतिज्ञान्तरमेव, न न्यूनत्वम्, उक्तमुदाहरणमेवात्र जागर्त्तीति कथन्तावकाशात्, तथापि पूर्वनिग्रहस्थानस्यानेनानुद्धारात्[104] किं निग्रहान्तरोद्भावनेनेति[105] चेत्; सत्यम्, तूष्णीम्भाव एवोचितः, किन्त्वेवं[106] परिषदां 'पूर्वं दूषणमनेन [107]परिहृतमि'ति प्रतिसन्धाया'प्रतिभायामास्त' इति बुद्धिरेव स्यात्; तर्हि पूर्वमेव दुषणमुद्भावयेतेति चेन्न, तस्यासत्त्वस्फुर्त्तौ तदसम्भवात्, [108]सत्त्वस्फूर्त्तावपि कथन्तावकाशात्; तथा ह्येवं प्रतिवदेत्[109]—[110]विशिष्टे साध्ये नेदं[111] दूषणमस्ति, तथापि पूर्वमुद्भावितम्। 'दुष्टमेवे'त्येवं वाच्यमिति चेत्, तर्ह्यर्थतः प्रतिज्ञान्तर-मुद्भाव्यमित्यावश्यकत्वादीदृशाकथन्तानास्पदत्वाच्च[112] प्रतिज्ञान्तरमेवोद्भा-वयितुं युक्तम्, न तु पूर्वम्। न चेदमर्थान्तरम्, प्रकृत्यो [? प्रकृतो]-

---

100. ०मुदाजह्व C. 101. चास्या युक्ति० C. 102. ०विद्यमानत्वास्वा A, ०विद्यमानत्वानु C. 103. शङ्कर C. 104. ०स्यानेनानुस्कारात् C. 105. ०भावनेति C. 106. किने त्वरं C. 107. विकृतमिति C. 108. अत्र स्फूर्त्ता० A. 109. ०वदेत् om. A. 110-111. विशिष्टसाध्येनेदं C. 112. कथस्तानास्यदत्वाच्च C.

पयोगादिति सर्वं सुस्थम्[113] । अत्र कक्षान्तरे उक्तं न विशेषयेदिति रहस्यम् ॥ ३ ॥

क्रमप्राप्तं प्रतिज्ञाविरोधं लक्षयति—

प्रतिज्ञाहेत्वोर्विरोधः प्रतिज्ञाविरोधः ॥ ४ ॥

प्रतिज्ञाहेतुपदे कथाकालीनवाक्यमात्रपरे, तद्विरोधोऽर्थद्वारकः । लक्षणन्तु न तावत् कथाकालीनस्ववचनविरुद्धत्वम्[114], पर्वतवह्न्योरपि तथात्वात् [?] ; सामानाधिकरण्ये सतीति विरुद्धम् ; नाप्येकाधिकरणनिष्ठतयोक्तयोः सहावस्थानम्, विरुद्धहेत्वाभाससमुच्छेदापातात्, बाधितादावतिप्रसक्तेश्च[115], तत्रापि पक्षतावच्छेदकहेत्वोर्विरोधात् । तत्रापि विरोध इष्ट एव, किन्तु बाधात्मनेति[116] चेन्न, स्वरूपासिद्ध्यात्मकताया दुर्वारत्वात् । क्वचन साङ्कर्येऽप्यदोष इति चेन्न, असङ्कीर्णस्थलाभावात्[117] । तथा हि—प्रतिज्ञाहेत्वोर्विरोधो विरुद्धः, पक्षतावच्छेदकसाध्ययोर्विरोधो बाधः[118], पक्षतावच्छेदकांशयोर्विरोध आश्रयासिद्धिः, साध्यतावच्छेदकांशयोर्विरोधो व्याप्यत्वासिद्धिः, एवं हेतुतावच्छेदकांशयोः साध्यदृष्टान्ततावच्छेदकांशयोर्विरोधाद्याः साध्यवैकल्यादयः ।[119] हेतूपनययोर्विरोधेऽसाङ्कर्यमिति चेन्न, एकाधिकरणनिष्ठतयाऽनुद्भावनात्, प्रतिज्ञाहेतुविरोधादेर्दत्तजलाञ्जलितापाताच्च । एतेन —हेत्वाभासान्तरसम्भवेऽपि विरोध एवोद्भाव्यः, न तत्, [120]जघन्यप्रतीतिकत्वात्—इति प्रत्युक्तम्, तत्र तादृूप्यात्, विरुद्धयोरैकाधिकरण्यबोधकशब्दत्वात्[121] । [122]युक्तञ्चैतत्, तथैव विरुद्धहेत्वाभासवार्त्तिकदृष्टेरिति चेन्न, 'घटो घटभिन्न' इत्यत्र घटत्वतद्भिन्नत्वयोरैकाधिकरण्य-

113. सर्वस्तुस्त C. 114. तथाकालीनस्ववचनानुस्य स्ववचानु विरुद्धं C.
115. च om. A. 116. बाधात्म्यानेति A, बाधात्मानति C.
117. असङ्कीर्णस्तुला० C. 118. बोध: C. 119. हेतुप्रत्यययो० A.
120. जन्यप्रतीति० C. 121. शब्दन्नं तत् A, ०शब्दत्व तत् C.
122. प्रयुक्तचैतत् C.

बोधस्य शब्दाधीनस्यानुत्पत्तेः[123], फलोपधानस्वरूपयोग्यताभ्याम-व्याप्त्यतिप्रसङ्गाच्च ।

उच्यते । विरुद्धतयाभ्युपगतयोरेकस्मिन्नुद्भावनं विरोधः, यथा—संयोगाभावः संयोगतद्व्याप्यासहचर इत्यभ्युपगच्छतः 'अयं संयोगा-भाववान् तद्वत्त्वात् तद्विभागादि'ति । न ह्यत्र विरुद्ध उद्भावनशक्यः, स्वयमनभ्युपगमात्, अत एवैतत्सम्भवे नान्यदुद्भाव्यम्[124], व्यवस्थानर्ह-त्वात् । न चापसिद्धान्तोच्छेदः[125], एकस्मिन्नधिकरणे स्वयमु-भयानुपन्यासे तत्सम्भवात् । स एव प्रतिज्ञाहेत्वादिविरोधरूपो बहुविधः ।

प्रतिज्ञोपनययोर्विरोधस्तु नाधिकः, [126]प्रतिज्ञाहेतुविरोधानतिरेका-दित्याचार्याः । [127]तन्मन्दम्, 'गिरिरग्निमान्, धूमवत्त्वात्, यदेवं तदेवं यथा चत्वरः[128], निरग्निश्चायम्' इत्यत्र[129] प्रतिज्ञाहेत्वोर-विरोधेऽपि तयोर्विरोधात् ।

सर्वोऽयं धर्मिनिषेधादपि, यथा—'आत्मा नास्ती'ति परमन्याया-चार्याः । तत्रात्मत्वं ज्ञानसमवायिकारणत्वम्, असत्त्वञ्चार्थक्रिया-कारित्वविरह इत्याशयः । धर्मिनिषेधो [130]नायमिति चेन्न, असत्त्व-साधनं निषेध इत्याशयात् । एवंविधानाञ्च दूरभिमानप्रमादादेरुक्ति-सम्भवः । सोऽयं वादेऽप्युद्भाव्यः, अन्यथा तत्त्वप्रतिपत्तिव्याघातात्, शेषं पूर्ववत् । मिथो विरुद्धं न वदेदिति रहस्यम् ।

अन्ये तु—विरुद्धतयाऽयुपगयोर्विरुद्धयोर्वा[131] एकत्राभ्युपगमो विरोधः, तेन 'अहं मौनी'त्यादिवचनक्रियाव्याघातादयोऽप्यत्रैवान्त-र्भूतेत्याहुः ॥ ४ ॥

---

123. ०नुपपत्तेः C, which is also acceptable. 124. ०सम्भावनान्य-त्वद्भाव्यं C. 125. ०सिद्धान्तो सिद्धान्तच्छेदः C. 126. ०विरोधीनाति-रेकात्० C. 127. एतन्मन्दम् C. 128. चदूरं C. 129. नित्यत्व C. 130. नायमित्यति A. 131. ०विरुद्धयोर्वा om. C.

क्रमप्राप्तं प्रतिज्ञासन्न्यासं लक्षयति—

पक्षप्रतिषेधे प्रतिज्ञातार्थापनयनं प्रतिज्ञासन्न्यासः ॥ ५ ॥

प्रतिज्ञात उक्तः, अपनयनमपलापः, तेनोक्तापलापत्वं लक्षणमुक्तम्[132] । न च स्वस्थोऽकस्मादेवोक्तमपलपतीत्यत उक्तम्—पक्षेति । पक्षस्य उक्तस्य प्रतिषेधे कृते सति तत्परिहारार्थमिति भावः । अपह्नवे[133] सति [134]'मदुक्ते दोषो नोक्त' इति मध्यस्थज्ञापनान्निग्रहस्थानपरिहारः सम्भवतीति कपोलवादिप्रादितुल्यताभिधानमकीर्त्तिमेव प्रथयति कीर्त्तिः [? कीर्त्तेः] ।

सोऽयं बहुविधः, वचनापलापात्, यथा—'क[135] एवमाहे'ति ; प्रकारापलापाच्च, यथा—[136]'त्वत्पक्षोऽयं [137]मयाऽनूदितः' ; स्वोक्तौ[138] परकर्त्तृत्वसञ्चाराच्च, यथा—स्वोक्त[139] एव [140]'त्वयेदमुक्तमि'ति ; स्वानुक्तौ स्वकर्त्तृत्वसञ्चाराच्च, यथा—परोक्त एव 'मयेदमुक्तमि'ति[141] । [142]वादे चायमबुद्धिपूर्वक एव, शेषमशेषं हानिवत्, अनुवादप्रोक्षणम् [? ०वादाप्रेक्षणम्] दूषणारूढं नापलपेदिति रहस्यम् ॥ ५ ॥

क्रमप्राप्तं हेत्वन्तरं लक्षयति—

अविशेषोक्तहेतौ प्रतिषिद्धे विशेषमिच्छतो हेत्वन्तरम् ॥ ६ ॥

हेतुपदं साधकभागमात्रपरम्, इच्छत इत्यनेन च तदधीनं वचनमुपलक्षितम्, प्रतिषिद्ध इति च [143]तदुद्दिधीर्षयेत्येतत्तात्पर्यकम्, तेनाविशिष्टसाधकभागमभिधाय[144] तत्प्रतिषेधोद्धाराय विशेषण-

132. लक्ष युक्तम् C. 133. अपहरे C. 134. तदुक्ते A. 135. स C. 136. दुत्पक्षो० C. 137. मर्थानु० C. 138. स्वकर्त्तृत्वसञ्चारादे A, परकर्त्तृत्वमंचाव C. 139. यथार्थोक्त A. 140. द्वयेदमुक्त० C. 141. नयेदयुक्तमिति C. 142. A gives the reading स्वानुक्तौ स्वकर्त्तृत्वसञ्चारादे instead of वादे, which is attested by C. 143. तत्त्वधीर्षयोत्यत तु तात्पर्यकं C. 144. ०साधकमभिवाय A.

वत्तद्वचनं हेत्वन्तरमित्युक्तम् । प्रतिज्ञान्तरवद्स्य[145] [146](परिकर) शुद्धिरवसेया ।

तदिदं (†चतुर्विधम्—) हेतुविशेषणात्, उदाहरणप्रयोजकांशविशेषणात्, उपनयविशेषणात्, दूषणविशेषणाच्च । तत्राद्यं यथा—'शब्दोऽनित्यो बाह्येन्द्रियग्राह्यत्वादि'त्युक्तेऽनैकान्तिकतया च प्रत्युक्ते 'सामान्यवत्त्वे सती'ति[147] विशेषणात्; द्वितीयं यथा—अत्रैव विशिष्टहेतौ[148]'यद्यद्बाह्येन्द्रियग्राह्यं तदनित्यमि'त्युक्ते न्यूनतया प्रत्युक्ते तद्विशेषणे [?०षणात्]; तृतीयश्च तत्रैव 'बाह्यकरणप्रत्यक्षश्चायमि'त्युपनये तथैव (प्रत्युक्ते) तद्विशेषणे [?०षणात्]; चतुर्थश्च 'असाधकमिदम्, अभाववद्वृत्तित्वादि'-त्युक्तेऽनैकान्तिकतया च प्रत्युक्ते[149] 'साध्यतावच्छेदकावच्छिन्ने[150] तत्सम्बन्धावच्छिन्नात्यन्ताभाववद्वृत्तित्वादि'ति[151] न्यायाचार्याः । 'साध्याभाववद्वृत्तिरयमि'ति दूषणोद्भावने 'नेदं दूषणमतो निरनुयोज्यानुयोगस्ते' इत्युक्ते 'साध्यतावच्छेदकावच्छिन्नसाध्याभाववद्वृत्तिरयमि'ति प्रोक्तदूषणान्तरमिति तु[152] तत्त्वम् । यत्र विशेषणेऽपि परोक्तदूषणाप्रतीकारः, यथा—'बाह्येन्द्रियग्राह्यत्वादि'त्यत्र [153]योगिप्रत्यक्षेण परमाणुनाऽनैकान्तिकतया[154] च दूषितेऽयोगिमात्रविशेषणोक्तौ; तत्र हेत्वन्तरमेवोद्भाव्यम्, स्थापनाप्रयासविधुरत्वात् । परिकरशुद्धिस्तु प्रतिज्ञान्तरवत्, रहस्यश्च ॥ ६ ॥

॥ समाप्तमुक्ताश्रय[?]निग्रहस्थानपञ्चकप्रकरणम्[155] ॥

---

145. ०वद्स्य om. A. 146. Reading within brackets added in the light of ANTB (p. 90). † Reading within round brackets added in the light of ANTB (p. 89). 147. ०इति om.C. 148. संबन्धाह्येन्द्रिय० C. 149. परिभूते A, परिकृते C. 150. ०वच्छिन्ना C. 151. ०त्वादितीति C. 152. तु om. A. 153-154. योगे प्रत्यक्ष न परमात्वे नानैकान्तिकतया C. 155. This प्रकरण is named in other commentaries as प्रतिज्ञाहेत्वन्यतराश्रितनिग्रहस्थानपञ्चकविशेषलक्षणप्रकरणम्.

क्रमप्राप्तमर्थान्तरं लक्षयति—

[1]प्रकृतादर्थादप्रतिसम्बद्धार्थमर्थान्तरम् ॥ ७ ॥

अर्थान्तरमिति लक्ष्यनिर्देशः। तत्र प्रतियोग्यपेक्षायामाह— प्रकृतादर्थादिति। नातः[2] [3]पञ्चम्यनुपपत्तिः, अन्यदिति शेषः; [4]अनपेक्ष्येति गम्यमानल्यबन्तकर्मणि वा पञ्चमीति त्वाचार्याः। शेषं लक्षणपरम्। [5]अप्रतिसम्बद्धोऽर्थो यस्येत्यप्रतिसम्बद्धार्थम्, अननुरूपार्थमित्यर्थः। [6]अनुरूपत्वञ्च न प्रकृतोपयुक्तत्वम्, उपयोगित्वं हि न[7] जनकत्वम्, 'वह्निमानि'त्यभिधाय [8]तज्जनकव्युत्पादनाव्याप्तेः, Cनापि ज्ञापकत्वम्, उक्तातिव्याप्तेः [?]; नापि ज्ञापकधीविषयत्वम्[9], [10]दोषोद्भावनमात्रातिव्याप्तेः[11]; नापि वचनीयतया [12]स्थेयसम्मतिविषयत्वम्, वचनविषयतया [13]स्थेयसम्प्रतिपत्तेरर्थान्तरविषयेऽपि सत्त्वात्, किन्तु साकांक्षितत्वम्। [14]तेनानाकांक्षिताभिधानत्वं लक्षणं निर्व्यूढम्; तच्च चतुर्विधम्—स्वमतपरमतोभयमतानुभयमतार्थोपदर्शनभेदात्। यथा [15]नैयायिकस्य 'शब्दोऽनित्यः कार्यत्वादि'त्युक्तस्य 'गुणश्चायम्, स चाकाण्डस्य [? चाकाशस्य], तदेव चोपाधिवशाच्छ्रोत्रम्, तेन चायं गृह्यते, समवायादि'त्यादि; तथैवोपक्रम्य[16] [17]'द्रव्यञ्चायमित्या'दि; तथैवोपक्रम्य 'अनुमानगम्यस्यानित्यत्वम्, अनुमानञ्च प्रमाणमित्या'दि; तथैवोपक्रम्य 'हेतुरयम्, हेतुश्च [18]हिधातोस्तुनि (प्रत्यये) कृदन्तं[19] पदम्; पदत्वञ्चार्थवत्त्वम्[20]; [21]पदञ्च चतुर्विधम्,

---

1. प्रकृतादर्थादप्रतिसम्बद्धा० om. A. 2. लाभः C. 3. पञ्चम्यस्वप० C. 4. अनपेक्षान्न A, अनपेक्षेति C. 5. सप्रति० C. 6. अनुषाशनत्वञ्च A. 7. न om. C. 8. तज्जनकमुत्० C. C-C in C only. 9. विषयान्यत्वम् A. 10-11. दोषभावबलमात्राभिव्याप्तेः C. 12. स्मेयसम्मति० C. 13. स्तेयं C. 14. तेनानाक्षिता० A. 15. नैकान्तिकस्य C. 16. तथैवोक्तस्य A. 17. द्रव्यञ्चानिमित्यादि C. 18-19. हिधातोस्थानं कृदन्तं A, हिधातो ह्यनिष्ट दण्डं C. 20. पदाञ्चार्थत्वं A, पदञ्चावबरं C. 21. पदञ्चातुर्विधम् A.

[22]नामाख्यातनिपातोपसर्गभेदात्[23]; नाम प्रातिपदिकम्[24]; आख्यातञ्च कृतिशक्तं न कर्तृशक्तम्, अधिकोक्तेः[25]; कर्त्ता च कारकविशेषः, कारकाणि षट् [26]कर्त्रादिभेदात्, कर्तृत्वादिकञ्च कृतिमत्त्वादिकम्[27], अत्रैतेषां [? अथैतेषां] लक्षणानि। आख्यातशक्ति-विचारः प्राच्यैः [28]प्रस्तुतोऽपि प्रकृततिरोधायकत्वान्न[29] कृतः, करिष्यते तु शेषे'। दोषं तत्कालमुपलक्ष्य समाधानमपश्यतः [30]तत्तिरोधा-नायास्योक्तिसम्भवः[31]; न च कपोलवादित्वतुल्यता, आपाततः प्रतिपादकत्वेन सामान्यानां चमत्कारित्वात्, शाखान्तर [?शास्त्रान्तर-] सञ्चारक्षमत्वाच्च। ननु परिपूर्णे [? नन्वपरिपूर्णे] प्रकृते [32]वाक्येऽ-वान्तराभिधाने न्यूनमेवोद्भाव्य[A]मिति चेन्न, न्यूनादेर्वादिन्युपरतवच-स्युद्भाव्य[A]त्वात्, तस्योक्तग्राह्यत्वात्, इदञ्चोच्यमानग्राह्यमित्येतदवसरे[33] [34]तदुद्भावनावसराभावादेतदनुद्भावने च पर्यनुयोज्योपेक्षणं स्यादि-त्याचार्याः। न्यूनमेव कुतो [35]नोच्यमानग्राह्यमिति चेत्[36], उत्तरकालं तदभिधानसंशयात्। †अर्थान्तरमर्थान्तरेण परिहरतः किं वाच्यम्, अर्थान्तरमिति चेन्न, [37]पुनस्तदुद्भावनेनोन्मत्तकेलिप्रसङ्गात्; न च [38]तूष्णीम्भाव एवात्र शरणम्; [39]उत्कृष्टानुत्कृष्टव्यवस्थानुपपत्तेः।

22-23. न साक्षातनिपातोपसर्जभेदात् A, नामाख्यातनिपातसमुभेदात् C. 24. नामात्वादिचानुकं A, नामत्वादिचामुकं C. Text emended in the light of यत्प्रातिपदिकं प्रोक्तं तन्नाम्नो नातिरिच्यते in शब्दशक्तिप्रकाशिका of Jagadīśa. 25. अनुकश्चुक्तेः A, अम्बकक्तेः C. 26. कत्रापिभेदात् C. 27. ०कञ्चार्थकमिति A, ०कञ्चात्मकम् C. 28-29. प्रकृतेऽपि प्रकृताति-रोधायकत्वान्न A, कुतोपि कृतविरोधायकत्वानु C. 30-31. तद्विरोधा-नायस्योक्ति० A, तन्निरोधानायाम्योक्ति C. 32. वाक्येअन्तरा० C. A-A in A only. 33. ०मित्येतदनुसरे C. 34. तद्भावना० 35-36. नोच्यकाल-ग्राह्य इति चेत् A. † A similar view is expressed in वादिविनोद of Śaṅkara Miśra : क्वचिन्न्यूनादिसङ्करेऽप्येतदेवोद्भाव्यम्, उद्भटदो-षत्वात्, (p. 32). 37. परस्तदुद्भावने० A, पुरस्तत्त्वद्भावने० C. 38. पूर्वीभाव A, तूर्कीभाव C. 39. ततकृष्टानु० C.

अत्राहुः—मध्यस्थेनायमपसारणीयः [40]कथातोऽन्यथा कथाऽपरिच्छेदापत्तेरिति[41]। प्रकृतोपयुक्तमेव[42] वाच्यमिति तु रहस्यम् ॥ ७ ॥

क्रमप्राप्तं निरर्थकं[43] लक्षयति—

वर्णक्रमनिर्देशवन्निरर्थकम् ॥ ८ ॥

[44]वर्णक्रमनिर्देशोऽयं जवगडदशेत्यादिरूपः[45], तद्वत् तत्सदृशCमेवात्-कामित्यर्थः [? ०सदृशमवाचकमित्यर्थः]।

अवाचकत्वञ्च नासाधुत्वम्C, [46]स्वकल्प्यलक्षणया प्रयोगेऽव्याप्तेः[47]; नाप्यशक्तत्वम्, वाक्यमात्रेऽतिव्याप्तेः; [48]निरूढलक्षणावत्पदप्रयोगातिव्याप्तेश्च; नापि विवक्षितार्थाप्रत्यायकत्वम्, असामर्थ्यसम्वरणाय [49]द्राविडादिभाषया [50]जल्पतोऽनिग्रहापत्तेः, न हि [51]न तदा बोधकम्[52]; [53]प्रतिवादिनोऽर्थप्रत्ययाजनकत्वमिति चेन्न, साधुना कथामुपक्रम्य साधारणभाषया जल्पनाव्याप्तेः, [54]'नास्माकमनेनार्थप्रत्ययो जात' [55]इति समुद्भाव्यैव सर्वप्रतिवादिविजयापत्तेश्च[56]; [57]स्थेयार्थप्रत्ययाजनकत्वमिति चेन्न, [58]द्रविडभाषाभिज्ञे स्थेये[59] प्राच्यं प्रति स्वाशक्तिसम्वरणाय तया [60]भाषया जल्पने[61] संस्कृतेन कथामुपक्रम्य भाषया[62] प्रयोगे चाव्याप्तेः[63]।

---

40. कथादे अयथा A. 41. तु add. A. 42. प्रकृते युक्तमेव A. 43. ०प्राप्तमधिकं C. 44-45. वस्तुक्रमे निर्दोषो जवगततसेत्यादिरूपः C. C-C in C only. 46-47. स्वकल्पिते तु लक्षणया प्रायत्योऽव्याप्तेः A. 48. निसतलक्षणावत्० C. 49. दवितासिभाषया A, दुरितादिभासजे C. 50. द्रतोविग्रहापत्तेः C. 51-52. य तद्वा बाधकम् A. 53. प्रतिवादिजन्यार्थप्रत्यया० A, प्रतिवादिनस्त्वे प्रत्यया० C. 54-55. नव्वेककमेनार्थ प्रत्याय यजेत A, नास्माकमपि ना अप्रत्ययो जात C. 56. ०विजयापक्तेयं C. 57. स्तेवानुप्रत्यया० C. 58-59. तत्रविभुभयोभिज्ञोस्थये C. 60-61. भासया जल्पते C. 62. भासया C. 63. च add. A. C.

स्यादेतत्, उभयवादिगृहीतशक्तिक[64]पदान्यपदप्रयोगो निरर्थक इति वर्द्धमानोपाध्यायाः[65]। तन्न, शास्त्रीयलक्षणया† [66]प्रयोगेऽतिव्याप्तेः, [67]'मयात्र शक्तिर्न गृहीते'त्येवोद्भाव्यैव निखिलप्रतिवादिविजयापत्तेश्च। अतएव शक्तिपदस्थाने[68] वृत्तिपदप्रक्षेपोऽप्यपास्तः, विपरीतविभक्तयादिमद्वाक्यप्रयोगाव्याप्तेश्च[69]।

शूलपाणिः पुनराह—यत्र [70]विशिष्यामुकदेशभाषया प्रयोज्यमिति [71]समयबन्धस्तत्रैव[72] भाषया[73] प्रयोगः साधुः; परत्र च सर्वसाधारणतया[74] संस्कृतेनैवान्यथा[75] असाधारणभाषया[76] यत्किञ्चिदभिधाने[77] किं वाच्यम्, प्रत्युताज्ञानमेव प्रतिवादिनो प्रायशो पतेत् [? भवेत्]; तत्र च भाषया[78] प्रयोगो बोधकोऽपि निरर्थक एव; लक्षणन्तु—यो यत्राप्रतिपादकस्तत्र तस्य प्रयोगो[79] यस्तत्त्वमिति। तन्मन्दतरम्, स्वयं [80]निरर्थकतयाभिहितभाषाव्याप्तेः; अनिरूढलक्षणया प्रयोगातिव्याप्तेः[81], अनिरूढलक्षणाया[82] कस्यचिदर्थप्रत्यायकत्वात्[83]।

---

64. ०शक्तिरू० C. 65. वर्द्धमानेबोध्यायाः C. † शास्त्रीयलक्षणा=अस्वारसिकलक्षणा. 66. प्रतियोगीति० A. 67. मिमात्र C. 68. ०पदस्थास्थोने C. 69. ०प्रयोगाव्यक्त: C. 70-71. विशेष्यात्मकदोषभासया प्रयोजकमिति C. 72. ०तत्रैवल C. 73. भासया C. 74. सर्वस्य साधारण० C. 75. संसर्गतेनैवान्यथा C. 76. ०भासया C. 77. From this place, C (fol. 152b) contains a large portion of the commentary on न्या. सू. ५।२।२४ (हेत्वाभासाश्च यथोक्ताः) which continues for three folia, and then we have again (on fol. 156b) the text from किं वाच्यम्—we have collated the text accordingly. It seems that the folia of the exemplar for C were not properly arranged. The misplaced portion is found in fol. 122a-124b of Ms. A. 78. भासया C. 79. तस्याश्रयप्रयोगो A. 80. विषयकतया० C. 81. प्रयोगवाति० C. 82. ०लक्षणयो० C. 83. कस्यचिदनु० C.

आचार्यास्तु—कथायाः [84]परप्रतिपत्त्यर्थत्वात् साधारणसमयैरेव प्रयोगो[85]युक्तः ; [86]के समानसमया शब्दा इति दुरूहम्[87], परबुद्धेर-प्रत्यक्षत्वादिति चेन्न, [88]प्रागेव तदुपायव्याकरणादिव्यवहाराभ्युपगमात् ; न [89]चापभ्रंशानां साधारणसमयत्वमस्ति, [90]अर्थप्रत्ययस्तु भ्रमाद् [91]भवन्नपि न तेषां सार्थकत्वमवस्थापयतीति युक्तमस्य निग्रहस्थानत्व-मिति निर्णीतवन्तः ; उदाहृतवन्तश्च [92]लिङ्गविभक्तिविपर्यासनिबन्धक-तया[93] ; एवञ्च व्याकरणाविरुद्धान्यवचनत्वं लक्षणमामनन्ति [94]तन्मतानुयायिनः । तच्च मन्दतमम्[95], साधारणभाषया कथामुपगम्य [96]तत्कथनातिव्याप्तेः । न हि तत्र दूषकताबीजमस्ति, बोधकतया द्वाभ्यामुपगमात्, द्वयोर्बोधकत्वाच्च ।

अत्रोच्यते[97]— भाषाप्रयोगसमयबन्धाधीनकथास्थस्वप्रवर्त्तकसमय-बन्धाविरुद्ध[98]भाषान्यत्वे सति भाषामात्रप्रयोगसमयबन्धप्रवर्त्तितकथा-स्थान्यव्याकरणाविरुद्धं[99] स्वतात्पर्यविषये निरूढलक्षणातिरिक्तवृत्ति-विधुरशास्त्रपरिभाषाशून्यपदशून्यं[100] यद्वाक्यं [101]तत्तदन्तर्गतान्यवचनं

---

84. पदप्रतिपाद्यार्थत्वात् A. 85. प्रयोगे न A. 86-87. केसमपि शब्दाः समया इति दुरूहम् A, केशमानब्दा समानजातित्वं वाहम् C. Text emended in the light of समानसमयैरेव पदैर्वक्तव्यम् in NP. (p. 97). 88. प्रागवत्त्वपाय० C. 89. चायत्वंगाना C. 90. अनुप्रयस्तु C. 91. भवदपि C. 92-93. विभक्ति विपर्यासने निरर्थकतया A, लिङ्गत्वविभक्तिविपर्यासाननि-बन्धकतया C. 94. तन्यताज्ञेयायिनः A. 95. मन्दतलं C. 96. तत्० om. C. 97. After this, C inserts the sentence यादृच्छिकलक्षणाविधुरेण प्रयोज्यम् अर्थकभासया प्रयोज्यमिति समयरर्थः कर्त्तव्योऽन्यथाऽतिप्रसङ्गापत्तेः एवञ्च प्रतिपादकतया वाच्यत्वेन कथारम्भकसमयविषयशब्दाभिधानं निबन्धक-मिति तथा संशयवर्थः, which seems to be a case of dittography, because there is a similar sentence at the end of the commentary of the present *sūtra*. 98. ०कथास्तु प्रवर्त्तकसमयरक्षाविरुद्धं C. 99. कथास्थाल्पव्याकरणविरुद्धं C. 100. ०शास्त्रपरिभासायान्यपदशून्यं C. 101. तत्तद्गतान्यवचनं C.

निरर्थकम्। एवञ्च भाषया वक्तव्यतासमयबन्धे भाषया प्रयोगो न निरर्थकः, निरर्थकञ्च तत्र संस्कृतम्, अभ्युपगतभाषाविरुद्धभाषा[102] च, तथा समयमन्तरेण भाषा, यादृच्छिकलक्षणा च।

अन्ये तु—प्रथमं 'साधुना यादृच्छिकलक्षणाविधुरेण प्रयोज्यम्', 'अमुकभाषया प्रयोज्यम्' ति समयबन्धः कर्त्तव्यः, अन्यथा [103]अतिप्रसङ्गापत्तेः। एवञ्च प्रतिपादकतया वाच्यत्वेन कथारम्भक-समयविषयान्यशब्दाभिधानं निरर्थकमिति, तथा समयबन्धमकृत्वा[104] [105]प्रवृत्तयोस्तु निरर्थकं नोद्भाव्यमित्याहुः। [106]अनीदृशैरेव वाच्यमिति रहस्यम् ॥ ८ ॥

[107]क्रमप्राप्तमविज्ञातार्थं लक्षयति—

परिषत्प्रतिवादिभ्यां त्रिरभिहितमप्यविज्ञातमविज्ञातार्थम् ॥ ९ ॥

वादिना त्रिरभिहितमपि परिषत्प्रतिवादिभ्यामविज्ञातार्थमित्यर्थः। वाचकप्रयोगत्वान्निरर्थकादस्य भेदः, [108]अनन्वयानिश्चयेनापार्थकात्। [109]पराजयनिग्रहापादनव्यामोहात् सभाक्षोभाद्वाऽस्योक्तिसम्भवः[110]। त्रिविधश्चेदम्—स्वस्वमात्रतन्त्ररूढं, cयथा पञ्चस्कन्धचतुरार्यसत्य-द्वादशायतनादि[111] बौद्धानाम्[112], [113]स्फ्यकपालपुरोडाशादि[114] [115]मीमांसकानाम्; गमितयोगमनपेक्ष्य रूढिकञ्च, यथा 'कश्यपतनया-धृतिहेतुरयं त्रिनयनतनययानसमाननामधेयवान्, तत्केतुमत्त्वाद्रस-

---

102. ०विरुद्धभाषा om. C. 103. अभिप्रसङ्गा० C. 104. समय-बन्धमकृत्नो A, समयबन्धसकृद्वा C. 105. प्रवृत्त तयोस्तु C. 106. मनी-दृशेरेव A. 107. समप्राप्त० A. 108. अनन्वयनिश्चयेन० C. 109-110. पराज्ञायनिग्रहोपादनव्यामोहात् सभाक्षोभात्वात् स्योक्तिसम्भवः, A, पराज्ञानिग्रहापदेन व्यामोहामहा क्षोभाद्वा सोक्तिसम्भवः C. Text emended in the light of ANTB (p. 100). C-C in C only. 111. ०सत्यत्वादशायतमादि C. 112. बौद्धायां A. 113-114. सस्य-कपालपुरोडाषादि A, साकापलपुरोडासादि C. 115. समांसकानां A.

नीयवदिति[116] ; [117]पदप्रविवेकोपायप्रकरणादिशून्यश्लिष्टञ्च[118] यथा[119] 'श्वेतो धावती'ति। अत्र च प्रथममुभयानुमत्या[120] उपादीयतेऽपि वादिनोः परस्परमताभिज्ञताशौटीर्यात्, अन्यथा सोऽप्यर्थः साधारणवचनैरेव प्रतिपाद्यः, द्वयन्तूत्तरमनादेयमेव[121] [122]लोकनिरूढ-गमितयोगप्रकरणाद्यापन्न[123]पदजातस्यैवार्थप्रतीत्यङ्गीकारात्[124]। त्रिर-भिधानन्तु [125]परिषदोऽनवधानकृताबोधशङ्कानिराकरणायेति न्याय-सम्प्रदायः।

अत्रोच्यते—स्वस्वपरिभाषयोक्तौ मध्यस्थेनावगते[126] प्रतिवादि-नाऽनवगते [127]सेव पतत पातश्चाज्ञानं [?] [128]प्रतिवादिनः, तथा च [129]मतद्वयाभिज्ञे तादृशशौटीर्यविरहिणोर्वादिनोः स्वस्वपरिभाषा उपादेयैवेति[130] बहुविप्लवः। एतेन—अविकलपरिषत्प्रकृतान्वय-बोधानुकूलपदार्थोपस्थित्यजनकवाचकपदप्रयोगत्वमिति लक्षणं प्रत्युक्तम्; कथञ्च गमितयोगयुक्तं दूषणम्, [131]यथोक्तपदार्थधीपुरःसरं [132]वाक्येऽन्वयबोधोपपत्तेः; तदबोधे दूषणमिदमिति चेन्न, अपेक्षित-रूढेरप्येवम्भावात्। तस्माद् वाच्यतया समयविषयीभूतपरिगृहीतान्य-तन्त्रपरिभाषा[133] प्रतिवाद्यविज्ञातार्थाप्रतिवाद्यविज्ञातार्थः[134] उभया-प्रतिबुद्धार्थकश्च द्वयमेवाविज्ञातार्थमिति सूत्रार्थः। न चाननुगमः,

116. ०केतुमवान्न सनीरवत इति A, ०केतुमत्त्वा एव नीयत इति C. Text emended in the light of वादिविनोद (p. 32). 117. पद-प्रविरेको० C. 118. ०शून्यशिष्टञ्च A. 119. अथ A. 120. प्रथम-मुभयार्थमत्याभयानुमत्या A. 121. द्वयन्तुत्तरवसानादेयमेव A, द्वयं तत्र मनादेयमेव C. 122. लोकनिरुपगमित चात्रकरणा० A. 123. ०प्रकरणा-द्यापनु० C. 124. प्रतीत्यङ्गारात् C. 125. परिषदोऽनभिधान० C. 126. मध्यस्थेनावगवात् C. 127-128. जेद नेवं पतेत पतेच्च ज्ञानं C. 129. तत्त्वयाभिज्ञे A. 130. उपायो यवेति C. 131. यथार्थधी-पुरःसरम् A, ०पुरःसर्वं C. 132. वाक्यानुत्रोधो० C. 133. गृहीतान्य तत्र परिभाषाद्यं A. 134. ०विज्ञातापदार्थं C. Here, अप्रतिवादी=परिषत्.

नानार्थत्वात्, द्राविंशतिप्रसिद्धिस्तु [135]सूत्रोक्तातावर्थमेकत्वेनेति[?][136] युक्तम्। यद् वा—तादृशपरिभाषान्यमध्यस्थविवक्षितार्थप्रत्ययजनकं[137] यत् तदन्यत्वम्; तच्च मध्यस्थाप्रत्यायकम्, मध्यस्थाप्रत्यायिका[138] तादृशी परिभाषा[139] च, ᶜनिरर्थकसाङ्कर्येऽप्यदोष इत्यास्तां विस्तरःᶜ ॥ ६ ॥

क्रमप्राप्तमपार्थकं लक्षयति—

पौर्वापर्यायोगादप्रतिसम्बद्धार्थमपार्थकम् ॥ १० ॥

[140]अप्रतिसम्बद्धोऽभिमतान्वयविधुरोऽर्थो यस्य तदप्रतिसम्बद्धार्थमित्य-पव्याख्यानम्, 'घटः[141] कर्मत्वमानयनं कृतिश्चैत्र' इत्यादौ, 'गच्छति [142]पयसा रथेन भुक्त्वा नगरं चैत्र'[143] इत्यनासन्ने चाव्याप्तेः, तदर्थयोरन्वितत्वात्[144], किन्त्वप्रतिसम्बद्धोऽविवक्षितोऽस्थापिता-न्वयोऽर्थो[145] यत्र तत्तथा। ननु 'वर्णो नित्यत्वम्' इत्यत्र क्वान्वय-प्रतिसम्बन्ध इत्यत उक्तम्—पौर्वापर्यायोगात्। पौर्वापर्यं बोधं प्रति कार्यकारणभावस्तदयोगात्[146] तदाश्रयसम्बन्धवैधुर्यात्, तेन तद्बोध-हेतुसमवधानविरहप्रयुक्तः प्रतिसम्बन्धाभावो[147] [148]बोध्यबोधकभाव-विरहरूपो लभ्यते; इत्थश्चाप्रमापितविवक्षितोपस्थापितान्वयकं पद-जातमपार्थकमिति निर्गलितम्। लक्षणन्तु—प्रकृतान्वयाकाङ्क्षा-योग्यतासत्तिशून्यपदत्वम्; एकसत्त्वेऽपि समुदायविरहान्नाव्याप्तिः।

135-136. अत्रोक्तभावान्नामकत्वेनेति A. 137. ०प्रत्ययाजनकम् C. 138. मध्यस्थायिका C. 139. परिज्ञाया A, C-C in C only. 140. अप्रतिसमयं तिस्यान्वय० A. 141. घट च C. 142-143. पायसा रथेन गुहा नगरं चैत्र A, पयसारथेन तु नगरं चैत्र C. Text emended in the light of ANTB (p. 102). 144. तदन्वयोबन्धितत्वात् C. 145. ०अर्थ not in A or C, Added by us in the light of the compouud word अप्रतिसम्बद्धार्थ in the *Sūtra*. 146. ०तदर्थयोगात् A. 147. ०भावो बोध्यः A. 148. प्रत्यबोधक० A.

आसत्तिश्च प्रकृतान्वयबोधाननुगुणपदव्यवधानविधुरत्वम्, तज्ज्ञाने सत्यन्वयाप्रतीतेर्योजनयाऽपि न तेनान्वयबोधः, किन्तु योजनावाक्यादिति संक्षेपः।

"एतस्य साभिधेयत्वान्निरर्थकासङ्कर" इत्याचार्याः। [न्याय-परिशिष्ट, पृ० ६६]

अन्ये तु—[149]असमर्थविशेषणशून्यत्वमपि प्रतियोगिकोटौ[150] निक्षिप्य 'वह्निमान् नीलधूमादि'त्यत्राप्यपार्थकत्वं स्वीकुर्वन्ति।

तद्द्विविधम्—विकल्पशेषान्वयम्, अन्यच्च[151]। आद्यं यथा पदार्थाभ्युपगमेऽपि सम्भावितसमस्तान्वयप्रकारखण्डनात् [152]तदनभ्युपगमेन द्रष्टव्यम्, [153]विकल्पान्तःपातिप्रकाराभ्युपगमे तु यथोक्तखण्डनमेव निग्रहः। अन्त्यमपि मुख्यममुख्यञ्च; मुख्यमयोग्यमनाकाङ्क्षा च [? ०मनाकाङ्क्षञ्च], अन्यदनासन्नमिति वदन्ति ॥ १० ॥

॥ समाप्तं प्रकृतोपयोगिवाक्यार्थप्रतिपत्तिशून्यनिग्रहस्थानचतुष्कप्रकरणम् ॥ (C—C)

---

149. समर्थविशेषण० C. 150. ०कोटौ C. 151. अनुच्च C.
152. तदभ्युपगमेन A. 153. विकल्पातु: पाति० C. C—C in C only.

क्रमप्राप्तमप्राप्तकालं लक्षयति—

अवयवविपर्यासवचनमप्राप्तकालम् ।। ११ ।।

अवयवपदं कथाभागपरम् । विपर्यास [2]उचितक्रमविपरीतक्रमः । लक्षणन्तु कथारम्भकसमयबन्धविषयीभूताभिधानक्रमविपरीतक्रमाभिधानत्वम् । न [3]तु तदानीमनाकाङ्क्षितस्य तदानीमभिधानं यत् तत्त्वम्; 'शब्दोऽनित्यः कृतकत्वादि'त्युक्ते 'कुतोऽस्य[4] गमकत्वमि'त्याकाङ्क्षायां नैयायिकेन उपनयाभिधानाऽव्याप्तेः, [A]अन्यथा नास्तिकेन तदभिधानातिव्याप्तेः[A]। शास्त्राभ्युपगतकथाक्रमविपरीतक्रमाभिधानं वा; न चापसिद्धान्तेनान्यथासिद्धिरूपजीव्यत्वात् । [5]सत्याकाङ्क्षितक्रमविपर्यासस्तदिति तु न युक्तम्, सत्यस्य क्रमाकाङ्क्षायां मानाभावात् । [6]तदेतच्चतुर्विधम्—पादपादांशावयवतदंशविपर्यासभेदात् । तथा हि—वादिना साध्यसिद्ध्यर्थं प्रतिज्ञादिप्रयोगः, ततः सति समये समस्तहेत्वाभासोद्धारः संक्षेपतोः[7] विस्तरतो वा कार्य इत्येकः कथापादः; न हि स्थापनामकृत्वा[8] कण्टकोद्धारो युज्यते, तद्विषयानुत्थितेः[9] । ततः प्रतिवादिना तस्योपालम्भ इति द्वितीयः पादः; न ह्यदूषिते परोक्ते स्वसाधनं प्रयुक्तमपि फलायालम्[10], तस्यापि तद्विरोधेन फलाजनकत्वात् । ततस्तेन [11]स्वपक्षसाधनम्, वादिवत् कण्टकोद्धरणञ्च[12] कार्यमिति तृतीयः पादः; न हि परोक्ते दूषितेऽपि साधनं विना[13] साध्यसिद्धिः । चतुर्थस्तु कथायाः पादो जयादिव्यवस्थापनम्, स च फलहेतुतया निग्रहानुपयुक्तत्वेन प्रकृतानुपयोगीत्युपेक्षित आचार्यैः[14] । तत्र प्रतिवादी यदि स्वपक्षे साधनं प्रयुङ्क्ते[15] पश्चात् परोक्तदूषणम्, तदा पादविपर्यासः । वादी यदि प्रथमं हेत्वाभासं स्वपक्षे [16]उद्धरति

1. क्रमप्राप्तकालं A. 2. कवितक्रम० C. 3. तत्तदा० C. 4. कुतोष्य C. A—A in A only. 5. सत्या० A. 6, तयेतच्चतु० A. 7. साकांक्षपाता C. 8. ०मकृत्या C. 9. ०विषयार्थते C. 10. फलायनि C. 11. मुपक्षसाधानं C. 12. ०द्धारण C. 13. न add. A. 14. आचार्याः A. 15. प्रयुक्त A. 16. तद्धरति C.

पश्चात् साधनं प्रयुङ्क्ते, तदा पादांशस्य। अवयवविपर्यासस्तु [17]प्रसिद्धः। तदंशविपर्ययो यथा—'नित्यः शब्द' इति व्युत्क्रमाभिधानेऽर्थप्रतीतावपि शास्त्रोक्तक्रमोल्लङ्घनेनैव निग्रहः; न वा सर्वत्रार्थप्रतीतिरपि तादृशी[18]। शास्त्र इत्थमपि दृश्यते प्रयोग इति[19] चेत्, ततः किम्, न हि शास्त्रे[20] 'कृ तृ रा स दिवा द र भूत दिवे'त्यर्थसंग्राहकं[21] [22]प्रयुक्तमिति वादेऽपि तथा। ततः कुतोऽर्थप्रत्यय इति चेत्, अशक्ताद [? अनुमानाद्]पभ्रंशादिव। कथमपभ्रंशे न शक्तिरिति च टीकायाम् अस्मत्कृतमणिमरीच्यादौ[23] च द्रष्टव्यम्। शक्तिग्राहकशास्त्रव्यवहारविरहादि(ति) तु न युक्तम्, लोकव्यवहारादेवाद्यव्युत्पत्तेः। आर्यव्यवहारविरहादिति चेन्न, म्लेच्छव्यवहारादपि [24]पिकादिपदे व्युत्पत्तेः। [25]यववराहादिपदे तु [26]विशेषष्टीकादावसेयः, साधुत्वादिकमपि तत्त्वबोधादौ। उचितक्रमेणैवाभिधेयमिति रहस्यम् ॥ ११ ॥

क्रमप्राप्तं न्यूनं लक्षयति—

हीनमन्यतमेनाप्यवयवेन न्यूनम् ॥ १२ ॥

अपि कथाभागान्तरसंग्रहाय, विशेषणीयश्च स्वशास्त्राभ्युपगतत्वेनावयवः, तेन न [27]सौगतोक्तासर्वावयवप्रयोगेऽतिव्याप्तिः; न हि [28]तन्न्यूनमेव, तेन सह वादमात्रविलोपप्रसङ्गात्; [29]द्व्यवयवे प्रयुक्ते न्यूनेन निग्रहात्, अनिग्रहे वा पर्यनुयोज्योपेक्षणापत्तेः; अवयवान्तरानङ्गत्वं बौद्धेन व्युत्पाद्यमिति चेत्, तदपि [? तथापि] [30]द्व्यवयवेनेति पुनर्निग्रहस्थान-

17. वसिद्धः C. 18. तादृशां A. 19. A reads दृश्यते ति, with a gap in between, while C gives the reading दृश्यते वद्धिति. Text emended in the light of न्यायवार्त्तिक p. 1182. 20. कृव्यवसेदिवा A, कृतृवासदिवा० C. Text emended in the light of न्यायालङ्कार, p. 778 21. ०त्यर्थः संग्राहकः C. 22. प्रत्युक्त० A. 23. ०कृतमानसवीत्यादौ C. 24. कादिपदे A. 25. वरवाहादि० C. 26. विशेषस्तिका० C. 27. सौगतोक्त स्वावयव० C. 28. तन्मूलमेव C. 29. वयेव C. 30. वयवेनेति C.

प्रतिलम्भप्रसङ्गः[31], अप्रतिलम्भे[32] वा पर्यनुयोज्योपेक्षणं स्यात्। न चास्माभिः सह कथायां तेन पञ्चावयवा एव प्रयोज्याः, साधनाङ्गत्व-स्वीकारेऽसाधनाङ्गवचनात्मकेन तदभ्युपगतनिग्रहस्थानेन निग्रहप्रसङ्गात्, स्वीकारेऽपसिद्धान्तात्, कथकसम्प्रदायविरोधाच्च। तस्मात् स्वशास्त्र-सिद्धकथावयवभागहीनं वचनमेव न्यूनमिति[33]। न चापसिद्धान्तः, सिद्धान्तविपरीतानभ्युपगमेऽपि प्रमादादिना तथा प्रयोगोपपत्तेः। परिपूर्णं वदेदिति रहस्यम्॥ १२॥

क्रमप्राप्तमधिकं लक्षयति—

॥ हेतूदाहरणाधिकमधिकम्॥

हेतूदाहरणेऽधिके[34] यस्य (इति) हेतूदाहरणाधिकम्। [35]प्रतिज्ञाहा-न्यादिहेत्व [? प्रतिज्ञातान्यहेत्व]धिकहेतुकत्वं तदुदाहरणादिकोदाहरणकत्वं लक्षणं युक्तम्[36], न तु यथाश्रुतम्, [37]प्रत्येकसमुदायविकल्पग्रासात्। न च हेतूदाहरणान्यतराधिकत्वमर्थः, दूषणाधिकाद्यव्याप्तेः; न चोक्ताभिधानत्वमनेनोपलक्षितमिति साम्प्रतम्[38], उदाहरणाद्येकदेश-पुनरुक्तयोरतिव्याप्तेः। न चान्वितोपयुक्तापुनरुक्ताकृतकर्त्तव्याभि-धानत्वमर्थ इति परिशिष्टोक्तं युक्तम्[39], कृतकर्त्तव्यताया[40] विकल्पा-सहत्वात्, [41]सौगतोक्तप्रतिज्ञादिवाक्यस्य प्रतिज्ञाधिकादेः सम्भवाच्च। निष्कर्षस्तु—प्रतिज्ञाहान्यादिभिन्ननिग्रहस्थानत्वम्। न च प्रथमोत्तर-चकारयोर्वैयर्थ्यं[42], तदर्थस्यापि प्रतियोगिकुक्षितिक्षेपात्, उक्तसमुच्चयार्थ-

31. ०प्रतिलस्त प्रसङ्गः C. 32. अप्रति नं ते C. 32. न्यूनत्वमिति C. 34. हेतूमात्तरणेधिक C. 35. प्रतिज्ञान्यादि० C. 36. लक्षणमुक्तं A. 37. प्रार्थक० C. 38. साम्प्रतम् om. C. 39. परिशिष्टत्वमुक्तं A. 40. ०कर्त्तव्यतावा A. 41. सुगतोक्त० C. 42. Here, the first च occurs in "...हेत्वाभासाश्च निग्रहस्थानानि" (न्या. सू. ५।२।२), and the second च occurs in "हेत्वाभासाश्च यथोक्ताः" (न्या. सू. ५।२।२४).

त्वाद्वा। अतएव—व्यर्थविशेषणमप्यधिकमव्यमव्यास्त इति प्राचीन-नैयायिकाः ; न च तत्र व्याप्यत्वासिद्धिरेव, निरुक्तव्याप्तेरप्रत्यूहत्वात्।

कथन्तर्हि तद्दूषणम्? यथा हेत्वधिकम्, एकेनैव हेतुनाऽपेक्षित-सिद्धेरितरस्य[43] निष्प्रयोजनकत्वेन तदिति चेत्, इहापि हेत्वेकदेशादेव 'धूमादि'त्येतस्मात्तत्सिद्धेर्नीलपदवैयर्थ्येनैव।

तदेतद् द्विविधम्—अवयवाधिकमनवयवाधिकञ्च। अवयवाधिकं यथा—'धूमादालोकाच्च', 'धूमादे'रिति वा ; यथा वा प्रतिज्ञाहेत्वादयः सौगतानाम्। द्वितीयमपि द्विधा—अवयवैकदेशाधिकमन्यच्च। आद्यं[44] यथा—'यथा महानसं च पर्वतश्च', 'यथा चत्वरादी'ति वा, यथा वा 'नीलधूमादि'त्यत्र[45] नीलपदम्। अन्त्यं यथा[46] दूषणाधिकमनुवादाधिकं तर्काधिकम्। इदञ्च 'एतावद्धेतुना' 'यावत्स्फुर्त्तिहेतुना' इत्यादि-समयबन्धविरहे, तथा समयबन्धे तु तावत्सम्बन्धविषयादन्योक्तावधि-कत्वम्, [47]तन्न्यूनोक्तौ न्यूनत्वम्।

[48]कथाहेतुयथार्थज्ञानाक्षतेर्हेत्वधिकादि न[49] निग्रहस्थानम्—इत्येके। तन्न, पञ्चावयवप्रयोगेऽप्रकृतार्थान्तराभिधानस्याप्यनिग्रहस्थान-त्वापत्तेः। [50]एतद्वक्तव्यदूषणोद्धारतत्त्वज्ञानविरहस्तत्राप्यस्तीति चेत्, अत्राप्येतेन[51] विनाऽपि फलसिद्धिरिति तत्त्वज्ञानस्य विरहोऽस्त्येवेति तुल्यम्। समयबन्धविशेषे सत्येतत्[52] निग्रहस्थानमित्यपि वदन्ति[53]। ईदृशं न वदेदिति रहस्यम्॥ १३॥

(॥ समाप्तं स्वसिद्धान्तानुरूपप्रयोगाभासनिग्रहस्थानत्रिकप्रकरणम्[54] ॥)

---

43. ०सिद्धेरिव तस्य A. 44. आध्यं C. 45. यथा वदीत्यत्र C. 46. क्षेचद् यथा C. 47. तन्मूलोक्तौ C. 48-49. कथाहेतुयथार्थज्ञानाकृते-र्हेत्वधिकादिना A, कथाहेतु यथा अनुज्ञानाक्षतेर्हैत्वधिकादिना C. 50. एत-दुक्तव्य० C 51. अत्राप्येतेन A. 52. सत्येतत् om. A. 53. वदस्तं A. 54. स्थानतिप्रकरणम् C.

क्रमप्राप्तं पुनरुक्तं लक्षयति—

शब्दार्थयोः पुनर्वचनं पुनरुक्तमन्यत्रानुवादात् ।। १४ ।।

अत्र पुनरुक्तमिति लक्ष्यनिर्देशः। अनुवादादन्यत्र[1] पुनर्वचनमिति लक्षणपरम्, तदर्थश्च अनुवादान्यत्वे[2] सति पुनर्वचनम्, [3]तदुक्त्यन्तरप्रयोजनानधिकप्रयोजनकतदुक्तित्वमिति यावत्। [4]शब्दार्थयोरिति विभागपरम्, शब्दसम्बन्धि स्वार्थसम्बन्धि चेत्यर्थः[5]। उक्तान्तरसमानानुपूर्वीकं पुनरुक्तं शब्दपुनरुक्तम्, तदसमानानुपूर्वीकं शक्त्या [6]'तल्लभ्यार्थाभिधानं तत्प्रयोजनानधिकप्रयोजनकमर्थपुनरुक्तम्[7]। आद्यं यथा—'घटो घट' इति, द्वितीयं (यथा) 'घटः कलस' इति ।। १४ ।।

प्रकारान्तरमाह—

अर्थादापन्नस्य स्वशब्देन पुनर्वचनम् ।। १५ ।।

चेति[8] शेषः। [9]स्वसम्बन्धिशक्त्यान् शक्यसम्बन्धाद्वा[10] स्वशब्देनापन्नस्य पुनरभिधानमन्यत्रानुवादात् पुनर्वचनञ्चेत्यर्थः। 'आत्मा ज्ञानवानि'-त्यत्रात्मत्वेन[11] व्याप्त्यापन्नज्ञानाभिधानवारणाय स्वशब्देनेति। [12]स्वाविरोधकशब्देनेत्यर्थः। [A]पुनः पदम् अन्यत्रानुवादादित्येतल्लाभाय, तेन लक्षणया पूर्वोक्तलभ्यस्यार्थस्यानधिकप्रयोजनकमुक्तान्तरञ्चेत्यर्थः। तदेतदर्थं पुनरुक्तमभानन्ति, यथा—'गङ्गायां गङ्गातीरे घोष' इति।

आचार्यास्तु—उक्तार्थाक्षेपलभ्यस्याभिधानञ्च पुनरुक्तमित्यर्थः[A]; यथा—'अग्निनोष्णेन युक्त'[13] इत्यत्रोष्णपदम्, यथा वा—'जीवन् गृहे

1. सति add, C. 2. ०बादात् पत्वे C. 3. ०प्रयोजनाधिक० A. 4. शब्दान्वयो० C. 5. स्वस्वसम्बन्धि चेत्यर्थः, शब्दसम्बन्धि वेत्यर्थः C. 6. तद्द्रव्यार्थभिधानं C. 7. ०प्रयोजनधिकप्रयोजनक ननु पुनरुक्तं C. 8. ति C. 9-10. स्वस्वासम्बन्धशक्त्यात् शक्यसम्बन्धा A, स्वस्वासम्बन्धशक्यात् शक्तसम्बन्धा C. 11. ०नित्यग्राह्यत्वेन A. 12. स्वविरोधशब्देनेत्यर्थः A, स्वविरोधकशब्देन C. A—A in A only. 13. अग्नि लोष्ट्रेन मुक्त C.

नास्ती'त्युक्त्वा 'वह्निरस्ती'ति [14]वचनमित्याहुः। तन्न शोभनम्, 'धूमो वह्निव्याप्य' इत्यादावपि पौनरुक्त्यापत्तेः। किं बहुना, एवं सत्युदाहरणाभिधानं व्याप्तिपरं पुनरुक्तं स्यात्, धूमत्वेनैव व्याप्तिप्राप्तेः[15], तस्मादुक्त एवार्थः श्रेयान्।

यत् पुनरुक्तमेकेन—द्विविधमेव पुनरुक्तम्, पूर्वसमानानुपूर्वीकमन्यथा चेति; तदपि नोक्तरूपेण त्रैविध्योपमर्दनक्षमम्[16], न हि सामान्यं विशेषमुपर्दितुमीष्टे[17]।

यच्च[18]—शब्दार्थपुनरुक्तं शब्दार्थाक्षिप्तपुनरुक्तञ्चेति[19] द्वैविध्यम्, शब्दपुनरुक्तस्य च द्वैविध्यं समशब्दत्वविषमशब्दत्वभेदादिति, तदपि न, आक्षेपलभ्यपुनरुक्तत्वनिरासादिति। अपुनरुक्तमेव वाच्यमिति रहस्यम्॥ १५॥

(॥ समाप्तं पुनरुक्तप्रकरणम्॥ ०॥)

14. चरममित्याहुः A. 15. व्याप्तिव्याप्तेः C. 16. त्रैविध्योपसर्गलक्षणं A.
17. ०मुपमार्गितुमीष्टे C. 18. यच्च om. C.

क्रमप्राप्तमननुभाषणं[1] लक्षयति—

विज्ञातस्य परिषदा त्रिरभिहितस्याप्यप्रत्युच्चारणमननुभाषणम् ॥ १६ ॥

परिषदेति पूर्वान्वयि। त्रिरभिहितस्येति। वाद्युक्तस्य [2]वादिमध्यस्थान्यतरेण[3] वारत्रयमनूदितस्येत्यर्थः। [4]अपिकारोऽनुवादानवश्यम्भावलाभाय, स हि प्रतिवादिनियोगापेक्षया समयबन्धापेक्षया च, न तु सर्वत्र, न वा 'सकृदेव प्रयोज्यमि'ति प्रौढिवादेन समयबन्धे[5]; तेनानुवादयोग्यकाले [6]स्वस्थेनाननुवादोऽननुभाषणमिति[7] लक्षणं निर्व्यूढम्; योग्यश्च कालः उक्तदिशावसेयः। न चैवमज्ञानविक्षेपयोरेतद्व्याप्यतापत्तिः, [8]अनूद्याज्ञानाविष्कारे कथाविच्छेदे च तयोः साम्राज्यात्; [9]स्थापनां सम्यग्विधायाज्ञानाविष्कार एव कथाविच्छेदे वा तयोरसङ्कर इति तु भास्करकृतः। अज्ञानमनाविष्कुर्वतो[10] व्याजेन कथामविच्छिन्दतेति विशेषणं देयमिति त्वाचार्याः, [11]अननुभाषणञ्चानुभाषणविरोधी व्यापार इत्यपि।

यथाकालं निग्रहस्थानत्वे सति वाऽनूद्य[12]दूषणाभिधानव्यतिरेकोऽननुभाषणमिति तु मणिकण्ठमिश्रः। तन्न, दूषणाभिधानस्य प्रतियोगिकोटौ प्रवेशे मानाभावात्।

तदेतच्चतुर्विधम्—एकदेशानुवादेन, विपरीतानुवादेन, केवलदूषणक्त्या, स्तम्भेन च। न्यूनाद्यसाङ्कर्यं[13] स्तम्भे। न च तत्राज्ञानमप्रतिभा वा, ज्ञातस्यापि [14]सभाक्षोभादनुक्तिसम्भवेन तयोरनिश्चयात्; अननुभाषणस्य च योग्यानुपलब्ध्यैव निश्चयात्।

---

1. ०भासनं C. 2-3. वाद मध्यस्थात्यतरेण C. 4. अपिकारोर्थो वारानवश्य० A, अपिकालोऽनुवादावश्य० C. 5. समबन्धे C. 6. मुस्थेना० C. 7. ०भासन० C. 8. अन्यूनाज्ञाना० A, अनूत्याज्ञाना० C. 9. स्थापनांशस्य स्विधाया० C. 10. ०मनाविस्तर्क C. 11. अनुनुभासनं चानुभासन० C. 12. वाऽन्यून A. 13. न्यूनाद्यसंकीर्य C 14. सतास्काभाद० C.

तदादिपदेनानुवादरूपं पञ्चममित्याचार्याः[15]। तन्न[16], दूषकताबीजस्य निराश्रयतापत्तेरभावात्। तदादिपदेन [17]विशिष्य हेत्वाद्युपस्थितिर्यत्र न सम्भवति तत्रेदम्—[18]इत्यपि न, लक्षणायोगात्। दूषणन्तु[19] तत्र मध्यस्थाप्रतिपत्तावविज्ञातार्थकमेवेत्यवसेयम्॥ १६॥

क्रमप्राप्तमज्ञानं लक्षयति—

अविज्ञातश्चाज्ञानम्॥ १७॥

भावे क्तः। [20]परिषदा विज्ञातस्येत्याद्यनुकर्षणार्थश्चकारः[21], तेन मध्यस्थावगतस्य वाद्युक्तस्यार्थस्यान्यतरेण वारत्रयसमु[? ०द्वयमनू]दितस्यापि प्रतिवादिनाऽनवबोधोऽज्ञानमित्याचार्याः। न तु प्रकृतविषयानवबोधाविष्करणम्,[22] अवबोधानाविष्करणं[23] वा, 'पुनरुच्यतामि'त्यादिनियोगेऽतिव्याप्त्यापत्तेः। 'सकृदेव वाच्यमि'ति समयबन्धे प्रथमप्रयोगानन्तरमनवबोधेऽव्याप्तमिदमिति चेन्न, तादृशसमयबन्धस्थलीयेतराननुवादविरहस्योक्तानुवादपदेनोक्तत्वात्[24], एतदज्ञानञ्च '[25]नावगच्छामी'त्युक्तेः॥ १७॥

क्रमप्राप्तामप्रतिभां[26] लक्षयति—

उत्तरस्याप्रतिपत्तिरप्रतिभा॥ १८॥

नर्थानना-[? नन्वनेना-]ज्ञानोच्छेदः; न च प्रतिपत्तिविरोधीव्यापारोऽप्रतिभा [१० रोऽज्ञानं] नाप्रतिपत्तिरिति भेदः, विरोधित्वं ह्यसमानकालीनत्वं चेत्, त(द)त्राप्यस्ति; अस्ति, न त्वज्ञानं तदिति चेन्न, एवं [27]सत्यज्ञानविरहस्थलीयाप्रतिपत्तेरसंग्रहापत्तेः; साऽपि प्रतिपत्तिविरो-

---

15. पञ्चमत्वाचार्याः C. 16. ननु C. 17. विशिष्टहेत्वा० C. 18. इति om. A. 19. तु om. C. 20-21. परिमाणादिविरभिधानार्थकर्षणाकारः A, परिषद्बिज्ञानवादिभिरभिधानार्थकर्षणार्थः कारः C. Text emended in the light of NP (p. 112). 22. ०बोधाविस्मरणं C. 23. अवरोधानावि रणं C. 24. ०बन्धस्थलीयतरोक्तानुवादपदेनोक्तत्वात् C. 25. पारगच्छामी० C. 26. ०प्राप्तमप्रतिभां C. 27. सद्यज्ञान० C.

धिन्येवेति चेत्, गतं तर्ह्यज्ञानेन ।[28] यथाज्ञानमननुभाष्याज्ञानमाविष्कुर्वतोऽन्यत्राननुभाषणम्[29], तत्र [30]सदुत्तरस्याप्रतिपत्तिः खसूचनश्लोकपाठादिसूचिताऽप्रतिभेत्याचार्या इति[31] चेन्न, पक्षं परिगृह्य मध्यस्थनियोगानन्तरमप्रतिभया [32]तुष्णीम्भावेऽव्याप्तेः । यत् पुनरुक्तं मणिकण्ठेन[33]—स्वीयविपर्ययाविष्करणमज्ञानम्, सन्देहाविष्करणमज्ञानाविष्करणं वाऽप्रतिभेति, तदप्यत एव निरस्तम् ।

उच्यते—उत्तरार्हस्योत्तरानिष्पत्तिरप्रतिभा । न चाननुभाषणसाङ्कर्यम्, [34]स्वयमुत्तरानभिधाने पक्षं परिगृह्य तूष्णीम्भावे चास्याः साम्राज्यात् । न चाननुभाषणोच्छेदः, [35]उद्भावितदूषणस्याननुवादेऽसाङ्कर्यात्, अननूद्य दूषणानभिधानातिरिक्तत्वेनेह विशेषणाद्वा[36] । उत्तरावसरे कार्याव्यासङ्गे इति व [? च] विशेषणं वाच्यम्, नातोऽतिव्याप्तिः ।

परोक्तातिरिक्तप्रकृताप्रतिपत्तिरप्रतिभेत्यपि[37] कश्चित् । [38]तन्न, अनूद्योत्तरानभिधानस्थले तस्या विभावयितुमशक्यत्वात्, तेन दूषणे[39] तस्य दूषणावश्यम्भावात्, तस्यैवोद्भाव्यत्वाच्च ॥ १८ ॥

क्रमप्राप्तं विक्षेपं लक्षयति—

कार्यव्यासङ्गात् कथाविच्छेदो विक्षेपः ॥ १९ ॥

[40]कार्यव्यासङ्गादावश्यकप्राणिकर्मातिरिक्तप्रयोजनमुद्दिश्य, तेन [41]मूत्रादिव्यापारार्थं कथाविच्छेदे नातिव्याप्तिः, न तु तत्कर्त्तव्यतामुद्भाव्येति, [42]'रसालया मया भुक्तं प्रतिश्यायकणा मे कण्ठं बाधत' [43]इत्युद्भाव्य

28. अथाज्ञान० C. 29. ०अननुदूपणम् C. 30. सत्पुन्नरस्या० C. 31. होत C. 32. तुर्त्तीभावे० C. 33. मसिनत्नेन A. 34. स्वयनुत्तरा० A, अनुत्यात्तरा० C. 35. तद्भाततूषण० C. 36. विशेषणात्वा C. 36. ०पत्तिरप्रतीतेत्यपि C. 38. तन्नात्य उत्तरा० C. 39. तेन विभावने C. 40. ०व्यासङ्गादवशा धर्मा० A. 41. सूत्रादि चागोत्वं वा A, सूत्रादिव्यापारत्वं C. 42-43. यथा भुक्तं प्रतिश्याय काला मे कत्वं बाधत A, बसानयामग्राभुक्तं प्रतिस्याये का मे कं ठं धाते C. Text emended in the light of वादिविनोद (p. 35).

विच्छेदेऽनुद्भाव्य कुव्याजेन[44] कथां विच्छिद्य शयनादौ चाव्याप्तेः[45]
... ... ॥ १६ ॥

(॥ समाप्तमुत्तरविरोधिनिग्रहस्थानचतुष्कप्रकरणम् ॥)

44. कुरव्याजेन C. 45. After this, there is a blank portion in A.C. does not fill up this blank, and the sentence seems to remain incomplete.

क्रमप्राप्तां मतानुज्ञां लक्षयति—

स्वपक्षे दोषाभ्युपगमात् परपक्षे दोषप्रसङ्गो मतानुज्ञा ॥ २० ॥

स्वपक्षे दोषत्वेनाभ्युपगममात्रात् परेण पक्षे दोषत्वेनानभ्युपगमेऽपि पराभ्युपगते दोषप्रसङ्गः पराभ्युपगतार्थापादनमिति यावत् । [1]तदिदमाह—"अनिष्टभ्रमेणेष्टापादनं[2] मतानुज्ञे"ति ; यथा—'क्षित्यादि यदि [3]सकर्तृकं स्याद् [4]विनाशि स्यादि'ति मीमांसकस्य, यथा वा—'यदि सकर्तृकं न स्याज्ज्ञानजन्यं न स्यादि'ति नैयायिकस्य स्थापनानुकूलप्रसङ्गः । न चेयं जातिः ; स्वाव्याघातकत्वात्, प्रसङ्गाभासमात्रं विवक्षितमिति तु मणिकण्ठमिश्राः ।

अन्ये तु—परोक्तं दूषणमनुद्धृत्य तत्पक्षे दोषोद्भावनं[5] तथेत्याहुः[6] । तन्न, [7]अप्राप्तकालतानधिकत्वात्[8], न च परपक्षदोषानन्तरं तदुक्तदोषोद्धार इति समयबन्धप्रवर्त्तितायां[9] कथायां तदसम्भवः, तत्रास्या अप्यदोषत्वात् ।

भास्करकृतस्तु—पञ्चम्यनन्तरं [10]स्वभिन्न इति शेषः, तेन स्वपक्षदोषाभ्युपगमो[11]...मतानुज्ञा[12] ; न चैवं तेनैव दूषणेन निगृहीतत्वात् [13]कृतमनयेति वाच्यम्, यत्र स्थापनायां पूर्णायामनध्यवसाया'(द)दुष्टोऽयं[14]

1-2. तदमाकुर्वनिष्टभ्रमे नष्टापादनं A, तदिदमाह निष्ठ भ्रमेणेष्टापादनं C. Text emended in the light of NP (p. 117). Jānakinatha alludes here to the definition proposed by Udayana. 3. कर्तृकं C. 4. विना शिष्यादिति C. 5. दोषाभावनं C. 6. अथेत्याहुः C. 7-8. सप्राप्त० A, ०कालतानविरुद्धत्वात् C. 9. ०बन्धप्रवृत्तितायां A. 10. अभिन्न C. 11. After this, there is some space left blank in A. 12. मतानुज्ञा only in C, which does not seem to fill up the blank in A in its entirety. 13. क्व च मनायातिवाचां A. 14. ०वसायादुष्मोऽयं C.

मतपक्ष' इति ब्रवीति तत्रास्याः साम्राज्यादित्याहुः । तदपि न, [15]पञ्च-म्यादिवैयर्थ्यापातात् ॥ २० ॥

क्रमप्राप्तं पर्यनुयोज्योपेक्षणं लक्षयति—

निग्रहस्थानप्राप्तस्यानिग्रहः पर्यनुयोज्योपेक्षणम् ॥ २१ ॥

निग्रहस्थानवतो निग्रहस्थानानुद्भावनमित्यर्थः । अप्रतिभालक्षणे एतद्-व्यावर्त्तकं विशेषणं देयमित्याशयः, नातस्तदविशेषता ।

आचार्यास्तु—यत्र प्रतिज्ञाहान्यादिकमुपेक्ष्य[16] [17]सदुत्तरेण प्रत्यव-तिष्ठते तत्रास्यासाङ्कर्यम् । ननु[18] सदुत्तरं वदन् प्रौढतया स्खलितं[19] यद्युपेक्षितवान्, किमेतावतैव निग्रहमर्हति ; अर्हत्येव, प्रतिज्ञासन्न्यासा-दीनामवश्योद्भाव्यत्वात्[20], अन्यथा पूर्वोपात्तं[21] दुष्टं त्यजन् विशेष-यन्नपह्नुवानो वा[22] यद्युपेक्षितः[23], कथमपि कथाप्रतानविच्छेदो न स्यात्, तत्राप्येवंविधानामवकाशसम्भवादिति प्राहुः ।

तदपरे न क्षमन्ते । यथा ह्याश्रयासिद्धिव्यभिचारादीनामेकतरोद्भावने-नैव प्रकृतनिर्वाहादन्यतरोपेक्षणं न दोषाय, अपकर्षासूचकत्वात्, तथा [C]प्रकृतेऽपि । न तुल्यत्वम्[C], प्रकृते दूषणान्तरे दत्ते [24]प्रतिज्ञातापलाप-सम्भवादिति चेन्न[25] ; अपलापस्याप्यपलापसम्भवात् । [26]तावताप्य-पलापोद्भावनमदुष्टमिति[27] चेत्तुल्यमिति[?०मिहापि] । विजातीयप्राप्ता-विदमिष्यते, [28]अनभ्युपेक्षणस्याप्युपेक्षणं निग्रहायेत्यनवस्थापातात्, अत उद्भावनार्हत्वेन[29] निग्रहस्थानं विशेषणीयम् ; न चेदं तथा, मध्यस्थनो-

15. पञ्चम्या वैयर्थ्या० A. 16. ०हान्यादि स्वपेक्ष्य A, ०हान्यादीन्नपेक्ष्य C. 17. स्वद्वत्तरेण A. 18. सन्न C. 19. सम्बलितं A. 20. ०दीनामनोद्-भाव्यत्वात् C. 21. पूर्वोपपत्ति A. 22. विशिषं पङ्कुवोनो A, विशेषयत्व पह्नुवानो वा C. 23. यद्युपेक्षेत A, यद्युपेक्षते C. C—C in C only. 24. प्रतिज्ञातार्थापलाप० A. 25. ते न A. 26. इवताप्य० C. 27. ०भावनमदृष्टमिति A. 28. अनपेक्षण० C. 29. उद्भावनार्हत्वे C.

द्भाव्यत्वात्। अत एव समयबन्धेऽनुद्भाव्यत्वेनोभयसम्प्रतिपन्नेऽपि नातिव्याप्तिः। वादे च पर्यनुयोज्योपेक्षणं वादिनैवोद्भाव्यम्, अतस्तदनुद्भावनमपि क्वचिन्निग्रहस्थानमिति ध्येयम्। अत्र निग्रहस्थानं प्राप्तं नोपेक्षणीयमिति रहस्यम् ॥ २१ ॥

क्रमप्राप्तं निरनुयोज्यानुयोगं लक्षयति—

अनिग्रहस्थाने निग्रहस्थानाभियोगः निरनुयोज्यानुयोगः ॥ २२ ॥

नन्विदं व्यभिचारिणि विरुद्धोद्भावनेऽतिव्याप्तिः [? ०व्याप्तम्], न च "अतन्निग्रहस्थाने तन्निग्रहस्थानोद्भावनमि"ति परिशिष्टोक्तं युक्तम्, अनवसरग्रहणाव्याप्तेः ; अतएव "भ्रमान्निग्रहस्थानोद्भावनं तदि"ति निरस्तम्[30]। "तन्निग्रहस्थानोद्भावनाभ्युपेतकालान्यस्मिन् तन्निग्रहस्थानोद्भावनमि"ति वर्द्धमानोक्तमप्ययुक्तम्, अवसरे मिथ्याभियोगाव्याप्तेः ; किञ्च यत्र जल्पादौ ᶜहेत्वाभासनिरनुयोज्यानुयोगाप्रतिभाव्ये [?०भाव्ये-] वोद्भाव्यमितिᶜ नियमस्तत्र [31]प्रतिज्ञाहान्याद्युद्भावनेऽतिव्याप्तिः।

उच्यते। तद्वत्यवसरे तदुद्भावनम् [? तदनुद्भाव्य] [32]यत् तदन्यदुद्भावनानर्हं निग्रहस्थानोद्भावनं (तत्) निरनुयोज्यानुयोगः। न च समयबन्धदशायां त्यक्तमुद्भावनार्हम्, न[33] च [34]च्छलजात्योरतिव्याप्तिः, [35]तयोरप्येतद्विशेषत्वादिति सम्प्रदायः। तदन्यत्वेन विशेष्यमित्यन्ये।

तदेतच्चतुर्विधम्—छलं जातिराभासोऽनवसरग्रहणञ्च। तत्राभासो यथा—व्यभिचारिणि विरोधादिकम्। अनवसरग्रहणञ्च क्वचिदवसरमप्राप्य, यथोक्तग्राह्ये[36] 'त्यक्षसि चेत् प्रतिज्ञाहानिः, विशेषयिष्यसि[37]

---

30. The second view is supported by Maṇikaṇṭha Miśra (cf. न्यायरत्न, p. 241). C—C in C only. 31. प्रतिज्ञात्वाद्युद्भावने० C. 32. यत् तदन्यदुद्भावनं add C. A case of dittography. 33. न om. A. 34. कुलजात्यो० C. 35. तमोवप्येतद्० C. 36. ग्राह्येत्यर्थं C. 37. विशेषयनि C.

चेद्धेत्वन्तरमि'ति[38] ; क्वचिदवसरमतीत्य, यथोच्यमानग्राह्यापशब्द-विरोधाप्राप्तकालोक्तावुक्तिसमाप्तिग्रहणम् ; [39]यथा वा—अनुक्तग्राह्या-ज्ञानाननुभाषणावसरे तदनुद्भाव्य बोधाविष्करणानुभाषणप्रवृत्ते[?]वादिनि [40]तदुद्भावनम् ; एवमन्यदप्यूह्यमिति सम्प्रदायः । अवसरात्यये दुर्ग्रहणं [? त्वग्रहणं] समयमनुरुध्येत्यन्ये ।। २२ ।।

(।। समाप्तं दोषनिरूप्यनिग्रहस्थानत्रिकप्रकरणम् ।।)

38. ग्राह्ये add. A. 39. यद्वा A. 40. तद्भावनम् C.

क्रमप्राप्तमपसिद्धान्तं लक्षयति—

सिद्धान्तमभ्युपेत्यानियमात् कथाप्रसङ्गोऽपसिद्धान्तः ।। २३ ।।

प्रकृतकथाश्रयतयाभ्युपगतशास्त्रार्थविरोध्यङ्गीकारोऽपसिद्धान्त इत्यर्थः। तेन 'यद्यपि सांख्यमतं दुष्टं तथापि तदाश्रित्यैव भवन्तं जेष्यामी'ति प्रौढिपूर्वकं प्रवर्त्तमानस्य तद्विरुद्धाभ्युपगमे नाव्याप्तिः। शास्त्रकाराभ्युपगतविरोधमप्रतीत्य न विरोधः शक्यप्रतिपत्तिक इति [1]विरोधोपजीव्यतयाऽयं[2] पृथगिति वर्णयन्ति।

सौगतास्तु—न [3]शास्त्रधेया वादा भवन्तीति[4] नापसिद्धान्तो दूषणम्। तदाह कीर्त्तिः—

रिक्तस्य जन्तोर्जातस्य गुणदोषमपश्यतः।
विलब्धा बत केनामी[5] सिद्धान्तविषमग्रहाः[6] ।।

[प्रमाणवार्त्तिकम्, ४।५४]

इति। तन्न, तथा सति क्षणभङ्गसाधनप्रवृत्तस्य[7] [8]तथागत[A]मतविद्वद्गोष्ठीवरिष्ठस्य सिद्धसाधनमु[A]द्भाव्य नैयायिकबालकेनापि निग्रहापत्तेः। अभ्युपगमविरोधान्नैवमिति चेत्, तुल्यसामान्यतस्त्वयमभ्युपगम[?] इत्यन्यदेतत् ।। २३ ।।

क्रमप्राप्तान् हेत्वाभासान्[9] लक्षयति—

हेत्वाभासाश्च यथोक्ता ।। २४ ।।

यथोक्ताः विपक्षवृत्तित्वसाध्याभावव्याप्यत्वपक्षावृत्तित्वादि सत्प्रतिपक्षपक्षवृत्तिसाध्याभावा[10] हेत्वाभासा इत्यर्थः। न [11]चाननुगतलक्षणा-

1-2. विरोधादुपजीव्यतयाऽयं A, विरोधोपजीव्य तथायं C. 3-4. न शक्तो ज्ञायादावस्तीति C. 5. केनापि A, C. 6. ०विषयग्रहाः A, C. Text emended in the light of प्रमाणवार्त्तिक (४/५४). 7. ०साधनप्रवर्तकस्य A, ०साधनप्रकृतस्य C. 8. तथाशत C. A—A in A only. 9. हेत्वाभाषणे C. 10. ०साध्याभावहेत्वभावाः A. 11. चागत० C.

लाभः, नानार्थत्वात्, [12]अतिदेशस्तत्तन्नामग्रहणार्थः। तत्र व्यभिचारः साध्यसहचरत्वे सति साध्यवदन्यगामिता, विरोधः साध्याभावव्याप्यत्वमिति न[13] युक्तम् साध्यवदन्यत्वस्फुरणेऽधिकतापत्तेः[14]।

†इष्ट एवायमर्थ इति चेत्, ततः[15] किमाभ्याम्, किन्तु साध्यवदन्यवृत्तित्व व्यभिचारः ; विरोधस्तु [16]साध्यशून्यत्ववदन्यावृत्तित्वे सति पक्षसत्त्वम्, न चेदमदूषणम्, स्वार्थस्थले[17] साध्यानुमितिविरोधित्वादशक्त्युन्नायकत्वाच्च ; साध्यशून्यत्ववदन्यावृत्तित्वं वा, तस्य च स्वार्थस्थले उपाधिरयदि[18][?] साक्षाददूषणं तथापि कथायां दूषणं भवत्येव, उक्तलक्षणसत्त्वात्। असिद्धिश्च [? °द्धिस्तु] व्याप्यत्वासिद्धिराश्रयासिद्धिः[16] स्वरूपासिद्धिश्च[20] चिन्तामणिमरीचावुक्ताः, चरमौ[21] च। दृष्टान्ते हेतुवैकल्यं साध्यवैकल्यमुभयवैकल्यं सिद्धसाधनमुपाधिः प्रतिकूलतर्कादयः चकारलभ्याः। अथवा चकार उक्तसमशीलधर्माणां[?] साध्यासहचारत्वादीनां परिग्राहकः, एषान्त्वधिक[22] [23]एवान्तर्भावः।

आचार्यास्तु—[24]साधनविकलदृष्टान्तेऽसाधारणत्वमुभयविकले व्याप्यत्वासिद्धिरस्तीत्युद्भावनप्रकारसमुच्चय एव चकार इति साटोपमाचक्षते[25]। न चैतद् युक्तं, मीमांसकनैयायिकयोः कथायां 'शब्दोऽनित्यो बाह्यकरणवेद्यत्वे[26] सति सत्त्वात्, धर्मवदि'त्यत्र सपक्षे घटे[27] हेतुसत्त्वेनासाधारणत्वाभावात्; न हि सपक्षनिष्ठाभावकत्वं तत्, [28]प्रसिद्धानुमाना-

---

12. अतिदेशस्य तन्नाम° A. 13. न om. A.

† From this word onwards, the reading in C found in fol. 152b. We have noted this fact also in connection with न्या° सू° ५।२।८. 15. तर्हि C. 16. साध्यशून्यवदन्या° A. 17. स्वार्थसंवने C. स्वार्थ=स्वार्थानुमानम्. 18. उपाधिरर्थाविवद् यदि C. 19. °क्षाश्रयासिद्धिः om. A. 20. °सिद्धिस्तु A. 21. चरमे A. 22. एकान्त्वधिक C. 23. रणवान्तभावः C. 24. °दृष्टान्तो तत्साधारण° A. 25. सा चौपमाचक्ष्यते A. 26. बात्मकरणपेत्यत्वे. C. 27. घटो A. 28. तत्प्रसिद्धा° A. C-C in C only.

व्याप्तेः, Cनाप्युद्भावितCसपक्षव्यावृत्तत्वम्, स्वार्थस्थलेऽपि तस्य दोषत्वात्, 'आकाशवदि'त्यत्र च व्याप्यत्वासिद्ध्यभावाच्च। आस्तां वा दूषणान्तरसत्त्वम्, उक्तधर्माणामप्यप्रतिपत्त्युन्नायकत्वान्निग्रहस्थानत्वं ब्रह्मणाऽपि दुरपह्नवमित्यवश्यं केनापि संग्राह्यम्।

तत्र व्यभिचारो यथा—'क्षितिः कर्तृमती मेयत्वादि'त्यादौ। ननु किमिदं कर्तृत्वम्, स्वातन्त्र्यमिति चेत्, किं स्वातन्त्र्यम्, न [29]प्रधानक्रियानुकूलव्यापारवत्त्वम्, सर्वकारकसाधारण्यात्; नापि कारकप्रयोक्तृत्वम्, तद्धि न तद्व्यापारकर्तृत्वम्, आत्माश्रयात्, नापि तद्धेतुत्वम्; [30]छेद्यसंयोगरूपव्यापारजनककुठारादेरपि [31]छिदाकर्तृतापत्तेः। इष्ट एवायमर्थो'ऽसिद्धेनत्ती'ति[32][? ०'ऽसिर्भिनत्ती'ति] दर्शनादिति चेदस्त्वेवम्, तथापि छेद्यातिव्याप्तिर्दुर्वारा। कारकान्तराप्रयोज्यत्वे सतीति विशेषणादयमदोष इति चेत्, किमिदं तदप्रयोज्यत्वम्, तज्जन्यव्यापारानश्रयत्वमिति चेन्न, परशुसंयोगज्ञान[?]रूपतादृशव्यापारवतामीश्वराधीनकृतिमताश्चास्मदादीनामकर्तृतापत्तेः। स्यादेतत्, प्राधान्येन धातुप्रत्ययान्यतराभिधीयमानव्यापारशालित्वं कर्तृत्वं[33] चेतनाचेतनसाधारणम्। न चैकस्मात् कार्यानुत्पत्तेस्तादृशो व्यापारः करणादेरपीति वाच्यम्, करणादेः साक्षादभिधीयमानव्यापारसम्बन्धविधुरत्वात्, किन्तु कर्तृत्वाधीन्येन[34], कर्तुश्च तदन्वयो न कारकान्तरगर्भः। 'पाचयती'त्यादौ च प्रयोजकस्यैव कर्तृत्वम्। न च [35]स्वव्यापारे सर्वेषां कर्तृत्वात् करणादि [? प्रयोज्यादि] व्यवहारविलोपः[36],

---

29. धानक्रिया० C. 30. छेद्य० om. C. 31. हि सकर्तृकतापत्तेः C. 32. ०मर्थोऽसिस्थिनद्भीतिC. 33. चत् न add. C. 34. कर्तृतैपश्चीन्येनA,C. 35-36. सव्यापारे सर्वे सत्यकर्तृत्वात् करणव्यवहारविलोपः A. Jānakīnātha may be appealing here to the well-known dictum of Grammarians: स्वव्यापारे हि कर्तृत्वं सर्वत्रैवास्ति कारके.

[37]तत्तद्धातूत्तरप्रत्ययाभिधीयमानव्यापारशालित्वं[38] [39]तत्तद्धातुकर्त्तृत्वमिति विवक्षणात्। ननु प्रत्ययाभिधीयमानव्यापारवति कर्मण्यतिव्याप्तिः, धात्वभिधीयमानफलान्यो व्यापारार्थ[40] इति [41]चेन्न, 'ज्ञायते घट' इत्यत्र विषयतया धात्वर्थान्वयिनि घटेऽतिव्याप्तेरेवमप्यवारणात्। तत्र संस्कार एवाख्यातार्थ इति चेत्[42], न, उपेक्षाज्ञानस्थले संस्काराभावेऽप्येवं प्रयोगात्। तत्र विषयत्वमाख्यातार्थः, स च ज्ञानफलमिति चेत्†,[न], चिरान्निरासात्। तथापि नाख्यातवाच्यः किन्तु लक्ष्य इति चेत्, तर्हि 'गच्छति-जानाती'त्यादौ चैत्रादेरकर्त्तृत्वप्रसङ्गः[43]। तत्राख्यातस्य[44] कृतिशक्तत्वात् धात्वर्थस्य च साक्षान्नामार्थानन्वयित्वात्[45] धात्वर्थान्वयबोधो[46] न भवति, कर्त्तरि[47] त्वन्वय [?] एव नास्तीति चेत्, तर्हि 'ज्ञायते घट' इत्यत्र घटादावतिव्याप्तिरशक्यपरिहारा। [48]आश्रयतया व्यापारशालित्वमिति[49] चेन्न, 'स्फुरति घट' इत्यादौ तदभावात्, ज्ञानमेव हि स्फुरणम्[50]। ज्ञानविषयत्वं तदिति चेन्न, तस्यापि ज्ञानानधिकत्वात्।

मैवम्, ज्ञानसमयोत्पत्ति(क)वस्त्वन्तरमेव हि स्फुरणम्, तच्च समवायिकारणानपेक्षमनुभवसिद्धं दुरपह्नवम्, सैव च विषयतेति शाब्दिकाः। तन्न, धातुत्वादेरनुगतस्य वक्तुमशक्यत्वात्[51], तदप्रतिसन्धानेऽपि कर्त्तृबुद्धिव्यपदेशात्, घटादौ[? पटादौ] कुविन्दादेरकर्त्तृतापाताच्च।

37-38. तदुत्तरान्यतराभिधीयमानव्यापारशालित्वं A. तत्वातुस्तद्वत्तरातराभि धीयमानव्यापारे शालित्वं C. 39. तत्त्वान्निरर्थकर्त्तृत्वमिवक्षणात् A, तद्वा अनुकर्त्तृत्वमिति विवक्षणात् C. 40. व्यापारात्म C. 41. चेतन C. 42. इति चेत् add. A. † After this, some portion has been left blank in A. The corresponding text, if any, is not found in C. 43. रथचैत्रादे० A स्थश्चैत्रामेव कर्त्तृत्वप्रसङ्गः C. 44. तवाध्यातस्य C. ०नामार्थात्वयित्वात् A. 46. धात्वर्थान्वयत्वञ्च A. 47. कर्त्तृन A. 48. स्वाश्रयतया C. 49. ०शालित्वयुक्तमिति C. 50. स्मरणम् C. 51. वक्तुमशक्य० C.

अन्ये तु—क्रियासमवायित्वं कर्त्तृत्वमाहुः। तन्न, क्रिया हि धात्वर्थरूपा वा स्पन्दो वा[52] कार्यमात्रं वा। नाद्यः, सर्वेषां कारकाणां धात्वर्थशालित्वात्। तत्क्रियाशाली तत्कर्त्तेति चेत्, तर्हि घटकर्त्ता न कुलालादिः स्यात्, न स्याच्च बुद्ध्यादिभिन्नकर्त्तृता[53] [54]चेतनस्य। अतएव न द्वितीयतृतीयौ।

साक्षात्क्रियाहेतुत्वं कर्त्तृत्वम्, 'घटो भवती'त्यादौ च घटो न कर्त्ता किन्त्वाश्रयमात्रम्—इत्यपरे। तदपि न, साक्षाद्धेतुत्वं हि निर्व्यापारत्वे सति हेतुत्वम्, न चैतत् सम्भवति, कारकविशेषो हि कर्त्ता, कारकञ्च व्यापारवत्कारणमिति [55]कुतो निर्व्यापारः स स्यात्[56]।

उच्यते। अनुकूलकृतिमत्त्वं कर्त्तृत्वम्, अचेतने च कर्त्तृव्यवहारो भाक्त एव। न तूपादानविषयकतादृशकृतिमत्त्वम्, गौरवात्, 'पचती'(त्यत्र) पाककर्त्तृत्वव्यवहारस्यासति बाधके गौणत्वस्यान्याय्यत्वाच्च। हन्तैवं [57]कथं 'मत्तो भूतं न तु मया कृतमि'ति[58] व्यवहार इति चेत्, निष्ठार्थस्य उद्देश्यरूपत्वात्, न ह्यनेन कर्त्तृत्वस्याभावो विषयीक्रियते, किन्तु निष्ठार्थस्य। न चैवं घटभोक्तरि[59] घटकर्त्तृव्यवहारप्रसङ्गः, [60]तत्कृतेरदृष्टहेतोः घटाननुकूलत्वात्, अदृष्टद्वारतावैलक्षण्येनानुकुलताया विवक्षितत्वाद्वा।

अन्ये तु—इच्छाकृतिसमवायित्वं कर्त्तृत्वम्; न चेच्छेति व्यर्थम्, 'मत्तो भूतं न तु मया कृतमि'ति व्यवहारार्थत्वात्—इत्याहुः। तन्न; नह्यत्र तृतीयेच्छाकृतिसमवायित्वपरा, मन्निष्ठेच्छाकृतिसमवायित्वधात्वर्थकृत्योरनन्वयात्; न[61] चेच्छाकृतिसमवायिमत्कृतिकर्मणेत्यर्थः, प्रत्ययार्थविशेष्यकस्वार्थबोधकत्वात्, प्रकृतेर्बाधाच्च[62]। कृतीच्छे

52. स्यंदो C. 53. ०कर्त्तृजाते A. 54. छलस्य A. 54-56. कुतोपिर्व्यापारस्य स्तमात् A, कुतो निर्व्यापारस्य स्यात् C. 57-58. कथमभूतं न मनुक्तमिति C. 59. घटतोक्तरि C. 60. प्रकृतेरदृष्ट० A. 61. स A. 62. प्रकृतेर्वाराच्च C.

तृतीयावाच्ये[63]इति चेन्न, तथापि धात्वर्थानन्वयात्। [64]तृतीयाधातुभ्यामेकैककृतिरुपनीयते, तत्र चेच्छाजन्यत्वं भासते[65], तथा च मदिच्छाजन्यकृति कर्मणेति वाक्यार्थ इति चेत्; किं कर्मत्वम्, साध्यत्वञ्चेद् बाधः, विषयकत्वमुद्देश्यकत्वं वा चेत्[66], कृतमिच्छाभिनिवेशेन।

अपरे तु—कृधातोः कृतिशक्तत्वात् [67]तृचश्चाश्रयपरत्वात् यौगिकत्वेन[68] कर्त्तृपदं कृत्याश्रयपरमिति तत्त्वमेव[69] लक्षणम्, 'घटस्य कर्त्ते'त्यादौ च षष्ठी अदृष्टाद्वारकमानुकूल्यमेव वोधयति व्युत्पत्तिवैचित्र्यादिति प्राहुः॥

विरोधो यथा—'इदं [70]गतिकर्म, [71]अद्रव्यत्वादि'त्यत्र। ननु किमिदं कर्मत्वम्, परसमवेतक्रियाजन्यफलशालित्वमिति चेत्; परत्वं प्रकृतफलाश्रयसामान्यभिन्नत्वञ्चेद्गमनकर्मण्यव्याप्तिः, गमनस्य तत्फलसंयोगव्यधिकरणत्वाभावात्; तत्प्रतियोगिकभेदमात्रञ्चेत् रथादेरपि तत्त्वापत्तिः। स्वभिन्नत्वं परत्वम्, स्वपदञ्च समभिव्याहृतविशेष्यपरम्, यद्वा तत्क्रियानधिकरणत्वे सति तत्क्रियाजन्यफलशालित्वं तत्कर्मत्वमित्यर्थ इति चेन्न, 'वृक्षात् [72]पतती'त्यत्र वृक्षस्य कर्मत्वापत्तेः। धात्वर्थतावच्छेदकफलशालित्वं [73]कर्मत्वमिति चेन्न, 'भूमौ पतती'त्यत्र भूम्यादेरपि[74] कर्मत्वापत्तेः, अधःसंयोगावच्छिन्ना हि क्रिया पतेरर्थः।

उच्यते। स्वभिन्नवृत्तिक्रियाजन्यफलशालित्वमेव कर्मत्वम्; न च 'वृक्षाद् भूमौ पतती'ति [? ०ती'त्यत्र] वृक्षभूम्योः पतनकर्मत्वापत्तिः, इष्टत्वात्; कथमन्यथा परे तत्रैव प्रयुञ्जते 'तरुं त्यजति भूमिं गच्छती'ति। पतियोगे द्वितीया किं न स्यादिति चेत्, धातुविशेषयोग एव तस्य साधुत्वात् प्रत्यायकत्वाच्च। कोऽसौ विशेष इति चेत्, यत्र

---

63. तृतीयावाक्ये A. 64. तृतीययोत्तराश्याम्० A. 65. भाषते C. 66. वाक्ये A. 67-68. त्वचन्याश्रयणवत्वात् यौगिवत्वेन A, भूवश्चाश्रयपरत्वात् यौगिकदेव C. 69. तन्न मेव C. 70. सति कर्म A. 71. अद्रव्यत्वात् C. 72. पचतीत्यत्र C. 73. कर्मत्वम्० om. A. 74. दूष्यादेवपि C.

द्वितीया बोधिकेत्यननुगत एवेत्यवेहि। अतएव यत्नवाचककरोतियोगे द्वितीया न [75]यततियोगे। 'घटं जानाती'त्यादौ च घटस्य ज्ञानजन्यज्ञानान्तरभावनादिकमादाय कर्मत्वम्, विशेषणतया ज्ञानादिशालित्वाद्विपयस्य, उपेक्षाज्ञाने[76] च विषयतायां द्वितीया[77] लाक्षणिकी।

वस्तुतस्तु—'घटं जानाती'त्यादौ घटविषयकज्ञानमात्रप्रतीतेर्द्वितीया लाक्षणिकी विषयतामात्रपरा। द्वितीयार्थश्च फलमेव, न कर्मत्वम्, क्रियादेरन्यलभ्यत्वात्, परत्वस्य चाप्रतीतेः, प्रतीतौ वा परमपि तदर्थः। तथा च 'मांसं पचती'त्यत्र मांसान्यावृत्तिमांसनिष्ठफलानुकूलपाकं करोतीत्यर्थः, भिन्नफलयोराधेयताऽनुकूलत्वाभ्यां पाकेऽन्वयात्। 'पच्यत ओदन' इत्यत्राश्रयभिन्नत्वमाश्रयभेदप्रतियोगित्वं वाप्याख्यातार्थः[78], तेन पाकाश्रयनिष्ठभेदप्रतियोगितज्जन्यफलाश्रय ओदन इत्यर्थः, एकस्य पाकस्य उभयत्रान्वयात्। फलबोधस्तु फलत्वेन [79]तत्तद्रूपेण वा यथानुभवमवसेयः।

अन्ये तु—धात्वर्थतावच्छेदकत्वेन[80] फलं विशेषयन्ति, तेन तद्धात्वर्थतावच्छेदकफलशाल्येव तद्धात्वर्थकर्म[81]; अतएव 'वृक्षात् पततीत्य'त्रवृक्षस्य न पत्धात्वर्थकर्मत्वम्, विभागेन पतत्यर्थानवच्छेदात्; भवति च तमादायैव [82]त्यज्यर्थकर्मता, विभागावच्छिन्नकर्मणस्त्यजिवाच्यत्वात्[83]; पतिस्तु विजातीयां क्रियामाह, न तु फलावच्छिन्नाम्, तथाऽनुपस्थितेः, अतो न भूम्यादेः कर्मता। 'घटं जानाती'त्यत्र च घटादौ द्वितीयाप्रयोगनिवन्धनः कर्मव्यवहारो भाक्त एव अतीतादाविव; न हि तत् कर्म, अकारकत्वात्; तत्र च द्वितीयार्थो न फलम्, धातोरेव तदुपस्थितेः, किन्त्वाश्रयतैव[84]। 'पच्यत' इत्यत्र चाख्यातार्थः फलमेव,

75. पतत्रियोगे C. 76. उपेक्षाजाने C. 77. द्वितीया om. A. 78. वादि तेत्यर्थः A, वा प्याथगतार्थं C. 79. तत्र क्रमेण C. 80. धात्वर्थतावच्छेदकं फलशालित्वं कर्मत्वं त्वेन A. 81. तत्त्वानुकर्म C. 82. त्यज्यनुकर्मता C. 83. ०कर्मणेस्त्यजि० C. 84. किन्त्वानुषतैव C.

नाश्रयत्वम्, फलस्यैक[? ०स्यैव] विशेषणतयाऽश्रयतायामनन्वयादित्याहुः। पतिरत्र व्यापारावच्छिन्नफलपरः, आख्यातार्थस्त्वाश्रयतैवेत्यपि वर्णयन्ति।

शूलपाणिः पुनराह—धात्वर्थतानवच्छेदकत्वे सति धात्वर्थतावच्छेदकपरसमवेतक्रियाफलशालित्वं कर्मत्वम्, [85]पतिस्त्वधःसंयोगावच्छिन्नां क्रिमामभिदधत् [86]अधःपदार्थं धात्वर्थावच्छेदकतया ब्रूते[87] इति न भूम्यादेः कर्मत्वम्। गमिस्तु नाश्रयविशिष्टसंयोगमाह किन्तु संयोगमात्रम्, शब्दशक्तिवैचित्र्यात्, अतो न ग्रामादेर्गमनाकर्मत्वम्। तदुक्तम्—

धातोरर्थान्तरे वृत्तेः [A]धात्वर्थेनोपसंग्रहात्।
प्रसिद्धेर[A]विवक्षातः कर्मणो[A]ऽकर्मिका क्रिया[A] ॥

[वाक्यपदीयम् ३।७।८८]

इति। अर्थान्तरे फलानवच्छिन्नशक्तिके। धात्वर्थेनोपसंग्रहादि'त्यत्रापि कर्मण इत्यर्थेति[88]। तन्न[89]। [90]न हि पतिरधःपदार्थावच्छिन्नसंयोगमुपस्थापयति; 'भूमावि'त्यादेरनवन्वयात्, 'अधः पतती'त्यत्राधःपदपौनरुक्त्यापातात्, गौरवाच्च। भूम्यादेरकर्मत्वान्न[91] [92]गौरवमास्थीयत इति[93] चेत्, तर्हि [94]लाघवाद्विजातीयकर्मण्येव शक्तिरास्थीयताम्, एवं ह्यनुभवोऽप्यनुरुद्धो भवति।

दिवाकरस्तु [95]जानात्यर्थोऽपि [96]संस्कारावच्छिन्नं ज्ञानम्, अतः 'कुम्भं जानाती'त्यत्र कुम्भादेः कर्मता—इत्याह। तन्न[97]। 'ज्ञानमि'-

---

85. पतिस्तु ध्वंसयोगा० A. 86. अथपदार्थं C. 87. कृत A.
A–A in A only. 88. इत्यर्थेऽपि A. 89. तत्वा A. 90. न हि om. C. 91. ०कर्मकार्थं C. 92-93. गौरत्वमास्थीय C. 94. लाघवाद्वितीयकर्मण्येव C. 95. ज्ञानात्यर्थोऽपि C. 96. संहारावच्छिन्नं C. 97. तत्त्व C.

त्यत्र च संस्काराप्रतीतेर्गौरवाच्च। यदि धात्वर्थतावच्छेदकं फलमेव कर्मत्वं हन्तैवं 'घटं करोती'त्यत्र निर्वर्त्यस्य[98] न संग्रह[99] इति चेत्, स्यादेव। न ह्यत्र द्वितीया कारके, घटस्य [100]कृत्यहेतुत्वात्, किन्तूत्पत्तौ लाक्षणिकी। [101]कुतः, 'घटोत्पत्त्यनुकूलकृतिमानि'ति प्रतीतेः। त्रिविधविभागस्तु[102] मुख्यगौणसाधारणकर्मणः धात्वर्थान्वितद्वितीयाविशेषणस्य, न तु मुख्यस्य, कारकत्वानुपपत्तेः।

वर्द्धमानः पुनराह—करोतिरुत्पत्त्यवच्छिन्नं यत्नमाह, अतएव यत्र कृतिमात्रं तत्र न द्वितीया, यथा—'अत्र यतत' इति, अतएव कृतक्रियमाणघटयोः 'ईश्वर ईदानीं न करोती'ति न प्रयोग इत्याह। तन्न। [104]कृतिपदाद् यत्नमात्रप्रतीतेर्गौरवाच्च।

तच्च[105] कर्म त्रिविधम्—निर्वर्त्यं विकार्यं प्राप्यञ्च। तत्र तादृशद्रव्यरूपफलशालित्वं निर्वर्त्यत्वम्, यथा—'काशं कटङ्करोती'ति, काशफलकटयोरभेदेनान्वयात्, कटपदे वाऽवयवलक्षणा। न्यायसम्प्रदायस्तु[106] 'घटङ्करोती'त्यत्र घटादेर्निर्वर्त्यकर्मत्वम्, घटपदस्य तदुपादाने लाक्षणिकत्वात्, निरूढा चेयं लक्षणेति, 'न कपालं करोती'ति द्वितीयया धातोः[107] फलबोध इति मेने। विकार्यत्वञ्च तादृशरूपान्तरत्वम्, यथा 'काष्ठं दहति'। स्वधर्मनाशकतादृशफलशालि विकार्यमित्यप्याहुः।[108] अन्यत् प्राप्यम्, यथा 'ग्रामं गच्छती'ति, संस्कार्यमपि प्राप्यभेद एव, यथा—'व्रीहीन्[109]प्रोक्षती'ति॥

स्वरूपासिद्धिर्यथा—'मनः साक्षात्कारकरणम्, विभुत्वात्, श्रोत्रवदि'त्यत्र। ननु किं करणत्वम्; न व्यापारवत्कारणत्वम्, सर्वकारकसाधारण्यात्। नापि कारकान्तराचरितार्थत्वे सति हेतुत्वम्, तदचरि-

98. निर्वाच्यस्य C. 99. संशय A. 100. हेतुत्वा A. 101. इतो घटोत्पन्॰ C. 102. ॰बिरागस्तु A. 103. ॰द्वितीयानुविशेषणस्य C. 104. कृतिपदार्थमात्र॰ C. 105. तच्च om. C. 106. ॰सम्प्रदानस्तु C. 107. धातोः om. C. 108. ॰मित्याहुः C. 109. जीर्हीहीन C.

तार्थत्वं हि न[110] तदजनकत्वम्, अन्तरपदवैयर्थ्यात्। शक्यतावच्छेदकमिदम्, न च तत्र व्यर्थविशेषणता दोषाय, गौरवञ्च प्रामाणिकं न दोषाय, प्रमाणञ्च तद्रूपेणोपस्थितिरेवेति चेन्न, असिद्धेः[111]। अन्तरान्तं[112] न देयमेवेति चेन्न, दण्डादेः घटाद्यकरणतापत्तेः, कारकात्मककपालजनकत्वात्[113]। नापि तद्व्यापारजनकत्वम्, चक्षुषः स्वभिन्नघटरूप[? ०रूपे] व्यापारजनकत्वेन चाक्षुषं प्रत्यहेतुतापातात्। नापि [114]तद्व्यापाराजनकव्यापारकत्वम्, चरमव्यापारस्य सर्वीयत्वेन† सर्वकारकसाधारण्यात्। तस्य करणत्वमनेन[115] रूपेणेष्टमेवेति चेत्तर्ह्यन्तरान्तवैयर्थ्यम्।

अत्रोच्यते। फलाव्यभिचारिव्यापारकत्वं करणत्वम्[116], [117]अव्यभिचारित्वञ्च फलोपधानम्; निर्व्यापारत्वं वा; कर्त्रादेरप्यनेन रूपेण करणत्वमिष्टमेव[118], अतएव 'आत्मानमात्मना वेत्सी'ति तृतीया, अतएव 'विवक्षातः कारकविभक्तयो नानाविधा भवन्ती'ति शाब्दिकाः। विस्तरस्तु प्रथमसूत्रवार्त्तिकादाववसेयः॥

व्याप्यत्वासिद्धिर्यथा—'घटः[119] सम्प्रदानम्, नित्यद्रव्यत्वादित्य'त्र। सम्प्रदानत्वन्तु[120] न[121] ददातिकर्मसम्बन्धितयेष्यमाणत्वम्[122], [123]'एतद्देयेन संयुक्ता स्याद् भूरियमि'[124]तीच्छाविषयभूमावतिव्याप्तेः[125]; नापि स्वकर्त्तृकदानकर्मसम्बन्धितया स्वेष्टत्वम्[126] 'मया

---

110. न om. A. 111. असिद्धेः om. A. 112. अन्तरेति C. 113. ०कपाले जनकत्वात् A. 114. तद्-व्यापारजनक० A. † From this place, the text is found in C from fol. 165a onwards. 115. करणद्वयनेन C. 116. करणत्वम् om. A. 117. स्वव्यभिचारि० A. 118. करणत्वमभिमतमेव C. which is equally acceptable. 119. अचेतनसम्प्रदानम् C. 120. सम्प्रदानन्तु A. 121. न तु A. 122. ०तयेश्यमानत्वम् A. 123-124. एतद्वयेन ··· भूरयम्० A, एतद्वयेन संयुक्तस्यात्वविषयम्० C. 125. ०विषयत्वमवितिव्याप्तेः C. 126. ०सम्बन्धितयायेत्युक्तं A.

चैत्राय दीयमानसंयुक्तं मैत्रचक्षुः स्यादि'त्यत्र चक्षुषः सम्प्रदानापत्तेः नापि त्यागजन्यस्वत्वभागित्वम्, पशुफलकयागे कर्त्तुः सम्प्रदानापत्तेः; किन्तु स्वाश्रयविषयकत्यागजन्यस्वत्वस्य प्रतियोगित्वम्; अतएव देवताया अचैतन्ये तत्र चतुर्थी गौणीति स्वीकुर्वन्ति। दानस्य स्वत्वहेतुत्वे मानं नास्ति (इति चेत्); न नास्ति, तस्मै त्यक्ते 'तस्येदं न ममे'ति प्रतीतेः, [127]'स्वामित्वजनकस्त्यागो दानमि'ति महाजनव्यवहाराच्च। अतएव

"विदेशस्थं[128] पात्रमुद्दिश्य त्यक्ते तत्स्वीकारमन्तरेणोद्देश्ये मृते तत्पुत्रेण तद्धनं विभज्य ग्राह्यम्" [ ]

इति स्मरन्ति। नन्वेवं प्रतिग्रहो वैयर्थ्यमासादयेत्; अदृष्टार्थः प्रतिग्रहो न स्वत्वार्थ इति चेन्न,

"प्रतिग्रहेण धनमर्जयेत्" [ ]

इति विरोधादिति चेन्मैवम्, वैधत्यागविशेषफलं[129] प्रतीव स्वत्वं[130] प्रति प्रतिग्रहस्य सहकारित्वात्, चतुर्थीच स्वत्वत्वेन समभिव्याहृतददात्यर्थकर्मगतं[131] स्वत्वमाह। 'ब्राह्मणाय[132]दद्यादि'त्यत्र 'ब्राह्मणस्वत्वहेतुदानं कुर्यादि'त्यर्थः; 'ब्राह्मणाय हिरण्यं दद्यादि'त्यत्र द्वितीयार्थोऽपि [A]स्वत्वमिति 'ब्राह्मण[A]स्वत्वहेतुहिरण्यगतस्वत्वानुकूलं दानं कुर्यादि'त्यर्थः; द्वितीयाचतुर्थीभ्यामेकमेव स्वत्वं बोध्यते व्युत्पत्तिवैचित्र्यात्, एकस्मिन् स्वत्वे[133] प्रतियोगितया स्वाश्रयतया[134] च ब्राह्मणहिरण्ययोरन्वये 'ब्राह्मणीयहिरण्यगतस्वत्वानुकूलं दानं कुर्यादि'त्यर्थः।

न्यायभास्करकृतस्तु—क्रियया सम्बन्धीकर्त्तुमिष्टं सम्प्रदानम्, तथैवानुशासनात्[135], न तु ददातिकर्मणेति, तथाऽश्रुतेः; एवञ्च 'रजकाय

127. स्वसिद्धजनक C. 128. विदेशस्थं om. A. 129. ०विशेषे फलं A. 130. प्रतीत्वं A. 131. ०ददात्यन्तकर्मगतं C. 132. सद्यादित्यत्र C. A—A in A only. 133. एकस्मिन्नासत्वे A, एकस्मिन्नसत्त्वे C. 134. आश्रयतया A. 135. cf. अष्टाध्यायी १।४।३२ (कर्मणा यमभिप्रैति स सम्प्रदानम्).

वस्त्रं ददाती'त्यपि स्यादेव, 'रजकस्य वस्त्रं ददाती'ति तु सम्बन्धविवक्षया षष्ठी ; अतएव 'वृक्षायोदकमासिञ्चति', 'मित्राय दूतं प्रेषयति', [136]शत्रवेऽस्त्रं मुञ्चती'त्यादयः प्रयोगा इत्याहुः[137] । तच्चिन्त्यम् ॥

प्रकरणसमं यथा—'अयमपादानं द्रव्यत्वादि'त्यत्र 'नेदं तथा विभागविधुरत्वादि'ति । अपादानत्वञ्च तत्कर्मानधिकरणत्ये सति तत्कर्मजन्यविभागाश्रयत्वम् । नन्वेवं 'वृक्षं त्यजती'त्यत्र वृक्षोऽप्यपादानं स्यादिति चेत्, स्यादेव । तर्हि पञ्चमी स्यादिति चेत्, न स्यात् । न हि विभागमात्रं पञ्चमी ब्रूते[138], किन्तु धात्वर्थ(त)ानवच्छेदकं तत्[139]; प्रकृते च त्यजेर्विभागोपहितकर्मवाचित्वाद् धात्वर्थतावच्छेदक एव विभागः ; पतिस्तु न विभागावच्छिन्नं कर्माह, किन्तु विजातीयम् ; एतेन 'ग्रामादागता' इत्यादयो व्याख्याताः । यद्वा—परत्वाद् द्वितीयैवेह साध्वी[140], बाधात्तु विशेषयोगे पञ्चमी ।

अन्ये तु—[141]धात्वर्थतावच्छेदकविभागशालित्वमपादानत्वमाहुः । कथमपादानस्य[142] कारकत्वम् ? पतिं प्रति न कथञ्चित्[143] । [144]कं प्रति तर्हि[145] ? विभागं प्रति[146] । कस्तत्र व्यापार इति चेत्, संयोग एवेत्यवेहि[147] । पञ्चम्यर्थस्तु विभागमात्रं, न तु विशिष्टम्, परत्वञ्च द्वितीयावत् । विभागावधित्वमपादानत्वमित्यप्याहुः ॥

बाधो यथा—'जलं वह्न्यधिकरणम्, रूपादि'त्यत्र । अधिकरणत्वन्तु न धर्मधर्मिसम्बन्धः, धर्माधेयस्यापि धर्माधारतापत्तेः[148] । नापि स्वधर्मसम्बन्धः ; स्वधर्मत्वं हि[149] न[150] स्वनिष्ठाधारताप्रतियोगिकाधेय-

---

136-137. सत्रावस्त्रं स्वंचतीत्याहूयः प्रयोगा इत्युक्तम् C. 138. पञ्चमीश्रुतेः A. 139. तत् om. C. 140. ०द्वितीयैवह असाध्वी A, ०द्वितीयैरेक असाध्वी C. 141. धात्वर्थतानवच्छेदक० C. 142. कथमपी ज्ञानस्य A. 143. कथात्वात् A. 144-145. कस्यचित् तर्हि A. 146. शुक्ति A. 147. एवेत्येवेति A. 148. धर्माधेयतापत्तेः A. 149. न in place of हि in A. 150. नु A.

ताश्रयत्वम्, अन्योऽन्याश्रयात्; [151]आधेयत्वं तदिति चेन्न, तस्यानतिरेकात्; स्वरूपविशेष आधेयत्वम्, तत्प्रतियोगित्वमाधारत्वमिति चेत्; आधारत्वं स्वरूपविशेषस्तत्प्रतियोगित्वमाधेयत्वमित्येव किं न स्यात्; अस्त्वेवमिति चेत्, न, अननुगमात्[152]; न चानुगताकारा[153] प्रतीतिरनुगतविषयमन्तरेणोपपद्यते।

उच्यते। अनुगतप्रतीतेरधिकरणत्वं नाम पदार्थान्तरम्; तच्च नैकम्, सर्वस्य सर्वाधारतापत्तेः; किन्तु नाना, अनुगतप्रतीतिस्तु रूपादाविव जातिकृता। एतेन विषयतादयो व्याख्याताः, कर्मत्वादिकमपि सत्यामनुगतप्रतीतौ तथैव।

शिवादित्यमिश्रास्तु करणत्वादिकमखण्डोपाधिरूपमङ्गीचक्रुः। तन्न, सर्वस्य ^C^करणस्य सर्वकरण^C^तापत्तेः ॥ २४ ॥

(॥ इति कथकान्योक्तिनिरूप्यनिग्रहस्थानद्वयप्रकरणम् ॥)

सोऽयं सर्वस्य[154] तत्त्वस्य [155]व्यवस्थाकल्पपादपः।
न्यायः[156] प्रतिपदं पुष्पैः पर्यपूरि मदर्जितैः ॥ १ ॥[157]
^A^सेतुं न्यायाम्बुराशेर्निजनयनगरीधूमकेतुं परेषां
हेतुं कीर्त्तिप्रथाया भुवनविजयिनीं शक्तिमुत्सिक्तबुद्धेः।
हित्वा मात्सर्यचर्यां ध्वनिमणिमनिशं मण्डनीकर्त्तुकामाः
श्रीभट्टाचार्यचूडामणिभणितमिदं सूरिणो भावयध्वम् ॥ २ ॥

॥ इति महामहोपाध्यायश्रीभट्टाचार्यचूडामणिजानकीनाथविरचित-
मान्वीक्षिकीतत्त्वविवरणं समाप्तम् ॥^A^

---

151. स्वाधेयत्वं C. 152. च add. A. 153. चासनुगता० A C—C legible in C only. The corresponding portion in A is smudged. 154. वस्य C. 155. व्यव कल्प० C. 156. न्यास: C. 157. इत्यान्विक्षिकीविवरणं समाप्तम्। सप्तदशशतीसंख्या श्लोकानामिह दृश्यते पञ्चमाध्यायविधृतौ ॥ शुभमस्तु ॥ मङ्गलञ्चास्तु ॥ श्रीरस्तु ॥ add. C. A—A in A only. The verse सेतुं etc. occurs in C at the very beginning of Chapter V. After this, A has the postcolophon श्रीकृष्णाय नमः।

TEXTUAL NOTES

[P stands for page of this text, and l for line on that page]

1) P. 1, l. 13—P, 2, l. 3—Vācaspati Miśra II also makes a similar remark in his *Nyātattvāloka* :

(*a*) तत्राविगीतालौकिकशिष्टाचारानुमितश्रुतिबोधितकर्त्तव्यताकमपि प्रारिप्सितसमाप्तावुभयप्रत्यूहपरिपन्थिमङ्गलं स्वतःसिद्धवैधुर्याद् भगवता न व्यधायि, वैयर्थ्यात्, विहितमपि वा न न्यवन्धि, न ह्युपनिबन्धोऽपि तत्र तन्त्रमिति, तत एव । [NTĀ, I. O. L. Mss, fol. 2a.]

(*b*) Viśvanātha Pañcānana also raises this problem in his *Nyāyasūtravṛtti*, though he suggests a different solution :

अत्र केचित्—सूत्रादौ मङ्गलाकरणेन मङ्गलं न प्रामाणिकमित्यत्र सूत्रकृतां तात्पर्यं वर्णयन्ति, तदसत्, कृतस्याप्यनिबन्धनसम्भवात्, विघ्नाभावनिर्णयेनाऽकरणसम्भवाच्च ।

वयं तु—'प्रमाणं प्राणनिलयः' (विष्णुसहस्रनाम ११८)—इति भगवन्नामगणान्तःपातिप्रमाणशब्दस्योच्चारणमेव मङ्गलमिति ब्रूमः । [NSV. pp. 60-61.]

(2) P. 2, ll. 7-19 : (*a*) The relevant *Bhāṣya* passage is as follows :

निर्देशे यथावचनं विग्रहः । चार्थे द्वन्द्वसमासः । [NB, p. 29.]

(*b*) Uddyotakara explains this passage in his *Nyāyavārttika* thus :

सर्वपदार्थप्रधानः समासो द्वन्द्व इति किमुक्तं भवति ? सर्व एते प्रमाणादयो विज्ञेया इति । अन्यथा हि समासान्तरपरिग्रहाद्विशेषणत्वेनोपयुक्तानां प्रमेयादीनामविज्ञेयता स्यात् । यथावचनं विग्रहः । यदेव निर्देशे वचनभेदोपादाने प्रयोजनं तदिहापि द्रष्टव्यम् । [NV, p 29.]

(*c*) Vācaspati Miśra I, while explaining the words यथावचनं विग्रहः, observes in his *Nyāyavārttikatātparyaṭīkā* :

यथावचनमिति। अन्योऽन्यनिरपेक्षाणां प्रत्येकं प्रमाहेतुभावः प्रमाणानामिति हि बहुवचनप्रयोजनम्। प्रमेयेषु तु यद्यपि प्रमेयता वास्तवी प्रत्येकमस्ति तथाऽप्यपवर्गहेतुभावेन प्रमेयता समुदाये समाप्यते. न तु प्रत्येकम् आत्मादीनामन्यतमस्याप्यतत्त्वज्ञाने संसारनिवृत्तिरिति हि निर्देशे वचनभेदस्य प्रयोजनम्, तदेव चोद्देशेऽपि, तयोरेकवाक्यत्वादिति भावः। [NVTT, pp. 29-30.]

(*d*) Vācaspati Miśra II, while endorsing the view of Vātsyayana in his *Nyāyatattvāloka,* notes *en passant* the dissenting view found in *Nyāyabhāskara*. His remars are as follows :

अत्र च सर्वपदार्थप्राधान्यप्रतिपादनाय द्वन्द्वः समासः, इतरथा तदप्राप्तेः। "निर्देशे यथावचनं विग्रहः" इति भाष्यम्। अस्यार्थः— निर्देशे विभागसूत्रादौ यदेव वचनभेदोपादानप्रयोजकं प्रमाणादौ परस्पर-नैरपेक्ष्यादि तदेवात्रापि द्रष्टव्यम्।……छलादिषु फलसाधनत्वमेकैक-स्यैवेत्येकवचनमिति भास्करः। [NTĀ, I.O.L. Mss, fol. 10b]

(*e*) Keśava Miśra Tarkācārya offers the following observation in his *Gautamīyasūtraprakāśa* :

अत्र निर्देशे सर्वपदार्थप्रधानो द्वन्द्वसमासः। यदेवाग्रे तन्निर्देशे वचनभेदोपादाने प्रयोजनं तदेवात्रापि द्रष्टव्यम्। तथा हि प्रमाणानि च प्रमेयं च संशयाश्च प्रयोजनं च दृष्टान्तौ च सिद्धान्ताश्च अवयवाश्च तर्कश्च निर्णयश्च वादश्च जल्पश्च वितण्डा च हेत्वाभासाश्च छलानि च जातयश्च निग्रहस्थानानि चेत्येवं तत्र तत्र च वक्ष्यामः। अत्र प्रमाणादीनां तत्त्वमित्यन्वयः। तत्त्वस्य नित्यसापेक्षत्वात् नासमर्थसमासः। न चाधिगमपदाधिक्यम्, निःश्रेयसे सति पटादिवत् न तत् प्राप्त्यर्थं यत्नान्तरापेक्षेति तात्पर्यकत्वात्।……यो यद्धर्मः स तस्य तत्त्वम्,

न च तत्प्रमाणाद्यभिन्नमेवेति कथं भेदगर्भा षष्ठी [इति वाच्यम्], उपाधिभेदावधारणाय षष्ठ्याः साधुत्वात्। सम्बन्धमात्रे षष्ठी, स च प्रमेयादावभेदेऽपि—इति कश्चित्। [GSP, p. 2.]

In this passage, Keśava Miśra Tarkācārya has dealt with some grammatical points that have not been raised by Rāmabhadra.

(*f*) Viśvanātha Pañcānana has elaborately discussed this issue in his *Nyāyasūtravṛtti.* His comments are as follows :

अत्र च सर्वपदार्थप्रधानो द्वन्द्वः समासः। यद्यपि भेदे द्वन्द्वविधानादत्र च बहूनां पदार्थानामभेदान्न द्वन्द्वसम्भवः, तथापि पदार्थतावच्छेदकभेदादेव द्वन्द्व इति न दोष इत्यन्य विस्तरः।

तत्र च 'निर्देशे यथावचनं विग्रहः' इति यथाश्रुतभाष्यानुसारिणः—प्रमाणानि च प्रमेयञ्च संशयश्च प्रयोजनञ्च दृष्टान्तञ्च सिद्धान्तश्च अवयवाश्च तर्कश्च निर्णयश्च वादश्च जल्पश्च वितण्डा च हेत्वाभासाश्च छलं च जातयश्च निग्रहस्थानानि चेति विग्रहं वर्णयन्ति।

सम्प्रदायविदस्तु—भाष्यस्थवचनपदेन क्वचित् सौत्रं क्वचिदार्थं च वचनं गृह्यते। तत्र प्रमाणे प्रमेये च सौत्रं वचनं गृह्यते, सप्रयोजनत्वात्, तच्च वक्ष्यते। न तु दृष्टान्तादावेकवचनं सप्रयोजनम्, तथा च दृष्टान्ते द्विवचनम्, अन्वयिव्यतिरेकिभेदेन दृष्टान्तद्वैविध्यस्य वक्ष्यमाणत्वात्। संशये सिद्धान्ते छले च बहुवचनम्, संशये छले च त्रैविध्यस्य, सिद्धान्ते चातुर्विध्यस्य वक्ष्यमाणत्वात्, अन्यथा जातिनिग्रहस्थानयोर्बहुवचनं तत्रापि व्याहन्येत, एकवचनस्यैव लक्षणसूत्रे सत्त्वादिति वदन्ति।

नव्यास्तु—सर्वत्र प्रथमस्थितैकवचनेनैव विग्रहः। न ह्यत्र बहुवचनेनैव प्रमाणादीनां चतुष्ट्वं परिच्छिद्यते, किन्त्वग्रिमविभागेन, न ह्येकद्वित्रिधवखदिरादौ 'धवश्च खदिरश्च पलाशश्चे'ति न विगृह्यते। अत एव

प्रयोजनस्यैकवचनान्तत्वे तद्विभागाकरणेऽपि सुखदुःखाभावतत्साधन-भेदेन तस्य बहुत्वं न विरुध्यत इति प्राहुः ।

अत्र च निःश्रेयसे सिद्धे पटादिवत् तत्प्राप्तये न प्रयत्नान्तरमपेक्षित-मिति प्रतिपादनायाधिगमपदम् । [NSV, pp. 31-32.]

From this passage, it seems that Viśvanātha indirectly criticizes the solution that is accepted by commentators like Rāmabhadra and Keśava. He, however, shares with Keśava the view that *dvandva* compound between *pramāṇa*, *prameya* etc. is possible even though some of them can be included in the rest of them. His justification of the term *adhigama* also agrees with that of Keśava.

(*g*) It seems that Rādhāmohana Gosvāmi Bhāttacārya, the author of *Nyāyasūtravivaraṇa*, disagrees with Viśvanātha, since he mentions Viśvanātha's view in a cursory and casual manner :

केचित्तु प्रथमोपस्थितत्वादेकवचनेनैव प्रमाणं च प्रमेयं चेति विग्रह-माचरन्ति । [NSVV, p. 4.]

(3) P. 3, Il. 1-5 : This view of Rāmabhadra seems to have been criticised by Viśvanātha in the following passage :

अत्र च प्रमेयान्तःपातिबुद्धिरूपस्यापि संशयादेः, निरनुयोज्यानुयोग-रूपनिग्रहस्थानान्तःपातिनोश्छलजात्योश्च प्रकारभेदेन प्रतिपादनं शिष्य-बुद्धिवैशद्यार्थमस्तु, निग्रहस्थानान्तःपातिनां हेत्वाभासानां पृथगभिधान-प्रयोजनं तु जानाति भगवानक्षपाद एव । [NSV, p. 4.]

(4) P. 3, Il. 5-7 : (*a*) It seems that Rāmabhadra is refuting the view of Vātsyāyana, whose comments on this issue are as follows :

तत्र नानुपलब्धे न निर्णीतेऽर्थे न्यायः प्रवर्त्तते, किं तर्हि ? संशयि-तेऽर्थे । यथोक्तं—विमृश्य पक्षप्रतिपक्षाभ्यामर्थावधारणं निर्णयः (न्या. सू. १।१।४१) इति । विमर्शः संशयः । पक्षप्रतिपक्षौ

न्यायप्रवृत्तिः। अर्थावधारणं निर्णयस्तत्त्वज्ञानमिति। स च 'अयं किंस्विदि'ति वस्तुविमर्शमात्रमनवधारणं ज्ञानं संशयः, प्रमेयेऽन्तर्भवन्नेवमर्थं पृथगुच्यते। [NB, p. 35.]

(*b*) The comments of Vācaspati Miśra II, on this issue are also worth noting :

न च संशयादीनां प्रमाणप्रमेययोर्यथायथमन्तर्भावात् पृथगुद्देशो व्यर्थः, मननद्वारा ह्यान्वीक्षिक्या निश्श्रेयसोपगमात्, तच्च न 'कथमेतदि'त्यश्रद्धामलक्षालनम्विना, तच्च न संशयाद्युपकरणकन्यायानुसन्धानं विनेति तेन तेन रूपेण संशयादिप्रतिपादनात्। न च संशयो न न्यायाङ्गम्, असंशयिते श्रुतेप्यात्मनि मननविधानादिति वाच्यम्, अनुमितिमात्राहेतुत्वेऽपि जिज्ञासितार्थानुमित्तौ जिज्ञासाजननद्वारा तदुपयोगात्।

[NTĀ, I.O.L. Mss, fol. 13b]

(*c*) Keśava Miśra Tarkācārya has copied almost verbatim from this passage of NTĀ without acknowledging the source :

ननु संशयादीनां प्रमाणप्रमेययोर्यथायथमन्तर्भावात् पृथगुद्देशो व्यर्थः? नैवम्, मननद्वारा हि आन्वीक्षिक्या निःश्रेयसोपयोगः। स च न कथमेतदित्यश्रद्धामलक्षालनं विना। तच्च न संशयाद्युपकरणं न्यायानुसन्धानं विनेति तेन तेन रूपेण संशयादिप्रतिपादनात्। ननु संशयः कथं न्यायाङ्गम्? उच्यते—संशयस्यानुमितिमात्राहेतुत्वेऽपि जिज्ञासितार्थानुमितौ जिज्ञासाद्वारा हेतुत्वम्। एकवक्तृकविचाराङ्गमित्यन्ये। शङ्कुकतानिवृत्तये न्यायोपासनाङ्गमित्येके। [GSP, p. 3]

(5) P. 3, ll. 7-9 : Rāmabhadra's interpretation of the word 'tattvajñāna' goes against the interpretation provided by Vātsyāyana, whose comments are as follows :

प्रमाणादीनां तत्त्वमिति शैषिकी षष्ठी। तत्त्वस्य ज्ञानं निःश्रेयसस्याधिगम इति कर्मणि षष्ठ्यौ। [NB, pp. 29-31]

(6) P. 3, II. 11-15 : Here, Rāmabhadra seems to criticise the view of Vācaspati Miśra II, whose explanation of the word तत्त्वज्ञानात् happens to be :

अत्र तत्त्वं ज्ञायतेऽनेनेति व्युत्पत्त्या तत्त्वज्ञानं शास्त्रम्, पञ्चम्या च तस्य हेतुतोच्यते, करणव्युत्पत्तिबलाज्जन्यतयोपस्थितस्य तत्त्वज्ञानस्य व्यापारताऽपि लभ्यत इति शास्त्रस्य प्रमाणादिपदार्थतत्त्वज्ञानद्वारा निःश्रेयसहेतुता प्रेक्षावत्प्रवृत्त्यर्थं दर्शिता ।

[NTĀ, I.O.L. Mss, fol. 5b]

(7) P. 3, l. 15- P. 4, l. 1 : These lines follow the *Nyāya-vārttika* of Uddyotakara. The relevant passage is :

शास्त्रं पुनः प्रमाणादिवाचकपदसमूहो व्यूहविशिष्टः, पदं पुनर्वर्ण-समूहः; पदसमूहः सूत्रं, सूत्रसमूहः प्रकरणं, प्रकरणसमूह आह्निकम्, आह्निकसमूहोऽध्यायः, पञ्चाध्यायी शास्त्रम् । [NV, p. 4]

(8) P. 5, II. 9-10 : (*a*) A similar comment is found in *Nyāya-tātparyadīpikā* of Bhaṭṭa Vāgīśvara :

उत्तरोत्तरापाये इति पाठापेक्षया । [NTD; p. 2]

(*b*) Viśvanātha's remark on this point runs thus :

दुःखादीनां मध्ये यदुत्तरोत्तरम्, तेषामपाये तदनन्तरस्य तत्-सन्निहितस्य पूर्वपूर्वस्यापायादपवर्गः । [NSV, p. 70]

(9) P. 5, II. 17-18 : (*a*) A similar remark is found in Viśva-nātha's commentary :

प्रयोजकत्वं प्रयोज्यत्वं वा पञ्चम्यर्थः । 'दण्डाभावाद् घटाभाव' इतिवत् स्वरूपसम्बन्धविशेष एव तत् । [NSV, pp. 70-71]

(*b*) Rādhāmohana anticipates an objection against this view in his *Nyāyasūtravivaraṇa* and solves it as follows :

अथ दुःखभावप्रयोज्यत्वं नापवर्गे, तस्य चरमदुःखध्वंसरूपत्वात् । न चाभेद एव पञ्चम्यर्थ इति वाच्यम्, जन्मापायप्रयोज्यस्य दुःखात्यन्ता-भावस्य चरमदुःखध्वंसात्मकमोक्षभेदात्, न हि जन्मापायप्रयोज्यो दुःख-

ध्वंस इति चेत्। न। तदनन्तरकालदुःखविरहस्य स्वसमानाधिकरण-स्वसमानकालीनत्वोभयसम्बन्धेन दुःखवदन्यत्ववैशिष्ट्यप्रयोजकतया तादृशविशिष्टदुःखध्वंसरूपमोक्षं प्रत्यपि तस्य प्रयोजकता। [NSVV. p.7]

(10) P. 7, Il. 6- P. 8, l. 4: This has been borrowed from the following passage of *Nyāyavārttikatātparyaṭīkā* by Vācaspati Misra I:

अत्र केचिद् योगविभागमिच्छन्ति। कारणोच्छेदात् कार्योच्छेदोऽभिमतः, न चासौ दुःखादीनां मिथ्याज्ञानान्तानामदर्शिते कार्यकारणभावे सिध्यति, तस्माद् 'दुःखजन्मप्रवृत्तिदोषमिथ्याज्ञानानामि'त्येको योगः। अत्र किल समासादेषामितरेतरयोगोऽवगम्यते, स च योग्यतया कार्यमिति। अतः सिद्धे कार्यकारणभावे 'उत्तरोत्तरापाये तदनन्तरापायादपवर्गः' इत्यनेन योगेन कारणोच्छेदक्रमेण कार्योच्छेदक्रमप्रतिपादनेनापवर्गः प्रतिपाद्यते। अत्र चोत्तरत्वं पाठापेक्षया कारणस्य, तदनन्तरत्वं च कार्यस्याव्यवहितादिपाठापेक्षया। मिथ्याज्ञाने कारणे तत्कार्या दोषाः। एवं शेषेष्वपि योज्यम्।

तमेतं सूत्रविभागममृष्यमाणो वार्त्तिककृदाह—इदं सूत्रम्। एकवचनेन भेदं व्यावर्तयति। न हि समुच्छेदक्रमप्रतिपादनेनापवर्गपरतयैकवाक्यत्वे सम्भवति वाक्यभेदो न्याय्यः। एकनिवृत्त्या अन्यनिवृत्त्यैव कार्यकारणभाव आक्षिप्त इति नासौ सूत्रकारेण दर्शनीयः, न ह्यर्थाक्षिप्तं सूत्रकारा दर्शयन्ति।.........[NVTT, pp. 69-70]

The two verses quoted here by Rāmabhadra are also found in NVTT.

Nyāyatattvāloka of Vacaspati Miśra II has also raised this issue. [See NTĀ, I.O.L. Mss, fol. 21b.]

(11) P. 8, Il. 8-11. This seems to have been borrowed from Vācaspati Miśra II, whose remarks are as follows:

अत्र च प्रमाणपदाद् योगतः प्रमाकरणत्वरूपसामान्यलक्षणलाभः,

अतएव चाविभक्तप्रतीकाल्लक्ष्यलाभः, आवृत्त्या वा अन्यतरलाभः, सामान्योपस्थितौ विशेषविधेस्तत्सामान्यस्य तावद्विशेषपदत्वव्युत्पत्तेः, न्यूनाधिकसंख्याऽव्यवच्छेदो विभागवचनफलम्।

[NTĀ, I.O.L. Mss. fol. 25a].

(12) P. 9, ll. 4-5. This has been borrowed from *Nyāyavārttikatātparyaṭīkā* of Vācaspati Miśra I, who comments as follows :

अत्र च 'यत' इत्यध्याहृत्य यत्तदोर्नित्याभिसम्बन्धात् तत्प्रत्यक्षमिति प्रमाणवाचि प्रत्यक्षपदं योजनीयम्। एवं च ज्ञानप्रामाण्यमतेऽपि यत्तद्विशेष्यज्ञानप्रत्यक्षफलं लिङ्गपरामर्शो वा तदपीन्द्रियार्थसन्निकर्षोत्पन्नत्वाद्युपेतत्वेन भवति प्रमाणविशेषणमिति नाव्यापकत्वं लक्षणस्येति। [NVTT, p. 94]

(13) P. 9, ll. 5-7. Here, too, Rāmabhadra accepts this view of Vācaspati Miśra I, who maintains that the terms अव्यपदेश्यम् and व्यवसायात्मकम् are not constituent terms in the definition of प्रत्यक्ष—

(*a*) तदेवमर्थज्ञानकाले न समाख्याशब्दो व्याप्रियते, प्रतीयमानतया व्यवहारकाले परप्रत्यायनकाले तु व्याप्रियते कारणतया, तदनेन गोपालाविपालादीनां संज्ञानिवेशनं तासु व्यक्तिषु व्यवहारोत्कर्षहेतुः नार्थोत्कर्षहेतुरित्यपि सूचितं भवति। तस्मादविकल्पकप्रत्यक्षावसेधार्थं नाव्यपदेश्यपदेनास्यैवाविकल्पकस्य शब्दार्थव्याधरहितता सूचिता...

[NVTT, pp. 111-112]

(*b*) तस्मादव्यभिचारिपदेनैव संशयज्ञाने निरस्ते सविकल्पकप्रत्यक्षावरोधार्थमुपादीयमानं व्यवसायात्मकपदं संशयज्ञानप्रत्यक्षतया कारणमन्वाचिनोति। तद् यथा—एधानाहर्त्तुमरण्यं गच्छ शाकमप्यानेष्यसीति शाकानयनमन्वाचीयते, न तु तदेवास्य प्रेपितुर्विधित्सितम्,...... तथेहापीति। व्यवसायात्मकपदं साक्षात् सविकल्पकस्य वाचकम्, तथा

हि व्यवसायो विनिश्चयो विकल्प इत्यनर्थान्तरम्, स एवात्मा रूपं यस्य तत् सविकल्पकं प्रत्यक्षम् । [NVTT. p. 114]

(*c*) Bhaṭṭa Vāgīśvara also endorses this opinion in his *Nyāyatātparyadīpikā* :

इन्द्रियार्थसन्निकर्षोत्पन्नमपि ज्ञानमव्यभिचारि यतो भवति तत् प्रत्यक्षमिति......ननु तर्हि अव्यपदेश्यं व्यवसायात्मकमिति पदद्वयं किमर्थम् ? विप्रतिपत्तिनिरासार्थम् । ......शब्दाद्यासक्षणिकत्व-पक्षप्रतिक्षेपेण उभयोर्निर्विकल्पकसविकल्पकज्ञानयोरव्यभिचारित्वे सति इन्द्रियार्थसन्निकर्षोत्पन्नत्वात् प्रत्यक्षत्वं युक्तमेव । [NTD, p. 3]

(*d*) This is supported also by Vācaspati Miśra II, Keśava, Viśvanātha and Rādhāmohana :

(*i*) इह फलरूपप्रत्यक्षलक्षणे निर्विकल्पकसविकल्पकरूपविशेषद्वय-संग्रहेऽव्यपदेश्यव्यवसायात्मकपदाभ्यां तदुपादानम् । तच्च विप्रति-पत्तिनिषेधार्थम् । ......तत्राव्यपदेश्यमिति निर्विकल्पकस्य लक्षणम् ।
[NTĀ, fol. 08a]

(*ii*) इह प्रत्यक्षलक्षणे निर्विकल्पकसविकल्पकविशेषद्वयसंग्रहेऽपि पदाभ्यां तदुभयोपादानं विप्रतिपत्तिनिरासाय तदुभयलक्षणकारणाय च । तत्र निर्विकल्पकस्य लक्षणमव्यपदेश्यमिति ।...सविकल्पकस्य लक्षणं व्यवसायात्मकमिति । [GSP, p. 5]

(*iii*) यद्वा—इन्द्रियार्थसन्निकर्षोत्पन्नमिति सावधारणम् अर्थात् इन्द्रियार्थसन्निकर्षातिरिक्तादनुत्पन्नम्, अतिरिक्तं चात्र ज्ञानं, तेन ज्ञानाकरणकमित्यर्थः ।......तस्य विभागः—अव्यपदेश्यं व्यवसायात्मक-मिति, निर्विकल्पकं सविकल्पकं चेति द्विविधं प्रत्यक्षमित्यर्थः ।
[NSV, p. 101-120]

(*iv*) इन्द्रियार्थसन्निकर्षोत्पन्नं ज्ञानं प्रत्यक्षमिति प्रत्यक्षसामान्य-लक्षणम् ।......तच्चाव्यभिचारि चेत् प्रत्यक्षप्रमेत्यर्थः । ...अव्यभि-

चारित्वं भूमसामान्यभिन्नत्वम्......तच्च प्रमात्मकप्रत्यक्षं द्विविधमव्यपदेश्यमतीन्द्रियं निर्विकल्पकमव्यभिचारि व्यवसायात्मकं व्यवसायो विशिष्टप्रत्यक्षम् । [NSVV, p. 12]

(14) p. 9, Il. 13-14 : This seems to be borrowed from *Nyāyatattvāloka* of Vācaspati Miśra II :

तत्र चेन्द्रियेत्यादिलक्षणत्रयम्, तेनेन्द्रियत्वेनेन्द्रियजन्यं सन्निकर्षत्वेन संयोगाद्यन्यतमजन्यं ज्ञानं जन्यप्रत्यक्षम्···अर्थत्वेनार्थजन्यं ज्ञानं लौकिकप्रत्यक्षम् । [NTĀ, I.O.L. Mss, fol. 28a].

(15) p. 11, l. 1-4 : The interpretation of Vācaspati Miśra II is somewhat different :

अथेति हेतुहेतुमद्भावसूचनाय । अनुमानमिति लक्ष्यनिर्देशः । तत्पूर्वकमिति सामान्यलक्षणम् । त्रिविधमिति विभागः । शेषाणि विशेषलक्षणानि ।

अत्र च तच्छब्देन प्रत्यक्षप्रत्यवमर्शे यद्यपि स्मृतिशाब्दमित्यादावतिव्याप्तिः अनुमानपूर्वकानुमाने चाव्याप्तिस्तथापि तानि ते तदिति विग्रहं कृत्वा एकशेषः, तेन प्रथमे विभागसूत्रस्थप्रत्यक्षादीनां योग्यतया परामर्शे नाव्याप्तिः, ते इति विग्रहे अनन्तरसूत्रस्थप्रत्यक्षपरामर्शेऽपि योग्यतया लिङ्गलिङ्गिनोर्व्याप्तिग्रहरूपमाद्यं प्रत्यक्षं पक्षवृत्तिलिङ्गदर्शनञ्च द्वितीयमिह सम्बध्यते, अतो नातिव्याप्तिः, तेन लिङ्गदर्शनद्वयपूर्वको व्याप्तिविशिष्टपक्षधर्मताविषयकस्तृतीयो लिङ्गपरामर्शोऽनुमानं, व्यापारस्यापि करणकोटावन्तर्भावात् । यद् वा—लक्ष्यपदाद् योगोपस्थितमनुमानत्वमेव लक्षणम्, तत्पूर्वकत्वकथनन्तु व्याप्तिज्ञानाद्यसाधारणकारणसूचनाय ।

[NTĀ, I.O.L. Mss. fol. 41a-41b]

It may be noted here that in accepting एकशेष, Vācaspati Miśra II is following Uddyotakara :

अनुमानविशेषणार्थं सूत्रं तत्पूर्वकमिति । अनेन समानासमानजातीयेभ्योऽनुमानं व्यवच्छिद्यते । तानि ते तत् पूर्वं यस्य तदिदं

तत्पूर्वकम्। यदा तानीति विग्रहः तदा समस्तप्रमाणाभिसम्बन्धात् सर्वप्रमाणपूर्वकत्वमनुमानस्य दर्शितं भवति। पारम्पर्येण पुनस्तत् प्रत्यक्ष एव व्यवतिष्ठत इति तत्पूर्वकत्वमुक्तं भवति। यदाऽपि विवेकात् ते पूर्वं यस्येति, ते द्वे प्रत्यक्षे पूर्वं यस्य प्रत्यक्षस्य तदिदं तत्पूर्वकं प्रत्यक्षमिति। ते च द्वे प्रत्यक्षे। लिङ्गलिङ्गिसम्बन्धदर्शनमाद्यं प्रत्यक्षम्, लिङ्गदर्शनं द्वितीयम्। बुभुत्सावतो द्वितीयाल्लिङ्गदर्शनात् संस्काराभिव्यक्त्युत्तरकालं स्मृतिः, स्मृत्यनन्तरञ्च पुनर्लिङ्गदर्शनमयं धूम इति। तदिदमन्तिमं प्रत्यक्षं पूर्वाभ्यां प्रत्यक्षाभ्यां स्मृत्या चानुगृह्यमाणं परामर्शरूपमनुमानं भवति। [NV, pp. 132-140]

(16) P, 11, ll. 17-19 : (*a*) Here, Rāmabhadra accepts the interpretation of Uddyotakara :

त्रिविधमिति। अन्वयी व्यतिरेकी अन्वयव्यतिरेकी चेति। तत्रान्वयव्यतिरेकी विवक्षिततज्जातीयोपपत्तौ विपक्षावृत्तिः, यथा अनित्यः शब्दः सामान्यविशेषवत्त्वे सत्यस्मदादिबाह्यकरणप्रत्यक्षत्वाद् घटवदिति। अन्वयी विवक्षिततज्जातीयवृत्तित्वे सति विपक्षहीनः, यथा सर्वानित्यत्ववादिनामनित्यः शब्दः कृतकत्वादिति। अस्य हि विपक्षो नास्ति। व्यतिरेकी विवक्षितव्यापकत्वे सति सपक्षाभावे सति विपक्षावृत्तिः, यथा नेदं जीवच्छरीरं निरात्मकम्, अप्राणादिमत्त्व-प्रसङ्गादिति। [NV, pp. 144-145]

(*b*) Vācaspati Miśra II also endorses this view :

त्रिविधमिति केवलान्वयि केवलव्यतिरेक्यन्वयव्यतिरेकिणां विभागः। तत्र वृत्तिमदत्यन्ताभावाप्रतियोगी केवलान्वयी, तादृश-साध्यकमनुमानं केवलान्वयि, यथा घटोऽभिधेयो वस्तुत्वात् घटत्वा-द्वेत्यादि।......असत्सपक्षः केवलव्यतिरेकी। यद्यप्यत्र प्रायः सपक्षोऽपि सम्भवति, तथाप्यननुकूलतयाऽसत्कल्प इत्यसदित्युक्तम्, यथा जीवच्छरीरं सात्मकं चेष्टावत्त्वात्, यन्नैवं तन्नैवं यथा घट

इत्यादि। अत्र च जीवदित्येव पक्षनिर्देशः, शरीरन्तूदाहरणमात्रम्। अन्वयव्यतिरेकि साध्यान्वयव्यतिरेकी, यथा शब्दो विनाशी जन्यभावत्वात्; यदेवं तदेवं यथा घटः, यन्नैवं तन्नैवं यथा गगनम्; तथा चायमतथा चायं, तस्मात् तथेति।

[NTĀ, I.O.L. Mss. fol. 44b-45a]

(*c*) Viśvanātha concludes his comments on NS 1-1-5 with the following remarks :

अथवा—पूर्वम् अन्वयः, तद्वत् केवलान्वयीत्यर्थः, यथा अभिधेयं प्रमेयत्वादित्यादि। शेषः व्यतिरेकः, तद्वत् केवलव्यतिरेकी, यथा पृथिवीतरेभ्यो भिद्यते गन्धवत्त्वादित्यादि। सामान्यतोदृष्टम् अन्वयव्यतिरेकी, यथा वह्निमान् धूमादित्यादि। [NSV, p. 147]

(17) p. 12, II. 5-11 : (*a*) Here, the influence of Raghunātha Śiromaṇi seems to be quite clear. Compare this with the following passage from *Tattvacintāmaṇidīdhiti* (TCD) :

तत्र तेषु मध्ये असद्विपक्षम् अत्यन्तभावाप्रतियोगिसाध्यकं केवलान्वयि। एवमगृहीतान्वयव्यतिरेकिसाध्यकं केवलव्यतिरेकि, गृहीतान्वयव्यतिरेकिसाध्यकमन्वयव्यतिरेकि।

व्याप्तिग्राहकसहचारभेदाद् भेदे त्वन्वयसहचारमात्रगृहीतव्याप्तिकत्वं केवलान्वयित्वम्। तच्च प्रकृतव्याप्तिग्राहकज्ञानविषयसहचारत्वव्यापकान्वयसहचारकत्वं तादृशसहचारत्वव्यापकप्रकृतव्याप्तिघटकसहचारत्वकत्वं वा।

गृहीतव्याप्तिभेदाद् भेदे तु प्रकृतहेतुकप्रकृतसाध्यानुमितिहेतुज्ञानविषयव्याप्तित्वव्यापकप्रकृतसाध्यव्याप्तिकत्वं तत्त्वम्। जलं निर्गन्धं पृथिवीत्वव्यापकाभावप्रतियोगिमत्त्वादित्यादौ हेतुतावच्छेदिका च व्याप्तिर्न तु सैवेति नाप्रसङ्गः। अत एवेतरव्यापकाभावप्रतियोगित्वेनाभावप्रतियोगित्वेन वा यल्लिङ्गज्ञानं न प्रकृतसाध्यानुमितिहेतुस्तत् केवलान्वयीत्यपि वदन्ति। एवं केवलव्यतिरेकित्वादिकमपि निर्वाच्यम्।

[TCD with Jāgadīśī, pp. 795-802]

Here, Raghunātha enunciates three alternative principles on which the three-fold division of अनुमान could be based. These are traditionally knows as (*i*) साध्यभेदकल्प, (*ii*) सहचारभेद-कल्प and (*iii*) व्याप्तिभेदकल्प.

(*b*) Jagadīśa explains the last two sentences of the passage quoted above as follows

गृहीतव्याप्तिभेदेन अनुमानभेदे प्राचां संवादमाह—अत एवेति। लिङ्गतावच्छेदकस्य लिङ्गस्य यज्ज्ञाने इतरव्यापकाभावप्रतियोगित्व-प्रकारत्वानवच्छिन्नं प्रकृतहेतुसाध्यकानुमितिजनकत्वं तत् केवलान्वयी-त्यर्थः।......सहचारभेदात् भेदे व्यतिरेकसहचारमात्रगृहीतान्वय-व्याप्तिकत्वं केवलव्यतिरेकित्वम्। ....एवमुभयसहचारगृहीतान्वय-व्याप्तिकत्वम् अन्वयव्यतिरेकित्वं बोध्यम्। [TCDJ, pp. 801-802]

(*c*) Rādhāmohana also mentions a similar interpretation as an alternative explanation :

अथवा दृष्टमित्यस्य सर्वत्रान्वयः, तथा च पूर्ववद्दृष्टमन्वयसहचारेण दृष्टमन्वयसहचारमात्रजन्यव्याप्तिज्ञानं केवलान्वय्यनुमानमित्यर्थः। शेष-वद्दृष्टं व्यतिरेकसहचारमात्रजन्यव्याप्तिज्ञानं केवलव्यतिरेकीत्यर्थः। सामान्यतो दृष्टं तदुभयसहचारग्रहजन्यं व्याप्तिज्ञानमन्वयव्यतिरेकी-त्यर्थः। [NSVV, p. 15]

(18) P. 12, II. 11-14 : This is the view of Vātsyāyana as explained by Uddyotakara :

(*a*) पूर्ववदिति—यत्र कारणेन कार्यमनुमीयते, यथा मेघोन्नत्या भविष्यति वृष्टिरिति। शेषवत्तत्—यत्र कार्येण कारणमनुमीयते, पूर्वोदक-विपरीतमुदकं नद्याः पूर्णत्वं शीघ्रत्वञ्च दृष्ट्वा स्रोतसोऽनुमीयते भूता वृष्टिरिति। सामान्यतो दृष्टम्—व्रज्यापूर्वकमन्यत्र दृष्टस्यान्यत्र दर्शन-मिति, तथा चाऽऽदित्यस्य, तस्मादस्त्यप्रत्यक्षाऽप्यादित्यस्य व्रज्येति।

[NB, pp. 146-149]

(*b*) अथवा त्रिविधमिति।...... तत्र पूर्ववन्नाम यत्र कारणेन कारणमनुमीयत इति भाष्यम्। किं पुनरिदमुक्तं भवति कारणेन कार्यमनुमीयत इति?.........कार्यं तु कारणविशेषणत्वेनोपयुक्तं गुणभूतमनुमीयत इति सूत्रार्थः। एवं शेषवदादिष्वपि द्रष्टव्यम्। अत्रापि कारणं कार्यस्याङ्गभूतमनुमीयत इति। कथं पुनः शेषशब्देन कारणमुच्यते? द्वयोरनुमानभावेनोपक्षिप्तयोः कारणस्योपयोगाद् अनुपयुक्तं कार्यमिति कार्यं शेषशब्दवाच्यम्।.........सामान्यतोदृष्टं नाम अकार्याकारणीभूतेन यत्राविनाभाविना विशेषणेन विशेष्यमाणो धर्मो गम्यते, तत् सामान्यतो दृष्टम्, यथा वलाकया सलिलानुमानम्।

[NV, pp. 146-149]

(*c*) Vācaspati Miśra II in his *Nyāyatattvāloka* explains the terms पूर्ववत् etc. in the following manner ;

एवं तत्पूर्वकमिति सामान्यलक्षणं त्रिविधमिति विभागश्च दर्शयित्वा विभक्तानाममीषां विशेषलक्षणान्याह—पूर्ववदित्यादि। पूर्ववदित्यत्रातिशये मतुप्, अतिशयश्चाभिव्याप्तिः, कथासु प्रथमप्रयोज्यत्वात्; पूर्वः पक्षः स यस्यास्त्यभिव्याप्त्यधिकरणतया तत् पूर्ववत् पक्षव्यापकम्, तेन भागासिद्धिनिरासः। पक्षस्योपयुक्तत्वात्तदन्यः सपक्षः शेषः, तद्वत् तद्वृत्ति सपक्षसदित्यर्थः। पक्षधर्मसपक्षधर्मराहित्येन पक्षसपक्षयोः साधारणः सामान्यो विपक्षः; तत्रादृष्टम्, सप्तम्यन्तात्तसिः, तत्रासदेकरूपमित्यर्थः। एवं पक्षव्यापकं सपक्षसदिति केवलान्वयिनः, पक्षव्यापकं विपक्षासदिति केवलव्यतिरेकिणः, पक्षव्यापकं सपक्षसद्विपक्षासदेकरूपमित्यन्वयव्यतिरेकिणः लक्षणमुक्तं भवति। सौत्रचकारादबाधितत्वासत्प्रतिपक्षितत्वे अप्युक्ते, तेनामीषां गमकताङ्गं चतूरूपसम्पत्तिः पञ्चरूपसम्पत्तिश्चेत्यपि दर्शितम्। यद्यपि पूर्ववत्त्वादि लिङ्गधर्मस्तथापि लिङ्गतज्ज्ञानयोरभेदविवक्षया तत्परामर्शधर्मोऽत्र द्रष्टव्यः।

ननु निश्चितसाध्यवान् सपक्षो व्यतिरेकिण्यपि सम्भवत्येव, अन्यथा साध्याप्रसिद्धेस्तत्र व्यतिरेकव्याप्त्यवधारणमपि न स्यादिति तस्यापि पाञ्चरूप्याद्विभागोऽयुक्त इति चेत्। न। प्रयोगकाले प्रयोक्त्रा ज्ञातपाञ्चरूप्यस्य पञ्चरूपसम्पन्नत्वेन विवक्षणात्।

यद् वा—त्रिविधमिति कार्यानुमानादिविभागः, पूर्ववदिति तद्विवरणम्; तथा हि कार्यापेक्षया पूर्वं कारणम्, तद्यस्यास्ति विषयतया तत् पूर्ववत् कारणज्ञानम्, यथा वृष्ट्यनुमाकरणं वलाहकवृद्धिज्ञानम्; एवं शेषः कार्यम्, तद्वत्तद्विषयकं ज्ञानम्, यथोपरिवृत्तवृष्ट्यनुमानं नदीवृद्धिज्ञानम्; अनेवम्भूतं सामान्यतो दृष्टम्, लिङ्गानामविनाभावः सामान्यम्, तेन दृष्टम्, तृतीयान्तात्तसिः, यथा आदित्य एतद्देशापेक्षपूर्वदिगाद्यवच्छिन्नाकाशदेशादिप्राप्तिपूर्वके तत् प्रत्यगाद्यवच्छिन्नाकाशदेशादिप्राप्तिमान्, एतद्देशापेक्षप्राक्प्रत्यग्दिग्व्यापकत्वे सति प्राक्प्रत्यङ्मुखैतच्चाक्षुषद्रव्यत्वात्, तादृशमण्यादिवदित्यादि। प्राप्तिश्चात्र संयोगः, एतत्देशोऽनुमात्रधिष्ठितदेशः।

[NTĀ, I.O.L. Mss. fol. 45b-46a]

(19) P. 13, ll. 17-18, (*a*) The वैधर्म्यकरणकोपमिति mentioned here was first suggested in *Nyāyavārttikatātparyaṭīkā* by Vācaspati Miśra I :

ननु यदोदीच्येन क्रमेलकं निन्दतोक्तं 'धिक् करभकमतिदीर्घवक्रग्रीवं लम्बोष्ठं कठोरतीक्ष्णकण्टकाशिनं कुत्सितावयवसन्निवेशमपसदं पशूनामि'ति, तदुपश्रुत्य दाक्षिणात्य उत्तरापथं गतस्तादृशं वस्तूपलभ्य 'नूनमसौ करभ' इत्यवैति, तत् कतमदेतेषु प्रमाणम्? न तावदुपमानम्, साधर्म्याभावात्। नापि पञ्चमं प्रमाणमुपगम्यते।…………अत्रोच्यते……… साधर्म्यग्रहणं च धर्ममात्रोपलक्षणमिति करभसंज्ञाप्रतिपत्तिरप्युपमानफलमिति नाव्याप्तिः। नापि पञ्चमप्रमाणाभ्युपगमः।

[NVTT, pp. 170-172]

(*b*) Vācaspti Miśra II also explains this *sūtra* so as to accommodate the view of Vācaspati Miśra I :

अथोद्देशक्रमसङ्गत्योपमानलक्षणाय सूत्रं—प्रसिद्धसाधर्म्यात् साध्यसाधनमुपमानम् ॥ साध्यस्य वक्ष्यमाणसंज्ञासंज्ञिसम्बन्धपरिच्छेदस्य उपमितेः साधनमुत्पादकम्, तेनोपमितिकरणमुपमानम्, तच्च साधर्म्यवैधर्म्यान्यतरज्ञानं 'तथायमि'ति पिण्डप्रत्यभिज्ञाव्यापारकमिति लक्षणार्थः। एतावतैव लक्षणपूर्त्तौ कस्मात् पुनः साधर्म्यादिज्ञानमसाधारणमित्यत आह—प्रसिद्धसाधर्म्यादिति। प्रसिद्धं साधर्म्यं यस्मात् अतिदेशवाक्यादेः, ततः। साधर्म्यग्रहणं चात्रोपलक्षणमिति वक्ष्यते।

[NTĀ, I.O.L. Mss, fol. 47b-48a]

(*c*) Keśava Miśra, Viśvanātha and Rādhāmohana also mention this view of Vācaspati Miśra I :

(i) अपरे तु—साध्यस्य संज्ञासंज्ञिसम्बन्धपरिच्छेदस्य साधनं करणमुपमानम्। तदसाधारण्यमाह—प्रसिद्धसाधर्म्यादिति। प्रसिद्धं साधर्म्यं यस्माद् वाक्यादेस्ततस्तेन साधर्म्यज्ञानं तथायमिति पिण्डप्रत्यभिज्ञानव्यापारमुपमानमित्याहुः।......... वैधर्म्योपमितावप्येवमिति संक्षेपः। [GSP, p. 7]

(ii) प्रसिद्धस्य पूर्वप्रमितस्य गवादेः साधर्म्यात् सादृश्यात्, तज्ज्ञानात्, साध्यस्य गवयादिपदवाच्यत्वस्य साधनं सिद्धिः, उपमानम् उपमितिः। यत इत्यध्याहारेण च करणलक्षणम्। अथ वा साध्यसाधनमिति करणल्युटा करणलक्षणमेवेदम्। अत्र च वैधर्म्योपमितिमपि मन्यन्ते टीकाकृतः। यथाऽतिदीर्घग्रीवत्वादिपश्वन्तरवैधर्म्यज्ञानादुष्ट्रे करभपदवाच्यताग्रहः। [NSV, pp. 169-170]

(iii) एवं दीर्घग्रीवत्वाद्यसाधारणधर्मज्ञानादुष्ट्रे करभपदवाच्यत्वज्ञानात् तादृशधर्मज्ञानमप्युपमानमिति टीकाकृतः। तत्र च धिक् करभमतिदीर्घग्रीवं चपलतरोष्ठं कठोरकण्टकाशिनं पशूनामपसदमित्यादिवाक्यार्थस्मरणं व्यापार इति। [NSVV, p. 17]

(20) P. 14, Il. 7-10. Rāmabhadra's interetation of the expression आप्तोपदेश treats it as a case of बहुव्रीहि compound, whereas Vātsyāyana, Uddyotakara and Vācaspati Miśra I clearly consider it to be a case of षष्ठीतत्पुरुष. It may be noted here that Vācaspati Miśra II also does not favour षष्ठीतत्पुरुष, and opts for कर्मधारयसमास instead :

अथोद्देशक्रमसङ्गत्या शब्दलक्षणाय सूत्रम्—आप्तोपदेशः शब्दः। अत्र शब्द इति लक्ष्यनिर्देशः, शेषं लक्षणम्। आप्तो यथार्थ उपदेशः करणव्युत्पत्त्या शब्दः, तेन यथार्थानुभवकरणं शब्दः प्रमाणशब्दः।

[NTĀ, I.O.L. Mss, fol. 50b]

(21) P, 14, Il. 12-15. Here, Rāmabhadra mentions the view of Vātsyāyana, Uddyotakara and Vācaspati Miśra I as one of the alternative interpretations. For the sake of brevity, we quote here only the relevant portions of *Nyāyabhāṣya* and *Nyāyavārttikatātparyaṭīkā* :

(i) आप्तः खलु साक्षात्कृतधर्मा यथादृष्टस्यार्थस्य चिख्यापयिषया प्रयुक्त उपदेष्टा। साक्षात्करणमर्थस्याप्तिः, तया प्रवर्त्तत इत्याप्तः।

[NB, pp. 174-175]

(ii) लक्षणसूत्रं पठति—आप्तोपदेशः शब्दः। अत्र शब्द इति लक्ष्यपरम्। आप्तोपदेश इति लक्षणम्। उपदिश्यतेऽनेनेत्युपदेशो वाक्यज्ञानं तदर्थज्ञानं वाभिधीयते······आप्तानामृष्यार्यम्लेच्छानामुपदेशः शब्दो न त्वनाप्तानां मायामोहनिर्मितानां बुद्धर्षभादीनां प्रमाणविरुद्धक्षणिकसर्वधर्मनैरात्म्यवादिनामिति।·········पौरुषेयत्वं वेदानां द्वितीयाध्याय उपपादयिष्यते। तस्मात् पुरुषस्यैवाप्तोपदेश इति साधु व्याख्यानं भाष्यकारीयमिति भावः। [NVTT, pp. 173-174]

Vācaspati Miśra II also admits the possibility of treating आप्तोपदेश as an instance of षष्ठीतत् पुरुष

यद् वा—आप्तः प्रतिपाद्यसंसर्गतत्त्वज्ञानवान् यथार्थचिख्यापयिषुः

स्थानकरणादिपाटववान्, तस्योपदेशः शब्दः, तेन प्रयोगहेतुभूतार्थतत्त्वज्ञानजन्यः शब्दः प्रमाणशब्द इति लक्षणार्थः।

[NTĀ, I.O.L, Mss, fol. 50b]

Bhaṭṭa Vāgīśvara, Keśava Miśra, Viśvanātha and Rādhāmohan have faithfully recorded this interpretation. [See NTD, p. 4 ; GSP, p. 7 ; NSV, pp. 104-105 and NSVV, pp, 17-18.] Incidentally, it may be noted that one of the interpretations suggested by Rāmabhadra has been recorded by Viśvanātha and Rādhāmohana. Rādhāmohana has also recorded the first interpretation of Vācaspati Miśra II as an alternative interpretation :

(i) अथ वा—आप्तः यथार्थः उपदेशः शाब्दबोधो यस्मात्।

[NSV, p. 175]

(ii) आप्तोपदेश इति। आप्तो यथार्थशाब्दज्ञानकरणज्ञानविषयः, तथाविधो य उपदेशः [स] शब्द इत्यर्थः। अथवा आप्तो यथार्थ उपदेशः शाब्दबोधो यस्मादिति व्युत्पत्त्या यथार्थशाब्दज्ञानजनकवाक्यमित्यर्थः।

[NSVV, p. 18]

(22) P. 15, l. 3 : (*a*) Vācaspati Miśra II provides us with another definition of *prameya* in his *Nyāyatatīvāloka* :

समुदिते प्रमेयत्वम्, अन्यतमाऽज्ञानेऽपि नापवर्ग इति दर्शयितुमुद्देशविभाजकपदयोर्वचनभेदः, तथा च संसारकारणीभूतरागजनकमिथ्याज्ञानविषयत्वं सामान्यलक्षणमनेनैव सूचितम्, तुशब्दोऽनभिमतव्यवच्छेदेन विभागस्फोरणाय, तथा च मुमुक्षुप्रतिरित्सितान्येतान्येव प्रमेयाणीति। [NTĀ, I.O.L. Mss, fol. 52a]

(*b*) Viśvanātha seems to criticize this view :

प्रमेयः किमित्याकाङ्क्षायामात्मादयो दर्शिता इत्यतो वचनभेदेऽपि नाऽनन्वयः। 'वेदाः प्रमाणम्' इत्यादावप्येवम्।.........प्रमेयत्वेनैक्यमिति प्रतिपादनाय अन्यतमाज्ञानेऽपि नापवर्ग इति प्रतिपादनाय वा प्रमेयमित्येकवचनमित्यन्ये। तच्चिन्त्यम्। [NSV, p. 183]

साक्षात्कारणं यदात्मादिद्वादशसमूहालम्बनं तद्रूपानित्यतत्त्वधीविषयत्वं प्रमेयत्वम्······ [NTĀ, I.O.L. Mss, fol. 52b]

(24) P. 10-11. The relevant passage of *Nyāyavārttika* runs as :

उपेत्य भ्रमो दिगाद्यन्यत्रैव लभ्यते, उपपत्तिसामर्थ्यात् । का पुनरुपपत्तिः ? प्रवृत्तेर्विंशतिभेदात् तत्संस्कारकत्वेऽपि च दिगादयोऽपि लभ्यन्ते, सामान्यविशेषसमवायाश्च विशेषणविशेष्यभावेन ; आत्मादयो विज्ञेयत्वेनोपदिष्टाः, तेषां चेतरेतरव्यवच्छेदकभावेन सामान्यविशेषसमवाया विशेषणं कृतं सूत्रे इति । न पुनरिदं प्रमेयावधारणार्थं सूत्रम्, न तु प्रमेयविशेषावधारणार्थम्, प्रमेयमात्रावधारणार्थं च प्रवृत्तौ विहितविधानादकुशलः सूत्रकारः स्यात् । आद्येन वा सूत्रेण प्रमेयं विहितमिति पुनर्विधानादुन्मत्तवाक्यमिदं स्यात्, एनं चार्थमेवार्थकं सूत्रकारः तु शब्दमाह । अन्यदपि प्रमेयमस्ति, यस्य तु तत्त्वज्ञानान्निःश्रेयसं तदिदं प्रमेयमिति तु शब्देन ज्ञापयति । [NV, pp. 181-183]

(25) P. 15, Il. 13-16. The relevant passage of *Nyāyavārttika* is as follows ;

अत्रापि समासश्चार्थे द्वन्द्वः, यथावचनं विग्रह इति ।
[NV, p. 180]

(26) P. 15, Il. 16-17. Here, Rāmabhadra refers to the view of Vācaspati Miśra II, whose remarks run as ;

न चोपधेयसङ्करः, गोवृषन्यायात्, एवञ्चापवर्गसाक्षात्कारणानित्यतत्त्वज्ञानविषयत्वं (प्रमेयत्वम्) । यद्वा—उपाधिविभागोऽयम्, तेनापवर्गसाक्षात्कारणतत्त्वधीविषयतावच्छेदकरूपवत्त्वं प्रमेयसामान्यलक्षणं सूचितम् । [NTĀ, I.O.L ; Mss, fol. 52a-52b.]

(27) P. 16, Il. 1-2. Bhaṭṭa Vāgīśvara also remarks :

तदेवमिच्छादीनि ज्ञानान्तानि स्मृत्या सहैककर्तृत्वेन प्रतिसन्धीयमानत्वादात्मनो लिङ्गं भवति । लिङ्गं चात्मनो लक्षणम् । [NTD, p. 5]

(28) Here, Rāmabhadra agrees with Vācaspati Miśra II, whose comments on NS 1.1.10 are quoted here extensively for some extremely valuable informations contained therein :

लिङ्गमिह लक्षणम् । ननु लक्षणमिति वक्तव्ये लिङ्गमिति श्लिष्टाभिधानं किमर्थम्, पक्षोपस्थापकस्यात्मादिप्रत्यक्षस्य शरीरादिसम्भेदावगाहिनोऽतिरिक्तात्मनि प्रमाणयितुमशक्यतया पक्षासिद्ध्युद्धाराय, तथा चामीभिरेव लिङ्गैरनुमीयमानस्यात्मन एतानि लक्षणानीति तात्पर्यम् । नन्वत्र सूत्रे वचनभेदात् समुदितलक्षणत्वमवगम्यते, तच्चायुक्तमिति । न । 'ग्रहं संमार्ष्टी'त्यत्र ग्रहपदेनेव लक्षणपदेन तन्त्रवृत्त्या षड्पस्थापनात् । अत्र चेच्छाप्रयत्नज्ञानान्यात्ममात्रस्य लक्षणानि, शेषं संसारिणाम् । आर्थो विभागः । यद्यपि प्रकरणपर्यालोचनया क्षेत्रज्ञानामेव प्रमेयत्वम्, तन्मिथ्याज्ञानस्यैव संसारबीजत्वात्, अन्ततस्तत्तत्त्वज्ञानस्यैव मोक्षहेतुत्वात्, तथापि "द्वे ब्रह्मणी वेदितव्ये" इत्यादिश्रुतेर्मोक्ष(जनक)धीविषयत्वाद्भगवतोऽपि धीविषयत्वमवगम्यते, भास्करादिस्वरसाच्च । न च भगवदप्रमेयपरप्रमेयप्रकाशविरोधः, तस्य नव्यमतपरत्वात् । अत एवैतदुद्द्योततृतीयप्रकाशावेवमेवेति ।

[NTĀ, I.O.L. Mss. fol ; 52b-53a]

Here, Vācaspati Miśra II has recorded the views expressed in *Nyāyabhāskara* (a lost Nyāya work), *Nyāyanibandhoddyota* (i.e. Divākaropādhyāya's commentary on Udayana's *Tātparyaṭīkāpariśuddhi*) and Vardhamāna's *Prakāśa* (i.e. *Pariśuddhiprakāśa* or *Nyāyanibandhaprakāśa*). For similar comments by Keśava Miśra, see GSP, p. 8.

(29) P. 16, Il. 2-3. There is a lot of dispute among the commentators on this point. Thus, Vātsyāyana says :

(i) तत्रात्मा तावत् प्रत्यक्षतो न गृह्यते । स किमाप्तोपदेशमात्रादेव प्रतिपद्यत इति । नेत्युच्यते । अनुमानाच्च प्रतिपत्तव्य इति—

इच्छा......लिङ्गम ॥

यज्जातीयस्यार्थस्य सन्निकर्षात् सुखमात्मोपलब्धवान्, तज्जातीयमेवार्थं पश्यन्नुपादातुमिच्छति, सेयमादातुमिच्छा एकस्यानेकार्थदर्शिनो दर्शनप्रतिसन्धानाद् भवति लिङ्गमात्मनः। [NB, pp. 184-185]

(ii) Uddyotakara's comments are as follows :

आत्मनः समानासमानजातीयविशेषणार्थं सूत्रम्—इच्छेति। आगमस्यानुमानेन प्रतिसन्धानार्थं वा।......प्रमाणसंप्लवस्योदाहरणार्थमेव वा।......[NV, p. 184]

(iii) Vācaspati Miśra I observes :

···अहमिति ज्ञानं गौराद्याकारं शरीरावभासनं न शक्यं घटादिज्ञानवद् द्रागात्मनि प्रमाणयितुमित्यभिप्रायः, परदेहवर्त्यात्माभिप्रायं वा।···

तदनेन वार्त्तिकेन अनुमानाच्च प्रतिपत्तव्य इति भाष्यं व्याख्यातम्। इच्छाया आत्मलिङ्गत्वकथनपरं भाष्यं—यज्जातीयस्येति। यज्जातीयस्येति व्याप्तिस्मृतिकथनम्, तज्जातीयं पश्यन्निति पक्षधर्मोपनयः। तस्मादयं सुखहेतुरित्यनुमायादातुमिच्छति, सेयमिच्छेदृशी व्याप्तिग्रहणतत्स्मरणपक्षधर्मताग्रहणानुमानेच्छादीनामेककर्तृकत्वं सूचयति, भेदे प्रतिसन्धानाभावेन तदनुपपत्तेः···[NVTT, pp. 184-185]

(iv) Udayana in his *Tātparyaṭīkāpariśuddhi* states unambiguously that the self is a perceptible entity, and that such perceptions are not erroneous. Nevertheless, he shows the usefulness of the inference suggested by Vātsyāyana and others :

ननु प्रत्यक्षमप्यात्मनि प्रमाणमेव, 'अहमि'ति विकल्पस्य परैरपीष्टत्वात्। न चायमवस्तुको संदिग्धवस्तुको वा, अशाब्दत्वादप्रतिक्षेपाच्च। न चायं लैङ्गिकः, अननुसंहितलिङ्गस्यापि स्वप्रत्ययात्। नापि स्मृतिरियम्, अननुभूते स्मरणायोगात्। अनादिवासनावशादनादिरियम-

वस्तुको विकल्प इत्यपि न युक्तम्, नीलादिविकल्पेष्वप्येवं वक्तुं सुकरत्वात्। कादाचित्कत्वेन तत्र वस्तुकल्पनमिहापि समानम्। अर्थक्रियास्थितेः सूत्रप्रामाण्यसिद्धेर्वस्तुस्थितिरित्यपि न युक्तम्, अर्थक्रियास्थितिनिश्चयस्यापि वासनामादायोपप्लावयितुं शक्यत्वात्। अतएव प्रमाणान्तरप्रवृत्तेरित्यपि गतम्। तस्माद् वासनामात्रवादं विहाय आगन्तुकमपि किञ्चित् कारणं वाच्यम्। तच्चाप्तानाप्तशब्दौ वा लिङ्गतदाभासे वा प्रत्यक्षतदाभासे वा ? तत्र यथा प्रथममध्यमप्रकाराभावात् नीलविकल्पश्चरमं कल्पमालम्बते, तथा'हमि'ति विकल्पोऽपि। तत्रायम्—

प्रत्यक्षपृष्ठभावित्वे साक्षादेव सवस्तुकः।
तदाभासे च मूलेऽस्य पारम्पर्यात् सवस्तुता॥

इति। न च वाह्यप्रत्यक्षनिवृत्तावेव निर्मूलत्वम्, बुद्धिविकल्पस्यापि निर्मूलत्वप्रसङ्गात्। तत्र स्वसंवेदनं मूलम, इहापि मानसमिति न कश्चिद्विशेषः। तत्कथमात्मनि प्रत्यक्षप्रतिषेधकं भाष्यमित्यत आह —अहमिति। यद्यपि सवस्तुकोऽयं तथापि शरीरप्रत्ययसामानाधिकरण्यात् तद्वस्तुक एवायमित्यपि स्यात्। अतो न तदतिरिक्ते वस्तुनि प्रमाणयितुं शक्यते तावद् यावद् देहादिभ्यो भिन्न आत्मा प्रमाणान्तरेण न साध्यत इत्यर्थः। तदिदमुक्तं—द्रागिति। घटादिज्ञानवदिति व्यतिरेकिदृष्टान्तः। यथाहि घटादिज्ञानं शरीरादि प्रत्ययवैयधिकरण्यात् तदतिरिक्ते वस्तुनि द्रागेव प्रमाणमितुं शक्यते, तथा नेदमित्यर्थः।

[TTP, pp. 397-398]

(v) Viśvanātha Pañcānana maintains that the word लिङ्गम् in this *sūtra* does not indicate any inference, and that लिङ्गम् here should be explained as लक्षणम्:

अत्र चाऽऽत्मनः प्रत्यक्षत्वाल्लिङ्गकथनमसङ्गतम्, न च शरीरातिरिक्तात्मव्युत्पादनार्थं तदिति वाच्यम्, अग्रिमपरीक्षावैयर्थ्यापत्तेः।

लक्षणाकथनेन न्यूनतेति चेत्। न। लिङ्गपदस्य लक्षणार्थत्वात्। न च—लिङ्गमित्येकवचनेन मिलितानां लक्षणत्वं प्रतीयते, तच्चायुक्तम्, वैयर्थ्यात्—इति वाच्यम्। 'किं लक्षणमि'त्याकाङ्क्षायामिच्छादीनामभिधानात् मिलितं लक्षणमिति प्रत्यायकाभावात्। तथा च प्रत्येकमेव लक्षणम्। अत्र ज्ञानेच्छाप्रयत्नानामात्ममात्रस्य लक्षणत्वम्, सुखदुःखद्वेषाणां संसारिणो लक्षणत्वमिति। [NSV, pp. 185-188]

(vi) Rādhāmohana Gosvāmi Bhaṭṭācārya, who usually follows Viśvanātha, rejects this view, and suggests a novel interpretation of the word लिङ्गम्:

लिङ्गं व्यञ्जकमनुमापकमिति यावत्। अनुमापकत्वं च निरूपकतावदनुमितिजनकतावच्छेदकविषयतावत्त्वसम्बन्धेनानुमितिकरणतावत्त्वम्। तत्करणताया एकत्वाभिप्रायेण लिङ्गमित्येकवचनम्। इच्छादिकं यत्किञ्चिद्द्रव्यवृत्ति गुणादित्यादितादात्म्यसंसर्गेणेच्छादिरूपगुणादिहेतुनात्मसिद्धिः।......एतेन—लिङ्गं लक्षणम्: न च लिङ्गमित्येकवचनेन मिलितानामेव लक्षणत्वं प्रतीयते, तच्चायुक्तम्, एकैकस्यैव लक्षणत्वसम्भवादिति वाच्यम्; किं लक्षणमित्याकाङ्क्षायामिच्छादीनामभिधानान्मिलितं लक्षणमिति, प्रयोजकाभावात्; तथा च प्रत्येकमेव लक्षणम्, अत्र ज्ञानेच्छाप्रयत्नानामात्ममात्रस्य लक्षणत्वं सुखदुःखद्वेषाणां संसारिणो लक्षणत्वम्—इति प्रत्युक्तम्।

अत्रोच्यते—लिङ्गं लौकिकप्रत्यक्षविषयतायां विषयविधया नियामकम्। तथा चेच्छादिप्रकारेणैवात्मनो लौकिकमानसविषयतेति बोध्यम्। लक्षणं तु ज्ञानादिमत्त्वं स्फुटमिति भावः।

[NSVV, pp. 19-20]

(30) P. 16, l. 12. The relevant passage of *Nyāyavārttika* pertains to NS 3.1.1, and runs as:

नास्त्यात्माऽनुपलब्धेरिति चेत्? अत्रापि प्रतिज्ञादिदोषो दृष्टान्तदोषश्च पूर्ववत्। यदनुपलब्धेरिति, तदप्ययुक्तम्। अनुपलब्धिरसिद्धा

प्रत्यक्षादिप्रमाणविषयत्वादात्मनः—प्रत्यक्षेण तावदात्मा उपलभ्यते। कथम् ? लिङ्गलिङ्गिस्मृत्यनपेक्षं विषयस्वभावभेदानुविधा'य्यहमि'ति विज्ञानं रूपादिज्ञानवत् प्रत्यक्षम्। यच्चापि भवान् मुक्तसंशयं प्रत्यक्षं प्रतिपद्यते, तस्य कुतः प्रत्यक्षत्वमित्यवश्यं भवता विज्ञानमेव लिङ्गादिसम्बन्धनिरपेक्षं स्वात्मसंवेद्यं प्रतिपत्तव्यम्। [NV, p. 704]

In this connection, Vācaspati Miśra I has raised a pertinent problem : how can the same self be the knower and the object known with respect to the same cognition ? The problem and its solution as given by him are as follows :

विषयस्वभावभेदानुविधायीति। 'अहमि'ति विज्ञानं मानसं विषयस्य आत्मनो यः स्वभावभेदः कर्त्तृत्वभोक्तृत्वलक्षणः 'जानेऽहं भुञ्ज' इत्यादिस्तदनुविधायि। एतदुक्तं भवति—न केवलमात्मस्वरूपमात्मज्ञानस्य विषयः, तथा सति कर्मतया तद्व्याप्यज्ञानस्यापि निर्वृत्तिप्रसङ्गात्। यदा तु धर्मवदात्मविषयं ज्ञानं भवति, तदा धर्माणां परसमवेतक्रियाफलशालितया तद्व्याप्तस्य ज्ञानस्यापि निर्वृत्तिरिति। जानातिश्चाऽऽत्मधर्मकर्मा आत्मानमपि गोचरयतीति सूक्तं विषयस्वभावभेदानुविधायीति।

[NVTT, pp. 704-705]

(31) P. 16, l. 18. (i) Bhaṭṭa Vāgīśvara, following Uddyotakara and Vācaspati Miśra I, explains this *sūtra* in his *Nyāyatātparyadīpikā* in the following manner :

मूर्त्तान्तराप्रयोगे सति हिताहितप्राप्तिपरिहारलक्षणपरिस्पन्दाश्रितत्वात्, इन्द्रियानुग्राहकत्वात्, अर्थोपकारकत्वाच्च शरीरं तदन्यस्माद् भिद्यत इत्यर्थः। किं पुनरिन्द्रियानुग्राहकत्वमर्थोपकारकत्वं वा शरीरस्य ? तदुच्यते—स्वोपघातानुविधानं स्वाधीनप्रयोजनसिद्धिश्च। शरीरोपघातेनोपहन्यते, तदनुपघातेन स्वविषयग्रहणसमर्थानि भवन्तीन्द्रियाणि। तथा रूपरसादयोऽर्थाः शरीरमाश्रित्य स्वप्रयोजनं सुखदुःखसंवेदननिमित्तत्वं भजन्ते, नातोऽन्यथा। अतः शरीरोपघातानुविधानं शरीर-

स्येन्द्रियानुग्राहकत्वम्। रूपाद्यर्थकृतसुखदुःखसंवेदननिमित्तत्वं च शरीरस्यार्थाश्रयत्वम्; न पुनश्चेष्टावदिन्द्रियार्थसमवायः, इन्द्रियारम्भकपरमाणुषु व्यभिचारात्। [NTD, p. 6]

(ii) Vācaspati Miśra II also accepts the view that this *sūtra* furnishes *three* definitions of शरीर :

अत्र द्वन्द्वः समासः, तत्समभिव्याहारात् आश्रयस्य च प्रत्येकमन्वयित्वव्युत्पत्त्या चेष्टेत्यादिलक्षणत्रयम्। तत्रानित्यप्रयत्नसाक्षाज्जन्या क्रिया चेष्टा, तद्वदन्त्यावयवित्वेन शरीरमितरेभ्यो भिद्यते। एवमिन्द्रियाश्रयत्वेन, इन्द्रियपाटवप्रयोजकधातुसाम्यादिमदन्त्यावयवित्वरूपेण। एवमर्थाश्रयत्वेन, अर्थः प्रयोजनं सुखादि, तदाधारान्त्यावयवित्वेन। न च तस्य सुखाद्याधारताऽनुपपत्तिः, 'वने सिंहनाद' इतिवत् 'पादे च मे सुखम्' इत्याद्यनुभवेन तस्यापि तदाधारताविशेषशालित्वात्। यद् वा—अर्था विषया गन्धादि, यत्तदाश्रयत्वं तत्साध्यभोगावच्छेदकान्त्यावयवित्वम्। मृतशरीरोपग्रहस्तु सर्वत्र तन्मात्रजातीयकत्वात्, तादृशी च जातिः समानकालीनानेकावृत्तिर्बाल्यकौमारादिभिन्नैकपुरुषीयनानाशरीरवृत्तिश्चैत्रत्वादिकेति। [NTĀ, I.O.L. Mss, fol. 52a-52b]

(32) P. 18, l. 4 :

The passage quoted above shows that while Vācaspati Miśra II furnishes a new interpretation of the term अर्थ, he does not entirely reject the earlier interpretation, Keśava Miśra and Viśvanātha Pañcānana also agree with him on this point :

(i) <u>अर्थः</u> प्रयोजनं सुखादि। [GSP, p. 9]

(ii) <u>अर्थाश्रयत्व</u>मित्य<u>त्रार्थ</u>शब्दो न रूपादिपरः।......वस्तुतस्तु—अन्यतराश्रयत्वमपि न लक्षणम्, किन्तु सुखाश्रयत्वम्, दुःखाश्रयत्वं चेति लक्षणद्वये तात्पर्यम्। शरीरस्य तदाश्रयत्वमवच्छेदकतासम्बन्धेन......
[NSV, pp. 195-196]

(iii) Rādhāmohana has criticized Viśvanātha to some extent, and besides giving a novel interpretation, he has also tried to defend the interpretation favoured by the earlier commentators :

अर्थशब्दो न रूपादिपरः, तदाश्रयस्य घटादावतिव्याप्तेः, किन्तु सुखदुःखान्यतरपरः ।......न च सुखाश्रयत्वं दुःखाश्रयत्वमिति प्रत्येकं लक्षणम्, सुखाश्रयत्वस्य नारकिशरीरे दुःखाश्रयत्वस्य स्वर्गिशरीरे व्यभिचारात् ।......वस्तुतोऽर्थपदमत्रात्मविशेषगुणपरम्, तेन ज्ञानाद्याश्रयत्वमपि लक्षणं भवतीति । आश्रयत्वं चावच्छेदकतासम्बन्धेन । वृक्षादौ च सुखादिस्वीकारान्नाव्याप्तिः ।......यद्वा—अर्थपदं रूपादिपञ्चकसमुदायपरम्, घटादौ शब्दाश्रयत्वाभावान्नातिव्याप्तिः । शरीरस्य पाञ्चभौतिकत्वाद्रूपादिसमुदायवत्त्वाल्लक्षणसङ्गतिः । न च शरीरस्यापि पाञ्चभौतिकत्वमग्रे निरसनीयमिति कथं तादृशसमुदायवत्त्वं तस्येति वाच्यम्, समवाय-स्वसमवायिनिमित्तकत्वान्यतरसम्बन्धेन समुदायवत्त्वस्य विवक्षणात् । [NSVV, pp. 21-22]

(33) P. 18, ll. 12-13. This strategy of avoiding साङ्कर्य (which is a जातिबाधक) has been adopted also by Mathurānātha Tarkavāgīśa (a student of Rāmabhadra) in his *Dravya-kiraṇāvalīrahasyam* :

घटत्वादिकमपि संयोगविशेषवृत्तिः । नव्यनैयायिकैरपि सुवर्णत्वादिना साङ्कर्यभीत्या आरम्भकसंयोग एव घटत्वादिजात्यभ्युपगमात् । [DKR, p. 59]

(34) P. 19, ll. 3-6. The problem of defining इन्द्रिय is a tricky one, and among the commentaries on NS that are available to us now, *Nyāyavārttikatātparyaṭīkā* of Vācaspati Miśra I provides the first well-formed definition of इन्द्रिय:

(i) ...इन्द्रियाणां सामान्यलक्षणं निर्वेदोपयुक्तमाह—भोगसाधना-

नीति। अनेन यच्छरीरसंयुक्तं सत् संस्कारकदोषव्यतिरिक्तं साक्षात्-प्रतीतिसाधनं तदिन्द्रियमिति सामान्यलक्षणमिति सूचितम्।

[NVTT, p. 197]

Bhaṭṭa Vāgīśvara also adopts this definition. [NTD, p. 6]

Udayana has explained this definition in his *Tātparyaṭīkā-pariśuddhi* without offering any criticism, but in his *Lakṣaṇa-mālā*, he has formulated another definition of इन्द्रिय :

(ii) शरीरसंयुक्तं साक्षात्कारिप्रमासाधनमतीन्द्रियमिन्द्रियम्। शरीरसंयुक्तमिति इन्द्रियसंयोगादीनामतीन्द्रियाणां प्रमासाधनानां निरासः। प्रमासाधनमिति शरीरसंयोगादीनामतीन्द्रियाणां च परमाण्वादीनां विषयाश्रयाणां निरासः। [LM, p. 23]

Vācaspati Miśra II states this definition wlth a few modifications, and then goes on to state a definition proposed by Gaṅgeśopādhyāya in his *Tattvacintāmaṇi* :

(iii) अत्र शरीरसंयुक्तमेव सद् यत् साक्षाद्धीसाधनं द्रव्या-नारम्भकश्च शब्दरूपान्योद्भूतविशेषगुणशून्यश्च तदिन्द्रियमिति········· प्राञ्चः। नव्यास्तु—साक्षात्कारकरणत्वमिन्द्रियत्वम्, तेनैव रूपेण सिद्धत्वमिति यावत्, स्मृत्यजनकज्ञानकारणमनःसंयोगाश्रयत्वं वा।

[NTĀ, I.O.L. Mss, fol. 55b]

Keśava Miśra adopts the second definition adopted by Vācaspati Miśra II :

(iv) सामान्यलक्षणं विना विभागोद्देशविशेषलक्षणानवतारात् आक्षिप्तं सामान्यलक्षणम्। तच्च स्मृत्यजनकज्ञानकारणमनःसंयोगा-श्रयत्वम्। [GSP, p. 9]

Viśvanātha adopts the first definition suggested by Rāmabhadra :

(v) यद्यपि मनसोऽपीन्द्रियत्वमस्त्येव, तथापि घ्राणेत्यादेरुपलक्षण-परत्वान्न दोषः। वस्तुतस्तु—इन्द्रियाणीत्यस्य वहिरिन्द्रियाणीत्यर्थः। तेन

भूतेभ्यः इत्यस्य नाऽसङ्गतिः। अत्र चैतानि इन्द्रियाणीति वदता घ्राणाद्यन्यान्यत्वं लक्षणमिति सूचितम्। प्रत्यक्षजनकतावच्छेदकतया इन्द्रियत्वमखण्डोपाधिरित्यन्ये। [NSV, pp. 118-200]

Rādhāmohana anticipates an objection against the interpretation of Viśvanātha, and then solves it :

(vi) अथ घ्राणाद्यन्यतमत्वमिन्द्रियलक्षणमित्यत्रास्य न तात्पर्यम्, मनसोऽपीन्द्रियत्वात्। न च घ्राणादीनामुपलक्षणत्वेन मनसोऽपि ग्रहणमिति वाच्यम्, भूतेभ्य इत्यस्यासङ्गत्यापत्तेः। नापि बहिरिन्द्रियलक्षणमिदम्, बहिरिन्द्रियत्वेन प्रागनुपन्यासात् तल्लक्षणाकाङ्क्षाविरहात्। एवं पञ्चधा विभागोऽप्यनुपपन्नो मनसः षष्ठत्वादिति। ......अत्रोच्यते— आत्मेत्यादिसूत्रे इन्द्रियपदस्य बहिरिन्द्रियपरत्वं प्रसिद्धत्वान्मनसस्तदिन्द्रियत्वस्य च सर्ववादिसिद्धत्वाभावेन सप्रमाणं पृथक् तदुपन्यस्तम्। गन्धादीनां तदर्थत्वेन कथनादिन्द्रियपदस्य बहिरिन्द्रियपरत्वं स्फुटमेव।

[NSVV, pp. 22-23]

(35) P. 19, l. 17-P. 20, l. 2. The expression भूतेभ्य ; in this *sūtra* is formed by the fifth case-ending in the plural number. The commentators have tried to justify both of these. Thus, Vatsyāyana writes :

(i) भूतेभ्य इति। नानाप्रकृतीनामेषां सतां विषयनियमः, नैकप्रकृतीनाम्। सति च विषयनियमे स्वविषयग्रहणलक्षणत्वं भवति।

[NB, p. 199]

Uddyotakara observes :

भूतेभ्य इति पृथिव्यादिककारणोपदेशो नियमार्थः। कः पुनरयं नियमः ? भूतगुणविशेषग्रहणसाधनत्वम्, न सर्वमिन्द्रियं सर्वभूतगुणविशेषं गृह्णातीति। अपि तु यज्जातीयमिन्द्रियं भवति तस्य यो गुणविशेष इतरेतरभूतव्यवच्छेदहेतुर्गन्धादिः, स तेनैवेन्द्रियेण गृह्यत इति नियमः। [NV, p. 199]

Vācaspati Miśra I says :

(iii) अत्र च कर्णशष्कुलीसंयोगोपाधिना श्रोत्रस्य नभसः कथञ्चिद् भेदं विवक्षित्वा भूतेभ्य इति पञ्चम्यर्थो व्याख्यातः। अनेन खल्वाहङ्कारिकाणीन्द्रियाणि इति यदाहुः सांख्यास्तन्निरस्तम्। [NVTT, p. 200]

Bhaṭṭa Vāgīśvara follows here Uddyotakara. [NTD, p. 7]

Vācaspti Miśra II explains it in the following manner :

(iv) अथ किंप्रकृतिकानि तानीति जिज्ञासायामाह—भूतेभ्य इति। तत्र यद्भूतप्रकृतिकत्वं यस्य युज्यते तस्य तद्द्रष्टव्यम्। बहुवचनेन च नानाप्रकृतिकत्वं दर्शयता एकाहङ्कारप्रभवत्वं सांख्यसंमतमपास्तम्। ...न च श्रोत्रस्य नभोऽव्यक्त्यभेदे भेदव्याप्तपञ्चम्यनुपपत्तिः, विशिष्टादृष्टसहकृतस्य कर्णशष्कुलीपरिचायितस्य नभसः श्रोतत्वात्, तस्य च केवलनभोभेदात्। न चैवमपि हेतुवाचिनी पञ्चम्यनुपपन्नैव, श्रोत्रस्याहेतुकत्वादिति वाच्यम्, स्वभावमात्रजिज्ञासायां भूतेभ्यः इति पदस्य स्वभावमात्रोपस्थापकतया पञ्चम्यास्तत्रातात्पर्यात्। ननु तत् कथं निष्प्रयोजनां पञ्चमीं प्रायुङ्क्त, औत्सर्गिकभूतहेतुत्वकथनेन सांख्यमतनिरासार्थम्।

[NTĀ, I.O.L. Mss, fol. 56a]

Viśvanātha tries to combine the views of Vācaspati Misra I and Rāmabhadra without violating the rules of grammar :

(v) ......भूतेभ्य इति। तेनेन्द्रियाणामहङ्कारप्रकृतिकत्वं नेति मन्तव्यम्। ......अत्र घ्राणादीनां चतुर्णां पृथिव्यादिजन्यत्वं सम्भवति, श्रोत्रस्य कर्णशष्कुल्यवच्छिन्नाकाशस्य कर्णशष्कुल्या जन्यत्वादेव जन्यत्वव्यपदेशः। अथ वा—अभिन्नानीति पूरयित्वा भूताभिन्नानीति व्याख्येयम्।...... [NSV, p. 201]

Rādhāmohana criticizes Viśvanātha, and upholds the first solution offered by Rāmabhadra :

(vi) ...भूतेभ्य इति। श्रोत्रस्याजन्यत्वात् पञ्चम्यर्थस्य जन्यत्वस्य

बाधः, न च कर्णशष्कुल्या जन्यत्वादेव तद्‌व्यपदेश इति वाच्यम्, तथापि जन्यत्वस्य श्रोत्रेऽन्वयासङ्गतेरिति चेत्। न। अत्राभेदे पञ्चम्या विधानात्। [NSVV, pp. 23-24]

It may be noted that the rules of Sanskrit grammar do not seem to permit the solution favoured by Rāmabhadra and Rādhāmohana (viz. अभेदे पञ्चमी).

Mahāmahopādhyāya Bālakṛṣṇa Miśra, however, remarks in a similar situation :

न चैतदर्थकत्वं पञ्चम्या अदृष्टचरमिति देशनीयम्, "यत्साक्षादपरोक्षात्" इति श्रुतौ तस्या अभेदार्थकत्वस्य प्रतिपादितत्वात्।

(*Tātparyavivṛti* on NSV, p. 54]

(36) P. 20, l. 8. This *sūtra* presents some tough exegetical problems. Consequently, it has taxed the brains of many authors, and they have often tackled these problems in different ways. The first problem pertains to the roles assigned to the constituent terms of this *sūtra*, because it cannot be easily split up into लक्ष्य and लक्षण. Udayana raises this problem in a succint manner :

(i) तत्र चाद्ये पदे विभागपरे। ततः तदर्था इति लक्षणपदं चेत्, लक्ष्यपदं नास्ति। लक्ष्यपदं चेत्, लक्षणपदं नास्ति··· [TTP, p. 429]

Another problem pertains to the nature of nominal compound in the expression पृथिव्यादिगुणाः and the purpose served by the expression गन्धरसरूपस्पर्शशब्दाः. Vātsyāyana answers both these questions in the following manner :

(ii) पृथिव्यादीनां यथाविनियोगं गुणा इन्द्रियाणां यथाक्रममर्था विषया इति। [NB. p. 202]

Thus, for Vātsyāyana, the compound is षष्ठीतत्पुरुष.

This has not found favour with Uddyotakara, whose

treatment of the problem is a masterpiece of linguistic analysis :

(iii) पृथिव्यादिगुणा इत्येतस्मिन् पदेऽनेकः समासः सम्भवति। कथमिति? पृथिव्यादीनां गुणा इति षष्ठीसमासः, पृथिव्यादीनि च गुणाश्चेति द्वन्द्वः, पृथिव्यादयो गुणा येषामिति बहुव्रीहिः, एवमनेकसमासोपपत्तेः संशयः—किमत्र तत्त्वमिति? षष्ठीसमासस्तावन्न, पृथिव्यादीनामनिन्द्रियार्थत्वप्रसङ्गात्। यदि पृथिव्यादीनां गुणा इति षष्ठीसमासः स्यात्, विशेषणवैयर्थ्यं च स्यादिति। गन्धरसरूपस्पर्शशब्दा इत्युक्ते पृथिव्यादिगुणा गम्यन्ते, ततश्च पृथिव्यादिग्रहणं व्यर्थम्। न हि गन्धादीनां द्वैराश्यमस्ति पृथिव्यादिगुणत्वं चान्यगुणत्वं च, यतो विशेषणमर्थवत् स्यात्, तस्मान्न षष्ठीसमासः। गुणिनामसिद्धेर्न बहुव्रीहिः पृथिव्यादयो गुणा येषाम्, के ते गुणिनो येषां पृथिव्यादयो गुणाः। न च पृथिव्यादीनां गुणत्वं शक्यं प्रतिपादयितुम्। न चान्यथा बहुव्रीहिः।...... उभयसमासप्रतिषेधादन्यसमासासम्भवाच्च द्वन्द्वः।...... न द्वन्द्वः, शास्त्रयुक्त्योरभावात्......न, उभयस्याप्युपपत्तेरिति।......... शास्त्रं तावत्—दर्शनस्पर्शनाभ्यामेकार्थग्रहणादिति। युक्तिरपि दर्शनस्पर्शनयोरेकविषयत्वेन प्रतिसन्धानम्, यमहमद्राक्षं तं स्पृशामीति दृष्टिस्पर्शनविषया युक्तिः......ऐन्द्रियकत्वाभिधानाच्च सामान्यस्येति। तस्मात् सिद्धं पृथिव्यादीनि च गुणाश्चेति द्वन्द्वः समास इति।

पृथिव्यादिग्रहणेन पृथिव्यप्तेजांसि बाह्यकरणग्राह्याण्यपदिश्यन्ते, गुणग्रहणेन च सर्वं आश्रितो गुण इति संख्यापरिमाणपृथक्त्वसंयोगविभागपरत्वस्नेहवेगकर्मसामान्यविशेषाः, अनाश्रितश्च समवायस्तद्धर्मत्वाद् गुण इति।.........गन्धरसरूपस्पर्शशब्दानां पृथगभिधानमिन्द्रियविशेषनियमज्ञापनार्थम्। इन्द्रियाणि गन्धरसरूपस्पर्शशब्देषु तत्सामान्येषु नियतानि, अन्यत्रानियतानि। तत्र पृथिव्यप्तेजांसि द्वीन्द्रियग्राह्याणि, शेषश्च गुणराशिः। सत्तागुणत्वे च सर्वेन्द्रियग्राह्ये, समवायोऽभावश्च तथा। [NV, pp. 202-204]

As can be seen, Uddyotakara endorses Vātsyāyana's opinion about the expression गन्धरसरूपस्पर्शशब्दाः. Most of the subsequent commentaries treat पृथिव्यादिगुणाः as a case of द्वन्द्वसमास, but there have been many alternative interpretations of the other terms, which will be indicated in brief.

Vācaspati Miśra II offers two interpretations of this *sūtra* :

(iv) अत्रोद्देशैकवाक्यतावश्यकत्वात् तत्स्मारिता एवार्था लक्ष्याः। तदर्था इति लक्षणम्। तदितीन्द्रियमात्रपरामर्शः। शेषः विभागः। पृथिव्यादिपदमैन्द्रियकद्रव्यपरम्। गुणपदमैन्द्रियकधर्मपरम्। अत्र च द्वन्द्वः समासः, समासान्तरे तुल्यवत्प्राधान्यानुपस्थितेः। गन्धादिसंग्रहशक्तमपि गुणपदं तत्समाहारेण तदन्यधर्मपरम्, गोवृषन्यायात्। पृथगुपादानञ्च गन्धादीनां निर्वेदोपयोगिनियतेन्द्रियविषयत्वस्फोरणाय— इति प्राञ्चः।

अर्वाञ्चस्तु—शब्दा इत्यन्तेन लक्ष्यनिर्देशः। तदर्था इति लक्षणम्, बहिरिन्द्रियविषया इत्यर्थः। लक्ष्यपदावृत्त्या विभागः। पृथिव्यादिगुणा इति विशेषलक्षणानि, पृथिवीमात्रवृत्तिगुणत्वावान्तरजातिमत्त्वम्, एवं द्वित्रिचतुर्द्रव्यवृत्तितया शब्दस्याकाशमात्रवृत्तितया लक्षणं नेयम्, ऐन्द्रियकत्वविशेषणान्न रसलक्षणस्य गुरुत्वेऽतिव्याप्तिः, समस्तपृथिव्यादित्रिकवृत्तितया न रूपलक्षणस्य द्रवत्वेऽतिव्याप्तिः, द्रव्यादयस्त्वर्था एव— इत्याहुः। [NTA, I.O.L. Mss, fol. 56b]

Keśava Miśra records three interpretation, of which the first and third ones agree with the first and second interpretations given by Vācaspati Miśra II respectively. The second one is :

(v) केचित्तु—गन्धादयः पृथिव्यादिगुणा इति लक्ष्यनिर्देशः, तदर्था इति लक्षणम्—इत्याहुः। [GSP, p. 10]

Viśvanātha more or less agrees with Vātsyāyana, but he justifies the word तदर्थाः in a novel manner :

(vi) वैशेषिकानां द्रव्यगुणकर्मस्वर्थशब्दाभिधेयत्वमतः पञ्चानां गन्धादीनामेव तत्त्वमित्याशङ्कानिरासाय तदर्था इत्युक्तम्। तेषामिन्द्रियाणामर्थाः विषया, उद्दिष्टा अपि त एवेत्याशयः। इत्थञ्च तदर्थत्वं लक्षणमिति मन्तव्यम्। तच्छब्देन वहिरिन्द्रियाणि परामृश्यन्ते।...... पृथिव्यादिगुणा इति लक्ष्यनिर्देशः। के ते गुणा इत्याकाङ्क्षायां गन्धेत्यादि। पृथिव्यादीनां गुणा इति षष्ठीसमासो भाष्यसम्मतः, तेन गुणगुणिनोरभेदो नेति सूचितम्। [NSV, pp. 202-207]

Rādhāmohana offers an almost identical interpretation. Neither Viśvanātha nor Rādhāmohana have furnished any reason for rejecting the द्वन्द्वसमास suggestsed by Uddyotakara.

Different authors also propose different definitions of अर्थ. Thus, for Vācaspati Miśra I, अर्थत्व is इन्द्रियैरर्यमाणत्व—a definition that depends on etymology [NVTT, p. 202]. For Udayana, अर्थत्व is प्रतीतिविषयतया भोगसाधनत्व [LM, p. 24]. Vācaspati Miśra II records a definition formulated by 'earlier' Naiyāyika-s :

(vii) प्राचां मते सामान्यलक्षणम्—अनागतगोचराभूतहेतुप्रत्यासत्त्यजन्यजन्यसाक्षात्कारविषयत्वम्। अर्थविशेषाणामनन्तत्वात् तल्लक्षणानि सूचितानीति लोकत एवावगन्तव्यानि।

[NTĀ. I.O.L. Mss, p. 56b]

Keśava Miśra furnishes a much simpler definition :

(viii) ......इन्द्रियैरर्यमाणत्वं लक्षणमर्थानाम्। लौकिकप्रत्यक्षविषयत्वमिति यावत्। [GSP, p. 10]

Viśvanātha more or less accepts the first definition given by Rāmabhadra :

.........एकैकबहिरिन्द्रियमात्रग्राह्यविशेषगुणत्वम् अर्थत्वम्, बहिरिन्द्रियद्वयाग्राह्यबहिरिन्द्रियग्राह्यगुणत्वं वा...... [NSV, p. 205]

Rādhāmohana adopts the second definition suggested by Viśvanātha. [NSVV ; p. 25]

(37) P 21, l. 8. Vācaspati Miśra II records two interpretations of this *sūtra*, and rejects one of them :

अत्र बुद्धिरिति लक्ष्यनिर्देशः, उपलब्धिर्ज्ञानमित्यनर्थान्तरं पर्यायो यस्याः सेति लक्षणमित्येके। तन्न, तत्पर्यायस्य शब्दधर्मत्वेनार्थालक्षणत्वात्।

अन्ये तु—विभागोद्देशसूत्राल्लक्ष्योपस्थितिः, एतत्सूत्रात् पर्यायताधीः, तथा चेश्वरसङ्केतेन बुद्ध्यादिपदत्रयवाच्यत्वं बुद्धित्वम्।

[NTĀ, I.O.L. Mss, fol. 57b]

Keśava Miśra also reports these two interpretations.

[GSP, p. 10]

(38) P. 21, l. 12. The relevant passage of *Nyāyavārttika* runs as :

एतैः पर्यायशब्दैर्योऽभिधीयते पदार्थः सा बुद्धिरिति। पर्यायशब्दाः कथं लक्षणम्? व्यवच्छेदहेतुत्वात्। सर्वं हि लक्षणमितरपदार्थव्यवच्छेदकम्, एतैश्च पर्यायशब्दैर्नान्यः पदार्थोऽभिधीयत इत्यसाधारणत्वाल्लक्षणत्वम्। [NV, pp. 213-214]

(39) P. 22, ll. 16-17. Viśvanātha makes a similar observation :

युगपत्—एककाले। एकात्मनीति पूरणीयम्। [NSV, p, 25]

Rādhāmohana repeats these very words. [NSVV, p. 25]

(40) P. 24, l. 9. Keśava Miśra also reports this view :

यदिन्द्रियसंयोगासंयोगाभ्यां ज्ञानस्योत्पत्त्यनुत्पत्ती भवतस्तन्मनोऽभ्युपेयम्......एतदेव च लक्षणं मनस्त्वं वा जातिविशेष इति।

[GSP, p. 10]

(41) P. 24, ll. 10-12. This seems to have been borrowed from Vācaspati Miśra II, who says :

(i) एवञ्च निःस्पर्शतया निरवयवस्य मनसो वैभवनिषेधेऽणुत्वपर्यवसाने निःस्पर्शपरमाणुत्वं मनोलक्षणं पर्यवसितम्··

[NTĀ, I.O.L. Mss, fol. 59a]

Viśvanātha also mentions this definition. [NSV, p. 218]

In his *Lakṣaṇamālā*, Udayana defines मनस् as :

सर्वात्मविशेषगुणसाधनं मनः। [LM, p. 24]

(41) P. 25, ll. 1-3. Vācaspati Miśra II offers the following comments :

अत्र प्रवृत्तिरिति अदृष्टहेतुसंसारियत्नपरं लक्ष्यनिर्देशः, आदौ सामान्यलक्षणस्याकाङ्क्षातः इममेव वाऽवृत्त्या अदृष्टजनकानित्ययत्नपरं सामान्यलक्षणम्, अन्यथा प्रवृत्तिपदमनन्वितमेव स्यात्, द्वन्द्वोत्तरवर्त्तिनः आरम्भपदस्य रागादिविशेषलक्षणेषु तु लक्ष्योपस्थितिर्लोकात्, विशेषपरत्वेन प्रवृत्तिपदावृत्तेर्वा। तत्राद‍ृष्टजनकानित्ययत्नत्वं सामान्यलक्षणम्। वचनोत्पत्तिद्वारा अदृष्टहेतुरनित्ययत्नो वागारम्भः, आत्मधर्मोत्पादनद्वारा तादृशः प्रयत्नो बुद्ध्यारम्भः, बुद्ध्यतेऽनेनेति बुद्धिर्मनः, भोगावच्छेदकक्रियाद्वारा तादृशः प्रयत्नः शरीरारम्भः।

अन्ये तु—जन्महेत्वदृष्टहेतुयत्नत्वं सामान्यलक्षणमाद्यम स्वसमानाधिकरणसंसारजनकयत्नपरं, प्रतिपदं तत्र लक्ष्यपरम्; कारीर्यादृष्टं यद्यस्ति, तत्रापि संसाराजनकत्वादलक्ष्यत्वम्; प्रवृत्तिपदमेवावृत्त्या विशेषपरं सत् विशेषलक्षणेष्वपि लक्ष्यपरम्—इत्याहुः।

[NTĀ, I.O.L. Mss, fol. 59a-59b]

Rāmabhadra disagrees with both these interpretations, as is evident from his remark—

न चादृष्टाजनके लौकिकप्रयत्ने भागवतयत्ने वाऽतिव्याप्तिः, तयोरपि लक्ष्यत्वात्, अदृष्टस्वरूपयोग्यत्वेन प्रयत्नमात्रस्यैव हेतुत्वात्।

(*c*) Keśava Miśra upholds the definition proposed by Vācaspati Miśra II :

आरम्भः प्रयत्नः। तथा चादृष्टजनकानित्यप्रयत्नः प्रवृत्तिरिति सामान्यलक्षणम्। वचनोत्पादद्वारेणादृष्टजनकः प्रयत्नो वागारम्भः। आत्मधर्मोत्पादनद्वारा तादृशः प्रयत्नो बुद्ध्यारम्भः; तेनेच्छाद्वेषदयानामपि

संग्रहः ।...भोगावच्छेदकक्रियाजननद्वारा तादृशः प्रयत्नः शरीरारम्भः । तेन हस्तादिक्रियाऽपि लक्ष्यते ।......[GSP, pp. 10-11]

It seems that both Vācaspati Miśra II and Keśava Miśra have elaborated upon a definition proposed by Udayana in his *Tātparyaṭīkāpariśuddhi* :

(*d*) प्रवृत्तेः विकल्पसमुच्चयाभ्यामव्यापकतया नेदं सामान्यलक्षणम् । न च तदन्तरेण विशेषलक्षणावकाश इत्याशंक्य सूत्रवाक्यं भिनत्ति—आरम्भः प्रवृत्तिः । जन्महेतुः स्थिरात्मविशेषगुणजनकः प्रयत्न आरम्भः । न चैवं दयाद्यव्याप्तिः, तत्रापि तदर्थं प्रयत्नस्य विद्यमानत्वात् । यदि त्वयतमानस्यैवेच्छामात्रं ज्ञानमात्रं द्वेषमात्रं वा प्रवृत्तिः स्यात्, प्रवर्तमानं प्रति प्रयोजकत्वममीषां निवर्तेत । ततश्चोत्तरसूत्रव्याघात इति ।

[TTP, 5. 444]

Viśvanātha has recorded the view of Udayana as an alternative interpretation :

(*e*) प्राञ्चस्तु—सामान्यविशेषलक्षणेष्वदृष्टजनकत्वं निवेशयन्ति । इयं च कारणरूपा प्रवृत्तिः, कार्यरूपा तु धर्माधर्मेति । [NSV, p. 219]

(42) P. 25, l. 6 : Rāmabhadra has ascribed here the interpretation offered by Vātsyāyana to Uddyotakara. The relevant passages of *Nyāyabhāṣya* and *Nyāyavārttika* are as follows :

(*a*) मनोऽत्र बुद्धिरित्यभिप्रेतम्, बुद्ध्यतेऽनेनेति बुद्धिः ।

[NB, p. 218]

(*b*) प्रवृत्तिर्वाग्बुद्धिशरीरारम्भ इति । शरीरेण मनसा वाचा च ।

[NV, p. 218]

(43) P. 25, l. 7. Here, again, Rāmabhadra ascribes an interpretation to Uadayana, the credit for which should have gone to Vācaspati Miśra I. The relevant passages of *Nyāyavārttikatātparyaṭīkā* and *Tātparyaṭīkāpariśuddhi* as follows :

(*a*) आरम्भः प्रवृत्तिः। सा च द्विविधा, ज्ञानहेतुः क्रियाहेतुश्च। तत्र या ज्ञानोत्पादद्वारेण पुण्यपापहेतुः सा वाक्प्रवृत्तिः। वागिति च ज्ञापक-हेतूपलक्षणम्। तेन मनसा इष्टदेवताद्यनुचिन्तनं चक्षुरादिभिश्च साध्व-साधुदर्शनादि सूचितं भवति। क्रियाहेतुर्द्वयी, कायनिमित्ता मनोनिमित्ता च। [NVTT, p. 219]

(*b*) सा च द्विविधेति। ज्ञातुं ज्ञापयितुं वा प्रयत्नः उभयथापि ज्ञानहेतुः। तेन वागगोचरोऽपि प्रयत्नः संगृहीतः। कर्त्तुं कारयितुं वा प्रयत्नः उभयथापि क्रियाहेतुः। स्तेयहिंसादौ अज्ञानादिगोचरोऽपि प्रयत्नः संगृहीतः।… कायनिमित्तेति। कायो निमित्तं विषयतया यस्याः सा तथोक्ता। दान-स्तेयाद्यर्थं खलु यः प्रयत्नः स कायविषयो भवति। एवं मनोनिमित्तं दयाद्रोहाद्यर्थं यः खलु प्रयत्नः, स मनोविषयो भवतीति नेयम्। अन्यथा नास्त्येवासौ पुरुषव्यापारो यत्र कायमनसी न निमित्तमिति॥

[TTP, pp. 444-445]

(44) **P. 26, ll. 15-19. Vācaspati Miśra II has raised some interesting problems regarding दोष :**

दोषा रागद्वेषमोहाः। बहुवचनेन विभागः सूचितः। प्रवर्त्तना-लक्षणा इति लक्षणम्। प्रवृत्त्यनुकूलो व्यापारः प्रवर्त्तना। प्रवृत्तिश्चेहा-नन्तरोक्ता, व्यापारः फलगोचररागादीनां साधनगोचरो रागादिः। ननु साधनरागादीनां प्रवृत्तौ जनयितव्यायां न कश्चिद्व्यापार इति तदव्याप्तिरिति चेत्। न। प्रत्यक्षात्मविशेषगुणत्वस्य तदर्थत्वात्। ननु कथं तर्हि रागादिव्यापारकत्वमुक्तम्? व्यापारत्वेन व्यापारित्वेन च प्रवृत्तिजनकत्वख्यापनार्थम्। न च मोहस्य प्रवृत्तिजनकत्वानुपपत्ती रागादिनाऽन्यथासिद्धेरिति वाच्यम्, तस्याप्यनुविधानात्, कारणता-मात्रस्य दुरपह्नवत्वात्। तत्रादृष्टजनकयत्नजनकेच्छा रागः, द्वेषत्ववान् द्वेषः, मिथ्याधीर्मोह इति विशेषलक्षणानि।

[NTĀ, I.O.L. Mss, fol. 59b]

(45) P. 26. ll. 3-4 : Vācaspati Miśra II explains this *sūtra* in a more systematic manner, even though he arrives at the same meaning :

अत्र प्रेत्यभाव इति लक्ष्यनिर्देशः। शेषं लक्षणम्। पुनः शब्दोऽभ्यासार्थः। उत्पत्तिर्जन्म। तथा च जातस्य द्वितीयं जन्म पुनर्जन्म, तच्चान्तरा मरणाद्विना नेति मरणपूर्वकं जन्म प्रेत्यभाव इति पर्यवसितम्। [NTĀ. I.O.L. Mss, fol. 60a]

(46) P. 26, l. 7- P. 27, l. 6 : (*a*) Vācaspati Miśra II also proposes an interesting definion of प्रेत्यभाव :

यद् वा—आद्यविशेषगुणजनकसंयोगनाशकात्मविशेषगुणजनकसंयोगनाश्यशरीरात्मविभागपूर्वकात्मशरीरविशेषगुणजनकशरीरध्वंसाजन्यशरीरवृत्त्यात्मविशेषगुणजनकसंयोगनाशकविभागनाशकात्मविशेषगुणजनकात्मसंयोगः प्रेत्यभावः। विभागान्तं प्रायणस्य, शेषं जन्मनो लक्षणम्। तत्राद्ये शरीरेत्यादौ कृते जीवद्दशाकविभागेऽतिव्याप्तिरतस्तद्वारणाय मध्यविभागस्य विशेषणम्। जीवद्दशायां सर्व एव शरीरात्मविभागा आत्मविशेषगुणजनकेनैव संयोगेन नाश्यन्ते, सुषुप्तावपि विधारकप्रयत्नोत्पत्त्यङ्गीकारात्। एवमपि परात्मदेहविभागे परात्मदेहसंयोगनाश्ये अतिव्याप्तिरिति तद्वारणाय नाशकान्तं विभागविशेषणम्, अयन्तु विभागो नात्मविशेषगुणजनकसंयोगनाशकः, किन्तु पण्डं परात्मदेहसंयोगं नाशयति।···[NTĀ, I.O.L. Mss, fol. 60-60a]

(*b*) Keśava Miśra proposes a much simpler definition :

···तदीयभोगजनकशरीरादिविश्लेषपूर्वकं तदीयभोगजनकशरीरादिप्राप्तिरूपा पुनरुत्पत्तिः प्रेत्यभाव इत्यर्थः। प्राप्तिश्च संयोगः, पूर्वोत्तरशरीरं चैत्रत्वाव्यवच्छिन्नं द्रष्टव्यमतो न बाल्ययौवनादिभिन्नेऽतिव्याप्तिः। [GSP, p. 11]

(47) P. 28, 8-12 : Vācaspati Miśra II offers the following interpretation :

अत्र जनित इत्येव फललक्षणम्, फल निष्पत्ताविति धात्वनुसारात्; प्रवृत्त्यादिसम्बन्धकथनं त्वनेनापि रूपेण निर्वेदाय, अर्थग्रहणमभिव्याप्तये। यद्यपि निर्वेदोऽपि प्रवृत्तिजन्यत्वकथनेन निर्वहति, तथापि दोषजत्वोत्कीर्त्तनं न केवलं प्रवृत्तिं प्रति दोषाणां हेतुत्वम्, अपि तु तज्जकार्यसुखदुःखे अपि प्रति—इति दर्शयितुम्। तथा च दोषजन्यत्वस्य तज्जनकत्वेन व्याप्तत्वात् जीवन्मुक्तस्य सुखदुःखे तदजन्यत्वान्न तज्जनके।

मादृशास्तु—ते तथेति विशेषो दर्शितः, जीवन्मुक्ते च रागद्वेषाभावो मोहाभावात्; तथा च दोषजनकभोगरूपफलस्य प्रवृत्तिजनितत्वं लक्षणम्। न चैवं प्रयोजनादविशेषः, तत्र दुःखस्य वहिर्भावादत्रान्तर्भावात्; योगिभोगस्य तु रागाद्यजनकत्वेनाहेयत्वात्तल्लक्षणस्यात्राकरणम्; अपवर्गस्य तु फलत्वेऽप्यनर्थासम्भेदान्न हेयता, दोषजन्येष्वेव हेयत्वविश्रामात्। तथा च मूढभोगो मुख्यफलमिति फलितार्थः।

अन्ये तु—प्रवृत्तिजनितत्वं दोषजनितत्वञ्च प्रत्येकमेव लक्षणम्; तत्तु धर्माधर्मयोः साक्षात्, देहादीनान्तु तद्द्वारेति।

अपरे तु—प्रवृत्तिजनितत्वं जीवन्मुक्तसुखादावप्यस्ति, न च तत् फलम्, रागाद्यजन्यत्वात्, अतो दोषेति; तथा च प्रवृत्तिदोषाभ्यां योऽर्थो जनितस्तत् फलम्—इत्याहुः। [NTĀ, I.O.L. Mss, fol. 61b]

Rāmabhadra has obviously adopted the last interpretation recorded by Vācaspati Miśra II.

Keśava Miśra has accepted and recorded respectively the first and second interpretations in NTĀ. [GSP, pp. 11-12]

(48) P. 28, ll. 12-15: Viśvanātha and Rādhāmohana have adopted this view:

(*a*) लक्षणं तु सुखदुःखान्यतरसाक्षात्कार इति। गौणं फलं तु शरीरादिक सर्वमेव।...इत्थं च जन्यत्वमेव फलत्वम्, प्रवृत्तिदोषजनित इति तु निर्वेदोपयोगादुक्तम्। [NSV, p. 223]

(*b*) तत्र प्रवृत्तिदोषेति स्वरूपकीर्त्तनम्…लक्षणं तु जन्यत्वमेव। फलमपि द्विविधं मुख्यं गौणं चेति। तत्र मुख्यं सुखं दुःखं तत्-साक्षात्कारः।…तदन्यत् सर्वं गौणमिति। [NSVV, p. 28]

(49) **P. 28, l. 18–P. 29, l. 5 : Here, Rāmabhadra seems to have drawn upon the commentary of Vācaspati Miśra II, which runs as :**

बाधना पीडा दुःखमेव तल्लक्षणं परिचायकं यस्य तत्तथा। दुःखमिति लक्ष्यनिर्देशः, हेयमिति तदर्थः। हेयत्वप्रतिपादकरूपप्रतिपादनाय च दुःखपदेनव्यपदेशः, लोकसिद्धञ्च मुख्यं दुःखं परिचायकमिति नात्माश्रयः। तथा चात्मापवर्गयोरुद्देश्यत्वावश्यकत्वेन तदुभयान्यत्वे सति प्रमेयत्वमेव दुःख(लक्षण)मिह समुद्दिष्टम्। तत्र शरीरस्यावच्छेदकत्वं, कारणत्वञ्च, इन्द्रियानां साधनत्वम्, सुखस्याविनाभावः, दुःखस्याप्ययमेव तादात्म्यं वा, न हि तदविनाभावो न तत्र।

बाधनेति तद्विषयां धियमुपलक्षयति, तथा चात्मापवर्गान्यत्वे सति दुःखविषयबुद्धिविषयप्रमेयत्वमेव दुःखलक्षणमिति वाचस्पतिमिश्राः।

अन्ये तु—बाधनापदं दुःखपरम्, तया च दुःखत्वयोगि दुःखमिति लक्षणं शाब्दम्, तदनुषङ्गाच्च देहादीनां हेयत्वमार्थम्, अन्यथा लक्ष्य-लक्षणपदयोर्ल्लक्षणाप्रसङ्गात्, अतएवाग्रिमसूत्रे तदिति सुःखदुःख-परामर्शतेत्याहुः। [NTĀ, I.O.L. Mss, fol. 61b-62a]

(50) **P. 29, l. 11 : Vācaspati Miśra II introduces this *sūtra* in the following manner :**

तदेवं प्रयेमलक्षणप्रकरणानन्तरं कथमेतत् प्रमाणेन बोध्यमित्यपेक्षायां न्याये व्युत्पाद्ये तस्याङ्गनिरूप्यतया तत्पूर्वाङ्गसंशयादित्रिकलक्षण-प्रकरणम्। [NTĀ, I.O.L. Mss, fol. 64a]

(51) **P. 29, ll. 14-16 : Here, the influence of Vācaspati Miśra I is quite pronounced, as would be evident from the passage of *Nyāyavārttikatātparyaṭīkā* quoted below :**

(*a*) अत्र च विमर्शः संशय इति संशयसामान्यलक्षणम्, तत्र च संशय इति लक्ष्यनिर्देशो विमर्श इति लक्षणपदम्। एकस्मिन् धर्मिणि विरोधिनानार्थावमर्शो विमर्शः, किंस्विदिति ज्ञानम्। [NVTT, p. 234]

Udayana's comments on these lines are as follows :

(*b*) ननु संशयसामान्यलक्षणं चेदिदम्, विमर्शः संशय इत्येतावदेवास्तु। विशेषलक्षणानि चेत्? नाकृते सामान्यलक्षणे तेषामवसरः। विमर्शसंशयपदयोरन्यतरत् अनर्थकमित्यत आह—अत्र चेति। लक्षणं लक्षणवाक्यम्। विमर्श इत्यनेन च विषयतः स्वरूपतश्च सामान्यलक्षणद्वयं सूचितम्। तत्र प्रथममाह—एकस्मिन्निति। विरोधिचतुरर्थावमर्श इति तु परिसंख्यानमनर्थकम्। 'स्थाणुर्वा पुरुषो वे'त्यत्र द्रव्यादेः अनन्तस्यावमर्शात्। प्राधान्येन चेत्? द्वयस्यैव। न ह्ययं निषेधः प्रधान इति। द्वितीयमाह—किंस्विदिति। किमित्युपक्रमे। स्विदिति पक्षान्तरे। तेन किमिदमेवम् उतस्विदेवमित्यर्थः।

[TTP, p. 487]

Vācaspati Miśra II accepts the view of Vācaspati Miśra I, and rejects an alternative explanation :

(*c*) अत्र संशय इति लक्ष्यनिर्देशः। विमर्श इति सामान्यलक्षणम्। न तु वैपरीत्यम्, उद्देशकपदेनैव लक्ष्यनिर्देशौचित्यात्, यौगिकविमर्शपदात् लक्षणलाभाच्च। तथा हि—विशब्दो विरोधार्थः, मर्शशब्दो ज्ञानार्थः, योग्यतया एकधर्मिलाभः, तेनैकस्मिन् विषये विरोधिनानाप्रकारकं ज्ञानं संशय इति लक्षणार्थः। [NTĀ, I.O.L. Mss. fol. 64a]

(52) P. 30, l. 14. Here, Rāmabhadra has accepted the interpretation of Uddyotakara and Vācaspati Miśra I, whose remarks in *Nyāyavārttika* and *Nyāyavārttikatātparyaṭīkā* are as follows :

(*a*) समानानेकधर्मोपपत्तेरिति सूत्रम्। तत्र समानधर्मोपपत्तेरनेकधर्मोपपत्तेर्विप्रतिपत्तेश्च त्रिविध एव संशय इतरपदाविशेषणाद् भवतीति

सूत्रार्थः। तत्र विषयस्वरूपानवधारणात्मकः प्रत्ययः संशयः......

[NV p. 234]

(*b*) तदनेनासमानजातीयेभ्यः प्रमाणादिभ्यः समानजातीयेभ्यश्च विपर्ययादिभ्यः संशयो निवर्तितो भवति, समानेत्यादीनि तु त्रीणि विशेषलक्षणानि। तेषु विमर्शः संशय इत्यनुवर्तनीयम्। अत्र विशिष्टोऽवमर्शो विमर्शविशिष्टः संशयो लक्ष्यपदम्, समानधर्मोपपत्तेरनेकधर्मोपपत्तेर्विप्रतिपत्तेरिति त्रीणि प्रत्येकं शेषैः पदैरुपेतानि लक्षणानीति, तदेतदाह वार्त्तिककारः—तत्र समानेति। त्रिविध एवेति ये पञ्चविधत्वमाचक्षते ते निराकृताः। [NVTT, p. 234]

Vācaspati Miśra II anticipates an objection at this point, and answers it as follows :

(*c*) अथ ज्ञानत्वरूपसमानधर्माध्यवसायजन्येन प्रामाण्यसंशयेन जनितोऽर्थसंशयः दुर्वारोऽस्तु। अत्रार्थघटितप्रामाण्यसंशय एवार्थसंशयो न त्वधिक इति केचित्। प्रामाण्यसंशयजन्योऽप्ययं कोटिस्मारकसमानधर्माध्यवसायजन्मापीति टीकाकृतः।

[NTĀ, I.O.L. Mss. fol. 65b]

(53) P. 30, l. 17. Here, the relevant passage of *Nyāyavārttika* reads as :

अनेकधर्मोपपत्तेः संशय इति। अनेकस्यानेकश्च धर्म इति केचित्, ...तदयुक्तम्, समानधर्मोपपत्तेरित्यत्र चरितार्थत्वात्।......अथानेकधर्मशब्दस्य कोऽर्थः? असाधारणो धर्मः। कथं पुनरसाधारणो धर्मोऽनेकधर्म इत्यनेन समासपदेनाभिधीयते? समानसमानजातीयविशेषकत्वात्, समानजातीयमसमानजातीयं चानेकम्, तस्माद्विशेषो विशेषको धर्मः अनेकस्माद्विशेषोऽनेकधर्म इति......एकानेकप्रत्ययहेतुर्वा धर्मोऽनेकधर्मः......यथा शब्दस्य विभागजत्वम्...... [NV, pp. 240-241]

The compound in अनेकधर्म is thus treated as a case of शाकपार्थिवादिवत् समास.

(54) **P. 31, ll. 17-18. Here, Rāmabhadra adopts the interpretation provided by Uddyotakara, who says :**

(*a*) विप्रतिपत्तेः संशय इति। व्याहतार्थप्रवादो विप्रतिपत्तिशब्दस्यार्थः, व्याहतार्थप्रवादविषयत्वमुपलभमानस्योपलब्ध्यनुपलब्ध्योश्चाव्यवस्थाने सति तद्गतविशेषानुस्मृतौ च सत्यां संशयो भवतीति।

[NV, pp. 248-249]

In defence of this interpretation, Vācaspati Miśra I says :

(*b*) यद्यपि विरुद्धा प्रतिपत्तिर्विप्रतिपत्तिः, तथापि तस्या वादिप्रतिवादिगताया अत्यन्तपरोक्षत्वात् संशयकारणत्वानुपपत्तेः स्वकार्यं प्रवादं लक्षयतीत्यर्थः। [NVTT pp. 242-250]

It may be noted that Rāmabhadra disagrees here with the later Naiyāyikas, who maintain that all doubts are perceptual in nature (परोक्षज्ञानमनाहार्यमसन्दिग्धम्), a view that is endorsed in the following passage of *Nyāyatattvāloka* of Vācaspati Miśra II :

(*c*) अत्राद्यौ द्वौ संशयौ सर्वेन्द्रियजौ, विप्रतिपत्तिजस्तु मानस एव, तथा हि प्रत्येकं समर्थाभ्यां विप्रतिपत्तिवाक्याभ्यां स्वस्वार्थयोः परस्परविधिनिषेधरूपयोरुपस्थाने विशेषादर्शनादिसमवधाने स्वविधेययोः कतरद्वस्तुसदिति मनसैव संशेते। [NTĀ, I.O.L. Mss. fol. 66a.].

Incidentally, it may be noted that Rāmabhadra's interpretation of the term विप्रतिपत्तेः also goes against the view of Vardhamāna Upādhyāya, which has been recorded by Rāmabhadra himself on p. 30, ll. 8-12 [viz. संशयत्वं नाम मानसत्वव्याप्यो जातिविशेषः, चाक्षुषादिकस्तु न संशयः···इत्यपि वर्द्धमानोपाध्यायैः···अवादि।] where all cases of संशय are treated as cases of internal perception.

(55) P. 31, ll. 15-17 : A similar view has been expressed by Vācaspati Miśra II :

समानधर्मोपपत्तेर्विमर्श इत्याद्यस्य लक्षणम्, उपपत्तिशब्दो ज्ञानार्थः, एवमन्त्ययोः। विधिप्रधानकसंशयादिकं प्रति समानधर्मज्ञानादेः कारणता

तृणारणिमणिवत् ।......... उपलब्धीत्यादि तु साधकबाधकमानाभावोपस्थापकम् । एवं साधकबाधकमानाभावोपस्थापकम् । एवं साधकबाधकमानाभावे सत्यपि न कोटिस्मृतिं विना संशय इति तदुपस्थापनाय विशेषापेक्ष इति पदम् । विशेषं स्थाणुत्वादिकमपेक्षते कारणतया स्वीकरोति, ज्ञानलाभस्तु तद्गर्भायामेवापेक्षायां तात्पर्यात् । एतच्च पदद्वयं संशयासाधारणसामग्रीकथनपरम्, न तु लक्षणान्तर्गतम्, विभागस्तु विशेषलक्षणबलादाक्षेपलभ्यः ।

[NTĀ, I.O.L. Mss, fol. 65b-66a]

(56) P. 32, l. 19– P. 33, l. 5 : Rāmabhadra refers here to Raghunātha Śiromaṇi, whose views are to be found in the section on *Satpratipakṣa* in *Tāttvacintāmaṇidīdhiti*, where Raghunātha discusses the theory of Taraṇi Miśra, the author of *Ratnakoṣa*. In technical terms, संशयत्व is treated here as अर्थसमाजग्रस्त. The relevant passage is as follows :

रत्नकोषकृतामयमभिप्रायः । एकधर्मिकाविरुद्धानेकप्रकारकनानाधर्मिकैकविरुद्धाविरुद्धनानाप्रकारकज्ञानत्वादिवदेकधर्मिकविरुद्धानेकप्रकारकज्ञानत्वरूपं संशयत्वं न जन्यतावच्छेदकम्, तत्तद्धर्मिकतत्तत्प्रकारकज्ञानत्वप्रयोजकसमाजप्रयोज्यत्वात् समाजस्य । क्वचिद्विरोधभानस्यापि तत्प्रयोजकाधीनत्वात् । नीलेतरघटत्वघटत्वाप्रकारकज्ञानत्वैकधर्मिकाविरुद्धानेकप्रकारकान्यज्ञानत्वादिवच्च संशयान्यज्ञानत्वादिरूपं निश्चयत्वमपि न जन्यतावच्छेदकम्, तत्त्वप्रयोजकविरहादेव तत्त्वविरहाद्युपपत्तेः । एवञ्च तुल्यबलाभ्यां विरुद्धोभयसामग्रीभ्यां जायमानं ज्ञानमर्थात् संशयरूपं भवति । अत एवाहत्यैव विप्रतिपत्तिजन्मानं संशयमामनन्ति । फलबलकल्पनीयश्च न्यूनाधिकसमबलभावः । सत्यामपि पीतत्वशुक्लत्वस्मृतौ सविधवर्त्तिनि शङ्खे सति दोषविशेषे पीतत्वस्यैवासति च शुक्लत्वस्यैव दूरस्थे च धर्मिणि असति विशेषदर्शने स्मृतयोरेव कोट्योः सति च एकस्या एव नयनेन ग्रहात् । अथैवमुद्-

बुद्धाभ्यां विरोधिसंस्काराभ्यां स्मरणमपि संशयात्मकं स्यात्, किं न स्यात्, यदि च नाऽनुभवबाधः, येन गुरुणाऽपि निश्चयत्वेन संस्कार-जनकत्वमुपेयते भवता। अथ विरोधिनो निर्णयोऽनुमितिप्रतिबन्धको विरोधित्व···सहानवस्थायित्वं साध्याभावस्येव तद्व्याप्यस्यापीति चेत्। यदि वस्तुतो विरोधिनो निर्णयस्तथा, कथं तर्हि पक्षतावच्छेदकत्वा-देस्तादृशस्य निश्चये भूमानुमितिः। अथ विरोधित्वेन, तदा तद्ग्रहे 'नेह साध्यमि'त्यादिनिर्णयेऽप्यनुमितिप्रसङ्गः। अथ विशेषदर्शनं विरोधिबुद्धिप्रतिबन्धकम्, कथमन्यथा तदनन्तरं न भ्रमसंशयाविति चेन्न। सत्यपि शुक्लत्वादिव्याप्यदर्शने शङ्खयादौ दुष्टेन नयनेन पीतत्वादेरदुष्टेन च पीतत्वादिव्याप्यवत्तानिश्चये सत्यपि शुक्लत्वादेर्ग्रहात्, सति च विशेषदर्शने क्वचिदुपनीतभानानुदयात् दूरतः प्रमितस्य स्थाणुत्वादेः शाखादौ करादिभ्रमेणाऽग्रहात् तत्तत्स्थलविशेष एव तस्य प्रतिबन्धकत्वमिति।

अत्राहुः। अनुगतकार्यकारणभावानुरोधात् दोषविशेषाद्यजन्ये ज्ञाने कदाचिदनुभवे वा विशेषदर्शनं विरोधि कल्प्यते। न च प्रत्यक्ष एव तथा, सामान्ये बाधकाभावात्, बोध्याभावव्याप्यवत्तानिश्चयेन शाब्दादिधी-प्रतिबन्धाच्च। अथ विशेषान्तरदर्शनविरहविशिष्टमेव तत्तथा, अन्यथा कोटिद्वयविशेषदर्शने संशयो न स्यादिति चेन्न। भवत्येव तावद् यावदप्रामाण्यं न गृह्यते, अगृहीताप्रामाण्यकस्यैव विशेषदर्शनस्य विरोधित्वादिति।

[*Tattvacintāmaṇi* with *Dīdhiti* and *Jāgadīśī*, pp. 1153-1163]

(57) P. 33, l. 6 : Vācaspati Miśra II introduces and explains this aphorism in the following manner :

न्यायपूर्वाङ्गत्वाविशेषेऽपि सन्दिग्धे प्रयोजनानुसरणात् इच्छा-विशेषजनकस्य संशयस्य इच्छाघटितप्रयोजनप्रयोजकत्वाच्च संशया-नन्तरं प्रयोजनमनुसन्धाय न्यायार्थं दृष्टान्तानुसरणमिति। तत्र प्राक्

अस्योद्देश इति तयैव सङ्गत्या प्रयोजनलक्षणाय सूत्रम्—

॥ यमर्थमधिकृत्य प्रवर्त्तते तत् प्रयोजनम् ॥

अर्थपदेनार्यमाणतया व्यापकत्वं ज्ञापयति, तेन न सुखाद्येव प्रयोजनं किन्तु तदुपायोऽपीति लभ्यते। अधिकृत्य उद्दिश्य, तथा च प्रवृत्तिभूतेच्छाविषयत्वं लक्षणमुक्तम्, यद्विषयतयेच्छायाः प्रवृत्तिहेतुत्वमिति तस्यार्थः। तेन नेच्छावच्छेदकेषु सुखत्वादिष्वव्याप्तिः। तच्च प्रयोजनं द्वेधा, मुख्यामुख्यभेदात्, यमिति सर्वनाम्ना बुद्धिस्थवाचकेन विभागसूचनात्। तत्र जन्येच्छाऽजन्यजन्येच्छाविषयत्वं मुख्यत्वम्, जन्येच्छाजन्येच्छाविषयत्वं गौणत्वम्। मण्डलीकरणादेरपि गौणप्रयोजनत्वमस्त्येव व्यवहारतौल्यादित्येके। तन्न, प्रयोजनव्यवहारस्तु भ्रमात्, तथा चेष्टसाधनताप्रमाजन्येच्छाविषयत्वं गौणत्वम्—इत्यपरे। अस्य तु स्वज्ञानद्वारा न्यायप्रवर्त्तकतया तदुपयोगः।

[NTĀ, I.O.L. Mss. fol ; 66a-66b]

The influence of this passage on Rāmabhadra is quite discernible (cf. P. 33, ll. 7-10 and ll. 15-19).

(58) P. 34, ll. 5-6 : The relevant portion of *Nyāyavarttika-tātparyaṭikā* runs as :

दृष्टान्त इति लक्ष्यनिर्देशः, शेषं लक्षणम्। साध्यसाधर्म्यात्तद्धर्मभावित्वेनार्थ्यते तथा साध्यवैधर्म्यादतद्धर्मभावित्वेनार्थ्यते यः सोऽर्थस्तस्मिन्, तथा च नातिव्याप्तिः। उदाहरणसूत्राच्चेदृशविशेषप्रतिलम्भः।·········शास्त्रपरिशीलनलब्धजन्मा बुद्ध्यतिशयो वैनयिकः, तद्रहिता लौकिकाः, प्रतिपाद्या इति यावत्। तद्विपरीतास्तदुभयसम्पन्नाश्च परीक्षकाः, प्रतिपादका इति यावत्, कथाबहुत्वाद् बहुवचनम्। तदनेन वादिप्रतिवादिनौ दर्शितौ, तयोर्बुद्धिसाम्यं व्याचष्टे···[NVTT, p. 258.]

(59) P. 34, 6-8 : (*a*) The relevant portion of *Nyāyavārttika* runs as :

बुद्धिसाम्यविषयो दृष्टान्तः। एवं चाकाशाद्यवरोध इति। यदि पुनरेवमवधार्यते लौकिकानां परीक्षकाणां च यो विषयः स दृष्टान्त इत्यलौकिकार्थो न दृष्टान्तः स्यादाकाशादिरिति। उदाहरणत्वेन तु लौकिकपरीक्षकविषयस्याभिधानम्, न तु लौकिकपरीक्षकाणामेवेति।

[NV, pp. 258-259]

(*b*) Vācaspati Miśra II introduces and explains the दृष्टान्तसूत्र as follows ;

सप्रयोजने न्याये ज्ञाते दृष्टान्तानुसरणमिति प्रयोजनादस्यापकर्षोऽभ्युपगमप्रयोजनकतया च दृष्टान्तादभ्युपगमापकर्ष इत्युद्देशक्रमसङ्गत्या दृष्टान्तलक्षणाय सूत्रम्—

॥ लौकिकपरीक्षकाणां यस्मिन्नर्थे बुद्धिसाम्यं स दृष्टान्तः ॥

अत्र दृष्टान्त इति लक्ष्यनिर्देशः, शेषं लक्षणम्। अनभ्यस्तशास्त्राः प्रतिपाद्या लौकिकाः, प्रतिपादकाः परीक्षकाः। तथा च प्रतिपाद्यप्रतिपादकसंप्रतिपत्तिविषयत्वमुक्तम्, तच्च प्रकरणात् व्याप्यप्रयुक्तव्यापकत्वे, तेन व्याप्यव्यापकत्वाभिमतसामानाधिकरण्यावच्छेदकधर्मवत्त्वं दृष्टान्तत्वम्। अत्रोदाहरणसूत्रद्वयदर्शनादार्थो विभागः, अन्वयव्यतिरेकभेदात्। तत्र साध्यसाधनाभिमतव्याप्तिधीकारणै तदुभयान्वयसामानाधिकरण्यावच्छेदकधर्मवत्त्वमन्वयदृष्टान्तत्वम्, साध्यसाधनाभिमतव्याप्तिधीकारणै तदुभयव्यतिरेकसामानाधिकरण्यावच्छेदकधर्मवत्त्वं व्यतिरेकदृष्टान्तत्वम्, साध्यसाधनाभिमतप्रतियोगिकव्यतिरेकव्याप्तिधीकारणैतदुभयसामानाधिकरण्यावच्छेदकधर्मवत्त्वं वा।

अथोदाहरणादेव व्याप्तिधीसिद्धेर्व्यर्थमिदमिति। तन्न, विशेषानुपदर्शने सामान्योपस्थितेरपर्यवसानात्। सामयिकन्त्विदमित्यन्ये।

दृष्टान्तत्वस्य केवलान्वयित्वेनालक्ष्यतया लक्ष्यते ज्ञायतेऽनेनेति-व्युत्पत्त्या लक्षणं प्रवृत्तिनिमित्तमेवोक्तम्। बुद्धिसाम्यमिति तु प्रमा-

णोपदर्शनम् , न हि बुद्ध्यविषयेण ज्ञानेन दृष्टान्तो गृह्यते—इति भास्करादयः। साध्यवैकल्याद्युद्भावनेन परनिग्रहद्वारा न्यायोत्थिति-द्वारा चास्योपयोगः। [NTĀ, I.O.L. Mss, fol. 66b-67a.]

This passage contains the view expressed in *Nyāyabhāskara*, a lost Nyāya work.

(60) P. 34, ll. 17-18. This has been indirectly criticized by Viśvanātha in his *Nyāyasūtravṛtti* :

(*a*) अत्र च भाष्यानुसारात् सर्वं तन्त्रप्रतितन्त्राधिकरणाभ्युपगम-सिद्धान्तान्यतमः सिद्धान्त इति सूत्रार्थ इति तु न युक्तम् , अग्रिमसूत्रा-नुत्थानापत्तेः।

तन्त्रसिद्धान्तत्वेन द्वयमनुगमय्य तन्त्राधिकरणाभ्युपगमान्यतमः सिद्धान्त इति कश्चित्। [NSV, p. 261]

Viśvanātha's own explanation of this aphorism runs thus :

(*b*) तन्त्रं शास्त्रं तदेवाधिकरणं ज्ञापकतया यस्य तादृशो योऽभ्युपग-मस्तस्य समीचीनतयाऽसंशयरूपतया स्थितिः ; तथा च शास्त्रितार्थनि-श्चयः सिद्धान्तः। [NSV, p. 260]

There is an apparent inconsistency among *Nyāyabhāṣya*, *Nyāyavārttika* and *Nyāyavārttikatātparyaṭika* about the exact nature of सिद्धान्त. Viśvanātha has sumed up the problem and solved it in a precise manner :

(*c*) अत्र च 'अभ्युपगम्यमानोऽर्थः सिद्धान्त' इति भाष्यम्। 'अभ्युप-गमः सिद्धान्त' इति वार्त्तिकटीके। न चात्र विरोधः शङ्क्यः, आचार्यैः परिहृतत्वात्। तथा च त्रिसूत्रीनिबन्धः—'अर्थाभ्युपगमयोर्गुणप्रधान-भावस्य विवक्षातन्त्रत्वादर्थाभ्युपगमोऽभ्युपगम्यमानो वाऽर्थः सिद्धान्तः'। तेन सूत्रभाष्यवार्त्तिकटीकासु न विरोधः।

[NSV. pp. 260-261]

(61) P. 34, ll. 18-20 : The relevant portion of *Nyāyavārtika* is as follows :

'इदमित्थम्भूतं चे'ति भाष्यम् । इदमिति सामान्यतोऽवगममाह । इत्थम्भूतं चेति विशेषतः । एतदुक्तम्भवति—सामान्यविशेषवदर्थाभ्यनुज्ञा सिद्धान्त इति । अस्यार्थस्य प्रदर्शनार्थं सूत्रम्—तन्त्राधिकरणाभ्युपगमसंस्थितिः सिद्धान्त इति । [NV, p. 260]

(62) P. 35, l. 2 : The relevent portion of *Nyāyavārttikatātparyaṭikā* runs as :

भाष्ये तु 'संस्थितिरित्थम्भावव्यवस्थे'ति सामान्योपक्रमस्याभ्युपगमस्य प्रमाणतो विशेषपर्यन्ततापरिसमाप्तिः संस्थितिरित्यर्थः । अत्रैवार्थे सूत्रमित्याह वार्त्तिककारः—'अस्यार्थस्ये'ति ।

[NVTT, p. 260]

(63) P. 35, ll. 2-4 : The relevant portions of *Nyāyavārttika*, *Tātparyaṭikā* aud *Nibandha*, (i.e. *Tātparyaṭikapariśuddhi*) are as follows :

(*a*) ......तन्त्रमधिकरणं येषामर्थानां ते भवन्ति तन्त्राधिकरणाः, तेषामभ्युपगमसंस्थितिरित्थंभावव्यवस्था धर्मनियमः सिद्धान्तो भवतीति । किमुक्तं भवति ? योऽर्थोऽशास्त्रितः तस्याभ्युपगमो न सिद्धान्त इति । [NV, p. 262]

(*b*) ......तन्त्र्यन्ते व्युत्पाद्यन्ते प्रमेयाण्यनेनेति तन्त्रं प्रमाणम् । तदेवाधिकरणम् आश्रयो ज्ञापकत्वेन येषामर्थानां ते तथोक्ताः । अशास्त्रितः अप्रामाणिक इत्यर्थः । आभिमानिकं च प्रामाणिकत्वम्, तेन सिद्धान्तभेदिनामर्थानां सर्वेषां न प्रामाणिकत्वप्रसङ्गः । तन्त्रग्रहणेन च सर्वतन्त्रप्रतितन्त्रयोरुपादानम्, उभयोरपि तन्त्रत्वात् ।...

[NVTT, p. 262-263]

(c) ननु यदि तन्त्रं प्रमाणमभिमतम्, कथं व्यतिरेकमाह—योऽर्थो न शास्त्रित इत्यत आह—अशास्त्रितोऽप्रामाणिक इति। नन्वेवं बौद्धसिद्धान्ता न सिद्धान्ताः स्युरप्रामाणिकत्वात्, तथा च व्यतिक्रमेऽपि तेषां नापसिद्धान्तो भवेदित्याह—आभिमानिकं चेति। एतच्चाग्रतो वार्त्तिककार एव तत्प्रत्ययादभ्युपगम इति वदन् स्फुटीकरिष्यति। [TTP, p. 502]

(64) **P. 35, ll. 8-9 : (a) Such a view is endorsed by Vācaspati Miśra II, who introduces and explains this *sūtra* as follows :**

तद्विभागसूत्रम्—

।। सर्वतन्त्रप्रतितन्त्राधिकरणाभ्युपगमसंस्थित्यर्थान्तरभावात् ।।

स चतुर्द्धेति प्रकरणात्। अत्र सर्वतन्त्रस्येतरत्रयोपजीव्यत्वात् प्राथम्यम्, प्रतितन्त्रग्रहे सति तदितरयोरभाव इत्युपजीव्यतयाऽनन्तरं प्रतितन्त्रसिद्धान्तः, अनयोर्वाचनिकत्वादनन्तरं वचनोन्नेयाभिप्रायगोचरसिद्धान्तत्वङ्‌य [?] न्यायस्य प्राधान्यात्तदनुषङ्गादादावधिकरणसिद्धान्तः, तदधीनत्वादभ्युपगमस्यान्तेऽभ्युपगमसिद्धान्तः। उपाधिविभागश्चायम्, तेन प्रतितन्त्रसिद्धान्तादेः क्वचिदभ्युपगमसिद्धान्तादिसङ्करो न दोषाय। [NTĀ, I.O.L. Mss, fol. 67b]

(b) Keśava Miśra Tarkācārya, Viśvanātha Pañcānana and Rādhāmohana Goswāmi Bhaṭṭācārya also adopt the verdict of Vācaspati Miśra II. (See GSP, P. 14, NSV, p. 262 and NSVV, p. 37.) All of them seem to adopt the reading accepted by Uddyotakara, who writes :

सर्वतन्त्रप्रतितन्त्राभ्युपगमसंस्थित्यर्थान्तरभावादित्यस्य सूत्रस्यार्थोऽन्यो वक्तव्यः। अथेदं विभागार्थम् ? तथापि पूर्वसूत्रं परित्यज्यताम्। [NV, p. 262]

(65) **P. 35, 19-20. This seems to be the view of Vācaspati Miśra II, whose remarks on this point are as follows :**

तन्त्रे विचारेऽधिकृत उपयोगी अर्थोऽर्यमाणोऽभ्युपेतः सर्वतन्त्रसिद्धान्तः ; अभ्युपगमप्रधानश्चायं निर्देशः, तेन वादिप्रतिवाद्यन्यतरानभ्युपगमाविषयककथानुकूलतदन्यतराभ्युपगमः सर्वतन्त्रसिद्धान्तः, यथा प्रमाणाधीनं प्रमेयज्ञानम्, प्रतिपन्नः प्रतिपादयितेत्यादि । दृष्टान्तस्तु वादिभ्यामेवाभ्युपगम्यतेऽयन्त्वन्यैरपीति ततोऽस्य भेदः । अविषयान्तं प्रतितन्त्रादिव्यवच्छेदाय । एवमपि 'श्यामा एव शालयो मह्यं रोचन्ते' इत्याद्यभ्युपगमेऽतिव्याप्तिवारणाय कथानुकूलेति । तादृशाश्चाभ्युपगमाः स्वपरशास्त्रितस्यैवेति त एवात्र लक्ष्याः, मोक्षोपयोगिविचारारम्भकत्वात्, सामान्यलक्षणेऽप्यभ्युपगमपदमीदृशाभ्युपगमपरमेव बोद्धव्यम् ।

[NTĀ, I.O.L. Mss, fol. 67b-68a]

(66) P. 36, ll. 35 : The relevant passage of *Nyāyavārttika* reads as :

सामान्यविशेषतद्वतां नियमेनाभ्युपगमः प्रतितन्त्रसिद्धान्त इति । यथा भौतिकानीन्द्रियाणीति योगानाम्, अभौतिकानीति सांख्यानामिति । [NV, p. 264]

(67) P. 36, l. 10 : Bhaṭṭa Vāgīśvara provides a justification of the term अधिकरण in his *Nyāyatātparyadīpikā* :

यस्यार्थस्य साध्यस्य हेतोर्वा सिद्धिविषये तदनुपङ्गिणोऽर्थाः तदन्तर्भावेण गम्यन्ते, सोऽर्थः साक्षादधिक्रियमाणस्तदनुपङ्गिणां चाधारोऽनेन रूपेणाधिकरणसिद्धान्त इति सूत्रार्थः । [NTD, p. 10]

This, however, summarises the view of Vācaspati Miśra I. See NVTT, pp. 234-235.

(68) P. 36, ll. 11-13 : The relevant passage of *Nibandha* (i.e. *Tātparyaṭīkāpariśuddhi*) runs as :

…यत्सिद्धावित्यादि सूत्रम् । एतच्च भूषणप्रभृतयो द्विधा व्याचक्षते । यस्यार्थस्य सर्वज्ञत्वादेर्विशेषस्य सिद्धौ क्षित्यादेः सकर्तृकत्वस्य प्रक्रियमाणस्य सिद्धिः, स सर्वज्ञत्वादिर्विशेषोऽधिकरणसिद्धान्तः । अथ वा

यस्य सकर्तृकत्वादेः सिद्धावन्तर्भूता अन्येऽभिप्रायप्रक्रान्ताः सर्वज्ञत्वादयोऽपि विशेषाः सिध्यन्ति सोऽधिकरणसिद्धान्त इति। तदत्र पक्षद्वयेऽपि फलतो न कश्चिद् विशेषः...[TTP, p. 505]

It may be noted here that Rāmabhadra has mistakenly ascribed the view of *Bhūṣaṇa*, i.e., Bhāsarvajña to Udayana. *Bhūṣaṇa* is the abbreviatian of *Nyāyabhūṣaṇa*, Bhāsarvajña's autocommentary on *Nyāyasāra*.

(69) P. 36, ll. 13-15 : This seems to have been taken from *Nyāyatattvāloka* of Vācaspati Miśra II. The relevant passage runs as :

यद् वा—यस्य साधनत्वेन निर्दिष्टस्य सकर्तृकत्वादेः सिद्धौ ज्ञाने अन्यस्यानिर्दिष्टस्य प्रकरणस्य प्रक्रियमाणस्याभिप्रायमात्रविषयस्य सिद्धिः सोऽर्थः साक्षादेव क्रियमाणः पक्षधर्मतावलात् पर्यवस्यता रूपेणाभिप्रायव्याप्तेनाधिकरणसिद्धान्तः। तेन पक्षताबललभ्याभ्युपगमः सः, साधकानुमानमात्रविषयश्चायम्। [NTĀ, I.O.L. Mss, fol. 69a-69b]

Keśava Miśra Tarkācarya follows this interpretation. [See GSP, p. 14.]

(70) P. 36, ll. 15-18 : This interpretation of Rāmabhadra has been rejected by Viśvanātha Pañcānana. The relevant portion of *Nyāyasūtravṛtti* contains some interesting observations, and runs as :

यस्यार्थस्य सिद्धौ जायमानायामेव अन्यप्रकरणस्य सिद्धिर्भवति सोऽधिकरणसिद्धान्त इत्यर्थः, यथाऽनन्तद्व्यणुकादिकं पक्षीकृत्योपादानगोचरज्ञानचिकीर्षाकृतिमज्जन्यत्वे साध्यमाने सर्वज्ञत्वमीश्वरस्य। एवं हेतुबलादपि, यथा 'दर्शनस्पर्शनाभ्यामेकार्थग्रहणादि'न्द्रियव्यतिरिक्त आत्मनि साधिते इन्द्रियनानात्वम्। तथा च यदर्थसिद्धिं विना योऽर्थः शब्दादनुमानाद्वा न सिध्यति, सोऽधिकरणसिद्धान्त इति तत्र तत्र विशिष्यैव लक्षणं कार्यम्।

वस्तुतस्तु—शब्दत्वमनुमानत्वं चाविवक्षितं प्रमाणमात्रमपेक्षितम् । अतएव प्रत्यक्षेण स्थूलसाधनानन्तरमुक्तमात्मतत्त्वविवेके—'सोऽयमधिकरणसिद्धान्तन्यायेन स्थूलत्वसिद्धौ क्षणभङ्गभङ्ग' इति । तत्र 'वाक्यार्थसिद्धौ तदनुषङ्गी योऽर्थः सोऽधिकरणसिद्धान्त' इति वार्त्तिकफक्किकां लिखित्वा 'येन केनापि प्रमाणेन वाक्यार्थसिद्धौ जन्यमानायां योऽर्थः सिध्यति स तथेत्यर्थः' इति व्याख्यातं दीधितिकृता । एवं 'हेतुरीदृशः पक्षश्च वाक्यार्थ' इति टीकावचने चोपलक्षणमेतदित्युक्तम् ।

यत्तु—जनकीभूतव्यापकताज्ञाने व्यापककोटावविषयः प्रकृतानुमित्या व्यापककोटौ विषयीभूतः शाब्दजनकपदार्थज्ञानाविषयत्वे सति शाब्दविषयश्चेति द्वयमधिकरणसिद्धान्त इति, तन्न, इन्द्रियनानात्वादौ भाष्याद्युदाहृतेऽव्याप्तेः । [NSV, pp. 265-266]

Rādhāmohana agrees with Viśvanātha. He has, however, ascribed *Ātmatattvaviveka* to Dīdhitikṛt (i.e. Raghunātha Śiromaṇi), which is erroneous ('एतद्व्याख्यातं चात्मतत्त्वविवेके दीधितिकृता', 'इत्युक्तं दीधितिकृद्भिरात्मतत्त्वविवेके') [See NSVV, pp. 38-39].

(71) P. 37, ll. 3-6. Here, Rāmabhadra has referred to Vācaspati Miśra I as मिश्राः, Vācaspati follows here Uddyotakara, who, againā rejected the interpretation offered by Vātsyāyana. The relevant passage of *Nyāyabhāṣya*, *Nyāyavārttika* and *Nyāyavārttikatātparyaṭīkā* are as follows :

(*a*) यत्र किञ्चिदर्थजातमपरीक्षितमभ्युपगम्यते, अस्तु द्रव्यं शब्दः स तु नित्योऽथाऽनित्य इति ? द्रव्यस्य सतो नित्यताऽनित्यता वा तद्विशेषः परीक्ष्यते, सोऽभ्युपगमसिद्धान्तः स्वबुद्ध्यतिशयचिख्यापयिषया परबुद्ध्यवज्ञानाच्च प्रवर्त्तते । [NB. p. 266]

(*b*) अपरीक्षिताभ्युपगमादिति सूत्रम् । अपरीक्षितोऽसूत्रित इति । योऽर्थः सूत्रेषु नोपनिबद्धः शास्त्रे चाभ्युपगतः सोऽभ्युपगमसिद्धान्त

इति। यथा नैयायिकानां मन इन्द्रियमिति। वैशेषिकानां नैयायिकानाञ्च श्रोत्रमाकाशमिति।

अपरीक्षितः शास्त्रानभ्युपगतः स्वबुद्ध्यतिशयचिख्यापयिषया परबुद्ध्यवज्ञानाच्च प्रवर्त्तत इति न युक्तम्। कुतः? परावज्ञानस्यायुक्तत्वात्। यदि तावत् परस्यासामर्थ्यं बुद्ध्वा नायं समर्थ इति प्रवर्त्तते तदाऽनेन न परः प्रतिपादितो भवति, किन्तु विप्रतिपादितः। यश्चाज्ञः किं तस्य प्रतिपादयितव्यम्। अथ परिज्ञातसामर्थ्यं पुरुषमवजानाति? तदपि न। अतिशयबुद्धिमतोऽवज्ञानस्यायुक्तत्वात्। तस्मान्नायं सूत्रार्थोऽशास्त्रिताभ्युपगमः सिद्धान्त इति। [NV. pp. 266-267]

(*c*) अथाभ्युपगमसिद्धान्तलक्षणसूत्रम्—अप—न्तः॥ तद् वार्त्तिककारो व्याचष्टे—अपरीक्षितोऽसूत्रित इति। सूत्रितस्य प्रायेण परीक्षासम्बन्धात्। मनसो ह्येन्द्रियत्वेनासूत्रितस्यापि इन्द्रियत्वाभ्युपगमः प्रमाणाधिकरणो यतः तस्मादयमभ्युपगमसिद्धान्तः। सूत्रं चैवं योजनीयम्—असूत्रिताभ्युपगमाद्धेतोर्यतस्तद्विशेषपरीक्षणं क्रियते तस्माद्विशेषपरीक्षणाज् ज्ञायतेऽसूत्रितमप्यभ्युपगतं सूत्रकारेण। सोऽयमस्याभ्युपगमोऽभ्युपगमसिद्धान्तः। एवं स्वमतेन सूत्रं व्याख्याय भाष्यव्याख्यानं दूषयति··· [NVTT, p. 226.]

Jayanta Bhaṭṭa in his *Nyāyamañjarī* tries to defend the interpretation of Vātsyāyana :

(*d*) ···अपरीक्षिताभ्युपगम एव स्वमतिकौशलेन क्रियमाणोऽभ्युपगमसिद्धान्तः। 'अस्तु द्रव्यं' शब्द इति प्रमाणमूलाभ्युपगमविषयीकरणं तु सामान्यलक्षणे प्रौढवाद्यभिप्रायेण योज्यम्। 'द्रव्यत्वमपि प्रमाणमूलं शब्दस्य भवतु, तथापि तस्यानित्यत्वमिति किल निरवयवं द्रव्यमनित्यं नास्त्येव शब्दस्य तु तादृशस्याप्यनित्यत्वमहं साधयामो'ति।···किमर्थं पुनरयमपरीक्षित एव शब्दद्रव्यत्वाभ्युपगमः क्रियत इति पृच्छत उत्तरं पञ्चम्याभिधीयते, यस्मादपरीक्षिताभ्युपगमात् तद्विशेषानित्यत्वपरीक्षण-

-मवकल्पते तस्मादपरीक्षिताभ्युपगमोऽभ्युपगमसिद्धान्त इति। न तु तद्विशेषपरीक्षणमेव सामानाधिकरण्यनिर्देशादभ्युपगमसिद्धान्त इति मन्तव्यम्, परीक्षणस्य सिद्धान्ताश्रितत्वात्। तस्माद् विशेषपरीक्षणार्थोऽपरीक्षिताभ्युपगमः प्रौढवादिना क्रियमाणोऽभ्युपगमसिद्धान्त इति सूत्रार्थः। [NM, Vol. III, pp. 82-83]

(72) P. 37, ll. 6-14: These lines bear a close resemblane to the following passage of *Nyāyatattvāloka* of Vācaspati Miśra II:

अपरीक्षितस्य साक्षादसूत्रितस्याभ्युपगमात् हेतोस्तद्विशेषपरीक्षणं भवति, अन्यथा विशेषपरीक्षणमाश्रयासिद्धं स्यात्, तस्माद्विशेषपरीक्षणादवगम्यते—असूत्रितमभ्युपगतं सूत्रकारेण, सोऽयमर्थापत्तिसिद्धोऽभ्युपगमसिद्धान्तः, यथा मनस इन्द्रियतापरीक्षणादसूत्रितमानसेन्द्रियताभ्युपगमोऽक्षचरणमुनेः, तेन साक्षादसूत्रितस्य समानतन्त्रस्याभ्युपगमोऽधिकरणसिद्धान्तः। उक्तत्रितयान्याभ्युपगमः स, तेन काञ्च्यामिदानीं त्रिभुवनतिलको राजेत्यादेरपि विवादपक्षाभ्युपगमस्य संग्रह इत्येके। तन्न, अत्र हि मोक्षोपयोग्यभ्युपगमः आत्मसिद्धान्तो निरूप्यते, प्रकृतत्वादुपयोगित्वाच्च, स च शास्त्राश्रय एवेति नेतरेषां प्रसङ्गो लक्षणस्य।
[NTĀ, I.O.L. Mss, fol. 68b]

(73) P. 37, l. 16: Rāmabhadra has not explained the significance to the word अवयव in this *sūtra*. This has been done to some extent by earlier commentators. Thus, Uddyotakara writes:

(*a*) अवयवानां विभागोद्देशार्थं सूत्रम्।...परप्रतिपादका ये वाक्याङ्गभूता इतरेतराप्रत्यायितेनार्थेनार्थवन्तो वाक्याङ्गतामुपयान्ति तेऽवयवाः। वाक्याङ्गत्वमवयवार्थः। किं पुनर्वाक्यम्? यस्य प्रतिज्ञादिभिरुपकृतस्य विशेषावस्थापनमर्थः तद्वाक्यम्, वाक्यार्थं संहृत्यैते पञ्च निष्पादयन्तीत्यवयवा इत्युच्यन्ते...... [NV, p. 269-270]

The observations of Vācaspti Miśra I are as follows :

(*b*) वार्त्तिककारः सूत्रतात्पर्यमाह—अवयवानामिति । नन्ववयवसामान्यलक्षणमन्तरेणाशक्यो विभागोद्देशः, तद्विशेषलक्षणञ्च, न चेदं सामान्यलक्षणं विभागपरत्वादित्यत आह—सूत्रम् । विभागपरमप्येतदर्थादवयवसामान्यलक्षणं सूचयतीति सूत्रम् । अन्यपरादपि वाक्यात् प्रतीयमानोऽर्थोऽपेक्षितः स्वीक्रियत एवेति शाब्दाः । तत्रावयवपदादेव सामान्यलक्षणमवगम्यते । अवयवत्वेनैकवाक्यता दर्शिता, सा च पदानां परस्परमसंप्रत्यायितापेक्षितसम्बन्धयोग्यार्थप्रत्ययेन भवति, तस्मात्तथाविधार्थप्रत्यायनमेव प्रतिज्ञादीनामवयवसामान्यलक्षणं सिद्धमिति सूत्रमित्यनेन दर्शितं वार्त्तिककृतेति । [NVTT, p. 269]

Udayana's comments on this passage run as :

(*c*) एवं च यत्र न्यायलक्षणं करणमुपनेयम्, तत्प्रकरणं समर्थ्य, उपनेयन्यायप्रकरणमारभ्यते···

एकवाक्यता विशिष्टैकार्थधीरूपकार्यसम्बन्धः । विशिष्टश्चार्थोऽत्र प्रकृतत्वात् समस्तरूपोपपन्नं लिङ्गम् ।

···प्रतिज्ञाद्यर्थास्तु ज्ञाता एव न्यायमुपकुर्वन्तस्तन्फलसिद्धावुपयुज्यन्ते । अतस्तेषां ज्ञापकचिन्ता क्रियत इति । [TTP, pp. 512-513]

Jayanta Bhaṭṭa has raised in his *Nyāyamañjarī* some interesting issues while explaining this *sūtra* :

(*d*) एतच्च सूत्रमेकमेव सामान्यलक्षणमवयवानामभिधत्ते विभागञ्च, प्रमाणानामिव प्रत्यक्षानुमानोपमानशब्दाः, साधनीयार्थप्रतिपत्तिपर्यन्तवचनकलापैकदेशत्वमवयवानां सामान्यलक्षणमाचष्टे । यद्यपि चैकवक्तृवदननिर्गतानां निसर्गभङ्गुराणामदीर्घायुषामपरिहार्यक्रमजन्मनां द्रुमाणामिव पारमार्थिकः समूहो न समस्त्येव, तथापि सिषाधयिषितार्थप्रतिपादनरूपैककार्योपयोगमूलीकृतात्मनां तेषां काल्पनिकः कलापः पूर्वमेव वाक्यकल्पनावसरे समर्थित इति तद्भागा अपि सम्भवन्त्येव ।

न च पदानामेवानुमानवाक्यावयवत्वम्, अपि तु खण्डवाक्यानाम्, एकेन पदेन प्रतिज्ञोदाहरणादीनामभिधातुमशक्यत्वात्। हेतुवचनन्त्वेकमपि पदं क्वचित् भवति कृतकत्वादिति। तदपि वा सविशेषणं प्रयुज्यमानं पदसमुदायेनैव प्रतिपाद्यते—वस्तुत्वे सति कृतकत्वादिति। उदाहरणवचनमपि घटवदित्येवमालस्यादेव प्रयुज्यते। तद्धि व्याप्तिप्रदर्शनायैव वक्तव्यम्—यत् कृतकं तदनित्यं दृष्टं यथा घट इति। तस्मादवयवानामवयवत्वमेव लक्षणं न पदत्वम्। विभागोऽपि प्रतिज्ञादिपदसन्निधाववयवश्रुतेरेवावगम्यते, प्रतिज्ञादयः पञ्चावयवा न न्यूनातिरिक्ता इति। [NM, Vol. III, pp. 84-85]

Vācaspati Miśra II has raised some of these issues in his *Nyāyatattvāloka* :

(*e*) तत्राक्षिप्तसामान्यलक्षणं विभागोद्देशसूत्रम्—

॥ प्रतिज्ञाहेतूदाहरणोपनयनिगमनान्यवयवाः ॥

अत्र चैकदेशवाचिना अवयवशब्देन नित्यसापेक्षतया समुदायोऽप्युपस्थापितः, स च प्रकृते विशिष्टैकार्थप्रतिपादनपरं वाक्यमिति न्यायलक्षणमपि सूचितम्। अवयवत्वञ्च अनुमितिकारणचरमलिङ्गपरामर्शप्रयोजकशाब्दज्ञानजनकवाक्यत्वम्। विभागेन न्यूनाधिकसंख्याव्यवच्छेदकेन न्यायस्य द्व्यवयवत्वं दशावयवत्वञ्च निराकृतम्।......

[NTĀ, I.O.L. Mss, fol. 69a]

Keśava Miśra has adopted the definition suggested in NTĀ, See GSP, p. 15. Viśvanātha and Rādhāmohana agree with Rāmabhadra. [See NSV, p. 269 and NSVV, p. 40.]

The following passages from *Tattvacintāmaṇi* (from which Vācaspati Miśra II has borrowed the definition of *avayava*), *Tattvacintāmaṇidīdhiti and Tattvacintamaṇidīdhitijāgadīśī* can also be compared in this connection :

(*a*) अनुमितिचरमकारणलिङ्गपरामर्शप्रयोजकशाब्दज्ञानजनकशाब्दज्ञानजनकवाक्यत्वमवयवत्वम्। अतएव वह्निव्याप्यधमवानयमिति

वाक्ये तदवयवे च न न्यायतदवयवलक्षणातिव्याप्तिः, तेन परामर्शस्य, तदवयवेन परामर्शजनकस्य जननात्। [TC, p. 930]

(*b*) अवयवत्वन्तु न्यायान्तर्गतत्वे सति प्रतिज्ञाद्यन्यतमत्वं प्रतिज्ञाद्यघटकत्वे सति उभयघटकभागद्वयाघटितत्वं वा वक्तव्यम्। उभयञ्च प्रतिज्ञाहेतू हेतूदाहरणे उदाहरणोपनयौ उपनयनिगमने इति विशिष्य वक्तव्यम्। प्रतिज्ञादिप्रतिपाद्यतत्तद्विशिष्टार्थविषयकज्ञान-पञ्चकान्यतमज्ञानजनकवाक्यत्वं तत्त्वमित्यपि केचित्।

[TCD, pp. 931-932]

(*c*) मूलोक्तावयवलक्षणस्याप्युक्तदोषग्रस्तत्वात् स्वयं तल्लक्षणमाह—अवयवत्वं त्विति। अत्र प्रतिज्ञासमानानुपूर्वीकस्य उदासीनवाक्यस्य वारणाय सत्यन्तम्। न्यायान्तर्गतत्वगर्भप्रतिज्ञात्वादिकमुपादाय तदन्य-तमत्वोक्तौ न्यायान्तर्गतत्वस्य पञ्चधा प्रवेशे गौरवं स्यादतः सकृदेव पार्थक्येन निवेशितमिति ध्येयम्। न च प्रकृतपक्षहेतुसाध्यकैकविधन्याया-न्तर्गतत्वस्योक्तावन्यानुपूर्वीकतादृशन्यायावयवेऽव्याप्तिरिति वाच्यम्। प्रकृतपक्षहेतुसाध्यकन्यायसामान्यं यद्घटितं तदन्यस्य विवक्षितत्वात्।··· ···प्रतिज्ञाद्येकदेशेऽतिव्याप्तेर्वारणाय विशेष्यदलम्।···यत्र पर्वतत्वाद्य-वच्छेदेन वह्नेः साध्यतायां तत्सामानाधिकरण्येन 'यथाऽयं पर्वत' इति दृष्टान्तोपन्यासः, तत्र 'पर्वतो वह्निव्याप्यधूमवानि'त्यन्तस्य उदाहरणोप-नयघटकभागद्वयस्यापि पर्वतधर्मिकसाध्यव्याप्यवत्ताबोधकत्वेन प्रतिज्ञा-द्यन्यतमत्वात् प्रतिज्ञाद्यघटकत्वाच्च तत्रातिव्याप्तिरित्यस्वरसाल्लक्षणान्तर-माह—प्रतिज्ञाद्यघटकत्वे सतीति। प्रतिज्ञाद्येकदेशेऽतिव्याप्तिवारणाय सत्यन्तम्।······कस्यचिदवयवलक्षणमाह—प्रतिज्ञादीति। तत्तद्विशिष्टा-विषयकेत्यादेस्तन्मात्रविषयकेत्यर्थः। तेन प्रतिज्ञाहेतुसमुदायस्य प्रति-ज्ञार्थज्ञानजनकत्वेऽपि न तत्रातिव्याप्तिः। वाक्यत्वं न्यायान्तर्गत-वाक्यत्वम्। तेन उदासीनवाक्ये नातिव्याप्तिः।

[TCDJ, pp. 930-933]

(74) **P. 37, l. 21—P. 38, l. 11 :** In his *Tattvacintāmaṇi,* Gangeśa Upadhyaya has criticised the प्रतिज्ञासूत्र in the following manner :

(*a*) तत्र प्रतिज्ञा न साध्यनिर्देशः, साध्यपदेऽतिव्याप्तेः । किन्तूद्देश्यानुमितिहेतुलिङ्गपरामर्शप्रयोजकवाक्यार्थज्ञानजनकत्वे सत्युद्देश्यानुमित्यन्यूनानतिरिक्तविषयकशाब्दज्ञानजनकं वाक्यम् । अन्यूनानतिरिक्तपदं विहाय लिङ्गाविषयकत्वं वा ज्ञानविशेषणम् । तेनोदाहरणादिव्युदासः । निगमनञ्च न परामर्शहेतुः, अबाधितत्वात् सत्प्रतिपक्षज्ञानजनकत्वात् । हेत्वभिधानप्रयोजकजिज्ञासाजनकवाक्यत्वं वा । लिङ्गाविषयकलिङ्गिविषयकज्ञानजनकन्यायावयववाक्यत्वं वा, इतरावयवानां लिङ्गविषयकज्ञानजनकत्वात् । [TC, pp. 936-966]

A reflection of this is noticed in the *Nyāyatattvāloka* of Vācaspati Miśra II :

(*b*) इहावयवेषु प्रतिज्ञायाः प्राथम्यादादौ तल्लक्षणाय सूत्रम्—

।। साध्यनिर्देशः प्रतिज्ञा ।।

साध्यतया स्वीक्रियमाणस्य वचनं प्रतिज्ञा । न च साध्यपदेऽतिव्याप्तिः, अवयवत्वाधिकारात्, न च निगमनोदाहरणयोरतिव्याप्तिः, तथाऽप्युद्देश्यानुमितिहेतुलिङ्गपरामर्शप्रयोजकवाक्यार्थधीकरणत्वे सत्युद्देश्यानुमित्यन्यूनानतिरिक्तविषयकशाब्दज्ञानजनकं वाक्यं प्रतिज्ञेति सूत्रार्थः । प्रतिज्ञाप्रतिरूपकवारणाय सत्यन्तम् । अप्रकृतानुमितिमादायासम्भववारणायोद्देश्येति । 'वह्निमानि'त्युदाहरणैकदेशवारणायान्यूनेति । निगमनवारणायानतिरिक्तेति, तत्र हि लिङ्गांशोऽभिमतानुमितावधिकः स्फुरति । [NTĀ, I.O.L. Mss, fol. 69b-70a]

Such interpretations are not to be seen in the explanation offered by Rāmabhadra. Here, the following passages from *Tattvacintamaṇidīdhitī* and *Jāgadīśī* are worth comparing :

(*c*) 'साध्यनिर्देशः प्रतिज्ञे'ति सूत्रम्। साध्यो विधेयधर्मविशिष्टो धर्मी। तथा च पक्षतावच्छेदकपर्वतत्वादिविशिष्टे साध्यतावच्छेदकवह्नित्वादिविशिष्टवैशिष्ट्यज्ञानजनको न्यायावयव इति पर्यवसितोऽर्थः। उदाहरणाच्च साध्यतावच्छेदकविशिष्टवैशिष्ट्यज्ञानं न पक्षतावच्छेदकविशिष्टे, उपनयाच्च पक्षतावच्छेदकविशिष्टे न साध्यतावच्छेदविशिष्टवैशिष्ट्यज्ञानमिति तयोर्व्युदासः। [TCD, pp. 935-936]

(*d*) वक्ष्यमाणार्थस्य शब्दाल्लाभार्थमाह—साध्य इति। अत्र जनकान्तेन हेत्वादेरवयव इत्यनेनोदासीनवाक्यस्य व्युदासः। न च 'पर्वतो वह्निमानि'ति प्रतिज्ञायां वह्निमत एव तादात्म्येन प्रकारत्वान्न पक्षे साध्यतावच्छेदकीभूतवह्नित्वविशिष्टवैशिष्ट्यावगाहिधीजनकत्वम्, नामार्थयोर्भेदान्वयस्याव्युत्पन्नतया पर्वते वह्नेः संयोगेन प्रकारत्वाभावादिति वाच्यम्। भेदार्थकविभक्तीनामिव तदर्थकमतुबादीनामपि समभिव्याहारवशेन नामार्थयोर्भेदान्वयस्य प्राच्यैरुपगमात् तन्मत एवैतल्लक्षणकरणादिति भावः। पक्षतावच्छेदकविशिष्टेत्यस्य व्यावृत्तिमाह—उदाहरणाच्चेति। न च यत्र पर्वतत्वावच्छेदेन साध्यसिद्धेरुद्देश्यत्वे तत्सामानाधिकरण्येन पर्वतस्य दृष्टान्तता, तत्र उदाहरणेऽतिव्याप्तिरिति वाच्यम्। पक्षतावच्छेदकनिष्ठावच्छेदकत्वाद्यवगाहिताया अपि विशिष्य प्रवेशनीयत्वादिति भावः। साध्यतावच्छेदकेत्यस्य फलमाह—उपनयाच्चेति। 'द्रव्यव्याप्यधूमवान् पर्वत' इत्युपनयाच्चेत्यर्थः। यत्र येन सम्बन्धेन साध्यता तत्र तेनैव साध्यवैशिष्ट्यावगाहित्वं बोध्यम्। तत्र यत्र विषयतासम्बन्धेन ज्ञानस्य साध्यतायां समवायेनैव ज्ञानं हेतुः, तत्र ज्ञानव्याप्यज्ञानवानयमित्युपनये नातिप्रसङ्गः, सिसाधयिषया च न न्यायप्रयोग इति भावः। तयोः उदाहरणोपनययोः। [TCDJ, pp. 935-936]

(75) P. 38, l. 17—P. 39, l. 6 : **Gaṅgeśa Upādhyāya defines हेतु in the following passage :**

(*a*) साध्यनिर्देशानन्तरं कुत इत्याकाङ्क्षायां साधनताव्यञ्जकविभक्तिमल्लिङ्गवचनमेवोचिम्, अन्यथाऽनाकाङ्क्षाभिधाने निग्रहापत्तेः, लोके तथैवाकाङ्क्षानिवृत्तिरिति व्युत्पत्तेरिति प्रतिज्ञानन्तरं हेतूपन्यासः। हेतुत्वञ्चानुमितिकारणीभूतलिङ्गपरामर्शप्रयोजकशाब्दज्ञानजनकसाध्याविषयकशाब्दधीजनकहेतुविभक्तिमच्छब्दत्वम्, हेतुत्वप्रतिपादकविभक्तिमन्न्यायावयवत्वं वा, उदाहरणप्रयोजकाकाङ्क्षाजनकशाब्दज्ञानजनकन्यायावयवत्वं वा, साध्याविषयकज्ञानजनकहेतुपञ्चम्यन्तानुमितिपरशब्दत्वं वा, प्रतिज्ञावाक्यधीजन्यकारणाकाङ्क्षानिवर्त्तकज्ञानजनकहेतुविभक्तिमद्वाक्यं वा, पञ्चम्यन्तलाक्षणिकपदवदनुमितिपरवाक्यत्वं वा। हेतुपदेन ज्ञाने लक्षणा। अन्यथा लिङ्गस्याहेतुत्वेन हेतुविभक्त्यर्थानन्वयात्। तथैवाकाङ्क्षानिवृत्तेः। [TC, pp. 992-982]

As is clearly seen, Gaṅgeśa does not recall the *Nyāya-sūtra* on हेतु in this discussion. There is, however, a conscious effort in the *Nyāyatattvāloka* of Vācaspati Miśra II towards integrating the view of Gaṅgeśa with the purported meaning of this *sūtra* :

(*b*) साध्यनिर्देशानन्तरं कुत इत्याकाङ्क्षायां हेतुविभक्त्यन्वितलिङ्गवचनमेवोचितम्, अन्यथा अनाकाङ्क्षितवचने निग्रहापत्तिः, उक्ते च हेतौ तद्गमकताङ्गजिज्ञासायामुदाहरणादेरवतार इति ततः प्राक् प्रतिज्ञानन्तरं हेतुलक्षणाय सूत्रम्—

॥ उदाहरणसाधर्म्यात् साध्यसाधनं हेतुः ॥

अत्र च साधर्म्यपदसमभिव्याहाराद्विशेषलक्षणमेव सौत्रम्। सामान्यलक्षणं साधर्म्यवैधर्म्याभ्यां विभागश्चाक्षेप्यौ, आभ्यां विना विशेषलक्षणस्यानवसरात्। तत्र व्यतिरेकस्यान्वयनिरूप्यत्वेन जघन्यतया आदौ साधर्म्यहेतुलक्षणम्। तत्र साधर्म्यपदसमभिव्याहारात् साधर्म्यहेतुपरो हेतुशब्दो लक्ष्यनिर्देशकः, स च वाक्यावयवत्वाद् वचनरूपः, शेषं लक्षणम्। न चैवं साध्यसाधनमित्यनेनानन्वयः, साधनेन विपर्येण

विपयिणो वचनस्य लक्ष्यत्वात्, लक्षणा च चित्रान्वयोत्तीर्णगोपदे स्वामिलक्षणावत्। विषयद्वारा लक्षणमिति ख्यापनं लक्षणायाः प्रयोजनम्, लौकिकलक्षणायाः प्रयोजनानुरोधित्वात्। उदाह्रियत इत्युदाहरणं दृष्टान्तः, तेन तस्य वा साधर्म्यं समानधर्मता दृष्टान्तदृष्टलिङ्गवत्ता, नित्यसापेक्षत्वात् समर्थः समासः। अत्र च विपयतया हेतुतायां पञ्चमी, ततः साध्यस्य सिद्ध्यर्हस्य साधनं हेतुवचनम्। अत्र च पक्षस्य लिङ्गवत्त्वादुदाहरणसाधर्म्यवचनात् पक्षसत्त्वलाभः, उदाहरणसाधर्म्यस्य वचनादेव सपक्षसत्त्वलाभः, उदाहरणसाधर्म्यवचनस्य विशेषविधित्वेनानुदाहरणसाधर्म्यनिषेधकतया विपक्षासत्त्वलाभः, अबाधितत्वासत्प्रतिपक्षत्वयोस्तु साध्यपदादेव लाभः, साधयितुमर्हस्य तदर्थत्वात् तयोश्चासत्त्वात्; एवं पञ्चरूपसम्पत्तिप्रदर्शनाद्धेत्वाभासनिरासः स्फुटः। ...तत्र हेतुसामान्यलक्षणं साध्याविपयकसाधनविपयकधीजनकन्यायावयवत्वम्, पञ्चम्यन्तलाक्षणिकपदवदनुमितिपरवावयत्वं वा, धूमादिशब्देन ज्ञानलक्षणात्, अन्यथा लिङ्गस्याहेतुतया हेतुविभक्त्यनन्वयात्, तथैवाकाङ्क्षानिवृत्तेः।...... [NTĀ, I.O.L. Mss. fol. 71a-71b]

It is interesting to note how Vācaspti Miśra II interpretes the *sūtra* under discussion, so as to bring it in line with the definitions of हेतु proposed by Gaṅgeśa Upādhyāya.

Rāmabhādra, however, seems to prefer the formulation of Raghunātha Śiromaṇi, who defines हेतु as follows :

(*c*) प्रकृतपक्षान्वितस्वार्थबोधकपदोपस्थापितार्थान्वितस्वार्थबोधकन्यायावयवत्वं हेतुत्वम्। निगमनवारणाय उपस्थापितान्तम्। 'प्रमेयत्वमभिधेयं प्रमेयत्वात्' इत्यादौ प्रकृत्यर्थपक्षान्वितस्वार्थबोधकपञ्चम्यर्थान्वितो न प्रतिज्ञार्थः अपि तु तदेकदेशार्थः इति स्वार्थविशिष्टवैशिष्ट्यबोधजनकन्यायावयवत्वं विशिष्टवैशिष्ट्यबोधजनकस्वार्थोपस्थितिजनकन्यायावयवत्वं विशिष्टबोधजनकस्वार्थविशिष्टबोधजनकन्यायावयवत्वं वा तत्त्वम्। एकवाक्यतया हेत्वर्थविशिष्टसाध्यस्य वैशिष्ट्यं भासते न पुनरवयवान्तरार्थविशिष्टस्य कस्यचिदिति। [TCD, pp. 998-1000]

(76) P. 41, ll. 5-6 : Here, Rāmabhadra refers to Vācaspati Miśra I as मिश्राः. The relevant passages of *Bhāṣya*, *Vārttika* and *Ṭīkā* are as follows :

(*a*) साध्येन साधर्म्यं समानधर्मता । साध्यसाधर्म्यात् कारणात् तद्धर्मभावी दृष्टान्त इति । तस्य धर्मस्तद्धर्मः । तस्येति साध्यस्य । साध्यं च द्विविधम्—धर्मिविशिष्टो वा धर्मः शब्दस्यानित्यत्वम्, धर्मविशिष्टो वा धर्मी अनित्यः शब्द इति । इहोत्तरं तद्ग्रहणेन गृह्यत इति । कस्मात् ? पृथग्धर्मवचनात् । तस्य धर्मस्तद्धर्मः । स यस्मिन् दृष्टान्ते वर्त्तते स दृष्टान्तः तद्धर्मभावी । यस्मिन् दृष्टान्ते साध्यसाधर्म्यादुत्पत्तिधर्मकत्वात् साध्यस्य धर्मोऽनित्यत्वं भवति स दृष्टान्तः । साध्यसाधर्म्यादुत्पत्तिधर्मकत्वात् तद्धर्मभावी भवति, स चोदाहरणमिष्यते ।…उदाह्रियतेऽनेन धर्मयोः साध्यसाधनभाव इत्युदाहरणम् ।

[NB, p. 306-309]

(*b*) …साध्यस्य साधर्म्यं साध्येन समानधर्मता । अत्रापि साध्येनैव साधर्म्यमेव । न पुनरसाध्येनापि, साधर्म्यमेव साध्येन न पुनर्वैधर्म्यमपि । यस्मात् साध्यसाधर्म्यात् तद्धर्मभावी भवति ।… साध्यसाधर्म्याद् यतस्तद्धर्मा भवति, स भवति तद्धर्मभावी । सोऽयं दृष्टान्तः साध्यसाधर्म्यात् तद्धर्मभावित्वेन विशेषणेन युज्यमान उदाहरणं भवति……[NV, pp. 306-307]

(*c*) …साध्येन साधर्म्यम् इत्यादि भाष्यम् । तस्यार्थः—साध्येन धर्मिणा शब्देन, साधर्म्यं दृष्टान्तस्य स्थाल्यादेः, कृतकत्वं हेतुः । तद्ध्यनित्यत्वेन साध्ये च शब्दे दृष्टान्ते च स्थाल्यादौ समानम् । तस्मात् कारणात् प्रयोजकात्, तद्धर्मभावी तस्यैव साध्यस्य शब्दस्य यो धर्मो धर्मान्तरम्, येन विशिष्टः शब्दः सिसाधयिषितोऽनित्यत्वेन, तदनित्यत्वं तद्धर्मः । स एव भावस्तद्भावः । सोऽस्यास्तीति तद्धर्मभावी, स्थाल्यादिरनित्यत्वधर्मवानिति यावत् । तेन तादृशा दृष्टान्तेनोपलक्षितं तद्विषयं वचनमुदाहरणम् इति ।

तत्र वार्त्तिककारः सूत्रपदं व्याचक्षाण एव फलतो भाष्यं व्याचष्टे— साध्येति। उदाहरणसाधर्म्यात् [न्या. सू. १।१।३४] इत्यस्य व्याख्यानं साध्यसाधर्म्यादित्यत्रापि योजयति—अत्रापीति। साध्यशब्देनैव कृतकत्वं साधर्म्यं दृष्टान्तस्य, नासाध्येन विपक्षेणाकाशादिना नित्येन, ततो हि कृतकत्वं व्यावृत्तमिति। तथा च सव्यभिचारो व्यवच्छिन्नो भवति। साधर्म्यमेवेति भागासिद्धो व्यवच्छिन्नः।···हेतुलक्षणे तु सामान्य-लक्षणापेक्षं विशेषलक्षणमिति नातिव्याप्तिः। अत्र च साध्यसाधर्म्य-ग्रहणेन साधनविकलमनुदाहरणं भवतीत्युक्तं भवति। यथा—नित्यः शब्दः, अमूर्तत्वात्, परमाणुवदिति। तद्धर्मभावीत्यनेन च साध्यविकलं परास्तम्। यथा—नित्यः शब्दः, मूर्तत्वात्, कर्मवदिति। एतेनोभय-विकलमपि पराकृतम्। यथा—नित्यः शब्दः, अमूर्तत्वात्, घटवदिति। पञ्चम्युपादानेन च साध्यसाधर्म्यप्रयुक्तं तत्धर्मभावित्वं यत्र वचने प्रदर्श्यते तदेवोदाहरणं नान्यदिति दर्शितं भवति। प्रयोजकत्वं च साध्यसाधर्म्यस्य हेतोः स्वाभाविकः सम्बन्धो व्याप्यत्वमिति यावत्। प्रयोज्यत्वं च साध्यधर्मस्य व्यापकत्वमेव। तेनाप्रदर्शितान्वयविपरीत-प्रदर्शितान्वययोरनुदाहरणत्वमुक्तं भवतीति। तद्यथा—अनित्यः शब्दः उत्पत्तिमत्त्वात् पटवदिति। यो योऽनित्यः स सर्व उत्पत्तिमान् यथा घट इति। समाख्यानिर्वचनसामर्थ्यात् सामान्यलक्षणमप्यनेन सूचित-मित्याशयवता भाष्यकृता समाख्याया निरुक्तिः कृता।

[NVTT, pp. 306-307]

(77) P. 41, ll. 10-14 : This seems to be the view of Vācaspati Miśra II, whose comments are as follows :

···साध्यं सिसाधयिषितधर्मवत्तया धर्मी, तेन साधर्म्यात् साधन-रूपात् समानाद्धर्मात्, पञ्चम्या चास्य व्याप्यत्वरूपं प्रयोजकत्वमुक्तम्, तस्मात् प्रयोजकात् साधर्म्यात् तद्धर्मभावी येन धर्मेण विशिष्टः पक्षः सिसाधयिषितः स तद्धर्मः, स एव भावः, तद्वान् दृष्टान्तः साधनप्रयुक्त-

साध्यधर्मवान् अन्वयोदाहरणमित्यर्थः। न च भावेति व्यर्थम्, तद्धर्माणां विधिनिषेधाभ्यां द्वैविध्यात्, अन्वयिनि विधीयमानत्वेनैव व्यतिरेकिणि निषेध्यमानत्वेनैव एकरूपेणैव साध्यसाधनयोरन्वयार्थत्वात्।......[NTĀ, I.O.L. Mss. fol. 75a]

(78) P. 42, ll. 14-16. This definition of न्याय bears a close relation to the definitions of न्याय proposed by Gangeśa Upādhyaya and Raghunātha Śiromaṇi, which are as follows :

(*a*) तत्र न समस्तरूपोपपन्नलिङ्गप्रतिपादकवाक्यं न्यायः, अत्रैव वाक्योऽतिव्याप्तेः। किन्त्वनुमितिचरमकारणलिङ्गपरामर्शप्रयोजकशाब्दज्ञानजनकवाक्यं न्यायः। प्रतिज्ञादिपञ्चवाक्यैरेकवाक्यतया स्वार्थविशिष्टज्ञानं जन्यते, तेन च विशिष्टवैशिष्ट्यावगाहि मानान्तरमुत्थाप्यते, तेन च चरमपरामर्श उत्पाद्यत इति न्यायजन्यशाब्दज्ञानस्य परामर्शप्रयोजकता। [TC, pp. 925-926]

(*b*) उचितानुपूर्वीक प्रतिज्ञादिपञ्चकसमुदायत्वं न्यायत्वम्। प्रतिज्ञात्वादिकं पुनरुदासीनवाक्यवारकन्यायान्तर्गतत्वशून्यमेवोपादेयमिति नाऽन्योन्याश्रयः। साध्यादिविशेषनियन्त्रिताश्च प्रतिज्ञादयो वाच्या इति न भिन्नसाध्यादिकप्रतिज्ञादिसमुदयेऽतिव्याप्तिः। व्याप्त्यादेरिव साध्याद्यननुगमो न्यायादेरिष्यत एव। एतेन प्रतिज्ञानिगमनयोरुदाहरणावयवान्तरयोश्च न सम्भूयैकार्थप्रतिपादकत्वम्, प्रागेव तु पञ्चानामवयवानाम्, परन्तु प्रतिज्ञाहेत्वोः कथञ्चित्। उपनयनिगमनयोरेकवाक्यताव्यवहारस्तु विशिष्टैकार्थप्रतिपत्तिपरतामात्रेण। तादृशपरामर्शप्रयोजकत्वञ्च यदि तद्विषयतत्तत्पदार्थसार्थोपस्थापकतया, तदोदाहरणोपनययोरेव तत् पर्यवस्यति। अथ तदानुकूल्यमात्रेण, तदा 'को वह्निमान्' 'पर्वतो वह्निमान्' 'कुतः' 'धूमवत्त्वादि'त्यादेरपि तथात्वमित्यादिकं समाहितम्। [TCD, pp. 925-930]

A close scrutiny of Raghunātha's commentary reveals that

he is in effect criticizing Gangeśa, as is evident from the following remarks of Jagadīśa Tarkālaṁkāra :

(*c*) मूलोक्तन्यायलक्षणस्याग्रे दूष्यतया स्वयं न्यायलक्षणमाह—उचितेति। व्युत्क्रमेणोक्तप्रतिज्ञादिपञ्चकातिव्याप्तिवारणार्थमानुपूर्वीकान्तं व्युत्क्रमोक्तप्रतिज्ञादिभिन्नार्थकम्। तेन क्रमोत्पन्नप्रतिज्ञाहेतूदाहरणोपनयनिगमनानां लाभः। प्रतिज्ञाहेतूदाहरणत्रिकाद्यतिव्याप्तिवारणाय पञ्चकपदम्। [TCDJ, p. 925]

(79) P. 42, l. 16- P. 43, l. 3 : This portion bears some resemblance with the comments of Vācaspati Miśra II, which are as follows :

व्याप्तिप्रदर्शकोदाहरणानन्तरं व्याप्तपक्षधर्मतोपदर्शकत्वेन तदपेक्षितया तदनूद्देश इति उद्देशक्रमसङ्गत्या उपनयलक्षणाय सूत्रम्—

॥ उदाहर .ापेक्षस्तथेत्युपसंहारो न तथेति वा साध्यस्योपनयः ॥

अत्रोपनय इति लक्ष्यनिर्देशः। उदाहरणापेक्षः साध्यस्योपसंहार इति सामान्यलक्षणम्। उदाहरणस्य चापेक्षा व्याप्तिज्ञानजनकतया साध्यस्य पक्षस्य उपसंहारः तादृशहेतुसम्बन्धवचनम्, अवसरत्वप्राप्तिः प्रकरणात्, तेन व्याप्यसाध्याभावव्यापकाभावाभावान्यतरपक्षधर्मताबोधको न्यायावयव उपनय इति लक्षणार्थः। आक्षिप्तविभागपूर्वकञ्च विशेषलक्षणद्वयम्, उपनय इत्येव चावृत्तं विशेषलक्षणसमभिव्याहारेण विशेषपरं लक्ष्यनिर्देशः। तत्रान्वयोपनयस्य तथेति व्यतिरेकोपनयस्य न तथेति शेषैः सहितं लक्षणद्वयम्। तत्र तथेत्यादि न शब्दग्रहणम्, दृष्टान्तवचनस्य सामयिकतया 'तथा'भावे 'यथा'समभिव्याहाराभावेनान्वयानर्पकत्वात्, किन्तु व्याप्तलिङ्गवत्त्वेन साध्याभावव्यापकाभावाभाववत्त्वेन चेत्येतदर्थपरम्। तेन व्याप्तपक्षधर्मताबोधकोऽवयव इत्यन्वयोपनयस्य, साध्याभावव्यापकाभावाभावपक्षधर्मताबोधकोऽवयव इति व्यतिरेको-

पनयस्य लक्षणम् । वा शब्दः स्वरूपसमुच्चये व्यवस्थितविकल्पे वोदाहरणवत् । [NTĀ, I.O.L. Mss, fol. 76b]

(80) P. 43, ll. 4-8 : Here, the following remarks of Gaṅgeśa Upādhyāya are worth comparing :

उदाहरणान्तरं भवतु व्याप्तिस्तथापि व्याप्तं किं पक्षे वर्त्तते न वेत्याकाङ्क्षायां व्याप्तस्य पक्षधर्मत्वप्रदर्शनायोपनयः । तत्रानुमितिकारणतृतीयलिङ्गपरामर्शजनकावयवत्वमुपनयत्वमिति सामान्यलक्षणम् । साध्यव्याप्यविशिष्टपक्षबोधकावयवत्वं साध्याभावव्यापकाभावप्रतियोगिमत्पक्षबोधकावयवत्वञ्च विशेषलक्षणद्वयम् ।

[TC, pp. 998-999]

It can be easily seen that the NTĀ passage quoted above is deeply influenced by the writing of Gaṅgeśa Upādhyāya.

(81) P. 46, l. 14- P. 47, l, 3 : Here, the following remarks of Gaṅgeśa Upādhyāya and Raghunātha Śiromaṇi are worth comparing :

(*a*) ···व्यभिचारज्ञानविरहसहकृतं सहचारदर्शनं व्याप्तिग्राहकम् । ज्ञानं निश्चयः शङ्का च । सा च क्वचिदुपाधिसन्देहात् क्वचिद् विशेषादर्शनसहितसाधारणदर्शनात् । तद्विरहश्च क्वचिद्विपक्षबाधकतर्कात्, क्वचित् स्वतः सिद्ध एव । तर्कस्य व्याप्तिग्रहमूलकत्वेनाऽनवस्थेति चेत् । न । यावदाशङ्कं तर्कानुसरणात् । यत्र च व्याघातेन शङ्कैव नावतरति तत्र तर्कं विनैव व्याप्तिग्रहः । तथा हि—धूमो यदि वह्न्यसमवहिताजन्यत्वे सति वह्निसमवहिताजन्यः स्यात्, नोत्पन्नः स्यादित्यत्र 'धूमोऽवह्नेरेव भविष्यति', 'क्वचिद्वह्निं विनापि भविष्यति', 'अहेतुक एव वोत्पत्स्यत' इति शङ्का स्यात्, सर्वत्र स्वक्रियाव्याघातः स्यात् । यदि हि गृहीतान्वयव्यतिरेकं हेतुं विना कार्योत्पत्तिं शङ्केत, तदा स्वयमेव धूमार्थं वह्नेः, तृप्त्यर्थं भोजनस्य, परप्रतिपत्त्यर्थं शब्दस्य

चोपादानं कथं नियमतः कुर्यात्, तेन विनापि तत्सम्भवात्। तस्मात्तत्तदुपादानमेव तादृशशङ्काप्रतिबन्धकम्।

[TC, pp. 378-405]

(*b*) ···हुताशनरासभादिपदार्थसार्थस्याऽन्वयव्यतिरेकयोरन्वय-व्यतिरेकौ धूमस्योपलभमानोऽवश्यमेतेषामन्यतमं कारणं धूमस्येत्यवधार्य सन्दिग्धे—किमेतानि सर्वाण्येव कारणानि, किं वा कानिचित्तथा कानिचिन्न नेति। अत्र च यस्य व्यतिरेकेऽपि इतरेभ्यस्तथाविधेभ्यो धूमोत्पत्तिमुपलभते, तस्याऽहेतुत्वमेवावधारयति, यथा रासभादेः; यस्य व्यतिरेके तादृशापरसकलान्वयेऽपि धूमानुत्पत्तिं पश्यति, तस्य कारणत्वमेव निश्चिनुते, यथा वह्नेः। तत्र चाऽकारणत्वसन्देहो विरोधितामासादयन् निवर्तते येन तर्केण, तमाह—धूम इत्यादि। अनुसन्धेयश्चावश्यं कार्यकारणभावग्रहः, तदधीनत्वाद्व्याप्तिबुद्धेः। सामानाधिकरण्येनान्वयव्यतिरेकग्रहात् जायमानस्य तथैव हेतुहेतुमद्भावं गृह्णतस्तस्यैव वा व्याप्तिपरिच्छेदकत्वात्।··· घटादौ व्यभिचारवारणाय आपाद्यकोटिप्रतियोगिविशेषणार्थकं सत्यन्तम्। अजन्ये जन्ये च नान्तरीयके व्यभिचारवारणाय जन्य इति।··· अत्राद्या द्वयी शङ्का इष्टापत्तिपर्यवसायिनी। तृतीया पुनरापादकाद्यप्रसिद्धिपर्यवसायिनी। अवह्नेः वह्निशून्यात्। तदुपादानमिति करणव्युत्पत्त्या तदीयकार्य-प्रयोजकताज्ञानपरम्, तादृशान्वयव्यतिरेकानुविधानबोधपरं वा। अग्रेतनमपि स्वक्रियापदं तत्परमेव, कृत्यादेः शङ्काप्रतिबन्धकत्वे मानाभावात्, कारणताग्रहोत्तरकालीनत्वाच्च।

[TCD, pp. 388-399]

(82) P. 47, ll, 6-7 : Here, the relevant passage of *Tātparyaṭīkā-pariśuddhi* reads as follows :

··· उभयकोटिसमसंशयप्रभवसमजिज्ञासामपनीय नियतविषयां जनयता तर्केण प्रमाणविषयोऽभ्यनुज्ञातो भवति। तेनायं सूत्रार्थः,

प्रमाणाभ्यनुज्ञाव्यापारेण फलसिद्धौ व्याप्रियमाण ऊहस्तर्क इति । स चापादितसन्देहे सन्देहापन्ने च प्रवर्तत इति ज्ञापनार्थम् अविज्ञाततत्त्व इत्युक्तम् । कारणोपपत्तिः प्रमाणाभ्यनुज्ञा । तस्याश्च तर्कव्यापारभूतायाः स्वरूपमुक्तमिति नातिप्रसङ्गः । एवंव्यापारश्चोहः प्रसङ्ग इत्येवेति तथैव टीकाकृता उक्तम् । स चाहार्यहेतोरुत्पद्यत इति ज्ञापनार्थं कारणोपपत्तित इति पदं तदर्थतयापि क्वचिद् व्याख्यातम् । तदस्य विषयोऽविज्ञाततत्त्वः । कारणमाहार्यलिङ्गोत्थाप्यो व्यापारः प्रमाणाभ्यनुज्ञा । फलं प्रमाणपरतन्त्रस्य सतः 'फलवत्सन्निधावफलं तदङ्गम्' इति न्यायेन तत्त्वनिर्णयः । स्वरूपमनिष्टप्रसङ्गः । स चात्माश्रयेतरेतराश्रयचक्रकानवस्थाप्रमाणबाधितार्थप्रसङ्गेन पञ्चविधः ।

[TTP, p. 588]

(83) P. 49, ll. 1-3 : Vācaspati Miśra II makes an interesting observation in this connection :

……न्यायावयवव्यावृत्तशब्दलक्षणानाश्रयमोक्षकारणतत्त्वज्ञानविषयपदार्थलक्षणस्य प्रथमाह्निकार्थत्वात्, न्यायतदङ्गप्रतिज्ञादिलक्षणजातिनिग्रहस्थानविशेषलक्षणोभयभिन्नकारणतत्त्वज्ञानविषयपदार्थलक्षणस्य च द्वितीयाह्निकार्थत्वात् । अत्र च हेत्वाभासानां साधनदूषणपरवचनसन्दर्भरूपकथैकदेशत्वेन कथायाः प्राधान्यादादौ तल्लक्षणप्रकरणम् । तत्राप्येतच्छास्त्रोद्देश्यतत्त्वज्ञानसाक्षादुपायतया वादस्य प्राधान्यादादौ तल्लक्षणाय सूत्रम्…… [NTĀ, I.O.L. Mss, fol. 80b]

(84) P. 49, ll. 6-12 : A relevant comment is found in *Nyāyatattvāloka* of Vācaspati Miśra II :

……अत्र कथासामान्यलक्षणं विभागश्चाक्षेपलभ्यौ । यद्यपि कथासामान्यं नोद्दिष्टं तथाप्येकं लक्षणीयमेव, अन्यथा वादादिलक्षणसूत्राणां पूर्वापरप्रकरणानन्तर्भूतानामेकैकसूत्रेणाप्रकरणत्वाच्छास्त्रबहिर्भावापत्तेः, सूत्रकृता कथात्वेनानुद्देशः कथासामान्यस्यैकं प्रयोजनं

नास्तीति ज्ञापनाय। यद्यपि कथामात्रे परनिग्रहस्थानप्रतिपादनमेकं फलमस्त्येव, तथापि कृतिवैचित्र्यात् तत्फलं न सूत्रकारोद्देश्यमित्युन्नीयते। तल्लक्षणन्तु वादिप्रतिवाद्यन्याभिधानावृत्तिवादिस्थापनाभिधान-प्रतिवादिदूषणाभिधानवृत्तिवाक्यत्वाधिकरणनिष्पादनोद्देश्यप्रवर्त्यं वादि-प्रतिवाद्यन्यतरसाधनदूषणान्यतराभिधानत्वम्......अत्र सूत्रे वाद इति लक्ष्यनिर्देशः, शेषः लक्षणाय परिशोधनाय च। पक्षः सिसाधयिषितोऽर्थः, प्रतिपक्षः पक्षविरोधी सिसाधयिषित एव, तयोः परिग्रहोऽङ्गीकारो यत्र स तथा, एतेन कथाप्रयोजको विरोधाङ्गीकार उक्तः, एतावन्मात्रञ्च कथान्तरसाधारणमत उक्तं—प्रमाणतर्कसाधनोपालम्भ इति। प्रमाणतर्काभ्यां सतर्केण प्रमाणत्वाभिमतेन साधनस्वरूपोपालम्भ इति वादे सर्वनिग्रहस्थाननिषेधे प्राप्तेऽभिमताष्टनिग्रहस्थानप्राप्त्यर्थं सिद्धान्ताविरुद्ध इत्यादिना विशेषोऽभिधीयते...तत्रार्थात् सिद्धान्ताविरुद्ध इत्यनेनापसिद्धान्तोपग्रहः; सर्वहेत्वाभासानाञ्च, तेषां सिद्धान्ते निषेधेन तद्विरोधित्वात्, अवयवोपपत्त्या वाऽमीषामुपग्रहः, पञ्चग्रहणात् न्यूनाधिकयोरित्यष्टनिग्रहाधिकरणो वादः।...

[NTĀ, I.O.L. Mss, fol. 82a-82b]

Keśava Miśra has adopted the interpretation suggested by Vācaspati Miśra II. [See GSP, P. 18]

(85) P. 49, ll. 10-15 : Keśava Miśra also records this view in his *Gautamīyasūtraprakāśa* :

सूत्राक्षिप्तं कथासामान्यविभागश्च। तच्च पक्षप्रतिपक्षपरिग्रह इति सूत्रैकदेशेन कृतमिति कश्चित्। कथकाशक्तिलिङ्गवद्वाक्यत्वमित्यन्ये। जातिविशेष एवेत्यपरे। सामान्यलक्षणं च प्रकरणैक्याय निर्वाच्यमेवेति दिक्। विभागश्च—सा त्रेधा वादो जल्पो वितण्डा चेति।

[GSP, p. 18]

(86) P. 49, l. 16- P. 50, l. 1 : Viśvanātha Pañcānana also adopts such an interpretation :

अत्र च वाद इति लक्ष्यनिर्देशः। पक्षप्रतिपक्षौ विप्रतिपत्तिकोटी, तयोः परिग्रहः तत्साधनोद्देश्यकोक्तिप्रत्युक्तिरूपवचनसन्दर्भः। एताव-न्मात्रं च कथान्तरसाधारणमत आह—प्रमाणेत्यादि। प्रमाणतर्काभ्यां तद्रूपेण ज्ञाताभ्यां साधनोपालम्भौ यत्र सः। तथा च उभयत्रापि प्रमाणादिसद्भावे कोटिद्वयस्यापि सिद्धिः स्यादतस्तद्रूपेण ज्ञाताभ्यामिति। ज्ञानमनाहार्यं विवक्षितम्। उपालम्भो दूषणम्, जल्पादौ तु प्रमाणा-भासत्वादिना ज्ञाताभ्यामपि साधनोपालम्भौ भवत इति तद्वारणम्। इत्थं च प्रमाणाभासत्वप्रकारकज्ञानविषयकरणकसाधनोपालम्भयोग्या-न्यत्वे सतीत्यर्थः, तेन तादृशजल्पविशेषे जातिव्याप्तिः। अन्ये तु तदपि लक्षणघटकमेव, तदर्थश्च तावन्मात्रनिग्रहस्थानयोग्यत्वम्, तावदति-रिक्तनिग्रहस्थानोपन्यासायोग्यत्वं वा। [NSV on NS 1.2.1.]

Rādhāmohana Gosvāmi Bhaṭṭācārya also agrees wtth this interpretation, though he suggests some new alternatives as well :

यद्यपि निर्णयानुकूलतया पूर्वाह्निक एवायं वक्तुमुचितस्तथापि कथान्तर्गततयाऽत्रास्य लक्षणम्। पक्षस्य प्रतिपक्षस्य परिग्रहो विरोधि-कोट्युपन्यासो निर्णयानुकूलवचने यत्र वादिप्रतिवादिवाक्यजाते स वाद इत्यन्वयः। तथा च तत्त्वनिर्णयोद्देश्यकं विरोधिकोटिद्वयसाधनतयोप-न्यस्तोक्तिप्रत्युक्तिरूपवाक्यजातमिति फलितम्।

अथवा—पक्षाय तत्त्वनिर्णयाय प्रतिपक्षयोः मिथो विरुद्धकोट्योः परिग्रहः साधनयोग्योक्तिप्रत्युक्तिरूपवाक्यजातं वादः, परिगृह्यते निर्णी-यतेऽनेनेति व्युत्पत्तेः। तत्त्वनिर्णयोद्देश्यकत्वनिवेशेन जल्पवारणम्। अप्रमाणेण तत्त्वनिर्णयदूषणाभिधानवारणाय विशेषणमाह—प्रमाणतर्क-साधनोपालम्भ इति। प्रमाणतर्काभ्यां साधनोपालम्भौ यत्र स इत्यर्थः।

तत्र साधनं तत्त्वनिर्णयानुकूलव्यापारः, उपालम्भो विपरीतकोटिसाधने दूषणोपन्यासः। साधनदूषणाभिधानं सिद्धान्तानुसारेणेत्याह—सिद्धान्ताविरुद्ध इति। साधनं पञ्चावयवप्रयोगेणैवेत्याह—पञ्चावयवोपपन्न इति। एतेन प्रमाणतर्काभासापसिद्धान्तन्यूनाधिकावयवाभासदृष्टान्तासिद्ध्यादेरुद्भावनं नियम्यते।

भाष्यकारानुसारिणस्तु—वादस्य वीतरागकथात्वेन तत्त्वनिर्णयस्योद्देश्यतया पुरुषदोषस्याविज्ञातार्थादेरिव न्यूनाधिकयोरपि नोद्भावनम्, तेन पञ्चावयवोपपन्न इति प्रायिकत्वाभिप्रायेणेत्याहुः।

केचित्तु—सिद्धान्तेत्यादि विशेषणद्वयेण तावन्मात्रनिग्रहस्थानयोग्यत्वं तावदतिरिक्तनिग्रहस्थानोपन्यासायोग्यत्वं वा लक्षणघटकतया विवक्षितं निग्रहस्थानं प्रतिज्ञाहान्यादीनामेकैकं धृत्वा तदुपन्यासायोग्यत्वमिति निष्कर्षः, तेनोक्तजल्पविशेषवारणमित्याहुः।

अन्ये तु—वाद इति लक्ष्यनिर्देशः। पक्षप्रतिपक्षौ विप्रतिपत्तिकोटी, तयोः परिग्रहस्तद्बोधकोक्तिप्रत्युक्तिरूपशब्दचयः। तावन्मात्रं च कथान्तरातिव्याप्तमत्यत आह—प्रमाणेत्यादि। प्रमाणतर्काभ्यां तत्त्वेन ज्ञाताभ्यां साधनोपालम्भौ यत्र स तथा, तथा चोभयत्रापि प्रमाणसद्भावे कोटिद्वयस्यापि सिद्धिः स्यादतस्तत्त्वेन ज्ञाताभ्यामिति। ज्ञानमनाहार्यं विवक्षितम्। उपालम्भो दूषणम्। जल्पादौ तु प्रमाणाभासत्वेन ज्ञाताभ्यामपि साधनोपालम्भौ भवत इति तद्वारणं तथेतरथा तद्धेतोरेव दुष्टत्वम्। इत्थं च प्रमाणाभासत्वप्रकारकतर्काभासत्वप्रकारकज्ञानविषयकरणकसाधनोपालम्भयोग्यान्यत्वे सतीत्यर्थस्तेन तादृशजल्पविशेषे नातिव्याप्तिः। तत्र च निग्रहस्थानविशेषनियमार्थं सिद्धान्तेत्यादिविशेषणद्वयमित्याहुः। [NSSV, pp. 52-53]

(87) P. 50, li. 13-14 : This again, seems to be the view of Vācaspati Miśra II, who observes—एवञ्च तत्त्वर्णिनीषाप्रयुक्ता कथा वाद इति सिद्धं लक्षणम्। [NTĀ, I.O.L. Mss. fol. 82b]

(88) P. 50, l. 19- P. 51, l. 1 : The relevant passage of *Nyāya-bhāṣya* is as follows :

जल्पे निग्रहस्थानविनियोगात् वादे तत्प्रतिषेधः। प्रतिषेधे कस्यचिदभ्यनुज्ञानार्थं सिद्धान्ताविरुद्ध इति वचनम्। "सिद्धान्तमभ्युपेत्य तद्विरोधी विरुद्धः" (न्या० सू० १।२४।७) इति हेत्वाभासस्य निग्रहस्थानाभ्यनुज्ञा वादे। पञ्चावयवोपपन्न इति "हीनमन्यतमेनाप्यवयवेन न्यूनम्", "हेतूदाहरणाधिकमधिकम्" (न्या० सू० ५।२।१२-१३) इति चैतयोरभ्यनुज्ञानार्थम्। अवयवेषु प्रमाणतर्कान्तर्भावे पृथक् प्रमाणतर्कग्रहणं साधनोपालम्भव्यतिषङ्गज्ञापनार्थम्। अन्यथोभावपि पक्षौ स्थापनाप्रवृत्तौ वाद इति स्यात्। अन्तरेणापि चावयवसम्बन्धं प्रमाणान्यर्थं साधयन्तीति दृष्टम्, तेनापि कल्पेन साधनोपालम्भौ वादे भवत इति ज्ञापयति। [NB, p. 339-342.]

(89) P. 51, ll. 1-15 : This opinion of Ācārya (i.e. Udayana) is found in *Tātparyaṭīkāpariśuddhi*, p, 622.

(90) P. 52, l. 17- P. 53, l. 3 : Here, Rāmabhadra quotes almost verbation from Udayana. The relevant portion of *Tātparyaṭīkāpariśuddhi* reads as follows :

तत्रानुविधेयस्य यथाशक्ति यथानियमं सम्मानासम्मानव्यञ्जकं कर्म। नैतद् वादे। तत्र हि तत्त्वबुभुत्सुतया स्वयमेवातत्त्वज्ञः तत्त्वज्ञानिनमुपासीत। स्थेयानां तु वादस्थानकथाविशेषव्यवस्थापनं पूर्वोत्तरवादस्थापनं विवदमानयोर्गुणदोषावधारणं भग्नप्रतिवादिप्रबोधनं लोके निष्पन्नकथाफलप्रतिपादनं च कर्माणि।…न चैवं वादे, तत्र तयोरेव वीतरागतया शक्तत्वात्…… [TTP, p. 623]

(91) P. 53, ll. 5-6. Here, Rāmabhadra refers to Vācaspati Miśra I as मिश्राः. The sentence quoted here is found in *Nyāyavārttikatātparyaṭīkā*, p. 354.

(92) p. 53, ll. 9-10 : This has been taken from Udayana :

अनुविधेयस्थेयसम्यपुरुषवती जनता सभेत्युच्यते । [TTP, p. 623]

(93) P. 53, ll. 11-12 : This has been paraphrased from *Tātparyaṭīkāpariśuddhi* of Udayana :

स्वस्थः सर्वजनप्रत्ययानपलापी मतमात्रावलम्बी अवहितोऽकलह-कारश्चेति कथाधिकारिणो दर्शिता । विपर्ययेण हेया इति ।......तेऽपि प्रकृतोक्तिकोऽविप्रलम्भको यथाकालस्फूर्त्तिकः अनाक्षेपको युक्तिसिद्ध-संप्रत्ययी चेति पञ्च वादे उपादेयाः, विपर्ययेण हेयाः । एवंभूताश्च शिष्यादय एव प्रायेणेति त एवोक्ताः । एवं च सति हेयान् विहाय यो यथाभूतः स तथाभूतेन वक्तुमर्हति ; तथा सति कथा, महावाक्य-सिद्धौ फलसिद्धेः । न हि युयुत्सुरिरंसू प्रतिपद्य चिरम् असिद्धं संभूय समीहितं साधयतः । [TTP, p. 621]

(94) P. 53, l. 17- P. 54, l. 1 : Here, Rāmabhadra follows Uddyotakara, whose comments are as follows :

(*i*) ...यथोक्तोपपन्न इति न युक्तम्, जल्पे निग्रहस्थाननियमस्यान-भ्युपगमात् ; यद्यवमुच्यते प्रमाणतर्कसाधनोपालम्भः सिद्धान्ताविरुद्धः पञ्चावयवोपपन्नः पक्षप्रतिपक्षपरिग्रहः छलजातिनिग्रहस्थानसाधनो-पालम्भो जल्प इति, न युक्तमेवं भवितुम् । सिद्धान्ताविरुद्धः पञ्चा-वयवोपपन्न इति च पदयोरुपालम्भग्रहणात् समस्तनिग्रहस्थानप्रसक्तौ नियमार्थत्वात् । नियमार्थे एते पदे सिद्धान्ताविरुद्धः पञ्चावयवोपपन्न-इति । जल्पे च नियन्तव्यं न किञ्चिदस्ति । तस्मात् नियमार्थे एते पदे नातिदेष्टव्ये इत्यतो न वक्तव्यं यथोक्तोपपन्न इति । नैष दोषः, सम्भवतोऽतिदेशात् । यदत्र संबध्यते तदतिदिश्यते । किं च संबध्यते ? प्रमाणतर्कसाधनोपालम्भ इत्येतत् । तस्मात् यथोक्तोपपन्न इति लक्षण-मात्रस्यातिदेशः । [NV, pp. 357-358]

Udyotakara furnishes an alternative justification for the word यथोक्तोपपन्न :

(*ii*) अथ वा—यथोक्तेनोपपन्नेनोपपन्नो यथोक्तोपपन्नोपन्न इति प्राप्त गम्यमानत्वादेकस्योपपन्नशब्दस्य लोपः, यथा गोरथ इति। केन पुनरयं गम्यत इति? उक्तं सामर्थ्येनेति। न हि नियमार्थयोः पदयोर्जल्पे सम्भवः, तस्मान् न ते अतिदिश्येते। [NV, p. 358.]

It may be noted here that on this issue, Jayanta Bhaṭṭa has tried to defend Vātsyāyana against Uddyotakara :

(*iii*) यथोक्तोपपन्नग्रहणेन सर्वातिदेशे वादजल्पयोरविशेष इति शङ्कमानाः केचन पक्षप्रतिपक्षपरिग्रहमात्रातिदेशमेव व्याचक्षते। इयतस्तु पूर्वसूत्रानुवृत्त्याऽपि सिद्धेर्मन्दफलमेव यथोक्तोपपन्नवचनं भवेदिति समस्तादिदेश एव वरम्।

न च तत्रापि वादजल्पयोः साम्यं गम्यमानार्थम्। अतिदेशाच्छ्रौत एवार्थोऽतिदिश्यते, न गम्यमानः, तत्कृत एव च तयोर्भेदः। तथा च प्रमाणतर्कसाधनोपालम्भ इत्यत्र गम्यमानोऽर्थोऽभिप्रायनियमः, स नातिदिश्यते। सिद्धान्ताविरुद्धः पञ्चावयवोपपन्न इत्यत्रापि बुद्धिपूर्वजात्यादिप्रयोगप्रतिषेध तदुद्भावननियमरूपो गम्यमानोऽर्थः, सोऽपि नातिदिश्यत इति कुतस्तयोरविवेकः। अतएव च बुद्धिपूर्वकप्रयोगानुज्ञानाय छलजातिनिग्रहस्थानसाधनोपालम्भ इत्युक्तम्।

[NM, Vol. III, pp. 120-121]

(95) P. 54, ll. 1-2 : This interpretation of Vātsyāyana is found in *Nyāyabhāṣya*, p. 356.

(96) P. 54, ll. 9-11 : Viśvanātha Pañcānana records this view, and suggests a different solution :

यद्यपि छलादिभिरुपालम्भ एव न तु साधनम्, तथाऽपि साधनस्य परकीयानुमानस्योपालम्भो यत्रेत्यर्थान्न दोषः। परपक्षदूषणे सति स्वपक्षसिद्धिरित्यतः साधने तदुपयोग इत्यन्ये। [NSV, p. 357]

(97) P. 54, ll. 19-20 : Here, Rāmabhadra refers to the views of Vācaspati Miśra II. who comments :

...यथोक्तोपपन्न इति। यथोक्तेनोपपन्नेन योग्येन उपपन्नो अर्थतो यथोक्तपपन्न इति मध्यपदलापी समासः, मृगाक्षीपदवत्, तथा च वादलक्षणोक्तानां मध्ये उपपन्नेन प्रमाणतर्कसाधनोपालम्भ इति पदार्थेनैव योग्यतयाऽन्वयो लभ्यते ; एवञ्च प्रमाणतर्काभ्यां कदाचिच्छलादिभिरपि साधनोपालम्भौ यत्र स जल्पः, न चैवमपि वितण्डायामतिव्याप्तिः, ...उभयपक्षस्थापनावती विजिगीषुकथा जल्पः।......

[NTĀ, I.O.L. Mss, fol. 83a-83b]

Keśava Miśra Tarkācārya also accepts this definition [See GSP, p. 19.]

(98) P. 55, l. 2- P. 56, l. 2 ; This view of Udayana is found in his *Tātparyaṭīkāpariśuddhi*, pp. 627-628.

(99) P. 67, ll. 1-9 : This has been taken almost verbatim from *Tatparyaṭīkāpariśuddhi* of Udayana [TTP, p. 630].

(100) P. 57, ll. 9-13 : This view of Sānatani has been recorded first by Udayana, and subsequently, by many of his successors. Thus, Udayana writes in his *Tatparyaṭīkāpariśuddhi* :

(*i*) ...प्रौढगौडनैयायिकमते चतस्रः कथाः।

स प्रतिपक्षस्थापनाहीनो वितण्डा

इत्यत्र जल्पवद्वादस्यापि परामर्शात्, पुरुषाभिप्रायानुरोधेन चतुर्थोदाहरणस्याप्युपपत्तेरिति सानातनिः। एक एवायं कथामार्ग इति बाह्याः। ते द्वे अपि तिस्र एवेति नियमयता निराकृते। तत्त्वबुभुत्सुकथा च वितण्डा चेति व्याहतम्। न हि प्रथमसाधननिवृत्तावेव तत्त्वनिर्णयः, निःसाधनस्य तस्यानुपपत्तेः। नापि प्रतिपक्षसाधनमनिवर्त्यं

प्रथमस्य साधनत्वावस्थितिः, शङ्कितप्रतिपक्षत्वात्। यदि तु प्रतिपक्ष-साधनमनिरूप्यैव विजिगीषुवितण्डावत् तावतैव वादिनौ कृतिनौ, न तर्हि तत्त्वबुभुत्सू। एवं च यदि विजीगीषुः, कथमप्रतिभाद्यनुद्-भावनम्। न च विजयतत्त्वनिर्णयाभ्यां फलान्तरमवशिष्यते कथाया, यदर्थं वादवितण्डा। अनुत्पन्नस्य हि तत्त्वनिर्णयस्योत्पादनम्, उत्पन्नस्य पालनम्, पालितस्य च विनियोगः। स च स्वयमभ्यासः, कारुणिकतया परव्युत्पादनम्। एतच्च सर्वं कथात्रयपर्यवसितम्, नाप्येककथानिर्वाह्यमिति। [TTP, p. 620]

Maṇikaṇṭha Miśra supports the view of Udayana :

(*ii*) ...जयानुद्देश्येन प्रवृत्तत्वे सति कथात्वसामान्यवान् वादः। वादवितण्डा तु कथैव न भवति, विरोधात्। केवलतत्त्वनिर्णयोद्देशेन प्रवृत्तत्वं, जयोद्देशेन प्रवृत्तत्वं चेति विरोधः। न च तत्त्वनिर्णयोद्देशेन प्रवृत्तकथात्वमात्रं लक्षणम्, संभूयोद्देशजल्पेऽतिव्याप्तेः।

[*Nyāyaratna*, pp. 147-148]

Vācaspati Miśra II writes :

(*iii*) ...अधिकोऽयं विभागः, वादिप्रतिवादिसाधनदूषणाभिधान-सन्दर्भतया कथामार्गस्यैकत्वादिति बाह्याः। तन्न, तत्त्वनिर्णयस्य उभय-साधनदूषणशक्तिनिरूपणस्यैकैकस्थापनदूषणशक्तिनिरूपणस्य फलस्य च त्रित्वेन कथात्रित्वात्। विजिगीषुवितण्डावत् बुभुत्सुवितण्डाया अपि सम्भवात् पुमिच्छाया अनियमात् सा चतुर्द्धेति सानातनिः। तन्न, तत्त्वनिर्णयोद्देशप्रवृत्तत्वेन तस्यापि वादत्वात्, जिगीषुतया च तत्र प्रवृत्तिः न सम्भवत्येव, इच्छयोर्विरोधात्, बुभुक्षामुमुक्षावत्...

[NTĀ, I.O.L. Mss, fol. 82a]

(101) P. 57, l. 20 : This line is quoted from *Tātparyaṭīkāpariśuddhi*, p. 620.

(102) P. 59, ll. 16-18. These lincs show a distinct influence of Gaṅgeśa Upādhyāya, whose remarks are as follows :

(*i*) विपक्षवृत्तित्वं साधारणत्वम्, तन्मात्रस्य दूषकत्वात्। विरुद्धस्यापि तत्त्वाज्ञाने विपक्षवृत्तिताज्ञानदशायां साधारणत्वम्, अन्यथा तस्य हेत्वाभासान्तरापत्तेः। उपाधेरसङ्कर एव। 'सर्वमनित्यं मेयत्वात्' इत्यनुपसंहारो, 'शब्दो नित्यः शब्दत्वात्' 'भूर्नित्या गन्धवत्त्वात्' इत्यसाधारणश्च वस्तुगत्या साध्याभाववद्वृत्तित्वेन साधारणोऽपि पक्षतादशायाम् उद्भावयितुं न शक्यत इत्युभयोर्भेदेनोपन्यासः।

[TC, pp. 1078-1080]

Raghunātha Śiromaṇi, while explaining this passage, observes as follows :

(*ii*) विपक्षेति। अत्र विपक्षत्वं साध्याभाववत्त्वम्। अनुपदमेव वस्तुगत्या साध्याभाववद्वृत्तित्वेन साधारण इति मूल एव स्फुटतरमभिधानात्। न तु निश्चयगर्भम्, तज्ज्ञानस्याप्रतिबन्धकत्वात्।

[TCD, p. 1078]

Raghunātha also records in this connection a view held by the earlier Naiyāyikas :

(*iii*) व्याप्तिग्रहकारणसहचारग्रहसाहचर्यभावप्रतियोगिग्रहविषयत्वेनानुगम इत्यपि कश्चित्। [TCD, p. 1085]

Jagadīśa Tarkālaṅkāra identifies this view in the following manner :

(*iv*) व्यभिचारज्ञानाभावसहकृतं सहचारज्ञानं व्याप्तिग्राहकमिति मूलमनुसरतां प्राचां मतमाह—व्याप्तीति। [TCDJ, p. 1084]

The following remarks of Gangeśa and Raghunātha are also worth noting :

(*v*) विरुद्धान्यपक्षवृत्तित्वे सत्यनुमितिविरोधिसम्बन्धाव्याप्तिर्वा। तेनैव रूपेण ज्ञातस्य प्रतिबन्धकत्वात्, परस्य तथैवोद्भावनाच्च लक्षणानुरोधेन प्रत्येकमेव हेत्वाभासत्वम्। [TC, p. 1069-1071]

Raghunātha's comments are as follows :

(*vi*) ···लक्षणान्तरमाह—विरुद्धान्येति। विशिष्टसाध्यहेतुसामानाधिकरण्यग्रहाविरोध्यर्थकमर्थतो विरोधिविशेषणम्। तेन साध्यसाधनयोरप्रसिद्धेरवृत्तित्वस्य परम्परासामानाधिकरण्यादीनाञ्च निरासः। पक्षपदञ्च धर्मिमात्रपरम्। तथा च यद्यद्धर्मिवृत्तित्वं हेतोर्ज्ञायते तत्र तत्रैवानुमितिविरोधि यद्रूपं तद्वत्त्वमित्यर्थः। साध्यव्यापकीभूताभावप्रतियोगित्वन्तु तथा, बाधप्रतिरोधौ तु धर्मिविशेषितत्वात् न तादृशौ। सर्वं साध्याभाववत् तद्व्याप्यवद्वेत्यादिकञ्च साध्यवत्त्वग्रहविरोधित्वेन सामानाधिकरण्यग्रहविरोधि, साध्यानुमितिसामान्यविरोधित्वं वा विशेषणम्। तेनैवेति। तेन अनुमितिविरोधिना विपक्षवृत्तित्वादिना। एवकारेणानुगमकं रूपं व्यवच्छिद्य तस्य हेत्वाभासतावच्छेदकत्वं निरस्यति हेत्वाभासलक्षणानुरोधेनेति। तेनानुमितिविरोधित्वघटितलक्षणकरणेन असाधारणस्य सत्प्रतिपक्षोत्थापकतया दूषणत्वपक्षे नाव्याप्तिः, इतरथा पुनरव्याप्तिरेव।

[TCDJ, pp. 1069-1073]

(103) P. 60, ll. 2-5 : This view has been propounded by Raghunātha Śiromaṇi in the following passage of *Tattvacintāmaṇidīdhiti*, while explaining the definition of असाधारण as सर्वसपक्षव्यावृत्तत्वम् that is proposed by Gaṅgeśa Upādhyāya :

सर्वसपक्षेति। सपक्षः साध्यवान्। पक्षवृत्तित्वे सति साध्यव्यापकीभूताभावप्रतियोगित्वमित्यर्थः। इदञ्च साक्षादनुमितिविरोधि, विरोधश्च साध्यसामानाधिकरण्यादिरूपोऽन्वयव्याप्तिग्रहविरोधीति न साङ्कर्यशङ्काऽपि। साध्यसमानाधिकरणन्तु नासाधारणम्। दशाविशेषे तद्भ्रमस्तु पुरुषदोषो व्याप्य इव साधारण्यभ्रमः।

[TCD, pp. 1094-1095]

(104) P. 61, ll. 6-8 : This definition of विरुद्ध has been formulated by Gaṅgeśa Upādhyāya. The relevant portion of *Tattvacintāmaṇi* runs as follows :

(*i*) साध्यव्यापकाभावप्रतियोगित्वं विरुद्धत्वम् । न च प्रतियोगिनोरन्वये भासमान एव तदभावयोर्व्याप्तिग्रहः, भिन्नग्राहकसामग्रीकत्वात् । अन्यथा व्यतिरेकिविलयापत्तेः । [TC, p. 1130]

Raghunātha Śiromaṇi comments on this as follows :

(*ii*) साध्येत्यादि । हेत्वभावस्य साध्यवन्निष्ठाभावाप्रतियोगित्वज्ञानं वस्तुतस्तत्प्रतियोगिकाभावस्य हेतोः साध्यसामानाधिकरण्यग्रहं विरुणद्धीत्यभिप्रायेणेदम् । [TCD, p. 1130]

(105) P. 63, ll. 9-10 ; Here, Rāmabhadra has adopted the definition proposed by Raghunātha Śiromaṇi, which runs as follows :

सत्प्रतिपक्षस्तु साध्याभावव्याप्यवान् साध्यवदन्यत्वव्याप्यवांश्च पक्षः, पक्षनिष्ठौ साध्याभावसाध्यवद्भेदव्याप्यौ इत्येवमादिः प्रत्येकमेव । [TCD, p. 1169]

(106) P. 64, ll. 7-8 : Here, Rāmabhadra records the view of Gaṅgeśa Upādhyāya, whose remarks are as follows :

आश्रयासिद्धिः स्वरूपासिद्धिः व्याप्यत्वासिद्धिः प्रत्येकमेव दोषः, प्रत्येकस्य ज्ञानादुद्भावनाच्चानुमितिप्रतिबन्धात्, ……अनुभवसिद्धं हि लक्षणम्, न तु लक्षणानुरोधेनानुभवकल्पना, परामर्शविषयाभावत्वेनाऽनुगतेन त्रयाणामसिद्धत्वेन संग्रहो महर्षिणा कृत इति न विभागविरोधो हेत्वाभासाधिक्यं वा । अत एव ये व्याप्तिविरहपक्षधर्मतादिविरहरूपास्तेऽसिद्धिभेदमध्यमध्यासते तदन्ये च यथायथं व्यभिचारादय इति सिद्धान्तप्रवादोऽपि । न चैवं साक्षात्प्रतिबन्धकत्वेन बाधप्रतिरोधयोर्व्याप्तिविरहलिङ्गत्वेन सव्यभिचारविरुद्धयोरपि संग्रहे विभागव्याघातः, स्वतन्त्राभिप्रायस्य निषेद्धुमशक्यत्वात्, अन्यथा शास्त्रे परिभाषोच्छेदापत्तेः । [TC, pp. 1180-1181]

(107) P. 64, ll. 11-13 : Here, Rāmabhadra records the view of Raghunātna Śiromaṇi, whose remarks are as follows :

यत्तु—हेतुतावच्छेदकस्य व्याप्यतानवच्छेदकत्वमपि व्याप्यत्वासिद्धिः, नीलधूमत्वादेश्च तथात्वं समानाधिकरणं सम्भवदवच्छेदकान्तरमपेक्ष्य गुरुत्वादिति। अत्रावच्छेदकत्वं यद्यनतिरिक्तवृत्तित्वम्, तदा तस्याप्यस्ति। अथ तादृशेन समानाधिकरणेन तादृशेन वा धर्मान्तरेणाऽघटितत्वे सति तत्त्वम्। तन्न। सत्यन्तस्य गौरवेणानुपादेयत्वात्। नापि अन्यूनानतिरिक्तवृत्तित्वम्, आलोकाद्यवृत्तेरप्यतथात्वात्। अथ स्वरूपसम्बन्धविशेषः, तर्हि 'द्रव्यं' रूपादि'त्यादौ रूपत्वादेरपि तथात्वं न स्यात्। रूपादिषु चतुर्विंशतौ सम्भवदवच्छेदकमेकं गुणत्वमपेक्ष्य रूपत्वादीनां चतुर्विंशतेः षड्विंशतेर्वा गुरुत्वात्। एवं 'पशुमान् सास्नादिमत' इत्यादौ सास्नादिमत्त्वादेरपि गोत्वादिकां जातिमपेक्ष्य उपाधेर्गुरुत्वात्, हेतुतावच्छेदकविशिष्टहेतुव्यापकसाध्यसमानाधिकरणतादृशहेतोः साध्याव्यभिचरितसम्बन्धितादृशहेतोर्वा ज्ञानस्यानुमितिकारणस्याविरोधिनो निरुक्तानवच्छेदकत्वस्य दोषत्वायोगाच्च। पदार्थस्थले तु दृष्टान्तस्य साध्यादिवैकल्यवत् हेतोर्व्यर्थविशेषणत्वमपि निग्रहस्थानविभाजकसूत्रस्थानुक्तसमुच्चयपरेण 'च'कारेण समुच्चितं पृथगेव निग्रहस्थानम्। [TCD, pp. 1191-1194]

(108) P. 65, ll. 3-7 : Here, the following remarks of Gaṅgeśa Upādhyāya are worth comparing :

साध्याभाववन्मात्रसहचारो न व्यभिचारः, साध्यप्रागभावध्वंसवद्वृत्तित्वेन व्यभिचारितया पृथिवीत्वादिना गन्धादेः द्रव्यत्वादिना गुणस्यानुमानभङ्गप्रसङ्गात्, किन्तु साध्यात्यन्ताभाववद्गामित्वम्, एवञ्च स्वप्रागभावप्रध्वंसावच्छिन्नतदाश्रये तत्प्रतियोगिसाधने पक्षे व्यभिचारो नेति बाधो दूषणम्। अथावच्छेदे सिद्धसाधनम्, अवच्छेदके हेत्वसिद्धिः, विशिष्टश्च नान्यदिति चेत्, तर्हि प्रागभाव-

प्रध्वंसप्रतियोगिनोरेकवृत्तित्वेनैकसमयताऽपि स्यात्। अथ यत्समयावच्छेदेन यत्र प्रागभावः प्रध्वंसो वा न तत्समयावच्छेदेन प्रतियोगीति चेत्, तर्हि तदवच्छेदेन प्रतियोगिसाधने न सिद्धसाधनं किन्तु बाध एव। अन्यथा भावात्यन्ताभावयोरप्यव्याप्यवृत्तित्वभङ्गः, एकवृत्तित्वात्। अवच्छेदकभेदेन वृत्तिरिहापि तुल्या, तत्र देशभेदोऽवच्छेदकोऽत्र तु समयभेद इति। [TC, pp. 1228-1230]

(109) P. 65, ll. 7-10: Here, Rāmabhadra seems to adopt the view of Raghunātha Śiromaṇi, whose remarks are as follows :

(*i*) अत्रेदं तत्त्वम्। साध्याभाववान् साध्यवदन्यो वा पक्षः, पक्षावृत्ति साध्यं, पक्षे साध्याभावः, पक्षनिष्ठसाध्याभाववत्त्वादिकम्, साध्यादेः पक्षवृत्तित्वादिकम्, साध्यवत्सामान्यादेः पक्षान्यत्वादिकम्, विशिष्टसाध्ये पक्षादेर्विशेष्यभाववत्त्वादिकम्, यथामतं पक्षे साध्यवत्ताज्ञानस्य साक्षाद्विरोधि प्रत्येकमेव बाधः। तन्निश्चयश्च विरोधिनिश्चयत्वेन दोषविशेषाद्यजन्यज्ञानमात्र एव विरोधी।

[TCD, pp. 1204-1205]

Jagadīśa Tarkālaṅkara has offered the following reasons for admitting such a large variety of बाध :

(*ii*) …अनुभवबलाद्भिन्नविषयकस्यापि ज्ञानस्य प्रतिबन्धकत्वादुपात्तं निखिलमेव साध्यवत्ताविरोधित्वाद् बाध इति प्राञ्चः। समानविषयकस्यैव ज्ञानस्य लाघवेन विरोधित्वात् 'पक्ष साध्यवान्' 'पक्षे साध्याभाव' इत्येतयोरेव बुद्ध्योर्विरोधित्वम्—इत्यपरे। वस्तुतो यत्र पक्षापेक्षया साध्याभावो लघुः तत्र तत्प्रकारक एव बाधनिश्चयो विरोधी, यथा 'चैत्रावलोकितह्रदो वह्निमान्' इत्यादौ तत्प्रकारकनिश्चयापेक्षया साध्याभावप्रकारकनिश्चयत्वस्यैव लघुत्वेन साध्यवत्ताज्ञानप्रतिबन्धकतावच्छेदकत्वात्। यत्र तु साध्याभावापेक्षया पक्ष एव लघुस्तत्र साध्याभावधर्मिकपक्षनिश्चय एव साध्यवत्ताज्ञानविरोधी; यथा 'जलह्रदः चैत्रा-

वल्लोकितवह्निमान्' इत्यादौ, तत्र साध्याभावनिश्चयत्वापेक्षया पक्षप्रकारकनिश्चयत्वस्यैव लाघवेन विरोधितावच्छेदकत्वात्। यत्र तु पक्षः साध्याभावश्च द्वयमेव तुल्यशरीरम्, तत्र साध्याभावप्रकारस्येव पक्षप्रकारकस्यापि बाधनिश्चयस्य साध्यवत्ताज्ञानविरोधित्वम्, विनिगमकाभावात्; यथा 'घटाभावो वह्निमान्' इत्यादाविति तु परमार्थः।

विरोधिनिश्चयत्वेनेति। विरोधितावच्छेदकतत्तद्धर्मप्रकारकनिश्चयत्वेनेत्यर्थः। दोषविशेषेति। साक्षात्कारत्वानिरूपिततत्प्रकारकताकज्ञानमात्र इत्यर्थः। तेन दोषाद्यननुगमेऽपि न क्षतिः, न वा लौकिकसन्निकर्षजन्यस्यापि संशयस्य बाधनिश्चयदशायामुत्पादः, सन्निकृष्टकोटावपि सन्देहप्रकारकतायाः साक्षात्कारत्वानिरूपितत्वादिति ध्येयम्।

[TCDJ, pp. 1204-1205]

(110) P. 65, ll. 10-13 : Here, the relevant portion of *Nyāyavārttikatātparyaṭīkā* is as follows :

काला—तः ॥९॥ अत्र कालातीत इति लक्ष्यनिर्देशः, कालात्ययापदिष्ट इति लक्षणम्। हेतोरपदेशस्य हि साध्यसन्देहविशिष्टः कालः। यथाहुः—"नानुपलब्धे न निर्णीते न्यायः प्रवर्त्तते, अपि तु सन्दिग्धे" इति। परेऽप्याहुः—"संदिग्धे हेतुवचनात्" इति। यत्र च प्रत्यक्षानुमानागमविरोधः—'अनुष्णोऽग्निर्द्रव्यत्वात्' इति, 'अश्रावणः शब्दो गुणत्वात्' इति च, 'शुचि नरशिरःकपालं प्राण्यङ्गत्वात्' इति च, स सर्वः प्रमाणतो विपरीतनिर्णयेण सन्देहविशिष्टं कालमतिपततीति सोऽयं कालस्यात्ययेनापदिश्यमान कालातीत इति। तथा चोदाहृतं "यत्तु प्रत्यक्षागमविरुद्धं न्यायाभासः सः" इत्यत्र वार्त्तिककृता। बाधाविनाभावयोः सहासम्भव इति चात्र बौद्धानामाक्षेपोऽस्माभिः समाहितः।

[NVTT, p. 388]

(111) P. 66, ll. 16-18 : Here, Rāmabhadra has followed the commentators who usually pass over NS I. ii.1 after making some brief passing remarks. An exception to this is found in *Nyāyatattvāloka* of Vācaspati Miśra II, where some pertinent and interesting problems have been raised. We quote below the relevant passage :

तद्विभागाय सूत्रम्—

।। तत् त्रिविधं वाक्छलं सामान्यच्छलमुपचारच्छलं च ।।

तत् त्रिविधमिति विभागः, शेषः विभक्तानामुद्देशो विभागप्रपञ्चः, चकारस्तुल्यवत् (?) समुच्चये, उक्तेष्वेव सकलछलान्तर्भावात्। अत्रोक्तिपूर्वकत्वात् तात्पर्यज्ञानस्य तात्पर्यानुसन्धानपूर्वकत्वादुपचारस्योद्देशक्रमनियमः। अत्र तावद् द्वयी छलगतिः—तात्पर्यमात्रसञ्चारः पदार्थतात्पर्यसञ्चारश्च। अत्राद्यं सामान्यच्छलम्। अन्त्यस्य चतुर्धा गतिः—शक्यान्तरे प्रयुक्तस्य शक्यान्तरे सञ्चारः, शक्ये प्रयुक्तस्य उपचार्ये सञ्चारः, उपचार्ये प्रयुक्तस्य शक्ये सञ्चारः, उपचार्ये प्रयुक्तस्य उपचार्यान्तरे सञ्चारः। तत्राद्ये 'गौर्विषाणी'त्युक्ते 'कथं वाग् विषाणो'ति दूषणवचनम्, द्वितीये 'अग्निर्दाहक' इत्युक्ते 'कथं माणवको दाहक' इति, तृतीये 'मञ्चाः क्रोशन्ती'त्युक्ते 'कथं काष्ठपुञ्जाः क्रोशन्ती'ति, चतुर्थे 'गङ्गायां घोषः प्रतिवसती'त्युक्ते 'कथं गङ्गासम्बन्धिनि मकरादौ घोषप्रतिवास' इति। अत्र आद्यद्वयं वाक्छलम्, मुख्यवृत्त्या प्रयुक्ते वृत्तिमात्रेण दूषणं वाक्छलमिति तल्लक्षणात्। अन्त्यद्वयमुपचारच्छलम् उपचारवृत्त्या प्रयुक्ते वृत्तिमात्रेण दूषणमिति तल्लक्षणात्। ननु दूषकताबीजस्याभिप्रायारोपस्याभेदात् कथं छलानामनेकत्वमिति चेत्। न वयं दूषकताबीजभेदेन भेदमाचक्ष्महे, किन्तु शिष्यधीवैशद्याय विवक्षितभेदमाद्रियामह इति। अशक्तिविशेषोन्नायकतयाऽमीषां भेद इत्यप्याहुः ।। [NTĀ. I.O.L. Mss, fol. 89b-90a]

(112) P. 67, ll. 2-3 : This view of Udayana is found in *Tātparyaṭīkāpariśuddhi*, p. 673.

(113) P. 67, ll. 9-10 : Vācaspati Miśra II also records this view of Vardhamāna Upādhyāya :

शक्त्या प्रयुक्त शक्त्यैवार्थान्तरे सञ्चार्य दूषणवचनं वाक्छलम्—इत्यन्ये। [NTĀ, I.O.L. Mss. fol. 90a]

(114) P. 67, ll. 14-15 : Here, Rāmabhadra refers to Vācaspati Miśra II as केचित्, whose views differ from that of Uddyotakara and Vācaspati Miśra I. The relevant remarks of theseauthors are as follows :

(*i*) अविशेषाभिहितम् सामान्यश्रुति वाक्यं पदं वा अविशेषाभिहितमित्युच्यते। वाक्यं सामान्यश्रुति यथा "नवकम्बलोऽयमि"ति। पदं सामान्यश्रुति "अश्वोऽश्व" इति। अविशेषशब्दानभिधानं प्रयोगाभावात्। न ह्यविशेषशब्देन कस्यचिदभिधानं सम्भवति। न चास्य प्रयोगो युक्त इति। वाक्यं च सर्वमुच्चरद्विशेषमेव प्रत्याययतीति सामान्यप्रत्यायनमयुक्तम्। न, प्रकरणादीनन्तरेण श्रुतिमात्रात् तदुपपत्तेः। यदा प्रकरणादिनिरपेक्षं वाक्यमुच्चार्यते 'श्वेतो धावती'ति, तदा वाक्यश्रुतिसामान्यात् श्रोतुः सन्देहः। सन्देहे सति अविवक्षितमर्थमध्यारोप्य प्रतिषेधति।

[NV on NS I. ii. 12, pp. 394-395]

(*ii*) अभिहितिः अभिहितम् उच्चारणमिति यावत्। समानः शब्दो नार्थे सामान्यमित्यर्थः। 'अश्व' इति नामपदमश्वत्वस्य वाचकम्, आख्यातपदं यदा कस्यचिदभिमुखं प्रयुज्यते 'अश्व' इति, तदा 'वृद्धिं गतोऽसी'ति प्रतीयते। चोदयति—अविशेषेति। समानो हि शब्दोऽभिधेये संशयमाधत्ते न त्वर्थमभिधत्त इत्यर्थः। परिहरति—न प्रकरणादीति। श्वेतो धावतीति। सारमेयो द्रुततरं याति, श्वित्री निर्णेनेक्तीत्यर्थः। [NVTT, pp. 394-395]

(*iii*) ......शक्त्युपचारापुरस्कारेण वक्तृतात्पर्याविषये शब्दतात्पर्यकल्पनया दोषाभिधानं सामान्यच्छलं......यथा वा सारमेय इतो

द्रुततरं यातीत्यर्थे 'श्वेतो धावती'त्युक्ते श्वित्री निर्णेनेक्तीत्यर्थ कल्पनया दूषणाभिधानम्, यथा वा वृद्धिं गतोसीत्यर्थे 'अश्व' इत्युक्ते तुरगाभिप्रायेण 'नाहमश्व' इति दूषणाभिधानम्। न चैतदुभयमपि वाक्छलोदाहरणमिति वाच्यम्, तस्य शक्तिमुखप्रवृत्तत्त्वेन पदमात्रविषयत्वात्; 'श्वेत' इति 'अश्व' इति न पदे किन्तु वाक्ये; सङ्केतवत्समूहत्वात्। सामान्यच्छलश्च वाक्यमात्रविषयकम्, उदाहरणभेदाद् बहुभेदमिति द्रष्टव्यम्। [NTA, I.O.L. Mss, fol. 90b]

(115) P. 71, ll. 1-10; (*a*) The problem raised in ll, 1-4 has been discussed by Udayana in the following manner :

ननु संशयस्वरूपं वा परीक्षाङ्गं स्यात् तल्लक्षणं वा तत्परीक्षा वा तल्लक्षणपरीक्षा वा? प्रथमे किमायातं तत्परीक्षाप्राथम्यस्य? द्वितीयस्त्वसम्भावित एव। न ह्यात्मा शरीरादिव्यतिरिक्तोऽपि नित्यः सुखाद्यधिकरणमिति विचारे

समानानेकधर्मोपपत्तेः [न्या. सू. १।१।२३]

इत्याद्युपयुज्यते। तृतीयस्तु तदा स्याद् यदि परीक्षितः संशयः परीक्षाङ्गतामियात्। न चैवम्, अनवस्थानात्; संशयपरीक्षाऽपि हि संशयपूर्विका भवन्ती तत्परीक्षामपेक्षेत। चतुर्थे त्वात्माश्रयदोषः, तल्लक्षणपरीक्षयैव तल्लक्षणपरीक्षासम्पादनात्। प्रमाणादिपरीक्षैव संशयपूर्विका, न तु संशयपरीक्षाऽपि, अतो नानवस्थेति चेत्—न, अविशेषात्, परीक्षास्वरूपव्याघाताच्च.

विमृश्य पक्षप्रतिपक्षाभ्यामर्थावधारणं निर्णयः [न्या. सू. १।२।४२]

इत्यादि ग्रन्थव्याघाताच्च······

न क्रमः संशयलक्षणपूर्विका परीक्षितसंशयपूर्विका वा परीक्षितसंशयलक्षणपूर्विका वा परीक्षेति, किन्तु सर्वा परीक्षा संशयस्वरूपपूर्विकेति ज्ञापयितुं क्रमभेदः। यद्वा—सर्वासु प्रमाणादिपरीक्षास्वपि पूर्वकाङ्गतया प्रथमोपनिपातिनः संशयस्यैवाक्षेपः प्रथमसम्भवी। न

चासौ स्वरूपत एव सम्भवति, किन्तु लक्षणानुपपत्तिमुखेनातः प्रमाणादावपि परीक्ष्यमाणे प्रथमतः संशयलक्षणमेव विचार्य संशयो व्यवस्थापनीय इत्येतदर्थं क्रमभेदः। लक्षणानुपपत्तिद्वारेणैव चेह परीक्षापदार्थो लक्ष्यस्य स्वरूपतो विचारानर्हत्वादित्यर्थः। एतेनैव प्रमाणादिपरीक्षास्वपि अनवस्थानिरासो वेदितव्यः।

[TTP, A.L. Thakur's Press Copy ; Ch. II, pp. 3-4.]

(*b*) The word वदन्ति used in l. 5 shows that Rāmabhadra does not favour this solution. Such dissatisfaction is also discernible in Udayana :

……सत्ताव्यवस्थितसंशयपूर्वकत्वादेव च विचारस्य नैतच्चोदनीयं यत् संशयादिरपि प्रमाणाधीनसिद्धिरिति प्रमाणस्यैव पूर्वभावो युज्यत इति।……विचारकस्य विचार्यवस्तुगोचरः संशयो विचाराङ्गमिह विवक्षितः, न चात्र सूत्रकारः विचार्येषु लक्षणेषु संशयानः…

अयमाशयः। यथा शास्त्रकर्त्तुर्न शास्त्रार्थे संशयस्तथा विचारोऽप्यनुपयोगी, किन्तु शिष्यार्थं विचारः। स च तस्यैव संशयमुपादायेति किमनुपपन्नम्? वादेऽपि यद्यपि वादिनावभिमानतो न सन्दिग्धौ साध्ये, तथापि साधनसामर्थ्यासामर्थ्ययोः सन्दिग्धावेव। तथा च तद्बलाबलविचारः संशयपूर्वक एवेति किमनुपपन्नम्? नन्वेवमपि वादे शास्त्रे चेत्यादिग्रन्थविरोध एव, वादशास्त्रयोः संशयनिषेधेन तन्मूलस्य विचारस्यापि निषेधात्। विचारविधौ वा संशयस्यापि विधानात्। न चेदेवं विचारस्य संशयपूर्वकत्वनियमो भज्येत…व्युत्पन्नस्य वादे शास्त्रे च संशयाभाव उक्तो न व्युत्पाद्यस्येत्यर्थः।

[TTP, A. L. Thakur's Press Copy, Ch. II, p. 4.]

(*c*) By using the term सम्प्रदाय, Rāmabhadra refers here to the view of earlier writers like Uddyotakara, Vācaspati Miśra I and Udayana, who have taken their cue from Vātsyāyana. The relevant passages from their works are as follows :

(*i*) अत ऊर्ध्वं प्रमाणादिपरीक्षा। सा च 'विमृश्य पक्षप्रति-

पक्षाभ्यामर्थावधारणं निर्णयः' इत्यग्रे विमर्श एव परीक्ष्यते—[NB, p. 408.]

(*ii*) त्रिविधा चास्य शास्त्रस्य प्रवृत्तिः उद्देशो लक्षणं परीक्षा चेत्युक्तम्। तत्रोद्देशलक्षणे पूर्वाध्याय एव व्याख्याते, परीक्षा वर्तिष्यत इति। तत्र यथोद्देशस्तथा लक्षणं तथा परीक्षेति स्थानवतां परीक्षावचनमपि प्रमाणमुद्दिष्टं लक्षितं च, पूर्वमेव तत्परीक्ष्यत इत्यवसरप्राप्तानि तानि विलङ्घ्य संशयः परीक्ष्यते। किमर्थं क्रमभेदः ? परीक्षाङ्गत्वात् पूर्वं संशयः परीक्ष्यते। [NV, p. 407]

(*iii*) अत ऊर्ध्वं प्रमाणादिपरीक्षेत्यादिभाष्यनिराकरणीयामाशङ्कामाह वार्त्तिककारः—त्रिविधा चास्येति। स्थानवतां क्रमवताम्। परीक्षावचनमिति। प्रमाणमेव परीक्ष्यत इति युक्तमिति। किमत्राऽऽदौ प्रमाणं न परीक्षितं किं तु संशय एव परीक्ष्यत इत्याह—तानि विलङ्घ्येति। सोऽयं क्रमभेदः कुत इति भाष्यार्थमाह—परीक्षाङ्गत्वादिति। उद्देशक्रमानुरोधेन हि प्रमाणं पूर्वं लक्षितम्, न तु लक्षणे संशयस्यास्ति कश्चिदुपयोगः, परीक्षा तु सर्वा विमर्शकरणिकेति परीक्षापर्वणि सर्वथाऽऽर्थक्रमेण संशयस्य पूर्वभावः, यथा 'अग्निहोत्रं जुहोति यवागूं पचती'त्यत्राग्निहोत्रात् प्रागभावो यवागूपाकस्य, तस्याग्निहोत्रसाधनत्वात्। संशयलक्षणं चात्र परीक्ष्यते न संशय इति नानवस्थाऽपि। [NVTT, P. 407]

(*iv*) एवं पूर्वाध्याये लक्षणमतिवृत्तम्। अथेदानीं परीक्षा वर्तिष्यते। तत्र प्रमाणपरीक्षा द्वितीयाध्यायार्थः। तत्रापि प्रथमाह्निके धर्मिणः प्रत्यक्षानुमानोपमानशब्दाः परीक्षणीयाः। द्वितीये त्रिचतुष्ट्वादयो धर्माः। ···एतच्च सर्वमुचितप्रदर्शनपरेण अत ऊर्ध्वं प्रमाणादिपरीक्षेति भाष्येण सूचितम्।

[TTP, A.L. Thakur's Press Copy, Ch. II, p. 1.]

(*d*) A look at *Nyāyatattvāloka* of Vācaspati Miśra II shows that such a unanimity of view did not prevail after Udayana. The relevant passage runs as follows :

तत्र प्रमाणपरीक्षैतदध्यायार्थ इत्याचार्याः । न चैवं संशयादिपरीक्षाया बहिर्भावापत्तिः, संशयादिपरीक्षायाः प्रसङ्गसङ्गतत्वेनाप्येतदध्यायप्रतिपाद्यत्वोपपत्तौ मुख्यार्थत्वाभावात्, छलापवर्गपरीक्षयोरिव प्रथमे । अन्ये तु छलप्रमेयान्यप्रथमसूत्रोद्दिष्टयावत्पदार्थपरीक्षैतदध्यायार्थ इत्याहुः । न च छलप्रमेयान्यपदार्थपरीक्षात्वेन शिष्यजिज्ञासा किन्तु प्रमाणादिपरीक्षात्वेनेतीयमेवाध्यायार्थावच्छेदिका युज्यते, एतत्परत्वादध्यायस्येति वाच्यम्, एतावताऽपि हि प्रमाणपरीक्षाया मुख्यतामात्रमायाति, न त्वध्यायार्थावच्छेदकत्वम्, सकलैतत्प्रतिपाद्यावृत्तित्वादिति । साङ्गोपाङ्गप्रमाणपरीक्षैतदध्यायार्थ इत्यपरे । कथमन्यथा आतिदेशिकी दृष्टान्तादिपरीक्षा सङ्गच्छेत, संशयादिवत् प्रसङ्गसङ्गतैरपि दृष्टान्तादिष्वभावात् । तत्रोद्दिष्टरूपवत्तया प्रमाणपरीक्षा प्रथमाह्निकार्थः । उद्दिष्टातिरिक्तरूपेण प्रमाणपरीक्षा द्वितीयाह्निकार्थः ।

[NTĀ, I.O.L. Mss. fol. 92b.]

(116) P. 71, ll. 14-16 : Such a view is found in the following passage of *Nyāyatattvāloka* :

यतः समानधर्माध्यवसायादनेकधर्माध्यवसायाच्च संशयोऽतो न समानधर्मादनेकधर्माच्च स्वरूपतः संशयः, संशयलक्षणसूत्रे च नाध्यवसायपदं श्रूयते । ननूपपत्तिपदादध्यवसायस्य शक्त्या लक्षणया वोपस्थितिरिति चेत् तत्राह—अन्यतरधर्माध्यवसायाद्वेति । वाकारोऽप्यर्थः, तेन समानादिधर्माध्यवसायेऽन्यतरधर्माध्यवसायाद्विशेषदर्शनान्न संशयो भवति. अतो व्यभिचारान्न त्वदुक्तं संशयकारणमित्यर्थः ।

[NTĀ, I.O.L. Mss. fol. 94a.]

(117) P. 73, ll. 6-7 : Such a variant reading is indeed adopted by Vācaspati Miśra II in his *Nyāyatattvāloka* :

पुनः सूत्रम् ॥ अत्यन्तसंशयस्तद्धर्मसातत्योपपत्तेः ॥ तस्य संशय-

विषयस्य ये धर्माः साधारणा ऊर्ध्वत्वादयोऽसाधारणाः पनसत्वादयश्च तेषां सातत्येन सर्वदोपपत्तेः सत्त्वादत्यन्तसंशयः स्यात्, तन्मात्रसाध्यत्वात् संशयस्येत्यर्थः। तत्र तद्धर्मपदे कर्मधारय इति भाष्यकारादयः।
[NTĀ, I.O.L. Mss. fol. 94b.]

As we can see, there is no explanation of the word 'तथा' in the commentary, and hence, the omission of the word in the *sūtra* need not be considered as a case of scribal error.

(118) P. 73, ll. 12-16 : A similar view is recorded is *Nyāyatattvāloka* of Vācaspati Miśra II :

(*a*) तत्रोपपत्तिपदस्य ज्ञानार्थकतया यथोक्तानां समानधर्मादीनाम् अध्यवसायादेव मया संशय उक्तो नायं संशयः, स्वरूपसतः समानादिधर्मान्न संशय इति कृत्वा योऽसंशयप्रसङ्ग उक्तः स न; एवं विशेषापेक्षात् समानधर्मादितो मया संशये व्युत्पादिते तद्धर्मसातत्येन योऽन्यन्तसंशयप्रसङ्ग उक्तः सोऽपि न; एवं व्यभिचारोऽपि न, विशेषापेक्षाया अपि कारणत्वात्, विशेषादर्शने च तदभावादित्यर्थः।
[NTĀ, I.O.L. Mss. fol. 94b].

Vācaspati Miśra II also makes a pertinent point in this connection :

(*b*) विप्रतिपत्त्यव्यवस्थयोराक्षेपसूत्रयोः नोक्तिसम्भवोऽपि, न हि संप्रतिपत्तिविषयीकृता विप्रतिपत्तिः स्वीये विषये न विप्रतिपत्तिरिति वक्तुं शक्यते, एवमव्यवस्थाया व्यवस्थितत्वेन तद्विषयस्याव्यवस्थितत्वे न किञ्चित् खण्डितमिति सूत्रकृता नैतदुत्तरितम् [*Idem.*]

(*c*) Viśvanātha Pañcānana offers a different interpretation of the word तद्विशेषापेक्षात्, and offers the following interpretation of this *sūtra* :

यथोक्ताध्यवसायात् साधारणादिधर्मदर्शनात् तस्य पुरुषत्वादेः यो विशेषः इतरव्यावर्त्तको धर्म तस्य अपगता ईक्षा ईक्षणं ततः विशेषा-

दर्शनादित्यर्थः। तथा च विशेषादर्शनसहितसाधारणधर्मदर्शनादितः संशये स्वीकृते न कारणाभावात् असंशयो न वा यत्किञ्चित्कारण-सत्त्वात् अत्यन्तसंशय इत्यर्थः। साधारणधर्मदर्शनादेश्च संशयविशेषे जनकत्वात् संशयत्वावच्छिन्नं प्रति व्यभिचारेऽपि न क्षतिः, विप्रति-पत्तौ च वादिवाक्याभ्यां मध्यस्थस्यैव संशयोपगमात्। यच्चोक्तम्—समानधर्मदर्शनात् कथं संशयः समानत्वस्य भेदगर्भत्वादिति, तदपि न, न हि समानधर्मत्वेन तज्ज्ञानं हेतुः, अपि तु उभयसहचरितधर्मवत्त्वज्ञानं तथेत्युक्तदोषाभावात्। [NSV, pp. 414-417]

(119) P. 75, ll. 11-14: (*a*) Vācaspati Miśra II also shares this view, and raises an interesting question in his *Nyāyatattvāloka*:

ननु संशयवत् प्रयोजनमपि परीक्षाया मूलत्वेन पूर्वं परीक्षणीय-मित्यतिदेशेन प्रयोजनादिकं परीक्ष्यते—

॥ यत्र संशयस्तत्रैवमुत्तरप्रसङ्गः ॥

यत्र क्वचित् संशयः स्यात् तत्रैवमुत्तरोत्तरप्रसङ्गः कर्त्तव्यः। उत्तरोत्तरेषु प्रयोजनादिषु परीक्षाप्रसङ्ग कर्तव्यः इति सूत्रार्थः। नन्वेवमेतत्प्रकरणस्य न संशयपरीक्षकता, अन्येषामपि परीक्षणादिति चेत्; न, औपदेशि-कत्वाभिप्रायेण तदर्थत्वाभिधानात्, प्रयोजनपरीक्षायाश्चातिदेशिकत्वा-दिति। [NTĀ, I.O.L. Mss. fol. 94b-95a.]

(*b*) Keśava Miśra Tarkācārya has accepted this interpretation, and he has also recorded a novel view:

प्रयोजने संशय एव नास्तीति सूत्रार्थ इति कश्चित्।

[GSP, p. 27.]

(*c*) He also neatly sums up the view of the earlier commentators as follows:

वृद्धास्तु—जिज्ञासोर्विचारकत्वात्, सन्दिग्धस्य च विचारकत्वात्, संशयपूर्वकत्वात् सर्वपरीक्षाणां परिचिक्षिप्स्यमाणेन संशयाक्षेपहेतुभिर्न

संशयः प्रतिषेद्धव्यः। अपि तु परैरेवमाक्षिप्तः संशय उक्तैः समाधान-हेतुभिः शास्त्रे वादे च समाधेय इति सूत्रार्थ इत्याहुः। [*Idem.*]

(120) P. 76, ll. 10-13 : Viśvanātha Pañcānana has recorded this interpretation, though he does not seem to prefer it :

परे तु प्रत्यक्षं प्रति करणत्वे खण्डिते तद्रीत्या करणान्तरमपि खण्डनीयमित्याशयं सूत्रकृतो वर्णयन्ति। [NSV, p. 420]

(121) P. 76, ll. 13-14 : It seems that Rāmabhadra has borrowed this interpretation from Vācaspati Miśra II, whose remarks are as follows :

अत्र यद्यपि प्रत्यक्षमात्राक्षेपः श्रूयते, तथापि तन्मूलकानामन्येषां तत्खण्डनेन खण्डनमिति तात्पर्यम्। [NTĀ, I.O.L. Mss. fol. 95b.]

(122) P. 77, ll. 7-10 : This seems to be an adaptation from the following remarks of Vācaspati Miśra II :

तदयं प्रघट्टकार्थः। प्रमाविशिष्टं तावत् प्रमेयमुच्यते, तत्र यदि पूर्वं प्रमाणं पश्चात् प्रमेयम्, स्वविशेषणीभूतप्रमाविरहात् प्रमेयानिर्वाहे न अर्थेन्द्रियसन्निकर्षजा प्रमा, ततस्तद्विशिष्टं प्रत्यक्षं प्रमाणं न स्यात्। अथ पूर्वं प्रमेयं पश्चात् प्रमाणम्, तदा प्रमेयनिर्वाहिका प्रमा प्रमाणं विनैवेति कथं तस्मिन्नर्थे तत् प्रमाणम्। अथ यौगपद्यम्, तदा न कार्यकारणभावः। एवं प्रत्यक्षे खण्डिते तन्मूलकान्यन्यान्यपि खण्डितानीति हृदयम्। [NTĀ, I.O.L. Mss. fol. 94b-95a.]

(123) P. 77, ll. 18-19 : Vācaspati Miśra II has specified the type of जात्युत्तर involved here :

त्रैकाल्यासिद्धिदोषो नव प्रतिषेधोऽप्यनुपपन्न इत्यर्थः। एवञ्च यद्यादौ प्रमाणासत्त्वं स्थापयसि तदा व्याघातो दोषः। अथ मया स्थापितानि प्रमाणानि दूषयसि तदाऽहेतुसाम्यमात्रेणाहेतुत्वापादनादहेतु-समेयं जातिरित्यर्थः। [NTĀ, I.O.L. Mss, fol. 95a]

(124) P. 79, ll. 6-8 : It may be noted that Vācaspati Miśra II also adopts the reading 'शब्दादातोषसिद्धिवत् तत्सिद्धिः', and he is totally silent about the status of the expression "त्रैकाल्याप्रतिषेधश्च". [Vide NTĀ, I.O.L. Mss. fol. 95b.] Keśava Miśra also adopts this reading. [GSP, p. 28.]

Viśvanātha Pañcānana, however, rejects the opinion of Vācaspati Miśra II :

अत्र चकारान्तं न सूत्रान्तर्गतमिति तत्त्वालोकः। वस्तुतष्टीकादिस्वरसात् सूत्रमेव। [NSV, p. 432]

(125) P. 79, ll. 14-18 : (*a*) The relevant portion of *Nyāyavārttikatātparyaṭīkā* runs as follows :

यत् पुनराक्षिप्यते—यदनियतं न तत् परमार्थसत्, यथा रज्ज्वामारोपितं सर्पत्वम्, तामेव हि रज्जुं तदैव कश्चित् सर्प इति कल्पयति कश्चिद्धारेति कल्पयति, तथा च प्रमाणप्रमेयभावः, तस्मान्न परमार्थसन्निति। अत्रेदमुत्तरसूत्रम्—प्रमेया च तुलाप्रामाण्यवदिति। ...अयमभिसन्धिः—क्षणभङ्गपरिणामनिरासे सति स्वकारणादुत्पन्नं स्थिरं वस्तु तत्तद्वस्त्वन्तरसन्निधानात्तद्धर्मयोगे सति तत्तद्बुद्धिव्यपदेशमनुभवति। ...न केवलं प्रमाणं समाहारगुरुत्वे तुला, यदा पुनरस्यां सन्देहो भवति प्रामाण्यं प्रति, तदा सिद्धप्रमाणभावेन तुलान्तरेण यत् परीक्षितं सुवर्णादि तेन प्रमेया च तुलाप्रामाण्यवत्। यथा प्रामाण्ये तुला प्रमेया च तथाऽन्यदपि सर्वं प्रमाणं प्रामाण्ये प्रमेयमित्यर्थः।...
[NVTT, pp. 432-433.]

(*b*) Udayana's comments on this passage may also be noted :

एवमुपक्रान्ते पूर्वपक्षे समर्थिते

प्रमेया च तुलाप्रामाण्यवत्

इत्यादिकः प्रबन्धः पूर्वापरासङ्गत इव प्रतिभाति ; प्रकृतयोः पूर्वपक्षोत्तरपक्षयोः प्रकरिष्यमाणयोर्वा असङ्गतत्वादत आह—यत्पुनरिति।

दृष्टान्तेऽनियममुपपादयति—तामेव हीति। प्रमातृभेदेनानियममुक्त्वा कालभेदेन तामाह—स एवेति।

ननु यत एव प्रमाणं प्रमेयमिति संज्ञा समावेशेन प्रवर्तते, अत एवानियतत्वात् प्रमाणप्रमेयभावोऽनियत इत्युक्तम्। न हि निमित्त-वशतया नियमो निवर्तत इत्यत आह—अयमभिसन्धिरिति। यद्यपि क्षणभङ्गपरिणामयोरप्येकं वस्तु प्रमाणं प्रमेयं च प्रमातृभेदेन सम्भवति, ततस्तद्वादिभिरपि तत् समर्थनीयमेव, तथापि तैस्तथोत्पादात् तथा परिणामादिति परिहारो यथोच्यते, न तथाऽस्माभिरभिधातुं शक्यते, तदनभ्युपगमात्। ततः पारमार्थिकनिमित्तसमावेशानियमप्रयुक्तः संज्ञासमावेशो न त्वपारमार्थिकत्वप्रयुक्त इति वक्तव्यम्। न चैतत् क्षणभङ्गपरिणामनिराकरणमन्तरेण शक्यमिति क्षणभङ्गपरिणामनिरासे सतीत्युक्तम्।

ननु

प्रमेया च तुलाप्रमाणवत्

इति वक्तव्ये प्रामाण्यवदिति कुतः? न हि प्रामाण्यं यथा तुला तथा प्रमेया चेति विवक्षितम्, किन्तु यथा प्रमाणं तथा प्रमेया चेत्यतो व्याचष्टे—न केवलमिति। सोऽयं चकारस्यार्थः। एवमपि प्रामाण्यवदित्य-लग्नकमेवेत्यत आह—यथा प्रामाण्ये इति। सप्तमीसमर्थाद् वति, न तु प्रथमासमर्थादिति भावः।

[TTP, A.L. Thakur's Press Copy, Ch. II, pp. 16-17.]

(126) P. 80, l. 8 : Here, Rāmabhadra and Vācaspati Miśra II agree on the reading of this sūtra. There is also a close similarity in their modes of interpretation, as will be evident from the following passage :

सिद्धान्तसूत्रम्—

॥ प्रदीपप्रकाशसिद्धिवत् तत्सिद्धिः ॥

यथा प्रदीपप्रकाशोऽर्थप्रकाशनोऽप्यनेनैव प्रकाशेन प्रकाश्यते, तथा प्रमाणादयोऽपि, अनुमानादिना प्रत्यक्षादीनां साधनात् ; न च परस्पर-सापेक्षतया सर्वासिद्धिः, व्यक्तिभेदात् ; न चानवस्था दोषाय, प्रामाणिकत्वात् । तस्माद् यथा प्रदीपप्रकाशश्चतुर्णामन्यतमेन प्रसाध्यते तथा प्रमाणमपीत्यर्थः । [NTĀ, I.O.L. Mss. fol. 100 b.]

Keśava Miśra adopts the traditional reading. [GSP, p. 29.]

The editor of न्यायसूत्रविवरण records an interesting reading found in some manuscripts, which is न दीपप्रकाशसिद्धिवत् तत्सिद्धेः [NSVV, fn. 1, p. 89.]

(127) P. 80, l. 12 : There is considerable difference in opinion among the commentators about the strategy for dealing with the problem of अनवस्था। Vācaspati Miśra I denies that the answer of Naiyāyika leads to अनवस्था—

(*i*) न चानवस्था, अस्ति किञ्चित्प्रमाणं यत् स्वज्ञानेनान्यधीहेतुः, यथा धूमादिः ; किञ्चित् पुनरज्ञातमेव बुद्धिसाधनं यथा चक्षुरादि । तत्र पूर्वं स्वज्ञाने चक्षुराद्यपेक्षम्, चक्षुरादि तु ज्ञानानपेक्षमेव ज्ञानसाधनमिति काऽनवस्था । बुभुत्सया च तदपि शक्यज्ञानम्, सा च कदाचिदेव क्वचिदिति नाऽनवस्था । [NVTT, p. 441.]

Keśava Miśra Tarkācārya also adopts a similar point of view [GSP, p. 29]. Vācaspati Miśra II and Rāmabhadra maintain that even though there is अनवस्था, it causes no damage (*vide* TN. 120). Viśvanātha Pañcānana and Rādhāmohana Gosvāmi Bhaṭṭācārya adopt a syncretist approach :

(*ii*) ···न हि प्रमाणात् प्रमेयसिद्धौ प्रमाणसिद्धिरपेक्षिता । यदा च प्रमाणसिद्धिरपेक्षिता तदा तत्रापि प्रमाणमपेक्ष्यताम्, तच्चानुमानादिकमेवेति न प्रमाणान्तरकल्पना, न वाऽनवस्था, सर्वत्र प्रमाणसिद्धेरनपेक्षितत्वात्, क्वचिद्बीजाङ्कुरवत्तदपेक्षाऽपि न क्षतिकरीति भावः ।

[NSV, p. 444].

(*iii*) …न च प्रमाणताज्ञापकानुमानस्य प्रमाणताज्ञानार्थमनुमानन्तरमपि कल्प्यमिति रीत्याऽनवस्थेति वाच्यम्। संवादिप्रवृत्तिजनकत्वादिलिङ्गेन घटादिज्ञानस्य प्रमात्वमनुमायान्वयव्यतिरेकादिलिङ्गेन तत्करणत्वरूपप्रमाणत्वमनुमीयते, तत्र चानुमाने प्रमाणत्वसंशय एवानुमानान्तरापेक्षेत्यविरलधाराविरहाद् व्यवहितधारायाश्च वीजाङ्कुरवददोषत्वादिति। [NSVV, p. 89]

(128) P. 80, l. 15: According to Viśvanātha Pañcānana and Rādhāmohana Gosvāmi Bhaṭṭācārya, this is not a *Sūtra*, but a part of the *Bhāṣya*:

(*a*) प्रदीपस्य प्रकाशन्तरं विना प्रकाशकत्ववत् प्रमाणानामपि प्रमाणमन्तरेणैव प्रमेयप्रकाशकत्वमिति सूत्रार्थं इति केचन मन्यन्ते, तान् प्रत्याह भाष्यकारः:

'क्वचित्तन्निवृत्तिदर्शनादनिवृत्तिदर्शनाच्च क्वचिदनेकान्तः'।

[NVS, p. 446.]

(*b*) प्रदीपस्य प्रदीपान्तरं विना प्रकाशकत्ववत् प्रमाणानामपि प्रमाणान्तरमन्तरणैव प्रमेयप्रकाशकत्वमिति यथाश्रुतसूत्रार्थं दूषितवान् भाष्यकारो यथा—

'क्वचित्तन्निवृत्तिदर्शनादनिवृत्तिदर्शनाच्च क्वचिनेकान्त' इति।

[NSVV, p. 89]

It is clear that Rādhāmohana has literally followed Viśvanātha. However, there seems to be no good reason in favour of such an opinion. We may note here a remark of the editor of Rādhāmohana's commentary regarding this issue, where he says that *Nyāyatottvāloka* of Vācaspati Miśra II does not accept क्वचित्……क्वचिदनेकान्तः as a *sūtra*, even though this sentence has been explained therein (NSVV, p. 89, fn. 2). The remark does not seem to be correct, because in the India Office Library Mss. of *Nyāyatattvāloka*, the said sentence has been clearly accepted as a *sūtra*:

(*c*) केचित् आचार्यदेशीयास्त्वेवमाहुः —यथा प्रदीपप्रकाशः स्वतः प्रकाशः तथा प्रमाणस्यापीति । तन्मतं सिद्धान्ती दूषयति—

॥ क्वचित्तन्निवृत्तिदर्शनादनिवृत्तिदर्शनाच्च क्वचिदनेकान्तः ॥

क्वचित् प्रकाशादौ प्रकाशान्तरस्य निवृत्तिः क्वचिद् घटादौ तदनिवृत्तिरित्यनेकान्तोऽनियमः, दृष्टान्तमात्रादरणाद् दृष्टान्तसमेयं जातिः, प्रकाशत्वस्यैकस्य ज्ञानदीपसाधारणस्याभावात् स्वरूपासिद्धिर्दृष्टान्तासिद्धिर्वेत्यर्थः । [NTĀ, I.O.L. Mss, fol. 100b.]

(129) P. 80, l. 19 : This sentence is not usually treated as a *sūtra*, and Rāmabhadra also writes subsequently that in his opinion, this is not a *sūtra*. Vācaspati Miśra II is silent about it, and so are Keśava Miśra Tarkācāry and Rādhāmohana Goswami Bhaṭṭācārya. Visvanātha Pañcānana also maintains that this sentence belongs to *Nyāyabhāṣya* :

त्वद्व्याख्याने कथं नानेकान्त इत्यत्राऽऽह भाष्यकारः—

'विशेषहेतुपरिग्रहे सत्युपसंहाराभ्यनुज्ञानादप्रतिषेधः' । [NSV, p. 447.]

But the very fact that commentators like Rāmabhadra and Viśvanātha take the trouble of marking off this sentence as a part of *Nyāyabhāṣya* indicates that some earlier commentators did treat this sentence as a *sūtra*. A partial confirmation of this surmise is available in the *Nyāyatātparyadīpikā* of Bhaṭṭa Vāgīśvara, where a part of this sentence is treated as a *sūtra* :

कथञ्चित् समानजातीयत्वेन चक्षुरादिना गृह्यमाणप्रदीपवत् प्रमाणान्यपि कथञ्चित् समानजातीयेन प्रमाणान्तरेण ग्रहीष्यन्त इत्यस्मदीयव्याख्याने विशेषहेतुपरिग्रहस्य विद्यमानत्वान्नायमभिप्रेतदोष इत्याह—

॥ उपसंहाराभ्यनुज्ञानादप्रतिषेधः ॥

तैजसत्वादिना कथञ्चित् समानजातीयेन चक्षुरादिना प्रदीपो गृह्यत इति विशेषहेतुपरिग्रहेण स्वपक्षे प्रदीपदृष्टान्तस्य उपसंहारस्य अभ्यनुज्ञानात् अभ्युपगमात् प्रतिषेधो न सम्भवतीति सूत्रार्थः ।

[NTD, p. 26]

(130) P. 82, ll. 9-18 : (*a*) Rāmabhadra has not mentioned the *saṅgati* of this *prakaraṇa*. This is also the case with Bhaṭṭa Vāgīśvara, Viśvanātha and Rādhāmohana. [See NTD, p. 26 ; NSV, p. 449 ; NSVV, p. 90.] Vācaspati Miśra II and Keśava Miśra Tarkācārya have admitted here ***hetutā-saṅgati*** :

(*i*) अथ सामान्यविशेषयोर्हेतुहेतुमद्भावसङ्गत्या तदनन्तरमुद्देशक्रमानुरोधादनुमानपरीक्षातः प्राक् प्रत्यक्षपरीक्षाप्रकरणम् ।

[NTĀ, I.O.L. Mss, fol. 100b-101a.]

(*ii*) एवं प्रमाणसामान्यं परीक्षितमिदानीमुद्देशक्रमानुरोधात् प्रत्यक्षपरीक्षाप्रकरणमारभ्यते । सामान्यविशेषपरीक्षयोर्हेतुहेतुमद्भावोऽवान्तरसङ्गतिरपि । [GSP, p. 30]

(*b*) Keśava Miśra Tarkācarya, Viśvanātha Pañcānana and Rādhāmohana Gosvāmi Bhaṭṭācārya have introduced the *sūtra* नात्ममनसो: etc. in exactly the same manner. Bhaṭṭa Vāgīśvara introduces it with the remark—ननु कारणपक्षे असमग्रवचनत्वमसिद्धमिति चेत् तत्राह. [NTD, p. 26.]

(131) P. 83, ll. 3-6 : The comments of Vācaspati Miśra II on this *sūtra* are much more elaborate and worth quoting :

अथ सति भावमात्रमेव कारणताग्राहकम्, व्यतिरेकस्य तु दैवागतत्वेनावर्जनीयत्वमित्यात्ममनःसन्निकर्षगणनादसमग्रवचनं मन्वानस्य मतनिराकरणाय पूर्वपक्षसूत्रम्—

।। दिग्देशकालाकाशेष्वप्येवं प्रसङ्गः ।।

एवं सति भावमात्रेण कारणत्वे सति दिगादिष्वपि ज्ञानकारणतया प्रसङ्गः स्यात् न चैवम्, तस्मात् त्वदुक्तयुक्तावात्मादिसन्निकर्षस्य कारणतया तदपरिगणनादसमग्रवचनमित्यर्थः। यद् वा—पृथगेवायमाक्षेपो दिक्कालयोरपि साक्षाद्धीहेतुत्वादिति। मूले च पार्श्वस्थोक्तिरेतत्सूत्रनिराकार्यदेशना कर्त्रभिप्राया, अन्यथैतन्निराकरणमपि सौत्रं स्यादिति, सिद्धान्तस्योत्सर्गतः सौत्रत्वादिति नव्याः। सूत्रमिदं पार्श्वस्थदेशयितुः, सिद्धान्तस्तु सौत्र इति प्राञ्चः।

[NTĀ, I.O.L., Mss. fol. 101a-101b.]

(132) P. 83, ll. 9-11 : (*a*) Aniruddha in his *Vivaraṇapañjikā* notes a disagreement between Vācaspati Miśra I and his teacher Trilocana (the author of *Nyāyamañjarī*) about the status of the sentences ज्ञानलिङ्गत्वात् etc. and तदयौगपद्य० etc. :

टीकाकारमते सूत्रमेतद्द्वयम्। मञ्जरीमते तु भाष्यम्।

[Vivaranapañjikā, p. 11.]

(*b*) Bhaṭṭa Vāgīśvara has adopted a different reading of the *sūtra* तदयौगपद्य etc., as is evident from the following extract :

नन्वभिधीयमानमपि यदि कारणभूतेन्द्रियात्मनः संयोगादि ज्ञानपदसामर्थ्याल्लभ्यते, तर्हि इन्द्रियार्थसन्निकर्षोऽपि नाभिधातव्यः, ज्ञानपदसामर्थ्यादेव लभ्यमानत्वादित्याशङ्क्याह—

॥ प्रत्यक्षनिमित्तायौगपद्यलिङ्गत्वाच्च न मनसः॥ [NTD, p. 27]

(*c*) Udayana supports the traditional reading of these two *sūtra-s* :

ननु

नात्ममनसोः सन्निकर्षाभावे प्रत्यक्षोत्पत्तिः

इति पूर्वपक्षसूत्रम्, तदुपपादकतयैव भाष्यकृता व्याख्यातत्वात्, सिद्धान्तसूत्रत्वे

ज्ञानलिङ्गत्वादात्मनो नानवरोधः
तदयौगपद्यलिङ्गत्वाच्च न मनसः
इति सूत्रद्वयमनर्थकमापद्येत, पूर्वेणैव गतार्थत्वात् ।

[TTP, A. L. Thakur's Press Copy, Chapter II, 26]

(*d*) Rādhāmohana Gosvāmi Bhaṭṭācārya adopts the reading तदयौगपद्यलिङ्गत्वान्मनसः [NSVV, p. 93.] The editor of this commentary has noted this departure from tradition.

(133) P. 85, ll. 1-2 : (*a*) Udayana has raised an interesting problem regarding this *sūtra* :

यद्यपीन्द्रियार्थयोः सन्निकर्षनिमित्तत्वात् इत्युत्तरपदार्थप्राधान्ये अन्यपदार्थप्राधान्ये चोभयत्राप्यसमर्थः, तथापि शेषापेक्षा भविष्यति ···ज्ञानोत्पत्तेरिति सूत्रशेषः···असमर्थसमासकरणं च इन्द्रियार्थयोरेव पाटवलक्षणं प्राधान्यं यथा विज्ञायेतेत्येवमर्थम्···

[TTP, A.L. Thakur's Press Copy, Chapter II, p. 35]

(*b*) Bhatta Vāgisvara has adopted the reading तत्त्वाच्चेन्द्रियार्थसन्निकर्ष. [NTD, p. 28.]

(*c*) The reading adopted by Rāmabhadra has been accepted by Viśvanātha and Rādhāmohana.

[NSV, p. 456 ; NSVV, p. 94.]

(*d*) Vācaspati Miśra II and Keśava Miśra Tarkacarya are silent about this *sūtra*. In their respective commentaries, the *sūtra* तदयौगपद्य० etc. is followed by the *sūtra* सुखाद्यासत्क्रमनसां etc.

[NTĀ, I.O.L. Mss. fol. 102a-102b ; G5P, p. 31.]

(*c*) Rādhāmohana seems to be aware of such disagreements about the genuineness of this *sūtra* :

इदं सूत्रं भाष्यकारस्य, न मुनेरिति केचित् । [NSVV, p. 94]

(134) P. 86, l. 13 : The traditional reading of this *sutra* is नार्थविशेषप्राबल्यात्.

(135) P. 88, ll. 18-19 : (*a*) Udayana also admits *prasanga-sangati* here :

एवं स्वरूपतः प्रत्यक्षलक्षणं परीक्षितम् । अथेदानीं प्रसङ्गेन विषयतः परीक्ष्यते । अयमेव च प्रकरणार्थः ।

[TTP, A.L. Thakur's Press Copy, Chapter II, p. 38]

(*b*) Vācaspati Miśra II provides us with a more elaborate remark in his *Nyāyatattvāloka* :

एवमतिव्याप्तिनिरासद्वारा परीक्षितेऽपि प्रत्यक्षलक्षणे नार्थविशेष-प्राबल्यादिति सूत्रेण स्मारितस्य घटादेरर्थस्यातिरिक्तभागस्सत्त्वेन भाग-द्वयाम [?] एकतामुपेत्य तद्विषयामेकभागदर्शनजापरभागानुमितिरूपां वर्णयित्वा ये प्रत्यक्षां धियमपह्नुवन्ति, तन्मतं यावन्न निराक्रियते तावत् प्रत्यक्षलक्षणे आश्रयासिद्धिः परिहृता न भवतीति प्रसङ्गादिदानीं तद्-द्वाराऽपि प्रत्यक्षलक्षणपरीक्षैव । अवयविपरीक्षणन्तु साध्यत्वादित्या-दिभिः, नत्तु परीक्षितं प्रत्यक्षमिति भाष्यदर्शनात् तत्पर्यन्तं प्रत्यक्ष-लक्षणपरीक्षाप्रकरणमेकमेवेत्येके । प्रत्यक्षमनुमानमिति सूत्रे न ह्यवयवी नाम कश्चिदर्थान्तरभूत इति टीकादर्शनाद्धि तत्रावयविप्रकरणमित्यन्ये । इत एव सूत्रादारभ्य त्रिभिः सूत्रैः प्रत्यक्षस्यानुमानभेदसाधकं भिन्न-मेवैतत् प्रकरणमित्यन्ये ।... [NTĀ, I.O.L. Mss, fol. 102b-103a]

From this passage, it is clear that like Udayana, Vācaspati Miśra II also admits *prasaṅgasangati* in this case. It also records the fact that there was some disagreement among different commentators regarding the structure and subject matter of this *prakaraṇa*.

Viśvanātha Pañcānana and Rādhāmohana Goswami Bhaṭṭacārya have not named the *saṅgati* that connects this *prakaraṇa* to the earlier one. [See NSV, p. 462 ; NSVV, p. 98.] In *Gautamīyasūtranakāśa* of Keśava Miśra Tarkacārya, one can discern the influcnce of the *Nyāyatattvaloka* passage

quoted above, and one of the contending views regarding the subject-matter of this *prakaraṇa* has been ascribed here to Puṇḍarīkākṣa Vidyāsāgara :

(*c*) एवं साक्षाल्लक्षणाव्याप्त्यादिनिरासेन प्रत्यक्षलक्षणं परीक्षितम्। इदानीं प्रसङ्गाद् विषयस्तदेव परीक्ष्यते। न चैकदेशोपलब्धिरवयविसद्भावादित्यादि सूत्रं पूर्वप्रकरणान्तर्भूतम्। अवयविप्रकरणं तु साध्यत्वादवयविनि सन्देह इत्येतत् सूत्रादारभ्यते। अत एव भाष्यवार्त्तिकादिमतकीर्त्तनम्। अवयविनश्चावसरप्रसङ्गौ सङ्गती—इति प्राञ्चः।

विद्यासागरादयस्तु—प्रत्यक्षविषयत्वेन प्रसङ्गागतावयव्यपह्नवे विषयापह्नवः। एवं प्रत्यक्षलक्षणप्रवृत्तिः निराधारा। विषयाभावे लक्ष्याभावादाश्रयासिद्धिर्विभागानुपपत्तिश्चेति परम्परया लक्षणानुकूलो विचार इतीत एवावयविपरीक्षैव प्रकरणार्थः। अत एव "न ह्यवयवी कश्चिदर्थान्तरभूत" इत्यादि [टीकायां] प्रथमतोऽवयव्येवाक्षिप्त इत्याहुः।

[GSP, pp. 31-32]

As we can see, Keśava Miśra Tarkācarya admits the possibility of *avasarasaṅgati* as well in this case. The influence of Udayana is also discernible here.

Rāmabhadra clearly follows the earlier tradition, in so far as he considers the four sūtras starting from साध्यत्वादवयविनि सन्देहः as constituents of अवयविपरीक्षाप्रकरण.

(136) P. 89, l. 4 : At least two variants may be noted regarding the readig of this *sūtra*. NB, NV, TTP and NSV give the reading ०यावत्तावदप्युपलम्भात्. [NB. p. 438 ; NV, p. 438 ; TTP, A. L. Thakur's Press Copy, Ch. II, p. 40 ; NSV, p. 428.], while GSP and NSVV give the reading ०यावत्तावदुपलम्भात्. The editor of NSVV also notes some variants to this *sūtra*. [See GSP, p. 32 : NSVV, p. 99, f.n. 1.]

(137) P. 89, l. 8 : This is not counted as *sūtra* in *Nyāyasūcīnibandha* or *Nyāyavarttikatātparyaṭīka* of Vācaspati Miśra I.

It is, however, counted as a *sutra* in *Nyāyatātparyadīpikā* of Bhaṭṭa Vāgīśvara, *Nyāyatattvāloka* of Vācaspati Miśra II, *Nyāyasūtravṛtti* of Viśvanātha Pañcānana and *Nyāyasūtra-vivaraṇa* of Rādhāmohana Gosvāmi Bhaṭṭacārya. [See NTD, p. 31 ; NTĀ, I.O.L, Mss. fol, 103a ; NSV, p. 474 and NSVV, p. 99.]

(138) P. 11.10-11 : Vācaspati Miśra II enunciates the type of सन्देह involved here in the following manner :

अथावयविसद्भावादिति सूत्रेण स्मारिततया प्रसङ्गसङ्गत्या पूर्व-प्रकरणोक्तप्रत्यक्षविषयवृक्षाद्यवयविसाधकत्वेनोपोद्घातसङ्गत्या चेदानी-मवयविप्रकरणम् । तत्र विप्रतिपत्तेः मूर्त्तत्वं परमाणुभिन्नवृत्ति न वेति संशयः । प्रयोजनं प्रत्यक्षसिद्धिः । तत्र पूर्वपक्षसूत्रम्—

॥ साध्यत्वादवयविनि सन्देहः ॥

साध्यत्वादसिद्धत्वादवयविन्यापाततः सन्देहो भवति, विचारान-न्तरन्त्वव्यतिरेकावधारणमेव । तथाहि—द्व्यणुकत्वाभिमतोऽवयवी एकावयवकोऽनेकावयवको वा, आद्ये स्वक्रियाविरोधः ; अन्त्ये सोऽवयवे परिसमाप्य वर्त्ततेऽपरिसमाप्य वा, आद्ये अवयवान्तरे न वर्तेत ; अन्त्ये तदवयवावच्छिन्नोऽवयवी वर्त्तते अवयवान्तरावच्छिन्नो वा, आद्ये आत्माश्रयः, द्वितीये विरोधः, अवयवान्तरकल्पने चानवस्था ।...

[NTĀ, I.O.L. Mss. fol. 103b]

(139) P. 91, ll. 13-17 : In subsequent commentaries, the alternatives discussed here have figured in a prominent manner. Thus Viśvanātha comments :

तत्र च द्रव्यत्वं स्पर्शवत्त्वं वाऽणुत्वव्याप्यं न वेत्यादयो विप्रति-पत्तयः । [NSV, p. 480]

Rādhāmohana writes :

तत्रावयविसन्देहो द्रव्यत्वमणुत्वव्याप्यं न वेत्यादिरूपः ।

[NSVV, p, 100]

(140) P. 96, l. 1 : These बाधकसूत्र-s can be found in *Nyāya-vārttika*, pp. 481-488.

(141) P. 99, l. 13 : The standard reading of this *sūtra* is धारणाकर्षणोपपत्तेश्च. The necessity of inserting the particle च has been shown by Bhaṭṭa Vāgīśvara in the following manner :

न केवलमिदमेकं द्रव्यमिति स्थूलोपलम्भलक्षणप्रत्यक्षादवयविसिद्धिः । किं तर्हि ? धारणाकर्षणोपपत्तेर्धारणाकर्षणोपपत्तिलक्षणानुमानाच्च । प्रमाणद्वयसमुच्चयार्थश्चकारः । [NTD, p. 33]

(142) P. 99, ll. 16-18 : The view of Rāmabhadra expressed here has been noted by Viśvanātha Pañcānana and Rādhāmohana Gosvāmi Bhaṭṭācārya ; even though their reactions to it are different, as is evident from the following passages :

(*a*) इदमवद्यम्—नौकाकर्षणे नौकास्थाकर्षणवत्, कुण्डधारणेन कुण्डस्थदधिधारणवच्चोपपत्तेर्विजातीयसंयोगबलेनैवावयवावयविभावाभावेऽप्युपपत्तेः, अतः पूर्वोक्तां युक्तिमेव साधीयसीं मन्यमानस्तत्र परोक्तं समाधानमशङ्क्य दूषयति—सेनावनादिवदिति । [NSV, pp. 500-503]

(*b*) न च नौकाकर्षणेन नौकास्थाकर्षणवत् कुण्डधारणेन कुण्डस्थदधिधारणवच्चैकदेशाकर्षणादिना तद्विजातीयसंयोगाश्रयापरभागाकर्षणादिसम्भव इति वाच्यम् । नौकानौकास्थयोराधाराधेयभावापन्नतया आधाराकर्षणादिना आधेयाकर्षणादिसम्भवेऽप्याधाराधेयभावानापन्नानां परमाणूनां पुञ्जघटकानामेकाकर्षणेऽपराकर्षणासम्भवात्, तथा दृष्टान्ताभावात् । यदि च कथञ्चिद्विजातीयसंयुक्तद्रव्याणामेकाकर्षणेऽपरस्याकर्षणं सम्भाव्यते तथापि पूर्वोक्तसमाधानमेव सम्यगिति ।
[NSVV, pp. 101-102]

(143) P. 102, l. 11 : Rādhāmohana Gosvāmi Bhaṭṭācārya adopts the reading नैकदेशरोपलासलसादृश्येभ्योऽर्थान्तरभावात्. It is interesting to note that both Rāmabhadra and Viśvanātha add the word

दोष in their interpretations, as may be seen from the passages quoted below :

(*a*) उदाहृतलिङ्गानां तदुत्कर्षतत्सञ्चारतन्मयूरशब्दानामेकदेशरोधत्रासजाण्डसञ्चारमयूरशब्दसदृशशब्देभ्यो भिन्नत्वान्न व्यभिचार इत्यर्थः··· [NR, p. 120]

(*b*) अनुमानप्रामाण्यं न युक्तम्, एकदेशरोधजनदीवृद्धेः त्रासजपिपीलिकाण्डसञ्चारात् मयूररुतसदृशरुताच्च लिङ्गीभूतानां नदीवृद्ध्यादीनां भिन्नत्वान्न दोषः। [NSV, p. 517]

(144) P. 102, ll. 17-18 : (*a*) Here, Rāmabhadra is referring to the following passage in *Nyāyabhāṣya* on NS 1.1 5 :

सद्विषयं प्रत्यक्षं सदसद्विषयं चानुमानम्। कस्मात्? त्रैकाल्यग्रहणात्—त्रिकालयुक्ता अर्था अनुमानेन गृह्यन्ते, भविष्यतीत्यनुमीयते, भवतीति चाभूदिति च, असच्च खल्वतीतमनागतं चेति।

[NB, pp. 158-161]

(*b*) Rāmabhadra has not mentioned the *saṅgati* of this *prakaraṇa*. According to Udayana, Vācaspati Miśra II and Keśava Miśra Tarkācārya, the *saṅgati* here is *upodghāta* :

(*i*) ···औपोद्घातिकं वर्तमानपरीक्षाप्रकरणं···

[TTP, A.L. Thakur's Press copy, Chap. II. p. 66]

(*ii*) एवं हि पूर्ववदादिभिन्नस्यानुमानस्य त्रिकालविषयत्वमपि परीक्षितम्, तच्च वर्तमाने असति न घटत इत्युपोद्घातसङ्गत्येदानीं वर्तमानपरीक्षाप्रकरणम्। [NTĀ, I.O.L. Mss. fol. 111a]

(*iii*) एवं पूर्ववदादिद्वारा अनुमानपरीक्षाप्रकरणम्। तत्र चोपोद्घातः सङ्गतिः। त्रिकालविषयस्यानुमानस्य वर्तमानाभावे विषयापहारात्। [GSP, p. 34]

(145) P. 103, ll. 1-5 : The interpretation given here agrees with those provided by Keśava Miśra Tarkācārya and

Viśvanātha Pañcānana [See GSP, p. 34; NSV, p. 520]. All these commentators have followed Vātsyāyana. [See NB, p. 517.] *Nyāyatattvāloka* of Vācaspati Miśra II, however, exhibits a more analytical approach. *Nyāyasūtravivaraṇa* of Rādhāmohana Gosvāmi Bhaṭṭācārya raises some pertinent problems, besides explaining this *sūtra* in an alternative manner. The relevant passages are as follows:

(*a*) एवं कालसिद्धौ पूर्वपक्षसूत्रम्—

॥ वर्तमानाभावः पततः पतितपतितव्यकालोपपत्तेः ॥

कालस्यैकत्वादतीतादिव्यवहारास्तावदौपाधिकाः, तत्र वर्तमाने क उपाधिः ? न साध्या क्रिया, तस्याऽसिद्धत्वात्; नापि सिद्धा, उत्तरकालमपि तथात्वेनातिप्रसङ्गात्; नापि कारकम्, 'अपतदि'त्यादावपि 'पतती'ति स्यात्, कारकस्य च तादवस्थ्यात्। अतीतानागतयोस्तु विवक्षितक्रियाप्रध्वंसप्रागभावावुपाधी, इत्युपाधिद्वये द्वावेव कालौ न वर्तमानोऽपीत्यर्थः। तथा च वर्तमानाभावान्न त्रैकाल्यविषयकमनुमानमिति भावः। [NTĀ, I.O.L. Mss. fol. 115b]

(*b*) अथ 'वर्त्तमानकालो वृष्टिमान् मयूररुतवत्त्वादि'त्यनुमाने पक्षाप्रसिद्धिः, एवमनुमितेः प्रमात्वं वर्त्तमानसाध्यविषयकत्वम्, वर्त्तमानत्वञ्च वर्त्तमानकालवृत्तित्वम्, तत्र वर्त्तमानकालाभावेऽनुमितेर्न प्रमात्वमिति तत्करणस्यानुमानस्य न प्रामाण्यमित्याशङ्कते—

॥ वर्त्तमानाभावः पततः पतितपतितव्यकालोपपत्तेः ॥

वर्त्तमानाभावः वर्त्तमानकालाभावः वर्त्तमानकालस्यासत्त्वम्, अतीतानागतकालभिन्ने कालत्वाभाव इति यावत्। एतेन प्रतियोगिसिद्ध्यसिद्धिभ्यां न निषेधासिद्धिरिति। तत्र कालत्वे मानाभावादिति हेतुरुह्यः। ननु घटादेः कथं कालसम्बन्धित्वरूपसत्त्वेन व्यवहार इत्यत आह—पतत इति। वस्तुनो घटादेरित्यर्थः। पतितपतितव्यकाला-

भ्याम् अतीतानागतकालाभ्यामेव सत्त्वोपपत्तेः। 'घटो जातो घटो भविष्यती'त्यादिप्रतीतेरिति भावः। 'वर्तते' इत्यादिप्रयोगस्तु वृत्तितामात्रं बोधयति।

यद् वा—पततो वस्तुनो वर्त्तमानाभावो वर्त्तमानत्वाभावोऽतीतानागतकालवृत्तित्वाभावः। कालवृत्तित्वीयस्वरूपसम्बन्धावच्छिन्नप्रतियोगिताक इत्यादिः।

अथ वा—पततः 'पतती'त्यादिप्रयोगविषयीभूतस्य घटादेः वर्त्तमानाभावः प्रयोगाधिकरणकालवृत्तित्वाभावः, 'पतती'त्यादिप्रयोगेण तथाकालवृत्तित्वानवगाहनात्।

ननु तदा सत्त्वमेव कुत इत्यत आह—पतितेत्यादि। 'पूर्ववदिदानीं घट' इत्यादिप्रत्ययस्याप्यतीतानागतकालवृत्तित्वविषयकत्वोपपत्तेः 'इदानीं घटो जात इदानीं घटो भविष्यती'त्यादिप्रत्ययवदिति तदर्थः।

[NSVV, pp. 105-106]

(146) P. 104, l. 4: There is some disagreement among the commentators about the exact reading of this sūtra. Thus, Bhaṭṭa Vāgiśvara adopts the reading क्रियमाणे कृतताकर्त्तव्यतोपपत्तेस्तूभयथा ग्रहणम्. It may be recalled here that Vātsyāyana introduces this *sūtra* in the *Nyāyabhāṣya* with the following words:

यच्चेदं पच्यमानं छिद्यमानं च तत्क्रियमाणम्, तस्मिन् क्रियमाणे—

[NB, p. 525]

It seems that the last word in this sentence has been treated by Bhaṭṭa Vāgiśvara as the first word of the *sūtra* under discussion.

Rādhāmohana Gosvāmi Bhaṭṭācārya, on the other hand, adopts the reading कृतताकर्त्तव्यतोपपत्तेरुभयथा ग्रहणम् [NSV, p. 107]. The editor of this work is aware of this discrepancy (see f.n. 2, NSVV p. 107).

(147) P. 104, ll. 11-17 : (*a*) Vācaspati Miśra II explains this *sūtra* so as to incorporate the theory of वैधर्म्योपमिति pronounced by Vācaspati Miśra I in his *Nyāyavārttikatātparyaṭīkā* :

तत्र पूर्वपक्षसूत्रम्—

॥ अत्यन्तप्रायैकदेशसाधर्म्यादुपमानासिद्धिः ॥

अत्र साधर्म्यमुपलक्षणम्, तेनावगतसङ्गतिसंज्ञासमभिव्याहृतवाक्यार्थानुसन्धानं संज्ञासंज्ञिसम्बन्धज्ञानफलकमुपमानं विवक्षितमतो वैधर्म्यस्यापि संग्रहः। तत्रातिदेशवाक्यविषयो न साधर्म्यं वैधर्म्यमात्रं वा अतिप्रसङ्गात्, नाप्यात्यन्तिकं गवयादौ तथाभावात्, नापि प्रायिकमतिप्रसङ्गादित्यर्थः। [NTĀ, I.O.L. Mss. fol. 116a]

(*b*) Keśava Miśra Tarkācarya, Viśvanātha Pañcānana and Radhāmohana Gosvāmi Bhaṭṭācārya also maintain that साधर्म्य also includes वैधर्म्य. Rādhāmohana adds some pertinent points as well :

(*i*) अत्र साधर्म्यशब्देन वैधर्म्यस्यापि सङ्ग्रहः। तेन तद्धर्मसामान्याक्षेपो भवतीति। [GSP, p. 35]

(*ii*) साधर्म्यस्य चोपलक्षणत्वाद्वैधर्म्योपमानमप्येवं खण्डनीयम्। [NSV, p. 528]

(*iii*) उपमानमुपमितित्वेनाभिमतं ज्ञानम्। तस्य प्रसिद्धसाधर्म्याद् सिद्धिरुत्पत्तिः, सा न सम्भवति, यतोऽत्यन्तप्रायैकदेशसाधर्म्यान्न सिद्धिः। तथा च प्रसिद्धसाधर्म्यप्रयुक्तोत्पत्तिकत्वसामान्याभावः साध्यः। प्रसिद्धपदं ज्ञातपरम्। अत्यन्तज्ञातसाधर्म्यादिप्रयुक्तोत्पत्तिकत्वाभावकूटस्य हेतुत्वम्, विशेषाभावकूटस्य च सामान्याभावसाधकत्वं सर्वसिद्धम्। ···एवं वैधर्म्यस्यापि नोपमानत्वमित्यपि बोध्यम्। [NSVV, pp. 109-10]

(148) P. 105. l. 8 : (*a*) Bhaṭṭa Vāgīśvara reads this *sūtra* as :

॥ उपमानमनुमानं प्रत्यक्षेणाप्रत्यक्षसिद्धेः ॥ (NTD, p. 37)

Once again, it seems that Bhaṭṭa Vāgīśvara has added to the *sutra* the concluding part of the introductory line in the *Nyāyabhaṣya*, which runs as :

अस्तु तर्ह्युपमानमनुमानम्— [NB, p. 529]

It seems that in deciding the reading of this *sūtra*, Bhaṭṭa Vāgīśvara was influenecd by the *sūtra* प्रत्यक्षमनुमानमेकदेशग्रहणादुपलब्धेः (NS 2.1. 31), and that consequently, he treated the words अस्तु तर्हि alone as the introductory line of *Nyāyabhāṣya*. It may be recalled here that while introducing the *sutra* आकृतिस्तदपेक्षत्वात् सत्त्वव्यवस्थासिद्धेः (NS, 2.2.63), Vātsyāyana uses the words अस्तु तर्हि (NB, p. 665). However, *Nyāyavārttikatatparyaṭīkā* related to NS 2.1.46 clearly suggests that अस्तु तर्हि is not a part of this *sūtra*. [See NVTT, p. 529]

(*b*) The comments of Vācaspati Miśra II, Keśava Miśra Tarkācārya, Viśvanātha Pañcānana and Rādhāmohana Gosvāmī Bhaṭṭācārya also show that the reading in NVTT is acceptable to them :

(*i*) प्रसिद्धप्रमाणभावमुपमानमनुमानेऽन्तर्भावयिष्यन् पूर्वपक्ष्याह—

॥ प्रत्यक्षेणाप्रत्यक्षसिद्धेः ॥

उपमानमनुमानमिति शेषः । प्रत्यक्षेण प्रतीतेन गोसादृश्येन अप्रत्यक्षस्याप्रतीतस्य गवयत्वविशिष्टस्य प्रतीतेः । तथा हि—'यथा गौस्तथा गवय' इति वाक्यं तावद्व्याप्तिप्रदर्शकम्, यो गोसदृशः स गवय इति ; तथा च प्रत्यक्षे गवये स पिण्डो गवयपदवाच्यो यथोक्तसाधर्म्यात् अतिदेशवाक्यावगतगवयपिण्डवदि'त्यनुमानेन ; एवं 'धिक् करभकमि'त्यादिवाक्येनापि व्याप्तिग्रहे 'स पिण्डो करभपदवाच्यो यथोक्तवैधर्म्यात्,

अनिदेशवाक्यावगतकरभपिण्डवदि'त्यनुमानेन शक्तिग्रहसम्भवे विषयाभावादेव नोपमानं पृथगिति सूत्रार्थः।

[NTĀ, I.O.L. Mss. fol. 114b]

(*ii*) आक्षेपसूत्रम्— ॥ "प्रत्य···सिद्धेः" ॥ उपमानमनुमानमिति शेषः। प्रत्यक्षेण प्रतीतेन गवा अप्रत्यक्षस्याप्रतीतस्य गवयस्य प्रतीतेः। यत् प्रत्यक्षाप्रत्यक्षस्यार्थस्य प्रत्यायकं तदनुमानम्, यथा धूमादिर्वह्न्यादेरिति सूत्रार्थः।

[GSP, p. 35]

(*iii*) अनुमानेन चरितार्थं नोपमानं मानान्तरमिति वैशेषिकमतमाशङ्कते— ॥ प्रत्यक्षेणाप्रत्यक्षसिद्धेः ॥ प्रत्यक्षेण गोसादृश्यविशेषेण अप्रत्यक्षस्य गवयपदवाच्यत्वस्य अनुमितेर्नोपमानं मानान्तरमिति।

[NSV, p. 530]

(*iv*) नोपमानं मानान्तरमित्याशङ्कते—॥ प्रत्यक्षेणाप्रत्यक्षसिद्धेः ॥ प्रत्यक्षेण प्रत्यक्षविषयीभूतेन गोसाधर्म्येण हेतुना अप्रत्यक्षस्य गवयपदवाच्यत्वस्य सिद्धेरनुमितिस्वीकारात्। नोपमानं मानान्तरमिति शेषः।

[NSVV, p. 110]

(149) P. 105, l. 1-2 : Some variants to this *sūtra* may be noted here. Bhaṭṭa Vāgīśvara accepts the reading नाप्रत्यक्षे गवये प्रमाणार्थमुपमानस्य पश्याम इति [NTD, P. 38], and Rādhāmohana Gosvāmī Bhaṭṭacāya adopts the reading नाप्रत्यक्षेण गवये प्रमाणार्थमुपमानस्य पश्यामः [NSVV, p. 110]. Rādhāmohana's explanation of this *sūtra* is as follows :

समाधत्ते— ॥ नाप्रत्यक्षेण गवये प्रमाणार्थमुपमानस्य पश्यामः ॥ नोपमानमनुमानान्तर्गतं यतः अप्रत्यक्षेण गवयपदवाच्यत्वेन रूपेण गवये गवयस्य यत् प्रमाणं प्रमां तद्रूपमर्थं फलमुपमानस्य ज्ञातसाधर्म्यस्य पश्याम इत्यर्थः। तथा च साधर्म्यज्ञानाधीना या मितिस्तस्या 'उपमिनोमि नानुमिनोमी'त्याद्यनुव्यवसायसिद्धाया विजातीयप्रमायाः

करणत्वेनोपमानस्य मानान्तरत्वं सिद्धमिति भावः। अप्रत्यक्षेणेत्युक्त्या प्रत्यक्षासम्भवो दर्शितः। [NSVV, pp. 110-111]

(150) P. 106, ll. 3-7: The words शब्दः and अर्थस्यानुपलब्धेः have been explained in different ways by different commentators like Bhaṭṭa Vāgīśvara, Vācaspati Miśra II, Viśvanātha Pañcānana and Rādhāmohana Gosvāmi Bhaṭṭācārya:

(*a*) शब्दोऽनुमानम् अपृथक् प्रमाणम्। कस्मात्? अर्थस्य प्रत्यक्षेणानुपलब्धेर्हेतोरनुमेयत्वात्। यत्र प्रत्यक्षेणानुपलब्धोऽर्थः पश्चान्मितेन लिङ्गेनानुमीयते तत्रानुमानत्वं दृष्टम्, तथा च शब्दे, तस्मात् प्रत्यक्षेणानुपलभ्यमानार्थविषयत्वादनमानं शब्द इति सूत्रार्थः। [NTD, p. 39]

(*b*) अर्थस्य ग्राह्यस्यानुपलब्धेरप्रत्यक्षीकरणादनुमेयत्वं वाच्यम्, तेन श्रोत्राजन्यशब्दजा प्रमितिरनुमितिरसाक्षात्कारिप्रमात्वात्, धूमजवह्निप्रमितिवत्। अत्र च शब्दसाक्षात्कारोऽपि शब्दप्रमितिर्भवति, न च साऽनुमितिरित्यंशतो बाधवारणाय श्रोत्राजन्येति। न चोपमितौ व्यभिचारः, प्रत्यक्षानुमानाभ्यामन्यत् प्रमाणं नास्तीति पूर्वपक्षिणोऽभिमानात्। [NTĀ, I.O.L. Mss, fol. 115a-115b]

(*c*) शब्दोऽनुमानमित्यस्य शाब्दबोधोऽनुमितिरिति पर्यवसितार्थः। तथा च शब्दो लिङ्गविधयाऽनुमितिकरणम्, अर्थस्य शब्दप्रतिपाद्यस्यानुपलब्धेरप्रत्यक्षत्वादनुमेयत्वादिति। तथा च शाब्दज्ञानमनुमितिरप्रत्यक्षविषयत्वात्, प्रत्यक्षभिन्नत्वाद्वेत्यत्र तात्पर्यम्। [NSV, p. 543]

(*d*) शब्दो ज्ञातशब्दः शब्दज्ञानं वा। अनुमानमनुमितिकरणम्। तदर्थस्यानुपलब्धेरनुमेयत्वात् प्रत्यक्षाविषयत्वे सति ज्ञेयत्वेन हेतुनानुमेयत्वादित्यर्थः। [NSVV, p. 111]

(151) P. 106, l. 18 : There is some disagreement about the reading of this *sūtra*. NB, NTD, TTP, NTĀ and GSP adopt the reading ०शब्दादर्थसम्प्रत्ययः, while NV, NR, NSV and NSVV adopt the reading ०शब्दादर्थे सम्प्रत्ययः. [See NB, p. 536; NTD, p. 40; TTP, A. L. Thakur's Press Copy, Ch II, p. 77; NTĀ, I. O. L. Mss. fol. 115b; GSP, p. 37; NV, p. 536; NR, p. 106; NSV, p. 539; NSVV, p. 113]. The editor of NSVV also notes the variant ०शब्दार्थसम्प्रत्ययः, though he does not indicate the source [NSVV, p. 112, fn. 3].

The word आप्तोपदेश० in this *sūtra* has been explained in at least two different ways. While NB, NV, NVTT, TTP, NTĀ and GSP treat this as a case of तत्पुरुष, NR considers it as a case of कर्मधारय, while NSV and NSVV mention both these views as alternative interpretations. NTD, on the other hand, treats the entire expression आप्तोपदेशसामर्थ्यं as a case of त्रिपदव्यधिकरण-बहुव्रीहि :

(*i*) आप्तैरयमुक्तः शब्द इत्यतः सम्प्रत्ययः विपर्ययेण सम्प्रत्ययाभावात्, नत्वेवमनुमानम् । [NB, p. 536]

(*ii*) न ह्ययं शब्दमात्रात् स्वर्गादीन् प्रतिपद्यते । किन्तु पुरुषविशेषाभिहितत्वेन प्रमाणत्वं प्रतिपद्य तथाभूताच्छब्दात् स्वर्गादीन् प्रतिपद्यते । [NV, pp. 536-538]

(*iii*) आप्तोक्तत्वं तु स्वर्गादिप्रतिपादकस्यागमस्य प्रामाण्ये लिङ्गमेव, न चैतावता तदर्थ आनुमानिको भवति । न हि प्रवृत्तिसामर्थ्यानुमितप्रामाण्यस्य प्रत्यक्षस्य विषयो भवत्यानुमानिकः । अर्थविषयं हि प्रमाणं प्रामाण्यविषये च प्रवृत्तिसामर्थ्याप्तोक्तत्वे इति । एवं व्यवस्थिते अभ्युच्चयमात्रतया भाष्यवार्त्तिकाराभ्यां आप्तोक्तत्वाश्रयत्वानाश्रयत्वे शब्दानुमानभेदहेतुतयोपन्यस्ते इति मन्तव्यम् । [NVTT, p. 538]

(*iv*) आप्तोपदेशसामर्थ्यात् शब्दादर्थसम्प्रत्ययः इति सूत्रस्यायमर्थः । नानुमानमपक्षधर्मः । शब्दस्त्वाप्तेनोपदिश्यमानः पक्षधर्मतानपेक्षो वाक्यार्थसम्प्रत्ययमुपजनयति । आप्तोक्तत्वेन हेतुना

केवलमस्य प्रामाण्यमवधार्यते, अतो नानुमानमिति। ननु यद्ययं सूत्रार्थो भाष्यवार्त्तिके तर्ह्याप्तोक्तत्वानाप्तोक्तत्वलक्षणवैधर्म्यमात्राभिधायिनी। अनुमानलक्षणयोगे हि वैधर्म्येऽपि न कश्चिद् विरोध इत्याशङ्क्याह—एवं व्यवस्थित इति। एतच्च यथाश्रुतभाष्यवार्त्तिकरुचेः समाधानम्। वस्तुतस्तु तयोरप्येतदेव विवक्षितम्। अपि च नैतद्वैधर्म्यमात्रमपि। न ह्यनुमानस्याप्तोक्तत्वेन प्रामाण्यं क्रियते, ज्ञाप्यते वा। चतुः पञ्चरूपसम्पत्त्या हि तत् क्रियते, स्वत एव च ज्ञायत इति समर्थितम्। परतःपक्षे तु लिङ्गसमुत्थत्वेनैव वा ज्ञायते। शब्दस्य त्वाप्तोपदेशसामर्थ्येनैव प्रामाण्यं क्रियते ज्ञाप्यते चेति। सोऽयं नियत एव धर्मभेदो न तु वैधर्म्यमात्रमिति।

[TTP, A. L. Thakur's Press Copy, Ch. II, p. 77]

(*v*) असाक्षात् प्रमात्वादिना अनुमितित्वनियतं स्वर्गदेवतादेर्मानान्तरादनवगतौ व्याप्तिग्रहस्य शब्दमनुपजीव्याशक्यत्वात् (?) किन्त्वाप्तोपदेशबलादेव तदुपस्थितिरित्यर्थः।

[NTĀ, I.O.L. Mss. fol. 115b]

(*vi*) आप्तस्य भ्रमादिशून्यस्य य उपदेशस्तत्र यत् सामर्थ्यम् आकाङ्क्षायोग्यतादिमत्त्वम्, ततः। अथवा आप्तं यदुपदेशसामर्थ्यम् आकाङ्क्षादिमत्त्वं ततः सहकारात्। सावधारणश्चायं निर्देशः, तेन व्याप्तिनिरपेक्षादाकाङ्क्षादिज्ञानादर्थे सम्प्रत्ययः शाब्दबोधः सम्भवतीति नानुमानान्तर्भावः शब्दस्येत्यर्थः, शब्दादमुमर्थं प्रत्येमि न त्वनुमिनोमीत्यनुभवादिति भावः। [NSV, p. 539-541]

(*vii*) आप्तस्य भ्रमादिशून्यपुरुषस्य परमेश्वरादेर्य उपदेशोऽस्माच्छब्दादयमर्थो बोद्धव्य इत्यादिसङ्केतः शक्तिपरिभाषारूपस्तेन सामर्थ्यं बोधौपयिकत्वं यस्य तादृशादेव शब्दादर्थस्य एकपदार्थेऽपरपदार्थस्य

सम्प्रत्ययोऽनुमितिविजातीयबोध इत्यर्थः।... यद्वा—आप्तं प्राप्तं यदुपदेशसामर्थ्यं शाब्दबोधौपयिकाकाङ्क्षादि ततस्तत्सहकृतादिति। यद्वा आप्तोपदेशो भ्रमादिशून्यस्य शब्दस्तत्सामर्थ्यमाकाङ्क्षासत्त्वं तत इत्यर्थः। [NSVV, p. 113]

(*viii*) आप्तः प्राप्तः उपदेशः सामर्थ्यम् अभिधा व्यापारो येन सोऽयमाप्तोपदेशसामर्थ्यः तस्मादाप्तोपदेशसामर्थ्यात्। [NTD, p. 40]

(152) p. 107, l. 6 : (*a*) The reading in *Nyāyabhaṣya*, *Nyāyavārttika* and *Nyāyavārttikatātparyaṭīkā* is पूरणप्रदाहपाटनानुपलब्धेश्च सम्बन्धाभावः. This is also found in *Nyāyatātparyadipikā* and *Gautamīyasūtraprakāśa*, [See NB, p. 540 ; NV, p. 540 ; NVTT, p. 540 ; NTD, p. 41 and GSP, p. 37.] The reading adopted by Rāmabhadra is also found in *Nyāyatattvāloka*, *Nyāyasutravṛtti* and *Nyāyasūtravivaraṇa*. [See NTĀ, I.O.L. Mss. fol. 120a ; NSV (Chowkhamba edition), p. 47 ; NSVV ; p. 113.]

(*b*) The editor of NSV (Chowkhambe edition) states that even in NB, etc. after this there is one more *sūtra*, viz. प्रमाणतोऽनुपलब्धेः. [See NSV, Chowkhamba edition, p. 47, fn. 2.] In the Metropolitan edition of NB, NV, NVTT and NSV, however, this has been treated as a sentence of NB. [See NB, NV, etc., Metropolitan edition, p. 539.]

(*c*) It may also be noted that *Nyāyatātparyadipikā* of Bhaṭṭa Vāgīśvara reads and explains one more sentence viz. नोपलब्धेरतीन्द्रियत्वात् as a *sūtra*, and places it between आप्तोपदेशसामर्थ्याच्छब्दादर्थसम्प्रत्ययः and पूरणप्रदाहपाटनानुपलब्धेश्च सम्बन्धाभावः. [See NTD, p. 41.] This sentence has not been counted as a *sūtra* in any other commentary on NS. This sentence, too, occurs as a part of NB in the Metropolitan editions of NB, NV etc., the full sentence being प्रमाणतोऽनुपलब्धेः—प्रत्यक्षतस्तावच्छब्दार्थप्राप्तेर्नोपलब्धिरतीन्द्रियत्वात्. Metropolitan edition of NB, NV etc, p. 531.]

(153) P. 108, l. 7 : In *Nyāyatattvāloka* of Vācaspati Miśra II, the reading of this *sūtra* is found as जातिविशेषे नियमात्, and it is explained in the following manner :

…शब्दार्थयोः स्वाभाविकः सम्बन्धो न सम्भवति, कुतः ?

॥ जातिविशेषे नियमात् ॥

तथा हि ऋषयस्त्रिवृच्छब्दं स्तोत्रीयानवके ऋग्विशेषे प्रयुञ्जते, आर्यास्तु लताविशेषे। एवं म्लेच्छाः यववराहवेतसशब्दान् प्रियङ्गुवायसजम्बुषु प्रयुञ्जते, आर्यास्तु दीर्घशूकशूकरवञ्जुलेष्वित्यर्थः।

[NTĀ, I.O.L. Mss. fol. 120a.]

This interpretation closely follows *Nyāyavārttikatātparya-ṭīkā* of Vācaspati Miśra I, who remarks, *inter alta* :

…एवं त्रिवृत्शब्दमृषयः स्तोत्रीयानवके प्रयुञ्जते, आर्यास्तु लताविशेषे, सोऽयमनियमो न स्यात् स्वाभाविके सम्बन्धे।

[NVTT, p. 446.]

It is thus clear that Vācaspati Miśra I favours the reading अनियमात् in this *sūtra*. Whether the different reading in NTĀ is a genuine variant or a scribal error seems to remain an open question.

(154) P. 108, l. 14-16 : For the relevant texts, see NB, p. 466 ; NV, p. 446 ; NVTT, p. 446.

(155) P. 109, l. 1 : (*a*) In this connection, we may note the following remarks of Vācaspati Miśra I :

शास्त्रे त्वस्मिन्निःश्रेयसाधिगमपरे तन्नान्तरीयकतया वेदप्रामाण्य-व्युत्पादनमधिकृतमित्यधिकृतः शब्दो वेदः…

[NVTT, p. 547.]

(*b*) Keśava Miśra Tarkācarya also raises a pertinent point in this connection :

एवं शब्दसामान्यपरीक्षायास्तद्विशेषपरीक्षाहेतुत्वात् शब्दविशेष-परीक्षाप्रकरणम्। ननु क्वचिदुद्देशे लक्षणे वा वेदो नाधिकृत इत्यलक्षित-

परीक्षा स्यादिति चेन्न, साक्षादनधिकृतत्वेऽप्यर्थतोऽधिकृतत्वात्। तत्प्रामाण्यमनुपपाद्य शास्त्रस्य निःश्रेयसेन सङ्गमयितुमशक्यत्वात्, तस्य तदुपदिष्टेतिकर्त्तव्यतापेक्षणात्। [GSP, p. 38.]

(*c*) In this connection, Vācaspati Miśra II provides us with a definition of Veda, which he justifies in the following manner :

वेदः शब्दतदुपजीविप्रमाणातिरिक्तप्रमाणजन्यप्रमित्यविषयार्थकत्वे सति शब्दजन्यवाक्यार्थज्ञानाजन्यप्रमाणशब्दः। अत्र प्रमाणशब्दः स्मृत्यादिकमपि भवतीति तद्व्यावृत्तये शब्दजन्यवाक्यार्थज्ञानाजन्येति शब्दविशेषणम्; स्मृत्यादयस्तु नैवम्, वेदादर्थं प्रतीत्य तत्प्रणयनात्। यद्यपि जन्यवाक्यार्थेत्यादावेव कृतं स्मृतिलौकिकवाक्ययोर्व्युदासः, तथापि जन्यवाक्यार्थज्ञानपदेन जन्यवाक्यार्थज्ञानं व्यवच्छेद्यम्, तच्चोभयसिद्धं न प्रतिषिद्धमिति न तथा कृतम्। प्रत्यक्षानुमानविषयार्थकलौकिकवाक्यव्यवच्छेदाय सत्यन्तम्। अत्रापि यदि प्रत्यक्षानुमानविषयकार्थेति क्रियेत तदा वेदार्थस्याप्यलौकिकप्रत्यक्षानुमानोभयविषयार्थकत्वादसम्भवः स्यादिति वेदपूर्वोक्तमनुमानादिकं विवक्षितम्। एवमपीदानीन्तनेषु वेदेषु गुरुपाठानुपूर्वीप[?]ज्ञानजनितेस्व [?°तेषु] शिष्योच्चरितेष्वव्याप्तिः स्यादत उक्तं वाक्यार्थेति। शिष्यस्य वाक्यार्थज्ञानं न वेदजनकं किन्त्वानुपूर्वीमात्रज्ञानम्, अनुगतत्वान्निर्वाहकात्त्च। न च 'अग्निर्हिमस्य भेषजमि'त्यादेः प्रत्यक्षार्थकवेदस्याव्याप्तिः, हिमभेषजत्वन्तु हिमनाशकारणत्वम्, तच्चातीन्द्रियमेव, एवमन्यदपि नेयम्।

[NTĀ, I.O.L. Mss. fol. 119b.]

(*d*) Viśvanātha Pañcānana and Rādhāmohana Gosvāmi Bbaṭṭācārya provide us wi}h shorter definitions of Veda :

(*i*) तस्य दृष्टार्थव्यतिरिक्तशब्दस्य अप्रामाण्यम्···[NSV, p. 548]

(*ii*) तस्यादृष्टार्थकस्य वेदस्याप्रामाण्यम्···[NSV, p. 117.]

(156) P. 110, ll. 17-20 : (*a*) The eleven *sāmidhenī*-s are verses from the *Ṛgveda-Saṃhitā* that are recited during the

kindling of fire in the *Darśapūrṇamāsa* sacrifice. These verses are as follows :

(*i*) प्र वो वाजा अभिद्यवो हविष्मन्तो घृताच्या ।
देवाञ्जिगाति सुम्नयुः । [ṚS 3. 27.1]

(*ii*) अग्न आ याहि वीतये गृणानो हव्यदातये ।
नि होता सत्सि बर्हिषि । [ṚS 6. 16.1]

(*iii*) तं त्वा समिद्भिरङ्गिरो घृतेन वर्धयामसि ।
बृहच्छोचा यविष्ठय । [ṚS 6. 16.11]

(*iv*) स नः पृथु श्रवाय्यमच्छा देव विवाससि ।
बृहदग्ने सुवीर्यम् । [ṚS 6. 16. 12]

(*v*) ईळेन्यो नमस्य स्तिरस्तमांसि दर्शतः ।
समग्निरिध्यते वृषा । [ṚS 3. 27. 13]

(*vi*) वृषो अग्निः समिध्यतेऽश्वो न देववाहनः ।
तं हविष्मन्त ईळते । [ṚS 3. 27. 14]

(*vii*) वृषणं त्वा वयं वृषन् वृषणः समिधीमहि ।
अग्ने दीद्यतं बृहत् । [ṚS 3. 27. 15]

(*viii*) अग्निं दूतं वृणीमहे होतारं विश्ववेदसम् ।
अस्य यज्ञस्य सुक्रतुम् । [ṚS 1. 12. 1]

(*ix*) समिध्यमानो अध्वरे३ऽग्निः पावकः ईड्यः ।

शोचिष्केशस्तमीमहे । [ṚS 3.27.4]

(*x*) समिद्धो अग्न आहुत देवान् यक्षि स्वध्वर ।

त्वं हि हव्यवाळसि । [ṚS 5.28.5]

(*xi*) आ जुहोता दुवस्यताऽग्निं प्रयत्यध्वरे ।

वृणीध्वं हव्यवाहनम् । [ṚS 5.28.6]

These verses have been identlfied as *sāmidhenīmantra*-s in *Āśvalāyanaśrautasūtra*. [ĀŚS, 1.2.7, Bibliotheca Indica Edn, p. 16.]

Among the extant commentaries on the *Nyāyasūtra*-s, *Nyāyatattvāloka* of Vācaspati Miśra II alone quotes these *mantra-s*. [See NTĀ, I.O.L. Mss., fol. 122b.]

(*b*) Increasing the nnmber of elevcn *sāmidhenī*-s to fifteen is also enjoined by *Śatapatha Brāhmaṇa* :

ताः पञ्चदशः सामिधेन्यः सम्पद्यन्ते । पञ्चदशो वै वज्रो वीर्यं वज्रो वीर्यमेवैतत् सामिधेनीरभिसम्पादयति तस्मादेतास्वनूच्यमानासु यं द्विष्यात् तमङ्गुष्ठाभ्यामवबाधेत इदमहममुमवबाध इति तदेनमेतेन वज्रेणावबाधते । [ŚP Br. 1.3.5.7, Bibliotheca Indica, Edn, Vol. I, p. 245.]

A relevant remark is made by Jaimini :

अभ्यासेन तु संख्यापूरणं सामिधेनीष्वभ्यासप्रकृतित्वात् ।

[*Mīmāṃsa-Sūtra* 10-5.27]

Śabarasvāmi's comments on it are as follows :

प्रकृतौ अभ्यासेन संख्या पूरिता "त्रिः प्रथमामन्वाह त्रिरुत्तमा- ९मि"ति । कथम् "पञ्चदश सामिधेन्यः" इति श्रुतिः, एकादश

च समाम्नाताः, तत्राभ्यासेनाऽऽगमेन वा संख्यायां पूरयितव्यायामभ्यास उक्तः—"त्रिः प्रथमामन्वाह त्रिरुत्तमामि"ति। अनेन नियमेन प्रथमोत्तरयोरभ्यासः कर्त्तव्य इति। यावत्कृत्वस्तयोरभ्यासे क्रियमाणे पञ्चदशसंख्या पूर्येत तावत्कृत्वोऽभ्यसितव्यमित्येतदभिप्रायं त्रित्वम्।

[*Śabara-Bhāṣya*, Anandāśrama edition, Vol. VI, p. 211.]

(*c*) *Śatapatha Brāhmaṇa* has the following remark on the term *sāmidhenī* :

समिन्धे सामिधेनीभिर्होता तस्मात् सामिधेन्यो नाम।

[ŚP Br. 1.3.5.1]

Sāyaṇācārya's comments on this are as follows :

होता च सामिधेनीभिः 'प्र वो वाजा' इत्यादिभिऋग्भिरग्निं समिन्धे, अतः समिन्धनसाधनत्वात् तासामपि सामिधेन्य इति नाम निष्पन्नम्। [ŚP. Br. Bibliotheca Indica Edn, Vol. I, p. 248.]

The *Vārttika* of Kātyāyana समिधामाधाने षेण्यण् on *Pāṇini Sūtra* तस्येदम् [4/3/120] is specifically written for explaining the term सामिधेनी. Jñānendra Sarasvatī explains this *Vārttika* in his *Tattvabodhinī* as follows :

—समिधाम्— । कर्मणी षष्ठीयम्। आधानमिति करणे ल्युट्। कर्मणि षष्ठ्यन्तादाधानकरणे षेण्यण् स्यात्।—सामिधेन्य इति। यया अग्निः समिध्यते सा समित्, संपदादित्वात् करणे क्विप्। तस्या आधान इति विग्रहः। सामिधेनीति। षित्वान्ङीष्। 'हलस्तद्धितस्य' इति यलोपः। यया ऋचा समिदाधीयते सा सामिधेनीत्यर्थः। 'प्र वो वाजा अभिद्यवः' इत्याद्याः 'आजुहोता दुवस्यत' इत्यन्ताः सामिधेन्य इति व्यवह्रियन्ते।

[*Tattvabodhinī*, ed. Dinakara Kesava Sastri and Vasudeva Laksmana Panasikara, Nirnaya Sagara, 1909, p. 244.]

(157) P. 111, l. 3 : (*a*) Vācaspati Miśra II introduces and explains this *sūtra* in the following manner ;

एवं वेदप्रामाण्यसम्भावनाहेतुर्वक्तुमर्हति, यदाहुः—

सम्भावितः प्रतिज्ञायां पक्षो साध्येत हेतुना ।

न तस्य हेतुभिस्त्राणमुत्पतन्नेव यो हतः ॥ [ ]

इत्यत आदौ प्रामाण्यसम्भावनाहेतुमाह—

॥ वाक्यविभागस्य चार्थग्रहणात् ॥

प्रामाण्यं सम्भाव्यते वेदानामिति शेषः ।

[NTĀ, I.O.L. Mss. fol. 122b]

(*b*) Keśava Miśra Tarkācārya repeats this almost verbatim, and adds an explanatory comment :

एवं वेदाप्रामाण्यसाधनं निरस्य प्रामाण्यसम्भावनायां हेतुर्वक्तव्यः । सम्भावनाया अप्यभावे कुतोऽप्रेतनप्रामाण्यहेतुरिति । तमाह—

॥ वाक्यविभागस्य चार्थग्रहणात् ॥

प्रामाण्यं सम्भाव्यते वेदस्येति शेषः । येषां वाक्यानां सिद्धोऽर्थस्तेषां प्रामाण्यमपि दृष्टमिति समानधर्मदर्शनात् संशय इत्यर्थः ।

[GSP, p. 27.]

(*c*) Viśvanātha Pañcānana and Rādhāmohana Gosvāmi Bhaṭṭācārya have adopted the first interpretation offered by Rāmabhadra. [See NSV, p. 556 ; NSVV, p. 121.]

(158) P. 111, l. 16 : (*a*) Vācaspati Miśra II offers an elaborate, scholarly and subtle commentary on this *Sūtra*, which is too extensive to be quoted here in full. Among other things, it provides us with a detailed exposition and criticism of the Bhāṭṭa and Prābhākara views on विध्यर्थ.

[see NTĀ, I.O.L. Mss. fol. 123a-133a]

Among the extant commentaries, none other devotes so much attention and space to this problem.

(*b*) Rādhāmohana Gosvāmi Bhaṭṭacārya provides an etymological remark : विदधाति प्रवर्तयति यद्वाक्यं तद्विधिरिति व्युत्पत्त्या प्रवृत्तिजनकेष्टसाधनताबोधक इत्यर्थः पर्यवसितः। He also indicates a four-fold division of विधि. [NSVV, p. 123.]

(159) P. 112, l. 3 : Vācaspati Miśra II defines अर्थवाद, स्तुति and निन्दा as 'विधायकशब्दशून्यवाक्यम्' 'विधेयप्रवृत्त्यनुकूलप्राशस्त्यप्रतिपादकोऽर्थवादः' and 'निवृत्त्यनुकूलाप्राशस्त्यप्रतिपादकोऽर्थवादः' respectively.

[NTĀ, I.O.L. Mss. fol. 133a.]

Once again, these have been copied verbatim by Keśava Miśra Tarkācārya [see GSP, p. 40.]

(160) P. 113, l. 2 : Vācaspati Miśra II explains this *sūtra* with the help of suitable examples. There is also a close similarity betwean the elucidations given by him and Rāmabhadra, as will be evident from what follows :

अनुवादमाह—

॥ विधिविहितस्यानुवचनमनुवादः ॥

अत्र अनुवचनमनुवाद इति सामान्यलक्षणम्, प्राप्तस्य सप्रयोजनमभिधानमिति तस्यार्थः। विधिविहितस्येत्यवान्तरविभागः, विधेर्विहितस्य चेत्यर्थः, तेन शब्दतदर्थानुवादौ दर्शितौ। प्रयोजनत्वस्य स्तुतिर्निन्दा वा कालविशेषो वा क्रियाविशेषो वा ज्ञाप्यत इति वक्ष्यमाणोदाहरणेषु यथोत्तरमूह्यम्। यथा—'अश्वमेधेन यजेतेति विधिः, 'तरति मृत्युं तरति ब्रह्महत्यां योऽश्वमेधेन यजत' इति विध्यनुवादः स्तोतुम्। एवम् 'उदिते जुहोती'ति विधिः, 'श्यावोऽस्याहुतिमभ्यवहरन्ति य उदिते जुहोती'ति विध्यनुवादो निन्दितुम्। एवम् 'आग्नेयोऽष्टाकपालो भवत्यमावास्यायाम्, ऐन्द्रं दधि भवत्यमावास्यायाम्, आग्नेयोऽष्टाकपालो भवति पौर्णमास्याम्, ऐन्द्रं पयो भवत्यमावास्यायाम्, अग्निषोमीयं प्रयच्छेत् पौर्णमास्याम्, उपांशुयागमन्तरा यजन्ती'ति षडुत्पत्तिवाक्यैः षडाग्नेयादयो यागा अमावास्यापौर्णमासीरूपसमयद्वारा विहिताः। 'विष्णुरुपांशु यष्टव्य' इत्युपांशुयागे विष्णुर्देवता, तत्र यागत्रयममावास्यासम्बन्धे

श्रुतं 'दर्शः दर्शः उत्तरत्र यं (१) पौर्णमास' इति। ते चामी विधयः स्ववाक्ये इष्टमनासादयन्तः तत्सापेक्षाः, एवमाघारादिविधयोऽपि, तथा च कुत्र विध्यर्थफलान्वय इत्याकांक्षायां 'य एवं विद्वान् पौर्णमासीं यजते य एवं विद्वानमावास्यां यजत' इति समयविशेषसम्बन्धानामनुवादो 'दर्शपोर्ण-मासाभ्यां स्वर्गकामो यजेते'ति विध्युक्तफलस्य तेषामेव षण्णां सम्बन्ध-बोधनार्थः। तेनाघारादीनामुक्तकालसम्बन्धेन श्रुतानां साक्षात्फल-सम्बन्धाभावः, अत एवाघारादयः 'फलवत्सन्निधावफलं तदङ्गमि'ति न्यायात् दर्शपौर्णमासाङ्गतया व्यवतिष्ठन्त इति सिद्धम्। एवम् 'अग्निहोत्रं जुहोती'ति विहितो होमो 'दध्ना जुहोति', 'पयसा जुहो-ती'त्यनेन दधिपयोरूपगुणविधानार्थमनूद्यते। एवं सोमो दर्शपौर्णमासौ च विहिताः, तेषामानन्तर्यं विधातुमुभयानुवादो 'दर्शपौर्णमासाविष्ट्वा सोमेन यजेते'ति। एवम् 'अध्वर्युर्गृहपतिं दीक्षयित्वा ब्रह्माणं दीक्षयती'-त्यादावपि।

[NTĀ, I.O.L. Mss. fol. 133b-134a.]

(161) P. 113, l. 18- P. 114, l. 1 : (*a*) This has been reported by Visvanātha Pañcānana as an alternative explanation, which he does not seem to endorse :

आप्तं गृहीतं प्रामाण्यं यत्र स वेदस्तादृशेन वेदत्वेन प्रामाण्यमनु-मेयमिति केचित्। [NSVV, p. 571].

(*b*) Keśava Miśra Tarkācārya adopts an interpretation which resembles that of Rāmabhadra :

विवादपदान्यदृष्टार्थानि वेदवाक्यानि प्रमाणम्, वेदवाक्यत्वात्, दृष्टार्थमन्त्रायुर्वेदवत्। दृष्टार्थवेदवाक्यानि प्रमाणम्, आप्तोक्तत्वात्, लौकिकवाक्यवत्। [GSP, p. 40].

(*c*) P. 114, ll. 5-6 : This seems to be the interpretation offered by earlier commentators like Uddyotakara, Bhaṭṭa Vāgīśvara and Vācaspati Miśra II :

(*i*) मन्त्रायुर्वेदवच्च तत्प्रामाण्यमाप्तप्रामाण्यात् । च शब्दः पूर्वहेत्वनुकर्षार्थः । यथा मन्त्रायुर्वेदवाक्यानि पुरुषविशेषाभिहितत्वात् प्रमाणं तथा वेदवाक्यानीति पुरुषविशेषाभिहितत्वं हेतुः ।···किंकृतमेतत् ? आप्तप्रामाण्यकृतम् । किं पुनराप्तानां प्रमाणत्वम् ? साक्षात्कृतधर्मता··· ···भूतदया च···यथापरिज्ञातार्थचिख्यापयिषा चास्य भवति । एतेन त्रिविधेन विशेषणेन विशिष्टो वक्ता आप्तः । तेन य उपदेशः क्रियते स प्रमाणमिति । [NV, p. 565]

(*ii*) तस्य वेदस्य प्रामाण्यं तत्प्रामाण्यम् । कुतः ? आप्तप्रामाण्यात् । आप्तस्य यथावद्दृष्टार्थस्य तथैवोपदेष्टुः प्रामाण्यात् प्रमाणभूतत्वात् मन्त्रायुर्वेदप्रामाण्यवत्········ च शब्दः प्रामाण्यसम्भावनाहेत्वनुकर्षणार्थः । एतदुक्तं भवति—प्रमाणं वेदाः आप्तप्रणीतत्वात् मन्त्रायुर्वेदवत् । मन्त्रायुर्वेदवाक्येषु तत्प्रतिपादितार्थाविसंवादित्वेन तत्प्रमाणे त्वाप्तत्वनिश्चयाद् यथा प्रामाण्यं सिद्धम्, तथा वेदेष्वाप्तप्रणीतत्वनिश्चयात् प्रामाण्यं सिद्धम् । [NTD, P. 47]

(*iii*) एवं बाधाभावं प्रामाण्यसम्भावनाहेतुमुक्त्वा प्रामाण्यहेतुमाह—

॥ मन्त्रायुर्वेदप्रामाण्यवच्च तत्प्रामाण्यमाप्तप्रामाण्यात् ॥

चकारो बाधासम्भावनाहेतुमनुकर्षति । व्यधिकरणोपन्यासो व्याप्तिग्रहप्रदर्शनाय—आप्तस्य प्रामाण्यं यतोऽतस्तदुक्तं प्रामाण्यव्याप्तं । तेन विवादपदान्यदृष्टार्थानि प्रमाणम्, आप्तोक्तत्वात्, दृष्टार्थमन्त्रायुर्वेदवत् । न च हेत्वसिद्धिः, वेदानां वाक्यत्वेन सवक्तृकत्वसिद्धौ वक्तुश्च परिशेषात् नित्यसर्वविषयज्ञानवतः सिद्धावाऽप्तत्वस्य सिद्धावाप्तोक्तत्वस्य सिद्धेः । न च शाक्यभिक्षुकदिगम्बरसंसारमोचकागमास्तत्प्रणीताः वेदा अवेदा वेति संशय इति वाच्यम्, तेष्येव बुद्धर्षभादिप्रणीतत्वेन ईश्वराप्रणीतत्वेन च श्रवणात् । वेदानाञ्चाविगीतमहाजनपरिग्रहादाप्तोक्तत्वग्रहः···

…दृष्टार्थानां मन्त्राणामायुर्वेदस्य च प्रवृत्तिसामर्थ्यादेव प्रामाण्यावधारणमतो न दृष्टान्तस्य साध्यवैकल्यम्। वेदत्वञ्च तत्क्रमकवाक्यत्वं वाक्यत्वावान्तरजातिर्वेति सिद्धं महाजनपरिग्रहादाप्तोक्ताः वेदास्ततश्च प्रमाणमिति। [NTĀ, I.O.L. Mss. fol. 134a-134b.]

(*d*) Rādhāmohana Gosvāmi Bhaṭṭacārya endorses the interpretation given by the earlier commentators, and he also records two other interpretatious not found elsewhere by us :

बाधकं निरस्य साधकमाह—

॥ मन्त्रायुर्वेदवच्च तत्प्रामाण्यमाप्तप्रामाण्यात् ॥

तस्य वेदस्य प्रामाण्यम् आप्तस्य भ्रमप्रमादशून्यस्य तत्कर्त्तुः प्रामाण्याद् यथार्थोपदेशकत्वाद् यथार्थज्ञानवत्त्वात्; प्रमाणपदस्य कर्त्तृव्युत्पत्त्या प्रमाश्रयपरत्वात्। तथा च वेदः प्रमाणमाप्तोक्तत्वादिति वेदत्वावच्छेदेन प्रामाण्यसाधने तत्सामानाधिकरण्येन दृष्टान्तमाह—मन्त्रायुर्वेदवच्चेति। मन्त्रो विषादिनाशक आयुर्वेदो रोगनिदानादिज्ञापकवेदभागविशेषः। चकारात् ज्योतिर्वेदादिः। तत्र प्रामाण्यग्रहः संवादेनेति।…केचित्तु आप्तप्रामाण्यादित्यस्य महाजनपरिग्रहादित्यर्थमाहुः। अन्ये तु मन्त्रादिकर्त्तृजन्यत्वेन वेदस्य प्रामाण्यमनुमेयमिति समुदिततात्पर्यार्थं इत्याहुः। [NSVV, pp. 126-127]

(162) P. 116, l. 13 : The traditional reading of this *sūtra* is अनर्थापत्तावर्थापत्त्यभिमानात्. That Rāmabhadra actually accepts a different reading is evident from p. 117, l. 21. Viśvanātha Pañcānana makes an observation that suggests *another* variant reading accepted by some other commentators :

'नानैकान्तिकत्वमर्थापत्तेरि'ति भाष्यस्यावतरणिका सूत्रादौ केचिल्लिखन्ति। [NSV, p. 580]

(163) P. 117, l. 15 : While explaining this *sūtra*, Rādhāmohana Gosvāmi Bhaṭṭācārya has mentioned Rāmabhadra's inter-

pretation of NS 2.2.3-6 as an alternative explanation given by some commentators :

केचित्तु—अर्थापत्तिरप्रमाणं नानुमानात्मकं प्रमाणमनैकान्तिकत्वाद् व्याप्तिविरहात्। तथा हि गृहे देवदत्ताभावस्यार्थापत्तिविषयया देवदत्तनिष्ठबहिःसत्त्वकल्पकत्वं तत्र व्याप्तेर्विरहात्। एवं तत्र पक्षधर्मताज्ञानमपि नास्तीति। समाधत्ते—अनर्थापत्तावर्थापत्त्यभिमानात्। अर्थापत्तिभिन्ने देवदत्ताभावादर्थापत्त्यभिमानाद् देवदत्तनिष्ठबहिःसत्त्वसाधकत्वाभिमानात्। भवतैतदुक्तमिति शेषः। अर्थापत्तिस्तु तत्र जीवित्वे सति गृहासत्त्वं तत्र व्याप्तिरस्ति तज्ज्ञानापेक्षाऽप्यस्तीति भावः। क्वचिद् व्यभिचारस्यानुमानान्तर्भावनिरासकत्वे भवदुक्तस्य प्रतिषेधस्यापि अनुमानानन्तर्भावप्रसङ्ग इत्याह—प्रतिषेधाप्रामाण्यं चानैकान्तिकत्वात्। प्रतिषेधस्यानुमानत्वेऽर्थापत्तेरपि तत्त्वमविवादमित्याह—तत्प्रामाण्ये वा नार्थापत्त्यप्रामाण्यम्—इति सूत्रचतुष्टयार्थं इत्याहुः।

[NSVV, p. 192]

(164) P. 117, l. 17- P. 118, l. 7 : This set of interpretations of NS 3.2.3-6 is to be found in *Nyāyatattvāloka* of Vācaspati Miśra II, who is described here as सम्प्रदायविदः :

अत्र तटस्थीयमाक्षेपसूत्रम्—

॥ अर्थापत्तिरप्रमाणमनैकान्तिकत्वात् ॥

असत्सु मेघेषु वृष्टिर्न भवतीत्यत्र सत्सु भवतीत्यर्थापत्तिविषयः, तथा च मेघसत्त्वमनुद्दिश्य वृष्टिविधावुद्देश्यस्य व्याप्यतया विधेयस्य च व्यापकतया वृष्टिव्याप्यं मेघसत्त्वं प्रतीयते; न चैवम्; मेघसत्त्वेऽपि कदाचिदवृष्टेरित्यनैकान्तिकत्वापत्तिरित्यर्थः।

परिहारसूत्रम्—

॥ अनर्थापत्तावर्थापत्त्यभिमानात् ॥

सत्सु मेघेषु वृष्टिर्भवत्येवेति नार्थापत्तेर्विषयः, किन्तु सत्सु भवतीति, तथा च कारणस्य कार्यव्यभिचारेऽपि न कार्यस्य कारणव्यभिचार इत्यर्थापत्तौ तदभिमानाक्षेपो न युक्तः; न चोद्देश्यस्य विधेयव्याप्यता-नियमो 'नीलः पट' इत्यादौ व्यभिचारादित्यर्थः ।

किञ्चाविषये यदि व्यभिचारो दोषस्तदा तवापि स स्यादित्याह—

॥ प्रतिषेधाप्रामाण्यञ्चानैकान्तिकत्वात् ॥

अत्र चोऽप्यर्थः । 'अर्थापत्तिर्न प्रमाणमि'त्यस्यापि प्रतिषेधप्रामाण्यमेव, स्वाविषयस्यार्थापत्तेरनत्सत्त्वस्याप्रतिषेधकतयाऽनैकान्तिकत्वादित्यर्थः ।

स्वाविषये व्यभिचारो न दोषायातो न प्रतिषेधाप्रामाण्यमिति चेत्यत्राह—

॥ तत्प्रामाण्ये वा नार्थापत्त्यप्रमाणम् ॥

स्वाविषये व्यभिचारस्यादोषत्वादित्यर्थः ।

[NTĀ. I.O.L. Mss, fol. 135b-136a]

(165) P. 118, l. 14 : This is one of the most elliptical *Nyāya-sūtra*-s, and it has ben interpreted in various ways. It is interesting to note how the constituent words like अभाव, लक्षित, लक्षण, अलक्षित and प्रमेय receive different interpretations from different commentators :

(*a*) Vātsyāyana, Uddyotakara and Vācaspati Miśra I explain this *sūtra* as follows :

(*i*) अथायमर्थबहुत्वादर्थैकदेश उदाह्रियते—

॥ लक्षितेष्वलक्षणलक्षितत्वादलक्षितानां तत्प्रमेयसिद्धेः ॥

तस्याभावस्य सिध्यति प्रमेयम् । कथम् ? लक्षितेषु वासःसु अनुपादेयेषु उपादेयानामलक्षितानामलक्षणलक्षितत्वाद् लक्षणाभावेन लक्षितत्वा-दिति । उभयसविधावलक्षितानि वासांस्यानयेति प्रयुक्तो येषु वासःसु

लक्षणानि न भवन्ति तानि लक्षणाभावेन प्रतिपद्यते, प्रतिपद्य चाऽऽनयति, प्रतिपत्तिहेतुश्च प्रमाणमिति । [NB, pp. 583-5844].

(*ii*) तत्रानेकधा भिन्नस्याभावप्रपञ्चस्योदाहरणार्थं सूत्रम्—

॥ लक्षितेष्वलक्षणलक्षितत्वादलक्षितानां तत्प्रमेयसिद्धेः ॥

अलक्षितानि वासांस्यानयेति प्रयुक्तः उभयसन्निधौ येषु वासःसु लक्षणानि न पश्यति तानि लक्षणाभावेनैव प्रतिपद्यते, प्रेषणसम्प्रतिपत्त्योरेकविषयत्वात्, प्रतिपद्य चाऽऽनयति, प्रतिपत्तिहेतुश्च प्रमाणम् ।

[NV, p. 584].

(*iii*) लक्षि—द्धेः ॥ प्रतिपद्य चानयतीति लक्षणाभावेन विशेषेनावच्छिन्नान्यानेतव्यत्वेन प्रतिपद्याऽऽनयति । एतदुक्तं भवति—लक्षणाभावज्ञानं विशिष्टे वाससि प्रत्ययं जनयत् साधकतमत्वात् प्रमाणं भवति । [NVTT, p. 584].

Bhaṭṭa Vāgīśvara also follows this line of interpretation.

[NTD, p. 51.]

(*b*) Vācaspati Miśra II offers the following interpretation in his *Nyāyatattvāloka* :

सिद्धान्तसूत्रम्—

॥ लक्षितेष्वलक्षणलक्षितत्वादलक्षितानां तत्प्रमेयसिद्धिः ॥

तस्याभावज्ञानस्य प्रमाणप्रमेयं विषयोऽभावस्तस्य सिद्धिः, तस्याभावस्य प्रमेयत्वसिद्धिरिति भावप्रधानो निर्देशः । कुतः ? लक्षितेषु कृतचिह्नेषु वस्तुष्वनुपादेयेषु मध्ये अलक्षितानामकृतचिह्नानामुपादेयानामलक्षणलक्षितत्वात् चिह्नाभावपरिचायितत्वात् । उभयसन्निधा'वलक्षितानि वस्तून्यानये'ति प्रयुक्तो न येषु वस्तुषु लक्षणानि पश्यति तानि लक्षणाभावेन प्रतिपद्यानयतीति लक्षणाभावज्ञानमितरव्यवच्छिन्नवस्तुप्रामाणिकम्, अतो लोकव्यवहारसिद्धोऽभावः । न च कल्पनातस्तदुपपत्तिः, भावस्येवाभावस्याप्यर्थक्रियाकारित्वेन वस्तुत्वादित्यर्थः ।

[NTĀ, I.O.L. Mss, fol. 138b-139a]

(*c*) Viśvanātha Pañcāana follows Vācaspati Miśra II so far as the interpretation of the expression तत्प्रमेयसिद्धिः is concerned, but he explains the rest of this *sūtra* in a different manner :

तस्य अभावप्रमाणस्य प्रमेयसिद्धिः, भावप्रधानो निर्देशः। किं तत्-प्रमेयमित्यत्राह—लक्षितेष्विति। लक्षितेषु घटादिषु सत्सु अलक्षि-तानां तत्प्रमेयत्वसिद्धिः। अलक्षितानां कथं प्रमेयत्वमत आह—अलक्षणलक्षितत्वादिति। यद्यप्यभावस्य गुणकर्मादिभिर्लक्षणं न सम्भवति, तथाप्यलक्षणेनैव तल्लक्षितं भवति। 'अनीलमानये'त्युक्ते नीलाभावो हि इतरव्यावर्त्तकतया लक्षणम्, अतोऽभावो नाप्रामाणिक इति भावः। [NSV, p. 584].

(*d*) Rādhāmohana Gosvāmi Bhaṭṭācārya seems to follow the first interpretation of Rāmabhadra, though he expands it considerably ; and while he mentions the interpretation of Viśvanātha, he does not seem to favour it :

लक्षितेषु इन्द्रियसन्निकृष्टेषु भूतलादिषु अलक्षितानामसन्निकृष्टानां घटादीनामलक्षणलक्षितत्वादनुपलब्ध्या तत्प्रमेयसिद्धिः अभावात्मक-प्रमेयसिद्धिरित्यर्थः। इन्द्रियसंयोगरूपसन्निकर्षेण यथा भूतलादीनां प्रमेयत्वं तथाऽभावस्यापीन्द्रियसंयुक्तविशेषणतया प्रमेयत्वम्, अन्यथा भूतलादि प्रमेयं न स्यात्। न च संवादिप्रवृत्तिजनकतया भूतलादिग्रहाणां प्रामाण्यम्, अभावग्रहस्य च कुतः प्रमात्वमिति वाच्यम्। तस्यापि 'घटो नास्ती'ति व्यवहारजनकत्वात्...... एवमसतः सम्बन्धाभावेन ज्ञानविषयत्वानङ्गीकारादिति।

केचित्तु—तस्याभावप्रमाणस्य प्रमेयसिद्धिः, भावप्रधानो निर्देशः। किं तत्प्रमेयमित्यत्राह—लक्षितेषु घटादिषु अलक्षितानां तत्प्रमेयत्व-सिद्धिः। कथं प्रमेयत्वम्? अलक्षणलक्षितत्वात्। यद्यप्यभावस्य गुणकर्मादिभिर्लक्षणं न सम्भवति, तथाप्यलक्षणेनैव तल्लक्षितं भवति।

'अनीलमानये'त्युक्ते नीलाभावो हि इतरव्यावर्त्तकतया लक्षणमतोऽभाव नाप्रामाणिक इति भाव इत्याहुः ।

[NSVV, I.O.L. pp. 133-134]

(166) P. 118, l. 19: Bhaṭṭa Vāgīśvara, has split up this sentence into two parts, viz. असत्यर्थे नाभाव इति चेत् and नान्यलक्षणोपपत्तेः, and treated each of these parts as a *sūtra*. [NTD, p. 51.]

(*a*) This *sūtra* has also bcen interpreted in different ways. According to Vātsyāyana, Uddyotakara, Vācaspati Miśra I and Bhaṭṭa Vāgīśvara, the opponents try to reject *pradhvaṁsābhāva* and claim to refute *abhāva*, being under the wrong impression that this is the only kind of *abhāva*. The answer consists in pointing out that *anyonyābhava* is also a type of *abhāva*, and the arguments against *pradhvaṁsābhāva* are not applicable to *anyonyābhāva*. For the sake of brevity, we quote here the comments of Bhaṭṭa Vāgīśvara :

प्रध्वंसाभाव इति मन्वानश्चोदयति—

॥ असत्यर्थे नाभाव इति चेत् ॥

यत्र यस्य भावस्तत्र तस्याभावेन भवितव्यम् । न चालक्षितेषु वासस्सु लक्षणानि सन्ति, येन तत्र तेषामभाव उपपद्यते । तस्मादलक्षितेषु वासस्सु लक्षणात्मके असति न तदभावः शक्यः प्रतिपादयितुमिति सूत्रार्थ ॥

परिहरति—

॥ नान्यलक्षणोपपत्तेः ॥

न प्रध्वंसाभाव एवाभावः, किन्त्वितरेतराभावोऽपि । ततश्चान्यलक्षणोपपत्तेरन्येषु वासस्स्वेव लक्षणानामुपपत्तेः । अन्यत्रालक्षितेषु वासस्सु तेषां लक्षितानामितरेतराभावस्योपपत्तेः विद्यमानत्वेन प्रध्वंसाभावमात्रालम्बनेन यच्चोदितं तन्नास्तीति सूत्रार्थः ॥

[NTD, p. 51]

(*b*) For Vācaspati Miśra II, the opponent tries to show that neither *prāgabhāva* nor *atyantābhāva* can be real :

आक्षेपसमाधानार्थं सूत्रम्—

॥ असत्यर्थे नाभाव इति चेन्नान्यलक्षणोपपत्तेः ॥

प्रतियोग्युत्पत्तेः पूर्वमसति प्रतियोगिनि नाभावः न तज्ज्ञानम्, प्रतियोगिग्रहं विनाऽभावस्याज्ञानात्, सति च प्रतियोगिनि तद्ग्रहे तदभावो गृह्यते, यथा ध्वंसः; अलक्षितत्वश्च न प्रागभावः, तस्य भविष्यद्व्यक्तिविशेषप्रतियोगिकतया तस्य च भानाभावाज्ज्ञातुमशक्यत्वात्; नाप्यत्यन्ताभावः, 'इह घटो नास्ती'त्यत्रेह यो घटः स निषिध्यते, स चासन्, न चासत्प्रतियोगिकोऽभावो भवति, न चान्यत्र स्थितस्यैवायमभावः, अन्यत्र स्थितस्येह बुद्धयविषयत्वादित्याक्षेपार्थः। अन्येषां यानि लक्षणानि तत एवात्रोपपत्तिर्निषेधनिरूपणस्य यतोऽतो नाक्षेप इति समाधानार्थः।

[NTĀ, I.O.L. Mss. fol. 139a.]

(*c*) Viśvanātha Pañcānana explains this *sūtra* in a slightly different manner :

असति प्रतियोगिन्यभावो वक्तुं न शक्यते। सति च प्रतियोगिनि कथं तदभाव इति चेत्? न, अन्यत्र लक्षणेन सत्त्वेन अर्थात् प्रतियोगिन उपपत्तेः अभावोपपत्तेः। न हि तत्रैव प्रतियोगिनः सत्त्वमपेक्षितम्।

[NSV, p. 585.]

(*d*) Rādhāmohana Gosvāmi Bhaṭṭācārya explain this *sūtra* in a novel manner :

असति भूतलादावविद्यमानेऽसन्निकृष्ट इति यावत्। अर्थे प्रतियोगिनि। नाभावोऽभावग्रहो न वक्तव्यो 'ने'त्याकारकप्रत्यक्षानङ्गीकारात्। प्रतियोगिसत्त्वे च तत्र भूतलादौ नास्त्यभावो विरोधादित्यलीकघटाभाव एव प्रतीतिविषय इति चेन्न, अन्यलक्षणोपपत्तेः लौकिकसन्निकर्षातिरिक्तेन ज्ञानसन्निकर्षेण तत्रास्थितस्यापि घटादेरभावे भानोपपत्तेः।

यद् वा—असति (अर्थे) प्रतियोगिनि नाभावः। वक्तुं शक्य इति शेषः। सति च प्रतियोगिनि कथं तदभाव इति चेन्न, अन्यत्र लक्षणेन सत्त्वेन अर्थात् प्रतियोगिन उपपत्तेरभावोपपत्तेरित्यर्थः।

[NSVV, pp. 134-831.]

It may be noted here that Rādhāmohana has mentioned the interpretation of Viśvanātha as an alternative one.

(167) P. 119, l. 4: (*a*) In *Nyāyatattvāloka* of Vācaspati Miśra II, the sentence प्रागुत्पत्तेरभावोपपत्तेः, which is traditionally accepted as NS 2.2,12, is counted as NS 2.2.10; while तत्सिद्धेरलक्षितेष्वहेतुः, which is traditionally treated as NS 2.2.10, is accepted as NS 2.2.12. [See NTĀ, I.O.L. Mss. fol. 140a-141a.] The reasons for this reversal of order are not clear to us. Vācaspati Miśra II is also silent on this point, We can only submit that such a reversal of order is not supported by the available evidence that can be gleaned from *Nyāya-Bhāṣya* and allied literature.

Vācaspati Miśra II provides the following interpretation to the sentence तत्सिद्धेरलक्षितेष्वहेतुः—

लक्षणाभावलक्षितत्वमभावसाधने न हेतुः। कुतः? तत्सिद्धेः तेषां लक्षणानां लक्षितेषु वस्तुषु सिद्धेः विद्यमानत्वात्। नहि यत् क्वापि विद्यते तत् क्वापि नास्ति, व्याघातादित्यर्थः।

[NTĀ, I.O.L. Mss. fol. 141a,]

(*b*) Viśvanātha Pañcānana explains the term अलक्षितेषु in a different manner:

लक्षितेषु लक्षणस्य तत्सिद्धेः व्यावर्त्तकत्वसिद्धेः अलक्षितेषु अहेतुः अहेतुत्वं व्यावृत्त्यहेतुत्वम् अभावस्य लक्षणाभावात्, निःस्वरूपस्य न व्यावर्त्तकत्वमिति भावः। [NSV, p. 586.]

(*c*) Rādhāmohana Gosvāmi Bhaṭṭacārya offers three alternative interpretations:

नन्वभावो यद्यपि प्रामाणिकस्तथापि न तस्य हेतुत्वमित्याशङ्कते—

।। तत्सिद्धेरलक्षितेष्वहेतुः ।।

तत्सिद्धेः तस्याभावस्य सिद्धावपि अलक्षितेषु गुणादिरूपव्यावर्त्तक धर्मशून्येष्वभावेष्वहेतुत्वमिति, भावप्रधाननिर्देशादिति ।

यद् वा—अलक्षितेषु अनुपलब्धेषु प्रतियोगिषु तत्सिद्धेरभाव-सिद्धेरभावोऽहेतुर्न हेतुरित्यर्थः । प्रतियोगिनिरपेक्षेणाभावत्वेनान्वय-व्यतिरेकानुविधानाभावेन तेन कारणत्वाग्रहादभावत्वावच्छिन्नस्य केवलान्वयित्वादिति भावः ।

यद् वा—अलक्षितेषु प्रतियोगिशून्येषु तत्सिद्धेरभावसिद्धेः स न हेतुरित्यर्थः । तथा च प्रतियोगिनः सामानाधिकरण्यसम्बन्धेन व्यायर्त्तकत्वाभावात् । केवलाभावत्वेन न हेतुतासम्भव इति भावः ।

[NSVV, p. 135]

(168) P. 120, l. 11 ; (*a*) According to Vātsyāyana and Uddyotakara, this *sūtra* shows that there are only two kinds of *abhāva*, viz. *prāgabhāva* and *pradhvaṁsābhāva* :

(*i*) अभावद्वैतं खलु भवति—प्राक् चोत्पत्तेरविद्यमानता, उत्पन्नस्य चाऽऽत्मनो हानादविद्यमानता । तत्रालक्षितेषु वासःसु प्रागुत्पत्तेरविद्यमानतालक्षणो लक्षणानामभावो नेतर इति ।

[NB, p. 587.]

(*ii*) ···अभावद्वैतं खलु भवति प्रागुत्पत्तेरविद्यमानता ऊर्ध्वं च विनाशादविद्यमानतेति । तत्र योऽयं विनाशादभावो लक्षणानाम् अलक्षितेषु वासःसु सोऽनुपपन्नो नेतर इति । "असत्यर्थे नाभावः" "तत्सिद्धेरलक्षितेष्वहेतुरिति उभे अप्येते छलसूत्रे । छलस्योक्तमुत्तरं ज्ञात्वाऽज्ञात्वा वाऽसम्बन्धत्वमज्ञानं वेति तस्मादप्रयोज्यं छलमिति ।

[NV, p. 587]

(*b*) In the passages quoted above, no mention is made of *anyonyābhāva* and *atyantābhāva*. This attitude is also reflected in the following passage of *Nyāyamañjarī* of Jayanta Bhaṭṭa :

'तस्मान्नास्ती'ति प्रत्ययगम्योऽभाव इति सिद्धम्। स च द्विविधः। प्रागभावः, प्रध्वंसाभावश्चेति। चतुर्विध इत्यन्ये। इतरेतराभावः, अत्यन्ताभावश्च तौ च द्वाविति। षट्प्रकार इत्यन्ये। अपेक्षाभावः सामर्थ्याभावः, ते च चत्वार इति। तत्र च

प्रागात्मलाभान्नास्तित्वं प्रागभावोऽभिधीयते।
उत्पन्नस्यात्महानन्तु प्रध्वंस इति कथ्यते॥
न प्रागभावादन्ये तु भिद्यते परमार्थतः।
स हि वस्त्वन्तरोपाधिरन्योऽन्याभाव उच्यते॥
स एवावधिशून्यत्वादत्यन्ताभावतां गतः।
अपेक्षाभावता तस्य देशोपाधिनिबन्धना॥
सामर्थ्यं पूर्वसिद्धञ्चेत् प्रध्वंसे तदभावधीः।
नो चेत्तर्हि विशेषोऽस्य दुर्लभः प्रागभावतः॥
उत्पन्नस्य विनाशो वा तदनुत्पाद एव वा।
अभावस्तत्त्वतोऽन्ये तु भेदास्त्वौपाधिका मताः॥

[NM, Vol. I, p. 99]

(*c*) This opinion of Jayanta Bhaṭṭa is not shared by Vacaspati Miśra I, as is evident from the following remark :

अभावद्वैतमिति प्रकृतापेक्षम्, प्रकृतं ध्वंसवादिनं प्रति प्रागभावप्रतिपादनम्। परमार्थतस्तु प्रथममभावे द्वैतं तादात्म्याभावः संसर्गाभावश्चेति। संसर्गाभावोऽपि प्राक्प्रध्वंसात्यन्ताभावभेदेन त्रिधिव इति चतस्रो विधा अभावस्येति। [NVTT, p. 587]

(*d*) The comments of Udayana on this passage are extremely perceptive :

न ह्यन्यत्रावस्थितो भावोऽन्यत्र कदाचिदपि भविष्यतीति। तत्

किमभावद्वयमेवेति नः सिद्धान्तः ? तथा सति बहु विरुध्येतेत्यत आह — अभावद्वैतमिति च प्रकृतापेक्षमिति । केचित् त्वितरेतराभावमत्यन्ताभाव एवेति मन्यन्ते, तन्मतमपाकुर्वाण आह—परमार्थतस्त्विति । इतरेतराभावे हीतरेतरयोस्तादात्म्यं प्रतिषिध्यते । अत्यन्ताभावे तु संसर्गितया भावः प्रतिषिध्यत इति महान् भेद इत्यर्थः ।

[TTP, A.L. Thakur's Press Copy, Chapter II, p. 105.]

In textual note no. 168 (*a*) *ii* quoted above, Uddyotakara has said that both the *sūtra*-s असत्यर्थे नाभावः etc. and तत्सिद्धेरलक्षितेष्वहेतुः are *Chalasutra*-s. Vācaspati's comments in this connection are as follows :

(*e*) "असत्यर्थे नाभावः" "तत्सिद्धेरलक्षितेष्वहेतु"रिति चोभे अप्येते छलसूत्रे इति । यो योऽभावः स सर्वः सत्यर्थे भवति यथा प्रध्वंसः, न च तथा लक्षणाभाव इति सामान्यच्छलम् । "तत्सिद्धे"-रिति तु वाक्छलम्, यानि लक्षणानि भवन्ति कथं तान्येव न भवन्तीति हि तस्यार्थः । [NVTT, p. 587]

Udayana's comments on this are as follows :

(*f*) असत्यर्थे नाभाव इति कतमच्छलमत आह—यो य इति । सत्यर्थे प्रध्वंसाख्योऽभावो भवतीत्यभावसंभविन्यर्थेऽभिहितेऽभावत्वादिति हेतुत्वमारोप्य प्रत्यवस्थानात् सामान्यच्छलमित्यर्थः । द्वितीयस्य वाक्छलत्वं व्युत्पादयति—यानीति । भवन्ति हि कालदेशप्रकारभेदेन क्वचिदभावविरोधीनि, न तु सर्वत्रेति वस्तुस्थितिः । तत्र विरुद्धविषये भवन्तीति विरोधिपदं सञ्चार्य प्रत्यवस्थानाद् वाक्छलत्वमित्यर्थः ।

[TTP, A.L. Thakur's Press Copy, Chapter II, p. 105.]

(*g*) Viśvanātha Pañcānana maintains that the particle च at the end of this *sūtra* indicates the existence of *anyonyābhāva* aud *atyantābhāva* :

प्रमेयसिद्धिरिति मण्डूकप्लुत्याऽनुवर्त्तते। प्रतियोगिन उत्पत्तेः प्राग् अभावस्योपपत्तेरुपलम्भाद् 'घटो भविष्यती'त्यादिप्रागभावविषयकप्रत्यक्षस्य सार्वलौकिकत्वादिति भावः। चकारेण ध्वंसादेरपि प्रत्यक्षसिद्धत्वं समुच्चीयते। [NSV, pp. 587-588]

(*h*) Rādhāmohana Gosvāmı Bhaṭṭācarya also shares this view of Viśvanātha :

चकारेण 'घटो ध्वस्तो' 'घटो ने'त्यादिप्रत्ययेन ध्वंसभेदावपि सिद्धाविति समुच्चीयते। [NSVV, p. 136]

(169) P. 120, l. 15 : According to Vācaspati Miśra II, we may admit here two types of सङ्गति. viz. प्रसङ्ग and उपोद्घात. His comments here are as follows :

एवं चतुष्टयं सर्वप्रमाणसाधारणतया शीघ्रोपस्थितं परीक्ष्य तद्विशेषधर्माणां परीक्षाप्राप्तौ परिणामादीनां वर्णात्मकशब्दविशेषधर्मत्वात् तदपेक्षया शब्दमात्रधर्मत्वेनानित्यत्वस्य शीघ्रोपस्थिततयेदानीं तत्परीक्षाप्रकरणम्। शब्दपरीक्षायां तद्धर्मस्यानित्यत्वस्यापि तत्साहचर्यादुपस्थितस्य शिष्यजिज्ञासितस्योपेक्षाज्ञानानर्हत्वादत्र प्रसङ्गः सङ्गति। "मन्त्रायुर्वेदप्रामाण्यवच्च तत्प्रामाण्यमाप्तप्रामाण्यादि"त्यत्र प्रामाण्यनिर्वाहकतयोक्तस्याप्तोक्तत्वस्य शब्दनित्यत्वेऽसम्भवादुपोद्घातो वा। तत्र शब्दो विषयः, स नित्योऽनित्यो वेति विप्रतिपत्तेः संशयः, प्रयोजनञ्च नित्यतानिरासेन पदवाक्यकौटस्थ्यशङ्कानिरासेनाप्तोक्तत्वसिद्धौ वेदप्रामाण्यसिद्धिः।··· [NTĀ, I.O.L. Mss. fol. 141a-141b.]

Vācaspati Miśra II, while speaking of उपोद्घातसङ्गति, is in all probability following Udayana, whose remarks are as follows :

प्रयोजनं चास्य प्रकरणस्य पदवाक्यकौटस्थ्यशङ्काव्युदासेनाप्रत्यूहमाप्तोक्तत्वसिद्धौ वेदप्रामाण्यसिद्धिः। अन्यथा ह्यपौरुषेयत्वे तद्दोषनिवृत्तौ यथा प्रामाण्यं तदा तदर्थोपलम्भप्रतिपिपादयिषालक्षणगुण-

निवृत्तावप्रामाण्यमप्याशङ्केत, अनेवंमूलानां वाक्यानां लोकेऽप्रामाण्यदर्शनात्, अलौकिकत्वेन तदतिक्रमे समस्तधर्मातिक्रमप्रसङ्गात्।

[TTP, A.L. Thakur's Press Copy, Ch. II, p. 106.]

(170) P. 120, l. 16 : Before this *sūtra*, *Nyāyatātparyadīpikā* of Bhaṭṭa Vāgīśvara reads the sentence विप्रतिपत्तेः संशयः as the opening *sūtra* of this *prakaraṇa*, and explains it as follows :

व्याहतार्थप्रवादो विप्रतिपत्तिः। तस्मात् संशयो भवति। तथा हि—एके तावद् ब्रुवते नित्यः शब्दोऽभिव्यक्तिधर्मेति। अपरे ब्रुवते अनित्य शब्दः उत्पत्तिधर्मेति। तदेवं व्याहतार्थप्रवादविषयं शब्दमुपलभमानस्य किमत्र तत्त्वमिति संशयो भवतीति सूत्रार्थः।

[NTD, pp. 52-53]

The words विप्रतिपत्तेः संशयः actually from a part of the sentence विमर्शहेत्वनुयोगे च विप्रतिपत्तेः संशयः, which occurs in *Nyāyabhāṣya* on NS 2.2.13 [See NB, p. 594.]. It seems to us that Bhaṭṭa Vāgīśvara expected the *sabdānityatāprakaraṇa* to start with a *saṁśayasūtra*, as is found in many other *prakaraṇa*-s, and that the words विप्रतिपत्तेः संशयः seemed to serve this purpose.

(171) P. 120, ll. 17-18 : (*a*) Vācaspati Miśra II justifies the employment of more than one हेतु-s in a different manner, and his interpretation of ऐन्द्रियकत्व is also different :

आदीयतेऽस्मादित्यादिः कारणं तदवत्त्वात् प्रागभावप्रतियोगित्वादुत्पत्तिमत्त्वाद्वा शब्दोऽनित्यः। न च हेत्वसिद्धिः। ऐन्द्रियकत्वात् बहिरिन्द्रियवेद्यत्वात्, जातिमत्त्वे सतीति शेषः। स्वातन्त्र्येणाप्यस्य हेतुत्वसूचनाय स्वतन्त्रहेतुसमभिव्याहारः।...

[NTĀ, I.O.L. Mss. fol. 142a.]

Thus, for Vācaspati Miśra II, जातिमत्त्व is a constituent of ऐन्द्रियकत्व, though Rāmabhadra does not aecept it to be so.

(*b*) In this dispute, Viśvanātha Pañcānana seems to favour the view of Vācaspati Miśra II, though he adds another clause (viz. लौकिकत्व) to the explication of ऐन्द्रियकत्व :

…आदिमत्त्वात् सकारणकत्वात् । ननु न सकारणकत्वं कण्ठताल्वाद्यभिघातादेर्व्यञ्जकत्वेनाप्युपपत्तेरत आह—ऐन्द्रियकत्वादिति । सामान्यवत्त्वे सति बहिरिन्द्रियजन्यलौकिकप्रत्यक्षविषयत्वादित्यर्थः ।…

[NSV, pp. 597-598]

It seems that the qualifying clause जातिमत्त्वे सति is essential, since otherwise entities like जाति and समवाय which are devoid of जाति, and are also objects of projection caused by external sense-organs, would constitute counter-examples to the argument proposed in this *sūtra*. Viśvanātha has noted another interpretation, which omits the clause जातिमत्त्वे सति, and substitutes विषयत्व by विशेष्यत्व :

परे तु—ऐन्द्रियकत्वं लौकिकप्रत्यक्षविशेष्यत्वम्, सामान्यसमवाययोस्तु न तथात्वम्, जातित्वादिना विशेष्यत्वसम्भवेऽपि जातित्वादेरप्रत्यक्षत्वान्न व्यभिचारः । मनस इन्द्रियत्वाभावाच्च नाऽऽत्मनि व्यभिचारः, आत्मन ऐन्द्रियकत्वाभावादित्याहुः । [NSV, pp. 603-605]

(*c*) Rādhāmohana Gosvāmi Bhaṭṭācārya, like Rāmabhadra, omits the clause सामान्यवत्त्वे सति from the explication of ऐन्द्रियकत्व, though he follows Viśvanātha in other respects :

…आदिमत्त्वात् कादाचित्कत्वात् । कण्ठताल्वाद्यभिघातव्यङ्ग्यत्वेनैव कादाचित्कत्वव्यवहारोपपत्तेर्न वास्तविकं तदित्यत आह—ऐन्द्रियकत्वादिति ।

यद् वा—आदिमत्त्वात् सकारणकत्वात् । ननु शब्दो न सकारणकः, कण्ठताल्वाद्यभिघातादेर्व्यञ्जकत्वेनाप्युपपत्तेरित्यत आह—ऐन्द्रियकत्वादिति । बहिरिन्द्रियजन्यलौकिकप्रत्यक्षविषयत्वादित्यर्थः । आत्मादिवारणाय बहिःपदम् । मनसोऽनिन्द्रियत्वमते तन्नोपादेयमिति ।

[NSVV, p. 137]

(172) P. 120, l. 18- P. 121, l. 3 : Rāmabhadra's interpretation of the term कृतकवदुपचारात् is different from that provided in earlier works like *Nyāyabhāṣya*, *Nyāyavārttika* and *Nyāyavārttikatātparyaṭīka*, as he himself points out in P. 128, ll. 6-7. Subsequent commentators like Viśvanātha and Rādhāmohana have adopted the interpretation of Rāmabhadra, as can be seen from the following passages :

(*a*) अप्रयोजकत्वमाशङ्क्याऽऽह—कृतकेति । कृतके घटादौ यथा उपचारो ज्ञानं तथैव कार्यत्वप्रकारकप्रत्यक्षविषयत्वादित्यर्थः । तथा च कार्यत्वेनानाहार्यलौकिकप्रत्यक्षबलादनित्यत्वमेव सिध्यति ।

केचित्तु—उपचाराद् विनाशित्वात् कृतकवदिति दृष्टान्त इति ।

परे तु—कृतकवदुपचारात् कृतकसुखदुःखादिवद् व्यवहारात् । यथा हि सुखादौ तीव्रमन्दादिव्यवहारः शब्देऽप्येवम्, न तु नित्ये तथेत्याहुः ।

[NSV, pp. 605-607]

Here, the first two interpretations have been mentioned by Rāmabhadra, while the last one may be tracted to *Nyāyabhāṣya*.

(*b*) हेत्वन्तरमाह—कृतकवदुपचारात् । कृतको जन्यो घटादिः, तद्वत् प्रतीतेरित्यर्थः । तथा 'चोत्पन्नो घट' इत्यादिवत् 'उत्पन्नो गकारः' इति प्रतीतेः । कृतकवदिति दृष्टान्तः, उत्पन्नत्वेन प्रतीतिरेव हेतुरिति । यद् वा—घटादौ यथा ह्रस्वदीर्घादिभेदस्तथा शब्दे तारमन्दादिभेद इति, स च निमित्तवायुसंयोगवैलक्षण्येनेति न शब्दस्य नित्यत्वसम्भवः । [NSVV, p. 137]

Here, the interpretation provided in *Nyāyabhāṣya* has not been mentioned at all.

(*c*) Vācaspati Miśra II also provides an interpretation that comes very close to that of Rāmabhadra :

...कृतकवदुपचारादिति । कृतकत्वं व्याप्यसर्वधर्मपरम् । उपचारात् ग्रहणात् ।... [NTĀ, I.O.L. Mss. fol. 143b.]

(173) P. 121, l. 12 : In the printed text of *Nyāyatātparya-dīpika*, this *sūtra* is read as तत्त्वभाक्तत्वान्न तत्त्वस्य विघातात्. This is rather curious, because the *pratīka*-s found in the interpretation provided thereafter tally exactly with the traditional reading of this *sūtra* :

···तत्त्वभाक्तयोः पारमार्थिकापारमार्थिकयोः नानात्वस्य भेदस्य विभागात् विभक्तत्वात् । नाप्यैन्द्रियकत्वस्य नित्यसामान्ये समीक्षणाद् व्यभिचारः । किं कारणम् । तेन शब्दानित्यत्वसाधनात् ।

[NTD, p. 55]

(174) P. 121, ll. 19-21 : Rāmabhadra's interpretation of the term सन्तान is different from that provided in *Nyāyabhāṣya*, which comments : इन्द्रियप्रत्यासत्तिग्राह्यत्वात् सन्तानानुमानं तेनानित्यत्वमिति । [NB, p. 609] For Vātsyāyana, सन्तान means a series, whereas for Rāmabhadra, सन्तान stands for a universal property. Rāmabhadra is not, however, the first commentator to deviate from the earlier interpretation. Thus, Vācaspati Miśra II, while commenting on the *sūtra* सन्तानानुमानविशेषणात्, remarks as follows :

अव्यभिचार इत्यनुषज्यते । जातिमत्त्वविशेषणादव्यभिचार इत्यर्थः । ऐन्द्रियकत्वं हीन्द्रियप्रत्यासत्तिग्राह्यत्वं शब्दानित्यत्वपक्षे न सम्भवतीति परिशेषाच्छब्दसन्तानसिद्धावेव तत्सिद्धिरिति भावः ।

[NTĀ, I.O.L. Mss. fol. 145b-146a.]

Viśvanātha and Rādhāmohana also maintain that the word सन्तान means a universal property. [See NSV, p. 609 and NSVV, p. 139.]

(175) P. 122, l. 3 : Udayana has raised an interesting question about this *sūtra* and the preceding one :

ननु कारणद्रव्यस्य प्रदेशशब्देनाभिधानात् इति सूत्रमाकाशादेर्निष्प्रदेशत्वमर्थात् प्रतिपादयति । तत् कथमस्मिन्नर्थे सूत्रं नास्तीति···यद्यप्यस्मिन्नर्थे सन्तानानुमानविशेषणात् इति सूत्रमस्त्येव, नापि यत् तदनुमानं

तन्न साक्षात् सूत्रितमित्यर्थः। ननु सन्तानानुमानविशेषणात्—इति, कारणद्रव्यस्य प्रदेशशब्देनाभिधानात्—इति च सूत्रं न तु भाष्यमिति कुतो निर्णयः? सूत्रत्वे हि प्रश्नभाष्यं मन्दमेव। भाष्यत्वे त्वस्मिन्नर्थे सूत्रं कुतो नास्तीति प्रश्नः शोभते। तथा च पूर्वोत्तरपक्षग्रन्थव्याख्यावक्रताऽपि न स्यात्। न, नित्येष्वपि व्यभिचार इति प्रकृतमिति पूर्वसूत्रप्रतीकानुवृत्त्या भाष्यकारेणैव व्याख्यानत्वात्। अर्थतोऽधिगतेत्युत्तरवार्त्तिकदर्शनाच्च। न हि भाष्यादर्थतोऽधिगतमाकाशादेर्निष्प्रदेशत्वं शब्दसन्तानानुमानं चेति···तस्मात् सूत्रत्वमनयोर्व्यवस्थितम्।

[TTP, A.L. Thakur's Press Copy, Ch. II, pp. 111-115.]

In some editions of *Nyāyavārttika* and also in *Nyāyasūtravṛtti*, this *sūtra* is read as कारणद्रव्यस्य प्रदेशशब्देनाभिधानात् नित्येष्वप्यव्यभिचार इति। Rādhāmohana adopts the reading कारणद्रव्यस्य विशेषशब्देनाभिधानात् in his *Nyāyasūtravivaraṇa*. [See NV, p. 609, fn. 2; NSV, p. 610; NSVV, p. 619.]

(176) P. 122, ll. 6-7: For each an interpretation and its defence, see NB, pp. 600-606, NV. pp. 602-607, NVTT, pp. 600-607; NTD, p. 54.

(177) P. 122, l. 22: In the manuscript of *Nyāyatattvāloka*, This *sūtra* is read as प्रागुच्चारणादनुपलब्धेरावरणाद्यनुपलब्धेः [NTĀ, I.O.L. Mss. fol. 147a]. But the च that is missing here is nevertheless explained in the commentary:

···उच्चारणात् प्राक् नास्ति शब्दः। कुतः। अनुपलब्धेः योग्यस्य सतोऽनुपलम्भात्; न ह्यवदधानोऽविकलेन्द्रियः प्राप्तं शब्दं न गृह्णातीति सम्भवति। एवं प्रागभावसिद्धिवत्तदनन्तरमनुपलम्भात् ध्वंसोऽपि सिध्यति, योग्यानुपलब्धिलिङ्गकादनुमानादप्येतन्न सिध्यतीति चकारार्थः।··· [NTĀ, I.O.L. Mss. fol. 147a.]

t thus seems that the omission of च in this manuscript

is a case of scribal error. However, the editor of *Nyāyasūtravivaraṇa* states that this च is omitted in the manuscript of this work as well. [NSVV, p. 140, fn. 1.]

(178) P. 123, l. 6: *Nyāyasūtravivaraṇa* of Rādhāmohana reads this *sūtra* as तदनुपलब्धेरनुपलम्भादावरणोपलब्धिः, and explains it accordiugly. [NSVV, p. 141.]

(179) P. 123, l. 12: The traditional reading of this *sūtra* is अनुपलम्भादप्यनुपलब्धिसद्भावान्नाऽऽवरणानुपपत्तिरुपलम्भात्।

(180) P. 124, l. 10: (*a*) This *sūtra* has not been mentioned or explained in *Nyāyatattvāloka* of Vācaspati Miśra II, where the *sūtra* न कर्मानित्यत्वात् is followed by the *sūtra* सम्प्रदानात्.

[NTĀ, I.O.L. Mss. fol. 148b-149a.]

Bhaṭṭa Vāgīśvara reads this *sūtra* as नाणोर्नित्यत्वात्। His comments on it are as follows :

अस्पर्शवतः परमाणोर्नित्यत्वात् कृतकत्वानित्यत्ववदस्पर्शनित्यत्वयोर्न समव्याप्तिरस्तीति सूत्रार्थः। [NTD, p. 57

(*c*) Other commentators have not interpreted this *sūtra* in the manner adopted by Rāmabhadra, and there is no unanimity among them either :

(*i*) Vātsyāyana makes the cryptic remark—

उभयस्मिन्नुदाहरणे व्यभिचारान्न हेतुः। [NB, p. 620]

Uddyotakara does not explain this sentence.

(*ii*) Vācaspati Miśra I observes—

अस्पर्शेन कर्मणैवोभयतो व्यभिचारे लब्धे नित्येनाणुना व्यभिचारोद्भावनं कृतकत्वानित्यत्ववत् समव्याप्तिकत्वनिराकरणार्थं द्रष्टव्यम्। [NVTT, p. 620]

(*iii*) Udayana's comments on this are as follows :

उभयत इत्यन्वयतो व्यतिरेकतश्चेत्यर्थः। किमर्थं तर्हि परमाणुनित्यतोपन्यासः। न हि स्पर्शवतो नित्यत्वम्, नित्यस्य वा स्पर्शवत्ता

प्रकृतोपयोगिनीत्यत आह—समव्यापिकत्वनिरासार्थमिति। तस्य च प्रयोजनमनैकान्तिकस्यासाधकत्वे दृष्टान्ताविष्करणमिति। तेनैव सिध्यति स्पर्शरहितत्वस्यानैकान्तिकीकरणेऽपि वैयात्याद् यदि ब्रूयादनैकान्तिकोऽपि साधयिष्यति, को दोष इति, तत्रेदमुपतिष्ठते। यद्येवं स्यान्नित्यत्वमपि स्पर्शरहितत्वं साधयेत्, तच्च तवानिष्टमिति भावः।

[TTP, A.L. Thakur's Press Copy, Ch. II, p. 122.]

(*iv*) Viśvanatha's comments are—

अनैकान्तिकस्य साधकत्वेऽणोः परमाणोर्नित्यत्वं न स्यात्, रूपवत्त्वादिना तत्रानित्यत्वानुमानापत्तेरित्यर्थः। [NSV, p. 621]

(*v*) Rādhāmohana offers the following interpretation—

नित्यद्रव्यमात्रवृत्तित्वमपि न नित्यत्वसाधकम्, अणोर्नित्यत्वात्। तथा चाणुक्रियायां व्यभिचार इति भावः। [NSVV, p. 142]

(181) P. 124, l. 15: Rādhāmohana reads this *sūtra* as सम्प्रदानत्वात्.

(182) P. 125, l. 5: For the comments of Udayana, see Textual Note no. 178.

(183) P. 125, l. 12 : This has not been counted as a *sūtra* in *Nyāyatātparyadīpika* of Bhaṭṭa Vāgisvara, who reads the *sūtra* अभ्यासात् immediately after the *sūtra* अध्यापनादप्रतिषेधः [NTD, p. 57.] The editor of *Nyāyasūtravivaraṇa* also notes that some persons do not regard this sentence as a *sūtra*—

केचिदाधनिकनैयायिकम्मन्या अस्य सूत्रत्वं न मन्यन्ते।

[NSVV, fn. 1]

It is not known for certain as to who is the target of this caustic remark.

(184) P. 125, l. 17- P. 126, l. 3 : In this connection, see NB, pp. 621-623 ; NV, pp. 621-623, NVTT, pp. 621-623.

(185) P. 126, ll. 4-9: (*a*) Udayana's comments are as follows:

अथ परिहारसूत्रम्—

"तदन्तरालानुपलब्धेरहेतु"रिति ।

बाधोद्भावनं चैतत् । योग्यानुपलब्धेर्वावस्थानमन्तराले बाधितमित्यर्थ इति स्वरसतः प्रतिभाति । तच्चायुक्तम्, उत्तरसूत्रावतारविरोधात् । अध्यापनादप्रतिषेध इति हि तत् । न चानेनान्तरालानुपलब्धिः परिह्रियते । न चायोग्यत्वं तत्र तस्य ख्याप्यते । तथा सति सम्प्रदानत्वस्य स्वयमेवासिद्धत्वमुद्भावयेदिति विपरीतापत्तिः स्यात् । न चाध्यापनादिति हेत्वन्तरमेव प्रतिषेध इति, पूर्वोपक्रान्तप्रतिषेधप्रत्यवस्कन्दनात् । तस्मात्—

तदन्तरालानुपलब्धेरहेतुः

इति फलनिषेधमुखेन हेतोरसिद्धिरियमुद्भाव्यते । तथा च विभक्तिव्यत्ययेन सुगमेतत् सूत्रम्—अहेतोस्तदन्तरालानुपलब्धिरिति । न ह्याचार्येण स्वसत्त्वपरिहारपूर्वकं शब्दस्यान्तेवासिसत्त्वमापद्यत इत्यस्ति । अन्यादृशं तु सम्प्रदानशब्दार्थं न पश्याम इति । तदुक्तं भाष्यकृता— "न तयोरन्तरालेऽवस्थानमस्य केनचिल्लिङ्गेनोपलभ्यत" इत्यादि सुगमम् ।

[TTP on NS II. ii. 26, A.L. Thakur's Press Copy, p. 124.]

(*b*) Vācaspati Miśra II makes a similar observation in his *Nyāyatattvāloka*, though he does not refer to Udayana:

॥ तदन्तरालानुपलब्धेरहेतुः ॥

बाधोद्भावनपरमेतत् । योग्यानुपलब्ध्यैवावस्थानमन्तराले बाधितमित्यापाततोऽर्थः, स चायुक्तः, उत्तरसूत्रविरोधात्, अध्यापनादप्रतिषेध इति हि तत्, न चानेनान्तरालानुपलब्धिः परिह्रियते, न चायोग्यत्वं तस्य ख्याप्यते, तथा सति सम्प्रदानत्वस्य स्वयमेवासिद्धत्वमुद्भावयेत्,

न ह्ययोग्यं सम्प्रदीयत इति विपरीतापत्तिः (स्यात्)। न चाध्यापनादिति हेत्वन्तरमेवं तत्प्रतिषेध इति, पूर्वोपक्रान्तप्रतिषेधप्रत्यवस्कन्दनात्। तस्मात् तदन्तरालानुपलब्धेरहेतुरिति सम्प्रदीयमानत्वस्य स्वत्वफलस्य निषेधमुखेन सम्प्रदीयमानत्वस्य हेतोरसिद्धिरियमुद्भाव्यते। तथा च विभक्तिव्यत्ययेन सुगममेतत् सूत्रम्।

तथा हि—अहेतोः हेतोः कारणस्य सत्त्वस्याभावात् तदन्तरालानुपलब्धिः सम्प्रदानत्वस्यावकाशाभाव इत्यसिद्धः प्रदीयमानत्वं हेतुः।

[NTĀ, I.O.L. Mss. fol. 149a.]

This seems almost like a case of plagiarism !

(*c*) Viśvanātha and Rādhāmohana also refer to this interpretation of Udayana. [See NSV, p. 622 and NSVV, p. 143.]

(186) P. 126, l. 18 : Such a variant reading is indeed found in *Nyāyatattvāloka* of Vācaspati Miśra II :

सिद्धान्तसूत्रम्—

॥ नान्यत्वेऽप्यभ्यासोपपत्तेः ॥

अभ्यासो ह्येकस्मिन् क्रमिकानेकक्रियासम्बन्धः एकजातीये वा। तत्राद्यो यदि हेतूकृतस्तर्ह्यन्यतरासिद्धिः, यद्यन्त्यस्तदा विरोधः, यद्यविशिष्टस्तदाऽनेकान्तः, 'द्विस्त्रि'रित्यादौ नृत्येऽस्थिरेऽप्यभ्यासदर्शनादित्यन्यत्वेऽप्यभ्यासोपपत्तेः नाभ्यासः स्थैर्यसाधकमित्यर्थः।

[NTĀ, I.O.L. Mss. fol. 149b.]

(187) P. 128, l. 18 : Before this, another sentence विनाशकारणानुपलब्धेश्चावस्थाने तन्नित्यत्वप्रसङ्गः has been counted as a *sūtra* in *Nyāyabhaṣya*, *Nyāyavārttika*, *Nyāyavārttikatātparyaṭīkā* and *Nyāyatātparyadīpikā*. [See NB, p. 635 ; NV, p. 635, NVTT, p. 635 ; NTD, p. 59.] This is not, however, counted as a *sūtra* in *Nyāyatattvāloka*, *Nyāyasūtravṛtti* and *Nyāyasūtravivarana*—in fact, they are completely silent about it. [See NTĀ, I.O.L. Mss. fol. 150a ; NSV, p. 635 ; NSVV, p. 148.] The editors

of the Metropolitan edition maintain that the mere fact that Viśvanātha does not explain this sentence does not prove that he docs not consider it as a *sūtra*. The Chowkhamba edition of NSV does not contain this *sūtra*. Mahāmahopādhyāya Phaṇibhūsaṇa Tarkvāgīśa also maintains that Viśvanātha and some others do not consider this sentence as a *sūtra*. However, on this basis of *Nyāyasūcinibandha*, he has accepted this disputed sentence as a *sūtra*. He has also reminded the readers that in the third Adhyāya of *Nyāyadarśana*, too, the sentence विनाशकारणानुपलब्धेश्चावस्थाने तन्नित्यत्वप्रसङ्गः features as NS 3.2.23. [See *Nyāyadarśana* edited by Tarkavāgīśa, Vol. III, p. 456.] Rāmabhadra, as one can see, agrees with Vācaspati Miśra II in not counting this sentence as a *sūtra*.

(188) P. 129 ; l. 5—p. 131, l. 5 : (*a*) In this connection, see NB, pp. t33-t38 ; NV, pp. 633-638 ; NVTT, pp. 634-638.

(*b*) The following comments in *Nyāyatattvāloka* of Vācaspati Miśra II may also be of some interest :

घण्टायामामभिहन्यमानायां तारस्तारतरो मन्दो मन्दतर शब्दोऽनुभूयते, तत् व्यञ्जकतारतभ्याद्वा, उत्पादकतारतभ्याद्वा । नाद्यः, यद्व्यञ्जकं तद् घण्टास्थमन्यवृत्ति वा, तदप्येकं सन्तानवृत्ति वा । यदि घण्टास्थमेकम्, श्रुतिभेदो न स्यात्, अतएव घण्टास्थं सन्तानवृत्त्येकं रूपमिति निरस्तम्, कथञ्च घण्टास्थं सत् श्रोत्रे शब्दमभिव्यञ्जयेत्, असम्बन्धात् । अन्यवृत्तित्वे चैकघण्टावत् सन्निहितघण्टान्तरेऽपि शब्दमभिव्यञ्जयेत्, प्राप्त्यविशेषात् । द्वितीयस्तु स्यात्, तथाहि—अनित्यत्वे घण्टास्थस्य कारणस्य भेदात् तारतारतरतारतमादिभेदो युक्तः, कार्यभेदे कारणभेदस्य हेतुत्वात्, घण्टास्थेनैवाभिघातेन शब्दोत्पत्तौ सन्तानवृत्त्या श्रोत्रेऽपि शब्दोत्पत्तेः । न च युगपदेव तारादिशब्दोत्पत्तिः, कार्यवैजात्यात् कल्पितानां कारणानां क्रमिकत्वात् ; तद् यथा—स्पर्शवद्वेगवत्पाण्यादिसंयोगो वायौ क्रियामारभते, ततश्च घण्टायां कर्म, तदुत्तरक्षणे कर्मवद्घण्टाकाशसंयोगाच्छब्दः, घण्टापूर्वदेशविभागः घण्टाकर्मणा च वेगोत्पत्तिः, ततो घण्टावेगापेक्षस्तत एव घण्टाभ्यन्तरवायु-

संयोगो वायौ क्रियामारभते, तदैव घण्टावायुसंयोगः, ततो घण्टाकर्मणा वायुघण्टासंयोगः, ततौ वेगवद्वायुसंयोगाद्घण्टायां पुनः कर्म घण्टाभिघाताच्छब्दः, घण्टाविभागः घण्टावायुसंयोगः वेगघण्टाभिघातात् (?) शब्दः, ततो वेगवद्घण्टाभिघातात् वायौ क्रिया घण्टावायुसंयोगः वायुविभागः वायुवेग इत्येवं संस्कारतारतम्यात् कारणभेदाच्छब्दसन्तानभेदः। संस्कारप्रवाहेऽन्त्यस्यातिमान्द्यान्महाभूतसंक्षोभणशक्तेरभावान्न वायुप्रभृस्ततः न क्रियोत्पत्तिरिति तज्जन्योत्तरसंयोगात् संस्कारनाशः। नन्वनुपलम्भात् संस्कारो नास्त्येवेत्यत्र सूत्रम्—

॥ पाणिनिमित्तप्रश्लेपाच्छब्दाभावे नानुपलब्धिः ॥

संस्कारस्येति शेषः। पाणिनिमित्तस्य प्रश्लेपात् घण्टायां संयोगात् शब्दाभावो यतोऽतः पाणिसंयोगात् घण्टास्थः संस्कारो निवर्तते, ततः कारणाभावात् शब्दान्तरं नोत्पद्यत इति नानुपलब्धिः संस्कारस्येत्यर्थः।

ननु पाणिसंयोगाच्छब्दो निवर्तत इति घण्टाश्रयत्वैव शब्दस्य युज्यते, व्यधिकरणस्योच्छेदेऽतिप्रसङ्गात्, अत एवाहङ्कारिकपञ्चतन्मात्रभूतसूक्ष्मारब्धपृथिव्यादिविकारगवादिवृत्तिर्गन्धादिवदवस्थित एव शब्द आहङ्कारिकतया व्यापकं श्रोत्रेन्द्रियं विकुर्वन्नवस्थित एव व्यज्यत इति सांख्याः। तत्राह—

॥ अस्पर्शत्वादप्रतिषेधः ॥

आकाशगुणत्वस्येति शेषः। कुतः? शब्दस्यास्पर्शत्वात्। यदि हि स्पर्शवदाश्रितः शब्दः स्यात्, ग्राह्यो न स्यात्, कर्णशष्कुलयवच्छिन्नाम्बरघण्टयोरसम्बन्धात्, न चाहङ्कारिकमिन्द्रियं व्यापकमिति वक्ष्यते, अस्पर्शाकाशवृत्तित्वे च शब्दस्य 'सन्तानवृत्त्या श्रोत्रे उत्पन्नो गृह्यते' इति युज्यते, श्रोत्रस्य भूतत्वेनैव बहिरिन्द्रियग्राह्यविशेषगुणवत्त्वाच्च। सांख्यप्रक्रियायाश्च निरासात्॥

शब्दस्य स्पर्शवद्वृत्तित्वे बाधकान्तरमाह—

॥ विभक्त्यन्तरोपपत्तेश्च समासे ॥

सांख्यस्य रूपरसगन्धस्पर्शशब्दसमुदायरूपं वीणाशङ्खादिद्रव्यं तत्र समासे समुदाये स्थित एव शब्दो व्यज्यत इति दर्शनम्। तत्र यदि समुदाये व्यजते शब्दः तर्हि विभक्त्यन्तरं षड्जगन्धारादिभेदेन विभागानन्तरं षड्जादिजातीयस्यैव तारतम्यरूपम्वा (?) नोपपद्यते, न हि तद्गतानां गन्धादीनामेकस्मिन्नेवाश्रये नानाजातीयत्वं एकजातीयानाम्वा प्रतिक्षणं भेदो दृश्यत इति शब्दोऽपि तथैव स्यात्। तस्माद् विभक्त्यन्तरोपपत्तेः न समासे व्यज्यते शब्दः किन्त्वाकाशगुणो जन्यः, सन्तानवृत्तिश्चैवं न स्यादिति चार्थः।

शब्दो नित्यः, अद्रव्यद्रव्यत्वादिति केचित्। तन्न, असिद्धेः। तथा हि—द्रव्यं सत् विभु वा स्यात् मूर्त्तम्वा। नाद्यः; 'नेह शब्द' इत्यादिना निश्चयात्। अन्त्येऽपि निरवयवम्वा सावयवम्वा; नाद्यः, अतीन्द्रियतापत्तेः; नान्त्यः, स्पर्शवत्त्वापत्तः; न च सावयवं निःस्पर्शमपि तमोवदिति वाच्यम्, तत्रापि सावयवत्वाभावादिति॥

[NTĀ, I.O.L. Mss. fol. 148a-150b]

(c) Viśvanātha Pañcānana records three interpretation of the *sūtra* पाणिनिमित्त॰ etc. :

सिद्धान्तिनः सूत्रान्तरम्—

॥ पाणिनिमित्तप्रश्लेषाच्छब्दाभावे नानुपलब्धिः॥

शब्दायमाने कांस्यादौ पाणिरूपनिमित्तस्य प्रश्लेषात् संयोगात् शब्दाभावे उपलभ्यमाने शब्दाभावकारणस्य नानुपलब्धिरिति यथाश्रुतानुयायिनः।

परे तु—पाणिरूपनिमित्तस्य प्रश्लेषो यत्र सः पाणिजशब्दजः शब्दः अर्थात् उत्तरशब्दः, ततः शब्दाभावे शब्दध्वंसे सति न विनाशकारणानुपलब्धिरित्यर्थ इत्याहुः।

अन्ये तु—पूर्वसूत्रे शब्दस्य तावद्वेगात्मकः संस्कारविशेषो हेतुः, तस्य तीव्र-तीव्रतर-मन्द-मन्दतरत्वाच्छब्दोऽपि तादृशः, तत्र चोत्तरोत्तर-

शब्दानां पूर्वपूर्वशब्दनाशकत्वं कल्प्यत इत्यर्थः। ननु तादृशसंस्कार-एव नास्तीत्यत्राह—पाणीति। नानुपलब्धिः संस्कारस्येति शेषः। पाणेर्निमित्तस्य प्रश्लेषात् घण्टादिसंयोगात् संस्काररूपकारणाभावद्वारा शब्दाभावे शब्दानुत्पत्तौ नानुपलम्भः संस्कारस्येत्यर्थ इत्याहुः।

[NSV, pp. 633-634]

(d) Rādhāmohana Gosvāmi Bhaṭṭācārya mentions only the first two of these interpretations :

विनाशकारणोपलब्धिं दर्शयति—

॥ पाणिनिमित्तप्रश्लेषाच्छब्दाभावे नानुपलब्धिः ॥

शब्दायमानमुरजादौ पाणिरूपशब्दाभावनिमित्तस्य प्रश्लेषात् संयोगाच्छब्दाभावे उपलभ्यमाने शब्दाभावकारणस्य नानुपलब्धिरिति यथा-यथाश्रुतार्थ इति केचिदाहुः।

अन्ये तु—पाणिरूपनिमित्तस्य प्रश्लेषः कार्यत्वरूपसम्बन्धो यत्र स शब्दोऽर्थादुत्तरशब्दः। तेन शब्दाभावे शब्दध्वंसे सति न विनाश-कारणानुपलब्धिरित्यर्थ इत्याहुः। [NSVV, p, 147]

(189) P. 131, l. 7: Like Rāmabhadra, Viśvanātha and Rādhāmohana also admit *prasaṅgasaṅgati* here. [See NSV, p. 643 ; NSVV, p. 149.] Vācaspati Miśra II, however, admits here *hetutāsaṅgati* and *upodghātasaṅgati* :

एवं पृथिव्यादिवृत्तिः शब्दो व्यज्यत इति सांख्यमते निरस्ते स एव यदि प्रकृतिविकारभावश्रुतेर्मुखे वर्णादीनामेवमपि परिणामिनित्यत्वेन प्रत्यवतिष्ठते, ततस्तन्निराकरणप्रकरणम्। अनित्यतासाधनेन कूटस्थ-नित्यत्वनिराकरणस्य परिणामिनित्यतानिराकरणानुकूलत्वात् शब्द-सामान्येऽनित्यत्वनिरूपणस्य तद्विशेषवर्णाविकारित्वनिरूपणहेतुत्वाच्च हेतुहेतुमद्भावसङ्गतिः। अवर्णस्य [? वर्णस्य] वर्णोपादानत्वे गुणत्व-मेव न स्यादित्युपोद्घातो वा। [NTĀ, I.O.L. Mss. fol. 151b

(190) P. 131, ll. 9-14: Here, Rāmabhadra has not defined what is to be understood by the term *vikāra*. Some attempts at explaining it have been made by Vācaspati Miśra II, Viśvanātha Pañcānana and Rādhāmohana Gosvāmi Bhaṭṭācārya:

(*a*) ··व्याख्यातृविप्रतिपत्तेश्च वर्णा विकारिणो न वेति संशयः। विकारित्वञ्च समवायिकारणत्वं परिणामित्वं वा। परिणामिनित्यत्वञ्च समवायिकारणत्वमतो नाप्रसिद्धिः।···

[NTĀ, I.O.L. Mss. fol. 152b]

(*b*) ······वर्णा विकारिणो न वेति संशयः। विकारश्च स्वरूपस्य विनाशेऽविनाशे वा द्रव्यान्तरारम्भकत्वम्, यथा दुग्धादेर्दध्यारम्भकत्वम्, बीजादेर्वृक्षारम्भकत्वं च, सुवर्णादेरपि लोहाभिघातजन्यावयवसंयोगनाशादवयविनो नाशे सत्येव कुण्डलाद्यारम्भकत्वम्; कपालादेश्च स्वरूपाविनाशेन घटाद्यारम्भकत्वम्। [NSV, p. 641]

(*c*) ······तत्र विकारो नाम तन्नाशजन्यत्वे सति तदवयवारब्धः। यथा दुग्धादेर्दध्यादिर्बीजादेर्वृक्षादिः। सुवर्णादेरपि लौहाद्यभिघातजावयवसंयोगनाशेनावयविनाशादेव कुण्डलाद्युत्पत्तिरिति कुण्डलादिकं तद्विकारः। न च कपालादिविकारत्वं घटादेर्न स्यादिति वाच्यम्। इष्टत्वात्। खण्डघटादेर्महाघटाद्यविकारत्वे तज्जनकावयवसंयोगजातीयाजन्यत्वं विशेषणं देयम्। जातीयत्वनिवेशाद् विभिन्नसंयोगजन्ये पूर्वघटावयवजन्ये उत्तरघटे न पूर्वघटविकारत्वप्रसङ्गः। न च वर्णस्य विकारित्वे सावयवद्रव्यत्वापत्तिरिति वाच्यम्। इष्टत्वात्।

अथवा—तत्समवायिसमवेतत्वे सति तन्नाशाधीनत्वमेव तद्विकारत्वम्। इकारयकारयोश्चैकस्मिन्नेव गगने समवेतत्वान्नाप्रसिद्धिरिति। [NSVV, p. 149]

Among the explanations quoted above, the first and third are unsatisfactory on several counts. They overlook the fact that those who opt for *pariṇāma* and *tirobhāva* instead of *utpatti* and *vināśa* also opt for *satkāryavāda*, and those who opt for

satkāryavada never admit the notion of *samavāyikāraṇa*. Thus any attempt at explaining *parināma* or *vikāra* in terms of *samavāyikāraṇa* or *vināśa* is as useless as putting a square peg in a round hole. Viśvanātha Pañcānana is much more cautious in the choice of expressions, and his explanation is free from these defects. Rādhāmohana has attempted to improve upon the explanation provided by Viśvanātha, but in doing so, he has only succeeded in distorting the view of the *vikāravādin* ; thus bringing to our mind the well-known saying : विनायकं प्रकुर्वाणो रचयामास वानरम्. We quote here the relevant remarks of Vācaspati Miśra I and Udayana in support of our remark, since they were in a much better position for appreciating these subtle differences :

(*d*) तदेवं रूपादिसन्निविष्टः शब्दो व्यज्यत इति सांख्यमते दूषिते स एव सांख्यो वर्णेषु प्रकृतिविकारभावश्रुतेर्मन्त्रसुवर्णादिवत्परिणामिनित्या वर्णा इति यदि प्रत्यवतिष्ठते तत्र परीक्षामारभते· · ·सुवर्णजातीयाः खल्ववयवाः अन्यतमव्यूहपरित्यागेनान्यतमं व्यूहमापद्यमाना रुचक इति वा वर्द्धमानक इति वा परिणमन्ते, अस्ति हि तेषु सर्वेषु सुवर्णजातीयानामवयवानामनुगमः ; न तु यकारे इकारस्य वा तदारम्भकस्य वा अवयवस्यानुगममीक्षामहे। तस्माद्विकाराभावादादेशत्वमस्य निश्चिनुमः।

[NVTT, pp. 638-639]

(*e*) ननु न तावदस्मन्मतमाश्रित्यायं सम्भवति, अस्माभिः परिणामिनित्यस्य कस्यचिदप्यनभ्युपगमात्, प्रकृतिविकारभावयस्यापि द्रव्यमात्रविषयत्वात्। न तु गुणस्य प्रकृतित्वमस्ति, समवायिकारणत्वानुपपत्तेरनित्यधर्मायोगात्। नापि सांख्यस्यैष संशयः, तस्मादादेशपक्षाभ्युपगमे विकाराभिमानानुपपत्तेः पूर्वपक्षानुत्थानादत आह—स एवेति। नायं विचाराङ्गतया संशय उपक्षिप्यते, किन्तु प्रकृतिविकारभावोपदेशबलेन परिणामिनित्यतां ब्रुवाणं सांख्यं प्रति दूषणमभिधीयते। नायं विकारोपदेशः परिणामित्वे प्रमाणम्, व्याख्यातृभेदेनादेशोपदेश-

स्यापि दर्शनात्। ततो विप्रतिपत्तेः संशयो युज्यते, न निश्चय इत्यर्थः।

विकारो हि नाम न बौद्धनयवत् पूर्वस्य निरन्वयनिवृत्तावुत्तरस्य प्रादुर्भावः सांख्यस्य विवक्षितः, किं त्ववस्थितस्यैव धर्मिणः पूर्वधर्मतिरोभावे धर्मान्तरस्याविर्भावः। न चेकारधर्मिस्य धर्मी कश्चिदुपलम्भगोचरो य इकारधर्मनिवृत्तावप्यनुवृत्तो यकारतया परिणमेत्। वर्णत्वं त्वनुवृत्तमपि न धर्मीत्यग्रे स्फुटीभविष्यति—इत्यभिप्रायवान् व्याचष्टे—सुवर्णजातीया इति।···न च वाच्यम्—अनुच्चारित एवेकारः स्थितः कदाचित् यकारतामापद्यते। ततः किं तेन विवृतकरणेनेति। तथा सत्यनुच्चरित एव यकारः स्थितः कदाचिदिकारतामापद्यते। ततः किं तदर्थं नेषत्स्पृष्टकरणेनेत्यभ्युपगमे द्वयोरपि स्थिरत्वात् कः कस्य विकारतामापद्येतेति भावः।···अयमाशयः, पूर्वन्यायेन तावदुच्चरित एव वर्णो विकारमासादयति, न त्वन्यथेति वाच्यम्। तथा च यदीकारविकारो यकारः कथं तमन्तरेण केवलादपि कदाचित् प्रयत्नात् प्रादुर्भवेत्। न हि क्षीरविकारो दधि क्षीरं विनैव कदाचित् केवलात् पुरुषप्रयत्नात् प्रादुर्भवति। न च विकाराविकारयोरवान्तरजातिभेदो वाच्यो विशेषस्यानुपलम्भबाधितत्वादिति।···

ननु मा भूद् विकारः परिणामो धर्म्यननुगमादेः, कार्यकारणभावस्तु स्यात्। न हि तत्राप्यनुगमाद्यपेक्षा, पूर्वापरभावमात्रत्वात् तस्य···

ननु 'अस्तेर्भूः' 'ब्रुवो वचि'रित्यादेशोपदेशत्वं किं सांख्यो नानुमनुते, यावताऽत्रापि विकारोपदेशः स्यात्। तथा च सांख्यविकल्पो दृष्टान्तः···तथा च प्रयोगः—सोऽयमिकः स्थाने संहितायां यणुपदिश्यते, नासौ तस्य विकारः, ततो वर्णान्तरत्वात् 'अस्ति'स्थाने प्रयुक्त'भू'वदिति।···

[TTP, A.L. Thakur's Press Copy, pp. pp. 131-133]

One may note how accurately Udayana states here the *Sāṅkhya* account of *vikāra* or *pariṇāma*, which is expressed

succintly in the well-known verse found in authentic *Sāṅkhya* texts tike *Yuktidīpikā* :

जहद्धर्मान्तरं पूर्वमुपादत्ते यदाऽपरम् ।
तत्त्वादप्रच्युतो धर्मी परिणामः स उच्यते ॥

(191) P. 132, l. 9 : This sentence has not been mentioned or explained as a *sūtra* in *Nyāyavārttika, Nyāyatātparyadīpikā, Nyāyatattvāloka* or *Nyāyasūtravivaraṇa*. In all these texts, the *sūtra* mentioned immediately after न्यूनसमाधिकोपलब्धेर्विकाराणामहेतुः is नातुल्यप्रकृतीनां विकारविकल्पात्. [See NV, p. 642 ; NTD, p. 61 ; NTĀ, I,O.L. Mss. fol. 152a ; NSV, p. 642 ; NSVV, p. 150].

(192) P. 134, l. 6 : Such a reading of this *sūtra* is found in *Nyāyatātparyadīpikā* and *Nyāyatattvāloka*. In *Nyāyabhāṣya, Nyāyavārttika, Nyāyavārttikatātparyaṭīkā, Nyāyasūtravṛtti* and *Nyāyasūtravivaraṇa*, this *sūtra* is read as न तद्विकाराणां सुवर्णभावाव्यतिरेकात्. [NB, p. 646 : NV, p. 646 ; NVTT, p. 646 : NSV, p. 646 ; NSVV, p. 152].

(193) P. 134, l. 18, p. 135, l. 2 : These two sentence have been treated as *sūtra*-s in *Nyāyavārttika* and *Nyāyatātparyadīpika* [NV, p. 647 : NTD, p. 63]. In the Metropolitan edition of *Nyāyabhāṣya*, these two sentences have been treated as parts of *Nyāyabhāṣya* [NB, p. 647]. Vācaspati Miśra II, Viśvanātha and Rādhāmohana are silent about the status of these sentences. As can be seen from p. 135, ll. 4-5, Rāmabhadra also does not treat these sentences as *sūtra*-s.

(194) P, 136, l. 15 : There is a lot of dispute regarding the exact reading of this *sūtra*. In *Nyāyavārttika*, we find the reading नित्यानामप्यतीन्द्रियत्वात् तद्धर्मविकल्पाच्च वर्णविकाराणामप्रतिषेधः, [See NV, p. 641]. In *Nyāyabhāsya, Nyāyatātprayadīpikā* and *Nyāyasūtravṛtti*, the reading is नित्यानामतीन्द्रियत्वात्तद्धर्मविकल्पाच्च वर्णविकाराणामप्रतिषेधः [NB, p. 648 ; NTD, p. 64 ; NSV, 648]. It may, however, be noted here that the word तत्० *does* occur in the *pratika* in NTD, while it *does not* do so in NSV :

(*i*) नित्यानामाकाशपरमाण्वादीनामतीन्द्रियत्वात् इन्द्रियप्रत्यासत्तिग्राह्यत्वाभावात् तद्धर्मविकल्पाच्च तस्यातीन्द्रियस्य धर्मस्य विकल्पात् केषुचिन्नित्येषु सामान्यादिषु भावाद्वर्णविकाराणामप्रतिषेधः।

[NTD, p. 64]

(*ii*) विकाराणां प्रतिषेधो न युक्तः, नित्यानां धर्मविकल्पात् धर्मस्य नानाविधत्वात् अतीन्द्रियत्वात्, चकारेणैन्द्रियकत्वं समुच्चीयते।

[NSV, p. 648]

Nyāyatattvāloka and *Nyāyasūtravivaraṇa* agree with *Nyāyarahasya* in respect of the reading of this sūtra :

(*iii*) पूर्वपक्षसूत्रम्—

॥ नित्यानामतीन्द्रियत्वाद्धर्मविकल्पाच्च विकाराणामप्रतिषेधः ॥

यथा नित्यत्वेऽपि केचिदतीन्द्रिया ऐन्द्रियकाश्चेति धर्मविकल्पः, एवं नित्यत्वेऽपि केचित् प्रकृतिविकारभूताः केचित्तु न तथा स्युरिति त्वदुक्तोऽप्रतिषेधः।

[NTĀ, I.O.L. Mss. fol. 152b-153a]

(*iv*) नित्यमते पूर्वपक्षयन्ति—

न निषेधो नित्यानामतीन्द्रियत्वाद्धर्मविकल्पाच्च। धर्मस्यातीन्द्रियत्वस्य विकल्पो विरुद्ध ऐन्द्रियकत्वं तस्मात्। चकारादन्येऽपि विरुद्धधर्मा लक्ष्यन्ते। ··· [NSVV, p. 153.]

(195) P. 136, l. 20 : There is some dispute regarding the reading of this *sūtra*. *Nyāyabhāṣya*, *Nyāyavārttika* and *Nyāyasūtravṛtti* read this *sūtra* as अनवस्थायित्वे च वर्णोपलब्धिवत्तद्विकारोपपत्तिः. *Nyāyatātparyadīpikā* reads it as अनवस्थायित्वे वर्णोपलब्धिवत् तद्विकारोपपत्तिः. *Nyāyatattvāloka* adopts the reading अनवस्थायित्वे वर्णोपलब्धिवद्विकारोपपत्तिः. *Nyāyasūtravivaraṇa* adopts the reading अनवस्थायित्वे च वर्णोपलब्धिवत्तदुपपत्तिः. [See NB, p. 649 ; NV, p. 649 : NSV, p. 649 ; NTD, p. 64 ; NTĀ, I.O.L. Mss. fol. 153a ; NSVV, p. 154].

(196) P. 137, l. 12 ; The reading of this *sūtra* is also disputed. Most of the editions of *Nyāyabhāṣya*, *Nyāyavārttika* and *Nyāyavārttikatātyaryaṭīkā* adopt the reading प्रकृत्यनियमात्, which is also supported by *Nyāyasūtravivaraṇa*. [See NB, p. 651 : NV, p. 651 ; NVTT, p. 651 and NSVV, p. 155]. *Nyāyatatparyadīpikā*, like *Nyāyarahasya*, give the reading प्रकृत्यनियमाद्वर्णविकाराणाम्, and the extra reading also features in the explanation :

(*a*) तस्मात् प्रकृत्यनियमाद्वर्णविकाराणां प्रकृतिविकारभावो वर्णानां न सम्भवतीति सूत्रार्थः । [NTD, p. 64.]

The reading adopted in *Nyāyatattvāloka* could not be ascertained by us with certainty, because the I.O.L. manuscript omits the *sūtra* altogether through a scribal error, though it contains the following explanation :

(*b*) विकाराणां प्रकृतिनियमो दृष्टः, यथा क्षीरविकारो दधि न क्षीरस्य प्रकृतिः ; इह तु 'दध्यत्रे'त्यत्रेकारो यकारस्य प्रकृतिः, 'विध्यती'त्यत्र व्यधेः सम्प्रसारणे यकार इकारस्य प्रकृतिरित्यनियमान्न प्रकृतिविकारभाव इति सूत्रार्थः ।

[NTĀ, I.O.L. Mss. fol. 152b.]

It may be noted that in the passage quoted above the expression वर्णविकाराणाम् or its constituents do not occur as *pratīka*-s. Moreover, the editor of *Nyāyasūtravivaraṇa* states that *Nyāyatattvāloka* supports the reading प्रकृत्यनियमात् :

(*c*) एतत्सूत्रव्याख्यानान्ते 'इति सूत्रार्थ' इति लिखितं न्यायतत्त्वालोके वाचस्पतिमिश्रैः । क्वचित्तु "प्रकृत्यनियमाद्वर्णविकाराणामि"ति सूत्रपाठो दृश्यते । न्यायसूचीनिबन्धन्यायतत्त्वालोकवार्त्तिकेषु तु "प्रकृत्यनियमादि'त्येतावन्मात्रं सूत्रमिति दृश्यते ।

[NSVV, p. 155, fn. 1.]

It thus seems that the reading प्रकृत्यनियमात् was accepted by Vācaspati Miśra II. The editor of NSVV had in all probability access to a manuscript of NTĀ which contained the reading of

this *sūtra*, which is unfortunately missing in the I.O.L. manuscript.

The situation with respect to *Nyāyasūtravṛtti* is somewhat piquant. In the Chowkhamba edition of this text, the *sūtra* under consideration is read as प्रकृत्यनियमात् वर्णविकाराणाम्. The Metropolitan edition gives the reading प्रकृत्यनियमात्, and this seems somewhat suspect, since the editors of this edition have uniformly followed the reading of *Nyāyasūcīnibandha*, as is evident from their editorial remarks quoted below :

(*d*) अत्र फ-पुस्तकानुसारेण सूत्राकारो गृहीतः. पुस्तकान्तरेषु 'प्रकृत्यनियमाद्वर्णविकाराणाम्' इति सूत्राकारः, तत्परित्यागे बीजं न्यायसूचीनिबन्धविरोधः। [NSV, p. 651.]

They also remark as follows :

क-ख-वार्त्तिकपुस्तकयोः सूत्रं स्थूलाक्षरैः 'प्रकृत्यनियमाद्वर्ण-विकाराणाम्' इत्याकारेण मुद्रितम्। [Ibid.]

Under the present circumstances, it is difficult to arrive at a definite conclusion about the exact reading of this *sūtra* in *Nyāyasūtravṛtti* without throughly examining the relevant manuscript material.

(197) P. 141, l. 4 : There is some dispute about the reading of this *sūtra*, as will be evident from the following passages :

(*a*) The reading usually adopted in the editions of *Nyāyabhaṣya* is गुणान्तरापत्त्युपमर्दह्रासवृद्धिलेशश्लेषेभ्यस्तु विकारोपपत्तेवर्णविकाराः [NB, p. 653.]

(*b*) *Nyāyavārttika* gives the reading ०श्लेषेभ्यस्तुविकारोपपत्तेर्वर्णविकारः [NV, p. 653]

(*c*) *Nyāyatātparyadīpikā* adopts the reading ०श्लेषेभ्यस्तद्विकारोपपत्तेवर्णविकाराः, and the variant reading is also attested by the explanation provided in it :

एतेभ्यस्तद्विकारोपपत्तेः वर्णविकारास्तैर्व्यपदिश्यन्त इति।

[NTD, P. 65],

(*d*) *Nyāyatattvāloka*, like *Nyāyarahasya*, gives the reading ०श्लेषेभ्यस्तु वर्णविकारोपपत्तेर्वर्णविकाराः, and here, too, the variant reading is attested in the explanation :

वर्णविकारा एकस्याप्रयोगोऽन्यस्य प्रयोग इत्येवंरूपा व्यवहर्त्तव्याः। कुतः ? गुणान्तरापत्त्यादिभ्य एव विशेषेभ्यो वर्णविकाराणामुपपत्तेः।

[NTĀ, I.O.L. Mss. fol. 151b]

(*e*) Some editions of *Nyāyasūtravṛtti*, like *Nyāyavārttika*, gives the reading ०विकारोपपत्तेर्वर्णविकारः, and retains this variant reading in the explanation :

··· एतेभ्यः पुनर्वर्णविकारोपपत्तेः वर्णविकारस्य एकवर्णाप्रयोगे वर्णान्तरप्रयोगस्य उपपत्तेः वर्णविकार इति व्यवह्रियते। तानेवाऽऽह—गुणान्तरेति। ··· [NSV, p. 653-654]

Here again, a lurking doubt persists as to the exact reading of this *sūtra* accepted by Viśvanātha. This reasons for this are as follows :

(*i*) The editors of the Metropolitan edition point out that some editions of *Nyāyabhāṣya* and *Nyāyasūtravṛtti* contain the reading ०वर्णविकारोपपत्तेर्वर्णविकारः ("वर्णविकारोपपत्तेर्वर्णविकारः" इति ज-भ-NB, p. 653, fn. 1).

(*ii*) The expression···वर्णविकारोपपत्तेर्वर्णविकारस्य एकवर्णप्रयोगे वर्णान्तरप्रयोगस्य उपपत्तेः···strongly suggests that Viśvanātha is explaining the term वर्णविकारोपपत्तेः. Thus, it is difficult to rule out the possibility that Viśvanātha, like Vācaspati Miśra II and Rāmabhadra, accepted the reading ०वर्णविकारोपपत्तेः instead of ०विकारोपपत्तेः. It is, however, clear that like Uddyotakara, he prefers the reading ०वर्णविकारः instead of ०वर्णविकाराः.

(*f*) *Nyāyasūtravivaraṇa*, like *Nyāyatattvāloka* and *Nyāyarahasya*, supports the reading वर्णविकारोपपत्तेर्वर्णविकाराः. This is also retained in the explanation :

··· वर्णविकारोपपत्तेरेव वर्णे विकारसादृश्यादेव वर्णविकारव्यवहार

इत्यर्थः। तथा च भाक्त एव व्यवहार इति। सादृश्यं विवृणोति-गुणान्तरेत्यादि। ··· [NSVV, p. 156.]

(*g*) It is also interesting to note the different interpretations given to the particle तु employed in this sūtra :

(*i*) तुशब्दोऽवधारणे। ...[NTĀ, I.O.L. Mss. fol. 151b].

(*ii*) तुशब्दो पुनरर्थे।···[NSV, p. 653].

(*iii*) तुरवधारणे।......[NSVV, p. 156].

Rāmabhadra has not said anything about this particle तु, but the manner in which he explains this *sūtra* (viz.···एतेभ्य एव वर्णविशेषेभ्यो वर्णविकारव्यवहाराः···) suggests that he, too, like Vācaspati Miśra II and Rādhāmohana, adopts अवधारण as the meaning of तु.

(198) P. 141, l. 13 : There is some dispute among the commentators about the *saṅgati* that obtains between *śabdapariṇāma-prakaraṇa* and *padārthanirūpaṇaprakaraṇa*. Thus, Vācaspati Miśra II observes :

(*a*) एवं शब्दस्य कार्यधर्मानाश्रयत्वरूपकूटस्थनित्यत्वमनित्यधर्माश्रयवत्त्वरूपञ्च परिणामिनित्यत्वं निराकृत्योपोद्घातसङ्गत्या पदार्थप्रकरणम्। न ह्यनिरूपिते पदार्थे शब्दस्य प्रमाणसम्भावनाऽपि, तत्र पदार्थः पदमनिरूप्य निरूपयितुं न शक्य इत्यादौ तल्लक्षणाय सूत्रम्··· [NTĀ, I.O.L. Mss. fol. 151b-152a]

It seems that Vācaspati Miśra II has taken his cue from Udayana, whose remarks are as follows :

(*b*) एवं तावद् वर्णानां पश्चाच्छब्दभेदानां कूटस्थनित्यत्वं परिणामिनित्यत्वं च निराकृतम्। अथेदानीमेक एव शब्दो धर्मी तथा विवर्तते परिणमते चेति ये मेनिरे, तन्मतं निरसिष्यन्

ते विभक्त्यन्ताः पदम्

इत्यारभ्यत इति। [TTP, A. L. Thakur's Press copy, Chap. II. p. 145]

Viśvanātha Pañcānana seems to agree with this :

शाब्दबोधे पदजन्यपदार्थोपस्थितेर्हेतुत्वात् तदुपपादनाय पदार्थे निरूपणीये पदमादौ निरूपयति ··· [NSV, p. 656]

(199) P. 141, l. 14 : Vācaspati Miśra II gives an elaborate explanation of this *sūtra*, which deserves to be quoted in full :

(*c*) ते वर्णाः । विभक्त्यन्ता इति तद्गुणसंविज्ञानबहुव्रीहिः, तेन विभक्तिमन्तर्भाव्य वर्णाः पदम् । बहुवचनेन सर्वेषां वर्णानां पदत्वं सूचितम् ।

ननु वर्णाः प्रत्येकमेव न पदार्थमवगमयन्ति ; वर्णान्तरोच्चारणानर्थक्यप्रसङ्गात्, तथाऽननुभवाच्च ; नापि त एव संहताः, आशुविनाशिनां क्रमभाविनां स्वरूपसंहतेरभावात् ; अतएव न बौद्धयपि संहतिः, तस्या विरम्य व्यापारायोगात् । नापि क्रमवद्वर्णानुभवजनितसंस्कारसहितोऽन्त्यवर्णानुभवोऽर्थधीहेतुः, संस्कारस्य स्वहेत्वनुभवविषयमात्रगोचरस्मृतिजनकत्वात् । किञ्चायं सङ्केतस्मृतिमपेक्षिष्यते नो वा ; नान्त्योऽगृहीतसङ्केतस्यापि शाब्दधीप्रसङ्गात् ; नाद्योऽन्त्यवर्णानुभवकाले स्मृतेरनागतत्वात्, तत्काले वाऽन्त्यवर्णश्रुतेरुपरमात् । तस्माच्छब्दादर्थधीरनुपपद्यमाना वर्णभिन्नं स्फोटमकारणमाक्षिपति । किञ्चास्ति हि भिन्नेष्वपि वर्णे 'ष्वेकं पदम्' 'एकं वाक्य'मित्यनुभवः, न चासौ वर्णेषु पदेषु च भवितुमर्हति, अनेकात्मकत्वविरोधात् । न चायं भ्रमो वाधकाभावात्, भेदभाने एकत्वारोपविरोधाच्च । किञ्च 'नदी' 'दीने'त्यादौ वर्णसाम्येऽपि पदवैषम्याच्च तेभ्यो भिन्नान्येव पदानि । न च भेदक्रममात्रात्तद्भेदः, तस्या (?) शब्दरूपतया तदन्तर्भावात् । यदाहुः—

एकैकवर्णासामर्थ्यान्मेलकानुपपत्तितः ।
एकबुद्धेर्नदीदीनतौल्यात् स्फोटः स च द्विधा ।। इति ।

पदस्फोटो वाक्यस्फोटः वर्णास्तद्व्यञ्जकाः, न च तत्रापि प्रत्येकसमुदाय-

विकल्पावकाशः, आद्यवर्णस्य सामान्यतोऽन्त्यवर्णस्य विशेषतस्तद्व्यञ्जकत्वात्। स चायं स्फोटो नित्यः, तदेव 'पदम्' 'वाक्य'मित्यनुभवादिति (?)।

अत्राहुः—औपाधिक एवायम् 'एकं पदमि'त्यादिप्रत्ययः, उपाधिस्त्वेकस्मृतिविषयत्वमेकार्थधीविषयत्वम्वा। वर्णानां प्रत्येकमनुभूतानामप्येकसमूहालम्बनस्मृतिगोचरत्वात्। न च—पदनिश्चयेऽर्थज्ञानं ततश्च पदनिश्चय इत्यन्योऽन्याश्रयः—इति वाच्यम्, पूर्वमेव पदत्वावधारणानभ्युपगमादिति। न प्रत्यक्षविषयो स्फोटः, नाप्यर्थज्ञानानुपपत्त्या तत्कल्पनम्, एकैकमनुभूतानामप्येकस्मृतिविषयाणां क्रमविशेषविशिष्टानां वर्णानामेवार्थप्रत्यायकत्वात्; एतच्च सर्वकृतसमयचेष्टासमूहे स्फोटस्थानीयस्य कस्यचिदभावे परैरप्यवश्यमभ्युपेयम्, गत्यन्तराभावात्।

नन्वत्रैकार्थधीजनकत्वं नोपाधिः, वाक्येऽपि गतत्वात्; नापि सङ्केतवत्त्वम्, विषयत्वेनार्थस्यापि सङ्केतवत्तया तत्रातिव्याप्तेः; न च वर्णत्वेनैतद्विशेष्यम् (इति) वाच्यम्, पदसङ्केतविषयेतरविषये वाक्येऽतिव्याप्तेः।

अत्राहुः—शक्तत्वं पदत्वम्, वाक्ये च न शक्तिः। अथ शक्तेः सङ्केतत्वेऽपरस्याप्रसिद्धिरित्युभयसाधारणैकरूपाभावेन कथमनुगमः इति चेत्। न। पदार्थोपस्थित्यनुकूलपदपदार्थसम्बन्धत्वेनानुगमात्।

नन्वेवमपि स्वमते शक्तिः सङ्केत एव, तथा च शक्तत्वं सङ्केतवत्त्वमेवेति पुनश्च पूर्वोक्तदोषापत्तिरिति चेत्। न। वाचकत्वस्यैव तदर्थत्वात्। न च लाक्षणिकाव्याप्तिः, उपसर्गादौ द्योतके तदभावश्च—इति वाच्यम्; लाक्षणिकाणामपि किञ्चित् प्रति वाचकत्वात्, उपसर्गानान्तु केवलानामपदत्वात्। न चैवं 'घटमि'त्यपि वाक्यं स्यात्, प्रातिपदिकद्वितीयाविभक्त्योरन्योऽन्यसंसर्गबोधकपदसमुदायरूपत्वादिति वाच्यम्; अन्वयप्रतियोग्यनेकोपस्थितावेवान्वयव्यतिरे-

काभ्यां विभक्तीनां संसर्गबोधकत्वस्य व्युत्पत्तिसिद्धत्वेनापरान्वयप्रतियोग्युपस्थितिम्विना विभक्तेः संसर्गाबोधकत्वात्; अत एवा'न्वयप्रकार एवार्थो विभक्तीनामि'त्युच्यते, विभक्त्यर्थस्य कर्मत्वस्य क्रियानिरूप्यत्वेन क्रियावाचकपदं विनाऽनन्वयाच्च।

अन्ये तु—'घटमि'त्याद्यपि वाक्यमेव, प्रातिपदिकरहितविभक्तेरपि पदत्वेन पदसमूहत्वात्—इत्याहुः। "विभक्त्यन्ताः पदमि"ति तु शक्तिग्रहोपजीव्यत्वादुक्तम्।

न्यायलोचनकृतस्तु—न शक्तत्वं पदत्वम्, (किन्तु) तद्बुद्धिजनकतावच्छेदकपरत्वम्, तच्च रूपं यद्यस्ति, तदा तदेव लक्षणम्, न चेदिदमप्यकिञ्चित्करम्; तथा च येन रूपेण यत्रान्वेयस्य शब्दस्येश्वरेणासाधारणीव्युत्पत्तिः कृता, तादृगसाधारणव्युत्पत्तिविषयत्वमेव पदत्वम्; व्युत्पत्तिस्तु क्वचित् सङ्केतः क्वचिच्छक्यसम्बन्धः। न च वाक्येऽतिप्रसङ्गः, तत्रासाधारणव्युत्पत्त्यभावात् (+ + +)यथा 'घटमानये'त्यादौ, उपमानात् साधर्म्यवैधर्म्ययोः, प्रसिद्धपदसामानाधिकरण्यात् य'थेह सहकारे'त्यादौ, वाक्यशेषात् यथा यववराहेन्द्रपदादौ, व्याकरणात् कोषात् पित्रादिकृताप्तोपदेशाच्चेत्याहुः।

तत्र पदं द्विविधम्, नामाख्यातञ्च। तत्राद्यं 'विप्र' इत्यादि, तल्लक्षणन्तु सुबन्तमेव, उपसर्गनिपातौ द्वौ तद्भेदौ। तत्रोपसर्गत्वं प्रपराद्यन्यान्यत्वम्, सर्वविभक्तियोगेऽप्येकरूपपदत्वं निपातत्वम्। द्वितीयन्तु 'पचती'त्यादौ' तिङन्तम्, तत्र प्राधान्येन पूर्वापरीभूतक्रियाविधावाख्यातम्, 'भुङ्क्ते'त्यादौ तु भोजनबोधकपूर्वापरीभावावगमेऽपि क्रियोपसर्जनत्वाधिगतेर्नातिव्याप्तिः। साध्योपरक्तभावनावाचकत्वम्वाऽख्यातत्वम्, न च 'वाक्यमि'त्यादावतिव्याप्तिः, भावनायास्तत्रोपसर्जनत्वात्। न च 'भावना'पदेऽतिव्याप्तिः, तत्र प्रतीतिसाक्षिकावच्छेदकविशेषरूपसाध्योपरागाभावात्। तत्रैकस्मिन् वाक्येऽनेकनामसम्भवात् क्रियाभेदेत्वर्थभेदाद्वाक्यभेद इति प्राधान्यान्नामपदमधिकृत्यात्र विचारः॥

[NTĀ, I.O.L, Mss. fol, 152a-153b. Here, some

portion seems to have been left out through scribal error, which has been indicated by the sign (+ + +)].

(200) P. 141, ll. 15-17 : The employment of plural number and singular number in the *sūtra* ते विभक्त्यन्ताः पदम् has elicited diverse remarks from different commentators :

(*i*) ...बहुवचनेन सर्वेषां वर्णानां पदत्वं सूचितम् ।...

[NTĀ, I.O.L. Mss, fol. 152a]

(*ii*) Viśvanātha, mostly following Rāmabhadra, remarks :

ते वर्णाः विभक्त्यन्ताः पदम् । बहुत्वमविवक्षितम् । विभक्तेश्च सत्त्वमनपेक्षितम् । विभक्तिश्च सुप्तिङ्रूपा । वस्तुतस्तु नेदं पदं शाब्दबोधोपयोगि, किन्तु इदमाकाङ्क्षास्वरूपम् ।

अथवा—विभक्तिः वृत्तिः अन्तः सम्बन्धः, तेन वृत्तिमत्त्वं पदत्वमिति ।...

[NSV, pp. 656-659]

(*iii*) Rādhāmohana suggests some different solutions :

ते शब्दाः । विभक्तिश्च सुप्तिङ्भेदेन द्विविधा । 'बहुवचनान्ता गणस्य संसूचकाः' इति न्यायेन बहुवचननिर्देशात् । लुप्तविभक्तिकानामपि ग्रहणम् । वस्तुतस्तु—विभक्त्यन्तानां लुप्तविभक्तिनां च शब्दानां तत्तदानुपूर्वीविशेषेणैव पदशब्दशक्यत्वमिति सूचनाय बहुवचनम् ।... वस्तुतः कीदृशशब्दः शाब्दबोधोपयोगीति प्रश्ने सूत्रमिदम् । तस्य च विभक्त्यन्ताः शब्दाः पदं प्रत्यायकमिति तदर्थः ।... प्रत्येकरूपेण शाब्दबोधोपयोगितात्ताभाय बहुवचनम्, 'वेदाः प्रमाणमि'तिवदेकवचनता नपुंसकलिङ्गता चेति ।...

केचित्तु—विभक्तिः शक्तिः, अन्तः सम्बन्धः, तेन शक्तिमन्त इत्यर्थः । अत्र बहुत्वमविवक्षितम्, 'सूत्रे लिङ्गसंख्याकालाश्चातन्त्राणी'ति न्यायादित्याहुः ।

[NSVV pp. 156-157]

As we can see, Rādhāmohana has mentioned the interpretation offered by Rāmabhadra and Viśvanātha in a cursory manner, and he does not seem to favour it.

(201) P. 141, l. 18 : This view of Rāmabhadra has been rejected by Viśvanātha in the following manner :

यत्तु—प्रसङ्गात् पदार्थनिरूपणमिति, तन्न, पदनिरूपणस्यासङ्गतत्वापत्तेः, एकसूत्रस्य प्रकरणाभावाच्च । [NSV, p. 660]

(202) P. 141, l. 19—p. 142, l. 1 : (*a*) There is some dispute about about the exact reading of this *sūtra*. Viśvanātha and Rādhāmohana have explained the sentence तदर्थं व्यक्त्याकृतिजातिसन्निधावुपचारात् संशयः, while Uddyotakara, Vācaspati Miśra I, Bhaṭṭa Vāgīśvara Vācaspati Miśra I and Rāmabhadra have omitted the word तदर्थं. Here, Rāmabhadra must have noted such a variant reading in some earlier commentary, and in his opinion, the word तदर्थं constitutes the introductory part of *Nyāyabhāṣya* on this *sūtra*. Viśvanātha and Rādhāmohana also finally come around to the view of Rāmabhadra, as in evident from the following remarks :

(*i*) व्यक्तिर्गवादिः जातिः गोत्वादिः, आकृतिरवयवसंस्थानविशेषः, तेषां सन्निधिः सामीप्यं मिलनम्, तत्र सति उपचारात् ज्ञानात् । तथा च त्रयाणां युगपत् प्रत्ययात् किमेतेषां प्रत्येकं पदार्थ उत समस्त इति संशय इत्यर्थः ।

इदं भाष्यमिति केचित् । वस्तुतस्तु तत्त्वबोधादिस्वरसात् सूत्रमेव, तदर्थं इत्यंशस्तु भाष्यकृतः पूरणमिति प्रतिभाति ।

[NSV, Chowkhamba edition, p. 99. We have not followed here the Metropolitan edition, which gives the reading···वस्तुतस्तु दुर्बोधादिस्वरसात्... (Metropolitan edition, p. 660), which makes no sense at all. Here, तत्त्वबोध is an abbreviation of अन्वीक्षानयतत्त्वबोध, a commentary of NS by Vardhamāna Upādhyāya. It is rather amusing to note that in the edition of NSV by Laksmana Sastri, दुर्बोधादिस्वरसात् has been retained, and the reading तत्त्वबोधादिस्वरसात् has been relegated to the footnotes as a variant. (Laxmana Sastri's edition of NSV, p. 216). The editors of the Metropolition edition have blindly followed Laksmana Sastri—a fine case of *andhaparamparā* !]

(*ii*) व्यक्तिर्गवादिः। आकृतिरवयवसंस्थानविशेषः। जातिर्गोत्वादिः। तासां सन्निधौ एकदा उपचारात् पदज्ञानान्तरोपस्थितौ। तदर्थे तदर्थत्वस्य तच्छक्तेरिति यावत्। संशयो जातौ वा व्यक्तौ वा आकृतौ वा तत्समुदाये वेति संशय इत्यर्थः। तदर्थे इति भाष्यकारेण पूरितम्। केचित्तु सूत्रमिदं भाष्यकारस्येत्याहुः।

[NSVV, p. 118]

It may be noted that only Rādhāmohana explains the word तदर्थे, though he, too, finally declares it to be a part of the *Nyāya-bhāṣya*.

(b) The term ०सन्निधि० employed in this *sūtra* has been interpreted differently by earlier commentators like Uddyotakara, Bhaṭṭa Vāgīśvara and Vācaspati Miśra :

(*i*) तत्र प्रधानोपसर्जनभावमाश्रित्य तदर्थे—

॥ व्यक्त्याकृतिजातिसन्निधावुपचारात् संशयः ॥

अविनाभाववृत्तिश्च सन्निधिः। यस्मादयं गोशब्दो व्यक्त्याकृतिजातिष्वविनाभावेन वर्तमानासु प्रयुज्यते, अतो न ज्ञायते किं व्यक्तिः पदार्थ उताऽऽकृतिरुत जातिरिति। [NV, pp, 659-660]

(*ii*) तदेवं पदस्वरूपं निरूपयित्वा तस्यायमर्थ इति निश्चेतुं संशयमाह—

॥ व्यक्त्याकृतिजातिसन्निधावुपचारात् संशयः ॥

सन्निधिरविनाभाव उपचारः प्रयोगस्तस्मादविनाभावेन वर्तमाना व्यक्त्याकृतिजातिषु यो गौरिति शब्दः प्रयुज्यते, तस्मात् किं जातिः पदार्थ उत व्यक्तिरथाकृतिराहोस्वित् सर्वं इति संशयो भवति, प्रयोगस्य समानत्वादिति सूत्रार्थः। [NTD, p. 66]

(*iii*) व्यक्त्यादीनां सन्निधावविनाभावस्थितौ उपचारात् ज्ञानादिति

यावत्, तेन गोशब्दात्तिसृणामपि ज्ञानाद् विप्रतिपत्तेर्वा किं त्रयमपि पदार्थ उत नेति संशय इति सूत्रार्थः।

[NTĀ, I.O.L. Mss. fol. 153b]

The similarity on certain points exhibited by these three interpretations is quite evident. It may, however, be noted that for Uddyotakara and Bhaṭṭa Vāgīśvara, उपचार = प्रयोग ; whereas for Vācaspati Miśra II, उपचार = ज्ञान. Thus, in explaining the term उपचार, Rāmabhadra has followed Uddyotakara, while Viśvanātha and Rādhāmohana have followed Vācaspati Miśra II.

(196) P. 142, ll. 7-8 : (*a*) Rāmabhadra has followed Vātsyāyana in explaining this *sūtra*. [See NB, pp. 660-661.]

(*b*) Uddyotakara and Vācaspati Miśra I have explained this *sūtra* in a more perceptive manner, and they have also put the basic argument of the *Vyaktiśaktivādin* in a convincing way :

(*i*) शब्दस्य प्रयोगसामर्थ्यात् पदार्थावधारणमिति प्रयोगप्रदर्शनार्थं याशब्दादिसूत्रम्। नामी याशब्दादयः जातौ प्रयुज्यन्ते। कस्मात्? अभेदात्—एका जातिस्तस्या विशेषणमनर्थकम्, 'या गौस्तिष्ठति या गौर्निषण्णे'ति। एवं शेषेषु। आकृतेरप्यभिधायकमेतन्न भवति, निष्क्रियत्वादाकृतेः। न हि निष्क्रिया गच्छति तिष्ठति भवति चेति। एवं सर्वत्र। यस्य चानेन विशेषणेन तिष्ठत्यादिना योगः तं गोशब्दोऽभिधातुमर्हतीति। कुतः? विशेषणविशेष्यभावस्यैकविषयत्वात्। यदि गोशब्दस्य तिष्ठतिशब्दस्य चैकमभिधेयं भवति, ततो 'गो'शब्देन धर्मान्तराणि निराक्रियन्ते, 'तिष्ठति'शब्देन च क्रियान्तराणीति विशेषणविशेष्यभावापन्नयो'स्तिष्ठति'-'गो'शब्दयोः सामानाधिकरण्यं युज्यते, अन्यथा नेति। 'द्रव्यं व्यक्तिरिति हि नार्थान्तरम्'। 'तिष्ठति'-शब्दसन्निहितेन 'गो'शब्देन व्यक्तिरभिधीयत इति।

[NV, pp. 660-661]

(*ii*) अत्र याशब्दादिप्रयोगसामर्थ्याद् व्यक्तिरेव पदार्थ इत्येके मन्यन्ते। स्यादेतत्—व्यक्तिवदाकृतिरपि भिद्यत इत्याकृतेरप्यभिधायकं कस्मान्न भवतीत्यत्राह—आकृतेरपीति। गोत्वं च जातिरुपाधिर्भविष्यति, तेन नातिप्रसङ्गः; न चोपाधेरभिधानम्, अनभिहितस्यापि तच्छब्देनोपहितावच्छेदकत्वदर्शनात्, यथा 'गार्गिकया श्लाघत' इत्यत्र श्लाघोपाधिविहितो वुञ् न श्लाघामाह। [NVTT, pp. 660-661]

(*c*) Vācaspati Miśra II adds the arguments formulated by Uddyotakara and Vācaspati Miśra I to the explanation of Vātsyāyana :

व्यक्तिः पदार्थः। कुतः? याशब्दादीनामुपचारात् व्यवहारात्। तथा हि—'या गौर्गच्छती'ति व्यवहारो व्यक्तावेव युज्यते, न तु जात्याकृत्योः, अजङ्गमत्वात्; एवं समूहोऽपि न जातौ, तस्य भेदगर्भत्वात्; नाप्याकृतौ, तथाऽप्रतीतेः; त्यागपरिग्रहावपि नैतयोः, तयोः स्वत्वनाशोत्पादनफलकसङ्कल्परूपजनकतया द्रव्य एव सम्भवात्; एवं 'विंशतिर्गाव' इत्यादिका संख्या तत्रैव; एवं वर्णः शुक्लादिरपि; समासो 'गोहित' इत्यादियोगात्।

अथ विशेषिका अनुगामिका च जातिरेवेति 'नागृहीतविशेषणा'-न्यायात् सैव पदार्थ इति चेत्। न। गोत्वेनोपाधिनोपलक्षितायाः व्यक्तेः शक्यत्वात्, गोत्वन्तु तटस्थमशक्यमेव, यथा 'गार्गिकया श्लाघत' इत्यत्र श्लाघोपाधिविहितोऽपि वुञ् न श्लाघामाहेति।

[NTĀ, I.O.L. Mss. fol. 154b-153a]

(197) P. 142, l. 14 : (*a*) This *sūtra* is read in all other available commentaries as न तदनवस्थानात्· It is not clear as to why Rāmabhadra omits the particle न, since he is totally silent about it.

(*b*) Commentators have offered different interpretation of this sūtra (especially of the two constituents तत् and अनवस्थानात्) :

(*i*) न व्यक्तिः पदार्थः। कस्मात्? अनवस्थानात्। याशब्द-प्रभृतिभिर्यो विशेष्यते स गोशब्दार्थो 'या गौस्तिष्ठति या गौर्निषण्णे'ति, न द्रव्यमात्रमविशिष्टं जात्या विनाऽभिधीयते। किं तर्हि? जाति-विशिष्टम्। तस्मान्न व्यक्तिः पदार्थः। एवं समूहादिषु द्रष्टव्यम्।

[NB, p. 662]

(*ii*) न तदनवस्थानात् इति सूत्रम्। नानेन गोशब्देन व्यक्तिमात्रं शुद्धमुच्यते। यद्ययं व्यक्तिमात्राभिधायकोऽभविष्यत् तेन यस्यां कस्यांचिद् व्यक्तौ प्रत्ययोऽभविष्यदिति सूत्रार्थः। [NV, p. 662]

(*iii*) न व्यक्तिः पदार्थः। कस्मात्? तस्या व्यक्तेरनवस्थानात् इत्यनित्यत्वानेकत्वैरनवधारणीयत्वेन व्यक्तिपदार्थपक्षे सम्बन्धग्रहणस्या-शक्यकरणत्वात्। न च जातेरशब्दार्थत्वेऽप्युपाधित्वेन सम्बन्धस्य शक्यकरणतेति वाच्यम्। अप्रतीयमानायास्तस्या उपाधित्वायोगात्। न च मानान्तरेणास्याः प्रतिपत्तिः सम्भवतीति तच्छब्दात् प्रतीतौ न व्यक्तिमात्रं पदार्थः? किं तर्हि? जातिव्यक्ती—इति नियमो न स्यादिति सूत्रार्थः। [NTD, p. 67]

(*iv*) न व्यक्तिमात्रं पदार्थः, तस्य केवलस्य प्रतीतिविषयत्वे-नानवस्थानात् गोशब्दाद् यत्किञ्चिद्व्यक्त्यज्ञानात्। न च गोत्व-मुपाधिः, तस्य प्रत्यायकान्तराभावात्। 'गार्गिकये'त्यत्र वुञ् नाभि-हितस्य श्लाघोपाधिः 'श्लाघत' इति पदान्तरेणाभिधानात्, तत्र प्रयोगस्य विना वुञाऽसाधुत्वात्। न च गोत्वस्य शब्दादेव प्रतीतिः, व्यक्तिवद्-वाच्यतापत्तेः। अथ यथा 'धेनु'पदादशक्यस्य गोत्वस्य ज्ञानं स्यादिति, तन्न, गोत्वविशिष्टधानकर्मव्यक्तेरेव शक्यत्वात्, नियमतो 'गो'पदाद् गोत्वविशिष्टोपस्थितेः; धानकर्मव्यक्तिः शक्या, गोत्वञ्च प्रयोगोपाधि-रित्यत्र गौरवात्; अन्यथाऽनुगतविशेषणानां सर्वत्रोपाधित्वसम्भवे 'कारणा'दिपदानामप्यपारिकानां [?] विशिष्टशक्त्य-भावापत्तेः। गोत्वविशिष्टे च कार्यान्वयात् गोत्वं विशेषणं न तूप-

लक्षणम्; तदन्येन तु रूपेण कार्यान्वये उपलक्षणम्, यथा—'यो वासस्वी स देवदत्तशब्दवाच्य' इत्यत्र वासः।

अथ—व्यक्तिः शक्या, गोत्वं त्ववच्छेदकम्, कारणत्वे दण्डत्ववदिति चेत्। न। 'गो'पदाद्गोत्वविशिष्टज्ञानानापत्तेः, शक्यावच्छेदकत्वेना[?]वश्यकत्वाल्लाघवाच्च जातेरेव शक्यत्वात्। 'धेनु'पदे तु गोत्वं न तथा, अतिप्रसङ्गात्। तथा च गोत्वप्रसाधकः शब्दः एवेति तदपि वाच्यम्, एव'माकाश'पदादावपि शब्दाश्रयत्वयोग्यत्वादिकमूह्यम्।
[NTĀ, I.O.L. Mss, fol. 154a-154b]

(v) न व्यक्तौ शक्तिर्व्यक्तिमात्रस्यानवस्थानात्। व्यक्तिमात्रस्य शक्यत्वे हि गवादिपदाद् यत्किञ्चित्व्यक्तेरुपस्थितिः स्यादतो गोत्वविशिष्टा व्यक्तिर्वाच्या। तथा च 'नागृहीतविशेषणा बुद्धिर्विशेष्यमुपसंक्रामती'ति न्यायात् जातावेव शक्तिरस्तु। [NSV, pp. 662-663]

(vi) व्यक्तिर्न पदार्थः, तन्मात्रस्यानवस्थानात् अनुपस्थितेः, जात्यादिपुरस्कारेणैव गवादेः शाब्दबोधे भानात्। व्यक्तिमात्रस्य शक्यत्वे गवादिपदाद् गोव्यक्तिमात्रस्य बोधः स्यात्, शाब्दबोधविषयत्वस्य वृत्तिप्रयोज्यत्वनियमादिति भावः। [NSVV, p. 156]

(198) P. 143, l. 3-5: The statements न चेह...भाव: have been rejected by Viśvanātha in the following manner:

...तथा च यथा गङ्गादिपदाद् गङ्गातीरत्वादिना बोधस्तथा गोपदादितो गोत्वविशिष्टस्य व्यक्तेर्लक्षणया बोधः। एतेन युगपद्वृत्तिद्वयविरोधः एकपदार्थयोः परस्परानन्वयश्च प्रत्युक्तः। गोत्वत्वेन रूपेण शक्तिग्रहात् तथैवोपस्थितिरतो निष्प्रकारकपदार्थोपस्थितिरपि नास्तीति मन्तव्यम्। [NSV, pp. 663-664]

(199) P. 143, l. 16-19: Here, Rāmabhadra refers to the explanation given by Vātsyāyana and his followers:

(*i*) अतद्भावेऽपि तदुपचार इति अतच्छब्दस्य तेन शब्देनाभिधानमिति। सहचरणात्—'यष्टिकां भोजये'ति यष्टिकासहचरितो ब्राह्मणोऽभिधीयत इति। स्थानात्—'मञ्चाः क्रोशन्ती'ति मञ्चस्थाः पुरुषा अभिधीयन्ते। तादर्थ्यात्—कटार्थेषु वीरणेषु व्यूह्यमानेषु 'कटं करोती'ति भवति।…सामीप्यात् 'गङ्गायां गावश्चरन्ती'ति देशोऽभिधीयते सन्निकृष्टः।…तत्रायं सहचरणाद् योगाद् वा जातिशब्दो व्यक्तौ प्रयुज्यते। [NB, pp. 663-664]

(*ii*) कटार्थेषु वीरणेषु व्यूह्यमानेष्विति भाष्यम्। 'कटं करोती'ति निर्वर्त्यस्य कटस्य कर्मत्वमनुपपन्नम्, कारकाधिकारीयत्वात् कर्मसंज्ञायाः, क्रियानिमित्तस्य च कारकत्वात्, असिद्धस्य च क्रियायाः पूर्वं निमित्तभावायोगात्। तस्मात् तादर्थ्यनिमित्तादेव कटशब्दः कटार्थेषु वीरणेषु व्यूह्यमानेषु वर्तते। वीरणानां च वा रच्यमानानामस्ति कटक्रियापूर्वभावित्वेन निमित्तभाव इति।

[NVTT, pp. 664-665]

(*iii*) …अतद्भावेऽपि तद्वदुपचारः अतच्छब्दस्य, तच्छब्देन प्रयोगो दृष्टः। यथा 'यष्टिकां प्रवेशय', 'मञ्चाः क्रोशन्ति', 'कटं करोति',…'गङ्गायां घोषः'……इति। तथात्रापि जातिसाहचर्याद् व्यक्तेर्जातिशब्दस्य व्यक्तावुपचारेणापि प्रयोगः सम्भवति। तथा च शब्दादिप्रयोगसामर्थ्याद्व्यक्तेरेव पदार्थत्वं सम्भवतीति सूत्रार्थः।

[NTD, p. 67]

(*iv*) अतद्भावेऽपि तच्छब्दाभिधेयभेदेऽपि तेन शब्देनोपचारो दृश्यते, यथा सहचरणादिभ्यो ब्राह्मणादिषु, तथा व्यक्तौ प्रयोग इत्यर्थः। तथा हि—'यष्टिं भोजये'त्यत्र यष्टिशब्दाद् ब्राह्मणः प्रतीयते, शक्त्या परम्परया स्मरणात्; स्थानात् यथा 'मञ्चाः क्रोशन्ती'त्यत्र तत्स्थाः पुरुषा उच्यन्ते; तादर्थ्यात् यथा 'कटं करोती'त्यत्र कटशब्दः कटार्थेषु

वीरणेषु, कटस्य तु निर्वर्त्यस्य कर्मकारकत्वायोगात्···उपचारपदेनात्र लक्षणोच्यते, तद्बीजस्य सत्त्वात् । [NTĀ, I.O.L. Mss. fol. 154b]

It is interesting to note that later commentators like Viśvanātha and Rādhāmohana preferred to accept the interpretation of Vātsyāyana :

(*v*) व्यक्तौ अतद्भावेऽपि तत्पदाशक्यत्वेऽपि तदुपचारः तच्छब्द-व्यपदेशः, यथा सहचरणादितो ब्राह्मणादौ यष्ट्यादिपदप्रयोगः। सहचरणात्—संयोगविशेषात् 'यष्टिं भोजये'त्यत्र यष्टिधरब्राह्मणे यष्टि-शब्दप्रयोगः। एवं स्थानात्—'मञ्चाः क्रशन्ती'ति मञ्चस्थपुरुषे ; तादर्थ्यात्—'कटं करोती'ति कटस्यासिद्धत्वेन कारकत्वायोगात्······ सामीप्यात्—'गङ्गायां गावश्चरन्ती'ति······तथा च यदा गङ्गादिपदाद् गङ्गातीरत्वादिना बोधस्तथा गोपदादितो गोत्वविशिष्टस्य व्यक्तेर्लक्षणया बोधः। [NSV, p. 663]

(*vi*) सहचरणादिसम्बन्धेभ्यो ब्राह्मणादौ अतद्भावेऽपि तत्पदा-शक्यत्वेऽपि तदुपचारः तत्पदव्यवहारः।···क्रमेणोदाहरणम्—यथा 'यष्टिं भोजये'त्यत्र सहचरणात् संयोगविशेषात् यष्टिपदस्य यष्टिधरे ब्राह्मणे लक्षणा। 'मञ्चाः क्रोशन्तीत्यत्र स्थानात् स्थितेर्मञ्चपदस्य मञ्चस्थे लक्षणा। सूत्रे मञ्चपदमपि मञ्चस्थपरम्। 'कटमानयती'त्यत्र तदर्थ-कत्वात् वीरणे कटपदस्य लक्षणा। सूत्रस्थं कटपदमपि वीरणपरम्।

[NSVV, pp· 156-157]

We have already noted in Textual Note no. 198 the reasons adduced by Viśvanātha for rejecting the views of Rāmabhadra.

(200) p. 144, I. 10-11 : This is the view of Uddyotakara, Vācaspati Miśra I, Bhaṭṭa Vāgīśvara and Vācaspati Miśra II :

(*i*) ···आकृतिः पदार्थः। कस्मात्? तदपेक्षत्वात् सत्त्वव्यव-स्थानस्य—गौरश्वः पुरुष इत्येवमादिसत्त्वव्यवस्थानमाकृत्यपेक्षं सिध्यति।

यदपेक्षा च सत्त्वव्यवस्थानसिद्धिः स गोशब्दस्य विषय इति ।

अत्रापि तदेवोपस्थितं—न तदनवस्थानादिति । यस्य च जात्या योगः स गोशब्दस्य विषयो नाऽऽकृतिर्जात्ययोगात् । कस्य पुनर्जात्या योगः ? नियतावयवव्यूहस्यावयविनः ... [NV, pp. 665-666]

(*ii*) एतदपि दूषयति—अत्रापि तदेवोपस्थितं न तदनवस्थानादिति । संस्थानेनापि व्यज्यमाना जातिरेकार्थसमवायाद् व्यज्यते च व्यवस्थाप्यते च । सा तु व्यक्तिसंस्थानाभ्यां व्यावर्तमानाभ्यामनुवर्तमानाऽभिन्नबुद्ध्याऽवसीयते, तादृशी च व्यक्तिसंस्थानाभिधानानपेक्षेणापि पदेन शक्या बोधयितुम्, संस्थानं तु व्यक्तिवत् भिन्नम् आनन्त्यव्यभिचाराभ्यामशक्यसङ्केतग्रहणं जात्यभिधामनपेक्ष्य न शक्यं पदेन बोधयितुमिति न संस्थानापरनामाऽऽकृतिः पदार्थ इत्यर्थः । नापि जातिद्वारेण व्यक्तिवदाकृतिः पदार्थो जात्या सहासम्बन्धादित्याह—कस्य च जात्या योग इति । [NVTT, pp. 665-666]

(*iii*) अत्राकृतेरपि केवलाया व्यक्तिवदानन्त्यव्यभिचाराभ्यामशक्यसंकेतत्वेन पदार्थत्वावधारणं न जात्या विना सिध्यतीति परिहारो न तदनवस्थानादित्यनेन सूत्रेण स्पष्ट इति मन्वानः सूत्रकारः तदर्थं सूत्रान्तरमकृत्वैव यया पदपदार्थयोः शक्यसंकेतत्वं सिध्यतीति सैव जातिः पदार्थ इत्याह...[NTD, p. 68]

(*vi*) अत्रापि दूषणं न तदनवस्थानादित्येव मंस्थ, निरूपाया आकृतेर्व्यक्तिरूपत्वादानन्त्यव्यभिचाराभ्यां शक्तिग्रहायोगात् जातिविनाकृताया आकृतेः पदादनुपस्थितेः...

[NTĀ, I.O.L. Mss. fol, 154b]

Incidentally, this view is not shared by Viśvanātha and Rādhāmohana :

(*v*) फलतस्तद् दूषयति—

॥ व्यक्त्याकृतियुक्तेऽप्यप्रसङ्गात् प्रोक्षणादीनां मृद्गवके जातिः ॥
[NSV, p. 666]

(*vi*) आकृतिशक्तिपक्षं निरसन् जातिशक्तिपक्षमाह—

॥ व्यक्त्याकृतियुक्तेऽप्यप्रसङ्गात् प्रोक्षणादीनां मृद्गवके जातिः ॥
[NSVV, p. 160]

(201) P. 144, l. 17 : Rādhāmohana reads the *sūtra* as नाकृतिव्यक्त्यपेक्षत्वाज्जात्यभिव्यक्तेश्च [NSVV, p. 161.] He does not, however, provide any comment on the meaning of the additional च.

(202) P. 145, l. 4 : Rādhāmohana accepts the reading जात्याकृतिव्यक्तयस्तु पदार्थाः. [See NSVV, p. 162].

(203) P. 145, ll. 5-10 : (*a*) Here, the following passages from earlier commentaries and sub-commentaries are worth quoting and comparing :

(*i*) तु शब्दो विशेषणार्थः। किं विशिष्यते ? प्रधानाङ्गभावस्यानियमेन पदार्थत्वमिति। यदा हि भेदविवक्षा विशेषगतिश्च तदा व्यक्तिः प्रधानम्, अङ्गं तु जात्याकृती। यदा तु भेदोऽविवक्षितः सामान्यगतिश्च, तदा जातिः प्रधानम्, अङ्गं तु जात्याकृती। तदेतद् बहुलं प्रयोगेषु। आकृतेस्तु प्रधानभाव उत्प्रेक्षितव्यः।
[NB, p. 671]

(*ii*) ···तुशब्दो विशेषणार्थः। किं विशिष्यते ? प्रधानोपसर्जनभावस्यानियमेन पदार्थत्वम्। यदा भेदविवक्षा विशेषगतिश्च 'गौस्तिष्ठति गौर्निषण्णे'ति, तदा व्यक्तिः पदार्थः, अङ्गं जात्याकृती; जातावाकृतौ च स्थानगमनादीनामभावाद् यत्र सम्भवः स पदार्थ इति। यदा पुनर्भेदो न विवक्षितः सामान्यावगतिश्च तदा जातिः पदार्थः, यथा 'गौर्न पदा स्प्रष्टव्ये'ति। आकृतेश्च प्रधानभाव उत्प्रेक्षितव्य इति। स्वयमुत्प्रेक्ष्य इत्यर्थः। क्व पुनराकृतेः प्राधान्यं दृष्टम् ? यथा 'पिष्टकमय्यो गावः क्रियन्तामि'ति।··· [NV, p. 671]

(*iii*) इदमत्राऽऽकूतम् । गोशब्दोच्चारणानन्तरं विदितसंगतेरेकपदेन व्यक्त्याकृतिजातिनिर्भासः प्रत्यय उदयमासादयति ; न पुनर्यथा 'गङ्गायां घोषः प्रतिवसती'त्यत्र 'गौर्वाहीक' इत्यत्र वा गङ्गात्वगोत्वावगमोत्तरकालं वाक्यार्थे तत्सम्बन्धानुपपत्तेस्तदविनाभावेन वा लक्ष्यमाणगुणयोगेन वा तीरं वाहीको वाऽवगम्यते तथेहावगतिः । प्रयोगप्राचुर्यादत्यन्ताभ्यासेनातिशीघ्रतया सन्नपि प्रत्ययक्रमो न लक्ष्यते शीघ्रतरशतपत्रपत्रव्यतिभेदवदिति चेत्—न, असति बाधके बलवति प्रत्ययाभेदप्रथायामन्यथाकरणायोगात् । तथा च सति न क्वचिदप्यभेदोऽवतिष्ठेत, तथा च भेदोऽपि न स्यात्, अभेदाश्रयत्वाद्भेदस्य ।

अपि च न रूपिशून्या रूपावगतिः, रूपं च द्रव्यस्य जातिः, तेन रूप्यमाणत्वाद् रूपि द्रव्यम् । न च येन यद्रूप्यते तदनवगमे तदवगमः, यथा नार्थमन्तरेण बुद्धेरुपलम्भनम् । तस्माज्जात्युपलम्भो द्रव्योपलम्भैकदेशो न द्रव्योपलम्भमन्तरेण केवलः सम्भवति । तस्मादेकोपलम्भगोचरत्वान्न जातिजातिमतोर्लक्ष्यलक्षणभावः । स चोपलम्भः शब्दज्ञानानन्तरं जायमानः शाब्दः । न च वाच्यम्—एकोपलम्भगोचरत्वेऽपि जातिव्यक्त्योर्जातिरेव वाच्या न व्यक्तिः, एकवाच्यत्वेऽप्युभयोपलम्भोपपत्तावुभयवाच्यत्वकल्पनानुपपत्तेरिति ; कार्यव्यङ्ग्यं हि कारणानां सामर्थ्यं कार्यं एव नाकार्यं, कार्यं चानुभवः, स चैक एवेति न सामर्थ्यभेदककल्पना ; तद्द्वारेण तु कर्मण्यप्युच्यते पदमर्थे समर्थमिति, कार्यं च द्वारमेकमिति विषयभेदेऽपि सामर्थ्यमेकमेव ।...

[NVTT, pp. 670-672]

(*iv*) ननु त्रितयाभिधानमनुपपन्नम्, जातिमात्राभिधानेनैव व्यक्त्याकृतिभाने तदभिधानकल्पनानुपपत्तेरित्युक्तमत आह—इदमत्रेति । तदेतत् सत्यप्रत्ययानपलापिनं प्रत्युक्तम् । वस्तुतस्तु—आनन्त्यव्यभिचाराभ्यामभिधानवल्लक्षणाऽपि न सम्भवति, अविनाभावग्रहायोगात् । कथञ्चिद्योगे वाऽभिधानस्यापि तथैवोपपत्तेः । कल्पनागौरवं तु वक्ष्यतीति ।

ननु किमिदं रूपं नाम ? न तावत् तत्समवेतमात्रम्, द्व्यणुकाद्यप्रतीतावपि त्रसरेण्वादीनां प्रतीतेः। नापि तद्धर्मत्वं रूपत्वम्, गन्धादीनां पृथिव्याद्यप्रतीतावपि प्रतीतेः। नापि जातित्वमेव, विवादविषयत्वेनासाधारणत्वात्। अत आह—तेनेति। ईदृशो नामायं जातेः स्वभावो यदाश्रयेणैव सह निरूप्यते, नान्यथा। तत्रानुरूपमुदाहरणमाह—यथा नार्थमिति। यथा चैतत् तथा दर्शितं प्राक्। व्यक्तियोग्यतामनुरोध्यैव जातियोग्यता व्यवतिष्ठते न त्वन्यथेति भावः। कल्पनागौरवमाशङ्कते—न च वाच्यमिति। यद्यपि नेदं क्षमम्, व्यक्तौ शब्दस्य सामर्थ्याभ्युपगमे हि कस्य बलाद् व्यक्तिरवसीयेत ? न तावत् स्वबलादेवातिप्रसङ्गात्। नापि जातिबलात्, सत्तामात्रेण तस्यास्तदवगमसामर्थ्येऽतिप्रसङ्गादेव। प्रतीतायास्तथाभावे प्रत्ययाभेदव्याघातात्। परिशेषात् शब्दसहकारिस्वीकारे कथं तत्र तच्छक्तिरपह्नूयेत ? तस्मात् शक्तिभेदोऽपि नास्तीत्येतावन्मात्रं प्रतिपादयितुं प्रत्युक्तम्—कार्यव्यङ्ग्यं हीति।...

[TTP, A.L. Thakur's Press Copy, Chapter II, p. 158]

(*v*) *Nyāyatātparyadīpikā* virtnally copies the portion quoted here from *Nyāyavārttikatatparyaṭīkā*. [See NTD, pp. 68-69].

(*vi*) न व्यक्त्यादिष्वेक एवेति तुशब्दार्थः। पदार्थ इत्येकवचनेन तिसृष्वप्येकैव शक्तिरिति सूचितम्। गोशब्दश्रवणानन्तरं नियमेन तिसृणामुपस्थितेर्जात्याकृतिविशिष्टा व्यक्तिः शक्या, एतावांस्तु विशेषो 'या गौर्गच्छतीत्य'त्र व्यक्तिः, 'गौर्नित्या' इत्यत्र जातिः, 'मृद्गव' इत्यत्राकृतिः प्रधानमित्यर्थः...। [NTĀ, I.O.L. Mss. fol. 155a]

(*b*) Later commentators like Viśvanātha and Rādhāmohana more or less agree with Rāmabhadra :

(*vi*) तुशब्द एकैकमात्रपदार्थत्वव्यवच्छेदाय। पदार्थ इत्येकवचनं तु तिसृष्वप्येकैव शक्तिरिति सूचनाय। विभिन्नशक्तौ कदाचित् कस्य-

चिदुपस्थितिः स्यात्। शक्तेस्तुल्यत्वेऽपि व्यक्तेर्विशेष्यत्वात् प्राधान्यम्, तथैव शक्तिग्रहात्। न चाऽऽकृत्यादिसाधारणैकशक्यतावच्छेदकाभावान्न शक्त्यैक्यमिति वाच्यम्, तथा नियमे मानाभावात्। इदं गवादिपदमभिप्रेत्य, तेन पश्वादिपदस्य जात्यवाचकत्वेऽपि न क्षतिः। जातिपदं वा धर्मपरम्, तथैव लक्षणस्य वक्ष्यमाणत्वात्।

[NSV, pp. 670-672]

(*vi*) पदार्थ इत्येकवचनमेकशक्तिसूचनाय, एकवचनार्थस्यैकत्वस्य शक्तिरूपपदार्थत्वेऽन्वयात्।… 'गौर्गोपदजन्यबोधविषयो भवत्वि'तीश्वरेच्छाविषयता गोपदशक्तिः, तत्र बोधविषयता स्वरूपसम्बन्धेन व्यक्तौ भासते, समवायसम्बन्धावच्छिन्नावच्छेदकतासम्बन्धेन जातौ भासते, विशिष्टाधिकरणवैशिष्ट्यबोध इव तादृशेच्छायां विशेष्यतावच्छेदके विधेयस्य भानस्वीकारात्। एवं च तादृशबोधविषयत्वप्रकारतानिरूपितविशेष्यतात्मकशक्तिस्त्रिष्वेव, तादृशविशेष्यतानां मिथो भिन्नत्वेऽपि तादृशबोधविषयताप्रकारतानिरूपितविशेष्यतात्वेनानुगमादैक्योक्तिः। एवं यत्र तादृशबोधविषयता स्वरूपसम्बन्धेन इच्छायां भासते तस्य विशेष्यतया शाब्दबोधे भानम्, यत्र च (यद्) यादृशसम्बन्धनावच्छिन्नावच्छेदकतासम्बन्धेन भासते, तस्य तादृशसम्बन्धेन तत्र भानमिति नियमः, तेन जात्यादेर्न स्वातन्त्र्येण विशेष्यविधया वा भानम्।… इदं च गवादिपदाभिप्रायेण, तत्रैवाशङ्कनात्, तेन पश्वादिपदस्थले पशुत्वाद्युपाधिविशिष्टे शक्तिः, गुणादिपदस्थले गुणत्वादिजातिविशिष्ट एव शक्तिस्तत्राकृतिविरहादिति दिक्। [NSVV, pp. 162-163]

(204) P. 145, ll. 13-19 : (a) The relevant textual passages are as follows :

(*i*) व्यज्यत इति व्यक्तिरिन्द्रियग्राह्येति न सर्वं द्रव्यं व्यक्तिः। यो गुणविशेषाणां स्पर्शान्तानां गुरुत्व-घनत्व-द्रवत्वं-संस्काराणामव्यापिनः परिणामस्याऽऽश्रयो यथासम्भवं तद्द्रव्यं मूर्त्तिः मूर्च्छितावयवत्वादिति। [NB, p. 690]

(*ii*) व्यक्तिर्गुणविशेषाश्रयो मूर्त्तिरिति सूत्रम्। तत्र व्यज्यत इति व्यक्तिरिन्द्रियग्राह्येति। यद् द्रव्यम् उपलब्धिलक्षणप्राप्तानां स्पर्शान्तानां गुणाणामाश्रयः तत् मूर्च्छितावयवत्वात् मूर्त्तिरिति चोच्यते व्यक्तिरिति च।

एतत्तु न बुद्ध्यामहे—किमिदमवयविद्रव्यस्य लक्षणम, आहो पदार्थत्वेन त्रयाणां प्रसक्तानां जात्याकृतिव्यवच्छेदकं व्यक्तिलक्षणमिति।

वयं तु ब्रूमः—नात्रावयवी व्यवच्छेद्योऽपि तु जात्याकृतिपदव्यतिरिक्तस्य व्यक्तिपदस्यार्थो वक्तव्य इति। सा च व्यक्तिः या न जातिर्नाऽऽकृतिः, तस्या अनेन सूत्रेण संग्रहः व्यक्तिर्गुणविशेषाश्रयो मूर्त्तिरिति। गुणाश्च विशेषाश्च तदाश्रयश्च, अत्र तच्छब्दलोपाद् गुणविशेषाश्रयशब्देन द्रव्यमुच्यते। कर्मापि गुणविशेषाल्लभ्यते, गुणेभ्यो विशेषाः गुणविशेषा इति। गुणविशेषग्रहणं किमर्थम्? गुणपदार्थेन संगृहीताया आकृतेर्निराकरणार्थम्—आकृतिः संयोगविशेषः, सा च गुणग्रहणेन सङ्गृहीतेति तन्निराकरणार्थं गुणविशेषग्रहणम्। गुणविशेषा इति द्विरूपो विग्रहः; गुणाश्च ते विशेषा इति च, गुणेभ्यो विशेषा इति च। आश्रयशब्दसमानाधिकरणो मूर्त्तिशब्दो द्रव्ये वर्त्तते, मूर्च्छते इति मूर्त्तिशब्देन द्रव्यमुच्यते। एवं च प्रतिपदं लक्षणं सिध्यति। एवं च रूपाकाशाद्यवरोधः—यदि प्रतिपदमेतद् व्यक्तिलक्षणं भवति ततो रूपादयश्चाऽऽकाशादयश्च व्याप्यन्ते, अन्यथा तु लक्षणमव्यापकं स्यादिति। अथवा गुणविशेषाणामाश्रय इति गुणाश्च विशेषाश्च गुणविशेषाः तेषामाश्रयो द्रव्यं यत्र मूर्च्छत इति मूर्त्तिः।

[NV, pp. 690-691]

(*iii*) यत्र हि व्यक्त्याकृतिजातीनां समावेशः तत्र व्यक्तिनिर्द्धारणायेदं लक्षणम्। तेनाऽऽकाशाद्यनवरोधेऽपि न दोषस्तत्राऽऽकृतेरभावादिति भाष्यमतम्। यथाह भाष्यकारः—न सर्वं द्रव्यं व्यक्ति-

रिति। यद्यपि गुरुत्वादयः सामान्यगुणास्तथापि गुणान्तरेभ्यो व्यावर्त्तमाना गुणविशेषा इत्युच्यन्ते। अव्यापिन इति सर्वगतस्य द्रव्यस्य परिमाणं व्यच्छिनत्ति। मूर्च्छिताः परस्परं संयुक्ता अवयवा यस्त तन्मूर्च्छितावयम्।

कथं पुनरित्यादिभाष्यमाक्षिपति वार्त्तिककारः—अधिगतत्वादिति। स्वरूपावगमपूर्वकत्वाद् वाक्यप्रतिपादनस्य स्वरूपावगमोऽपि तन्नान्तरीयकत्वात् सिद्ध इत्याक्षेपाभिप्रायः। निराकरोति—न निमित्तत्रैविध्ये सति तद्विशेषज्ञापनार्थत्वात् प्रश्नस्य, शब्दप्रवृत्तिनिमित्तानां त्रैविध्ये सति तद्विशेष एव विषयः तज्ज्ञापनमर्थः प्रयोजनं यस्य स तथोक्तः। एतदुक्तं भवति—सिद्धं कृत्वा भेदमभिधेयत्वं त्रयाणां प्रतिपादितम्, संप्रति स एव भेदः प्रतिपाद्यत इति।

सूत्रमिति बहूनामर्थानां सूचनादिति भावः। अत्र भाष्यव्याख्यानमुपन्यस्यति—व्यज्यत इति। दूषयति—एतत्तु नेति। व्यक्तिः पदार्थ इत्येतत् प्रकृतम्, तत्र यथाऽवयविनो व्यक्तेः पदार्थत्वम्, एवमाकाशादीनां चोत्क्षेपणादीनां च, तत् तथा लक्षणं व्याख्येयं यथा सर्वं संगृह्यते, अन्यथा सूत्रकारोऽकुशलः स्यात्। तदर्थमाह—वयं तु ब्रूम इति। अत्रेदं व्याख्यानम्। व्यक्तिरिति लक्ष्यनिर्देशः, शेषं लक्षणम्। गुणविशेषा इति द्वेधा समासः, गुणश्च विशेषश्चेति प्रथमो विग्रहः, तेनाऽऽकृतिर्निराकृता संगृहीताश्च रूपादयो भवन्ति। तथाऽप्युत्क्षेपणादिव्यक्तेरसंग्रह इति द्वितीयो विग्रहः। गुणेभ्यो विशेषा गुणविशेषाः गुणेभ्यो व्यावृत्ता उत्क्षेपणादय इति यावत्। तथाऽपि न द्रव्यं संगृह्यत इत्यत आह—आश्रय इति। तच्छब्दाध्याहाराद् गुणविशेषाश्रयो द्रव्यमित्यर्थः। प्रतिपदमिति। गुण इति च विशेष इति च आश्रय इति चेति पदानि। अथ वा गुणविशेषाणामाश्रय इति, गुणा रूपादयः विशेषाः कर्माणि गुणेभ्य इत्यर्थात्, तेषामाश्रयश्चेति

द्वन्द्व एव तेषामित्यर्थाद्गम्यते । तत्र मूर्च्छत इति मूर्च्छनं सम्बन्धः, इह चासौ समवाय इति । [NVTT, pp. 690-691]

(*iv*) मूर्च्छितः परस्परावयवसंयुक्तश्च यः सा व्यक्तिः । अथवा गुणाश्च ते विशेषाश्चेति गुणविशेषाः, आकृतिव्यतिरिक्ताः रूपादयः, गुणेभ्यो वा विशेषाः गुणविशेषा उत्क्षेपणादयः । तेषामाश्रयो द्रव्यम्, मूर्त्यन्ते केनचित् प्रकारेण संबध्यन्त इति मूर्त्तिशब्देन विशेषसमवायाभावाः । एवञ्च जात्याकृतिव्यतिरिक्तस्य सर्वस्यापि पदार्थसार्थस्य व्यक्तित्वमनेन सूत्रेण प्रतिपादिता भवति । व्याख्यानतो विशेषप्रतिपत्तिर्नहि सन्देहादलक्षणमिति सूत्रतात्पर्यार्थः । [NTD, p. 69]

(*v*) व्यक्तिरिति लक्ष्यनिर्देशः । व्यज्यत इति व्यक्तिर्ज्ञेयमात्रम्, गुणा रूपादयः, विशेषाः कर्मादयः, आश्रयो द्रव्यम्, तेषामिति सन्निधानात्, तेन सर्वसंग्रहः, जात्याकृत्यादेरपि व्यक्तित्वात् पृथगुपन्यासः स्वरूपभेदसूचनार्थः । तेन वाचकव्यक्तिशब्देभ्यो व्यक्तेः प्राधान्यं जात्याकृत्योरुपसर्जनत्वम्, जात्याकृतिशब्दयोस्तयो प्राधान्यमप्राधान्यं व्यक्तेरिति सर्वपदार्थप्रधानो द्वन्द्वः समासः । मूर्त्तिरिति द्रव्यस्यैव विशेषणं मूर्च्छितावयवत्वात्, तेन चावयवसंस्थानलाभः । यथाश्रुतन्तु न लक्षणमव्यापकत्वादतो वस्तुत्वमेव सामान्यलक्षणम्, जात्याकृत्योरपि 'प्रमेयादिपदवाच्यतया व्यक्तित्वात् ।

[NTĀ, I.O.L, Mss., fol. 163a.]

(*b*) Later commentators like Viśvanātha and Rādhāmohana have explained this *sūtra* as follows :

(*vi*) यद्यपि जात्यादेरपि व्यक्तित्वात् प्रमेयत्वमेव व्यक्तित्वम्, तथाऽपि जात्याकृतिशक्तिविषयव्यक्तेरिदं लक्षणम् । तथा च गुणविशेषः जात्याकृतिसमानाधिकरणः गुणः संख्यादिभिन्नः, तदाश्रयो मूर्त्तिर्व्यक्तिरिति समानार्थकमित्यर्थः ।

परे तु—गुणा रूपादयः, विशेषाः विशेषका उत्क्षेपणादयः, तेषा-माश्रयो द्रव्यम्, तेन जात्याश्रयो व्यक्तिरित्याशयः। विशेषलक्षणमाह—मूर्त्तिरिति। मूर्त्तिः संस्थानविशेषः तद्वान् इत्याहुः। अत्र च मध्यग-पदलोपी समास इत्याशयः।

अन्ये तु—व्यक्तेर्लक्षणं मूर्त्तिरिति। सैव केत्यत आह—गुणविशे-षाश्रय इति। गुणविशेषस्यावच्छिन्नपरिमाणस्याऽऽश्रय इत्याहुः।

[NSV, pp. 689-691]

(vi) गुणविशेषो धर्मविशेषो जातिरिति यावत्। तदाश्रयत्वं समवायेन। मूर्त्तिः स्वाश्रयसमवेतत्वसम्बन्धेनाकृतिविशिष्ट इत्यर्थः। न च निरुक्तसम्बन्धेनाकृतिमत्त्वमेवास्तु, किं जात्याश्रयत्वविशेषणेनेति वाच्यम्। प्रत्येकं लक्षणद्वये तात्पर्यात्। न च जात्याश्रयत्वरूपलक्षण-मात्मादावतिव्याप्तम्, तस्याकृतिविरहेण निरुक्तत्रितयशक्तपदार्थव्यक्ति-त्वाभावादलक्ष्यत्वादिति वाच्यम्, गुणविशेषपदेनावच्छिन्नपरिमाणस्य नित्यावृत्तिजातेर्वा विवक्षणात्।

अथवा—गुणविशेषाश्रयो व्यक्तिर्मूर्त्तिश्चेत्यर्थः। तथा च निरुक्त-गुणविशेषाश्रयत्वं लक्षणम्। 'व्यक्ति'पद'मूर्त्ति'पदयोः पर्यायतेति भावः। इदं च गवादिपदशक्यव्यक्तिलक्षणम्। 'व्यक्ति'पदप्रवृत्तिनिमित्तं च ज्ञेयत्वम्, पदार्थमात्र एव 'व्यक्ति'पदप्रयोगात्। प्रमेयत्वं तु न तथा, तस्य ज्ञेयत्वापेक्षया गुरुत्वात्।

वस्तुतो गुणविशेषाश्रयो मूर्त्तिरित्येकं लक्षणम्। आत्मादिवारणाय मूर्त्तिपदम्। 'द्व्यणुकपदाद् द्व्यणुकादेराकृतिपुरस्कारेण बोधस्य नियमात् तत्रातिव्याप्तिवारणाय गुणविशेषाश्रयत्वम्।' तदर्थस्तु—महत्त्वाश्रयत्वं लौकिकप्रत्यक्षविषयत्वं वेति। आकृतेर्विशेषणविधया पदशक्यत्वेऽपि न प्रवृत्तिनिमित्तत्वम्, किन्तु जातेरेव, शक्यत्वे सति शक्यवृत्तित्वे सति शक्योपस्थितिप्रकारकत्वमिति प्रवृत्तिनिमित्तलक्षणात्। द्रव्यत्वादेर्गवा-

दिपदनिमित्ततावारणाय शक्यत्वे सतीति। आकृतिवारणाय शक्यवृत्तित्वे सतीति। दध्यादेः समवायसम्बन्धेन दधिवृत्तितया दध्यादिपदप्रवृत्तिनिमित्ततावारणाय विशेष्यदलमिति। [NSVV, pp. 163-164]

Here, Rādhāmohana has tried to explain this *sūtra* in a completely different manner.

(205) P. 145, l. 22—P. 146, l. 2 : Here, Rāmabhadra is following Vātsyāyana, Uddyotakara, Vācaspati Miśra I and Vācaspati Miśra II :

(*i*) यया जातिर्जातिलिङ्गानि च प्रख्यायन्ते तामाकृतिं विद्यात्। सा च नान्या सत्त्वावयवानां च नियताद् व्यूहादिति। नियतावयवव्यूहाः खलु सत्त्वावयवा जातिलिङ्गम्, शिरसा पादेन गामनुमिन्वन्ति। नियते च सत्त्वावयवानां व्यूहे सति गोत्वं प्रख्याप्यत इति। अनाकृतिव्यङ्ग्यायां जातौ 'मृत्' 'सुवर्णं' 'रजतमि'त्येवमादिष्वाकृतिर्निवर्तते जहाति पदार्थत्वमिति। [NB, p. 691-692]

(*ii*) <u>जातिर्जातिलिङ्गानि च प्रख्यायन्ते यया तामाकृतिं विद्यात्। सा च नान्या सत्त्वावयवानां नियताद् व्यूहात्।</u> नियतव्यूहाः खल्ववयवा जातिमनुमापयन्ति, शिरःपाण्यादिमदाकारसामान्येन गोत्वं व्यज्यत इति, शिरःपाण्यादीनां वाऽवयविशेषदर्शनेन [? वाऽवयवविशेषाणां दर्शनेन]। कदाचित् पुनराकृतिः पदार्थत्वं जहाति। क्व पुनर्जहाति ? यत्राऽऽकृतिव्यङ्ग्या जातिर्न भवति, यथा 'मृत्' 'सुवर्णम्' 'रजत'मिति। आकृतौ नियमो न जातौ, सर्वाऽऽकृतिर्जातिलिङ्गमिति न पुनः सर्वा जातिराकृत्या लिङ्ग्यते।

[NV, pp. 691-692]

(*iii*) <u>जातिश्च</u> <u>जातिलिङ्गानि</u> च <u>जातिलिङ्गानि</u>, तान्याख्यायन्ते यया सा <u>आकृतिः</u>। शिरःपाण्यादिव्यूह आकृतिर्जातिं मनुष्यात्वादिकमाचष्टे। शिरोनासिकाललाटचिबुकादीनां शिरोऽवयवानां व्यूहो

मनुष्यत्वादिजातिलिङ्गं शिर आचष्टे। शिरसा पादेन गामनुमिन्वन्तीति भाष्यम्। यद्यपि गोत्वं प्रत्यक्षमेव नाऽऽकृतिव्यङ्ग्यं तथापि विप्रतिपद्यमानं प्रत्युच्यते अनुमिन्वन्तीति। न पुनः सर्वा जातिराकृत्या लिङ्ग्यत इति। मृत्सुवर्णरजतादिका हि रूपविशेषव्यङ्ग्या जातिर्नाऽऽकृतिव्यङ्ग्या; ब्राह्मणत्वादिजातिस्तु योनिव्यङ्ग्या, आज्यतैलादीनां जातिस्तु गन्धेन रसेन वा व्यज्यते। अत एव न सार्षपादीना तैलत्वमस्ति, तद्व्यञ्जकयोर्गन्धरसयोरभावात्, भाक्तस्तु तैलशब्दप्रयोगः। क्षीरजातिरपि रसव्यङ्ग्यैव, अत एवाऽऽमिक्षायाः क्षीरत्वं न तु वाजिनस्य, तद्व्यञ्जकरसभेदस्य वाजिनेऽभावाद् आमिक्षायां च भावादिति।

[NVTT, pp. 691-692]

(*iv*) जातिस्तल्लिङ्गानि च, तान्याख्यायन्ते, यथा शिरःपाण्यादिव्यूहरूपा आकृतिर्मनुष्यत्वजातिव्यञ्जिका, तथा चावयवानां संयोग आकृतिरिति लक्षणम्। [NTĀ, I.O.L. Mss. fol. 163b.]

(206) P. 146, ll. 2-4; This seems to be an original interpretation of Rāmabhadra, which has been mentioned without approbation by Viśvanātha and Rādhāmohana:

(*i*) जातिलिङ्गमित्याख्या यस्या, जातेर्गोत्वादेर्हि, सास्नादिसंस्थानविशेषो लिङ्गम्, तस्य च परम्परया द्रव्यवृत्तित्वम्।

जातिर्द्रव्यसमवायिकारणतावच्छेदिका लिङ्गं धर्मो यस्याः सेत्यर्थ इति कश्चित्। [NSV, pp. 692-693]

(*ii*) जातेर्लिङ्गं व्यञ्जकं तदेवाख्या यस्याः सा। आकृतेश्च स्वसमवायिसमवेतत्वलक्षणपरम्परासम्बन्धेन गवाद्यवयवसंस्थानरूपाकृतिप्रकारकज्ञानस्य गोत्वादिप्रत्यक्षहेतुत्वादिति भावः।

केचित्तु—जातिर्द्रव्यासमवायिकारणतावच्छेदिकाजातिर्लिङ्गं धर्मो यस्याः सेत्यर्थ इत्याहुः। [NSVV, p. 164]

(207) P. 146, ll. 7-10 : (*a*) Here, Rāmabhadra follows the line of earlier commentators like Vātsyāyana and others :

(*i*) या समानां बुद्धिं प्रसूते भिन्नेष्वधिकरणेषु, यया बहूनीतरेतरतो न व्यावर्त्तन्ते, यो अर्थोऽनेकत्र प्रत्ययानुवृत्तिनिमित्तं तत् सामान्यम् । यच्च केषाञ्चिदभेदं कुतश्चिद् भेदं करोति तत् सामान्यविशेषो जातिरिति ।

[NB, p. 693]

(*ii*) यथा भिन्नान्यनेकानि वस्तुनि इतरेतरतोऽनुवृत्तिप्रत्ययहेतुत्वेन व्यवतिष्ठन्ते सा जातिः । य'थेमानि कुण्डानी'त्यनुववर्त्तन्ते, 'नेमानि कुण्डानी'ति व्यावर्त्तन्ते । तदेकं सन्निमित्तमनुवृत्तिकारणं यत्तत् सामान्यविशेषो जातिरिति । तत् समानप्रत्ययोत्पत्तिकारणं जातिरिति । जातौ नियमो न समानप्रत्ययोत्पत्तौ, जातिमन्तरेणापि दृष्टत्वात्— जातिमन्तरेणापि समानप्रत्ययो दृष्टः यथा पाचकादिषु, तस्माद् व्यवस्थितं व्यक्त्याकृतिजातयः पदार्थ इति । गवादिष्वनुवृत्तिप्रत्ययो दृष्टः पिण्ड-व्यतिरिक्तात् लिङ्गवद्भवति, विशेषवरणात्, नीलादिप्रत्ययवदिति ।

[NV, p. 693]

(*iii*) प्रसूत इति प्रसवः समानबुद्धेर्भिन्नेषु प्रसोत्री । या जातिः साऽवश्यं समानप्रत्ययं प्रसूते, न पुनर्या समान प्रत्ययं प्रसूते सा जातिः, पाचकादिषु व्यभिचारात् । व्यक्त्याकृतिभ्यां भेदकत्वमात्रेण चैतल्लक्षणं न तु सर्वथा वेदितव्यम् । [NVTT, p. 693]

(*iv*) परस्परव्यावृत्तेषु गवादिषु अनौपाधिकानुवृत्तबुद्धेः प्रसूतिका (या) सा जातिरिति । एवञ्च पाचकादिष्वनुवृत्तिबुद्धिजनकत्वान्न-जातेरसद्भावः । अबाधितस्यानुवृत्तप्रत्ययस्यानन्यनिमित्तत्वात् । न च वृत्तिविकल्पादिबाधकं प्रमाणम्, तस्यावयविसमर्थनसमये निराकृतत्वात् । न चान्यव्यावृत्तिरूपं सामान्यम्, तस्य स्वलक्षणाद् भेदाभेदनानात्वैकत्व-तुच्छत्वादिविकल्पानुपपत्तेः । तस्मादस्ति वस्तुसती जातिः समान-प्रसवात्मिकेति सूत्रार्थः । [NTD, p. 70]

(*v*) भिन्नेषु समानबुद्धेरनुगतज्ञानस्य प्रसूत इति प्रसवः स एवात्मा स्वरूपं यस्याः सा जातिरिति प्रमाणमुक्तम्। नित्यानेकसमवेतत्वे तु लक्षणे तात्पर्यम्, यथाश्रुतस्योपाधावतिव्याप्तेः, सामान्यव्यपदेशस्तत्र यौगिकः। 'आकाश' -पदस्य तु व्यक्तावेव शक्तिः, न तु शब्दाश्रयत्वोपाधियोगात्, सहप्रयोगानुपपत्तेः; न चैव'माकाश'पदान्निर्विकल्पकापत्तिः, नियमतो यद्धर्मवत्तयोपस्थितेर्यत्र शक्तिग्रहः तत्र तच्छक्तेन पदेन तस्याप्युपस्थितिरिति फलबलेन कल्पनात्—इत्येके। तन्न, व्यक्तेरवाच्यतापत्तेः; तथा च शब्दाश्रयत्वेऽपि शक्तिरेव, पदान्नियतोपस्थितेः शक्तिसाध्यत्वात्, सहप्रयोगस्य वाच्यादिपरत्वेनाप्युपपत्तेरिति।

पदादपि निर्विकल्पकं सम्भवतीति केचित्।···

[NTĀ, I.O.L. Mss,, fol. 163b-164a]

(*b*) Among the later commentators, Viśvanātha seems to record the view of Rāmabhadra in an oblique manner. So is the case with Rādhāmohana :

(*vi*) समानः समानाकारकः प्रसवो बुद्धिजननम् आत्मा स्वरूपं यस्याः सा। तथा च समानाकारकबुद्धिजननयोग्यत्वमर्थः।

समानाकारकबुद्धिजननयोग्यधर्मविशेषो नित्यानेकसमवेतरूपोऽर्थः—इत्यपि वदन्ति।

इदं तु बोध्यम्। एवं सत्याकृतिविषयको गवादिपदाच्छाब्दबोधः, अनुभवबलेन तथैव कार्यकारणभावकल्पनात्, अन्यथा लाघवाद्'गो'-पदस्य गोत्वविशिष्टे शक्तिरेव स्यात्। [NSV, pp. 693-696]

(*vii*) प्रसवो लौकिकप्रत्यक्षात्मकं ज्ञानं समानमेकाकाराकलमंधर्मिविषयकं तादृशं ज्ञानं यस्मान् तादृश आत्मा स्वरूपं यस्याः सेत्यर्थः तादृशज्ञाने लौकिकप्रत्यक्षरूपे विषयविधया जातेर्हेतुत्वसम्भवादिति

भावः । एतेन तादृशजातौ प्रत्यक्षं प्रमाणं दर्शितम् । एवं च लौकिकप्रत्यक्षविषयमात्रसमवेतत्वं गोत्वादिजातिलक्षणम् । जातिसामान्यलक्षणं तु नित्यानेकसमवेतत्वमिति । [NSVV, p. 165]

(208) P. 147, ll. 1-8 : These lines have been referred to by Jagadīśa Tarkālaṁkāra in his *Śabdaśaktiprakāśikā* in the following manner :

सौत्रमाकृतिपदं न संस्थानपरम्, परन्तु करणव्युत्पत्त्या आकारनिरूपकार्थं जातिव्यक्त्योः संसर्गपरमेव, अन्यथा समवायादेरपि सम्बन्धविधया गवादिपदशक्यत्वेन तदनुक्त्या मुनेर्न्यूनतापत्तेः । कादाचित्कस्तु जातिसंस्थानाभ्यां गवादेरवगमो गवादिपदस्य जात्याकृतिविशिष्टे शक्तिभ्रमेण लक्षणया वा सम्पाद्य इति पुनर्न्यायरहस्येऽस्मद्गुरुचरणाः ।

[ŚŚP, Chowkhamba edition, p. 132

(215) P. 148, ll. 1-3 : (*a*) According to Vācaspati Miśra I, Udayana and Vācaspati Miśra II, the third Adhyāya is connected to the second Adhyāya through हेतुतासङ्गति :

(*i*) अत्र भाष्ये परीक्षितानि प्रमाणानि प्रमेयमिदानीं परीक्ष्यत इति वृत्तानुकीर्त्तनं प्रमेयपरीक्षां वर्त्तिष्यमाणां प्रति वृत्तायाः प्रमाणपरीक्षाया हेतुभावं दर्शयितुम् । प्रमाणेन हि प्रमेयं परीक्ष्यते नान्येन । न च तदतिरिक्तं प्रमेयपरीक्षायै प्रभवति । तस्मात् प्रमाणपरीक्षा हेतुः, हेतुमती प्रमेयपरीक्षेति ।...अत्र च यद्यपि स्वरूपेणात्मनैव परीक्षा प्रतिजानीते, तथाऽपि लक्षणपरीक्षाद्वारेण लक्ष्यपरीक्षणाल्लक्ष्यपरीक्षैव द्रष्टव्या ।

[NVTT, p. 697]

(*ii*) द्वितीये प्रमाणानि परीक्षितानि । इहेदानीं कारणरूपप्रमेयषट्कं परीक्षिष्यते । तदेवाध्यायार्थः ।...तत्र पूर्वापराध्यायसङ्गतिं दर्शयितुं भाष्यम्—परीक्षितानीत्यादि । तस्य तात्पर्यमाह—वृत्तानुकीर्त्तनमिति । ननु प्रमाणपरीक्षया प्रमेयपरीक्षा न जन्यते, तत् कुतः

कार्यकारणभावेनानन्तर्यमत आह—न चेति ।···ननु यदि लक्षणतः समानासमानजातीयव्यवच्छिन्नमात्मतत्त्वमधिगतम्, किमस्य परीक्षणीयम्, निष्पादितक्रिये कर्मणि साधनस्य साधनन्यायातिपातात् ? न चेदाश्रयासिद्धेस्तत्परीक्षानुपपत्तिरत आह—अत्र चेति । मख्यतस्तर्हि लक्षणपरीक्षैवाऽस्त्वित्यत आह—लक्षणपरीक्षाद्वारेणेति । लक्षणपरीक्षाया निष्प्रयोजनत्वेन चेतनप्रवृत्ति प्रत्यनङ्गत्वात्, सप्रयोजनतया लक्ष्योद्देशेन प्रवृत्त्युपपत्तेः । आहत्य च साध्यस्य व्याप्तुमशक्यत्वेन साधनद्वारा तद्व्याप्यत इत्यर्थः ।

ननु लक्षणस्य प्रमाणविशेषतया तत्परीक्षा प्रमाणपरीक्षैव सम्पद्यत इति कुतो हेतुहेतुमद्भावसङ्गतिरिति ?

अत्र केचिदाहुः—प्रमाणपरीक्षाऽविशेषेऽपि सामान्यविशेषभावेन हेतुहेतुमद्भावोपपत्तिः । द्वितीये हि प्रमाणसामान्यं परीक्षितम् । इह त्वात्मादिलक्षणरूपप्रमाणविशेषः परीक्ष्यते, निरूपितसामान्यस्य च विशेषे जिज्ञासा स्यादिति जिज्ञासाजननद्वारेण विशेषपरीक्षां प्रति सामान्यपरीक्षाया हेतुत्वमिति ।

तदसत् । द्वितीयेऽपि लक्षणद्वारेणैव लक्ष्यपरीक्षणात् । न हि तत्र लक्षणानपेक्षं प्रमाणमात्रं परीक्ष्यते, आत्माश्रयेतरेतराश्रयादिदोषात्, नापि लक्ष्यानपेक्षं लक्षणमात्रम्, तथा सति प्रत्यक्षादिलक्षणनिरूपणानुपपत्तिप्रसङ्गात् । तस्मात् लक्षणपरीक्षायांस्तत्र प्रमाणमुद्देश्यम्, इह तु प्रमेयमित्येतदेव ज्यायः । अतएव—परीक्षितप्रमाणाधीनत्वेन तु प्रमाणपरीक्षाया इहाप्यपरीक्षितेनैव लक्षणेन प्रमेयव्यवस्था भविष्यति, लक्षणस्य प्रमाणविशेषत्वात्—इत्यपि निरस्तम् । न हि भ्रमः प्रमाणमवश्यं परीक्षणीयमिति, किन्तु लिङ्गम् । लक्षणं च लिङ्गविशेषः । अतस्तदपरीक्षितं न स्वगोचरावधारणायालमित्यवश्यं परीक्षणीयमिति ।···तदेतेन परीक्षाविषयो विविच्य दर्शितः । संशयं चाग्रे भाष्यकार एव कारणप्रदर्शनद्वारेण प्रदर्शयिष्यति । अतः परीक्षाप्रयोजनमवशिष्यते ।...

[TTP, Thakur's Press Copy, Ch. III,...pp. 1-3]

(*iii*) यावद् व्यतिरेकिसामान्यं न परीक्ष्यते तावत् तद्विशेषस्य गमकतौपयिकं रूपं नावधार्यत इति तत्साध्यत्वात् हेतुहेतुमद्भाव-सङ्गत्या प्रमाणपरीक्षानन्तरं प्रमेयपरीक्षेति केचित्। तन्न, प्रत्यक्षलक्षण-रूपव्यतिरेकिविशेषपरीक्षायां व्यभिचारात्, किन्तु प्रमाणपरीक्षाजिज्ञा-सापगमः प्रमेयपरीक्षाहेतुरिति परम्परया हेतुहेतुमद्भावः। न चैव-मवसर एव, प्रतिबन्धकाभावज्ञानस्यानुपजीवनात्।

[NTĀ, I.O.L. Mss. Chapter III, fol. 1a]

The influence of Udayana on Vācaspati Miśra II is quite evident here.

(*b*) Rāmabhadra's view that this is a case of अवसरसङ्गति is shared by Bhaṭṭa Vāgīsvara and Viśvanātha :

(*iii*) अथेदानीमवसरप्राप्तं प्रमेयं परीक्षमाणः··· [NTD, p. 71]

(*iv*) अथावसरतः प्रमेयेषु परीक्षणीयेषु प्रथमोद्दिष्टमात्मादिप्रमेय-षट्कं तृतीये परीक्षणीयम्······ [NSV, p. 71]

(*c*) Keśava Miśra Tarkācārya, while admitting this as a case of अवसरसङ्गति, also admits the possibility of हेतुतासङ्गति and प्रसङ्गसङ्गति as well :

(*v*) इह पूर्वपराध्याययोः प्रमाणप्रमेयपरीक्षयोर्हेतुहेतुमद्भाव-सङ्गतिः। अवसरो वा, प्रतिबन्धिकायाः प्रमाणजिज्ञासाया उपगमात्। प्रसङ्गो वा, स्मृतायाः प्रमेयपरीक्षाया उपेक्षानर्हत्वात्। [GSP, p. 41]

It is not known for certain as to why Bhaṭṭa Vāgīsvara, Rāmabhadra and Viśvanātha did not share the view of Vācaspati Miśra I. It is of some interest to note that for once, Keśava Miśra Tarkācārya has disagreed with Vācaspati Miśra II, because while Keśava admits the possibility of अवसरसङ्गति, Vācaspati Miśra II has specifically denied it. Rādhāmohana is silent on this point. [See NSVV, p. 166.]

(316) P. 15, 2-3 : There is some dispute about the purpose of the third Adhyāya, and especially of its first Āhnika :

(*i*) अत्र च यद्यपि स्वरूपेणात्मन्येव परीक्षां प्रतिजानीते तथाऽपि लक्षणपरीक्षाद्वारेण लक्ष्यपरीक्षणाल्लक्षणपरीक्षैव द्रष्टव्या ।···

[NVTT, p. 697]

(*ii*) द्वितीये प्रमाणानि परीक्षितानि । इहेदानीं कारणरूपप्रमेयषट्कं परीक्षिष्यते । तदेवाध्यायार्थः । तत्रोत्तरषट्कं प्रति कारणरूपप्रमेयषट्कस्य मध्ये बुद्ध्युत्पादकप्रमेयपरीक्षा प्रथमाह्निकार्थः । न चैवं मनसोऽप्यत्रान्तर्भावप्रसङ्गः, इन्द्रियत्वेन तथा प्रसक्तावपि वैधर्म्यसंसूचनाय प्रयोजनवशेन बहिर्भावस्य प्रथमाध्याय एव समर्थितत्वात् ।

[TTP, Thakur's Press Copy ; Ch. III, p. 1]

(*iii*) अत्रापि क्रमानुरोधात् आदावात्मादिषट्कपरीक्षा, सैवाध्यायार्थः । न चैतद्रूपस्य प्रयोजनाभावेनाजिज्ञासितत्वान्नाध्यायार्थावच्छेदकत्वफलमिति वाच्यम्, प्रतिपाद्यसकलमात्रवृत्तेरेव लाघवेन तदवच्छेदकत्वात्, अतएव छलप्रमेयान्यपरीक्षा द्वितीयार्थ इति नव्याः ।

प्राञ्चस्तु —कारणरूपप्रमेयषट्कपरीक्षैवाध्यार्थः, कारणत्वञ्चोत्तरषट्कमिलितं प्रति ; न चादृष्टे कार्यप्रवृत्तौ प्रसङ्गः, तस्य भोगतत्साधनमात्रहेतुतया मोक्षाजनकत्वेन पहेतुत्वाभावात् (?) । न चेश्वरप्रयत्ने कारणप्रवृत्तावतिव्याप्तिः, अदृष्टजनकानित्यप्रयत्नस्य प्रवृत्तितया तस्याऽतथात्वादित्याहुः ।

तत्रापि हेतुत्वेन आम्नायक (?) हेतुत्वेनोपजीव्यत्वात् क्रमानुरोधाच्च बुद्धिमनोभिन्नकारणरूपप्रमेयपरीक्षा प्रथमाह्निके······

[NTĀ, I.O.L. Mss. Ch. III, fol. 1a]

(*iv*) कारणरूपप्रमेयषट्कपरीक्षा चेत्राध्यायार्थः । तत्र बुद्ध्युत्पादकप्रमेयपरीक्षा प्रथमाह्निके इति प्राञ्चः । मनोबुद्धिभिन्नकारणप्रमेयपरीक्षा तदर्थ इति तत्त्वम् ।

[GSP, p, 41]

(*v*) अथावसरतः प्रमेयेषु परीक्षणीयेषु प्रथमोद्दिष्टमात्मादिप्रमेयषट्कं तृतीये परीक्षणीयम्, तेनाऽऽत्मादिषट्कपरीक्षैवाध्यायार्थः। तत्राऽऽत्मादिचतुष्कपरीक्षा प्रथमाह्निकार्थः······ [NSV, p. 711]

(217) P. 148, ll. 3-4: The विप्रतिपत्तिवाक्य as formulated by others are as follows:

(*i*) तत्र वादिविप्रतिपत्तेरात्मा इन्द्रियभिन्नो न वेति संशयः······

[NTĀ, I.O.L. Mss. Ch. III, fol. 1a]

(*ii*) ······आत्मा विषयः। स इन्द्रियाद् भिन्नो न वेति संशयः।

[GSP, p. 41]

(*iii*) तत्रेन्द्रियं ज्ञानवन्न वेति संशये करणत्वेन सिद्धानामिन्द्रियाणां चैतन्यमस्तु लाघवात्······ [NSV, p. 711]

For other विप्रतिपत्तिवाक्य-s see N.B., pp. 697-709, NV, pp. 697-698, NVTT, pp. 697-698.

(218) P. 148, l. 15: Before this, *Nyāyatātparyadīpikā* of Bhaṭṭa Vāgīśvara reads the sentence व्यपदेशस्योभयथा सिद्धेः संशयः as a *sūtra*. In the current reading of *Nyāyabhāṣya*, we come across the sentences कुतः संशयः? व्यपदेशस्योभयथा सिद्धेः [NB, p. 698]. In this connection, the remarks of Vācaspati Miśra I are as follows:

अत्र भाष्यकारेण विचारपूर्वकः संशयो दर्शितः। किं देहेन्द्रियबुद्धिसंघातमात्रमात्मेति। संशयकारणं चोक्तं व्यपदेशस्येति।

[NVTT, pp. 697-698]

On this, the remarks of Udayana are as follows:

व्यपदेशस्योभयथा सिद्धेः संशय इति भाष्यवाक्यं न सूत्रमिति टीकाकृतोऽभिसन्धिः।

[TTP, Ch. III, Thakur's Press Copy, p. 3]

(219) P. 148, ll. 16-19: This line of interpretation is followed by Viśvanātha and Rādhāmohana :

(*i*) एकस्यैव दर्शनस्पर्शनाभ्याम् अर्थस्य ग्रहणात् । दर्शनस्पर्शने ज्ञानविशेषौ । तृतीया च प्रकारे । तेन चाक्षुषस्पार्शनोभयवत्त्वेनैकस्य धर्मिणः प्रतिसन्धानादित्यर्थः ।... [NSV, p. 712]

(*ii*) दर्शनस्पर्शनाभ्यां चाक्षुषस्पार्शनज्ञानप्रकारेण । एकस्यैवार्थस्य वस्तुनो ग्रहणात् प्रत्यक्षात् ।... [NSVV, p. 166]

(220) P. 149, l. 2: It seems that some commentators accepted the sentence सन्दिग्धत्वादहेतुः that occurs in the *Bhāṣya* on this *sūtra* as a separate *sūtra*. Vācaspati Miśra I introduces this sentence as follows :

सिद्धान्तभाष्यम्—सन्दिग्धत्वादहेतुः । अनन्यथासिद्धावन्वयव्यतिरेकौ कारणत्वमात्रे प्रमाणम्, न तु कर्ता न चेतनश्चेतनं करणमित्यत्रेत्यर्थः । [NVTV, p. 713]

Udayana's comments on this are as follows :

सूत्रभ्रमं निवारयति—सिद्धान्तभाष्यमिति । दर्शनस्पर्शनाभ्यामेकार्थग्रहणादित्यनेन हि सूत्रेणानेकेन्द्रियकरणकोऽनेकार्थदर्शी कश्चिदेकश्चेतन इति विवक्षितम् । तत्र पूर्वपक्षी प्रतिसन्धानलक्षणं हेतुमवधीर्य साध्यमात्रं विहन्तुमाह—न विषयव्यवस्थानादिति । अस्यार्थः—यदाऽपि चेतनानन्तरं कल्पितं तदाऽपि न सर्वः सर्वज्ञः, किन्तु कश्चित् क्वचिज्ज्ञानवान् । तथा च वरमिन्द्रियाण्येव स्वस्वविषयव्यवस्थितचैतन्यानि सन्तु, कृतमपरेण चेतनेन । तदेतद् व्यवस्थितविषयमिन्द्रियाणां चैतन्यं यत्प्रमाणकं तन्न सूत्रे स्फुटमिति भाष्यकारेणाविष्कृतं चक्षुर्व्यसनीत्यादिना । अतो भाष्याशङ्किते प्रमाणे भाष्यमुत्तरं सन्दिग्धत्वादहेतुरिति । सौत्रं त्वथ सूत्रम्—तद्व्यवस्थानादेवात्मसद्भावादप्रतिषेध इति युक्तमिति भावः ।

[TTP, Thakur's Press Copy, Chapter III, p. 11]

(221) P. 149, l. 9: The traditional reading of this *sūtra* is तद्व्यवस्थानादेवात्मसद्भावादप्रतिषेधः.

(222) P. 149, l. 13- P. 150, l. 4: Another alternative set of explanations of NS 3.1.1-3.1.3 has been recorded by Rādhāmohana:

अन्ये तु—दर्शनस्पर्शनाभ्यामेकार्थस्य विषयस्य ग्रहणात्। तथा च घटादिप्रत्यक्षं विनिगमनाविरहेण चक्षुस्त्वचोर्वक्तुमशक्यमित्यतिरिक्त आत्मा सिध्यति। श्रवणादीनां विषयभेदसत्त्वादेव दर्शनस्पर्शनमात्रोक्तिः।

शङ्कते—न विषयव्यवस्थानात्। विनिगमनाविरहेण चक्षुस्त्वचोर्न चैतन्यस्वीकारो विषयव्यवस्थानात् चक्षुस्त्वचोरपि रूपस्पर्शयोर्विषययोर्भेदात्। एवं च 'रूपं पश्यामि न स्पृशामी'त्यनुभवेन चाक्षुषात्मकविजातीयज्ञानस्य, 'स्पर्शं स्पृशामि न पश्यामी'ति प्रतीत्या स्पार्शनात्मकविजातीयज्ञानस्य च सिद्धौ चक्षुषि चाक्षुषस्य त्वचि त्वाचस्य स्वीकारेण न विनिगमनाविरह इति भावः। इदमुपलक्षणम्—विषयैक्येऽपि ज्ञानवैलक्षण्येन विनिगमनासम्भव इति।

समाधत्ते—तद्व्यवस्थानादेवात्मसद्भावादप्रतिषेधः। विषयभेदादेवाऽत्माऽतिरिक्तः स्वीकार्यः। अन्यथा चक्षुरादिबहिरिन्द्रियाणां नियमितमहत्त्वादिमद्वस्तुविषयकज्ञानजननस्वाभाव्यादतीन्द्रियपरमाण्वादिविषयकानुमित्यादिर्न स्यात्, समवायिकारणाभावात्, चक्षुरादेस्तदजनकत्वात्। न च—चक्षुरादेश्चाक्षुषादिजनन एव विषयभेदव्यवस्था, न त्वनुमित्यादाविति वाच्यम्। विनिगमनाविरहाच्चक्षुरादौ तत्स्वीकारासम्भवात्। एवं चाक्षुषाधीनं स्मरणं चक्षुषि स्वीकार्यं न त्वगादौ, वैयधिकरण्येनासम्भवात्। तथा च चक्षुरुपघाते तत्स्मरणं न स्यात्, आत्मनस्तु नित्यत्वान्नैष दोषः। मनसः स्मृत्यादिसमवायित्वसम्भवेऽप्यग्रे दूष्यत्वादिति जन्यज्ञानत्वावच्छिन्नसमवायिकारणतयात्मा सिध्यति—इति प्राहुः। [NSVV, pp, 167-168]

(223) P. 150, ll. 17-18 : Rāmabhadra has not discussed the *saṅgati* that connects this *prakaraṇa* with the earlier one. The problem has been discussed by Vācaspati Miśra II, whose remarks are as follows :

(*i*) एवमपि सर्वग्राहिशरीरमेवैकमादाय विश्वस्यापि प्रतिसन्धानेन ततोऽपि समीहितसिद्धिरिति तन्निरासाय इन्द्रियव्यतिरेकप्रकरणात् पश्चात् स्थिरात्मसाधकत्वेनाभ्यर्हितत्वाच्चक्षुरद्वैतप्रकरणात् प्राक् एककार्यत्वसङ्गत्या प्रकृतस्थिरात्मोपपादकत्वेन निर्वाहकैक्यसङ्गत्या च शरीरव्यतिरेकप्रकरणम् ।···

[NTĀ, I.O.L. Mss. Ch. III, fol. 2a.]

Here, Vācaspati Miśra II has taken the clue from Udayana, whose remarks are as follows :

एवं प्रथमप्रकरणे इन्द्रियव्यतिरेके साधिते यदि कश्चिच्चोदयेत्—ननु मा भुवन्निन्द्रियाणि चेतनानि, व्यवस्थितविषयत्वात्, शरीरं तु भविष्यति । अव्यवस्थितविषयं हि तत्, योऽहं गौरः पीनो युवा सौभागिनेयः पुनरुक्तजन्मा रूपं दृष्टवान्, सोऽहं स्पर्शं स्पृशामीत्यनुभवादिति । तत्रेदं प्रकरणान्तरमुपतिष्ठते—शरीरदाहे इत्यादि ।

[TTP, A.L. Thakur's Press Copy, p. 12.]

(224) P. 150, l. 19 : (*a*) Vācaspati Miśra II offers the following interpretation of this *sūtra* :

शरीरदाहे प्राणिवधे कृते यत् पातकं तस्याभावप्रसङ्गः, हन्तरि ऐहिकशरीरात्मके फलाजनकत्वम् अहन्तरि चामुष्मिकशरीरे फलजनकत्वमिति कृतहानाकृताभ्यागमप्रसङ्गः, ततश्च देहाधिक आत्मेत्यर्थः ।···

[NTĀ, I.O.L. Mss. Ch. III, fol. 2a.]

(*b*) Rādhāmohana explains this *sūtra* in yet another different manner ;

···शरीरस्य मृतशरीरस्य दाहे पातकाभावात् पापानुत्पत्तेः, शरीरस्यात्मत्वे च तद्दाहे हिंसात्वेन पापं तत्कर्त्तुः स्यादिति भावः ।

[NSVV, p. 163]

(*c*) **Vācaspati Miśra I, Udayana, Vācaspati Miśra II, Keśava Miśra Tarkācārya, Viśvanātha and Rādhāmohana have anticipated an objection against this *sūtra*, and answered it :**

(*i*) ...अयं यद्यपि भूतचैतनिकानां नानिष्टप्रसङ्गस्तथाऽपि शाक्यान् प्रति द्रष्टव्यः, ते हि प्राणातिपातं पातकमिच्छन्ति। एवं च न बुद्धिरात्मेति वक्तव्ये देहादिग्रहणं विचित्राभिमन्धित्वात् पुंसाम्। यदि कश्चिद् भूतचैतनिकः प्राणातिपातकृतं पातकमिच्छेत्, तं प्रति दूषणं भवत्वेवमर्थमिति मन्तव्यम्। [NVTT, p. 716]

(*ii*) तच्चैतदसमञ्जसम्, भूतचैतनिकानां पातकाभावाभ्युपगमेनेष्टप्रसञ्जनात्। अत आह—एवं च न बुद्धिरिति। उपलक्षणं चैतत्। यदि कश्चित् भूतचैतनिकोऽपि पातकमिच्छेदिति। यदि कश्चित् शाक्योऽपि भूतचैतन्यमिच्छेदित्यपि द्रष्टव्यम्। शक्यते चाङ्गीकारयितुम्, प्रतिक्षणपरिणामे विलक्षणशक्तेः कार्यस्योत्पादाभ्युपगमात्—इति यथाश्रुतसूत्रानुरोधेन व्याख्यातम्। वस्तुतस्तु—दाहेन नाशमुपलक्षयति, पातकाभावेन च कालान्तरोपयोगिस्थायिगुणाभावम्। शाक्यचार्वाकयोः साधारणत्वाच्चैवमुक्तमिति। अतएव भाष्यवार्त्तिके न शरीरादिसंघातेति।

[TTP, Thakur's Press Copy, Ch. III, p. 13.]

(*iii*) न च पूर्वपक्षिणा चार्वाकेन पातकपरलोकयोरनङ्गीकारात् तं प्रति पातकाभावप्रसङ्गो नानिष्ट इति वाच्यम्, पुंसां विचित्राभिसन्धित्वेन तस्यापि तदभ्युपगमसम्भवात्, अलौकिकसाधनद्रढिमभावेन प्रसञ्जनाच्च। [NTĀ, I.O.L. Mss. Ch. III, fol. 2a.]

(*iv*) यद्यपि भूतचैतनिकानां नैतदनिष्टम्, तैः पातकानभ्युपगमात्। तथापि पातकाभ्युपगन्तॄन् शाक्यादीन् प्रतीदं तथा।... [GSP, p. 42.]

(*v*) यद्यपि भूतचैतन्यवादिनां पातकं नोपपद्यते, तथापि तस्य प्रसाध्याङ्गकत्वादेकदेशिनः पूर्वपक्षित्वाद्वा न दोष इति भावः। [NSV, p. 720.]

(*vi*) हिंसायां पापं वदतां बौद्धानां मतेऽपि समाधानमिदं सम्भवतीति कश्चित्। [NSVV, p. 166.]

The objection anticipated here is perfectly in order, but the answer is not convincing.

(225) P. 151, l. 10-11 : (*a*) This interpretation has been recorded by Viśvanātha and Rādhāmohana :

(*i*) तन्नित्यत्वात् शरीरनाशे शरीरविशिष्टात्मनाशस्य नियतत्वादित्यपि कश्चित्। [NSV, p, 723]

(*ii*) तन्नित्यत्वात् शरीरविशिष्टात्मत्मव्यतिरेकस्य नियतत्वादित्यपि वदन्ति। [NSVV, p. 169]

(*b*) Uddyotakara, Bhaṭṭa Vāgīśvara, Vācaspati Miśra II and Keśava Miśra Tarkācārya have interpreted this *sūtra* in a different manner :

(*iii*) यस्याऽऽत्मा नित्यः तस्यापि हिंसाफले न प्राप्नुतः ; हिंसा तावन्न प्राप्नोति नित्यत्वात्, फलमपि नाऽऽत्मनो युक्तम् अनुपकार्यत्वात्। अस्य चार्थस्य ज्ञापिकां कारिकामुदाहरन्ति—

वर्षातपाभ्यां किं व्योम्नश्चर्मण्यस्ति तयोः फलम्।
चर्मोपमश्चेत् सोऽनित्यः खतुल्यश्चेदसत्समः॥

तदेवमेकस्मिन् मते हिंसा विफला अपरस्मिंस्तु मतेऽनुपपन्ना निष्फला चेति। [NV, pp. 720-721.]

(*iv*) तन्नित्यत्वात् तस्यात्मनो नित्यत्वेनाविकारित्वात् न हिंसा नापि फलभोगः। नित्यत्वेनाविकारित्वेन फलभोगलक्षविकारासम्भवात्। सम्भवे वा नित्यत्वाभावप्रसङ्गादिति कृतनाशाकृतागमौ समानौ, अनुपपन्ने च हिंसातत्फलभोक्तृत्वे इति सूत्रार्थः। [NTD, p. 73.]

(*v*) तदभावः हिंसाफलयोरभावः, सात्मकप्रदाहेऽपि सात्मकशरीरवधेऽपि तन्नित्यत्वात् आत्मनो नित्यत्वात्; तथा च नित्यस्य

जन्यधर्मानाश्रयतया हन्तुर्नरकाभावो घात्यस्यापि च नित्यतया हिंसाऽभाव इत्यर्थः। [NTĀ, I.O.L. Mss. Ch. III, fol. 2a.]

(*vi*) सात्मकस्यापि शरीरस्य दाहे तदभावः हिंसाफलयोरभावस्तुल्यस्तन्नित्यत्वात् आत्मनो नित्यत्वात्। न हि नित्यस्य हिंसा फलं वा। नित्यस्य कार्यानाधारात्वात्। तदाहुः—"वर्षातपाभ्यामि"त्यादि। [GSP, p. 42.]

(*c*) Viśvanātha and Rādhāmohana explain this *sūtra* in a slightly different manner, and they record the view of Uddyotakara *et al* as an alternative interpretation :

(*vii*) तदभावः पातकाभावः सात्मकशरीरस्य प्रदाहेऽपि प्रसक्तः, तस्य आत्मनो नित्यत्वात्।

नित्यत्वेन निर्विकारत्वम्, तेन जन्यधर्मानाश्रयत्वमभिमतमिति केचित्। [NSV, pp. 722-723.]

(*viii*) सात्मकस्यापि शरीरस्य नाशे तदभावप्रसङ्गः तन्नित्यत्वात् तस्य शरीरस्य नित्यत्वादावश्यकत्वात्। शरीरं विना भोगाभावेन शरीर एवादृष्टकल्पनादित्यर्थः।

यद् वा—तन्नित्यत्वात् तस्यात्मनो नित्यत्वान्निर्विकारत्वाज्जन्यधर्मानाश्रयत्वादिति यावत्। तथा च शरीरस्यादृष्टस्वीकारेण तदभावे भोगानुत्पत्तिप्रसङ्ग इति भावः। [NSVV, p. 169]

(226) P. 151, l. 13 : (*a*) This *sūtra* has been explained in a variety of ways by different commentators like Vātsyāyana, Bhaṭṭa Vāgīśvara, Vācaspati Miśra II Keśava Miśra Tarkācārya and Viśvanātha :

(*i*) न ब्रूमो नित्यस्य सत्त्वस्य वधो हिंसा, अपि त्वनुच्छित्तिधर्मस्य कार्याश्रयस्य शरीरस्य स्वविषयोपलब्धेश्च कर्तृणामिन्द्रियाणामुपघातः पीडा वैकल्यलक्षणः प्रबन्धोच्छेदो वा प्रमापणलक्षणो वा वधो हिंसेति।

कार्यं तु सुखदुःखसंवेदनम् , तस्यायतनमधिष्ठानमाश्रयः शरीरम् , कार्याश्रयस्य शरीरस्य स्वविषयोपलब्धेश्च कर्तॄणामिन्द्रियाणां वधो हिंसा, न नित्यस्यात्मनः। तत्र यदुक्तम्—तदभावः सात्मकप्रदाहेऽपि तन्नित्यत्वात् इत्येतदयुक्तम् ।···

अथ वा—कार्याश्रयकर्तृवधादिति कार्याश्रयो देहेन्द्रियबुद्धिसङ्घातः, नित्यस्यात्मनस्तत्र सुखदुःखप्रतिसंवेदनम् , तस्याधिष्ठानमाश्रयः तदायतनं तद्भवति न ततोऽन्यदिति स एव कर्त्ता। तन्निमित्ता हि सुखदुःखसंवेदनस्य निर्वृत्तिः न तमन्तरेणेति। तस्य वध उपघातः पीडा प्रमापणं वा हिंसा, न नित्यत्वेनात्मोच्छेदः। तत्र यदुक्तम्—तदभावः सात्मकप्रदाहेऽपि तन्नित्यत्वात्—एतन्नेति। [NB, pp. 724-725.]

(*ii*) कार्यं सुखप्रतिसंवेदनं तस्याश्रयोऽधिष्ठानमिति कार्याश्रयशब्देन शरीरमुच्यते। कर्तृशब्देनापि विषयोपलब्धिकारणानीन्द्रियानि कथ्यन्ते। तेषां वधः कार्याश्रयकर्तृवधः। तस्मात् कार्याश्रयकर्तृवधात् न नित्यस्यात्मनो वधो हिंसा। किं तर्हि ? अनुच्छित्तिधर्मकस्य यदुपयोगाधिष्ठानं शरीरं तन्मयानि च विषयोपलब्धिसाधनानीन्द्रियाणि, तेषां वधो हिंसेत्युपचर्यते, गत्यन्तराभावात् ।···

तस्माद्देहादिव्यतिरिक्तात्मवादिपक्षेऽपि कृतनाशाकृतागमौ, अनुपपन्ने च हिंसातत्फलभोक्तृत्वे—इति यदुक्तं पूर्वसूत्रेण, तदयुक्तमिति सूत्रार्थः। [NTD, p. 73.]

(*iii*) कार्यो भोगस्तस्याश्रय आयतनतया शरीरं तदेव भोगहेतुतया कर्तृ, तद्वधात् तत्प्रमापणात् न हिंसानुपपत्तिः, न च नरकानुपपत्तिः अजन्यस्यापि जन्यधर्माश्रयत्वाविरोधादित्यर्थः।

न च कार्याश्रयपदेनैव शरीरलाभे कर्तृपदमधिकमिति वाच्यम् , 'मां घातयती'ति घात्यत्वाहन्त्वयोः सामानाधिकरण्यानुभवात् , सात्मकपक्षे पुरुष एव घात्य इति मन्वानेन परेणानिष्टमुक्तम् , तत्र यदि कर्तृपदेन

हेतुलक्षणया शरीरमुपस्थाप्यते, तदा तत्रापि कर्त्तृवाचक'अहं'पदे भोगाश्रयलक्षणया समाधेयमिति सूचितं भवति ।

यद् वा—कार्याश्रयः शरीरः, कर्त्तृणि ज्ञानकारणानीन्द्रियाणि । न चैवं देहे प्रायणानुपपत्तिः, आत्ममनोविभागविशेषस्य प्रायणत्वात्, तस्य चादेहधर्मत्वात्—इति वाच्यम् ; विनिगमनाविरहात् शरीरमनोविभागविशेषस्यैव प्रायणत्वादित्यभिसन्धिः ।

[NTĀ, I.O.L. Mss. Ch. III, fol. 2a-2b.]

(*iv*) नात्मनो वधः । किन्तु कार्यं सुखादिज्ञानं तस्याश्रय आयतनं शरीरम् । कर्त्तृणि इन्द्रियाणि, तत्साधनत्वात् तयोः । शरीरेन्द्रिययोः वधः प्रमापणम्, आत्मवध इति च भाक्तव्यवहार इति नात्मनित्यत्वे हिंसानुपपत्तिः ।

यद् वा—कार्याश्रयः भक्त्या कर्तृ च शरीरमेव । तद्वधात् आत्मनः पातकमुत्पद्यते इति सूत्रार्थः । नापि नित्यात्मनः फलानाधारत्वम्, चर्मवद् व्योम्नोऽपि वर्षातपसंयोगित्वादिति । [GSP, p. 42.]

(*v*) कार्याश्रयस्य चेष्टाश्रयस्य कर्त्तुः कृत्यवच्छेदकस्य शरीरस्यैव नाशः, न त्वात्मन इति न पातकाभावः ।

यद् वा—न हन्तुः पातकाभावः, कार्याश्रयकर्त्तृवधात् शरीरस्य नाशात्, ब्राह्मणत्वादेः शरीरवृत्तित्वात् तन्नाशादेव पापोत्पत्तिरिति भावः ।

वस्तुतस्तु—अपूर्वशरीरावच्छिन्नप्राणसंयोगात्मकोत्पत्तिवत् शरीरावच्छिन्नप्राणसंयोगध्वंसविशेषात्मकमरणमप्यात्मनः सम्भवति, अन्यथा शरीराविनाशिनो बन्धनमुखनिरोधादेर्हिंसात्वं न स्यात् ।

पातकानभ्युपगन्तृचार्वाकादिमतं शरीरभेदसाधनं तु वक्ष्यमाणयुक्तिभिरिति ध्येयम् । [NSV, pp. 724-726.]

(*b*) Rādhāmohana reads this *sūtra* as न कार्याश्रयकर्तृबाधात्, and explains it as follows :

(*vi*) न शरीरदाहेऽदृष्टनाशः, कार्यमदृष्टं तदाश्रयस्य कर्त्तुरात्मनः शरीरस्य नाशे बाधात् नाशाभावात् । तथा चात्मन्येवादृष्टं तदधीनोत्तर-भोगस्तु शरीरान्तराश्रयेणेनेति भावः ।

न सात्मकशरीरदाहे पापानुत्पादः, कार्यं शरीरम्, तदाश्रयस्य तत्सम्बन्धस्य कर्त्तुरात्मनो बाधात्, तथा च शरीरविशिष्टात्मव्यतिरेक-साधनस्यैव पापजनकत्वादिति भावः—इति कश्चित् । व्याख्यानमिदं चिन्त्यम् । प्राणवियोगानुकूलव्यापारस्यैव पापजनकत्वात्, तदभावेन मृतशरीरदाहकस्य पापानुत्पादः, जीवच्छरीरदाहकस्य पापोत्पत्तिश्चेति नात्मसिद्धिरिति सूत्रत्रयमसमञ्जसं स्यादिति ।

[NSVV, pp. 169-170.]

(227) P. 152, l. 5 : In the printed edition of *Nyāyasūtra-vivaraṇa*, we find the traditional recording of this *sūtra*, but the editor remarks in the footnote that in the manuscript of the work, the word न is missing. It may be noted that NSVV on this *sūtra* does not explain or indicate the word न in any form. [See NSVV, p. 170, fn. 2 and pp. 170-171.]

(228) P. 152, l. 10 : (*a*) Rāmabhadra has not explained this *sūtra*. The other commentators explain it as follows :

(*i*) एकस्मिन्नुपहते चोद्धृते या चक्षुषि द्वितीयमवतिष्ठते चक्षुः विषयग्रहणलिङ्गम्, तस्मादेकस्य व्यवधानानुपपत्तिः । [NB, p. 729]

(*ii*) एकस्मिन्नुद्धृते उपहते वा चक्षुषि द्वितीयमवतिष्ठत इति विषयग्रहणमनेनानुमीयते । यदि पुनरेकमेव चक्षुः स्यात्, तदानीमे-कोपघाते तस्योपहतत्वात् द्वितीयेन विषयो न गृह्येत, गृह्यते च विषयो-ऽन्यतरेण । तस्माद् विषयग्रहणादेकस्य विनाशे द्वितीयविनाशो नास्तीति द्वे चक्षुषीति सूत्रार्थः ।

[NTD, p. 74]

(*iii*) विरुद्धधर्मसंसर्गेण भेद इत्यर्थः।

[NTĀ, I.O.L. Mss. Chapter III, fol. 3a.]

(*iv*) विनष्टत्वाविनष्टत्वविरुद्धधर्मसंसर्गान्नष्टानष्टपटयोरिव चक्षुषोर्भेद इति सूत्रार्थः। [GSP, p. 43.]

(*v*) चक्षुरैक्ये एकचक्षुर्नाशेऽन्धत्वं स्यादिति भावः।

[NSV, p. 729.]

(*vi*) एकविनाशे एकगोलकावच्छिन्नचक्षुर्नाशे द्वितीयस्यापरगोलकावच्छिन्नस्याविनाशादविनाशप्रत्ययान्न चक्षुरद्वैतम्। अत एव तदाश्रयस्य काणत्व नान्धत्वं चेति व्यवहारः। [NSVV, p. 171.]

(*b*) This *sūtra* as printed in *Nyāyasūtravivaraṇa* agrees with the traditional reading, but the editor states in the footnotes that the word नैकत्वम् is missing in the manuscript of this work.

(229) P. 152, l. 12; The view that this *sūtra* represents the view of an *ekadeśī* is shared by many other commentators like Vācaspati Miśra II, Keśava Miśra Tarkācārya and Viśvanātha. The introductory remarks and explanations provided by them are as follows:

(*i*) एकदेशी परिहरति—

॥ अवयवविनाशेऽप्यवयव्युपलब्धेरहेतुः ॥

अवयवविनाशे शाखादिच्छेदेऽपि अवयव्युपलब्धेः प्रत्यभिज्ञानेन वृक्षादिसत्त्वोपलब्धेः अहेतुः अवयवनाशोऽवयविनाशेऽहेतुः, तथा च विरुद्धधर्माध्यासः स्वरूपासिद्धः, अवयवावयविनोश्च भेदादित्यर्थः।

[NTĀ, I.O.L. Mss. Chapter III, fol. 3a.]

Vācaspati Miśra II, as can be seen, reads 'अवयवविनाशे०' in place of 'अवयवनाशे०'. The variation is minor, and does not alter the meaning of the *sūtra* in any way.

(*ii*) अत्रैकदेशिनः परिहारः—"अवयव···रहेतुः। यथैकशाखाच्छेदेऽपि 'स एव वृक्ष' इति प्रत्यभिज्ञानात् किञ्चिदवयवनाशेऽप्यवयवी

अवतिष्ठते, तथा किञ्चिदवयवनाशे चक्षुरवयव्यवतिष्ठते, अवयवावयविनोर्भेदादिति सूत्रार्थः। [GSP, p. 43.]

(*iii*) अत्रैकदेशी परिहरति—

॥ अवयवनाशेऽप्यवयव्युपलब्धेरहेतुः ॥

अवयवस्य शाखादेर्नाशेऽप्यवयविनो वृक्षस्य प्रत्यभिज्ञानात् नावयवनाशे सर्वत्रावयविनाशनियमः, तथा चैकनाशेऽपि नान्धत्वमिति।

[NSV, p. 730.]

(230) P. 152, l. 15 : This view, too, is shared by Viśvanātha and Keśava Miśra Tarkācārya, while Vacaspati Miśra II agrees with a part of it :

(*i*) कण्ठत एकदेशिपरिहारं सिद्धान्ती दूषयति···

[NTĀ, I.O.L. Mss. Chapter III, fol. 3a.]

(*ii*) एकेनैव सूत्रेणैकदेशिनिरासः स्वपक्षबाधकोद्धारश्च।

[GSP, p. 43.]

(*iii*) एकदेशिमतस्य पूर्वोक्ताक्षेपस्य च समाधानाय सिद्धान्तिनः सूत्रम्··· [NSV, p. 730]

(231) P. 152, l. 16- P. 153, l. 4 : A different interpretation has been provided by Vācaspati Miśra II and Keśava Miśra Tarkācārya :

(*i*) दृष्टश्चासावन्तो व्यवस्थितश्चेति दृष्टान्तः तन्त्वादिनाशे पटादिनाशः, तद् विरोधात् अप्रतिषेधः अवयवनाशे अवयव्यनाशादप्रतिषेध इत्यर्थः।

[NTĀ, I.O.L. Mss. Chapter III, fol. 3a.]

(*ii*) दृष्टश्चासावन्तो व्यवस्थितश्चेति दृष्टान्तः तन्त्वादिनाशे पटादिनाशः, समवायिकारणनाशस्य कार्यनाशकत्वात्। अनाशे च तद्विरोधः। प्रत्यभिज्ञानं तु सादृश्यादप्युपपन्नम्। रूपोपलब्धिस्तु

चक्षुरवयविनाशेऽपि अवस्थितसंयोगेभ्यः खण्डपटवत् खण्डचक्षुरवयव्युत्पादात्, एकगवाक्षपिधानेऽपि गवाक्षान्तरेणैव। अन्यथा तत्तद्दृष्टिविरोधादिति सूत्रार्थः। [GSP, p. 43.]

Keśava Miśra Tarkācārya, as usual, copies here almost verbatim from Vācaspati Miśra II.

(232) P. 153, ll. 4-5 : (*a*) Viśvanātha also makes a similar comment :

(*i*) इत्थं च लाघवाच्चक्षुरद्वैतमिति टीकास्वरससिद्धम्। [NSV, p. 731]

(*b*) Here, the relevant passage of *Ṭikā* (i-e. *Nyāya vārttikatātparyaṭīkā*) is as follows :

(*ii*) काणस्तथा न पश्यति पिहितैकलोचनो यथाऽविकलेन्द्रियः। तत्र यदि सव्यदक्षिणाधिष्ठानभेदभिन्नं चक्षुः, न चैतद्द्वयमणुना मनसा युगपदधिष्ठातुं शक्यमित्यन्यतरदधिष्ठेयम्। तथा च सर्व एवैकैकेन चक्षुषा पश्यतीति पिहितैकलोचनेन तुल्योपलभ्यः अविकलाक्षस्य स्यात्, न चैवमस्ति। एकत्वे तु तदुभाभ्यामधिष्ठानाभ्यां विनिर्यत् क्वचिदपि मनसाऽधिष्ठितमेवेत्यविकलाक्षस्य न विकलाक्षवदुपलम्भप्रसङ्गः। तस्मादेकमनेकाधिष्ठानं चक्षुः। [NVTT, pp. 726-727]

(*c*) Vācaspati Miśra II observes as follows :

(*iii*) वस्तुतस्तु गोलकनाशे चक्षुरुपहन्यत एव न, ततो तस्य भेदात्, कुण्डवदरवदिति भावः। न च चक्षुर्द्वयेनोपपत्तिरपि, अणुना मनसा साक्षादुभयाधिष्ठानासम्भवात्। न च संसर्गिद्रव्यतया द्विरारम्भः, अन्यचक्षुःसाम्यात्, घ्राणादिसूत्रविरोधाच्च, द्वन्द्वस्योत्सर्गत एकरूपावच्छेदेन पदार्थोपस्थापकत्वात्।……

[NTĀ, I.O.L. Mss. Ch. III, fol. 3a.]

(233) P. 153, l,l. 8-18 : (*a*) Viśvanātha also makes a similar observation :

(*i*) परे तु चक्षुर्द्वैत एव सूत्रार्थं मन्यमाना व्याचक्षते।

सिद्धान्तिन सूत्रम्—सव्येति। शङ्कते—नैकस्मिन्निति। समाधत्ते—एकेति। शङ्कते—अवयवेति। निराकरोति—दृष्टान्तेति। शाखानाशे वृक्षनाशावश्यकत्वाद् दृष्टान्तो न युक्तः। यद् वा—दृष्टान्तस्य गोलकभेदस्य विरोधादन्यथाऽनुपपन्नत्वात्। दृष्टं हि मृतस्य चक्षुरधिष्ठानगोलकद्वयं भेदेनैवोपलभ्यत इति वदन्ति। [NSV, p, 731]

(*b*) Rādhāmohana has copied this portion almost verbation from NSV, and passed the following comment :

(*ii*) तच्चिन्त्यम्। [NSVV, p. 174]

(234) P. 153, l. 20 : (*a*) The reading of this *sūtra* is not found at all in the I.O.L. Mss. of *Nyāyatattvāloka* of Vācaspati Miśra II. The editor of *Nyāyasūtravivarana* also remarks : इदं तु न्यायतत्त्वालोके न धृतम् [NSVV, p. 172, fn. 2.] On a ciose examination of the I.O.L. Mss., it appears that Vācaspati Miśra II *does* admit this as a *sūtra*, and that a part of his concluding comments on the *sūtra* दृष्टान्तविरोधादप्रतिषेधः and the initial part of his comments on the *sūtra* इन्द्रियान्तरविकारात् have been left out through some scribal error, thus resulting in a strange long sentence which hardly make any sense ; but which reveals, on a careful scrutiny, the concluding part of the comments of Vācaspati Miśra II on the *sūtra* इन्द्रियान्तरविकारात्. This strange sentence occurs immediately after the portion that has been quoted in Textual Note no. 225(*c*), and it reads as follows :

(*ii*) न चैवं श्रवसि का गतिर्द्वित्वादिति वाच्यत्, तत्रापि कर्णशष्कुलीद्वयावच्छिन्नस्यैकस्यैवासमवलक्षणो भवति, स च रसेप्साजन्यः, स च रसानुमानजन्या. तच्च व्याप्तिप्रतेः, सा च तदनुभवादिति व्याप्त्यनुभविता तत्स्मर्त्ता अनुमाता एषिता चैकः सिध्यति, अन्यदृष्टस्यान्येनास्मरणादित्यर्थः॥ आक्षिपति—···
[NTĀ, I.O.L. Mss. Chapter III, fol, 3a]

After, this, Vācaspati Miśra II introduces the next *sūtra*. Now, the portion न चैवं भवति...०ह्यावच्छिन्नस्यैकस्यैवा०—evidently pertains to the commentary on दृष्टान्तविरोधादप्रतिषेधः but the portion °सम्प्लवलक्षणो भवति···०स्मरणादित्यर्थः cannot have any relation to this *sūtra*. Consider, on the other hand, the following extracts from *Nyāyavārttika - tātparyaṭīkā*, *Nyāyatātparyadīpikā*, *Gautamīyasūtraprakāśa* and *Nyāyasūtravṛtti* on the *sūtra* इन्द्रियान्तरविकारात् :

(*ii*) कस्यचिद् अम्लस्य फलस्य चिरविल्वादेरनुभूतस्य तेन सहचरितं रूपं वा गन्धं वाऽनुभवति, अथ तत्सहचरितं रसमनुस्मरति, स्मृत्वा चेच्छति, इच्छातो रसनेन्द्रियविकारो दन्तोदकसम्प्लवलक्षणः प्रवर्त्तते, तद्दर्शनाच्चास्येच्छाऽनुमीयते, इच्छया च स्मृतिः। सेयं स्मृतिरसत्यात्मनि सर्वेन्द्रियविषयवेदिनि न भवितुमर्हतीति। [NTT, p. 732]

(*iii*) कस्यचिदाहृतस्य गृहीतसाहचर्ये रूपे गन्धे गृह्यमाणे तत्साहचर्याद्रसानुभवजनितसंस्कारोद्बोधक्रमेण तद्रसस्मृतिरुपजायते। स्मृत्या च दन्तोदकसंप्लवलक्षणो रसनेन्द्रियविकारो जन्यते। सेयं रसनेन्द्रियविकारकारिणी स्मृतिः पूर्वापरज्ञानयोरेककर्त्तृत्वे सम्भवति नान्यथेति। तस्मादात्मानुमीयत इति सूत्रार्थः। [NTD, p. 75]

(*iv*) ···कस्यचिच्चिरविल्वादेरम्लस्य रसगृहीतसाहचर्यरूपादिदर्शनेनेन्द्रियान्तरे दन्तोदकसंप्लवविकारदर्शनात् तत्कारणक्रमेणेच्छास्मृतिसंस्कारानुभवानामनुमितानां प्रतिसन्धातृभेदव्यावृत्तौ पारिशेष्यात् समानाश्रयत्वसिद्धिरिति सूत्रार्थः। [GSP, p. 44]

(*v*) चिरविल्वाद्यम्लद्रव्ये दृष्टे तद्रसस्मरणात् दन्तोदकसंप्लवरूपरसनेन्द्रियविकारादिन्द्रियव्यतिरिक्त आत्मा सिध्यति। [NSV, p. 732[

From the close affinity of the extract ०सम्प्लवलक्षणो भवति···०स्मरणादित्यर्थः NTĀ with these passages, it is reasonable to conclude that the expression सम्प्लवलक्षणो is a remnant of the fuller cxpression दन्तोदकसम्प्लवलक्षणो, and this is expected to occur as an example in the commentary on the sūtra इन्द्रियान्तरविकारात्, since

दन्तोदकसम्प्लव is as an example of रसनेन्द्रियविकार in all these commentaries.

[Our surmise has been proved to be correct, since the recently printed edstion of NTĀ, which has been published after this matter was sent to the press, contains the *sūtra* इन्द्रियान्तरविकारात् and its explanation. (See NTĀ, Allahabad edition, pp. 306-307)].

(*b*) Rādhāmohana explains this sūtra in a different manner :

इन्द्रियान्तरस्य रसनादेरम्लादिद्रव्यभावनया विकारस्य दर्शनादित्यर्थः। इदमुपलक्षणम्। घर्षणादिना पूर्वचक्षुर्नाशेन चक्षुरन्तरोत्पादाच्च। [NSNV, p. 171]

(235) P. 154, ll. 11 : In *Nyayatātparyadīpika* and *Nyāyatattvāloka* the initial न has been omitted [NTD, p. 74, NTĀ, I.O.L. Mss. Chapter III, fol. 4a]. The editor of *Nyāyasūtravivaraṇa* also remarks : न्यायतत्त्वालोके नकाररहितसूत्रपाठः [NSVV, p. 173, fn. 1.].

(236) P, 154, ll. 12-15 : (*a*) Rāmabhadra's interpretation is markedly different from that of others, as will be evident from comparing it with the following exttracts:

(*i*) स्मृतिरात्मानं कारणत्वेनावगमयेत् विषयत्वेन वा। न तावत् कारणत्वेन, तस्याः संस्कारकारणत्वात्। न विषयत्वेन, स्मर्त्तव्यविषयत्वात्। स्मृताच्च तस्मादिन्द्रियान्तरविकारोत्पत्तिरिति भावः। [NVTT, p. 733]

(*ii*) स्मृतिरात्मानं कारणत्वेन वा गमयेत् तद्विषयत्वेन वा। न तावत् कारणत्वेन, तस्याः संस्कारकारणत्वात्। न च विषयत्वेन, तस्याः स्मर्त्तव्यविषयत्वात्। न प्रकारान्तरेण। तस्मान्न तयाऽनुमीयत इति सूत्रार्थः। [NTD, p. 75]

(*iii*) स्मृतिर्हि विषयतया तं गमयेत् कारणतया वा। आद्ये सौत्रमुत्तरम्। अन्त्ये संस्कारेणान्यथासिद्धिरित्यर्थः। [NTĀ, I.O.L. Mss. Ch. III, fol. 3a]

(*iv*) स्मृतिरात्मानं विषयतया गमयेत् कारणतया वा ? नाद्यः, स्मर्त्तव्यानामेव रसादीनां तत्त्वात् । नान्त्यः, संस्कारस्यैव हेतुत्वात् ।

[GSP, p. 44]

(*v*) स्मृतिर्हि स्मर्त्तव्यविषयिणीति नियमः, तस्याश्च दर्शनादिना सामानाधिकरण्ये मानाभावात्, अस्तु वा विषयतयैव सामानाधिकरण्यमिति भावः ।   [NSV, p. 733.]

(*b*) As one can see, NTD, NSĀ and GSP closely follow NVTT, which provides a very straightforward interpretation of the *sūtra* in question. By contrast, Rādhāmohana's interpretation can claim some originality :

(*vi*) नोक्तदोषः, स्मृतेः स्मर्त्तव्यविषयत्वात् पूर्वानुभूतमात्रविषयत्वमात्रनियमात् । न तु तदिन्द्रियजन्यत्वनियमोऽपीति भावः ।

[NSVV, p. 173]

(237) P. 154, l. 18 : (*a*) Uddyotakara, Bhaṭṭa Vāgīśvara, Vācaspati Miśra II, and Keśava Miśra Tarkācārya have adopted another line of interpretntion ;

(*i*) न स्मर्त्तव्यमात्रात् स्मृतिरुत्पद्यते, यदाऽयमप्रतीतमर्थं स्मरति, तदा स्मृतिरनाधारा प्राप्नोति । न चेयमनाधारा युक्ता, गुणत्वात् । न हि कश्चिद् गुणोऽनाधारो दृष्टः । न चेयमिन्द्रिये सम्भवत्यननुभूतत्वात् । न विषये, तस्यासत्त्वात् । न शरीरे, शरीरगुणानां प्रत्यक्षाणां स्वात्मपरात्मप्रत्यक्षत्वात् । न चेयमनाधारा गुणत्वादित्युक्तम् । न चेयं नास्ति । न चाऽऽत्मन्यसत्यस्याः सद्भावो युक्त इति । तेभ्योऽन्यस्य तदुत्पत्तौ सामर्थ्यमवगम्यते कथमित्यनेनैव प्रत्युक्तम् ।...

[NV, pp. 733-734]

(*ii*) तस्याः स्मृतेरात्मगुणत्वेन सद्भावादप्रतिषेध आत्मनः । यद्यपि तद्विषयत्वेन नात्मानं गमयति स्मृतिः, तस्याः स्मर्त्तव्यरसादिविषयत्वात् । तथापि कारणत्वेन गमयेत् । ननूक्तं संस्कारः कारण-

मिति। तन्न, उपादानकारणत्वानभ्युपगमात्। न संस्कार उपादानकारणम्, तस्य गुणत्वेन तथाभावानुपपत्तेः। न शरीरमुपादानम्, भूतचैतन्यप्रतिषेधात्। नापीन्द्रियमुपादानम्, तेषामपि भौतिकत्वात्। न च विरोधः, भावकार्यरूपत्वात्। तस्मादाधारत्वेन यदुपादानकारणं स आत्मा तया कार्यभूतयाऽनुमीयते। [NND, p. 75]

(*iii*) स्मृतेरात्मगुणत्वेनैव सद्भावो भवति, गुणस्य साधारतानियमादत आश्रयतया तं गमयिष्यतीति न आत्मप्रतिषेधः इत्यर्थः।

[NTĀ, I.O.L. Mss. Ch. III, fol. 3a.]

(*iv*) स्मृतेरात्मगुणत्वं विना न सद्भावः। न हि कार्यमनाधारं नाम। न हि शरीरं तदाधारः, प्रत्यक्षतद्गुणानां स्वपरत्रलक्ष्यत्वात्। अतः स्मृतेरात्मा सिद्ध एवेत्ययुक्तस्तत्प्रतिषेध इति सूत्रार्थः।

[GSP, p, 44]

(*b*) Viśvanātha and Rādhāmohana have adopted yet another line of interpretation :

(*v*) उक्तः प्रतिषेधो न युक्तः, धर्मिग्राहकमानेन स्मृतेरात्मगुणत्वात्, परिशेषेणाऽऽत्मगुणत्वसिद्धेः, 'अहं स्मरामी'त्यनुभवात्, विषयनिष्ठकार्यकारणभावे चैत्रस्य ज्ञानान्मैत्रस्य स्मरणापत्तेरिति भावः।

[NSV, p. 734]

(*vi*) तस्याः स्मृतेरात्मगुणत्वसद्भावादात्मसमवायितयाऽनुभवात्, प्रतिषेधो यथोक्तप्रतिषेधो नेत्यर्थः। अनुभवाकारश्च 'स्मरामी'त्यादिरूप।

[NSVV, p. 173]

(*c*) After this *sūtra*, another sentence अपरिसंख्यानाच्च स्मृतिविषयस्य has been treated as a *sūtra* and explained as such by Viśvanātha, even through he mentions the fact that according to some commentators, this sentence belongs to *Nyāyabhāṣya*. Rādhāmohana has explicitly declared it to be a *sūtra*-like sentenee

of the *Nyāyabhāṣya*, while admitting that according to some commentators, this is a genuine *sūtra* :

(*vii*) विषयाणां स्मर्त्तव्यानां स्मृतिसमवायित्वं स्यादित्याशङ्क्य समाधत्ते—

॥ अपरिसंख्यानाच्च स्मृतिविषयस्य ॥

अपरिसंख्यानान् आनन्त्यात्। तथा च लाघवादतिरिक्तात्मसिद्धिः। इदं न सूत्रं किन्तु भाष्यमिति केचित्। [NSV, p. 734]

(*viii*) अथ चक्षुरादिकं चाक्षुषादिसमवायि स्यात् स्मृत्यादिकं तु विषयसमवेतमस्तु, चक्षुरादिनिष्टत्वे पूर्वचक्षुरनुभूतस्य खण्डचक्षुषा स्मरणं न स्यात्। अनुव्यवसायस्तु अवच्छेदकतासम्बन्धेन शरीरे स्मृतिविषयक एव शरीरे त्वात्मत्वाभिमानात्मकश्चेत्यतो भाष्यकारसूत्रं यथा—

॥ अपरिसंख्यानाच्च स्मृतिविषयस्य ॥

अपरिसंख्यानादानन्त्यात्। तथा च लाघवादतिरिक्त आत्मा कल्पनीयः। इदमुपलक्षणम्। स्मृतेरतीतादिविषयकत्वाच्छरीरस्यानित्यतया पूर्व-शरीरानुभूतस्य खण्डशरीरे स्मरणं न स्यादन्यथा स्मृतेः पुरुषविशेषीयत्व-नियामकालाभश्चेति। इदमपि सूत्रं मुनेरिति कश्चित्।

[NSVV, p. 173-174.]

The sentence अपरिसंख्यानाच्च स्मृतिविषयस्य occurs in *Nyāyavārttika* without any explanation [NV, p. 736.]. It is also quoted and explained in *Nyāyavārttikatātparyaṭīkā* as follows ;

(*ix*) असत्यात्मनि स्मृत्यनुत्पत्तिं दर्शयित्वा स्मर्त्तव्यार्थविषयैव स्मृतिर्नाऽऽत्मविषयेति पूर्वपक्षिणोऽवधारणं खण्डयति—अपरिसंख्यानाच्च स्मृतिविषयस्येति। मानसानुव्यवसायजनितसंस्कारकारणासु चतसृष्वपि स्मृतिषु नार्थमात्रं विषयोऽपि तु ज्ञानज्ञातृज्ञेयानि सर्व एव विषयाः। चतुर्षु वाक्येषु एकत्र ज्ञानं क्रिया कारकान्निष्कृष्टा, यथा—'अमुस्मिन मम ज्ञानमभूदि'ति अगृह्यमाणोऽप्यर्थः स्मृतिसन्निधापनादमुस्मिन्नित्युच्यते।

कारकादनिष्कृष्टाऽप्येकत्र पूर्वापरीभूतभावनाप्रधाना ज्ञानक्रिया गम्यते —'अज्ञासिषमहममुमर्थमि'ति। अन्यत्र तु ज्ञानभावने कारकादनिष्कृष्टे कर्त्तृप्रधाने, यथा—'ज्ञातवानहममुमर्थमि'ति। अन्यत्र ज्ञानभावने कारकादनिष्कृष्टे कर्मप्रधाने, यथा—'असावर्थो मया ज्ञात' इति।
[NVTT, pp. 734-735]

The explanation puts in a nutshell the contents of a passage of *Nyāyabhāṣya* (pp. 734-735), and what follows next is explanation of some other forms in the *Nyāyabhāsya*. Thus, in all probability, for Vācaspati Miśra I, this sentence is a part of the *Nyāyabhāṣya*, and not a *sūtra*. Udayana, while commenting on this passage, has not said anything about the status of the sentence अपरिसंख्यानाच्च स्मृतिविषयस्य [TTP, Thakur's Press Copy, Chapter III, p. 19.].

(238) P. 155, l. 3 : Keśava Miśra Tarkācārya reports and rejects in this connection the view of Taraṇi Miśra, who maintained that the three *sūtras* इन्द्रियान्तरविकारात्, न स्मृतेः स्मर्त्तव्यविषयत्वात् and तदात्मगुणसद्भावादप्रतिषेधः from a separate *prakaraṇa* :

तरणिमिश्रास्तु—भाष्ये "अनुमीयते चायमि"त्युपक्रम्य 'अतोऽनुमीयत" इत्युपसंहारात् "इन्द्रियान्तरविकारात्" इत्यादिभिस्त्रिभिः सूत्रैः प्रतिसन्धानानुमेयत्वप्रकरणमन्यदेवेत्याहुः। तन्न, प्रसङ्गसङ्गत्याऽप्येकवाक्यतासम्भवे वाक्यभेदस्यान्याय्यत्वात्। [GSP, p. 44.]

(239) P. 155, l. 4 : Rāmabhadra has not discussed the *saṅgati* that connects the मनोभेदप्रकरण to the चक्षुरद्वैतप्रकरण. This is also the case with Bhaṭṭa Vāgīśvara, Viśvanātha and Rādhāmohana [See NTD, p. 76, NSV, p. 737, NSVV, p. 174,]. Udayana, Vācaspati Miśra II and Keśava Miśra Tarkācarya have discussed this problem :

(*i*) एवं प्रासङ्गिकं चक्षुरद्वैतप्रकरणं समाप्य प्रसङ्गाभासतिरस्कृतं च प्रतिसन्धानमुक्तिवैचित्रेण स्मारयित्वा मनोव्यतिरेकप्रकरणमारभते।
[TTP, Thakur's Press Copy ; Ch. III, p. 20]

(*ii*) एवमपि प्रतिसन्धानादीनां स्थिरात्मसाधकानां मनसाऽर्थान्तरनिरासाय प्रकृतस्य स्थिरात्मन उपपादकतया निर्वाहकैक्यलक्षणसङ्गत्या शरीरभेदप्रकरणेन समनवान्तरया एककार्यत्वसङ्गत्या च मनोव्यतिरेकप्रकरणम्। तत्रात्मा मनोभिन्नो न वेति संशयः, प्रयोजनन्तु विभुचेतनसिद्धिः।

[NTĀ, I.O.L. Mss. Ch. III, fol. 3b.]

(*iii*) एवं प्रासङ्गिकं चक्षुरद्वैतप्रकरणं समाप्य प्रतिसन्धानादीनामिन्द्रियव्यतिरिक्तात्मसाधकानामर्थान्तरनिरासाय मनोव्यतिरेकप्रकरणम्। तत्रात्मा विषयः, मनोभिन्नो न वेति संशयः। [GSP, p. 44.]

(240) P. 155, l. 5-6: (*a*) Rāmabhadra follows here Udyotakara, whose comments are as follows:

(*i*) य एते भवता आत्मप्रतिपादका हेतव उपदिष्टाः सर्व एते मनसि सम्भवन्ति। एवं च न मनोव्यतिरिक्त आत्मा सिध्यति।

[NV, p. 737]

(*b*) The comments of Bhaṭṭa Vāgīśvara, Vācaspati Miśra II and Keśava Miśra Tarkācārya are similar, though they add some reason in favour of the expression मनसि सम्भवात्:

(*ii*) य एत आत्मनः शरीरादिव्यतिरेकप्रतिपत्तिहेतव उपदिष्टाः, एतेषां मनसि सम्भवात्। ते एते मनसि सम्भवन्ति। मनसः सर्वविषयत्वेन प्रतिसन्धानादिहेतुत्वसम्भवात्। एवं च न मनसो व्यतिरेक आत्मनः सिध्यतीति सूत्रार्थः। [NTD, p. 76]

(*iii*) अतिरिक्तात्मसिद्धिर्न। कुतः? आत्मप्रतिपत्तिहेतूनां प्रतिसन्धानादीनां मनसि सम्भवात्। तथा च मनसैव स्थिरेणार्थान्तरमित्यर्थः। [NTĀ, I.O.L. Mss. Ch. III, fol. 3b.]

(*iv*) दर्शनस्पर्शनादीनामेकार्थग्रहणादेर्मनस्यपि चेतने सम्भवात्, तस्य स्थिरत्वाच्चेति न तद्भिन्नात्मकल्पनमित्यर्थः। [GSP, p. 44]

(241) P. 155, l. 10: Vātsyāyana provides us with a more elaborate explanation :

(*i*) ज्ञातुः खलु ज्ञानसाधनान्युपपद्यन्ते—चक्षुषा पश्यति घ्राणेन जिघ्रति स्पर्शनेन स्पृशति, एवं मन्तुः सर्वविषयस्य मतिसाधनमन्तःकरण-भूतं सर्वविषयं विद्यते येनायं मन्यत इति। एवं सति ज्ञातर्यात्मसंज्ञा न मृष्यते मनःसंज्ञाऽभ्यनुज्ञायते। मनसि च मनःसंज्ञा न मृष्यते मतिसाधनं त्वभ्यनुज्ञायते। तदिदं संज्ञाभेदमात्रं नार्थे विवादः।

प्रत्याख्याने वा सर्वेन्द्रियविलोपप्रसङ्गः। अथ मन्तुः सर्वविषयस्य मतिसाधनं सर्वविषयं प्रत्याख्यायते नास्तीति, एवं रूपादिविषयग्रहण-साधनान्यपि न सन्ति इति सर्वेन्द्रियविलोपः प्रसज्यत इति।

[NB, p. 737-738]

Vācaspati Miśra I comments as follows :

(*ii*) मतिः स्मृत्यनुमानादिज्ञानम्। यद्यपि चेदं प्रातिस्विक-संस्कारकारणकं तथाऽप्यवश्यमेतेनेन्द्रियजेन भवितव्यम्, ज्ञानत्वात्, रूपादिज्ञानवदिति; तच्चेन्द्रियमसति चक्षुरादौ भावान्मतेश्चक्षुराद्यति-रिक्तं मन इत्युच्यते। [NVTT, pp. 737-738]

Vācaspati Miśra II puts the argument in the form of a dilemna ;

(*iii*) तन्मनः सकरणं सुखादीनि चेतयेत् निष्करणं वा। अन्त्ये बहिरिन्द्रियाणामप्यपलापापत्तिः। आद्ये तस्यापि ज्ञातुः ज्ञानसाधनोप-पत्तेः चक्षुरादिव्यभिचारेण मनोऽन्तरस्वीकारे संज्ञाभेदमात्रम्, मया चेतन आत्मेत्यभिधीयते, त्वया मन इति, अर्थे पुनर्न विवाद इत्यर्थः।

[NTĀ, I.O.L. MSS, Ch. III, fol. 3b.]

Keśava Miśra Tarkācārya explains the *sūtra* in a slightly different manner, and also adds a new argument in its favour :

(*iv*) चक्षुराद्यजन्यः सुखसाक्षात्कार इन्द्रियजन्यः, जन्यसाक्षात्-कारत्वादिति पक्षविशेषणमहिम्ना पक्षधर्मताबलाच्चक्षुराद्यन्यमनः-

सिद्धिः। तथा च आत्मा तद्भिन्न एवेति तत्र मनःसंज्ञामात्रकरणम्, न त्यात्मप्रत्याख्यानम्। मनसोऽणुत्वात् तद्गुणानामतीन्द्रियत्वापत्तिरिति भावः। [GSP, p. 44]

(242) P. 155, ll. 14-15 : Vācaspati Miśra II, Keśava Miśra Tarkācarya and Viśvanātha have introduced this *sūtra* in a similar manner :

(*i*) ननु रूपादिसाक्षात्काराणामेव कर्तृभिन्नकरणजन्यतानियमः, सुखादिबोधानान्तु न तथा, तथा च न करणभिन्नचेतनसिद्धिरतो नियमे (?) दूषयति···[NTĀ, I.O.L. Mss. Ch. III, fol. 3b]

(*ii*) रूपादिसाक्षात्कारस्तथा न तु ज्ञानमात्रमिति शङ्कानिरासाय सूत्रम्··· [GSP, p. 45]

(*iii*) ननु रूपादिप्रत्यक्षं सकरणकमस्तु, न तु सुखादिप्रत्यक्षम्, एवं परमाण्वन्तरस्यातीन्द्रियत्वेऽपि मनसः प्रत्यक्षं स्यात्, अत्राऽऽह··· [NSV, p. 740]

(243) P. 155, l. 16 : *Nyāyatātparyadīpikā* of Bhaṭṭa Vāgīśvara does not contain this *sūtra*.

(244) P. 155, ll. 17-18 : (*a*) Vātsyāyana and Uddyotakara have taken the term निरनुमानः in a literal sense :

(*i*) योऽयं नियम इष्यते रूपादिग्रहणसाधनान्यस्य सन्ति, मतिसाधनं सर्वविषयं नास्तीति, अयं नियमो निरनुमानः। नात्रानुमानमस्ति येन नियमं प्रतिपद्यामहे।······ [NB, p. 738]

(*ii*) योऽयं नियम आश्रीयते मतिरसाधना न पुनर्ज्ञप्तिरिति, नियमो निरनुमानः, ज्ञप्तिवत्तु मतेःससाधनत्वेऽनुमानमस्ति। सुखादयश्च रूपादिभ्यो विषयान्तरमिति तद्विषयत्वादुपलब्धेः साधनेन भवितव्यम्, न हि किञ्चित् सविषयं ज्ञानमसाधनं दृष्टं रूपादिज्ञानवदिति। नियमश्च निरनुमानः सुखादिविज्ञानानि निःसाधनानि भवन्तु मा भुवन् रूपादिविषयानीति।··· [NV, pp. 738-739]

(*b*) Rāmabhadra has adopted here the interpretation of Vācaspati Miśra II, for whom निरनुमानः = निष्प्रामाणिकः. Keśava Miśra Tarkācārya and Viśvanātha have also accepted this interpretation :

(*iii*) चः पुनरर्थे । जन्यज्ञानमात्रस्यैवेन्द्रियजन्यतोपपत्तौ जन्यसुखसाक्षात्कारस्यैव न तथात्वमिति नियमो निष्प्रामाणिक इत्यर्थः । मनोज्ञाने च ज्ञेयत्वकरणत्वयोर्मनस्यविरोधो दृष्टत्वादिति बोध्यम् ।...
[NTĀ, I.O.L. Mss. Ch. III, fol. 3b]

(*iv*) ज्ञानमात्रस्यैवेन्द्रियजन्यत्वे निर्व्यूढरूपादिधीरेव ससाधना न सुखादिधीरिति नियमो निष्प्रमाणक इत्यर्थः । [GSP, p. 45]

Here is an instance where Keśava Miśra Tarkācārya has slightly deviated from the interpretation provided by Vācaspati Miśra II, and in doing so, he has committed a mistake.

(*v*) उक्तो नियमविशेषो निरनुमानः निष्प्रमाणको गौरवाद् वैपरीत्ये च विनिगमकाभावाच्चेति भावः । [NSV, p. 740]

(*c*) Rādhāmohana has explained this *sūtra* in an entirely different manner :

(*vi*) ननु व्यासङ्गानुरोधान्न मनः स्वीक्रियते, चाक्षुषादीनां यौगपद्यनिरासश्च एकतरसामग्र्या अपरफलप्रतिबन्धनियमाधीन इत्यत आह—

॥ नियमश्च निरनुमानः ॥

एकतरसामग्रीदशायामपरसामग्र्या फलानुत्पादनियमश्च निरनुमानोऽनुमानादिना न निर्णय इत्यर्थः । [NSVV, p. 175]

(245) P. 155, l. 20 : (*a*) Vācaspati Miśra II has discussed the purpose served by the अनादिनिधनत्वसिद्धिप्रकरण by showing that it is not redundant :

(*i*) सम्प्रत्यात्मनोऽनादिनिधनताप्रकरणम् । तत्र आत्मा विषयः ।

पूर्वप्रकरणसिद्धेन्द्रियादिभिन्नत्वात् प्रमेयत्वाद्वा आत्मा नित्योऽनित्यो वेति संशयः, प्रयोजनञ्च निःश्रेयसार्थिनो प्रवृत्तिः, अन्वाचितं च प्रयोजनं स्वर्गार्थिप्रवृत्तिः, स्थायिनं विना तदनुपपत्तेः ।

ननु शरीरदाहे पातकाभावादित्यनेन गतार्थतेति चेत् । न । अङ्गीकृतपरलोकं प्रति कर्तृभोक्तोरेकत्वस्य तत्र तात्पर्यात्, इह तु परलोकस्यैव साध्यत्वात्, आद्यप्रकरणे चानुभवितृस्मर्त्रोरेकत्वमात्रे तात्पर्यात् ।

पूर्वपक्षस्तु — आत्मा कादाचित्कोऽभावप्रतियोगी, अश्रोत्रलौकिक-प्रत्यक्षगुणवत्त्वात्, घटवदिति बाधकाच्च, मानाभावाच्चेति ।

[NTĀ, I.O.L. Mss. Chapter III, fol. 36-4a.]

(*b*) Keśava Miśra Tarkācarya has, as usual, copied almost verbation from *Nyāyatattvāloka*:

सम्प्रत्यात्मनोऽनादिनिधनप्रकरणम् । तत्रात्मा विषयः । स नित्योऽनित्यो वेति संशयः । स च पूर्वप्रकरणसिद्धादिन्द्रियदेहमनोभिन्नत्वात् प्रमेयत्वाद्वा । प्रयोजनं च निःश्रेयसार्थे प्रवृत्तिरन्वाचितं च स्वर्गार्थप्रवृत्तिः । स्थायिनं परलोकभागिनमात्मानमनुसन्धाय तदुद्भवात् ।

पूर्वपक्षस्तु — आत्मनो नित्यत्वे मानाभावः । आत्मा प्रागभावध्वंसप्रतियोगी, अश्रोत्रास्मदादिप्रत्यक्षगुणवत्त्वात् घटवदिति बाधकं चेति । [GSP, p. 45]

(246) P. 156, l. 1 : (*a*) Before this *sūtra, one more sentence, viz.* उभयथा दृष्टत्वात् संशयः has been counted as a *sūtra* and explained as such in *Nyāyatātparyadīpikā* of Bhaṭṭa Vāgīśvara :

(*1*) तदेवमुक्तेन प्रतिबन्धेनात्मनः शरीरादिव्यतिरेक उत्पत्तिप्रभृति यावत् प्रमाणं बाल्यकोमारयौवनाद्यवस्थाभेदेन शरीरभेदव्यवस्थानं च साधितम् । संप्रति देहविनाशादुर्ध्वमव्यवस्थानेन अनेकशरीरयोगोऽस्यास्ति न वेति विचारयितुं नित्यानित्यत्वसंशायकमाह—

॥ उभयथा दृष्टत्वात् संशयः ॥

विद्यमानमुभयथा दृष्टं नित्यमनित्यञ्च । आत्मा च प्रमाणत उपलब्धेर्विद्यमानः । स च विद्यमानत्वाद् घटवदनित्यः स्यादाहोस्विदाकाशवन्नित्यः स्यादिति संशयो भवतीति सूत्रार्थः । [NTD, p. 76.]

Here, Bhaṭṭa Vāgīśvara has treated a sentence of *Nyāyabhāṣya* as *sūtra*. The *Bhaṣya* passage concerned runs as follows :

(*ii*) किं पुनरयं देहादिसङ्घातादन्यो नित्यः उतानित्य इति । कुतः संशयः? उभयथा दृष्टत्वात् संशयः । विद्यमानमुभयथा भवति नित्यमनित्यं च । प्रतिपादिते च आत्मसद्भावे संशयानिवृत्तेरिति । [NB, p. 740]

From the observations of Uddoytakara on this passage, it seems that he, too, regards the sentence उभयथा दृष्यत्वात् संशयः as a part of *Nyāyabhāṣya* :

(*iii*) 'किं पुनरयं देहादिसंघातादन्यो नित्यः अथानित्य इति' ह्न आत्मास्तित्वव्यतिरेकहेतुभिः शरीरभेदेऽप्यभेद आत्मनि सिद्धः, सिद्धत्वात् प्रकरणमनारभ्यमिति । नानारभ्यम् । कथम् ? जन्मप्रभृति यावत् प्रयाणमेतस्मादेकः सिध्यति, न पुनर्देहविनाशादूर्ध्वं भवतीत्येतत् सिध्यति ह्न एतस्यार्थस्य ज्ञापनार्थम् । [NV, p. 740.]

(*b*) Uddyotakara has given a very clear and concise explanation of this *sūtra* :

जातः खल्वयं कुमारको विषयाधिगमसमर्थेषु इन्द्रियेषु हर्षभयशोकान् प्रतिपद्यमानो दृष्टः स्मित-कम्प-रुदितानुमेयान्, ते च स्मृत्यनुवन्धादुत्पद्यन्त । स्मृत्यनुवन्धश्च नान्तरेण पूर्वशरीरमिति । तत्र जन्म निकायविशिष्टाभिः शरीरेन्द्रियबुद्धिवेदनाभिः सम्वन्धः । अभिप्रेतविषयप्रार्थनाप्राप्तौ सुखानुभवो हर्षः । अनिष्टविषयसाधनोपनिपाते तज्जिहासोर्हानाशक्यता भयम् । इष्टवियोगे सति तत्प्राप्त्यशक्यप्राप्था शोकः । तदनुभवः सम्प्रतिपत्तिः ।

एकविषयानेकविज्ञानोत्पादोऽभ्यासः एकाकारविषयो वा । यथा 'शालयोऽनेनाभ्यस्ता' इति । प्रत्यक्षबुद्धिनिरोधे तदनुसन्धानविषयः प्रत्ययः स्मृतिः । तदनुगृहीतस्तदनुसन्धानविषयः प्रत्ययस्तद्भावविषयः प्रत्यभिज्ञानम । अनुबन्धो भावनाख्यः स्मृतिहेतुः संस्कारः । इष्टविषयानुस्मरणान्नयनादिप्रसादः स्मितम । अनिष्टविषयानुस्मरणात् तत्साधनजिहासानुष्ठानलक्षणो हस्तादिविक्षेपवतोऽश्रुविमोचनसहितः शब्दविशेषो रुदितम ।

स्मितरुदिते व्यधिकरणत्वादसाधनम्— अथ मन्यसे स्मितरुदिते वाल्यावस्थायां भवतः, न च वाल्यावस्था आत्मनः, तस्माद् व्यधिकरणत्वादसाधनमिति ? न, शोकादिमदात्मवतीति वाल्यावस्थायाः साध्यत्वात्— शोकादिमदात्मवती वाल्यावस्थे साध्यम्, स्मितरुदितादिमत्त्वादिति । वाल्यावस्था वयोधर्मो यौवनावस्थावत् । एतेन स्मृतिसंस्कारानुभवपूर्वशरीरसम्बन्धवदात्मवत्त्वं व्याख्यातम् । ... ... [NV, pp. 741-742.]

This interpretation has been followed by Bhaṭṭa Vāgīśvara, Vācaspati Miśra II and Keśava Miśra Tarkācārya. [See NTD, p. 77; NTĀ, I.O.L. Mss. Chapter III, fol. 3b-4a; GSP, p. 45.]

(*c*) The traditional reading of the sūtra contains the expression 'हर्षभयशोक' while all the relevant manuscripts of *Nyāyarahasya* contain the reading 'हर्षशोकभय०. Vātsyāyana, while commenting on this *sūtra,* remarks:

जातः खल्वयं कुमारकोऽस्मिन् जन्मन्यगृहीतेषु हर्षभयशोकहेतुषु हर्षभयशोकान् प्रतिपद्यते लिङ्गानुमेयान् । .... [NB, p.]

Uddyotakara's comments, which support the reading 'हर्षभयशोक' have been quoted above.

(247) P. 156, l. 12 : There is some disagreement about the exact reading of this *sūtra.* In *Nyāyavārttika* etc. we find the reading पद्मादिषु प्रबोधसम्मीलनविकारवत् तद्विकारः [NV, p. 743].

Nyāyatattvāloka gives the reading पद्मादिषु प्रबोधसम्मीलनविकारे तद्विकारः [NTĀ, I.O.L. Mss. Ch. III, fol. 4a.] *Nyāyasūtravivaraṇa* reads it as पद्मादिषु प्रबोधसम्मीलनवत् तदुपपत्तेः.

[NSVV, p. 177.]

(248) P. 156, l. 13 : (*a*) Uddyotakara has succintly put the counterargument indicated by this *sūtra* in the following manner :

(*i*) अनित्येऽपि विकारदर्शनादनेकान्त इति सूत्रार्थः ।

[NV, p. 743]

(*b*) Bhaṭṭa Vāgīśvara expresses the objection in the form of a full-fledged *anumāna* :

(*i*) यथा पद्मादिषु प्रबोधनं संमीलनं च स्मृत्यतुबन्धाद्यदृष्टकारणं न भवति ; तथा हर्षादयोऽपि स्मृत्यनुबन्धाद्यदृष्टकारणं न भवति, विकारत्वात्, पद्मादिविकारवदिति सूत्रार्थः ।

(*c*) Keśva Miśra Tarkācārya gives an interpretation that is more specific about the *hetvābhāsa* that is being urged by the *pūrvapakṣa sūtra*:

(*i*) नित्यत्वे साध्ये हर्षादिकं न हेतुरसाधारणत्वात् । न च कार्यत्वात् स्मृतिजन्यत्वम्, पद्मादिप्रबोधादौ साधारणानैकान्तिकत्वात् ।

[GSP, p. 45.]

(*d*) Viśvanātha explains the *sūtra* without formulating any *anumāna* or specifying any *hetvābhāsa* :

(*i*) वालस्य हर्षादयो मुखविकासाद्यनुमेयाः । न च तत्सम्भवः, पद्मादीनां प्रबोधादि दृष्टविशेषाधीनक्रियावशादेव तदुपपत्तेरिति भावः ।

[NSV, p. 744.]

(*e*) Rādhāmohana's comments are very brief: तदुपपत्तेः हास्याद्युपपत्तेः ।

[NSVV, p. 177.]

It seems to us that the variant reading तदुपपत्तेः accepted

in NSVV as noted in T.N. no 241 is due to a wrong understanding of NSV on this *sūtra*, where the expression तदुपपत्तेः is found.

(249) P. 156, l. 19 : (*a*) This has been borrowed from Uddyotakara, whose remarks on the word पञ्चात्मकविकाराणाम् is as follows :

(*i*) पञ्चात्मकविकाराणामिति । न पञ्चात्मकानि पद्मानीति, अपि तु पञ्चाभूतानामनुग्रहे सति भवन्तीति पञ्चात्मकानीत्युच्यन्ते । वस्तुतस्तु न पञ्चात्मक किञ्चिदस्तीत्युपरिष्टाद् वक्ष्यामः । [NV, p. 745.]

Bhaṭṭa Vāgīśvara also accepts the view of Uddyotakara:

(*ii*) एकभूतारब्धत्वेऽपि भूतान्तरावष्टम्भेन वर्तमानत्वात् पञ्चात्मका उच्यन्ते पद्मादयो न पुनः पाञ्चभौतिकत्वेन .... [NTD, p. 77.]

Vācaspati Miśra II also adopts this view :

(*iii*) पञ्चात्मकत्वं तु पञ्चभूतानुग्रहजन्यत्वं न पञ्चभूतप्रकृतिकत्व-मित्यवधेयम् । [NTĀ, I.O.L. Mss. Ch. III, fol. 4a-4b.]

(*b*) Vācaspati Miśra I has, however, interpreted the word पञ्चात्मकविकाराणाम् in a literal sense, and he has not indicated any grounds for rejecting the interpretation of Uddyotakara :

(*i*) पञ्चात्मकानां पद्मादीनां विकाराः पञ्चात्मकविकारा इति ।

[NVTT, p. 745.]

Viśvanātha Pañcānana and Rādhāmohana Gosvāmi Bhaṭṭacārya have adopted the interpretation of Vācaspati Miśra I :

(*ii*) ... पञ्चात्मकानां पाञ्चभौतिकानां पद्मादीनां ये विकारास्तेषाम ...

[NSV, p. 745]

(*iii*) पाञ्चभौतिकपद्मादीनां विकासमुद्रणादिरुपा ये विकारास्ते-षाम ... [NSVV, p. 177.]

It is difficult to understand why Viśvanātha and Rādhāmohana have admitted here entities that can be treated as पाञ्चभौतिक, because the very possibility of such entities has been rejected in the शरीरपरीक्षाप्रकरण.

(250) P. 159, l. 5 : (*a*) Rāmabhadra has not indicated the *saṅgati* that connects this *prakaraṇa* to the earlier one. This has been done by Vācaspati Miśra II, whose remarks in this connection are as follows :

(*i*) अथोद्देशक्रमसङ्गत्या अनादिताश्चैतनस्या [?] शरीरसम्बन्ध इत्यनादिनिधनप्रकरणेन प्रसङ्गसङ्गत्या च शरीरपरीक्षाप्रकरणम् । ननु शरीरस्य नानाप्रकृतिकत्वऽपि न तल्लक्षणक्षतिरिति नैष विचारः परीक्षेति चेत् । न, विजातीयारम्भसम्भवे हि देहस्येन्द्रयैरप्यारम्भः अतीन्द्रियसंयोग-गर्भतल्लक्षणक्षतिरेव। न चैवमपि घ्राणेनारम्भतादवस्थ्यम्, इन्द्रियत्वेन तस्य देहानारम्भकत्वानुमानात् । न च विजातीयत्वमत्रोपाधिः, जातिविरोधात्, गुणविरोधस्याप्यारम्भविरोधित्वात् तुल्ययोगक्षेमत्वाच्च । न च बहिरिन्द्रियैस्तदारम्भेऽपि चेष्टाश्रयतया न लक्षणक्षतिरिति वाच्यम्, बाधकमन्तरेणेन्द्रियाश्रयत्वपरत्वात् । तदिह शरीरं विषयः, तस्यैकद्वित्रिचतुः-पञ्चप्रकृतिकत्वविप्रतिपत्तेः संशयः, प्रयोजनं देहल्य [?] पार्थिवत्वादिति स्थिरात्मभेदसिद्धिः । तत्र पूर्वपक्षः—गन्धवत्क्लेदाद्युपलब्धेर्मानुषशरीरं नानाप्रकृतिकम् निर्गन्धत्वाद्यापत्त्या विरुद्धगुणैर्जातिसंकरापत्त्या च विरुद्धजातीयैरारम्भसम्भवादेकप्रकृतिकमेव शरीरमिति व्यवस्थिते किमेकप्रकृतिकमित्यपेक्षायां स्फुटत्वान्मानुपादिशरीरमधिकृत्य तावत् सिद्धान्त्याह ... [NTĀ, I.O.L. Mss. Ch. III, fol. 5a-5b.]

(*b*) Udayana has raised in his *Tātparyaṭīkāpariśuddhi* an interesting problem about the inclusion of *śarīraparīkṣāprakaraṇa* in the first Āhnika of the third Adhyāya, where he answers an objection raised by Śrīvatsa :

(*ii*) एवं पञ्चभिः प्रकरणैरात्मा परीक्षितः । शरीरमिदानीं परीक्षितव्यम् ।

अत्र श्रीवत्सः—आत्मपरीक्षारूपैकार्थतया मिथः साकाङ्क्षतया च एकवाक्यतायां कथं नामीभिरेकमाह्निकमिति ? उच्यते । शरीरप्रकरणानामारम्भणीयानां तृतीयाध्यायानुप्रवेशस्य प्रागेव समर्थितत्वात्, आह्निकानन्तर्भूतानां च तद्व्याघातात्, स्वरुपतश्चोभयसंग्राहकस्योपाधेरभावात्, द्वितीयाह्निकोपाधिना चानुपसंग्रहात् पारिशेष्यात् प्रथमाह्निकोपाधिनैव क्रोडीकरणम् । न चात्मपरीक्षारूप उपाधिस्तथा भवितुमर्हतीति नासावाह्निकोपाधिः, किं तु पूर्वोक्त एव । तत् किमेषां प्रकरणानामात्मपरीक्षा नार्थो न वा विवक्षितः ? न, अर्थोऽपि विवक्षितोऽपि नाह्निकोपाधिरिति ब्रूमः । प्रधानतया हि यो यस्यार्थः स तत्रोपाधिरिह विवक्षितो न तु प्रसङ्गत उपोद्घातत प्रपञ्चतो वा । इह च प्राधान्यादात्मपरीक्षा प्रथमप्रकरणार्थ एव ।

दर्शनस्पर्शनाभ्यामेकार्थग्रहणात [न्या.सू. ३।१।१] इत्यनेन हि व्यवस्थित विषयेभ्य इन्द्रियेभ्योऽव्यवस्थितविषयमात्मानं साधयता शरीरादिभ्योऽपि व्यतिरेकः प्रसाधित एव । केवलं शिष्यबुद्धिविशारदीभावायोत्तरं प्रपञ्च्यत । तस्मात् यथोक्तमेव न्याय्यमिति । एतेनान्यत्रापीन्द्रियद्वैतादिप्रकरणेषु संगतिरनुसंधेयेति ।

[TTP, A.L. Thakur's Press copy, Ch. III, p. 30.]

(*c*) The introductory remarks of Keśava Miśra Tarkācārya on this *prakaraṇa* virtually summarize those of Udayana and Vācaspati Miśra II :

(*iii*) उद्देशक्रमानुरोधादिदानीं शरीरपरीक्षाप्रकरणम् । प्रसङ्गोऽप्यत्र सङ्गतिः। नन्वात्मपरीक्षानुमितैर्मिथः साकाङ्क्षैः कथममीभिः पञ्चप्रकरणैर्नैकमाह्निकम् ? उच्यते । आत्मादिचतुष्कवृत्तेरेव धर्मस्याह्निकोपाधित्वेनात्र विवक्षितत्वात्, पुंसां विचित्राभिसन्धित्वादिति ।

ननु कोऽस्य विचारस्य लक्षणोपयोगः, अनुपयोगे वा किं परीक्षया ? उच्यत । शरीरस्य विजातीयारब्धत्वे इन्द्रियैरप्यारम्भसम्भवे तस्य समवायादिन्द्रियसंयोगगर्भं शरीरलक्षणमसिद्धं स्यात् । तदिह शरीरं विषयः। तदेकद्वित्रिचतुःपञ्चप्रकृतिकत्वे संशयः । प्रयोजनं च पार्थिवत्वादिभिरात्मभेदसिद्धिः । गन्धौष्ण्यादीनामुपलब्ध्यविशेषे कथं पृथिव्येव मानुषशरीरस्योपादानं न भूतान्तरम् ? अन्यथा सिद्धेरुभयत्रापि सम्भवात् । एवं च 'उष्णं जलम्' 'सुरभिः समीरण' इति धीरप्युपपद्यत इत्याक्षिप्तपूर्वपक्षकं सिद्धान्तसूत्रम्—"पार्थिवं ... लब्धेः" । [GSP, p. 47.]

(251) P. 159, l. 6 : Bhaṭṭa Vāgīśvara reads this *sūtra* as पार्थिवं गुणान्तरोत्पत्तेः [NTD, p. 79.] Udayana, on the other hand, reads it as पार्थिवं तद्विशेषगुणोपलब्धेः [TTP, A.L. Thakur's Press Copy, Ch. III, p. 32], and this has been noted by the editor of *Nyāyasūtravivaraṇa.* [NSVV, p. 180, fn. 1].

(252) P. 159, l. 7 : the word गुणान्तर has been interpreted in various ways by different commentators, as will be evident from the passages quoted below:

(*a*) For Vātsyāyana, the word गुणान्तर means गन्ध :

(*i*) तत्र मानुषं शरीरं पार्थिवम् । कस्मात् ? गुणान्तरोपलब्धेः । गन्धवती पृथिवी, गन्धवच्च शरीरम् । [NB, p. 753.]

Vācaspati Miśra II and Keśava Miśra Tarkācārya also offer a similar interpretation :

(*ii*) अन्यथासिद्धगन्धोपलब्धिविशेष्यत्वान्मानुषपश्वादिशरीरं पार्थिवमित्यर्थः । [NTĀ, I.O.L. Mss. Ch. III, fol. 56.]

(*iii*) गुणान्तरं गुणविशेषो गन्धाख्यः । तेनेदं मानुषशरीरं पृथिवीत्वयोगि गन्धवत्त्वात् पृथिवीपरमाणुवत् । [GSP, p. 47.]

This interpretation (viz. गुणान्तर = गन्ध) seems to be somewhat

arbitrary, since the word गुण stands for all the twenty four qualities like smell, colour, taste, touch etc, and the addition of the word अन्तर need not restrict it to smell alone.

(*b*) For Bhaṭṭa Vāgīśvara, the word गुणान्तर stands for गन्ध as well as some other गुण-s that characterize पृथिवी:

(*iv*) मानुषं शरीरं पार्थिवम् । कस्मात् ? गुणान्तरोत्पत्तेः । यस्माच्छरीरेऽपि गन्धादेर्गुणान्तरस्योत्पत्तिरुपलब्धिः, तस्मात् पृथिवी । [NTD, p. 79.]

(*c*) For Rāmabhadra, as we have seen, the word गुणान्तर stands for गुण-s *that are different from* गन्ध, and that qualify पृथिवी *at the same time*. This interpretation has been accepted subsequently by Viśvanātha and Rādhāmohana:

(*v*) मानुषादिशरीरं पार्थिवं पृथिवीसमवायिकारणकं गुणान्तरस्य गन्धनीलादिरूपकाठिन्यादेरुपलब्धेरिति । [NSV, p. 754.]

(*vi*) पार्थिवं पृथिवीसमवायिकारणकं पृथिवीति यावत् । गुणान्तरस्य तेज-आदिव्यावृत्तगन्धनीलरूपादेरुपलब्धेरित्यर्थः । [NSVV, p. 18.]

(253) P. 160, ll. 3-6 : Most of the commentators have to explain the fact that the views presented in the three earlier *sūtras* have not been refuted by the author of *Nyāya-Sūtra*. According to Vātsyāyana, the reasons adduced by the opponent are pseudo-reasons, and hence, not worth refuting :

(*i*) त इमे सन्दिग्धा हेतव इत्युपेक्षितवान् सूत्रकारः । [NB, p. 754]. Bhaṭṭa Vāgīśvara also adopts this view :

(*ii*) तदेवमेकप्रकृतिकत्वं प्रमाणेन विनिश्चित्य द्वित्रिचतुःपञ्चप्रकृतित्वोपपादनार्थं परोक्तानां हेतूनां पाठमात्रेण फल्गुत्वं दर्शयितुमुपन्यस्यति........ एकभूतसमवायिकारणत्वेऽपि भूतान्तरोपश्लेषवशात् तत्तद्गुणोपलब्धिः पृथिव्यादिष्विव संभवतीत्यन्यथासिद्धास्त एव हेतव इति सूत्रत्रितयपाठतात्पर्यः । [NTD, p. 87.]

Vācaspati Miśra II has introduced these *sūtra*-s with the following brief remark :

(*iii*) अन्यथासिद्ध्यज्ञानपूर्वकानि पूर्वपक्षसूत्राणि ....

[NTĀ, I.O.L. Mss. Ch. III fol. 6a.]

The remarks of Keśava Miśra Tarkācārya are, for once, more elaborate :

(*iv*) एतदुक्तयुक्त्यैव निराकृतमिति न सिद्धान्ते सूत्रान्तरम् । पूर्वपक्षवाद्याशयस्फोरणमात्रत्वादमीषाम् । तथा च भाष्यम्— "त इमे सन्दिग्धा अहेतव इत्युपेक्षितवान् सूत्रकार" इति । अस्ति एतत्शून्यमशकादिशरीरदर्शनान्मांसस्यावष्टम्भकत्वमन्येषामुपष्टम्भकत्वमात्रमिति कश्चित् । हस्तादीनां विचित्राणां शरीरावयवत्वात् का गतिरिति चिन्त्यम् । [GSP, p. 47.]

The comments of Viśvanātha closely resemble those of Rāmabhadra :

(*v*) एतानि मतानि सूत्रकृता तुच्छत्वान्न दूषितानि । तथा हि — एकस्मिन् शरीरे पृथिवीत्वादिनानाजातेः सङ्करापत्तेरसम्भवात् ; न वा नानोपादानकत्वम्, विजातीयानामनारम्भकत्वात् ; तथात्वे वा जलाद्यारब्धस्य न पृथिवीत्वं व्यभिचारात्; न वा चित्रद्रव्यम्, गन्धवत्त्वविरोधात्, गन्धादीनामानाशमनपायाच्च पार्थिवत्वमित्युक्तप्रायम ।

यद् वा —पार्थिवत्वे कथं जलादिसम्बन्ध इत्याशङ्कायां जलादिनिमित्तवशात् त्रैभौतिकत्वादिव्यपदेश इत्याशयेन त्रिसूत्री ।

[NSV, pp. 756-757]

Rādhāmohana has expanded the suggestion furnished in the second alternative suggested by Viśvanātha :

(*vi*) ... मानुषादिशरीरं पृथिवीजलतेजःसमवायिकारणकं तद्गुणोपलब्धेः तेषां पृथिवीजलतेजसां ये गन्धस्नेहोष्णस्पर्शास्तेषामुपलब्धेरित्यर्थः । श्रुतिरपि—सेयं देवतैक्षत हन्ताहमिमास्तिस्रो देवता अनेन जीवेनात्मनानु-

प्रविश्य नामरूपे व्याकरवाणि तासां त्रिवृतं त्रिवृतमेकैकां करवाणीति। त्रिवृत्करणं नाम तेजोऽवन्नानां त्रयाणामेकैकं द्विधा संविभज्य पुनरेकैकभागस्य द्विधा विभागं कृत्वा स्वस्वद्वितीयं स्थूलभागं परित्यज्यान्यस्थूलभागयोरेकैकस्य योजनम्।...... क्लेदो जलविशेषो ... पाकस्य तेजःसंयोगाधीनत्वात् तेजःसिद्धिः। व्यूहा निःश्वासादिः। अवकाशदान छिद्रम्। न चास्मिन् पक्षे त्रिवृत्करणश्रुतिविरोधः, तस्य च पञ्चकरणोपलक्षकत्वात्। यद् वा— आकाशस्य सर्वावकाशतया सर्वाव्यतिरेकाद् वायोश्च सर्वचेष्टाहेतुत्वेन सर्वाविनाभूतत्वात् तयोस्तेजःप्रभृतिष्वन्तर्भावं सिद्धवत् कृत्वा त्रिवृत्करणं प्रयोगसौकर्यार्थं श्रुतिराहेति। एतन्मतत्रयं दूषितं भाष्यकारैः। अत्र सन्निहितानां तद्गुणोपलब्धेरिति भाष्यसिद्धान्तः। अत्र शरीरे सन्निहितानां निमित्तीभूतानां संयुक्तानां जलादीनां तद्गुणोपलब्धेः स्नेहादिगुणोपलब्धेरित्यर्थः। ... न च त्रिवृत्करणश्रुतिरेव मानमिति वाच्यम्, जलादिनां निमित्ततयैव श्रुतेरुपपत्तेः। .... जलादीनां निमित्ततया प्रवेशादेव पाञ्चभौतिकत्वेन व्यपदिश्यत इति। [NSVV, pp. 180-181.]

(254) P. 160, ll. 7-13 : (*a*) The *Bhāṣyā* and *Vārttika* passages in this connection are as follows :

(*i*) गन्धवती पृथिवी गन्धवच्च शरीरम्। अवादीनामगन्धत्वात् तत्प्रकृत्यगन्धं स्यात्। [NB, p. 753.]

(*ii*) ...पृथिव्युदकाभ्यामारभ्यमाणमगन्धं कारणगन्धस्यैकस्यानारम्भकत्वात्, पृथिव्यनलाभ्यामारभ्यमाणमरसं च, कारणगन्धरसयोः केवलयोरनारम्भकत्वात्; पृथिव्यनिलाभ्यामगन्धमरसं चारूपं च, वायोरगन्धरसरूपत्वात् पृथिव्याकाशाभ्यामगन्धमरसमरूपमस्पर्शं च, आकाशे गन्धाद्यभावात् सर्वत्र समानो न्यायः कारणगुणस्य केवलस्यानारम्भकत्वात् .... एककारणत्वे तु सततोत्पत्त्यनुत्पत्ती नित्यत्वप्रसङ्गश्चेत्युक्तम्।

[NV, pp. 754]

(*b*) Vācaspati Miśra I explains this passage in the following manner :

(*iii*) अयमभिसन्धिः—पृथिव्याप्यपरमाणू तावन्नैकं द्व्यणुकमारब्धुमर्हतः तयो रूपरसस्पर्शवत्त्वेन तदारम्भसम्भवेऽपि गन्धवत्त्वाभावप्रसङ्गात्, एवं पार्थिवपरमाणुसमवेतस्य गन्धस्यैकत्वेनानारम्भकत्वात् । नापि पार्थिवपरमाणुद्वयमेकश्च पाथसीयः परमाणुरित्यणूनामारम्भकत्वे गन्धवत्त्वोपपत्तिरिति साम्प्रतम्, परमाणूनां वहूनामनारम्भकत्वात् । तथा हि—त्रयः परमाणवो न कार्यद्रव्यमारभन्ते, परमाणुत्वे सति वहुत्वसंख्यायुक्तत्वात्, घटोपगृहीतपरमाणुप्रचयवत् । आरम्भकत्वे तेषां घटोपगृहीतानां कपालशर्कराचूर्णकमो घटनाशे नोपलभ्येत, द्व्यणुके च विजातीयानारम्भकत्वे सिद्धे तेनैव दृष्टान्तेनान्यत्रापि विजातीयेनाऽऽरम्भो निषेध्यः। एतेन पार्थिवावयवानां महतां पाथसीयैरवयवैः शरीरारम्भः प्रत्युक्तः, विजातीयानामनारम्भकत्वस्य दृष्टान्तधर्मिणि विनिश्चयादिति । तदनेन वार्त्तिककृता षड्विंशतिर्विकल्पा निराकृता इति । यदि पुनरेकैकं कारणं स्यात् ततः किं भवेदित्यत आह— एककारणत्वे त्विति ।

[NVTT, pp. 755-756.]

(*c*) Udayana's comments in this connection are as follows :

(*iv*)... अयमभिसन्धिरिति । नत्वेको गन्धोऽनारम्भक इत्येतदेव कुतः ? अनपेक्षत्वेन सततोत्पादकत्वप्रसङ्गादिति चेत् ? अथानेकस्यापि कुत एतन्न प्रसज्यते, अपेक्षणीयस्य समवायिकारणस्याभावात् । न ह्यनपेक्षितसमवायिकारणमसमवायिकारणमारम्भकमिति चेत् तदेतदेकत्रापि तुल्यम । तत्त्वादिगतानां रूपादीनामनेकेषामेवारम्भकत्वदर्शनादन्यत्रापि तथा कल्प्यत इति चेत् ? न, कारणाना सजातीयतया तत्र तथोपपत्तेः । विजातीयानामारम्भकत्वे त्वन्यथा भविष्यति, विपक्षे बाधकाभावात् । तेनोष्णं जलं

सुरभिः समीर इत्यादयोप्युपपद्यन्त इति । तदसत्, अभिप्रायानवबोधात् । अनियमारम्भे हि सजातीययोरपि परमाण्वोर-नारम्भकत्वमेषितव्यम् । अन्यथा निर्गन्धजलादेर्नीरसस्या-नलादेर्नीरूपस्य पवनादेरनुपलब्धिप्रसङ्गः। तथा च —गन्धवद्द्रव्यं गन्धवता आरभ्यते, रसवच्च रसवतेत्यादि । गन्धवच्च द्रव्यं गन्धवदारभते, रसवच्च रसवदित्यादि, निर्गन्धं तु निर्गन्धेन, नीरसं तु नीरसेनेत्यादि । तथा निर्गन्धं निर्गन्धं नीरसं नीरसमित्यादि । निर्गन्धं तु न गन्धवत्, गन्धवदपि न निर्गन्धमित्यादि च सिध्यति । इत्येवं व्यवस्थिते पार्थिवपाथ-सीयाणुभ्यामारब्धे द्व्यणुके यद्येकस्माद् गन्धाद् गन्धो भवेत्, तदा तेन गन्धवता द्रव्येण स्वकारणे गन्ध आक्षेप्तव्यः, कारणं विना कार्यस्यानुत्पत्तेः। निर्गन्धता च प्रतिक्षेप्तव्या, विरुद्धव्याप्तोपलब्धेः । तत्र पाथसीयस्यापि गन्धसम्भवे पार्थिवतया पाथसीयत्वव्याघातो जातिसङ्करो वा । न वा गन्धो लक्षणं पृथिव्याः, तस्यापि पार्थिवत्वे विजातीयारम्भकत्वेन व्याघातश्चेति सर्वं समाकुल-मापद्येत। निर्गन्धस्य तु द्व्यणुकस्य तदारम्भसम्भवो नोपपद्यत इत्यकामेनाप्ये-कस्यानारम्भकत्वमास्थेयम् । तदिदमुक्तम्— एकस्यानारम्भकत्वादिति ।

[TTP, A.L. Thakur's Press Copy, Ch. III, pp. 32-33]

(255) P. 160, ll. 16-20 : For the *Nyāyavārttika* passage quoted here, see NV, p. 754. The reading of the *Nyāyabhāṣya* passage is found in a slightly different from in the printed edition.

"... संयोगाप्रतिषेधात् सन्निहितानामिति, यथा स्थाल्यामुदकतेजोवाय्वा काशानामिति"। [NB, p. 754]

(256) P. ll. 1-3 : Udayana's remarks are as follows :

स्यादेतत् । विजातीयानामारम्भकत्वप्रतिषेधे भवत्वेकप्रकृतिकं शरीरम्। किंप्रकृतिकं पुनरित्यस्य सूत्रम् —पार्थिवं तद्विशेषगुणोपलब्धेः । सा च तद्विशेषगुणोपलब्धिः सन्दिग्धा, क्लेदपाकादीनामप्युपलब्धेः । सा संयुक्त-

समवायेनेति चेत् ? गन्धः समवायेनेति कथमवधारणीयम् ? उच्यते — तद्विशेषगुणो ह्यत्र सप्रकर्षो विवक्षितः प्रकर्षश्चानाशमनपायित्व-मितरविशेषगुणानुद्भवश्च । तदिह शरीरऽबादिविशेषगुणानां शैत्यद्रवत्व-भास्वरत्वोष्णत्वादीनां नानाशमनपायित्यम् । तदवयवानां त्वगस्थिमांसादीनां शेषदशायामपि गन्धवत्क्लेदादीनामननुवृत्तेः ।

[TTP, A.L. Thakur's Press Copy, Ch. III, p. 35.]

(257) P. 161, ll. 4-5 : Viśvanātha has raised a similar issue, and he has also noted some divergent view regarding it :

इमां चतुःसूत्रीं केचन भाष्यतया वर्णयन्ति, तन्न, तथा सत्येकसूत्रस्य प्रकरणत्वानुपपत्तेः।

अत एव चतुर्थं सूत्रमेवेत्यपरे ।

अन्ये तुक्तयैवानुपपत्त्या 'आप्यतैजसवायव्यानि लोकान्तरशरीराणि तेष्वपि भूतसंयोगः पुरुषार्थतन्त्र' इति भाष्यं सूत्रतया वर्णयन्ति ।

[NSV, p. 757.]

(258) P. 161, ll. 12-13 : this *Bhāṣya* passage is to be found in NB, p. 753.

(259) P. 161, l. 18 : (*a*) Rāmabhadra has not indicated the *saṅgati* that connects this *prakaraṇa* with the earlier one. The same is the case with Viśvanātha and Rādhāmohana.

(*b*) Vācaspati Miśra I, has made the following observation :

(*i*) उद्देशक्रमानुरोधाच्छरीरानन्तरमिन्द्रियाणां परीक्षां प्रतिजानीते भाष्यकारः — अथेदानीमिन्द्रियाणि प्रमेयक्रमेणेति । तत्र परीक्षापूर्वरूपं संशयमाह— किमाव्यक्तिकानि आहोस्विद्भौतिकानीति । उपलक्षणं चैतत । यदाऽपि भौतिकानि तदाऽपि किं कृष्णसारं यदेतदुपलभ्यते तदेवेन्द्रियम्

आहो तदधिष्ठानं तैजसमित्यपि संशयो द्रष्टव्यः। विप्रतिपत्तेः संशयः। तत्र पूर्वः सांख्यनैयायिकयार्विप्रतिपत्तेः, उत्तरस्तु सौगतनैयायिकयोरिति।

[NVTT, pp. 757-758]

(*c*) Udayana's comments on this passage are as follows :

(*ii*) प्रकरणान्तरमवतारयति— उद्देशेति। एकतरपदोपादानेऽपि सङ्गतिलाभे उद्देशलक्षणेत्युभयपदोपादानं सङ्गतिदार्ढ्याय। अनेनैव प्रमेयकमेणेति भाष्यं व्याख्यातम्। एकः संशयः, द्वे च परीक्षे इति विरुध्यते, अत आह— उपलक्षणं चैतदिति।

[TTP, A.L. Thakur's Press Copy, Ch. III, p. 37.]

(*d*) According to Bhaṭṭa Vāgīśvara, the *saṅgati* here is अवसरसङ्गति, as is suggested by the following remark :

(*iii*) अथेदानीमवसरप्राप्तानीन्द्रियाणि परिचिक्षिषुस्तत्पूर्वरूपं संशयं विप्रतिपत्त्या दर्शयति ... [NTD, p. 80.]

(*e*) Vācaspati Miśra II says :

(*iv*) अथोद्देशक्रमसङ्गत्या इन्द्रियपरीक्षाप्रकरणम्। तत्रेन्द्रियाणि विषयः, अधिष्ठानान्यभूतात्मकानि न वेति संशयः, न वा पक्षेऽपि अधिष्ठानात्मकान्येव ततोऽन्यभूतानि वेत्यार्थः संशयः। तत्राधिष्ठानान्यभूतमिन्द्रियमिति नैयायिकाः, अधिष्ठानमिन्द्रियमिति बौद्धाः, अधिष्ठानान्यभूतमाहङ्कारिकमिति सांख्याः। प्रयोजनन्तु — अधिष्ठानान्यभूतस्य करणत्वसिद्धौ शरीरसंयोगीन्द्रियलक्षणसिद्धिः। ... [NTĀ, I.O.L. Mss. Ch. III fol. 6b.]

(*f*) Keśava Miśra Tarkācārya has followed Vācaspati Miśra II :

(*v*) उद्देशक्रमानुरोधादिन्द्रियपरीक्षाप्रकरणम्। तत्रेन्द्रियाणि विषयः। अधिष्ठानान्यभूतात्मकानि न वेति संशयः। नेति पक्षे अधिष्ठानात्मकान्येन ततोऽन्यानि वेति संशयस्त्वार्थः। अन्यथा अर्थभेदे प्रकरणभेदापत्तिः।

प्रयोजनं तु भूतान्यस्य विशेषगुणवत्त्वेनात्मत्वापत्तौ करणसिद्धिः। अधिष्ठानात्मकत्वे च तेषां शरीरावयवत्वेन तत्संयोगगर्भेन्द्रियलक्षणसिद्धिः।

Here Kesva Miśra Tarkācārya has explained some of the arguments of Vācaspati Miśra II. [GSP, p. 48]

(260) P. 162, l. 6 : This view of Rāmabhadra is not shared by some commentators, according to whom the *sūtra* under consideration indicates the Sāṇkhya view alone. Thus, Bhaṭṭa Vāgīśvara comments as follows :

(*i*) तत्राभौतिकं चक्षुरित्याह–

॥ महदणुग्रहणात् ॥

महच्चाणु च महदणुनी तयोर्ग्रहणं महदणुग्रहणं तस्मान्महदणुग्रहणात। महतः शैलादेरणुनः सर्षपादेर्ग्रहणादभौतिकं चक्षुस्तस्यापि बहुत्वात् सर्वव्यापकत्वेनोभयग्राहकत्वसंभवात। भौतिकन्तु यावत्तावदेव व्यापकमिति नोभयग्रहणं संभवतीति सूत्रार्थः॥ [NTD, p. 81.]

Vācaspati Miśra II remarks as follows :

(*ii*) सांख्यसूत्रं–

॥ महदणुग्रहणात् ॥

अण्विति दृष्टान्तः। तेनाणुग्रहणवन्महतः परिमाणस्यापि ग्रहणान्न गोलकं न वा तदतिरिक्तं भूतं चक्षुः, किन्त्वाहङ्कारिकम्, वैभवाच्च पृथुव्यवहितादिग्राहि। न च गोलकमपि तथोत्पन्नं पृथुव्यवहितग्राहि स्यात्, क्षणभङ्गुरस्य भङ्गादित्यर्थः। [NTĀ, I.O.L.Mss., Ch. III, fol. 6b.]

Keśava Miśra Tarkācārya has followed Vācaspati Miśra II. [GSP, p. 48.]

Viśvanātha also says :

(*iii*) तत्र सांख्यमतेन बौद्धमतमुदस्यन्नाह–

॥ महदणुग्रहणात् ॥

गोलकं नेन्द्रियम्, अप्राप्यकारित्वेऽतिप्रसङ्गात। इत्थं च गोलकातिरिक्तं भौतिकमिति वाच्यम्, तदप्यसङ्गतम्, चक्षुषा हि न्यूनपरिमाणं महत्परिमाणं च गृह्यते, न च न्यूनेन महतो व्यापनं सम्भवति। न च अव्याप्य ग्रहणम्, अतोऽभौतिकानीन्द्रियाण्याहङ्कारिकाणीति।

[NSV, pp. 760-762.]

Rādhāmohana upholds a similar interpretation :

(*iv*) तत्रातिरिक्तत्वऽपि न भौतिकत्वं किं त्वाहङ्कारिकत्वमिति सांख्यमतमाह —

॥ महदनुग्रहणात् ॥

महतो वस्तुनोऽनुग्रहणात् चक्षुषा साक्षात्कारजननाच्चक्षुर्न भौतिकम। भौतिकत्वे हि न्यूनपरिमाणेन चक्षुषा महतो व्यापनासम्भवेन तत्साक्षात्कारानुपपत्तिरिति। अथवा महदणुग्रहणादिति पाठः। अणोर्न्यूपरिमाणस्य यथा चक्षुषा ग्रहणं तथाधिकपरिमाणस्यापि ग्रहणादित्यर्थः। तत्र महतो ग्रहणं चक्षुषो भूतत्वे न सम्भवतीत्युक्तम।

केचित्तु – पूर्वसूत्रं संशयप्रदर्शनपरम। तत्र वौद्धनिरासेन संशयनिरासकसिदं सूत्रम। तथा च—कदाचिन्महतः कदाचिदणोश्च ग्रहणाद् विषयेन्द्रियसम्वन्ध एव नियामको वाच्य इति गोलकस्य तद्वाधात् तदतिरिक्तिमिन्द्रियं स्वीकार्यं यत्सम्वन्धासम्वन्धाभ्यां विषयग्रहणाग्रहणनियम इति। नत्वतिरिक्तित्वेऽपि कथं तत्सम्वन्धोऽतिरिक्तमपि किं क्लृप्तान्तर्गतमुत नेत्यत आह—रश्म्यर्थतीति प्राहुः।

अभौतिकानीन्द्रियाणीत्यवतारभाष्यं सूत्रादौ केचिल्लिखन्ति।

[NSVV, pp. 183-184.]

(261) P. 162, l. 7 : From the NSVV passage quoted above, it is clear that Rādhāmohana prefers to read this *sūtra* as महदनुग्रहणात्. We also gather there from that some commentators prefer the reading अभौतिकानीन्द्रियाणि महदणुग्रहणात्.

(262) P. 162, ll. 14-18 : Vācaspati Miśra II provides us with a more exact commentary :

(*i*) एवं साध्यमुखेन वौद्धे निरस्ते सांख्यनिरासाय सिद्धान्तसूत्रम्–

॥ रश्म्यर्थसन्निकर्षविशेषात्तद्ग्रहणम् ॥

लाघवेन रश्मिना अर्थस्य यः सन्निकर्षविशेषः चतुरात्मकः तस्मात् तद्ग्रहणं गोलकाधिकपरिमाणद्रव्यग्रहणम। तथा–इन्द्रियार्थया: तदवयवयोः इन्द्रियावयवार्थयोः अर्थावयवेन्द्रिययोः चतुर्विधः संयोगः। किञ्च–आहङ्कारिकत्वे वैभवात् कुड्याद्यन्तरितानपि गृह्णीयात्. न च विवादपदं चक्षुः भूतजन्यम्, इन्द्रियत्वाच्छ्रवणवदिति अनवयवत्वेनोपहितत्वात। [NTĀ, I.O.L.Mss., Ch. III, fol. 6b-7c.]

Here, the four types of *sannikarṣa*-s enumerated by Vācaspati Miśra II have been enumerated much earlier by Vācaspati Miśra I :

(*ii*) ...इन्द्रियेणार्थस्य सम्वन्धः, इन्द्रियावयवैरर्थस्य, अर्थावयवैरिन्द्रियस्य, इन्द्रियावयवैरर्थावयवानाम् ... [NVTT, p. 104.]

As a matter of fact, Vācaspati Miśra II has borrowed here extensively from the following remarks of Vācaspati Miśra I :

(*iii*) नैयायिकः सांख्यं दूषयति–

॥ रश्म्य–रम् ॥

आहङ्कारिकत्वे चक्षुर्न प्रतिहन्यते यदि, तत् काचाभ्रपटलान्तरितवत् कुड्यान्तरितमपि प्रकाशयेत। न चैवमस्ति। तस्मात् कृष्णसाराधिष्ठानं तेज एव भौतिकं प्राप्य गृह्णाति, कुड्यान्तरितं त्वर्थमप्राप्य न गृह्णाति। काचाभ्रपटलान्तरिते तु वक्ष्यति। [NVTT, p. 766.]

Keśava Miśra Tarkācārya, while borrowing from Vācaspati Miśra II, has added some new points as well :

(*iv*) सिद्धान्तसूत्रम्–

॥ रश्म्यर्थ...ग्रहणम् ॥

रश्म्यर्थसन्निकर्षविशेषात् चतुर्विधात् प्रत्यक्षसूत्रोक्तत्वात् तस्य महतो ग्रहणम्। अतः दृष्टमविभिन्नं [?] भौतिकमिन्द्रियम। तद्धि गत्वा गृह्णाति। कुड्यादिना च प्रतिवद्ध्यते पृथ्वग्रतया च दीपप्रभावद् विसारि च। आहङ्कारिकत्वे च काचवत् तस्यापि ग्रहणापत्तेः। महद्ग्रहणस्य चाभौतिकत्वे साध्ये दीपशिखायां व्यभिचारात। [GSP, pp. 48-49.]

(263) P. 162, l. 19 : Other commentators have introduced and explained the *sūtra* तदनुपलब्धेरहेतुः in a different manner. (*a*) Uddyotakara's comments are as follows :

(*i*) आवरणानुमेयत्वे सतीदमाह–

॥ तदनुपलब्धेरहेतुः ॥

न चाक्षुषो रश्मिर्विद्यते इति सूत्रार्थः। कथमिति? उपलब्धिलक्षणप्राप्तत्वादनुमानानुपपत्तिः–यत् खलूपलब्धिलक्षणप्राप्तं नोपलभ्यते तन्नास्ति, यथा घटादि, घटादेर्महदनेकद्रव्यवत्त्वरूपवत्त्वानि सन्तीत्युपलभ्यन्ते घटादयः, तथा महदनेकद्रव्यवत्त्वरूपवांश्चाक्षुषो रश्मिः कस्मात् प्रत्यक्षतो नोपलभ्यत इति – महत्त्वं तावत् कारणमहत्त्वबहुत्वप्रचयेभ्यः, अनेकद्रव्यवत्त्वमपि कारणबहुत्वादेव, रूपस्पर्शवद्धि तेज इति नारूपं तत्–एवमशेषकारणसन्निधाने सति यन्नोपलभ्यते तेन गम्यते नास्तीति। [NV, p. 764.]

(*b*) Vācaspati Miśra II explains this *sūtra* in the following manner :

(*ii*) आवरणानावरणयोरग्रहग्रहौ गोलकातिरिक्ते चक्षुषि न लिङ्गं प्रत्यक्षबाधादिति शङ्कते–

॥ तदनुपलब्धेरहेतुः ॥

उक्तलिङ्गमतिरिक्ते चक्षुषि अहेतुः, तदनुपलब्धेः अतिरिक्त चक्षुषोऽनुपलब्धेः, प्रत्यक्षबाधादित्यर्थः। [NTĀ, I.O.L.Mss. Ch, III, fol. 7a].

(*c*) The comments of Keśava Miśra Tarkācarya are as follows :

(*iii*) शङ्कते–

॥ तदनुपलब्धेरहेतुः ॥

रूपोपलब्ध्या तदनुमानमयुक्तम्, रूपवतो महतो योग्यानुपलब्धेर्बाधादिति सूत्रार्थः। [GSP, p. 49.]

(*d*) Viśvanātha prefers to explain it as follows :

(*iv*) तैजसे चक्षुष्यनुपलब्धिबाधं बौद्धः शङ्कते–

॥ तदनुपलब्धेरहेतुः ॥

रश्म्यर्थसन्निकर्षो न हेतुर्गोलकातिरिक्तस्य रश्मेरनुपलब्धेः।
[NSV, p. 764.]

(*e*) Rādhāmohana's remarks are as follows :

(*v*) गोलकातिरिक्तेन्द्रियस्य बाधमाशङ्कते बौद्धः–

॥ तदनुपलब्धेरहेतुः ॥

तद गोलकातिरिक्तमिन्द्रियम। न हेतुः न साक्षात्कारकारणम् अनुपलब्धेः अनुपलब्धिबाधितत्वात। परेषामसतोऽपि भानान्नाश्रयासिद्धिः। अथ वा–गोलकातिरिक्तं न साक्षात्कारकारणमिन्द्रियं तत्त्वेनाप्रतीयमानत्वादिति। [NSVV, p. 158.]

(264) P. 163, l. 4 : After explaining this *sūtra*, Vācaspati Miśra II has remarked as follows :

(*i*) अत्र कणादसम्मतिप्रदर्शनाय तत्सूत्रम्–

॥ महदनेकद्रव्यवत्त्वाद्रूपवत्त्वाच्चोपलब्धिः ॥

सुगमोऽर्थः। [NTĀ, I.O.L.Mss, CH. III, fol. 7*a*]

No other commentary has treated this sentence as a constituent of *Nyāya-sūtra*-s. Uddyotakara has, however, discussed the import of this sūtra :

(*ii*) अपरे तु – 'महदनेकद्रव्यवत्त्वाद्रूपवत्त्वाच्चोपलब्धि' रित्युपलब्धौ नियमं वर्णयन्ति नोपलभ्यमान इति। किमुक्तं भवति ? न युक्तो यत्र यत्र महदनेकद्रव्यवत्त्वरूपाणि सन्ति तत्तदुपलभ्यत इति, अपि तु यद् यदुपलभ्यते तत्र तत्र महदनेकद्रव्यवत्त्वरूपाणि सन्तीति। एवं तर्हि इदं सूत्रं नोपलब्धेः कारणप्रतिपादकं सत्स्वभावादिति–सत्सु महदनेकद्रव्यरूपेषु उपलब्धिर्न भवतीति नैतान्युपलब्धिकारणमिति। [NV, p. 765.]

Vācaspati Miśra I has explained this passage the following manner :

(*iii*) आचार्यदेशीयानां मतमाह–अपरे त्विति। दूषयति–एवं तर्हीदमिति। यत्रोपलब्धिस्तत्रैतदिति सूत्रार्थः। ततो महत्त्वादिषु मध्ये यत्किञ्चिदेकं वक्तव्यं सूत्रकारेण यत्रोपलब्धिस्तत्रैतदित्येकस्मादेव सिद्धेरनेकोपादानवैयर्थ्यम्। तस्मात् सम्भावनायोग्यताभिधानपरं सूत्रम्।
[NVTT, p. 765.]

It is thus clear that even these passages do not suggest in any way that the sentence महदनेकद्रव्यवत्त्वाद्रूपवत्त्वाच्चोपलब्धिः belongs to both *Nyāya-Sūtra*-s and *Vaiśeṣika-Sūtra*-s. It may be the case that some commentators had erroneously considered this sentences as a *Nyāya-Sūtra*, and that Vācaspati Miśra II has merely set the record straight.

(265) P. 163, l. 8 : (*a*) Bhaṭṭa Vāgīśvara, Vācaspati Miśra II and Rādhāmohana Gosvāmi Bhaṭṭācārya have read this *sūtra* as द्रव्यगुणधर्मभेदाच्चोपलब्ध्यंनियमः. [See NTD, p. 81 ; NTĀ, I.O.L.Mss., Ch. III, fol 7a, ; NSVV, p. 184.]

(*b*) After this *sūtra*, the Metropolitan edition of NB, and NVTT reads one more sentence as a *sūtra*, viz. अनेकद्रव्यसमवायात्

रूपविशेषाच्च रूपोपलब्धिः. This has been counted as a *sūtra* by Bhaṭṭa Vāgīśvara, Vācaspati Miśra II, Keśava Miśra Tarkācārya, Rāmabhadra Sārvabhauma, Viśvanātha Pañcānana and Rādhāmohana Gosvāmi Bhaṭṭācārya.

(366) P. 163, l. 13 : According to Viśvanātha Pañcānana, this sentence is not a *sūtra*, but a portion of *Nyāya-Bhāṣya*, as is evident from the following remarks:

(*i*) चक्षुरादावुद्भूतरूपमेव न कुत इत्याशङ्कायां भाष्यम् "कर्मकारितश्चेन्द्रियाणां व्यूहः पुरूषार्थतन्त्रः"। अदृष्टविशेषाधीन इन्द्रियाणां व्यूहो रचनाविशेष उपयोगसाधनमिति। सूत्रमेवेदमिति केचित।

[NSVV, p. 767.]

Viśvanātha has not given any reason in favour of his view. Uddyotakara seems to have accepted this sentence as a *sūtra*, as appears from his remark quoted below :

(*ii*) कर्मकारितश्चेन्द्रियाणां व्यूहः पुरूषार्थतन्त्रः। शेषं भाष्ये ।

[NV, p. 767.]

According to Bhaṭṭa Vāgīśvara, Vācaspati Miśra II, Keśava Miśra Tarkācārya and Rādhāmohana Gosvāmi Bhaṭṭācārya, this sentence is a *sūtra*. [NTD, p. 82 ; NTĀ, I.O.L.Mss. Ch. III, fol. 7*a*; GSP, p. 49 ; NSVV, p. 186.] Rādhāmohana has, however, given a new interpretation to this *sūtra* ; and he has also recorded the view of Viśvanātha that this sentence is not a *sūtra* :

कर्मणे कार्याय प्रत्यक्षात्मककार्याय कारितः स्वीकृत इन्द्रियाणां व्यूहो रचनाविशेषः समूह इति वा। पुरूषार्थसाधक इत्यर्थः। तथा च प्रयोजनविरहेणोद्भूतरूपं न स्वीक्रियत इति भावः। केचित्तु—कर्मकारिताऽदृष्टविशेषाधीन इत्यर्थः । तथा चादृष्टविशेष एवोद्भूतरूपविरहे प्रयोजक इत्याहुः । सूत्रमिदं भाष्यकारस्येति केचित । [NSVV, p. 186.]

(*b*) After this *sūtra*, Bhaṭṭa Vāgīśvara has read two sentences as *sūtra*-s. These are :

(*i*) द्रव्यविशेषे च प्रतिघातादावरणोपपत्तिः

(*ii*) अव्यभिचारात्तु प्रतिघातो भौतिकधर्मः

[NTD, p. 82.]

These are, however, parts of *Nyāya-Bhāṣya* [NB, pp. 767.] The printed edition of *Nyāyasūtroddhāra* ascribed to Vācaspati Miśra II reads here the sentence अव्यभिचाराच्च प्रतिघातो भौतिकधर्मः [NSU, p. 405.], but this does not occur at as a *sūtra* in *Nyāyatattvāloka* of Vācaspati Miśra II [NTĀ, I.O.L.Mss. Ch. III, fol. 7*a*].Thus, the evidence of *Nyāyasūtroddhāra* on this point appears to be highly suspect. *Nyāyavārttika* of Uddyotakara reads this sentence as अव्यभिचारी तु प्रतीघातो भौतिकधर्मः [NV, p. 768.]. Rāmabhadra, Viśvanātha, Keśava Miśra Tarkācārya and Rādhāmohana are silent on this point. [NR, p. 163 ; NSV, p. 767 ; GSP, p. 49 ; NSVV, p. 186.]

(267) P. 165, l. 12, l. 15 : Viśvanātha Nyāyapañcānana informs us that according to some commentators, l. 12 is a part of *Nyāyabhāsya*, while l. 15 is a *Pūrvapakṣasūtra* :

(*i*) समाधत्ते–

॥ कुड्यान्तरितानुपलब्धेरप्रतिषेधः ॥

परे तु–उक्तसूत्रस्य पूर्वपक्षपरत्वं मन्यमानस्य भाष्यकारस्यावतरणिका–अप्राप्तग्रहणमिति।

वस्तुतः सिद्धान्तसूत्रमेव तत्, प्रदीपदृष्टान्तेन काचाद्यन्तरितप्रकाशकत्वेन तैजसत्वं सिद्धतीति। नन्वप्राप्यकारित्वमेव किं न स्यादत्राह–कुड्येति।

[NSV, p. 775.]

Bhaṭṭa Vāgīśvara, Vācaspati Miśra II, Keśava Miśra Tarkācārya and Rādhāmohana have also treated l. 15 as a *Siddhāntasūtra* [NTD, p. 84 ; NTĀ, I.O.L.Mss. Ch. III, fol, 7*b*; GSP, p. 80 ; NSVV, p. 189.]. Vācaspati Miśra II, however, provides a slightly different reading of this *sūtra*:

(*ii*) अत्र प्राप्तिं मनसिकृत्य समाधत्ते–

॥ कुड्यान्तरितानुपलब्धेरहेतुः ॥

काचाद्यन्तरितग्रहणं न अप्राप्यकारित्वे हेतुः, कुड्यान्तरितानुपलब्धेः, अप्राप्यकारित्वे एतदपि न स्यादित्यर्थः।

[NTĀ, I.O.L.Mss. Ch. III, fol. 7*b*]

(268) P. 167, l. 18 : This *sūtra* states an early Sāṅkhya view, as is attested by *Bhāmatī* of Vācaspati Miśra I related to *Śaṅkara-Bhāṣya* on *Brahma-Sūtra* 2.2.10 :

त्वङ्मात्रमेव हि बुद्धीन्द्रियमनेकरूपादिग्रहणसमर्थमेकम।

[*Bhāmatī*, Nirṇaya Sāgara edition, 19, p.]

(269) P. 168, ll. 8-16 : The sentences declared here as parts of *Nyāya-Bhāṣya* can be found in *Nyāya-Bhāṣya*, pp. 783-784. It seems that some commentators had treated these sentences as *sūtra*-s, and that is why Rāmabhadra has specifically declared them to be parts of *Nyāya-Bhāṣya*. This has also been done by Udayana in his *Tātparyaṭīka-pariśuddhi* :

कथं पुनः नेन्द्रियान्तरार्थानुपलब्धेः, त्वगवयवविशेषेण धूमोपलब्धिवत्तदुपलब्धिः, व्याहतत्वादहेतुः – इति वाक्यत्रयस्य भाष्यत्वमवधृतमित्यभिप्रायवान् वार्त्तिकमवतारयति–एवमिति । यदि ह्येतानि सूत्राणि स्युः, न युगपदर्थानुपलब्धेरिति सूत्रं सूत्रेण वाभिसम्बन्ध इति नावतारयेदिति भावः।

[TTP, A.L.Thakur's Press Copy, Ch. III, p. 54.]

(270) P. 169, l. 8 : Before this, one more sentence, viz. विप्रतिषेधाच्च न त्वगेका is accepted as a *sūtra* in all editions of *Nyāya-Bhāṣya*. The manner in which Uddyotakara records this sentence shows that he, too, regards it as a *sūtra* :

विप्रतिषेधाच्च न त्वगेका। शेषं भाष्य। [NV, p. 786.]

Vācaspati Miśra I has not commented on this portion, and Udayana is also silent about it. For reasons best known to themselves, Bhaṭṭa Vāgīśvara, Vācaspati Miśra II, Visvanātha Nyāyapañcānana, Keśava Miśra Tarkācārya and Rādhāmohana Gosvāmi Bhaṭṭācārya have not accepted this sentence as a *sūtra*. [NTD, p. 86 ; NTĀ, I.O.L.Mss. Ch. III, fol. 8*b* ; GSP, p. 52 ; NSV, p. 757 ; NSVV, p. 193.].

(271) P. 170, ll. 7-18 : (*a*) Vācaspati Miśra II has explained this *sūtra* in a somewhat different manner :

परिहरति—

॥ न बुद्धिलक्षणाधिष्ठानगत्याकृतिजातिपञ्चत्वेभ्यः ॥

बुद्ध्यात्मकस्य लक्षणस्य पञ्चत्वादिन्द्रियस्यैकत्वं न, किन्तु पञ्चत्वम्। अधिष्ठानं गोलकादि, तत्पञ्चत्वात। ननु द्वे गोलके द्वे कर्णशष्कुल्यौ, तत्कथं पञ्चाधिष्ठानानि, गोलकादित्वेन विवक्षणात। गतिः प्रकारस्तत्पञ्चत्वात ; नयनं हि निःसृत्य गृह्णाति, त्वक् देहमात्रावच्छेदेन, रसनं मुखावच्छेदेन, घ्राणं नासावच्छेदेन, श्रोत्रं शष्कुल्यवच्छेदेन। आकृतिः परिमाणं तत्पञ्चत्वात ; श्रोत्रं विभु नेत्रं क्रोशादिव्यापि, त्वक् देहमात्रव्यापिनी, रसनं पञ्चषाङ्गुलव्यापि, घ्राणं द्वित्राङ्गुलव्यापि। जातिः स्वाभाविको धर्मः पृथिवीत्वादि, तत्पञ्चत्वात।

अनुमितिश्चैवम्—गन्धोपलब्धी रूपाद्युपलब्ध्यजनकसंयोगिकरणसाध्या, वाह्यविशेषगुणोपलब्धित्वात। अत्र मनोजन्यया सुखोपलब्ध्या द्वीन्द्रियजन्यया संख्योपलब्ध्या च व्यभिचारवारणाय वाह्यविशेषपदे इति। एवं व्यावृत्तकरणसिद्धौ तत् पृथिवी, रसाव्यञ्जकत्वे सति गन्धव्यञ्जकद्रव्यत्वात्, वायूपनीतसुरभिभागवत। प्रत्यासत्त्या व्यभिचारवारणाय द्रव्यपदम्, आत्ममनोभ्यां च व्यभिचारवारणाय सत्यन्तम। न च दग्धभूगन्धव्यञ्जकेनोदकेन स्तिमितकस्तुरीगन्धव्यञ्जकेनातपेन व्यभिचारः ; जलसंयोगात् पूर्वं द्रव्यनाशे द्रव्यान्तरे गन्धोत्पत्तौ सहकारित्वात्,

आतपस्य च जलमात्रापनोदकत्वात; अन्यथा तयोर्गन्धवत्त्वापत्तेः। यद्विशेषगुणव्यञ्जकं यद्वाह्यद्रव्यं तत्तज्ञातीयगुणवदिति नियमात। एवं रसनमाप्यं, परकीयरूपाद्यव्यञ्जकत्वे सति पार्थिवरसव्यञ्जकद्रव्यत्वात् दन्तोदकवत। अत्र दृष्टान्तासिद्धिवारणाय परकीयेति, जलरसव्यञ्जिकया हरीतक्या व्यभिचारवारणाय पार्थिवेति। एवं चक्षुस्तैजसम्, गन्धाद्यव्यञ्जकत्वे सति रूपव्यञ्जकद्रव्यत्वात्, प्रभावत। एवं त्वक् वायवीया, गन्धाद्यव्यञ्जकत्वे सति परकीयस्पर्शव्यञ्जकद्रव्यत्वात्, स्वेदादि-स्पर्शव्यञ्जकपवनवत। अत्र वायूपनीतशीतोष्णद्रव्याभ्यां स्पर्श-मात्रव्यञ्जकाभ्यां व्यभिचारवारणाय परकीयेति। श्रोत्रस्य नभस्त्वं परिशेषात। यद्यपि नभस्त्वं न जातिस्तथापि शव्दाश्रयत्वे तात्पर्यम।

न चैतत्प्रकरणेनैव भौतिकत्वस्यापि सिद्धेः पूर्वप्रकरणं गतार्थम। तत्र स्वातन्त्र्येण तत्साधनात्, अत्र तु नानात्वसाधनतैरश्चीन्येनेति यावत।
[NTĀ, I.O.L.Mss. Ch. III, fol. 9*b*-10*b*.]

(*b*) Rādhāmohana has explained the word आकृति in another manner :

आकृतिः ज्ञानाकृतिः, सा च विषय एव। तथा च विषयाणां पञ्चविधत्वात। [NSVV, p. 195.]

(272) P.171, l. 1 : (*a*) This sentence has not been counted as a *sūtra* in *Nyāyatattvāloka*. Vācaspati Miśra II is, in fact, totally silent about it. [NTĀ, I.O.L.Mss., III, fol, 10*b*.]. This is also the case with *Gautamīyasūtraprakāśa* of Keśava Miśra Tarkācārya [GSP, p. 53]. Bhaṭṭa Vāgīśvara, Viśvanātha Nyāyapañcānana and Rādhāmohana Gosvāmi Bhaṭṭācārya have accepted this sentence as a *sūtra*. [NTD, p. 87 ; NSV, p. 794; NSVV, p. 195.]

(*b*) The precise from of the argument suggested in this *sūtra* has been given by Uddyotakara, and the same has been explained and defended by Vācaspati Miśra I and Udayana :

(*i*) ...भूतगुणविशेषा गन्ध-रस-रूप-स्पर्श-शब्दा विशेषकत्वाद् विशेषा इत्युच्यन्त। यथा गन्धवत्त्वादिना पृथिव्यवादिभ्यो भिद्यते, रसादिभिरवादय इति। दृष्टो हि वाह्यानामुभयसम्प्रतिपन्नानां पृथिव्यादिभूतानां स्वगुणाभिव्यक्तिनियमः। अस्ति हि घ्राणादिभिरपि गन्धाद्यभिव्यक्तिनियमः, तेन भूतगुणविशेषोपलब्धेर्भूतप्रकृतीनीन्द्रियाणीति। किं किमात्मकमिति ? येन यद्गुणाभिव्यक्तिः। तत्र पार्थिवं घ्राणं गन्धाभिव्यक्तिहेतुत्वात् वाह्यपार्थिवद्रव्यवदिति। एवं शेषेष्वपि। [NV, pp. 793-794]

(*i*) ... तत्र पार्थिवं घ्राणं रूप-रस-गन्ध-स्पर्शेषु नियमेन गन्धस्य व्यञ्जकत्वाद् वाह्यपार्थिववदिति। यथा हि मृगमदगन्धव्यञ्जकाः कुक्कुटोच्चारादयः पार्थिवा इत्यर्थः। न चातपेनानेकान्तः। न ह्यातपो गन्धव्यञ्जकोऽपि तु जलाभिभूतो गन्धो द्रव्याणां नोपलभ्यत; केवलं जलमातपोऽपनयति न तु गन्धं द्रव्यस्याभिव्यनक्ति; तस्मान्नानेकान्तः। एवं रसनमिन्द्रियमाप्यं गन्धादिषु मध्ये नियमेन रसस्य व्यञ्जकत्वाद् दन्तान्तरस्यन्दमानोदकविन्दुवत। न खलु विशुष्यदास्यो मोदकादिरममनुभवति। एवं तैजसं चक्षुः; गन्धादिषु मध्ये नियमेन रूपस्य व्यञ्जकत्वात्, प्रदीपादिवत। एवं वायवीयं त्वगिन्द्रियम्; गन्धादिषु मध्ये स्पर्शस्यैव व्यञ्जकत्वात्; स्वेदोदविन्दुशीतस्पर्शव्यञ्जकव्यजनपवनवत। नियमग्रहणं मनोनिवृत्त्यर्थम्। गन्धादिषु मध्य इति चावधारणसिद्ध्यर्थम्, अन्यथा घ्राणादीनां गन्धत्वादिव्यञ्जकत्वेनावधारणं न स्यात्। तदेतदाह—एवं शेषेष्विति। ... [NVTT, p. 794.]

(*iii*) वाह्यपार्थिववदित्युक्तम। तत्र किं तद् वाह्यं पार्थिवं यन्नियमेन गन्धमभिव्यनक्तीत्यत आह—यथा हीति। न चातपेनेति। एतच्च यद्विशेषगुणाभिव्यञ्जकं यद् वाह्यद्रव्यं तत् तज्जातीयगुणवद् भवति ; यथा तेजो

रूपव्यञ्जकं रूपवत् ; वायुश्च स्पर्शव्यञ्जकः स्पर्शवानित्येवं व्यवस्थिते विवेचनीयम। एतेन च नवघनविमुक्तानामपां दावदहनदग्धवसुधागन्धाभिव्यञ्जकत्वमपास्तम्। श्रोत्रस्य च नमोभावमग्रे भाष्यकार एव पारिशेष्येण साधयिष्यतीत्यभिप्रायवान् प्रयोगचतुष्टयानन्तरं नियमादिपदतात्पर्यमाह–नियमग्रहणमिति। ...

[TTP, A.L.Thakur's Press Copy, Ch. III, p. 58.]

(273) P. 171, l. 4 : The necessity for introducing these *sūtras* has been indicated by Rāmabhadra. This has, however, been already done by Uddyotakara, Vācaspati Miśra I and Udayana:

(*i*) गन्धादयः पृथिव्यादिगुणा इत्युद्दिष्टम। उद्देशश्च नियोगविकल्पसमुच्चयेषु समानः। तत्र नियोगः–एकैकगुणत्वम्, विकल्पः—कस्यचिदेकः कस्यचिद् द्वावित्येवमादिः, समुच्चयः–सर्वः सर्वत्र। अतो विशेषणार्थम्–

॥ गन्धरसरूपस्पर्शशव्दानां स्पर्शपर्यन्ताः पृथिव्याः ॥

॥ अप्तेजोवायूनां पूर्वं पूर्वमपोह्याकाशस्योत्तरः ॥

नियमार्थे सूत्रे। चत्वारः पृथिव्याम्, एकैकशोऽपकर्ष उत्तरेषु स्पर्शपर्यन्तानामिति विभक्तिविपरिणामः।... [NV, p. 795.]

(*ii*) क्रमप्राप्तमर्थलक्षणं परीचिक्षिषमाणोऽर्थलक्षणं स्मारयति–गन्धादयः पृथिव्यादिगुणा इत्युद्दिष्टमिति। लक्षितमिति वक्तव्ये संमुग्धाभिधानं सामान्यादुद्दिष्टमित्युक्तम। तत्र परीक्षामुखं संशयमाह–उद्देशश्च नियोगेति। नियोगादीनां रूपमाह–तत्र नियोग इति। तदेव विमृश्य नियोगसमुच्चयौ परित्यज्य विकल्पमालम्वते सूत्राभ्याम्–अतो विशेषणार्थमिति–गन्ध-व्याः॥ अप्ते-रः॥ विशेषणार्थमिति सूत्रयोस्तात्पर्यमुक्तम्, तदेव स्फुटयति–नियमार्थे इति। उत्तरेष्ववादिष्वेकैकशोऽपकर्षो गन्धादीनां स्पर्शपर्यन्तानाम। तथा हि चतुर्षु गन्धापकर्षः अप्स्वपकृष्टस्य

गन्धस्य पुनरूद्भवो नास्तीति अद्म्य उत्तरे तेजसि रसस्यापकर्षः। एवमपकृष्टयोश्च गन्धरसयोः पुनरुद्भवो नास्तीति तेजउत्तरे वायौ रूपापकर्ष इति। एवमपकृष्टानां गन्ध-रस-रूपाणां पुनरुद्भवो नास्तीति वायोरुत्तरस्मिन्नाकाशो स्पर्शस्यापकर्षः। तदिदमुक्तम्—एकैकश इति।
[NVTT, pp. 795-796.]

(*iii*) एवमौपोद्घातिकमिन्द्रियनानात्वप्रकरणं समाप्य प्रकृतमर्थ-परीक्षाप्रकरणमारम्भणीयम। तस्य प्रकृततां स्मारयति—क्रमप्राप्तमिति। अत्र च यद्यपि तदर्था अर्था इति लक्षणम्, शेषश्च विभागः। स च साक्षात् परीक्षितव्यः, तथापि परित ईक्षणं परीक्षेति न्यायेन विभागपरीक्षापि लक्षणपरीक्षैवेत्यभिप्रायवानाह—अर्थलक्षणं परीचिक्षिषमाण इति। उद्दिष्टमिति पदस्य लक्षितमिति व्याख्यानम। तत् सूत्रं लक्षणप्रधानम्, उद्देशस्तु शिष्यहिततामात्रेण प्रसङ्गत इति न प्रस्मर्तव्यमित्येवम्परम। वाक्ये चात्र संशयः। नियोगार्थमेतद् वाक्यं विकल्पार्थं समुच्चयार्थं वेति। तदर्थप्रतिभासकत्वं समानो धर्मः। अथ वा गन्धरूपरसस्पर्शशब्देष्वेव गुणत्वेन सन्देहः। गुणा हि केचित् सर्वद्रव्यसाधारणाः, केचित् प्रतिनियतद्रव्यवृत्तयश्च दृष्टा इति। प्रयोजनं च परीक्षाया इन्द्रियनानात्व-सिद्धिः, पृथिव्यादिषु लक्षणाद्यसिद्धिपरिहारश्च। समुच्चये हि नेन्द्रियपञ्चत्वं स्यात। भूतानां लक्षणाभेदेन भेदानुपपत्तौ नियतगुणव्यञ्जकत्वानुपपत्तेः। नियोगे तु पृथिव्युदकयो रूपाभावेन पृथिव्युदकतेजसां स्पर्शाभावेन चक्षुःस्पर्शनविषयत्वं न स्यात। तथा तदर्था इति लक्षणमसिद्धमापद्येत।

विशेषणार्थमित्युक्तम्, तन्नियमार्थ इत्यनेन व्याहतमत आह तदेवेति। नन्वेकशोऽपकर्ष इत्ययुक्तम। एकश इति द्रव्यविशेषणं चेत् ? इतरेष्ववादिषु प्रत्येकं सर्व एव गन्धादयोऽपकृष्यन्त इत्यर्थः स्यात। गुणविशेषणं चेत् ? उत्तरेष्ववादिषु गन्धादीनामेकैकशोऽपकृष्यन्त इत्यर्थः स्यात। द्वयम-प्यनुपपन्नम्, प्रथमोऽवादिषु गन्धादिसर्वापकर्षप्रसङ्गात्, द्वितीयेऽप्सु

गन्धस्यापकर्ष इति तेजःप्रभृतिषु तत्सद्भाव-प्रसङ्गात् । एवं रसादिष्वप्यूह्यम् । अतोऽस्यार्थं विवेचयति–तथा हीति।

[TTP, A.L.Thakur's Press Copy, Ch. III, pp. 59-60.]

(274) P. 172, l. 5 : (*a*) Before this sentence, *Nyāyatātparyadīpika* of Bhaṭṭa Vāgīśvara introduces a sentence संसर्गात्त्वनेकगुणग्रहणम् as a *sūtra*, and explains it as follows:

ननु गुणान्तरासम्भवे कथमेकस्मिन्ननेकगुणा गृह्यन्त इत्यत आह—

॥ संसर्गात्त्वनेकगुणग्रहणम् ॥

पृथिव्यादीनामेकैकगुणत्वेऽपि भूतान्तरसंसर्गादनेकगुणग्रहणं तद्गुणत्वेनैवेति सूत्रार्थः। [NTD, p. 88.]

(*b*) The Chowkhamba edition of *Nyāyasūtravṛtti* of Viśvanātha Nyāyapañcānana records here the sentence संसर्गाच्चानेकगुणग्रहणम् along with विष्टं ह्यपरं परेण as two *sūtras* :

तर्हि कथं पृथिव्यादौ रसादिग्रहणं तत्राह–

॥ संसर्गाच्चानेकगुणग्रहणम् ॥

॥ विष्टं ह्यपरं परेण ॥

अपरं पृथिव्यादि, परेण जलादिना, हि यस्मात्, विष्टं संवद्धम् । तथा च पृथिव्याद्यवच्छिन्नजलादिना रसनासंयोगाद्रसादिग्रह इति भावः ।

[Chowkhamba ed. of NSV, pp. 94-95.]

The Metropolitan edition of NSV, however, does not contain the sentence संसर्गाच्चानेकगुणग्रहणम् (NSV, p. 800.), which may be justified in view of the fact that even in the Chowkhamba edition of NSV, not even a single word of the sentence संसर्गाच्चानेकगुणग्रहणम् has been explained.

(*c*) The editor of *Nyāyasūtravivaraṇa* by Rādhāmohana Gosvāmi Bhattācārya has noted that *Nyāsūtroddhāra* of Vācaspati Miśra II records संसर्गाच्चानेकगुणग्रहणम् as a *sūtra.* This is intriguing, because *Nyāyatattvāloka* of Vācaspati Miśra

II is totally silent on this point [See NSVV, p. 197, fn. 2; NTĀ, I.O.L. Mss. Ch. III, fol. 11b.]

(*d*) In fact, it is reasonable to maintain that संसर्गाच्चानेकगुणग्रहणम् is a part of *Nyāyabhāṣya* on the *sūtra* एकैकश्येनोत्तरोत्तरगुणसद्भावादुत्तरोत्तराणां तदनुपलब्धिः, as as been recorded in the Metropolitan edition of NB [NB, p. 798], and that संसर्गात्त्वनेकगुणग्रहणम् is a part of the relevant portion of *Nyāyavārttika* [NV, p. 798.] This appears to be the case from the fact that *Nyāyabhāṣya* on the *sūtra* न पार्थिवाप्ययोः प्रत्यक्षत्वात् (which succeds the *sūtra* विष्टं ह्यपरं परेण) starts with the sentence नेति त्रिसूत्रीं प्रत्याचष्टे, and this makes sense if we admit that before the *sūtra* न पार्थिवाप्ययोः प्रत्यक्षत्वात्, there are *three sūtra*-s viz. (i) न सर्वगुणानुपलब्धेः, (ii) एकैकश्येनोत्तरोत्तरगुणसद्भावादुत्तरोत्तराणां तदनुपलब्धिः and (iii) विष्टं ह्यपरं परेण. This does not leave any room for another *sūtra* like संसर्गाच्चानेकगुणग्रहणम् . *Nyāyavārttika* also makes a similar observation—नेति त्रिसूत्रीमनन्तरोक्तामनेन प्रत्याचष्टे. [NV, p. 800.]

(275) P. 173, l. 5 : Rāmabhadra has introduced and explained this *sūtra* in a novel manner. None of the two interpretations offered by him is derived from Vātsyāyana, Uddyotakara etc. Vatsyāyana has explained this *sūtra* as follows :

(*i*) किंकृतं पुनर्व्यवस्थानम्—किञ्चित् पार्थिवमिन्द्रियं न सर्वाणि, कानिचिदाप्यतैजसवायव्यानि इन्द्रियाणि न सर्वाणीति ?

॥ तद्व्यवस्थानं तु भूयस्त्वात् ॥

अर्थनिर्वृत्तिसमर्थस्य प्रविभक्तस्य द्रव्यस्य संसर्गः पुरुषसंस्कारकारितो भूयस्त्वम्। दृष्टो हि प्रकर्षे भूयस्त्वशब्दः ; यथा प्रकृष्टो विषयो भूयानित्युच्यते। यथा पृथगर्थक्रियासमर्थानि पुरुषसंस्कारवशाद् विषौषधिमणिप्रभृतीनि द्रव्याणि निर्वर्त्यन्ते, न सर्वं सर्वार्थम्, एवं पृथग्विषयग्रहणसमर्थानि घ्राणादीनि निर्वर्त्यन्ते न सर्वविषयग्रहणसमर्थानीति ।

[NB, p. 804.]

This line of interpretation has been adopted by Uddyotakara, Bhaṭṭa Vāgīśvara, Vācaspati Miśra II, Kesava Miśra Tarkācārya and Viśvanātha Nyāyapañcānana. [See NV, p. 804 ; NTD, p. 83 ; NTĀ I.O.L. Mss. Ch. III, fol. 12a ; GSP, p. 54 ; NSV, p. 805.]

It may be noted here that Rādhāmohana Gosvāmi Bhaṭṭācārya, too, has interpreted this *sūtra* in a novel manner :

(*ii*) ननु तावता पृथिवीत्वादिना कुतो घ्राणादीनां सिद्धिरित्यत आह—

॥ तद्व्यवस्थानं तु भूयस्त्वात् ॥

तेषां पृथिवीत्वादिना व्यवस्थानं भूयःसु पृथिव्यादिष्वेव गन्धादिव्यञ्जकत्वस्य दृष्टत्वादिति। तच्च प्रदर्शितं तत्तदनुमानप्रकार एवेति। [NSVV, p. 199.]

It may be noted further that the view of Rāmabhadra has not been criticized or even mentioned here by Viśvanātha or Rādhāmohana.

(276) P. 176, l. 18 : Before this *sūtra, Nyāyabhāṣya, Nyāyavārttika, Nyāyavarttikatātparyaṭīkā* and *Nyāyasūtravṛtti* have read another sentence तेनैव तस्याग्रहणाच्च as a *sūtra* and explained it. [NB, p. 705 ; NV, p. 705 ; NVTT, p. 705, NSV p. 706.] *Nyāyatattvāloka* and *Gautamīyasūtraprakāśa* have not counted this sentence a *sūtra* — in fact, they are totally silent about it. [NTD, p. 90; NTĀ, I.O.L. Mss. Ch. III, fol. 12*a* ; GSP, p. 54.] *Nyāyasūtravivaraṇa* reads it as तेनैव तस्याग्रहणात् [NSVV, 199.] Udayana's opinion about the status of this sentence is not available.

(277) P. 176, ll. 1-5 : Rāmabhadra has not indicated the *saṅgati* that obtains between the two *Āhnikas* of the third *Adhyāya*. For Vācaspati Miśra I and Udayana, the *saṅgati* here is हेतुता :

(*i*) परीक्षितानीन्द्रियाण्यर्थाश्च, बुद्धेरिदानीं परीक्षाक्रमः । क्रमः

स्थानम् । वृत्तवर्त्तिष्यमाणानुकीर्त्तनं हेतुहेतुमद्भावज्ञापनार्थम् । अर्थेन्द्रियपरीक्षा च बुद्धिपरीक्षणं प्रति यथोपयुज्यते तथा बुद्धिपरीक्षायामेव स्फुटीभविष्यति । [NVTT, p. 809.]

(*ii*) तदेवं नवभिः प्रकरणैस्तृतीयस्य प्रथमाह्निकं समाप्य सम्प्रति शरीरान्तर्वृत्तिप्रमेयपरीक्षा विधायिष्यते । सैव चाह्निकार्थः । तत्र द्वितीयाह्निके सप्तप्रकरणानि भवन्ति........तत्र सङ्गतिभाष्यम्– परीक्षितानीत्यादि । न चानेनाह्निकयोः सङ्गतिरूच्यते, तदर्थानभिधानात। नापि प्रकरणयोः, तत्रेन्द्रियपरीक्षोत्कीर्त्तनायोगात। अत आह–वृत्तेति। वृत्तमात्रोपलक्षणार्थमिन्द्रियार्थग्रहणम। तेनात्मा परीक्षितः, शरीरं नेत्यपि द्रष्टव्यम। एतेन बुद्धिहेतुत्वमाह्निकोपाधिर्दर्शितो भवति। एतदुपाधिक्रोडीकृतानां चात्मादीनां परीक्षा तदुत्तरपरीक्षाया हेतुरिति तदनन्तरमेतदवतार इत्यर्थः। कथं पुनः पूर्वाह्निकार्थस्योत्तरत्र हेतुत्वमत आह– अर्थेति।

[TTP, A.L.Thakur's Press Copy, Ch. III p. 65.]

Bhaṭṭa Vāgīśvara admits here अवसरसङ्गति :

(*iii*) अथेदानीमवसरप्राप्तं बुद्धिलक्षणं परीक्षितुं तस्या नित्यत्वानित्यत्वे संशयमाह........... [NTD, p. 91.]

Vācaspati Miśra II admits here अवसरसङ्गति occasioned by हेतुता :

(*iv*) अथात्मादिचतुष्कानुकूलनीयत्वात् बुद्धिमनसोस्तत्परीक्षानन्तरं हेतुहेतुमद्भावोपोद्वलितावसरसङ्गत्या एतदाह्निके शरीरान्तर्वर्त्तिप्रमेयपरीक्षा।...... [NTĀ, I.O.L. Mss. Ch. III, fol. 12*a*]

Keśava Miśra Tarkācārya, however, reverts to the view that the *saṅgati* here is हेतुता–

...तत्र बुद्धिरात्मादिचतुष्ककार्येत्यतो हेतुहेतुमद्भावात् पञ्चभिः

प्रकरणैः बुद्धिपरीक्षा।..... [GSP, p. 55.]

(278) P. 176, l. 8 : The following passage from *Nyāyavārttikatātparyatikā* may be recalled here :

.....सांख्यानां हि दर्शने प्रवादो महदन्तःकरणं बुद्धिरिति तदुपालम्भार्थं दूषणार्थं प्रकरणमिति। अयमभिप्रायः–नेह नित्यानित्यत्वविचारः, अपि त्वनया द्वारा वृत्तेरतिरिक्ता सांख्याभिमता बुद्धिर्निराकियते, सामान्यतो वुद्धिमात्रस्य नित्यानित्यत्वविचारेण। यदि हि नित्या वुद्धिः स्यात् ततो वृत्तिभ्य उदयव्ययवतीभ्योऽतिरिक्तं महत्तत्त्वमन्तःकरणं स्यात। अथ तु नित्यत्वसाधनानि प्रतिसन्धानादीनि न बुद्धिनित्यत्वस्येशते, ततो वृत्तय एव बुद्धयो न तु तदतिरिक्तं बुद्धितत्त्वं सिध्यति......
[NVTT, p. 810.]

(279) P. 176, l. 11 : Here again, the following observation of Vācaspati Miśra I is relevant :

....वृत्तिमान् किल विषयं प्रत्यभिजानन्नात्मानमपि प्रत्यभिजानाति। न च चेतनो वृत्तिमान्, तस्य कूटस्थनित्यत्वात्, अन्यथा पूर्वापरावस्थाभेदवान् न कूटस्थनित्यः स्यात। परिणामिनित्या तु बुद्धिरूदयव्ययवदनेकवृत्तिमती युज्यते.... [NVTT, p. 811.]

(280) P.176, l. 21 : The following observation of Vācaspati Miśra I is relevant :

वृत्तयो हि वृत्तिमतो भिन्नास्तेन तासामनित्यत्वेऽपि न वृत्तिमान् कौटस्थ्याच् च्यवते। तथा च प्रत्यभिज्ञातात्मैव प्रत्यभिज्ञानान्नित्यः स्यान्न त्वन्तःकरणं बुद्धिसंज्ञकम्, न हि तत् प्रत्यभिज्ञाने प्रकाशते....
[NVTT, p. 811.]

(281) P. 178, l. 5 : This has not been treated as a *sūtra* in the Metropolitan edition *Nyāyabhāṣya*, *Nyāyavārttika* and *Nyāyavārttikatātparyaṭīkā*. [NB, p. 821, NV, p. 821, NVTT, p. 821.] Mahāmahopādhyāya Phaṇibhūṣaṇa

Tarkavāgīśa also treats this sentence as a part of *Nyāyabhāsya* on the ground that the *Nyāyasūcīnibandha* of Vācaspati Miśra I does not treat this sentence as a *sūtra*. [Tarkavāgīśa's edition of *Nyāyabhāṣya*, Vol. III, p. 200.] It does not occur as a *sūtra* in *Nyāyatātparyadīpikā* of Bhaṭṭa Vāgīśvara either. [NTD, p. 93.] But *Nyāyatattvāloka* of Vācaspati Miśra II, *Gautamīyasūtraprakāśa* of Keśava Miśra Tarkācārya, *Nyayasūtravṛtti* of Viśvanātha Nyāyapañcāna and *Nyāyasūtravivaraṇa* of Rādhāmohana Gosvāmi Bhattacārya treat this sentence as a *sūtra*, as is evident from the following extracts:

(*i*) दूषयति–

॥ न हेत्वभावात् ॥

धियोऽन्तःकरणभेदे न हेतुरस्ति। दृष्टान्तमात्रं त्वसाधकमित्यर्थः। किञ्च धियामनित्यत्वे प्रत्यक्षमेव मानमिति भावः।

[NTĀ, I.O.L. Mss., Ch. III, fol. 13*a*.]

(*ii*) तदिदं दृष्टान्तमात्रवलेन प्रत्यवस्थानं हेतुहीनं न स्वपक्षसाधनायालमित्याह– ॥ न हेत्वभावात् ॥

केचित्तु – नैतत् सूत्रम । तन्न, पूर्वविचारासमाप्तावुत्तरविचारा — नवतारात। न चाक्षेपलभ्यः सिद्धान्तः। शाव्दे पूर्वपक्षे सिद्धान्तस्यापि तथौचित्यात। "हेत्वभावादिति भाष्यमि"ति टीका च सूत्रव्याख्यानभाष्याभिप्रायेण, अत एवाद्याक्षरशून्यं तत्राहेति वृद्धाः।

अत्रेदं चिन्त्यम। शरीरपाञ्चभौतिकत्ववत् शाव्देऽपि पूर्वपक्षे शाव्दसिद्धान्तो मा भूत्, सुगमत्वादुपेक्षाया उभयसाम्यादिति।

[GSP, p. 56.]

(*iii*) दूषयति–

॥ न हेत्वभावात् ॥

भ्रमत्वे साधकाभावान्नोक्तं युक्तमित्यर्थः।

केचित्तु—"न हेत्वभावादिति भाष्यमि"ति टीकादर्शनान्नेदं सूत्रम्, किन्तु तुच्छतया सूत्रकृताऽदूषणान्न्यूनतापरिहाराय भाष्यकृता तदुक्तमिति मन्यन्त। [NSV, p. 821.]

(*iv*) शङ्कां निरस्यति—

॥ न हेत्वभावात् ॥

एकस्यां बुद्धौ न नानात्वारोपः, हेत्वभावात् बुद्धेरेकत्वसाधकाभावात् नानात्वस्य प्रत्यक्षसिद्धस्यान्यथात्वकल्पकाभावाच्चान्यथा घटादेरपि नित्यत्वं स्यादिति भावः। इदं भाष्यं न मुनिकृतमिति केचित्। [NSVV, p. 204.]

The editor of *Nyāyasūtravivaraṇa* informs us that according Vardhamāna Upādhyāya (the author of *Nyāyanibandhaprakāśa*) the sentence न हेत्वभावात् is a *sūtra* :

(*v*) "न हेत्वभावादिति भाष्यं व्याचष्टे—यथाश्रुति सूत्र इती"ति तात्पर्यटीका। इदं न्यायसूचीनिबन्धे नास्त्यत इदं भाष्यमेवेति केचित। तन्न। "अत्र स्फटिकान्यत्वाभिमानवत् तदभिमान इति सौत्रपूर्वपक्षे सौत्र एव सिद्धान्तो युक्त इति न हेत्वभावादिति सिद्धान्तसूत्रम। "न हेत्वभावादिति भाष्यमि"ति टीका च सूत्रव्याख्यानपरभाष्याभिप्रायेणापि सङ्गच्छत इत्याहु"रिति न्यायनिवन्धप्रकाशीय-वर्द्धमानोपाध्यायलेखदर्शनात। [NSVV, p. 204, fn. 2.]

It seems that Kesava Miśra Tarkācārya has been influenced here by the remarks of Vardhamāna Upādhyāya. Rāmabhadra has recorded here all these divergent views.

(282) Rāmabhadra has not mentioned the *saṅgati* that obtains between बुद्धिविनाशित्वप्रकरण and क्षणभङ्गभञ्जनप्रकरण. According to Udayana, Vācaspati Miśra II and Keśava Miśra Tarkācārya, there is *prasaṅgasaṅgati* between these two *prakaraṇa-s* :

(*i*) तदेवं बुद्ध्यनित्यताप्रकरणं समाप्य तत्प्रसङ्गागतं क्षणभङ्गभङ्ग-

प्रकरणमवतारयति—तदेवमिति। प्रयोजनं चास्य सर्वशास्त्रार्थोपकाराविशेषेऽपि प्राधान्यत आत्मसिद्धिः। स्थैर्ये हि सति

दर्शनस्पर्शनाभ्याम्

इत्येवमादयः प्रतिसन्धानहेतवो निष्प्रत्यूहा भवन्ति। गुणगुणिभेदसिद्धौ चेच्छादयः क्वचिदाश्रिताः कार्यत्वाद् गुणत्वाद् वेत्येवमादयश्च ।

[TTP, A.L.Thakur's Press Copy, Ch. III, p. 71.]

(*ii*) सम्प्रति सौगतैर्यत् समाधानाभासमुक्तं तन्निरासाय प्रसङ्गात् क्षणभङ्गभङ्गप्रकरणम। तत्र विप्रतिपत्तेरेतत्क्षणवर्त्तिनो भावात्मानस्तत्क्षणवर्त्तिनो न वेति संशयः। प्रयोजनं स्थिरात्मसिद्धिः।

[NTĀ, I.O.L. Mss., Ch. III, fol. 13*a*.]

(*iii*) सम्प्रति सांख्यमते सौगतर्यत् समाधानमुक्तं तन्निरासाय प्रासङ्गिकं क्षणभङ्गभङ्गप्रकरणम् । न च "सा नित्याऽनित्या वे" ति [३।२।१] उपक्रम्य "उपपन्नमनित्या वुद्धि"रिति [३।२।२७] भाष्योपसंहारात् पूर्वप्रकरणैकदेश एवायं न तु प्रकरणान्तरमिति वाच्यम। यत्प्रसङ्गेन क्षणभङ्गभङ्गप्रकरणं तस्यैव प्रकरणस्य भाष्यान्त उपसंहारादविरोधात। प्रयोजनं चास्य सर्वशास्त्रोपकाराविशेषेऽपि प्राधान्यत आत्मसिद्धिः। स्थैर्ये हि "दर्शनस्पर्शनाभ्यामि"त्यादयः प्रतिसन्धानहेतवो निःप्रत्युहा भवन्ति। तत्र संशयः – कार्यं स्वसमवायिकारणसमानकालीनं न वा ?.......   [GSP, p. 57.]

Here the influence of Udayana and Vācaspati Miśra II is quite evident. Keśava Miśra Tarkācārya has also discussed why क्षणभङ्गभङ्गप्रकरण should be treated as a separate प्रकरण in its own right.

(282) P.180, ll. 13-14 : The manner in which the sentence उपचयापचयप्रबन्धदर्शनाच्छरीरेषु has been specifically identified as a part of *Nyāyabhāṣya* suggests that this sentence was

treated as a *sūtra* by some commentators. This is, in fact, attested by Viśvanātha and Rādhāmohana :

(*i*) ...भाष्यम् – उपचयापचयप्रवन्धदर्शनाच्छरीरादिषु। प्रतिक्षणं शरीरेषूपचयापचयदर्शनान्नानात्वम्, न ह्येकस्मिन्नवयविनि परिमाणद्वयसमावेश इति भावः। इदं सूत्रमेवेति केचित्। [NSV, p. 825.]

(*ii*) क्षणिकान्त्यशब्दास्वीकारे दृष्टान्तार्थमाह भाष्य यथा–उपचयापचयप्रवन्धदर्शनाच्छरीरेष। प्रतिक्षणं शरीरेषु उपचयापचयधारादर्शनान्नानात्वम्, न ह्येकस्मिन्नवयविनि परिमाणद्वयसमावेश इति भावः। इदमपि सूत्रमिति केचित्। [NSVV, p. 205.]

(283) P. 181, l. 2 : *Nyāyasūtravivaraṇa* of Rādhāmohana reads this *sūtra* as लयहेत्वभावाद् यथादर्शनमभ्यनुज्ञा....[NSVV, p. 205.] This is not found anywhere else.

(284)P. 181, l. 17 : The variants in the reading of this *sūtra* as found the manuscripts of *Nyāyarahasya* are supported by some manuscripts of *Nyāyavārttika*.
[NV, p. 829, fn. 3.]

(285) P. 182, l. 18 — P. 183, l. 2 : Here, the following passages from *Nyāyavārttika* may be noted :

(*i*) क्षीरविनाशे कारणानुपलब्धिवद् दध्युत्पत्तिवच्च तदुपपत्तिः। यथा क्षीरविनाशकारणमनुपलभ्यमानमभ्यनुज्ञायते दध्नश्चोत्पत्तिकारणम्, एवं स्फटिकादिव्यक्तीनामनुपलभ्यमाने उत्पत्तिविनाशकारणे अभ्यनुज्ञेये।
[NV, p. 829.]

(*ii*) लिङ्गतो ग्रहणान्नानुपलब्धिः। यल्लिङ्गत उपलभ्यते न तन्नास्तीति। विपर्ययश्च स्फटिकादौ, न हि स्फटिकादिव्यक्तीनामपरापरोत्पत्तौ लिङ्गमस्तीति। [NV, p. 830.]

(*iii*) क्वचिद्विनाशकारणानुपलब्धेः कचिच्चोपलब्धेरनेकान्तः। क्षीरदधिवन्निष्कारणौ विनाशोत्पादौ स्फटिकव्यक्तीनाम्, न पुनः कुम्भादिवत्

सकारणाविति नात्र हेतुरस्तीति।........न हि स्फटिकस्योत्पादविनाशौ प्रतिक्षणमुपलभ्यते यत इयं चिन्ता भवेत् किमेतौ सकारणावाहोस्विदकारणाविति, यथाऽनभ्युपगतशब्दतत्त्वं प्रति कश्चिद् ब्रूयात् कृतकत्वादनित्यः शब्दस्तादृगेतदिति। धर्म्यसिद्धेश्च दृष्टान्ताभाव इति च समानम। [NV, p. 848.]

(286) P. 185, l. 4 : Before this, *Nyāyatātparydīpikā* of Bhaṭṭa Vāgīśvara reads the sentence सन्निर्षोत्पत्तेः संशयः as a *sūtra*. This has not been accepted as a *sūtra* by any other commentator. The sentence concerned is actually a part of *Nyāyabhāṣya* introducing NS 3/2/18. The *Nyāyabhāṣya* passage is as follows :

सोऽयं बुद्धौ सन्निकर्षोत्पत्तेः संशयः विशेषस्याग्रहणात।

[NB, p. 850.]

The fact that *Nyāyavārttika* on this passage also writes सन्निकर्षोत्पत्तेः संशयः as a separate sentence might have led Bhaṭṭa Vāgīśvara to treat this expression as a separate *sūtra*.

(287) P. 185, l. 11 : *Nyāyasūtravivaraṇa* of Rādhāmohana reads this *sūtra* as युगपज्ज्ञानानुपलब्धेश्च मनसः, and explains it as follows :

पूर्वसूत्रस्थेन नकारेण मनस इत्यस्य सम्बन्धः। चकारोऽप्यर्थः। तेन नापि मनस इत्यर्थः।

न मनस इत्यपि क्वचित् पाठः। हेतुमाह–युगपज्ज्ञानानुपलब्धेः। कायव्यूहस्थले युगपन्नानाशरीरावच्छेदेन ज्ञानानुत्पादप्रसङ्गान्मनसोऽणुत्वेन नानाशरीरसम्बन्धस्यैकदा असम्भवात। [NSVV, p. 209.]

As we can see, Rādhāmohana is aware of the fact that the न omitted by him is admitted by some other commentators. The other variant reading admitted by him has not been accepted by others.

(288) P. 185, l. 18 : (*a*) Before this *sūtra*, two other sentence from Nyāyabhāṣya, viz. ज्ञस्य वशित्वात् and युगपज्ज्ञेयोपलब्धेश्च have been accepted as *sūtra*'s and explained accordingly in *Nyāyatātparyadīpikā* of Bhaṭṭa Vāgīśvara. Perhaps Bhaṭṭa Vāgīśvara was not the only person to have committed this mistake, as is evident from the following comments of Udayana :

ज्ञस्य वशित्वादित्येतच्च सूत्रत्वेन प्रसिद्धमपि भाष्यमेवेत्यवगन्तव्यम। युगपज्ज्ञेयानुपलब्धेश्च मनस इति पूर्वसूत्रस्थस्य चकारस्याग्रे भाष्यकारेण "युगपज्ज्ञेयानुपलब्धेश्च योगिन" इति विवरिष्यमाणत्वात।

[TTP, A.L.Thakur's Press Copy, Ch. III, p. 88.]

(*b*) It seems that the status of the sentence तदात्मगुणत्वेऽपि तुल्यम् was also disputed, because Udayana has tried to show that on internal evidence, this sentence should be regarded as a *sūtra*:

तदात्मगुणत्वेऽपि तुल्यमिति च सूत्रमेव। विनाशकारणानुपलब्धेश्चे-त्यादिसूत्रे "सूत्रे तदात्मगुणत्वेऽपि तुल्यमित्येतदनेन समुच्चीयत" इति भाष्यस्य भविष्यत्त्वात। अतएव टीकाऽपि भविष्यति – "अत्र पूर्वपक्षसूत्रे चकारः पूर्वपूर्वपक्षसूत्रापेक्षयेत्याहे"ति।

[TTP, A.L.Thakur's Press Copy, Ch. III, p. 89.]

(289) P. 185, l. 21 : Vatsyāyana, Uddyotakara, Vācaspati Miśra I and Viśvanātha have read this *sūtra* as इन्द्रियैर्मनसः सन्निकर्षाभावात् तदनुत्पत्तिः . [NB, p. 854 ; NV, p. 854 ; NVTT, p. 854; NSV, p. 854.] The reading adopted by Rāmabhadra is supported by Bhaṭṭa Vāgīśvara, Vācaspati Miśra II, Keśava Miśra Tarkācārya and Rādhāmohana Gosvāmi Bhaṭṭācārya. [NTD, p. 98 ; NTĀ, I.O.L. Mss. Ch. III, fol, 15*a* ; GSP, p. 59 ; NSVV, p. 210.] In the case of the latter commentators, the departure from tradition is deliberate; because almost all of them have incorporated the meaning of the expression इन्द्रियैर्मनसः in their explanations :

(i) ज्ञानानां युगपदनुत्पत्तिः मनसा युगपदिन्द्रियाणां सन्निकर्षाभावादित्यर्थः। [NTĀ, I.O.L. Mss. Ch. III, fol. 15a.]

(ii) इन्द्रियमनःसन्निकर्षो ज्ञानहेतुस्तदभावात्तदनुत्पत्तिर्युगपदित्यर्थः। [GSP, p. 59.]

(290) P. 186, l. 2 : (a) From the remarks of Udayana quoted below, it seems that the status of this sentence is also disputed :

नोत्पत्तिकारणानपदेशादित्येतत्तु सन्दिह्यते–किं सूत्रं भाष्यं वेति ? अत्रापि च "इति सूत्रार्थ" इति वार्त्तिकेन निर्णयः।
[TTP, A.L.Thakur's Press Copy, Ch. III, P. 90.]

(b) Rādhāmohana reads this *sūtra* as नोत्पत्तिकारणानुपदेशात्, and explains it as follows :

न बुद्धिरात्मगुण उत्पत्तिकारणानुपदेशात् बुद्ध्युत्पत्तौ कारणस्याकथनात। आत्ममनःसंयोगस्य कारणत्वे ज्ञानस्य सार्वदिकत्वप्रसङ्ग इति भावः। [NSVV, p. 211.]

(291) P. 186, ll. 7-9 : In this connection, the following passage from *Nyāyavārttika* is worth noting :

यदि पुनरात्मेन्द्रियार्थसन्निकर्षादेव ज्ञानमुत्पद्येत किं स्यात् ......यदेन्द्रियमर्थेन बहिरवस्थितेन सम्बध्यते आत्मसम्बन्धोऽपि तत्रास्तीति कस्माद्विदेहप्रत्ययो न भवतीति वक्तव्यम। अन्तःकरणप्रत्याख्याने केवलमात्मा स्मृत्यादिकारणमिति कस्मान्न युगपदुत्पत्तिः स्मृतीनाम्। यदा चेन्द्रियमात्मा चार्थेन युगपत् सम्बन्धौ तदा किमिन्द्रियार्थसन्निकर्ष कारणम्, उत आत्मार्थसन्निकर्षः उतात्मेन्द्रियार्थसन्निकर्ष इति कारणानपदेशः। [NV, pp. 854-855.]

(292) P. 186, l. 18 : Here, Rāmabhadra speaks of the following passage from *Nyāyavārttika* :

(i) ....अनित्या बुद्धिरित्येतत् प्रतिपादितम। तत्रास्या बुद्ध्यन्तराद्वा

संस्काराद्वाविनाश इति प्रतिपत्तव्यम।...........अन्त्या बुद्धिः स्थितिहेत्वभावाद्विनश्यतीति कालाद्वा संस्काराद्वा। कथं कालात्? यावन्त्यस्य जन्मन स्थितिहेतू धर्माधर्मौ तयोरभावादन्त्या बुद्धिर्विनश्यतीति।...

[NV, pp. 856-857.]

Vācaspati Miśra I has explained this in the following manner:

(*ii*) यदनन्तरमपवृज्यते पुरुषः सा अन्त्या बुद्धिः। स्थितिहेत्वभावाद्विनश्यतीति। स्थितिहेतू धर्माधर्मौ तयोरभावादिति। अथ तयोरभावः कस्मादित्यत आह–कालात। अन्त्यसुखदुःखोपभोगकालं प्राप्येत्यर्थः। अथ वा स्वजनितात् संस्कारादेवान्त्याया बुद्धेर्विनाश इत्याह संस्काराद्वा। संस्कारस्य तु स्थितिहेत्वदृष्टाभावाद्विनाशो भवतीति पृच्छति – कथं कालात। उत्तरम्–यावन्त्यस्य जन्मन इति। चरमस्य देहस्येत्यर्थः।....... [NVTT, pp. 856-857.]

(293) P. 188, l. 2 : Bhaṭṭa Vāgīśvara has read this *sūtra* as न तदाशुगतित्वात् . He has supplied the word मनसः in the explanation :

तस्य मनस आशुगतित्वात् बहिर्विनिःसृत्य कृतकार्यस्य द्रुतमागत्य धारकप्रयत्नोत्पादकत्वमुत्पाद्य वा गमनमिति स्मरतः शरीरधारणानुपपत्तिर्नेति सूत्रार्थः।

[NTD, p. 99.]

(294)P. 190, l. 2 : (*a*) Bhaṭṭa Vāgīśvara has not counted this sentence as a *sūtra*. In fact, he is totally silent about it.

[NTD, p. 101.]

(*b*) Vācaspati Miśra II reads it as परमाण्वादिष्वारम्भनिवृत्तिदर्शनात्. It is not possible to decide as to whether this is a genuine variant or a case of scribal error, because the only comment he passes on it is—"सुगमम्".[NTĀ, I.O.L.Mss. Ch. III, fol. 16 b.]

(*c*) The editor of *Nyayasūtravivaraṇa* mentions the fact that after this *sūtra, Nyāyasūtroddhāra* reads one more sentence, viz. कुम्भादिष्वनुपलब्धेरहेतुः as another *sūtra* [NSVV, p. 217, fn. 1.] Actually, this sentence is a part of *Nyāyabhāṣya.* [See NB, p. 869.]

(295) P.192, l.16 : Before this, Bhaṭṭa Vāgīśvara reads another sentence उत्पन्नापवर्गित्वात् as a separate *sūtra.*[NTD, p. 101.] This is actually a part of *Nyāyabhāṣya* introducing the *sūtra* कर्मानवस्थायिग्रहणात्. [See NB, p. 881.]

(296) P. 193, l.12 : This sentence has not been counted as a *sūtra* by Bhaṭṭa Vāgīśvara. [NTD, p. 103.]

(297) P. 193, l. 18 : (*a*) The editor of *Nyāsūtravivaraṇa* informs us that before this *sūtra*, *Nyāyasūtroddhāra* reads another sentence ग्रहणे हेतुविकल्पाद् ग्रहणविकल्पो न बुद्धिविकल्पात् as a *sūtra.* [NSVV, p. 222, fn, 3.]

(*b*) Uddyotakara, Vācaspati Miśra I, Bhaṭṭa Vāgīśvara and Rādhāmohana have read this sentence as न प्रदीपार्चिःसन्तत्यभिव्यक्तग्रहणवत्तद्ग्रहणम्. [NV, p. 887 ; NVTT, p. 887; NTD, p. 103 ; NSVV, p. 222-223.] The reading adopted by Rāmabhadra has been supported by Vācaspati Miśra II, Keśava Miśra Tarkācārya and Viśvanātha Nyāyapañcānana. [NTĀ, Allahabad edn. p. 348; GSP, p.64; NSV, p.887.] According to the editor of *Nyāya-sūtravivaraṇa*, the letter न is missing in the reading found in *Nyāyasūtroddhāra.* [NSVV, p. 223, fn. 1.]

(298) P. 194, l. 1 : Unlike Rāmabhadra, some commentators have tried to show that this *prakaraṇa* is not redundant, and some of them have also indicated the *saṅgati* :

(*i*) पूर्वं हि भूतेन्द्रियमनसां चैतन्यं साक्षान्निराकृतमुपक्षेपात्, न तु शरीरस्य, संप्रति तु शरीरस्यैव साक्षाच्चैतन्यं निरस्यत इति तात्पर्यभेदादपुनरूक्तम। वस्तुतस्तु पौनरुक्त्यपरिहारं भाष्यकारः

प्रकारान्तरेण वक्षति। [NVTT, p. 887.]

(*ii*) एवमनेन प्रकरणेनोत्पन्नापवर्गित्वं बुद्धेः प्रसाध्य शरीरगुणत्वव्यतिरेकप्रकरणमारम्भणीयम। उत्पन्नापवर्गित्वे हि सिद्धे वक्ष्यमाणाः हेतवः सुप्रतिपदा भविष्यन्तीति तदनन्तरमारम्भः, किं त्वात्मगुणत्वप्रतिपादनादेव सिद्धोऽयमर्थ इत्यत आह–पूर्वं हीति। पूर्वं भूतेन्द्रियमनोगुणत्वप्रतिषेधे साधारणैर्हेतुभिः शरीरगुणत्वमपि प्रतिषिद्धम। अधुना तु शरीरगुणत्वमेव प्रतिषेद्धुं विशेषहेतवोऽभिधीयन्ते। ते च न पूर्वोक्ता इत्यर्थः। तात्पर्यभेदादिति अवान्तरतात्पर्यभेदात। परमतात्पर्यं त्वात्मगुणत्वप्रतिपादनमभिन्नमेव। तथापि समानैरेव हेतुभिः सिद्धे पुनर्विशेषहेत्वभिधानं किमर्थमत आह–वस्तुतस्त्विति।...

[TTP, A.L.Thakur's Press Copy, Ch, III, p. 10.]

(*iii*) भूतेन्द्रियमनसां चैतन्यप्रतिषेधेनार्थाच्छरीरचैतन्यं प्रतिषिद्धमपि तत्त्वनिश्चयार्थपरतया विप्रतिषेद्धुं संशयमाह... [NTD, p. 10.]

(*iv*) एवं बुद्धेरूत्पन्नापवर्गित्वस्य शरीरगुणत्वाभावसाधकत्वात् हेतुहेतुमद्भावसङ्गत्या तदनन्तरं शरीरगुणत्वव्यतिरेकप्रकरणम। न च भूतचैतन्यनिरासादनारम्भः। 'गौरोऽहं जाने' इत्यनुभवात् तन्निरासकयुक्तेरेवान्यथासिद्ध्यभिमानात।...

[NTĀ. Allahabad edn. p. 348.]

(*v*) एवं बुद्धेरूत्पन्नापवर्गित्वस्य शरीरगुणत्वाभावसाधकत्वात् वक्ष्यमाणाद् यावद्द्रव्यभावित्वादेस्तद्धेतोरनुकूलत्वाच्च अनन्तरं शरीरगुणत्वव्यतिरेकप्रकरणम। पूर्वं प्रसङ्गात् तथा, सम्प्रति साक्षादित्यपौनरूक्त्यम। [GSP, p. 64.]

(*vi*) अथ बुद्धेः शरीरगुणत्वाभावप्रकरणम। न च प्रागेव तत्सिद्धेरनारम्भणीयमेतत्, 'गौरोऽहं जानामी'त्यनुभवेन तत्साधकानामाभासी-

करणादतो विशिष्य तद्व्युत्पादनाय संशयबीजमाह.....[NSV, p. 888.]

(299) P. 194, l. 2 : Keśava Miśra Tarkācārya reads this *sūtra* as द्रव्येषु स्वगुणपरगुणोपलब्धेः संशयः. [GSP, p. 64.] Udayana's reading of this *sūtra* agrees with that of Rāmabhadra:

... ननु "तद्गुणत्वं तत्रोपलब्ध्या सिध्यती'ति वार्त्तिकं द्रव्ये स्वगुणपरगुणपलब्धेः संशय इति सूत्रविरूद्धमत आह–अबाधितयेति।
[TTP, A.L.Thakur's Press Copy, Ch. III,]

Other sources also support the reading adopted here by Rāmabhadra.

(300) P. 194, l. 10 : The Metropolitan edition of *Nyāyabhāsya* and *Nyāyavārttika* reads this *sūtra* as यावद्द्रव्यभावित्वाद् रूपादीनाम। [NB, p. 888 ; NV, p. 889.] Bhaṭṭa Vāgīśvara, Vācaspati Miśra II, Keśava Miśra Tarkācārya, Viśvanātha Nyāyapañcānana and Rādhāmohana Gosvāmi Bhattācārya read this *sūtra* as यावच्छरीरभावित्वाद्रूपादीनाम् [NTD, p. 104 ; NTĀ, Allahabad edn., p. 34; GSP, p. 64 ; NSV, p. 889 ; NSVV, p. 223.] *Tātparyatīka* gives the reading like याव–नाम् [NVTT, p. 889], and this does not help us in deciding the reading. Udayana's remarks, which are quoted below, seem to indicate that he preferred the reading यावद्द्रव्यभावित्वाद्रूपादीनाम्:

यदि शरीरगुणश्चेतना स्याद् रूपादिवद् यावच्छरीरभाविनी स्यादिति प्रसङ्गः। न त यावद्द्रव्यभाविनी, ततो न शरीरगुणो यथाऽपामुष्णत्व-मिति विपर्ययेण हेतुः। अत्र संस्कारेणैकान्तिकत्वमुद्भाव्य संस्कारचेतनयोः कारणोच्छेदानुच्छेदाभ्यां विशेष उक्तः। तदेतद् भाष्यानुरोधेन। वस्तुतस्तु गुणशब्देन विशेषगुण एवात्रापेक्षितो रूपाद्युदाहरणदर्शनात। अतो न संस्कारेणानेकान्तः। अतएव पाकजेन यावद्द्रव्यभाविनाऽ-नैकान्तिकत्वमाशङ्क्याग्रे भविष्यति–

न पाकजगुणान्तरोत्पत्तः

इति। तज्जातीयस्येहायावद्द्रव्यभावित्वं विवक्षितम्, न तु तस्येत्यर्थः।
[TTP, A.L.Thakur's Press Copy, Ch, p. 105.]

It may be noted here that in some editions of *Nyāyabhāṣya* and *Nyāyavārttika,* the reading °यावच्छरीरभावित्वात्° is recorded as a variant. [NB, p. 888, fn. 1 ; NV, p. 889, fn4.] The editor of the Metropolitan edition has followed here *Nyāyasūcīnibandha*, which provides us with the reading यावद्द्रव्यभावित्वात्°. It is also interesting to note that many of those who accept the reading यावद्द्रव्यभावित्वात्° employ the expression यावद्द्रव्यभावित्व or its equivalent in the explanation :

(*i*) न शरीरगुणश्चेतनेति शेषः। ये शरीरविशेषगुणास्ते यावद्द्रव्यभाविनो यथा रूपादयः, चेतना च न तथेत्यर्थः। [NTĀ, Allahabad edn. p.349.]

(*ii*) न शरीरगुणश्चेतनेति शेषः। ये हि शरीरगुणास्ते यावद्द्रव्यभाविनः, यथा रूपादय इति व्यतिरेकी। [GSP, p. 64.]

(*iii*) ...बुद्ध्यादिकं न शरीरगुणः अयावद्द्रव्यभावित्वात् शब्दवत्, व्यतिरेके रूपवद्वा। अयावद्द्रव्यभावितं च आश्रयत्वाभिमतकालीननाशप्रतियोगित्वम। [NSV, p. 891.]

(*iv*) रूपादिविशेषगुणानां स्पर्शवद्विशेषगुणानामिति यावत। यावच्छरीरभावित्वाद् यावत्स्वाश्रयवृत्तित्वनियमादित्यर्थः। स्वाश्रयकालीनध्वंसाप्रतियोगित्वादिति यावत।...... [NSVV, p. 224.]

(301) P. 195, l. 11 : The following passage from *Nyāyabhāṣya* may be noted :

यावत्सु द्रव्येषु पूर्वगुणप्रतिद्वन्द्विसिद्धिस्तावत्सु पाकजोत्पत्तिर्दृश्यते, पूर्वगुणैः सह पाकजानामवस्थानस्याग्रहणात। न च शरीरे चेतना-

प्रतिद्वन्द्विसिद्धौ सहानवस्थायि गुणान्तरं गृह्यते, येनानुमीयेत तेन चेतनाया विरोधः। तस्मात् अप्रतिषिद्धा चेतना यावच्छरीरं वर्तेत, न तु वर्तते, तस्मान्न शरीरगुणश्चेतना। [NB, p. 891.]

(302) P. 195, l. 21 : The usual reading of this *sūtra* is त्वक्पर्यन्तत्वाच्छरीरस्य केशनखादिष्वप्रसङ्गः, and this fits well with the earlier *sūtra* न केशनखादिष्वनुपलब्धेः।

(303) P. 197, l. 1 : According to Uddyotakara and Vācaspati Miśra II, the *saṅgati* of this *Prakaraṇa* with the earlier one is अवसरसङ्गति. Udayana has also made some valuable observations:

(*i*) परीक्षिता बुद्धिरिति मनोऽवसरप्राप्तं परीक्ष्यत। तत् प्रतिशरीरमेकमनेकं वा .... [NV, p. 896.]

(*ii*) एवं पञ्चभिः प्रकरणैर्बुद्धिः परीक्षिता। तत्र प्रथमेनानित्यतया, द्वितीयेन स्थैर्यसिद्धौ फलतो गुणतया, तृतीयेनात्मगुणतया, चतुर्थेनाशुतरविनाशितया, पञ्चमे शरीरासमवेततयेति। संप्रति तदनन्तरलक्षितत्वेन मनः परीक्षणीयम। तस्य च

युगपज्ज्ञानानुत्पत्तिर्मनसो लिङ्गम्

इति लक्षणम। तच्चैकस्मिन् शरीरे मनोबहुत्वे अनाशुसञ्चारित्वे विभुत्वे च न स्यात्, इतरथा तु स्यादित्येतत् त्रयविपर्ययः परीक्ष्यत।
[TTP, A.L.Thakur's Press Copy, Ch. III, p. 111.]

(*iii*) अथावसरतो मनःपरीक्षा। तत्र एतच्छरीरचाक्षुषज्ञानजनकं मन एतच्छरीररासनज्ञानजनकमनोभिन्नं न वेति संशयः। प्रयोजनं तु मनोऽनेकत्वे व्यासङ्गाभावे तदैक्ये व्यासङ्गसिद्धौ युगपज्ज्ञानानुत्पत्त्यनुमितत्वेन मनस आत्मभेदसिद्धिः। ज्ञानयौगपद्यप्रत्ययो बाधकाभावात् प्रमा, अतस्तज्जनकानि पञ्च मनांसि, व्यासङ्गस्तु मनःपञ्चकस्य एकेन्द्रियसन्निकर्षादित्याक्षिप्तपूर्वपक्षकं सिद्धान्तसूत्रम्—

॥ ज्ञानायौगपद्यादेकं मनः ॥.......

[NTĀ, Allahabad edn. p. 351.]

(304) P. 198, ll. 7-10 : Here, the following observations of Udayana are of much interest :

(*i*) ... प्रयोजनं चास्य प्रकरणस्य विग्रहव्यवस्था संसारापवर्गव्यवस्था प्रायणव्यवस्था च। एतच्चाग्रे सूत्रकार एव स्फोरयिष्यति। एवं शरीरारम्भोपयोगश्च। अन्यथा हि नियामकमनन्तरेणान्तःशरीरवृत्तित्वं मनसो न घटेत। तथा च शरीराद्यारम्भानुपयोगः स्यात्, मनसस्तदन्तरेणापि वृत्तिलाभात् । नियतपुरुषसमवेतनिमित्तमन्तरेण चोत्पत्तौ शरीरस्य प्रतिपुरुषं नियमो न स्यात। तथा च सर्वस्य सर्वाणि शरीराणि सर्वाणीन्द्रियाणि सर्वाणि च मनांसि स्युः। अकस्माद्भूतस्वाभाव्याच्च शरीराद्यारम्भे आरम्भानुपरमेऽपवर्गाभावः स्यात। तन्निमित्तान्तरसम्भवे च तदपगमे प्रायणमुपपद्येत। अन्यथा तु भूतानां नित्यत्वे तन्न स्यात। जन्मवैचित्त्यं च समाधीयेत, अन्यथा तु तन्न स्यात्, भूतानां साधारणत्वात। अदृष्टाख्यनिमित्तसम्भवे च वर्णाश्रमप्रवृत्तयस्तदर्थानि च शास्त्राणि सार्थकानि स्युः। अन्यथा तु सर्वमन्धकारनृत्यमरण्यरुदितं च स्यादिति। तदनेन प्रकरणेन सर्वाण्येवातीतानि प्रकरणान्युपकियन्ते, उत्तराध्यायश्चेति। [TTP, A.L.Thakur's Press Copy, Ch. III, p. 113.]

(*b*) According to Vācaspati Miśra II and Keśava Miśra Tarkācārya the *saṅgati* here is प्रसङ्गः

(*ii*) अथ शरीरस्य पुरुषसमवेतादृष्टनिष्पाद्यताप्रकरणम। मनः शरीरावच्छेदेन वृत्तिं लभत इति मनःपरीक्षाप्रसङ्गेन स्मारितशरीरस्यात्मगुणादृष्टानिमित्तत्वं स्मृतमुपेक्षानर्हं प्रसङ्गसङ्गत्या निरस्यत। तत्र शरीरं पुरुषसमवेतादृष्टहेतुजं न वेति विप्रतिपत्तेः संशयः। न वा पक्षस्तु त्रेधा सम्भवति–अदृष्टाभावात्, तस्य पुरुषसमवायाभावात्, तस्य देहहेतुत्वाभावाद् वा। तत्राद्यो नास्तिकानाम, मध्यमोऽर्हताम्, अन्त्यो

सांख्यानाम्, प्रयोजनं तु यागाद्यनुष्ठानम ।....

[NTĀ, Allahabad edn. pp. 352-353.]

(iii) सम्प्रति शरीरस्य पुरुषसमवेतादृष्टनिष्पाद्यताप्रकरणम। सा च यद्यपि शरीरनिरूपणावसर एव निरूपयितुमर्हा, तथाप्येवं मन एव सम्बन्धिमुखेन परीक्षितं भवतीति तदनन्तरमेव तदवतारः प्रसङ्गसङ्गत्या, इन्द्रियान्तराणामिव मनसोऽपि शरीर एव वृत्तिलाभात्, पुरुषभोगस्य शरीरायतनत्वाच्च ।..... [GSP, p. 67.]

(305) P. 198, l. 11 : Before this, *Nyāyatātparyadīpikā* of Bhaṭṭa Vāgīśvara reads the sentence विप्रतिपत्तेः संशयः as a *sūtra,* and explains it in the following manner :

इदानीं मनःसम्बन्धिशरीरोत्पत्तिविचारमुखेन मनो विचारयंस्तत्र संशय-माह—

॥ विप्रतिपत्तेः संशयः ॥

कर्मनिरपेक्षैर्भूतैः शरीरमारभ्यत इति केचित्। ततश्चाचार्य-विप्रतिपत्तेः समीपस्थस्य कर्मसापेक्षा वा अकर्मनिमित्ता वा शरीरोत्पत्तिरिति संशयो भवतीति सूत्रार्थः। [NTD, p. 107.]

As a matter of fact, the sentence विप्रतिपत्तेः संशयः is part of *Nyāyabhāṣya* introducing the *sūtra* पूर्वकृतफलानुबन्धात्तदुत्पत्तिः

[See NB, p. 889.]

(306) P. 199, l. 2 : *Nyāyatātparyadīpika* of Bhaṭṭa Vāgīśvara reads this *sūtra* as साध्यसमत्वाद्यथाशरीरोत्पत्तेः . [NTD, p. 107.] This reading is not supported by any other commentary. The *Bhāṣya* passage immediately following the *sūtra* न साध्यसमत्वात् runs as यथा शरीरोत्पत्तिरकर्मनिमित्ता साध्या... [NB, p. 902]. Thus, for reasons best known to him, Bhaṭṭa Vāgīśvara has dropped the particle न, and added to the *sūtra* a portion of *Nyāyabhāṣya*. Rāmabhadra has adopted the traditional reading.

(307) P. 199, ll. 14-18 : Here, the *Nyāyabhāṣya* passage concerned runs as follows :

विषमश्चायमुपन्यासः। कस्मात्? निर्बीजा इमा मूर्त्तय उत्पद्यन्ते, बीजपूर्विका तु शरीरोत्पत्तिः। मातापितृशब्देन लोहितरेतसी वीजभूते गृह्येत। तत्र सत्त्वस्य गर्भवासानुभवनीयं कर्म पित्रोश्च पुत्रफलानुभवनीये कर्मणी मातुर्गर्भाश्रये शरीरोत्पत्तिं भूतेभ्यः प्रयोजयन्तीत्युपपन्नं बीजानुविधानमिति। [NB, p. 903.]

(308) P. 200, l. 6 : The traditional reading of this *sūtra* is शरीरोत्पत्तिवत् संयोगोत्पत्तिनिमित्तं कर्म. Rāmabhadra has not given any reasons for rejecting this reading.

(309) [A] P. 200, l. 11 : According to Vācaspati Miśra I, this *sūtra* expresses the opinion of the Sāṅkhya school :

तदेवमात्मगुणनिबन्धने शरीरसर्गे व्यवस्था दर्शिता। य तु मेनिरे न कर्मनिबन्धनः शरीरसर्गोऽपि तु प्रकृत्यादिनिबन्धनः प्रकृतयो हि स्वयमेव धर्माधर्मरूपनिमित्तानपेक्षाः सत्त्वरजस्तमस्तया प्रवृत्तिशीलाः स्वं स्वं विकारमारभन्ते, प्रतिबन्धकापगममात्रे तु धर्माधर्मावपेक्षन्ते, तद् यथा कृषीवलः केदारादपां पूर्णात् केदारान्तरमपूर्णमापिप्लावयिषुरपां सेतुमात्रं भिनत्ति, तास्तु निम्नाभिसर्पणस्वभावा अपहतसेतवः स्वयमेव केदारानाप्लावयन्ति, एवमाप्लावयन्ति प्रकृतयोऽपि विकारानिति। यथाऽऽहुः—

"निमित्तमप्रयोजकं प्रकृतीनामावरणभेदस्तु ततः क्षेत्रिकवत्" इति।

[पातञ्जलसूत्रम्, कैवल्यपादः, सू.३]

तान् प्रत्याह—

एतेनानियमः प्रत्युक्तः। एतेन कर्मसापेक्षाण शरीरसर्गे अनियमाभिधानेन तन्निरपेक्षाणां व्यतिरेकमुखेन अनियमः प्रत्युक्तः। नियमो व्याप्तिः साधारणविग्रहवत्त्वं सर्वात्मनाम्, अनियमस्त्वव्याप्तिः,

कस्यचिदात्मनः किञ्चिच्छरीरं कस्यचित् किञ्चिदिति। प्रकृतिनिवन्धने हि शरीरसर्गे तस्या एकत्वात् सर्वात्मसाधारण्याञ्च न शरीराणामस्त्य-साधारण्यहेतुः। [NVTT, pp. 908-909.]

The view that this *sūtra* intends to refute a Sāṅkhya theory has been stated also by Vācaspati Miśra II, Keśava Miśra Tarkācārya and Viṣvanātha Nyāyapañcānana. [NTĀ, Allahabad edn. p. 355 ; GSP, p. 68 ; NSV, 908.] Bhaṭṭa Vāgīśvara and Rādhāmohana, along with Rāmabhadra, are silent on this point.

(309)[B] **P. 200, ll. 15-16 :** It seems that this sentence of *Nyāyabhāṣya* was treated by some commentators as a *sūtra*, and Rāmabhadra appears to indicate his disagreement on this point. As a matter of fact, the sentence उपपन्नश्च तद्वियोगः कर्मक्षयोपपत्तेः has been accepted as a *sūtra* in *Nyāyatātparya-dīpika* of Bhaṭṭa Vāgīśvara, and it has been explained as follows :

न केवलं कर्मनिमित्ते शरीरसंसर्गे व्यवस्थानाभाव एव दोषः। किं तर्हि? मोक्षोऽपि तस्मिन् पक्षे न स्यादिति दर्शयितुं स्वपक्षे मोक्षोप-पत्तिमाह—

॥ उपपन्नश्च तद्वियोगः कर्मक्षयोपपत्तेः ॥

तस्य शरीरस्य वियोग आत्यन्तिको विनाश उपपन्नश्चास्मिन् पक्ष। कस्मात्? कर्मक्षयोपपत्तेः कर्मणामागतानां च समाधिवलादेकीकृत्योप-भोगेन च क्षयस्योत्पत्तिविनाशलक्षणस्य यथायोगमुपपत्तेः। न चेदृश-शरीरवियोगः कर्मनिरपेक्षपक्षे सम्भवति। तदारम्भकस्य पृथिव्यादेर्भूत-मात्रस्य सार्वकालीनत्वादिति सूत्रार्थः॥ [NTD, p. 109.]

(309)[C] **P. 200, ll. 18-19 :** (*a*) The Metropolitan edition of *Nyāyabhāṣya*, *Nyāvārttika* and *Nyāyavārttika-tātparyaṭīkā* treats the expression तददृष्टकारितमिति चेत् as part of the *sūtra*, the full reading of which is supposed to be

तददृष्टकारितमिति चेत् पुनस्तत्प्रसङ्गोऽपवर्गे. [NB, p. 910 ; NV, p. 910 ; NVTT, p. 910.] Bhaṭṭa Vāgīśvara and Viśvanātha Nyāyapañcānana have also adopted this reading. [NTD, p. 109 ; NSV, p. 911.] Vācaspati Miśra II, Keśava Miśra Tarkācārya and Rādhāmohana Gosvāmi Bhaṭṭācārya have adopted the reading पुनस्तत्सङ्गोऽपवर्गे. [NTĀ, Allahabad edn, p. 355 ; GSP, p. 69 ; NSVV, p. 233.] But they are silent about the status of the expression तददृष्टकारितमिति चेत्, while Rāmabhadra has explicity identified it as a part of *Nyāyabhāṣya*.

(*b*) According to Uddyotakara, this sūtra refutes the view of those who maintain that *adṛṣṭa* is a characteristic of atoms. Vācaspati Miśra I, Vācaspati Miśra II, Keśava Miśra Tarkācārya and Viśvanātha Nyāyapañcānana have ascribed this view to the Jaina-s :

(*i*) अपरे त्वदृष्टं परमाणुगुणं वर्णयन्ति, तेषामपि पुनस्तत्प्रसङ्गोऽपवर्गे इति परमाणुगुणस्य शरीरोत्पत्तिनिमित्तत्वात् पुनस्तत्प्रसङ्गोऽपवर्गे इति।
[NV, p. 914.]

(*ii*) अपरे तु आर्हता अदृष्टं परमाणुगुणं वर्णयन्ति... [NVTT, p. 914.]

(*iii*) ...आर्हतां मतमपाकरोति–पुनस्तत्प्रसङ्गोऽपवर्ग।
[NTĀ, Allahabad edn. p. 35.]

(*iv*) आर्हतास्तु मनसां परमाणुनां च गुणमदृष्टं वदन्ति।..... तान् प्रत्याह पुनस्तत्प्रसङ्गोऽपवर्ग।... [GSP, p. 69.]

(*v*) आर्हतास्तु मनःपरमाणुगुणमदृष्टं मन्यन्ते.....तत्रोत्तरमाह– तददृष्टकारितमिति चेत् पुनस्तत्प्रसङ्गोऽपवर्गे। [NSVV, p. 910.]

(*c*) Bhaṭṭa Vāgīśvara, however, maintains that this *sūtra* is aimed against the Sāṅkhya school :

(*vi*) इदानीं सांख्यमतमुपन्यस्य निरस्यति–तददृष्टकारितमिति चेत् पुनस्तत्प्रसङ्गोऽपवर्ग। [NTD, p. 109.]

In his opinion, the Jaina doctrine regarding *adṛṣṭa* has been refuted by the next *sūtra* :

ये तु जरन्तो जैनाः परमाणुमनोगुणमदृष्टं...मेनिरे तेषामपि मोक्षावस्था शरीरमनःसंयोगस्याप्युच्छेद इति संसाराभावो नेत्याह – मनःकर्मनिमित्तत्वाच्च संयोगाव्युच्छेदः। [NTD, p. 109.]

(310) P. 201, l. 7 : There is some dispute regarding the exact reading of this *sūtra*. The Metropolitan edition of *Nyāyabhāṣya* gives the reading ...संयोगाव्युच्छेदः, even though the Metropolitan edition of *Nyāyavārttika* has the reading...संयोगाद्यनुच्छेदः *Nyāyasūtravṛtti* of Viśvanātha accepts the reading...संयोगानुच्छेदः [NB, p. 914 ; NV, p. 914; NSV, p. 915.] Bhaṭṭa Vāgīśvara and Rādhāmohana, like Rāmabhadra, support the reading ...संयोगाव्युच्छेदः. [NTD, p. 109 ; NSVV, p. 233.] Vācaspati Miśra II adopts the reading ...संयोगाद्युच्छेदः. [NTĀ, Allahabad edn. p. 355.] Mahāmahopadhyāya Phaṇibhūṣaṇa Tarkavāgīśa, who usually follows *Nyāyasūcīnibandha* for deciding the reading of *Nyāyasūtra*-s, accepts here the reading संयोगाव्युच्छेदः, even though the *Nyāyasūcīnibandha* supports the reading संयोगाद्यनुच्छेद; and in defence of the reading adopted by him, he has drawn own attention to the *Nyāyabhāṣya* passage मनोगुणेनादृष्टेन समावेशिते मनसि संयोगव्युच्छेदो न स्यात्. [NB ed. by Tarkavāgīśa, Vol. III, p.357.]

(311) P. 201, l. 12 : Rāmabhadra has not given any introductory remark about this *sūtra*. This is also the case with Bhaṭṭa Vāgīśvara. [NTD, p. 109.] The introductory remarks found in other commentaries are as follows :

(*i*) ननु भवतु संयोगानुच्छेदः किं नो वाध्यत इत्यत आह—शरीरस्य नित्यत्वप्रसङ्गश्च प्रायणानुपपत्तेः। [NVTT, p. 915.]

(*ii*) मनःशरीरसंयोगस्थैर्यदूषणमाह—नित्यत्वप्रसङ्गश्च प्रायणानुपपत्तेः।
[NTĀ, Allahabad edn, p. 356.]

(*iii*) शरीरमनःसंयोगो न नश्यतीत्यत्र दूषणमाह—नित्यत्वप्रसङ्गश्च प्रायणानुपपत्तेः। [GSP, p. 69.]

(*iv*) संयोगानुच्छेदे का क्षतिरत आह—नित्यत्वप्रसङ्गश्च प्रायणानुपपत्तेः। [NSV, p. 915.]

(*v*) नन्वेकसंयोगस्यापरसंयोगविरोधित्वान्न तद्वाराप्रसङ्ग इत्यत आह—

॥ नित्यत्वप्रसङ्गश्च प्रायणानुपपत्तेः ॥

[NSVV, p. 334.]

(312) P. 201, l. 16 : Most of the commentators read this *sūtra* as अणुश्यामतानित्यत्ववदेतत् स्यात्. [NB, p. 916 ; NV, p. 916 ; NTĀ, Allahabad edn. p. 356 ; GSP, p. 69 ; NSV, p. 916; NSVV, p. 234.] Bhaṭṭa Vāgīśvara, however, like Rāmabhadra, reads this sūtra as अणुश्यामतानित्यत्ववत् स्यात् His explanation also does not contain the *pratīka* एतत् :

चोदयति—

॥ अणुश्यामतानित्यत्ववत् स्यात् ॥

यथाणौ श्यामताऽकारणिकाप्यनित्या दृष्टा तथा शरीरारम्भकपरमाणुगतस्यादृष्टस्याकारणस्यानित्यता स्यात। ततश्च शरीरस्याप्यनित्यत्वं स्वकारणादृष्टवशात् सिद्ध्यतीति प्रायणोपपत्तिरिति सूत्रार्थः।

[NTD, p. 110.]

(313) P. 202, ll. 1-4 : Here, Rāmabhadra has accepted the first of the alternative interpretations of the *sūtra* नाकृताभ्यागमप्रसङ्गात् that have been provided by Vātsyāyana. The interpretation of अकृत as प्रमाणतोऽनुपपन्न is not very convincing, and this may have led Vātsyāyana to suggest the *second* interpretations of this *sūtra*, which runs as follows :

(*i*) ...अथ वा—नाकृताभ्यागमप्रसङ्गात्। अणुश्यामतादृष्टान्तेन अकर्म-

निमित्तां शरीरोत्पत्तिं समादधानस्याकृताभ्यागमप्रसङ्गः। अकृते सुखदुःखहेतौ कर्मणि पुरुषस्य सुखं दुःखमभ्यागच्छतीति प्रसज्येत। ओमिति ब्रुवतः प्रत्यक्षानुमानागमविरोधः।

प्रत्यक्षविरोधस्तावत्—भिन्नमिदं सुखदुःखं प्रत्यात्मवेदनीयत्वात् प्रत्यक्षं सर्वशरीरिणाम। को भेदः? तीव्रं मन्दं चिरमाशु नानाप्रकारमेकप्रकारमित्येवमादिर्विशेषः। न चास्ति प्रत्यात्मनियतः सुखदुःखहेतुविशेषः, न चासति हेतुविशेषे फलविशेषो दृश्यत। कर्मनिमित्ते तु सुखदुःखयोगे कर्मणां तीव्रमन्दतोपपत्तेः कर्मसञ्चयानां चोत्कर्षापकर्षभावात् नानाविधैकविधभावाञ्च कर्मणां सुखदुःखभेदोपपत्तिः। सोऽयं हेतुभेदाभावात् दृष्टः सुखदुःखभेदो न स्यादिति प्रत्यक्षविरोधः।

तथा अनुमानविरोधः—दृष्टं पुरुषगुणव्यवस्थानात् सुखदुःखव्यवस्थानम। यः खलु चेतनावान् साधननिर्वर्तनीयं सुखं बुद्ध्वा तदीप्सन् साधनावाप्तये प्रयतते स सुखेन युज्यते न विपरीतः। यश्च साधननिर्वर्तनीयं दुःखं बुद्ध्वा तज्जिहासुः साधनपरिवर्जनाय यतते स च दुःखेन त्यज्यते न विपरीतः। अस्ति चेदं यत्नमन्तरेण चेतनानां सुखदुःखव्यवस्थानं तेनापि चेतनगुणान्तरव्यवस्थाकृतेन भवितव्यमित्यनुमानम। तदेतदकर्मनिमित्ते सुखदुःखयोगे विरुध्यते इति। तच्च गुणान्तरमसंवेद्यत्वात् अदृष्टं विपाककालानियमश्चाव्यवस्थितम। बुद्ध्यादयस्तु संवेद्याश्चापवर्गिणश्चेति।

अथागमविरोधः—वहु खल्विदमार्षमृषीणामुपदेशजातमनुष्ठानपरिवर्जनाश्रयम्, उपदेशफलं च शरीरिणां वर्णाश्रमविभागेनानुष्ठानलक्षणा प्रवृत्तिः, परिवर्जनलक्षणा निवृत्तिः। तच्चोभयमेतस्यां दृष्टौ नास्ति कर्म सुचरितं दुश्चरितं वा; 'कर्मनिमित्तः पुरुषाणां सुखदुःखयोग' इति विरुध्यते । सेयं पापिष्ठानां मिथ्यादृष्टिः—अकर्मनिमित्ता शरीरसृष्टिरकर्मनिमित्तः सुखदुःखयोग इति ॥ [N.B., p.916-918.]

This interpretation is closer to the meaning in which the word अकृताभ्यागम is used in philosophical parlance, as is evident from the following remarks of Uddyotakara :

(*ii*) ... ... यथाश्रुति वा सूत्रार्थः, अकृतस्य कर्मण उपभोगप्रसङ्गादिति। एतत् सविस्तरोक्तं भाष्य इति। [NV, p. 917.]

The remarks of Vācaspati Miśra I on this *Vārttika* passage are as follows :

(*iii*) ... ... यथाश्रुति वा सूत्रार्थः। अकृतस्य कर्मणः फलोपभोग-प्रसङ्गादिति। यदा खलु परमाणुगुण एव नित्यः शरीराद्यारम्भकस्तदाऽसौ नित्यत्वान्न केनचित् क्रियत। तस्याकृतस्यैव फलं पुरुषैरूपभुज्यते, ततश्चायमास्तिकानां विहितनिषिद्धप्रवृत्तिनिचयोऽनर्थकः शास्त्रप्रणयनं चाप्यनर्थकं भवेदिति भावः। एतच्चातिविस्तृतं भाष्ये, तस्यार्थो निगदव्याख्यातः। [NVTT, pp. 917-918.]

Bhaṭṭa Vāgīśvara, Vācaspati Miśra II, Keśava Miśra Tarkācārya and Viśvanātha Nyāyapañcānana have recorded both the interpretations given by Vātsyāyana. [NTD, p. 110 ; NTĀ, Allahabad edn. p. 356 ; GSP, p. 69 ; NSV, pp. 917-919.] Rādhāmohana Gosvāmi Bhaṭṭācarya has, however, recorded only the second interpretation suggested by Vātsyāyana. [NSVV, p. 235.]

(314) P. 203, ll. 1-6 : Here, Rāmabhadra has referred to the views of Udayana and Vācaspati Miśra II, whose remarks are as follows :

(*i*) तृतीयेऽध्याये कारणरूपप्रमेयषट्कं परीक्षितम। इहेदानीं कार्यरूपप्रमेयषट्कं क्रमप्राप्तं परीक्षिष्यत। तदेवाध्यायार्थः। तत्र प्रथमाह्निके प्रवृत्त्यादयो धर्मिणो विषयाश्चिन्तनीयाः। द्वितीये त्ववसरतः सर्वप्रमेयाणां बिषयी धर्मस्तत्त्वप्रबोधो निरूपणीय इत्याह्निकभेदस्थितौ प्रथमाह्निके चतुर्दशप्रकरणानि भवन्ति। तद्यथा—(१)प्रसङ्गसिद्धपरीक्षा-नुकीर्तनप्रकरणम् (२) दोषत्रैराश्यप्रकरणम्, (३) प्रेत्यभावप्रकरणम्,

(४) शून्यतोपादानताप्रकरणम्, (५) ईश्वरोपादानताप्रकरणम्, (६) आकस्मिकत्वप्रकरणम्, (७) सर्वानित्यताप्रकरणम्, (८) सर्वनित्यताप्रकरणम्, (९) सर्वपृथक्त्वप्रकरणम्, (१०) सर्वाभावप्रकरणम्, (११) संख्यैकान्तप्रकरणम्—इत्यष्टावौपोद्घातिकानि प्रकरणानि, (१२) फलपरीक्षाप्रकरणम्, (१३) दुःखपरीक्षाप्रकरणम्, (१४) अपवर्गपरीक्षाप्रकरणमिति।

तत्र प्रवृत्तिदोषसूत्राभ्यां प्रसङ्गसिद्धपरीक्षानुकीर्तनोपाधिकं प्रथमं प्रकरणमारब्धुमवशिष्टसङ्गतिः।... ... ...

[TTP, A.L.Thakur's Press Copy, Ch. IV, p.1.]

(*ii*) तृतीये कारणरूपप्रमेयषट्कं परीक्षितम। इहेदानीमवसरसङ्गत्यात्मादीनां प्रवृत्त्यादिकारणतया तत्परीक्षायाः प्रवृत्त्यादिपरीक्षाहेतुत्वेन हेतुहेतुमद्भावसङ्गत्या च कार्यरूपप्रमेयषट्कपरीक्षा। न च कार्यरूपप्रमेयत्वेन परीक्षणीयत्वे शरीरादेरप्यत्र परीक्षापातः। तेनापि रूपेण प्रवृत्त्यादिषट्कस्यैव परिचिक्षिषत्वात।... ... तत्रापरीक्षितविषयस्य तत्त्वज्ञानस्य परीक्षितुमशक्यत्वात् तत्त्वज्ञान-परीक्षातः प्राक् प्रवृत्तित्वादिना धर्मेण प्रवृत्त्यादिषट्कपरीक्षा प्रथमाह्निके। तत्रापि क्रमानुरोधादुक्तरूपवत्तया प्रवृत्तिदोषपरीक्षा प्रथमप्रकरणार्थः, 'यथा तथे'ति सूत्रावयवाभ्यामुक्तरूपत्वज्ञापनात। न चार्थभेदः, अतिदिष्टरूपवत्त्वस्यानुगतत्वात।... ... ...

[NTĀ, Allahabad edn. p. 358-359.]

Similar remarks have been made by Keśava Miśra Tarkācārya, Viśvanātha Nyāyapañcānana and Rādhāmohana Gosvāmi Bhaṭṭācārya. [GSP, p. 71 ; NSV, pp. 921-922 ; NSVV, p. 236.]

Thus, the *saṅgati* of Adhyāya IV with Adhyāya III is either हेतुता or अवसर.

(315) P. 203, ll. 10-11 : This explanation has been rejected by Viśvanātha Nyāyapañcānana :

(*i*) ... अत्र तथैवेति शेषं पूरयन्ति, तदयुक्तम्, तथा सत्यत्रैव 'यथा' शव्दस्याकाङ्क्षाशान्तावग्रिमसूत्रस्थ'तथा'शव्देऽपि'यथा'शव्दान्तरस्य पूरणीयतया प्रकरणभेदापत्तेः। तस्मादग्रिमसूत्रस्थ'तथा'शब्देनान्वयो युक्तः। प्रवृत्तिर्यथा उक्तलक्षणवती तथा दोषा अप्युक्तलक्षणवन्त इत्यग्रिमसूत्रसंवलितोऽर्थः। 'प्रवृत्तिर्वाग्बुद्धिशरीरारम्भः' इत्युक्तलक्षण-सत्त्वात् नासिद्धं लक्षणमिति भावः।... ... ... [NSV, p. 922.]

(316) P. 203, ll. 12-13 : Rāmabhadra has recorded here the opinion of Uddyotakara, whose words are as follows :

... ... तत्र प्रवृत्तिर्द्वेधा भवति—कारणरूपा कार्यरूपा च। कारणरूणा—प्रवृत्तिर्वाग्बुद्धिशरीरारम्भ इति। कार्यरूपा—धर्माधर्म-समाख्या दुःखादिसूत्रे वर्णिता। तत्र कारणरूपायाः प्रवृत्तेर्विंशतिधा भेदः। कार्यरूपा तु प्रवृत्तिरेकद्रव्याऽभ्युदयस्य प्रतिनियमात्, अवस्थिता विपाककालस्य नियमात्, आत्मसमवायाद् गुणभूता, अनित्या प्रायणादि-दर्शनात् । [NV, pp. 921-922.]

(317) Rāmabhadra has not mentioned the *saṅgati* of दोष-त्रैराश्यपरीक्षाप्रकरण with प्रवृत्तिदोषसामान्यपरीक्षाप्रकरण. Vācaspati Miśra II has discussed this problem in detail:

एवं दोषाः सामान्यतः परीक्षिताः। सम्प्रति त्रैराश्येन विशेषेण परीक्षणाय हेतुहेतुमद्भावसङ्गत्या तत्त्रैराश्यप्रकरणम। कामक्रोधौ दोषावित्येके। शोकमोहावित्यन्य। अविद्या, अस्मितारागद्वेषाभि-निवेशाश्चत्वार इत्यपर। अविद्याख्या अस्मिता शरीरादावहंबुद्धिः। अभिनिवेशो मरणभयम। अविद्यैवेतीतर। मदमानमात्सर्यादय इति केचित। रागद्वेषमोहा इति वृद्धाः—इति विप्रतिपत्तेः "प्रवर्तनालक्षणा दोषा" इति लक्षणं सम्यगसम्यग् वेति संशयः "दोषा" इति बहुवचनेन

सूचितः। त्रित्वविभागो मानादीनां दोषलक्षणवतामनन्तर्भावादसम्यक् स्यादिति मानादीनामदोषत्वाभ्युपगमे मानादावेव लक्षणमति-व्यापकमिति पूर्वपक्षः।

सिद्धान्तसूत्रम् –

॥ तत्त्रैराश्यं रागद्वेषमोहार्थान्तरभावात् :॥... ...
[NTĀ, Allahabad edn. pp. 361-362.]

(318) P. 204, l. 10 : Rāmabhadra has followed Uddyotakara in explaining काम as नारीगताभिलाष, as is evident from the following passage of *Nyāyavārttika* :

(*i*) तत्र कामः स्त्रीगताभिलाषः, या स्त्रीगता प्रार्थना सा काम इति। एवं चाऽऽहुः–नाकामयमानो मण्डयत इति। [NV, p. 925.]

This has been rejected by Viśvanātha :

(*ii*) ... कामो रिरंसा, रतिश्च विजातीयः संयोगः। नारीगताभिलाष इति तु न युक्तम्, स्त्रियाः कामेऽव्याप्तेः। ... ... [NSV, p. 925.]

(319) P. 204, ll. 19-20 : Vācaspati Miśra II has included तर्क in the items coming under the heading of मोह:

(*i*) ...मोहपक्षः विपर्ययसंशयतर्कमानप्रमादभयशोकहिंसास्मया इति।
[NTĀ, Allahabad edn, p. 363.]

This has also been admitted by Keśava Miśra Tārkācārya, Viśvanātha Nyāyapañcānana and Rādhāmohana Gosvāmi Bhaṭṭācarya :

(*ii*) मोहपक्षः विपर्ययसंशयतर्कमानप्रमादभयशोका इति।
[GSP, p. 72]

(*iii*) मोहपक्षः विपर्ययसंशयतर्कमानप्रमादभयशोकाः।
[NSV, p. 927.]

(*iv*) विपर्ययसंशयतर्कमानप्रमादभयशोकादीनां मोहान्तर्गतत्वम।
[NSVV, p. 237.]

(320) P. 205, ll. 5-7 : Here, Rāmabhadra has referred to the views of Vācaspati Miśra II, whose remarks are as follows :

(*i*) उचितव्ययनिपाते धनरक्षणेच्छा कार्पण्यमपि तृष्णाभेदः। ... हिंसा नाशावच्छिन्नद्वेषरूपा द्रोहभेदः। स्मयो मानभेदः।

[NTĀ, Allahabad edn. pp. 362-363.]

Viśvanātha has also noted the views of Vācaspati Miśra II:

(*v*) उचितव्ययाकरणेनापि धनरक्षणेच्छा कार्पण्यमपि तृष्णाभेद एव।... हिंसा तु द्रोहजन्या। परे तु तां द्रोहं मन्यन्त।...गुणवति निर्गुणत्वधीरूपं स्मयमपि मानेऽन्तर्भावयन्ति। [NSV, pp. 926-927.]

The manner in which Rāmabhadra and Viśvanātha have mentioned these views of Vācaspati Miśra II indicates that they are not in favour of it.

(310) P. 206, l. 2 : There is considerable disagreement regarding the exact reading of this sūtra. The Metropolitan edition of *Nyāyabhāṣya* and *Nyāyavārttika* read it as निमित्तनैमित्तिकभावादार्थान्तरभावो दोषेभ्यः. [NB, p. 930 ; NV, p. 930.] Vācaspati Miśra II, Keśava Miśra Tarkācārya, Visvanātha Nyāyapañcānana and Rādhāmohana Gosvāmi Bhaṭṭācārya have accepted the reading प्राप्तस्तर्हि निमित्तनैमित्तिकभावादर्थान्तरभावो दोषेभ्यः. [NTĀ, Allahabad edn. p. 239 ; GSP, p. 73 ; NSV, p. 930 ; NSVV, 239.] Viśvanātha is aware of the fact that some commentators do not admit the portion प्राप्तस्तर्हि as a part of this *sūtra*:

प्राप्तस्तर्हीत्यंशस्तु न सूत्रं किन्तु भाष्यकृतः पूरणमित्यपि वदन्ति ।

[NSV, p. 930.]

Thus the word 'मोह' that is found in the reading adopted by Rāmabhadra has not been admitted by these commentators. Rāmabhadra is aware of this, as is clear from his statement—मोहांशशून्यमपि सूत्रमिच्छन्ति. It is, however, interesting to note that Bhaṭṭa Vāgīśvara attests the presence of the

word· °मोह° in the *sūtra*, though the reading adopted by him differs in many respects :

मोहस्य दोषान्तर्भावमसहमानः प्रत्यवतिष्ठते–

॥ निमित्तनैमित्तिकनिर्देशान्मोहोर्थान्तरभावो दोषेभ्यः ॥

नामूढस्येतरोत्पत्तिरित्यत्र मोहस्य निमित्तत्वं रागद्वेषयोश्च तज्जन्यत्वेन नैमित्तिकत्वमिति निमित्तनैमित्तिकनिर्देशान्मोहस्य दोषेभ्योऽर्थान्तरभावः, पृथक्त्वेनादोषत्वं तन्निमित्तत्वाद्रूपादिवदिति सूत्रार्थः। [NTD, p. 113.]

It is thus clear that the differences in reading found in *Nyāyatātparyadīpika* are not cases of scribal error—they are genuine variants admitted by Bhaṭṭa Vāgīśvara.

(321) P. 206, ll. 7-8 : Here, Rāmabhadra has recorded the view of Vācaspati Miśra II, as can be seen from the passage quoted below :

... दोषलक्षणवत्त्वान्मोहस्य दोषत्वम। न तु तद्धेतुत्वाददोषत्वम। व्यक्तिभेदेन हेतुत्वे तज्जातीयत्वाविरोधात। तथा च दोषलक्षणानवरोध उपाधिरित्यर्थः। [NTĀ, Allahabad edn. p. 364.]

The fact that Rāmabhadra uses the expression केचित् seems to indicate that he is not favourably disposed towards this view.

(322) P. 206, l. 10 : Rāmabhadra has stated that this *sūtra* is admitted only in *Bhāskara*, i.e. *Nyāyabhāskara*. This is somewhat surprising, because it occurs in all commentaries of *Nyāyasūtra*. In most of these, we word "°भाव°" has been omitted. In *Gautamīyasūtraprakāśa* however, the sūtra even has as its constituent the word °भाव°. [GSP, p. 73.]

(323) P. 206, l. 14 : Rāmabhadra has not indicated the *saṅgati* between दोषत्रैराश्यपरीक्षाप्रकरण and प्रेत्यभावपरीक्षाप्रकरण. Vācaspati Miśra II maintains that the *saṅgati* is अवसर :

उद्देशकमानुरोधादवसरसङ्गत्या प्रेत्यभावपरीक्षाप्रकरणम। तत्र प्रेत्यभावो वुद्धेरित्येके, शरीरस्यत्यन्ये, आत्मन इति वृद्धा इति विप्रतिपत्तेः प्रेत्यभाव आत्मप्रतियोगिको न वेति संशयः। ... ...

[NTĀ, Allahabad edn. p.365]

This has been stated by Keśava Miśra Tarkācārya as well.

[GSP, p. 73.]

(324) P. 207, ll. 12-19 : Here, Rāmabhadra has referred to the view of Vācaspati Miśra II :

...पूर्वपक्षस्तु–प्रेत्यभावपदस्योत्पादविनाशावथर्थौ छलतो वर्णयित्वा सिद्धान्तसूत्रम् –

॥ आत्मनित्यत्वे प्रेत्यभावसिद्धिः ॥

शरीरसन्तानमूलभूतशरीरयोगो भावः। भोगघटकान्त्यशरीरविच्छेदः प्रयाणम। एतच्च द्वयम् आत्मनित्यत्वे एव सम्भवति। ल्यपः समान-कर्तृत्वोपस्थापकत्वादित्यर्थः।

ननु भावपूर्वकत्वात् प्रायणस्य 'कथं प्रेत्यभाव' इति? 'मुखं व्यादाय स्वपिती'त्यत्र 'सुप्त्वा मुखं व्याददाती'तिवत् ल्यपो व्यत्ययाद् 'भूत्वा प्रायणमि'त्यर्थात। एवं प्रयोगस्तु जन्ममरणयोरनादिताख्यापनायेति समानकर्तृकत्वं पौर्वापर्यञ्चोपपद्यत। [NTĀ, Allahabad edn. p. 365.]

This has been repeated by Keśava Miśra Tarkācārya.

[GSP, pp. 73-74.]

(328) P. 209, ll. 1-2 : Vācaspati Miśra II has indicated how the *saṅgati* here is that of उपोद्घातः

"व्यक्ताद् व्यक्तानामि"त्यत्रोपोद्घातादष्टौ प्रकरणानि। अभावोपादानादिष्वनिरस्तेषु प्रकृतासिद्धेः। प्रयोजनं तु अष्टानामपि व्यक्ताद्व्यक्त-निष्पत्तिः। तत्रापि शून्यतोपादानत्वे निराकृते अभावोपादानता-

निराकरणप्रकरणम। तत्र समवायिकारणत्वमभावे वर्तते न वेति संशयः।... ... [NTĀ, Allahabad edn. p. 368.]

The same opinion has been expressed by Keśava Miśra Tarkācārya. [GSP, p. 73-74.]

(329)P. 209, l. 13, l. 18 : These two sentences have not been counted as *sūtra*-s by Bhaṭṭa Vāgīśvara in his *Nyāyatātparyadīpika*. He has not also given any reason for not treating these sentences as *sūtra*-s. [NTD, p. 114.]

(330) P. 210, ll. 1-5 : Here, Rāmabhadra is referring to the views of Vācaspati Miśra II, whose remarks are as follows:

... ... यथाऽतीतेऽभूत् कुम्भः, अनागते भविष्यति कुम्भ इति कारकशब्दप्रयोगो भक्त्या, तथा ममापीत्यतो भाक्तत्वान्न व्याघातः। भक्तिबीजञ्चानन्तर्यमुपमर्दकमप्युपमृद्योत्तरकालमनुवर्त्ततेऽङ्कुरो-पीत्यर्थः।

[NTĀ, Allahabad edn. p. 369.]

As usual, Keśava Miśra Tarkācārya has repeated these lines almost verbatim. [GSP, p. 75.]

(331) P. 211, l. 15. : The sentence व्युहान्तराद् द्रव्यनिष्पत्तिः is actually a part of *Nyāyabhāṣya* on the *sūtra* क्रमनिर्देशादप्रतिषेधः, the full sentence being व्याहतव्यूहानामवयवानां पूर्वव्युहनिवृत्तौ व्युहान्तराद् द्रव्यनिष्पत्तिर्नाभावात् । [NB, p. 939.]

(332) P. 214, l. 1 : According to Vācaspati Miśra II, the *saṅgati* of this *prakaraṇa* with the earlier one is हेतुता :

ईश्वरोपादानत्वे सम्भवति क्व व्यक्ताद् व्यक्तनिष्पत्तिरिति निर्वाहायोपोद्घातेन शून्यतोपादानत्वे निराकृते ईश्वरोपादानता शङ्क्यतेऽपीति। तेन समं हेतुहेतुमद्भावेन च सङ्गत्या तदनन्तरमीश्वरो-पादानतानिराकरणप्रकरणम्। [NTĀ, Allahabad edn. p. 370.]

(333) P. 218, ll. 13-14 : *Brahmapariṇāmavāda* was propounded by Bhāskarācarya in his commentary on

Brahma-sūtras. This was published in Chowkhamba Sanskrit Series, Benaras under the editorship of Vindhyesvari Prasad Dvivedī in the year 1905. According to Bhāskarācārya, the relation between *Brahman* and *Jagat* is that of *bhedābheda,* i.e. identity-cum-difference. *Brahman* is the material cause (*upādānakāraṇa*) of *Jagat,* and *Jagat* is a real transformation *(pariṇāma)* of *Brahman.* According to Bhāskarācārya, the relation between a material cause and its real transformation is one of identity-cum-difference. Thus, a gold ring is identical with its material cause, i.e. a lump of gold in so far as it continues to be gold, and at the same time, it is also different from its material cause in so far as it is a ring, and not a lump. As against Śaṅkarācārya, Bhāskarācārya maintains that the world is real, and not an unreal transformation *(vivarta)* of *Brahman.* He also maintains that like the relation between the sun and its reflections in water, the relation between *Jīva* and *Brahman* is also one of *bhedābheda.* The *Jīva*-s differ from *Brahman* on account of imposed conditions *(upādhi),* but in essence, they are identical with *Brahman. Brahman* can transform itself into many things, and yet remain one and the same by virtue of its inscrutable powers that are infinite in number. We quote below a few relevant extracts from Bhāskarācārya's commentary on *Brahma-sutra-s*:

(*i*) ब्रह्मैव कारणात्मना कार्यात्मना च द्विरूपेण व्यवस्थितम् ।

[*Bhāskara-Bhāṣya* (henceforth referred to as BB), 1/1/10]

(*ii*) अनन्ता हि तस्य शक्तयोऽचिन्त्याश्च ... [BB, 1/4/25]

(*iii*) कार्यरूपेण नानात्वमभेदः कारणात्मना ।

हेमात्मना यथाऽभेदः कुण्डलाद्यात्मना भिदा ॥ [BB, 1/1/4.]

(*iv*) अतो भिन्नाभिन्नरूपं ब्रह्मेति स्थितम् ... [BB, 1/1/4.]

(*v*) भेदाभेदरूपं ब्रह्म समधिगतम् ... [BB, 3/2/11.]

(*vi*) स्वतन्त्रकारणं कूटस्थं नित्यमेकमेवाद्वितीयं पश्चात्तु कार्यं कादाचित्कं प्रवर्तते ... स्वतोऽभिन्नत्वात्, आगन्तुकत्वाच्च पृथिव्यादि-स्थानकृतस्य रूपस्य ... न पुनः प्रपञ्चरूपस्याभावः प्रतिपाद्यते ।
[BB, 3/2/11.]

(*vii*) स च भिन्नाभिन्नस्वरूपः । अभिन्नरूपं स्वाभाविकम्, औपाधिकन्तु भिन्नरूपम्। [BB, 2/3/43.]

(*viii*) तदिदमौपाधिकमणुत्वं जीवस्यातो द्रष्टव्यम् । [BB, 2/3/29.]

(*ix*) "तत्त्वमसी"ति श्रुतेरभिन्नो जीवः, स्वाभाविकं नित्यसिद्धमभिन्नं रूपम्, इतरदौपाधिकं प्रवाहनित्यमिति विवेकः ।
[BB, 3/2/6.]

(*x*) एकः सविता निर्विकारो जलसूर्यकास्तूपाधिभिन्नास्तद्वत् परमात्मा, तदंशभूता जीवा इति । [BB, 3/2/19.]

(*xi*) औपाधिकमिदं कर्तृत्वं यावदुपाध्यनुवर्तते ... ...कर्तृत्वभोक्तृत्व यावच्छरीरभाविनी । [BB, 3/4/26.]

(*xii*) जीवपरयोश्च स्वाभाविकोऽभेद औपाधिकस्तु भेदः ।
[BB, 4/4/4.]

Bhāskarācārya was perhaps the first commentator of the *Brahmasūtra*-s who challenged the monistic interpretation of Vedānta. He has also criticized Śaṅkarācārya in his commentary on the *Bhagavadgītā*.

(334) P. 220, ll. 1-4 : Here, the following remark of Raghunātha Śiromaṇi may be recalled :

दण्ड्यादौ साध्ये परम्परासम्बद्धं दण्डत्वादिकमेव साध्यतावच्छेद-कमतो नाव्याप्तिः । [TCD, p. 210-212]

(335) P. 222, ll : 10-19 : Keśava Miśra Tarkācārya has ascribed a similar view to Puṇḍarīkākṣa Vidyāsāgara :

विद्यासागरास्तु —परिणामक्रमेणेश्वरोपादानकं जगदित्याक्षिप्त-

पूर्वपक्षकं सिद्धान्तसूत्रम् — ईश्वरः कारणं पुरूषकर्माफल्य-दर्शनात। ईश्वरः कारणं निमित्तकारणं पुरूषकर्माफल्यदर्शनात पुरूषव्यापारोऽफलोऽपि दृश्यते यतोऽतः कारणान्तरापेक्षेत्यर्थः। न तूपादानम्, कार्यैकजात्यादिति भावः। देश्यम्—न पुरूषकर्माभावे फलानिष्पत्तेः। पुरूषव्यापारमन्तरेण न कार्यमतो दृष्टनैवोपपत्तेर्नातिरिक्तकारणकल्पनेत्यर्थः। सिद्धान्तः— तत्कारितत्वादहेतुः। न ह्यचेतनं चेतनानधिष्ठितं प्रवर्तत इति द्व्यणुकादेस्तत्कारितत्वात, तदायोजितपरमाणुजन्यत्वादीश्वर-सिद्धौ तन्निषधाऽहेतरित्यर्थ इत्याहुः। [GSP, p. 76.]

(336) P. 224, ll. 11-12 : This is the view of Vācaspati Miśra II :

... कण्टकतैक्ष्ण्यादि अकारणम्, अतस्तद्दृष्टान्तेन कार्यमात्रस्योत्पत्तिकत्वेनाकस्मिकत्वसाधनमित्यर्थः। न च घटादिभिरूपलभ्यमानकारणकैरनेकान्तः, एतेष्वपि तत एव तत्साधनात्। न च कारणप्रमितौ कथं तन्निषेधः, तस्य प्रमितप्रतियोगिकत्वादिति वाच्यम्, प्रमांशस्य गौरवकरत्वेन प्रतीतत्वमात्रस्य प्रयोजकत्वात्, तस्य चासत्ख्यात्या सम्भवात।

[NTĀ, Allahabad edn. p. 381.]

(337) P. 225, l. 1-2 : Many of the commentators are of the opinion that अनिमित्तनिमित्तत्वान्नानिमित्ततः is *not* a *siddhānta sūtra* :

(*i*) ... अपरे तु अनिमित्तनिमित्तत्वान्नानिमित्तत इति परिहारं वर्णयन्ति। ... [NV, p. 959.]

(*ii*) सिद्धान्त्येकदेशिमतमद्भाव्य दूषयति—॥ अति—तः ॥ अपरे त्विति। [NV, p. 959.]

(*iii*) सिद्धान्त्येकदेशीति छलवादित्वात्। छलस्य चासदुत्तरत्वात्। तथा हि बहुव्रीहिसमासाद् अनिमित्तत इति सार्वविभक्तिकस्तसिः प्रथमाभिप्रायेण परेण प्रयुक्तः, यद् भाष्यम—अनिमित्ता भावोत्पत्तिरिति।

अयं पुनरेकदेशो तत्पुरूषसमासात् हेतुपञ्चम्यभिप्रायेणार्थान्तरकल्पनायां वाचं विहन्तीति ।

[TTP, A.L. Thakur's Press Copy, Ch.IV p. 36.]

(*iv*) प्राञ्चस्तु— एकदेश्युत्तरपदमनिमित्तनिमित्तत्वान्ना-निमित्ततः। अनिमित्तत इति हेतुपञ्चम्या अनिमित्तस्य हेतुताप्रतिपादनात् व्याघात इत्यर्थः। ... एकदेशित्वे तु च्छलवादित्वं वीजम्, अकर्मनिमित्तः शरीरसर्ग इत्यस्यैव निरासेनायमपि पूर्वपक्षो निरस्त एवेति सूत्रकृता न पृथङ् निराकृत इत्यर्थः।

[NTĀ, Allahabad edn. pp. 382-383.].

(*v*) एकदेशी भ्रान्तो दूषयति—

॥ अनिमित्तनिमित्तत्वान्नानिमित्ततः ॥ [NSV, p. 960.]

(338) P. 225, ll. 3-5 : This view is also upheld by Vācaspati Miśra II :

अनिमित्तसाधकप्रमाणस्यानिमित्तप्रतीतौ निमित्तमस्ति न वा ? आद्ये अनिमित्ततो भावोत्पत्तिरिति न। कुतः ? अनिमित्ते अनिमित्तत्वप्रतीतौ प्रमाणस्य निमित्तत्वात्। तथा च प्रमाकरणमभ्युपगच्छतः कारणमात्रनिषेधो व्याहतः। अन्त्ये प्रमाणाभावात् क कारणनिषेध इत्यर्थः।

[NTĀ, Allahabad edn. p. 381.]

(339) P.225, ll. 5-8 : This view has also been mentioned by Viśvanātha :

नव्यास्तु सूत्रद्वयमेवं व्याचक्षते । समाधत्त— अनिमित्तति । अनिमित्तस्य अनिमित्तत्वसाधकस्य । निमित्तत्वात अनिमित्ता-नुमितिजनकत्वात् अनिमित्तत इति व्याहतम् । अनिमित्तत्वानुमिति-जनकानभ्युपगमेऽनिमित्तत्वं न सिध्येदिति, कण्टकतैक्ष्ण्यादिकमपि नानि-मित्तकम्, अदृष्टविशेषसहकृतैरणुभिस्तदुत्पादनादिति हृदयम् । ...

[NSV, p. 961.]

(340) P. 226, ll. 10-13 : See in this connection Textual Note no. 337 pasages (*iii*) and (*iv*).

(341) P. 227, l. 1 : (*a*) This *prakaraṇa* has been introduced by Udayana, Vācaspati Miśra II, Keśava Miśra Tarkācārya and Viśvanātha in the following manner :

(*i*) एवं तावत् समर्थितम् —

"न किञ्चिदेकमेकस्मात् सामग्र्या सर्वसम्भवः"

इति। इदानीं किं सामग्री नित्यानित्यसमुच्चयरूपा तद्विपरीता वेति विचारणा। तत्र केचिदाहुरनित्यसमुच्चय एवेति। अपर तु नित्यसमुच्चयरूप एवेति। मिश्रसमुच्चय इति वृद्धाः। अतः संशयः। तत्र प्रथमद्वितीयपक्षयोरभिमतः प्रेत्यभावो न सिध्येत्। ततस्तौ निराकरणीयौ। तत्र प्रथमं प्रत्याख्यातुमाह— अन्य त्विति।

[TTP, A.L. Thakur's Press Copy, Ch. IV, p. 37.]

(*ii*) अथौपोद्घातिकं सर्वानित्यतानिराकरणप्रकरणम्। सर्वानित्यत्वे हि नित्यात्मनिरूप्यः प्रेत्यभावो न सिध्येदिति तन्निर्वाहकत्वात्। पूर्वप्रकरणे हि कारणमात्रसमर्थनात् सामग्र्येऽपि समर्थितात् (?) तस्याश्चात्र मिश्रसमुच्चयरूपत्वं व्युत्पाद्यमित्यवान्तरहेतुहेतुमद्भावसङ्गतिरपि। प्रमेयत्वमनित्यत्वव्याप्यं न वेति संशयः।

[NTĀ, Allahabad edn. p. 383.]

(*iii*) अथौपोद्धातिकं सर्वानित्यतानिराकरणप्रकरणम्। सर्वानित्यत्वे हि नित्यात्मनिरूप्यः प्रेत्यभावो न सिध्येदिति तन्निर्वाहकत्वात्। प्रसङ्गो वा सङ्गतिः। प्रमेयत्वं नित्यत्वव्याप्यं न वेति संशयः।

[GSP, p. 77.]

(*iv*) सर्वस्यैवानित्यत्वे नात्मादेरपि नित्यत्वं स्यादतः सर्वानित्यत्वनिराकरणप्रकरणम्। तत्र प्रमेयत्वमनित्यत्वव्याप्यं न वेति संशये ... ...

[NSV, p. 932.]

(*b*) Rādhāmohana's introduction is a bit different :

सर्वस्यैवानित्यत्वे परमाण्वादेरपि तत्त्वादवयवानां धाराया अविच्छेदः स्यादित्यतः सर्वानित्यत्वं निराकतोति । तत्र सर्वमनित्यं न वेति संशयः । अनित्यत्वं सर्वत्वावच्छेदेन नित्यत्वं च सामानाधिकरण्येन कोटिरिति वोध्यम् । यद्वा— प्रमेयत्वमनित्यत्वव्याप्यं न वेति संशयः ।

[NSVV, p. 250.]

Thus, there are different opinions regarding the *saṅgati* and the exact form of *saṃśaya* pertaining to this *prakaraṇa*.

(342) P. 227, ll. 3-5 : (*a*) This is the interpretation of the word उत्पत्तिविनाशधर्मकत्वात offered by Udayana :

(*i*) ... सर्वमनित्यम । कुतः ? उत्पत्तिविनाशधर्मकत्वात् । उत्पत्तिधर्मकस्य विनाशधर्मकत्वादित्यर्थो ग्राह्यः । .....

[TTP, A.L. Thakur's Press Copy, Ch. IV, p. 38]

(*b*) Bhaṭṭa Vāgīśvara, Viśvaṇātha and Rādhāmohana have recorded some alternative interpretations of the word उत्पत्तिविनाशधर्मकत्वात्:

(*ii*) ... उत्पत्तिविनाशधर्मकत्वात पूर्वापरकालयोरभावात् मध्ये च भावात् ... [NTD, p. 117.]

(*iii*) यद् वा— उत्पत्तिविनाशधर्मकत्वात उत्पत्तिविनाशधर्मकाणां मानसिद्धत्वात्तद्भिन्नमप्रामाणिकमिति हृदयम् ।

परे तु— अनित्यत्वं कादाचित्कत्वम्, उत्पत्तिधर्मकत्वाद् विनाशधर्मकत्वादिति हेतुद्वये तात्पर्यमित्याहुः । [NSV, p. 963.]

(*iv*) ... ध्वंसे व्यभिचारवारणाय विनाशधर्मकत्वम्, प्रागभावे तद्वारणायोत्पत्तिमत्त्वमुक्तम् । अनित्यत्वं ध्वंसप्रागभावप्रतियोगित्वम् । यद् वा— उत्पत्तिविनाशसहचरितभावत्वादिमत्त्वमेव हेतुरिति पर्यवसितम् ।

[NSVV, p. 251.]

(343) P. 227, l. 15 : Rādhāmohana reads this *sūtra* as तदनित्यत्वमग्नेर्दाह्यविनाशानुविनाशवत्, and explains it as follows:

तस्या घटादेरनित्यताया अनित्यत्वं विनाशित्वं यथाग्नेर्दाह्यस्याश्रयस्येन्धनादेर्विनाशादन पश्चादग्ने-र्विनाशस्तथाश्रयस्य निखिलघटादेर्विनाशे घटत्वादिविनाश इति ।...... [NSVV, p. 251.]

(344) P. 229, l. 1 : Vācaspati Miśra II has shown the *saṅgati* of this *prakaraṇa* in the following manner:

सर्वनित्यत्वे हि न प्रेत्यभावस्तस्योत्पत्तिघटितत्वात्, न वा व्यक्ताद् व्यक्तानामित्यौपोद्घातिकं सर्वनित्यतानिराकरणप्रकरणम् । नित्यानित्यसमुच्चयरूपसामग्रीव्यवस्थापनरूपेण तात्पर्यकत्वाच्च पूर्वप्रकरणेनास्यैककार्यरूपा सङ्गतिः । [NTĀ, Allahabad edn. pp. 385-386.]

(344) P. 229, ll. 6-11 : (*a*) Rāmabhadra has adopted the interpretation of Vācaspati Miśra II, which runs as follows :

(*i*) सर्वं विवादपदं गोघटादि नित्य सकलकालस्थायि, भूतत्वात् परमाण्वाकाशवत् । पञ्चत्यादि व्याप्तिग्राहकसहचारदर्शनपरम् । पञ्चस्वपि भूतेपु भूतत्वं नित्यत्वसहचरितं यत इत्यर्थः ।

[NTĀ, Allahabad edn. p. 386.]

(*b*) Uddyotakara, Vācaspati Miśra I, Udayana and Bhaṭṭa Vāgīśvara have given a slightly different interpretation :

(*ii*) ... सर्वं नित्यं पञ्चभूतनित्यत्वात । भूतमात्रमिदं सर्वं तानि च नित्यानि भूतोच्छेदानुपपत्तेः सर्वं नित्यमिति । [NV, p. 966]

(*iii*) सर्वं नित्यम । कस्मात् ? पञ्चभूतनित्यत्वात । पञ्चभूतात्मकं खल्वेतद्गोघटादिकार्यमुपलभ्यते । व्यपदिशन्ति हि 'मृद्घटो मृच्छरीरमि'ति। भूतानि च नित्यानि, तेषामुच्छेदस्य नैयायिकैरनभ्युपगमात् । तेन भूतानां गोघटादीनां नित्यतेति पूर्वः पक्षः । [NVTT, p. 966.].

(*iv*) सर्वं नित्यं पञ्चभूतनित्यत्वात इति भेदे व्यधिकरणम् । अथ पञ्चैव भूतानि सर्वमिदमिति तदा तन्नित्यत्वे सिद्धे साध्यं नावशिष्यते । तदसिद्धावसिद्धो हेतुरित्यत आह— पञ्चभूतात्मकं खल्विति । एतदसिद्धमित्यत आह— उपलभ्यत इति । एतदपि कुत इत्यत आह— व्यपदिशन्ति होति । तेन प्रत्यक्षसिद्धं तादात्म्यमिह हेतुरिति नोक्तदोष इत्यर्थः । तथा च प्रयोगः — गोघटादयो नित्या पञ्चभूततादात्म्यात्, तत्स्वरूपवदिति ।

[TTP, A.L. Thakur's Press Copy, Ch. IV, p. 42.]

(*v*) पञ्चभूतात्मकं गोघटादिकार्यजातमखिलमुपलभ्यते, व्यपदिशन्ति हि'मृद्घटो मृच्छरीरमि'ति लौकिकाः । भूतानि च नित्यानि, तेषामुच्छेदस्य नैयायिकैरनभ्युपगमात् । तेन तदात्मकानां गोघटादीनामपि नित्यतेति सूत्रार्थः।

[NTD, p. 118.]

(*c*) Keśava Miśra Tarkācārya, Viśvanātha Nyāyapañcānana and Rādhāmohana Gosvāmi Bhaṭṭācārya have followed Vācaspati Miśra II.

[See GSP, p. 78; NSV, p. 966-967; NSVV, p. 252.]

(345) P. 230, l. 9 : The sentence नोत्पत्तितत्कारणोपलब्धेः has been treated as a *sūtra* by Uddyotakara, Vācaspati Miśra I, Viśvanātha Nyāyapañcānana and Rādhāmohana Gosvāmi Bhaṭṭācārya. [See NV, p. 968 ; NVTT, p. 968 ; NSV, p. 968; NSVV, p. 254.] Udayana's verdict about this *sūtra* is not available, because he has not commented on the relevant portion of NVTT. Bhaṭṭa Vāgīśvara has accepted the reading नोत्पत्तिकारणोपलब्धेः, and explained it as follows :

(*i*) परिहरति—

॥ नोत्पत्तिकारणोपलब्धेः ॥

कारणसमानगुणस्य कार्यस्योपलब्धिरूत्पत्तिः । उत्पत्तिश्च तत् कारणश्चोत्पत्तिकारणे तयोरूपलब्धरूत्पत्तिकारणोपलब्धः । यस्मात् कारणेन समानगुणस्य कार्यस्योत्पद्यमानस्य तत्कारणस्य चोपलब्धिरस्ति प्रामाणिकी।

किं तस्मात् ? तयोरूपलब्ध्य: भूतादन्यस्य भौतिकस्य भूतानुमापकस्य विद्यमानत्वेन तल्लक्षणावरोधस्यान्यथाप्युपपत्त्या भूतात्मकत्वस्यासिद्धेः कर्मादिष्वव्यापनाच्च हेतोर्न सर्वनित्यत्वं सिध्यतीति सूत्रार्थः ।

[NTD, p. 118.]

Vācaspati Miśra II has read this *sūtra* as नोत्पत्तिविनाशकारणोपलब्धेः, but his explanation does not contain the word 'विनाश' as a *pratīka,* even though he adds the word आदि to the word उत्पत्ति :

(*ii*) एतल्लक्षणवतामेव गोघटादीनामुत्पत्त्याद्युपलब्धेः नित्यत्वसाधनं वाधितमित्यर्थः । उत्पत्त्याद्यर्थं प्रवृत्तिविरोधश्चेति भावः ।

[NTĀ, Allahabad edition, pp. 386-387.]

The reading adopted by Keśava Miśra Tarkācārya and his explanation of it are identical to those of Vācaspati Miśra II. [GSP, p. 78.]

It is not known for certain as to why Rāmabhadra has not accepted this sentence as a *sūtra.* As matters stand, it is somewhat surprising.

(346) P. 230, l. 13 : Bhaṭṭa Vāgīśvara has not counted this as a *sūtra.* Uddyotakara records this *sūtra* in the following manner :

(*i*) न व्यवस्थानुपपत्तेः । शेषं भाष्ये । ... ... [NV, p. 971.]

The remark शेषं भाष्य cleared indicates that for Uddyotakara, the sentence न व्यवस्थानुपपत्तः is a *sūtra.* This is also supported by Vācaspati Miśra I. [NVTT, p. 971.] Udayana's remarks in this context suggests that he also accepts this sentence as a *sūtra* :

(*ii*) ननु व्यवस्थानुपपत्तिं भेदमुपादाय परिहरिष्यत इत्यत आह—एतदुक्तं भवतीति ।

[TTP, A.L. Thakur's Press Copy, Ch. iv p. 47.]

The sentence न व्यवस्थानुपपत्तेः has been admitted as a genuine *sūtra* also by Vācaspati Miśra II, Keśava Miśra Tarkācārya, and Viśvanātha Nyāyapañcānana. [NTĀ, Allahabad edn. 387 ; GSP, p. 79 ; NSV, p. 971.] Rādhāmohana Gosvāmi Bhaṭṭāchārya reads this *sūtra* as व्यवस्थानुपपत्तेः, and the editor of NSVV has noted this. [NSVV. p. 254, fn. 2.]

(347) P. 230, ll. 16-19 : This has been borrowed from *Nyāyavārttikatātparyaṭīkā* of Vācaspati Miśra I, the relevant passage being as follows :

(*i*) तदेवं सांख्यानां मतमपास्य स्वायंभुवाना मतमपाकर्तुमुपन्यस्यति— अपर सव नित्यमित्यन्यथा वर्णयन्ति। त्रिविधः खल्वयं धर्मिणः परिणामा धर्मलक्षणावस्थारूपः । ... धर्मलक्षणावस्थाश्च धर्मिणो भिन्नाश्चाभिन्नाश्च । तथा च ते धर्म्यभेदान्नित्याः भेदाच्चोत्पत्तिविनाशविषयत्वमित्युभयमुपपन्नम् । ... ... [NVTT, pp. 970-971.]

Udayana has drawn the distinction between the two views mentioned above in the following manner :

सांख्यमतादेकान्ततस्तादात्म्यात् स्वायम्भुवमतमनेकान्तभेदमिति विशेषः। तदेव स्फुटयति—धर्मलक्षणावस्थाश्चति । ... ...

[TTP, A.L. Thakur's Press Copy, Ch. IV, p. 46]

Vācaspati Miśra II and Keśava Miśra Tarkācārya have also referred to the *Svāyambhuva* doctrine. [See NTĀ, Allahabad edn. p. 387 ; GSP, p. 79.] Here, the word *svāyambhuva* stands for the *Pātañjala* school, as is evident from *Yoga-sūtra* III.13 and *Vyāsa-bhāṣya* thereon:

॥ एतेन भूतेन्द्रिययेषु धर्मलक्षणावस्थापरिणामा व्याख्याताः ॥

एतेन पूर्वोक्तेन चित्तपरिणामेन धर्मलक्षणावस्थारूपेण भूतेन्द्रियेष धर्मपरिणामा लक्षणपरिणामोऽवस्थापरिणामश्चोक्तो वेदितव्यः । तत्र व्युत्थान-

निरोधयोर्धर्मयोरभिभवप्रादुर्भावौ धर्मिणि धर्मपरिणामः, लक्षणपरिणामश्च निरोधस्त्रिलक्षणस्त्रिभिरध्वभिर्युक्तः, स खल्वनागतलक्षणमध्वानं प्रथमं हित्वा धर्मत्वमनतिक्रान्तो वर्तमानं लक्षणं प्रतिपन्नो यत्रास्य स्वरूपेणाभिव्यक्तिः, एषोऽस्य द्वितीयोऽध्वा, न चातीतानागताभ्यां लक्षणाभ्यां वियुक्तः, तथा व्युत्थानं त्रिलक्षणं त्रिभिरध्वभिर्युक्तं वर्तमानं लक्षणं हित्वा धर्मत्वमनतिक्रान्तमतीतलक्षणं प्रतिपन्नम् एषोऽस्य तृतीयोऽध्वा, न चानागतवर्तमानाभ्यां लक्षणाभ्यां वियुक्तम् ... ... तथाऽवस्थापरिणामः, तत्र निरोधक्षणेषु निरोधसंस्कारा वलवन्तो भवन्ति दुर्वला व्युत्थानसंस्कारा इति । एष धर्माणामवस्थापरिणामः, तत्र धर्मिणो धर्मैः परिणामो धर्माणां लक्षणैः परिणामो लक्षणानामप्यवस्थाभिः परिणाम इति । एवं धर्मलक्षणावस्थापरिणामैः शून्यं न क्षणमपि गुणवृत्तमवतिष्ठते ... ...

[*Yoga-sūtra* with *Vyāsa-bhāṣya* etc., Chowkhamba edn. pp. 293-297]

(348) P. 232, l. 1 : (*a*) Udayana has introduced this *prakaraṇa* in the following manner :

(*i*) एवं तावद् गुणगुणिभावाभावचेतनाचेतनदृष्टादृष्टनित्यानित्यसमुच्चयः सामग्रीति समर्थितम् । इदानीं समुच्चयविरूद्धोऽर्थो निराकर्तव्यः। स चैकत्वनिराकरणवादः शून्यतावादः संख्यैकान्तवादश्चेति त्रिधा । एकाभावे हि कस्य कः समुच्चयः ? सर्वाभावेऽपि निरूपाख्ये जगति कः समुच्चयः ? तथा अद्वैतादावपीति । तत्र प्रथममुत्थापयति— सर्वं पृथगिति ।

[TTP, A.L. Thakur's Press Copy, Ch. IV, p. 47.]

(*b*) Vācaspati Miśra II has indicated the *saṅgati* of this *prakaraṇa* as follows :

(*ii*) सर्वपृथक्त्वे हि तत एव परमाणोः स एव पृथक्, तदेव कार्यं ततः पृथगिति कव 'व्यक्ताद् व्यक्तानामि'ति स्यादित्यौपोद्घातिकं सर्वपृथक्त्वनिराकरणप्रकरणम् ।

यद् वा— एकाभावे प्रेत्यभावपदस्यैवासङ्गतिः, क्त्वार्थस्यैककर्तृकत्वस्याभावात् पूर्वप्रकरणसाधितमपि सामग्र्याः नित्यानित्यसमुच्चयरूपत्वमपि न । न ह्येकाभावे समुच्चय इत्यवान्तरोप्युपोद्घातः । ...एतत्पटभेद एतत्पटवृत्तिर्न वेति संशयः । ... ...

[NTĀ, Allahabad edn. p. 387.]

This has been repeated almost verbatitm by Keśava Miśra Tarkācārya. [GSP, p.79]

(*c*) Rāmabhadra has not indicated the source of *sarvapṛthaktvavāda*. Vācaspati Miśra I, Udayana, Vācaspati Miśra II and Keśava Miśra Tarkācārya have acribed it to the *Sautrāntika* and *Vaibhāṣika* schools of Buddhism. [NVTT, p. 972 ; TTP, A.L. Thakur's Press Copy, Ch. IV, p. 49 ; NTĀ, Allahabad edn. p. 387 ; GSP, p. 79.]

(349A) P. 232, ll. 3-7 : (*a*) The interpretation given by Rāmabhadra differs substantially from that given by Uddyotakara, Vācaspati Miśra I, and Udayana, who have explained this *sūtra* as follows :

(*i*) सर्वं पृथग्भावलक्षणपृथक्त्वात् । भावस्य लक्षण शब्दः लक्ष्यतेऽनेन भाव इति । सर्वो भावसमाख्याशब्दोऽनेकविषयः यथा कुम्भ इति भावशब्दोऽनेकस्मिन्नवयवसमूहे वर्तत इति । यथा कुम्भशब्दः एवमन्येऽपि शब्दा इति । अस्य प्रयोगः —कुम्भशब्दोऽनेकविषयः, एकपदत्वात्, सेनाशब्दवदिति । पदश्रवणादनेकार्थावगतेः —यस्मात् पदश्रुतेरनेकोऽर्थोऽवगम्यते यथा सेनेति ॥ [NV, pp. 972-973.]

(*ii*) सर्वं पृथक्, कस्मात् ? भावलक्षणपृथक्त्वात । न रूपाद्यतिरिक्तं द्रव्यं नाम किञ्चिदस्ति, नाप्यवयवातिरिक्तः कश्चिदस्त्यवयवीति सौत्रान्तिका वैभाषिकाश्च प्रतिपेदिरे । वार्त्तिकम् —अस्य प्रयोग इति । कुम्भशब्दोऽनेकविषय इति पारमार्थिकानेकविषयः, काल्पनिकं तु कुम्भस्यैकत्वं न वार्यत । तथा चैकपदमित्येकपदे न व्यभिचारः, तस्यापि पारमार्थिकानेकविषयत्वात । [NVTT, pp. 972-973.]

(*iii*) सौत्रान्तिका वैभाषिकाश्चेति व्याप्तिसिद्धये । तेन तन्मतमाश्रित्य घटादिशब्दा एवोदाहृताः । अस्मन्मते तु सेनादिशब्दानुदाहरिष्यति वार्त्तिककार इत्यर्थः । [TTP, A.L. Thakur's Press Copy, Ch. IV, p. 49]

Vācaspati Miśra II, Keśava Miśra Tarkācārya and Viśvanātha Nyāyapañcānana have accepted this line of interpretation. [NTĀ, Allahabad edn. p. 388 ; GSP, p. 79 ; NSV, p. 973.] However, they have also noted an alternative interpretation, which is very similar to that offered by Rāmabhadra. Rādhāmohana Gosvāmi Bhaṭṭācārya has accepted the alternative interpretation as the better one, and he has also criticized the traditional interpretation :

प्रसङ्गात् सर्वपृथक्तमतनिराकरणायाह—

॥ सर्वं पृथग् भावलक्षणपृथक्त्वात् ॥

सर्वमवयवि घटादिकं पृथक । स्वस्मादपीत्यादि । भावलक्षणाना भावानां रूपरसादिधर्माणां लक्षणानां च तत्तदवयव्यादीनां पृथक्त्वात । तथा च रूपरसादीनां विभिन्नेन्द्रियग्राह्यतालक्षणविभिन्नस्वभावत्वेन विरूद्धतयाऽश्रयभेदकत्वादवयवानां च मिथो भिन्नत्वात् घटादीनां तत्तदवयवाभिन्नत्वाच्चेति भावः ।

केचित्तु— सव वस्तु पृथक् नानेत्यर्थः । लक्ष्यतऽनेनेति लक्षण समाख्या, तस्याः पृथक्त्व पृथगर्थकत्वम् । तथा चायं प्रयोगः—घटादिः समूहरूपः वाच्यत्वात् सेनावद् वनवच्चेति । अतीन्द्रिये गगनादौ मानाभावादात्मनः शरीरानतिरेकात् गुणकर्मणोराश्रयाभेदात् विशेषसमवाययोर्मानाभावादभावस्य तुच्छत्वान्न व्यभिचार इति व्याचक्रुः । तच्चिन्त्यम् । परमाणौ व्यभिचारादिति । . [NSVV, pp. 254-255.]

(349B) P. 232, l. 14 : The Metropolitan edition of *Nyāya-Bhāsya, Nyāya-Vārttika, Nyāyavārttikatātparyaṭīkā* and *Nyāyasūtravṛtti* read this *sūtra as* लक्षणव्यवस्थानादेवाप्रतिषेधः ।

Neverthless, it notes the reading तल्लक्षणव्यवस्थानादेवाप्रतिषेधः as a variant in *Nyāya-Vārttika* (Metropolitan edn. of NV, p. 974-975.). *Nyāyasūtravivaraṇa* also supports the reading लक्षणव्यवस्थानादेवाप्रतिषेधः(NSVV, p. 255.) *Nyāyatātparyadīpikā, Nyāyatattvāloka* and *Gautamīyasūtraprakāśa,* however, support the reading तल्लक्षणव्यवस्थानादेवाप्रतिषेधः (NTD, p. 119; NTĀ, Allahabad edn. p. 388 ; GSP, p. 79.). Udayana's verdict on the reading of this *sūtra* is not known.

(350) P. 234, ll. 17-18 : Here, the following passages of *Nyāya-Vārttika* and *Nyāyavārttikatātparyaṭīkā* are worth noting :

(*i*) न स्वभावसिद्धिरापेक्षिकी, यतः न स्वेनात्मना किञ्चित् सिद्धमिति। यथा दीर्घत्वह्रस्वत्वे परापरे चेति । ... ...

[NV, p. 983.]

(*ii*) सर्व एव हि भावाः भिन्नस्वभावाः, भिन्नत्वं च तेषामन्यापेक्षत्वम् तथा हि नीलं भिन्नं पीतापेक्षया, न तु स्वभावतः ... ...यच्च परापेक्षं तन्न स्वाभाविकं यथा जपाकुसुमापेक्षं स्फटिकस्य रक्तत्वमित्याक्षेपार्थः ।

[NVTT, p. 983.]

(351) P. 235, l. 3 : (*a*) Here, the following passage from *Nyāyavārttikatātparyaṭīkā* is worth noting :

(*i*) भिन्नत्वं च भेदः, स च वस्तुविशेषणं नोत्पत्तौ वस्त्वन्तरमपेक्षते किन्तु स्वनिरूपणे ।... ...परत्वापरत्वादयस्त्वपेक्षाबुद्धिनिमित्ततया परापेक्षोत्पत्तिका अपि लोकयात्रां वहन्ती न शक्याः प्रत्याख्यातुम् । न चैतावता तदधिकरणं भावो न निरपेक्ष इति सर्वमवदातम् । [NVTT, p. 984]

(*b*) Udayana's comments on this passage are as follows :

...परापेक्षः परस्परापेक्ष इत्यर्थः । विशेषण व्यवच्छेदको धर्मो भावाभावरूप इत्यर्थः । वस्त्वन्तर प्रतियोगिनमित्यर्थः । भिन्नत्वेन निरूपित इति शेषः । कथं तर्हि अपेक्षतेऽत आह स्वनिरूपण इति । अत्रापि निरूपितमिति शेषः । ननु यद्यपि न किञ्चित् परस्परापेक्षोत्पादं तथापि

परत्वापरत्वादयो बुद्ध्यपेक्षाः सन्तो न यां काञ्चिद्बुद्धिविशेषमपेक्ष्योत्पद्यते, किं तु बुद्धिविशेषम् । तथा च बुद्धिविशेषादेव व्यवहारविशेषो निर्वस्तुक एवास्तु, कृतं परत्वादिना । तद्वदेव च घटादिव्यवहारा अपि स्युरित्यत आह परत्वापरत्वादयस्त्विति । यथा चेदं निर्वहति तथा वैशेषिकऽध्यवसेयम् । न च दृष्टान्तमात्रलाभेन सर्वमपेक्षाबुद्धिप्रभवम्, गोघटादेस्तदनपेक्षस्यैव उत्पाददर्शनादित्याह न चैतावतति । निरपक्षोऽपेक्षाबुद्धिनिरपेक्ष इत्यर्थः । दीर्घत्वादयो भविष्यन्ति व्यवहर्तव्यतामात्रशरीरा इति शेषः । [TTP, A.L. Thakur's Prcss, copy, ch. IV, p. 62.]

(352) P. 238, ll. 1-2 : Vācaspati Miśra II and Keśava Miśra Tarkācārya have indicated the *saṅgati* and *saṃśaya* pertaining to this *prakaraṇa* in the following manner :

(*i*) अथाद्वैते सति न व्यक्ताद् व्यक्तोत्पत्तिर्न वा प्रायणजन्मनी, उभयादिमात्रेऽपि जगतो नापेक्षिता द्व्यणुकादिक्रमेणोत्पत्तिर्न वा तद्धेतुरनियततत्कार्यसमुच्चयरूपा सामग्री निर्वहति । द्वयादिनियमे समुच्चयाविरोधेऽपि क्वचित् पञ्चभिः क्वचिदधिकैरपि समुच्चये विरोध एवेत्यौपोद्घातिकं संख्यैकान्तनिराकरणप्रकरणम् । शून्यत्वे ह्यनिरस्ते नाद्वैताद्यवतार इति तेन समं हेतुहेतुमद्भावो वाऽवान्तरसङ्गतिः ।

संख्या एकान्ता येषु वादेषु ते संख्यैकान्तवादाः । प्रमेयस्य वास्तवं द्वित्वं त्रित्वं चतुष्ट्वं पञ्चत्वं षट्त्वं न, किन्तु एकैकत्वादिकमेवेत्येवंभूता वादा इति यावत् । संख्यात्वं पञ्चत्वव्यभिचारि न वेति संशयः । पञ्चत्वव्यभिचारित्वं पञ्चत्वात्यन्ताभाववद्भावित्वम् ... ... न वा पक्षेऽपि भेदज्ञानं प्रमा न वा, संख्यात्वं द्वित्वव्यभिचारिवृत्ति न वेत्येवमादिकं पञ्चधा संशयः । ... [NTĀ, Allahabad edn. p. 391.]

(*ii*) अथाद्वैते सति न व्यक्ताद् व्यक्तोत्पत्तिर्न वा प्रायणजन्मनी इत्यौपोद्धतिकं संख्यैकान्तनिराकरणप्रकरणम् । शून्यत्वे ह्यनिरस्ते

नाद्वैताद्यवतार इति तेन समं हेतुहेतुमद्भावो वाऽवान्तरसङ्गतिः । ... ... संख्यात्वं पञ्चत्वव्यभिचारि न वेति संशयः। ... ... [GSP, pp. 80-81.]

Here, Keśava Miśra Tarkācārya has, as usual, followed Vācaspati Miśra II.

(353) P. 238, l. 9 : Vācaspati Miśra I has noted two other views :

(*i*) प्रकृतिपुरुषाविति वा ...... पशुपाशतदुच्छेदेश्वरा इति वेत्यादयः [NVTT, p. 987.]

These views of Sāṅkhya and Pāśupata systems have been noted also by Vācaspati Miśra II and Keśava Miśra Tarkācārya.

[See NTĀ, Allahabad edn. p. 391 ; GSP, p. 80.]

(354) P. 240, l. 1 : (*a*) Udayana has introduced this *prakaraṇa* with the following remarks :

यावदत्र विचारितं तावदप्रकृतमपि प्रकृतं प्रेत्यभावमुपकरोतीति उपोद्घातेन तत् सङ्गतम् । फलं च लक्षणक्रमानुसारेणानन्तरप्रकरणार्थ इत्यर्थः । अत्र च यद्यपि फलं सामान्यमादाय तत् कालान्तरभावि वा स्यात्, मद्योभावि वेति सन्देहो नोपपद्यते, लोकपत्त्यादीनां फलत्वेऽनन्तरभावित्वस्य उभयवादिसिद्धत्वात्, एवं सद्योभाविलोकपत्त्याद्यस्य फलं कालान्तरभावि स्वर्गादि वेत्येषोऽपि संशयोऽनुपपन्नो धर्मिभेदात्, तथापि कियैव यागादिका संशयविषयः । कियात्वं च संशयकारणम् । चेतनप्रवृत्तिर्हि काचित् सद्यःफला भवति, यथा पचनदोहनादिः । काचित्तु कालान्तरभाविफला भवति, यथा कर्षणसेचनादिः । अतः प्रकृते साधकवाधकप्रमाणाभावे सति सन्देहः । न च पत्त्याद्यनन्तरोपलम्भ एव सद्यः फलत्वसाधक इतरस्य वाधक इति साम्प्रतम्, स्वर्गफलत्वश्रुत्या तस्य प्रतिहतत्वात् । तर्हि कालान्तरभाविफलत्वे क्रियायाः साधिका सद्यःफलत्ववाधिकाऽस्तिति चेत् न, स्वर्गस्य कर्तृविशेषण-

तयोपात्तस्याप्रधानतया आपाततः माध्यत्वानवधारणात्... ।

[TTP, A.L.Thakur's Press Copy, Ch. IV, p. 66.]

(*b*) The remarks of Vācaspati Miśra II are as follows:

तदेवमियता प्रवन्धेन प्रेत्यभावे परीक्षिते सम्प्रत्युद्देशक्रमेणावसरसङ्गत्या फलपरीक्षाप्रकरणम् । तत्र ... ... अग्निहोत्रादिफलं सद्योभावि कालान्तरभावि वेति संशयः । ... ... प्रयोजनं तु संसारापवर्गव्यवस्था । सद्यःफलत्वे जन्मान्तरानुवन्धाभावान्न संसारः, तदभावाच्च नापवर्गः । स्वर्गफलत्वे ह्यदृष्टतत्स्थितितत्परिपाकादिकल्पनागौरवम् ।

[NTĀ, Allahabad edn. p. 398.]

(355) P. 240, l. 10 : (*a*) This sentence has not been counted as a *sūtra* in the Metropolitan edition of *Nyāya-Bhāṣya* etc. on the ground thet it does not figure as a *sūtra* in the *Nyāyasucīnibandha* of Vācaspati Miśra I, and that it has not also been admitted as a *sūtra* in *Nyāyavārttikatātparyatīkā* (NB,p. 994.). The situation is curious, because while this sentence does not occur as a *sūtra* in *Nyāyasūcīnibandha* edited by Laxmana Sastri Dravid, it does so in *Nyāyasucīnibandha* edited by Ganganath Jha.

(*b*) According to Udayana, this sentence is a *sūtra,*as is evident from the following passage of *Tātparya-ṭikapariśuddhi*:

तत्सम्वन्धात् फलनिष्पत्तेस्तेषु फलवदुपचारः

इत्यत्र सूत्रे भाष्यविप्रतिपत्तिं निवारयन्नाह

प्राग् निष्पत्तेर्वृक्षफलवत् तत्स्यात्

इत्यत्र, तत एव

कालान्तरेणानिष्पत्तिर्हेतुविनाशात्

इत्यत्र, ततः

न सद्यः कालान्तरोपभोग्यत्वात्

इत्यत्र, ततः

सद्यः कालान्तरे च फलनिष्पत्तेः सःशयः

इत्यत्र सूत्रत्वं दर्शितम् ।

[TTP, A.L. Thakur's Press Copy, Ch. IV, p. 76.]

(*c*) This sentence has also been counted as a *sūtra* in *Nyāyatātparyadīpikā* of Bhaṭṭa Vāgīśvara, *Nyāyatattvāloka* of Vācaspati Miśra II, *Gauyamīyasūtraprakāśa* of Keśava Miśra Tarkācārya, *Nyāyasūtravṛtti* of Visvanātha Nyāyapañcānana and *Nyāyasūtravivarana* of Rādhāmohana Gosvami Bhaṭṭācarya. [See NTD; p. 122 ; NTĀ, Allahabad edn. p. 398 ; GSP, p. 81 ; NSV, p. 994 ; NSVV, p. 260.] The editor of NSVV has remarked that the word फल° is missing in some commentaries. [NSVV,p. 260, fn. 2.] We have not come across any such instance.

(356) P. 240, l. 18 : There is some dispute about the reading of this *sūtra*. The Metropolitan edition of *Nyāya-Bhāṣya* etc., *Tātparyaṭīkāpariśuddhi*, *Nyāyatātparya-dīpikā*. *Nyāyatattvāloka*, *Gautamīyasūtraprakāśa* and *Nyāyasūtravṛtti* read this *sūtra* as कालान्तरेणानिष्पत्तिर्हेतुविनाशात्, while *Nyāyāsūtravivaraṇa* reads it as कालान्तरेणानिष्पत्तिर्हेतुनाशात् [NB,p. 995 ; TTP passage quoted in TN.No. 355 ; NTD, p. 122, NTĀ, Allahabad edn. p. 399 ; GSP, p.`82 ; NSV, p. 996; NSVV, p. 261.]

(357) P. 241, ll. 14-17 : Here, Rāmabhadra has rejected the view of some Naiyāyikas who identified उभयत्व with एकविशिष्टापरत्व. This is a topic which has generated much dispute among the adherents of Navya-Nyāya, as is evident from the following passages from *Tattvacintāmaṇidīdhiti* of Raghunatha Śiromaṇi and the commentaries of Jagadīśa Tarkālaṃkāra and Gadādhara Bhattācārya thereon ; where the significance of the form प्रतियोग्यसमानाधिकरण inserted in the definition of व्याप्ति has been explained :

(*c*) प्रतियोग्यसामानाधिकरण्यञ्च प्रतियोगितावच्छेदकावच्छिन्ना-

सामानाधिकरण्यम्, तेन अयं गुणकर्मान्यत्वविशिष्टसत्तावान् जातेः, भूतत्व-मूर्त्तत्वोभयवान् मूर्त्तत्वादित्यादौ नातिव्याप्तिः । न चोभयत्वमेक-विशिष्टापरत्वम्, विशिष्टश्च केवलादन्यदिति तदभावो मनसि सहजत एव प्रतियोगिव्यधिकरण इति वाच्यम् । उभयत्वं हि न विशिष्टादनतिरिक्तं न वा तदवच्छिन्नाभावस्तदवच्छिन्नाभावात्, वैशिष्ट्यविरहेऽपि घटत्वपटत्व-योरुभयत्वस्योभयत्वेन तदभावस्य च प्रत्यक्षसिद्धत्वात् । न च तत्र व्याप्तिरेवोभयत्वाधिकरणस्य मूर्त्तत्वस्य मनसि सत्त्वादिति वाच्यम् । तथात्वेऽप्युभयत्वेन रूपेण तत्रासत्त्वात्, 'नात्रोभयम्' इति प्रतीतेर्दुर्वारत्वात् ।
[TCD, pp. 221-223.]

(*ii*) एकधर्मावच्छिन्नप्रतियोगितायाः प्रतियोगिव्यक्तीनां भेदेऽप्यैक्य-मिति नव्यमते वह्न्यादिसामान्याभावमादायाव्याप्त्यसम्भवादतिव्याप्ति-वारणमेव प्रयोजनमाह— तेनेति । ... विशिष्टस्यातिरिक्तत्वमते तत्राति-व्याप्त्यसम्भवादाह भतत्वेति । ... सार्वभौममतमाशङ्कते न चेति । वाच्यमित्य-न्वयः । तदभावः भूतत्वमूर्त्तत्वोभयाभावः। सहजत एवेति प्रतियोगिता-वच्छेदकावच्छिन्नत्वाप्रवेशेऽपीत्यर्थः । ननूभयत्वस्य विशिष्टत्वातिरिक्तत्वेऽपि सहजतः प्रतियोगिव्यधिकरणस्य विशिष्टत्वावच्छिन्नाभावस्य प्रतियोगिता-वच्छेदकमेवोभयत्वमतो नातिव्याप्तिः, विशिष्टत्वावच्छिन्नाभावस्योभया-भावानतिरेकादत आह न वेति । तदवच्छिन्नाभावः उभयत्वावच्छिन्नाभावः । तदवच्छिन्नाभावात वैशिष्ट्यावच्छिन्नाभावात् । लिङ्गव्यत्ययेन नातिरिक्त इत्यनुषज्यते, तथा चातिरिक्त एवेति भावः । न चान्यत्रोभयाभावस्य विशिष्टाभावातिरिक्तत्वेऽपि प्रकृते भूतत्वविशिष्टमूर्त्तत्वाभावस्यैव तदुभय-त्वावच्छिन्नप्रतियोगिताकत्वं, समनियताभावयोर्लाघवेनैकत्वादिति वाच्यम । तावतापि हेतुमतो यादृशप्रतियोगिताश्रयानधिकरणत्वं तादृशप्रति-योगितानवच्छेदकत्वस्य भूतत्वमूर्त्तत्वोभयत्वेऽनपायादतिव्याप्तितादवस्थ्या-दिति भावः । उभयत्वस्येति । प्रत्यक्षसिद्धत्वादिति परेणान्वयः। तथा च

विरुद्धयोरप्युभयत्वमतिरिक्तमेव, उभयत्रैवोभयत्वप्रतीत्योः समानाकारत्वात्, भूतत्वमूर्त्तत्वयोर्विरुद्धत्वभ्रमदशायामप्युभयत्वप्रत्ययाच्चेति भावः। ... [TCDJ, pp. 221-223]

(iii) यद्यपि जात्यादौ गुणकर्मान्यत्वादिसामानाधिकरण्योपलक्षितस्य सत्त्वादेर्व्याप्तिरस्त्येव, गुणादौ तदुपलक्षितसत्त्वाद्यनुमितेः प्रमात्वात्, तथापि गुणादौ विशिष्टसत्तादिप्रतियोगिकवैशिष्ट्यावगाह्यनुमितेर्भ्रमत्वात् तत्र तादृशानुमित्यौपयिकव्याप्तिस्वीकारे सल्लिङ्गकपरामर्शादपि भ्रमः स्यादिति तादृशानुमित्यौपयिकव्याप्तिर्गुणादिवृत्तिहेतौ न स्वीकर्त्तुं शक्यते, अतः साध्यतावच्छेदकविशिष्टवैशिष्ट्यविषयकानुमित्यौपयिकव्याप्तिशरीरे प्रतियोगितावच्छेदकविशिष्टवैयधिकरण्यपर्यन्तं निवेश्य तत्र तादृशातिव्याप्तिं वारयति— प्रतियोग्यसामानाधिकरण्यश्चेति। न च तत्रापि व्याप्तिस्वीकारे क्षतिविरहो गुणे गुणान्यत्वविशिष्टसत्तावानित्यादौ तादृशव्याप्तिसत्त्वेऽपि वाधेनैव हेतोर्दुष्टत्वोपपत्तेर्द्रव्यपक्षकतादृशसाध्यकजात्यादिहेतोश्च समीचीनताया एवोपगमे क्षतिरिहात्, वाधानवतारदशायाञ्च गुणादौ जात्यादिलिङ्गकविशिष्टवैशिष्ट्यानुमितिर्भ्रमरूपा प्रमात्मकसल्लिङ्गकपरामर्शादपि स्वीक्रियतेऽत एव गन्धप्रागभावावच्छिन्नो घटो गन्धवान् पृथिवीत्वादित्यादौ वाधानवतारदशायां प्रमात्मकपरामर्शाद्विशिष्टानुयोगिकवैशिष्ट्यावगाहिनी भ्रमानुमितिर्मणिकारेणोपगम्यते इति वाच्यम्। भ्रमानुमितिजनकपरामर्शस्य भ्रमत्वसम्भवे तदुपादानमावश्यकमित्याशयाद् 'गन्धप्रागभावावच्छिन्नो घटो गन्धवान् पृथिवीत्वादि' त्यादौ परामर्शस्य कथञ्चिदपि भ्रमत्वासम्भवेनागत्या तत्र प्रमात्मकमरामर्शाद् भ्रमानुमितिस्वीकारात्, 'गुणो विशिष्टसत्तावान् जातिमत्त्वादि'ति विशिष्टप्रतियोगिकवैशिष्ट्यविषयकानुमितिस्थलमुपेक्ष्य 'गन्धप्रागभाववान् घटो गन्धवानि'त्यादिविशिष्टानुयोगिकवैशिष्ट्यविषयकानुमितिस्थलम् असिद्धिव्यभिचारासङ्कीर्णवाधोदाहरणत्वेनाभिहितवतो मणिकृताऽप्युक्तस्थलेऽव्याप्तिर्नास्तीत्याशय उन्नीयते। ... ...

...विशिष्टस्यातिरिक्ततामते विशिष्टसत्ताभावः सहजत एव प्रतियोग्यसमानाधिकरण इत्युभयसाध्यकानुसरणम् । नातिप्रसङ्ग इति । हेतुमति विशिष्टाभावादेः शुद्धप्रतियोगिसामानाधिकरण्येऽपि विशिष्टप्रतियोगिसामानाधिकरण्यविरहेण न भ्रमानुमितिजनकपरामर्शस्य प्रमात्वप्रसङ्ग इत्यर्थः । व्याप्यवृत्तिसाध्यकेऽपि प्रतियोगिवैयधिकरण्यावगाहिपरामर्शस्यानुमितिहेतुतयोक्तसाध्यस्य व्याप्यवृत्तित्वेऽपि नातिप्रसङ्गाप्रसक्तिः ।

ननु मूर्त्तत्वादिहेतौ भूतत्वादिविशिष्टमूर्त्तत्वत्वादिरूपतदुभयत्वावच्छिन्नस्यैव व्याप्तिर्न तु तदुभयवृत्तिवुद्धिविशेषविषयत्वरूपतदुभयत्वावच्छिन्नस्य, तथा च विशिष्टसत्तातिरिक्ततामते विशिष्टसत्तादिसाध्यकजात्यादिहेताविवोक्तभयसाध्यकमूर्त्तत्वादिहेतावपि यथाश्रुतप्रतियोग्यसामानाधिकरण्यनिवेशपक्षे नातिव्याप्तिप्रसक्तिरित्यभिमानं न च इत्यादिना निराकरोति न चति । सहजत एव प्रतियोगिपदस्य तत्त्वावच्छेदकविशिष्टपरतां विनैव । उभयत्वम उभयव्यवहारविषयतावच्छेदकम्, न विशिष्टत्वात एकाविशिष्टापरत्वात् अनतिरिक्तम अभिन्नम् । अतिरिक्तमित्यनुक्त्वा नानतिरिक्तमित्यभिधानम् उभयपदार्थतावच्छेदकत्वावच्छेदकत्वावच्छेदेनातिरिक्तत्वलाभाय, नञ्पदस्यानुयोगितावच्छेदकावच्छेदेनाभाववोधकत्वव्युत्पत्तेः, तावतैकविशिष्टापरत्वमुभयनिष्ठव्यासज्यवृत्तिधर्मश्चोभयपदार्थतावच्छेदकमस्तु न तन्मात्रं वक्ष्यमाणानुपपत्तेः, प्रकृते च उभयत्वमेकविशिष्टापरत्वमेवति शङ्काव्युदासः । अत्र हेतुः वैशिष्टविरहेऽपि घटत्वपटत्वयोरुभयत्वस्य प्रत्यक्षसिद्धत्वादिति । घटत्वपटत्वयोः सामानाधिकरण्यविरहेऽपि तत्रोभयव्यवहारविषयतावच्छेदकस्य प्रत्यक्षसिद्धत्वादित्यर्थः । अन्यथा तत्रोभयव्यवहारानुपपत्तेरिति भावः । यद्यपि घटत्वपटत्वोभयमिति प्रतीतौ कालिकसम्बन्धघटितसामानाधिकरण्यरूपवैशिष्ट्यस्य विषयतासम्भवस्तथापि वाच्यत्वघटत्वोभयं समवेतमित्यादिप्रतीतिव्यवहारविरहेणोभयं समवेतमिति प्रतीतिव्यवहारयोः समवायिसमवेतत्वरूपवैशिष्ट्यविषयताया अभ्युप-

गन्तव्यतया घटत्वपटत्वोभयं समवेतमित्यादौ तादृशवैशिष्ट्याप्रसिद्ध्या व्यासज्यवृत्तिधर्मविशेषस्योभयव्यवहारविषयताया आवश्यकत्व एकविशिष्टापरत्वस्य तथा व्यवहारविषयत्वमप्रामाणिकमिति न 'भूतत्वमूर्त्तत्वोभयवान् मूर्त्तत्वादि' त्यादावेकविशिष्टापरत्वस्य साध्यतावच्छेदकत्वप्रसक्तिः, तथा सत्यनुमितेरुभयवानित्याकारतानुपपत्तेरिति निर्व्यूढम् ।

ननु मूर्त्तत्वाधिकरणे मनसि भूतत्वमूर्त्तत्वोभयं नास्तीति बुद्धेरेकविशिष्टापरभावावलम्बनेनैवोपपत्तिः, मनसि प्रतियोगिसत्त्वेनोभयवृत्तिधर्मावच्छिन्नाभावासत्त्वादिति क्वचिदेकविशिष्टापरत्वस्याप्युभयव्यवहारविषयतावच्छेदकत्वमावश्यकमित्यत आह न वेति । तदवच्छिन्नाभावः प्रत्येकाधिकरणवृत्तिरुभयव्यवहारविषयतावच्छेदकावच्छिन्नाभावः, तदवच्छिन्नाभावात एकविशिष्टापरत्वावच्छिन्नाभावात् । नानतिरिक्तः इति विपरिणतेन सम्बन्धः, प्रतियोगितावच्छेदकविशिष्टेनैव प्रतियोगिनाऽभावस्य विरोधादेकस्याधिकरणेऽपि व्यासज्यवृत्तिधर्मावच्छिन्नाभावसत्त्वे बाधकाभावादिति भावः । एतेन मूर्त्तत्वस्य व्यासज्यवृत्त्युभयत्वावच्छिन्नव्यभिचारितापि व्यवस्थापिता, आवश्यकश्चैकाधिकरणे व्यासज्यवृत्तिधर्मावच्छिन्नतदभावः, अन्यथा समवायघटितसामानाधिकरण्येन घटत्वादिविशिष्टपटत्वाद्यप्रसिद्ध्या घटादौ समवायेन घटत्वपटत्वोभयं नास्तीति प्रतीतेरनुपपत्तेस्तत्र समवायिसमवेतत्वरूपवैशिष्ट्यावच्छिन्नाभावस्यैव विषयतायाः स्वीकरणीयत्वात् । अन्यथैककालीनत्वादिरूपवैशिष्ट्यावच्छिन्नस्य घटत्वादेः समवायेन घटादौ सत्त्वेन तादृशप्रतीत्यनिर्वाहादित्याह वैशिष्ट्यविरहेऽपिघटत्वपटत्वयोरुभयत्वेनाभावस्य प्रत्यक्षसिद्धत्वादिति । ननु तथापि व्यासज्यवृत्तिनिरुक्तोभयत्वेन साध्यत्वे न मूर्त्तत्वस्य व्यभिचारिता सम्भवति, एकप्रतियोगितामत्यप्यभावस्य प्रतियोगिसमानाधिकरणतया मूर्त्तत्वाधिकरणे मनस्युभयाभावस्य प्रतियोगिव्यधिकरणत्वाभावाद्धेतुमति प्रतियोगिव्यधिकरणस्यैव साध्याभावस्य व्यभिचारत्वाद् व्यभिचारलक्षणेऽपि

प्रतियोगितावच्छेदकावच्छिन्नवैयधिकरण्यपर्यन्तस्यानिवेशादित्याशङ्कां निरस्यति न च तत्रेत्यादिना । व्याप्तिरेव व्याप्तिरिष्टैव । तथात्वेऽपीति । मूर्त्तत्वस्य मनसि सत्त्वेऽपीत्यर्थः । उभयत्वेनेति । उभयत्वविशिष्टवत्ताया मनस्यसत्त्वादित्यर्थः । तथा च तत्रोभयत्वविशिष्टवैशिष्ट्यविषयकानुमितेर्भ्रमतया तत्प्रयोजकहेतोर्न सद्धेतुत्वस्वीकारसम्भवः । अत एव व्यभिचारलक्षणेऽपि प्रतियोगितावच्छेदकावच्छिन्नवैयधिकरण्यपर्यन्तमेव निवेश्यमिति भावः । एकाधिकरणे उभयत्वविशिष्टासत्त्वे मानमाह— नात्रोभयमितीति । 'अत्रोभयम्' इति प्रतीत्यभावो न हेतुतयोक्तः, तदुभयत्वेनैकस्य सत्त्वोपगमेऽप्युभयत्राधिकरणवृत्तितायास्तादृशप्रतीतिविषयतयैकस्मिन्नधिकरणवृत्तित्वाभावेन तादृशप्रतीतेर्भ्रमत्वस्यावश्यकत्वात्तादृशप्रमाविरहोपपत्तेः । [TCDG, pp. 331-334.]

From the passages quoted above, it is clear that Vāsudeva Sārvabhauma proposed the view that उभयत्व is the same as एकविशिष्टापरत्व, while Raghunātha Śiromaṇi, the disciple of Vāsudeva Sārvabhuma, rejected this view. The commentary of Jagadīśa Tarkālaṃkāra helps us in identifying this view, while the commentary of Gadādhara Bhaṭṭācārya provides us with the considerations for and against this view.

(358) P. 241, l. 19 : (*a*) The Metropolitan edition of *Nyāya-Bhāṣya* etc. reads this *sūtra* as उत्पादव्ययदर्शनात्, while it treats प्रागुत्पत्तेरुत्पत्तिधर्मकसदिस्यद्धा as a part of *Nyāya-Bhāṣya* (NB, p. 997.). This is also the reading of the *sūtra* as found in *Nyāyasūcīnibandha* and *Nyāyasūtroddhāra.*

(*b*) The reading accepted by Udayana agrees with that accepted by Rāmabhadra, as is clear from the following passage of *Tātparyaṭīkāpariśuddhi* :

न सन्नासन्न सदसत् सदसतोर्वैधर्म्यात्

इत्यस्य च सूत्रत्व सिद्धे

प्रागुत्पत्तेरुत्पत्तिधर्मकमसदित्यद्धा उत्पादव्ययदर्शनात्
बुद्धिसिद्धं तु तदसत्

इत्यनयोरपि सिद्धं भवतीति ।

[TTP, A.L. Thakur's Press Copy, Ch. IV, p. 76.]

(*c*) Vācaspati Miśra II, Viśvanātha Nyāyapañcāna and Rādhāmohana Gosvāmi Bhaṭṭācārya have followed Udayana here. [See NTĀ, Allahabad edition, p. 400 ; NSV, p. 999 ; NSVV, p. 262.]

(*d*) Bhaṭṭa Vāgīśvara has not counted this sentence or any part of it as a *sūtra*. After explaining the *sūtra* नासन्न सन्न सदसत् सदसतोर्वैधर्म्यात्, he moves straight on to the *sūtra* बुद्धिसिद्धं तु तदसत्. [See NTD, p. 123.]

(*e*) The opinion of Keśava Miśra Tarkācārya is not very clear, as is evident from the following passage :

॥ उत्पादव्ययदर्शनात ॥

समाधत्ते— प्रागुत्पत्तेरुत्पत्तिधर्मव्दमसदित्यद्धा । (कस्मात्) "उत्पादव्ययदर्शनात्" । उत्पत्तिधर्मकमुत्पादि वस्तु उत्पत्तेः प्रागसदित्यद्धा सत्यम्। कुतः, उत्पादव्ययौ दृश्येते यतः । न च नित्यस्य सत उत्पादव्ययौ युज्येते इत्यर्थः । [GSP, p. 82.]

Here, the word कस्मात has been added by the editor of GSP. It can also be seen that Keśava Miśra Tarkācārya has mentioned the expression प्रागुत्पत्तेरुत्पत्तिधर्मकमसदित्यद्धा without identifying it as a sentence of *Nyāya-Bhāṣya*, and he has also explained it. Why did he do all this, unless he regarded the expression प्रागुत्पत्ते॰ etc. as a part of the relevant *Nyāya-sūtra* ? It seems to us that by adding the word कस्मात्, the editor of GSP has sought to bring about a parity in the readings of NB and GSP.

(359) P. 242, l. 10 : (*a*) The Metropolitan edition of *Nyāya-*

Bhāṣya etc. accepts the reading आश्रयव्यतिरेकाद् वृक्षफलोत्पत्तिवदित्यहेतुः. This is also the reading accepted by *Nyāyavārttika* and *Nyāyavārttikatātparyaṭīkā*. [NB, p. 1003, NVTT, p. 1003.] Udayana also admits this reading, because he has simply noted the full reading of four *sūtras* in the following manner :

आश्रयव्यतिरेकाद् वृक्षफलोत्पत्तिवदित्यहेतुः

प्रीतेरात्माश्रयत्वादप्रतिषेधः

न पुत्रपशुस्त्रीपरिच्छदहिरण्यान्नादिफलनिर्देशात्

तत्सम्बन्धात् फलनिष्पत्तेस्तेषु फलवदुपचारः

इत्यत्र सूत्र भाष्यविप्रतिपत्तिं निवारयन्नाह—सूत्रार्थकथनेनैवेति ...

[TTP, A.L. Thakur's Press Copy, Ch. IV, pp. 73-76]

Bhaṭṭa Vāgīśvara, Vācaspati Miśra II, Keśava Miśra Tarkācārya and Rādhāmohana Gosvāmi Bhaṭṭācārya have also accepted the reading adopted by Udayana. [NTD, p. 124 ; NTĀ, Allahabad edn. p. 401 ; GSP, p. 82 ; NSVV, p. 263.]

(*b*) Viśvanātha Nyāyapañcānana has admitted the reading adopted by Rāmabhadra. (NSV, p. 1004.) The editors of the Metropolitan edition have noted the difference in the reading adopted by Viśvanātha, and in their opinion, the reading admitted by Viśvanātha is better :

वृत्तिकृन्मते सूत्रे उत्पत्तिपदं नास्तीति द्रष्टव्यम् । अयमेव पाठः साधीयस्त्वया प्रतिभाति । [NSV, p. 1004, fn. घ.]

(360) P. 244, l. 1-4 : Udayana and Vācaspati Miśra II have introduced this *prakaraṇa* in the following manner :

(*i*) क्रमप्राप्तं दुःखपरीक्षाप्रकरणम् । कमप्राप्तिश्च भाष्य प्रदर्शिता उक्त चति । भाष्यलक्षितमित्यर्थः । ननु किमिह परीक्षणीयम् ? न हि दुःखस्वरूपे कश्चिद्विप्रतिपद्यते । नापि तद्धेयमहेयं वेति केचित् सन्दिहते । नित्यमनित्यं वेति तु परीक्षा यद्यपि प्रकृतोपयोगिनी, तन्नित्यत्वे हि

शास्त्रानर्थक्यप्रसङ्गः। अस्ति च संशयकारणं वादिविप्रतिपत्तिः। सांख्या हि सर्वनित्यत्ववादिनो दुःखमपि नित्यमाहुः। तथापि तन्मतनिरासादनन्तरं च सत्कार्यवाद-निषेधादियमपि निरवशेषिता । कारणं च दुःखस्य दृष्टरूपमहिविषकण्टकादि न विप्रतिपत्तिविषयः। अदृष्टरूपा च प्रवृत्तिः परीक्षितैव। तदवान्तररूपं च फलं जन्मापि परीक्षितमेव। कारणनिवृत्तौ च कार्यं निवर्तत इति द्वितीयसूत्र परीक्षितम् । तत् किमपरमवशिष्यते यदर्थमयमारम्भः इत्यत आह तत्रेति।

वाधनालक्षणं दुःखम्

इति लक्षितम् । तत्र वाधनाशब्देन वाधनाबुद्धिरुच्यते । तया लक्ष्यमाणं विषयीक्रियमाणमिति लक्षणार्थः। अनेन च लक्षणेन दुःखायतनानि दुःख-साधनानि सुखं च व्याप्यते । तत्र च मुख्यां वाधनाबुद्धिमुपादाय पूर्व-पक्षावकाशः।... ...

[TTP, A.L. Thakur's Press Copy, Ch. IV, P. 80]

(*ii*) अथोद्देशलक्षणक्रमानुरोधात् दुःखपरीक्षाप्रकरणम्। तत्र यद्यपि दुःखे तद्धेयत्वे वा सर्वजनसिद्धे न संशयः। तथापि वाधनालक्षणं दुःखम (१।१।१०) इत्युक्तम् । तत् सम्यगसम्यग् वेति संशयः । प्रयोजनं तु लक्षणस्य सम्यक्त्वसिद्धिः । तत्र मुख्यं दुःखं लक्ष्यमेकविंशतिभेदभिन्नं न वा ? नाद्यः, तद्वाधनारूपत्वस्य लोकत एव सिद्धेस्तदर्थं शास्त्रवैयर्थ्यात् । वाधनाबुद्धिविषयत्वस्य सुखतत्साधनादिगतत्वेनातिव्याप्तेः। द्वितीये यदि वाधनास्वरूपं लक्षणं तदेन्द्रियादावतिव्याप्तिः। अथ तद्धीविषयत्वम्, तद्धीरन्योपसन्दानेन स्वतो वा ? आद्ये आत्मनोऽपि दुःखसाधन-तयाऽन्योपसन्दानकवाधनाधीविषयत्वात् तत्रातिव्याप्तिः। अन्त्यऽसम्भवः। न हीन्द्रियादि स्वतो वाधनारूपम्। न च गौणमुख्यसाधारणवाधनाधीविष-यत्वेनेन्द्रियादिषु दुःखत्वोपदेश इति वाच्यम्। सुखसंभेदाद्धेयत्वसाधनेन

प्रतिरोधात् । अन्यथाऽऽत्मनोऽपि हेयापत्तेः । तस्मात् सुखार्थी दुःखमुद्धृत्येन्द्रियादिसाधनकं सुखं संभोक्षते मांसार्थीव कण्टकमपसाय मांसमित्याक्षिप्तपूर्वपक्षकं सिद्धान्तसूत्रम् -

॥ विविधवाधनायोगात् दुःखमेव जन्मोत्पत्तिः ॥

... ... [NTĀ, Allahabad edn, p. 403.]

(361) P, ll. 14, 14 : there is some disagreement about the reading of this *sūtra*. *Nyāyavārttika* reads it as न सुखस्याप्यन्तरालनिष्पत्तेः [NV, p. 1008.] The Metropolitan edition of *Nyayabhāṣya* and *Nyāyavāttikatātparyaṭīka* reads it as न सुखस्यान्तरालनिष्पत्तेः [NB, p. 1008, NVTT, p. 1008.], which is also supported by *Nyāyasūcīnibandha* and *Nyāyasūtroddhāra*. The Chowkhamba edition of *Nyāyasūtravṛtti* reads it as सुखस्यान्तरालनिष्पत्तेः, while the Metropolitan edition gives the reading न सुखस्याप्यन्तरालनिष्पत्तेः [NSV, Chow. edn. p. 137, Metro. edn. p. 1009.]. Bhaṭṭa Vagīśvara and Rādhāmohana Gosvāmi Bhaṭṭācārya admit the reading न सुखस्याप्यन्तरालनिष्पत्तेः [NTD, p. 125, NSVV, p. 266.] , while Vācaspati Miśra II and Keśava Miśra Tarkācārya have supported the reading सुखस्याप्यन्तरालनिष्पत्तेः [NTĀ, Allahabad edn. p. 403; GSP, p. 84.]. But the reading 'अन्तरालसिद्धेः has not been supported by any other source. The manner in which Vātsyāyana has explained this *sūtra* supports the reading अन्तरालनिष्पत्तेः—

> न खल्वयं दुःखोद्देशः सुखस्य प्रत्याख्यानम् । कस्मात् ? सुखस्यान्तरालनिष्पत्तेः । निष्पद्यते खलु वाधनान्तरालेषु सुखं प्रत्यात्मवेदनीयं शरीरिणाम्, तदशक्यं प्रत्याख्यातुमिति ।
>
> [NB, p. 1008].

(362) P. 245, ll. 9-14 : Here, Rāmabhadra has referred to Vātsyāyana as प्राच्यः [See NB pp. 1008-1012].

(363) P. 246, l. 1 : (*a*) Udayana has introduced this

prakaraṇa in the following manner :

(*i*) क्रमप्राप्तमिदानीं मोक्षलक्षणपरीक्षाप्रकरणमारभ्यते ।

तदत्यन्तविमोक्षोऽपवर्गः

इति च लक्षणम् । लक्षणवाक्यत्वादेव चात्र संशयः , उपपन्नार्थमनुपपन्नार्थं वेति । आश्रयासिद्ध्या पूर्वः पक्षः । आत्यन्तिकी दुःखनिवृत्तिर्ह्यपवर्गे विवक्षितः । तथा चायमर्थः, अपवर्गो इतरेभ्यो भिद्यते अपवर्ग इति व्यवहर्तव्यो वा, आत्यान्तिकदुःखोच्छेदरूपत्वात् । यस्तु तदितरेभ्यो न भिद्यते, न वा तथा व्यवह्रियते नासावेवंरूपो यथा संसारः । एवंरूपश्चार्थो न प्रत्यक्षसिद्धः । तथा च सन्तानानुमानागमावत्र प्रमाणे स्याताम् । तच्चोभयमप्यनुष्ठानकालातिपातेन प्रतिहतं सन्नात्मानमवसादयति । तथा हि नायं संसारी तत्त्वज्ञानानुष्ठानादिक्रमेण कदाचिदपवृज्यते, ऋणक्लेशप्रवृत्त्यनुबद्धत्वात्, गतकालसंसारिवत् । ... ...

[TTP, A.L. Thakur's Press Copy, Ch. IV, p. 83].

The remarks of Vācaspati Miśra II are as follows :

(*ii*) अथ क्रमप्राप्तापवर्गपरीक्षाप्रकरणम् । तदत्यन्तविमोक्षोऽपवग इति लक्षणवाक्यं सम्यङ् न वेति संशयः । प्रयोजनमपवर्गसिद्धिः । ... ...

[NTĀ, Allahabad edn. p. 404.]

Keśava Miśra Tarkācārya has copied this passage verbatim. [GSP, p. 84.]

(364) P. 249, l. 9 : Rādhāmohana Gosvāmi Bhaṭṭācārya has read this *sūtra* as समारोपादात्मन्यप्रतिषेधः [NSVV, p. 269.]

(365) P. 249, l. 16- p. 250, l. 1 : (*a*) Vācaspati Miśra II has quoted from *Chandogapariśiṣṭa* the following verses which give a description of the mortuary rites of a *sāgnika* person :

(*i*) तत्रोत्तानं निपात्यैनं दक्षिणशिरसं मुखे ।
आज्यपूर्णां स्रुचं दद्याद्दक्षिणाग्रं नसि स्रुवम् ॥

पादयोरधरां प्राचीमरणिं शिरसीतराम् ।
पार्श्वयोः सूर्पचमसौ सव्यदक्षिणयोः क्रमात् ॥
मुसलेन समं न्युब्जमन्तरूर्वोरुदूखलम् ।

[NTĀ, Allahabad edn. p. 407]

(*b*) The editors of the Metropolitan edition of *Nyāyabhāṣya* etc. have quoted in this connection in the footnotes the following extract from *Karmapradīpa* :

आज्यपूर्णां दक्षिणाग्रां स्रुचं मुखे स्थापयेत् । तथाग्रमाज्यपूर्णं स्रुवं नासिकायाम्। पादयोः प्रागग्रामधरारणिम्, तथाग्रामुत्तरारणिमुरसि । सव्यपार्श्वे दक्षिणाग्रं शूर्पम्, दक्षिणपार्श्वे दक्षिणाग्रं चमसम्, ऊरुद्वयमध्ये उलूखलं मुषलमधोमुखम्, तत्रैव च त्रमोविलीकं (?) च स्थापयेत् ।

[NB, p. 1026, fn. (क).]

(366) P. 253, ll. 1-7 : (*a*) Udayana has introduced this *Āhnika* in the following manner :

एवं प्रथमाह्निके चतुर्दशभिः प्रकरणैः कार्यरुपप्रवृत्त्यादिप्रमेयषट्कं परीक्षितम् । इदानीं तस्य तत्त्वज्ञानं परीक्षणीयम् । किं विषयं किं लक्षणं कथमुत्पद्यते कथं परिपाल्यते कथं विवर्धते चेति तत्त्वज्ञानपरीक्षैवाह्निकार्थः। तत्र यस्मिन् विषये यथोत्पद्यते तत्त्वज्ञानं तत्क्रमप्रतिपादनार्थं (१) प्रथमं दोषनिमित्ततप्रकरणम्,(२) द्वितीयं प्रासङ्गिकमवयविप्रकरणम्, (३) तृतीयमौपोद्घातिकं निरवयवप्रकरणम्, (४) चतुर्थं प्रासङ्गिकं बाह्यार्थ-प्रकरणम्, (५) पञ्चमं तत्त्वज्ञानविवृद्धिप्रकरणम्, (६) षष्ठं तत्त्वज्ञान-रक्षाप्रकरणमिति षट् प्रकरणानि ।

[TTP, A.L. Thakur's Press Copy, Ch. iv, p. 93.]

(*b*) The following remarks of Vācaspati Miśra II are worth noting :

(*ii*) तदेवं प्रमाणप्रमेयसंशयाः साक्षात्प्रयोजनादयस्तु 'यत्र संशय' (२।१।७) इत्यतिदेशादिति षोडशापि पदार्थाः परीक्षिताः । यद्यपि

प्रथमाध्यायशेषे छलमपि साक्षादेव परीक्षितम्, तथापि तत्पूरणार्थमित्यसत्कल्पतया नात्रोल्लिखितमिति द्रष्टव्यम् । सम्प्रति त्ववसरसङ्गत्या तत्तत्त्वज्ञानपरीक्षा । तथा हि अपवर्गसाक्षाद्धेतुत्वेन प्रथमं तत्त्वज्ञानपरीक्षाप्राप्तौ निरूप्यतया प्रमेयपरीक्षाया वुभुत्सिततमत्वेन तया प्रतिवन्धादथ तत्पर्याप्तौ प्रतिवन्धकजिज्ञासापगमात् । न चैतदाह्निकस्य ज्ञानपरीक्षकत्वेन प्रवृत्त्यादिषट्कपरीक्षाध्यायानन्तर्भाव इति वाच्यम् । ज्ञानं हि निर्विषयं परीक्षितुं न शक्यमिति सविषयकमेव परीक्षितव्यम् । तथा च ज्ञानपरीक्षा तद्विषयं प्रवृत्त्यादि गोचरयत्येवेति नाध्यायवहिर्भावः । नन्वेवं प्रमाणाद्यपि सा गोचरयत्येवेति प्रवृत्त्यादिपरीक्षवत् प्रमाणादिपरीक्षाऽप्येतदाह्निकार्थः स्यादिति चेत्— न, प्रवृत्त्यादिषट्कपरीक्षकाध्यायैकवाक्यतया प्रवृत्तस्य हि द्वितीयाह्निकस्य तावदेव परीक्षार्थतावच्छेदिका यावती नाध्यायार्थाभ्यन्तरे निविशते । तादृशी च प्रवृत्त्यादिर्यद्विषयतयैव तत्त्वज्ञानपरीक्षा भवतीति सैवाह्निकार्थः ।

प्रभाकरोपाध्यायास्तु तत्त्वज्ञानविषयत्वेन प्रवृत्त्यादिपरीक्षैतदाह्निकार्थः, प्रवृत्त्यादिपरीक्षायामपि तात्पर्यम्— इति । तदसत्, अर्थादेव ज्ञानस्य विषयविशिष्टत्वप्राप्तौ तत्रापि तात्पर्यकल्पने गौरवात् । अन्यथा तत्त्वज्ञानविषयतया प्रमाणादिपरीक्षाप्येतदाह्निकार्थः स्यात् तद्विषयतत्त्वज्ञानपरीक्षाया अप्याकाङ्क्षितत्वादिति । तत्र किं विषयं किं लक्षणं कथमुत्पद्यते कथं वर्धते कथं परिपाल्यते चेत्यपेक्षायां षट् प्रकरणानि । तेष्वपि प्रथमं निमित्तानुव्यञ्जनसंज्ञा । विषयाणां रूपादीनां दोषनिमित्तता-प्रदर्शनद्वारा विषयकथनेन तदुत्पत्तेर्भिन्नलक्षणस्य विषयस्य प्रदर्शनायादौ तत्त्वज्ञानोत्पत्तिप्रकरणम ।

[NTĀ, Allahabad edn. pp. 410-411].

(366) P. 253, l. 19- p. 254, l. 8 : (*a*) Vācaspati Miśra I has explained the terms निमित्तसंज्ञा and अनुव्यञ्जनसंज्ञा in the following manner :

निमित्तं दन्तत्वादि, तद्विशिष्टा विषयाः संज्ञाः ; प्रियायाः कामुको दन्तोष्ठनासिकादीनवयवाननुभावयन् तस्यां सक्तो भवति । व्यञ्जनान्यवयविनोऽवयवास्तैः सहोपलम्भात्तेषामनुव्यञ्जनं तत्सादृश्यं तेन तदारोपः ।
[NVTT, p. 1040.]

(*b*) Viśvanatha Nyāyapañcānana has used the term अनुरञ्जनसंज्ञा instead of अनुव्यञ्जनसंज्ञा. [See NSV, pp. 1040-1041.]

(367) P. 255, l. 12 : There is considerable dispute about the exact reading of this *sūtra*. The Metropolitan edition of *Nyāyabhāṣya* reads it as वृत्त्यनुपपत्तेरपि न संशयः, even though the editors have noted the fact that in many editions of *Nyāyabhāṣya*, the reading adopted is वृत्त्यनुपपत्तेरपि तर्हि न संशयः, a reading which is also supported by *Nyāya-Vārttika* and *Nyāyasūtroddhāra*. They have also noted the fact that in some editions of *Nyāyabhāṣya*, the portion न संशयः does not occur [NB, p. 1045 ; fn. 1 ; NV, p. 1045.]. Bhaṭṭa Vāgīśvara has not counted this as a *sūtra* [NTD, p. 131.]. Vācaspati Miśra II and Keśava Miśra Tarkācārya have adopted the reading वृत्त्यनुपपत्तेरपि न संशयः which coincides with the reading of *Nyāyasūcīnibandha*. [NTĀ, Allahabad edn. p. 414 ; GSP, p. 89.]. Viśvanātha Nyāyapañcānana has accepted the reading वृत्त्यनुपपत्तेरपि तर्हि संशयानुपपत्तिः, while Rādhāmohana Gosvāmi Bhaṭṭācārya, like Rāmabhadra, has read it as वृत्त्यनुपपत्तेरपि संशयानुपपत्तिः [NSV, p. 1045 ; NSVV, p. 277.]. The view of Udayana on this point could not be ascertained, as he has not commented on the relevant portion of *Nyāyavārttikatātparyaṭīkā*.

(368) P. 255, l. 18: The status of this sentence is disputed. It has been counted as a *sūtra* in the Metropolitan edition of *Nyāyabhāṣya* etc. [NB, p. 1045.]. This seems to be correct, because in *Nyāya-Bhāṣya* and *Nyāya-Vārttika*, this sentence has been introduced with the remark तद्विभजते, which clearly suggests that this sentence is a *sūtra*. This has also been counted as a *sūtra* in *Nyāyasūcīnibandha, Nyāyasūtroddhāra*

and *Nyāyatātparyadīpikā* of Bhaṭṭa Vāgīśvara [NTD, p. 131.]. Vācaspati Miśra II, Keśava Miśra Tarkācārya, Viśvanātha Nyāyapañcānana and Rādhāmohana Gosvāmi Bhaṭṭācārya have not counted this as a *sūtra*. [NTĀ, Allahabad edn. p. 414 ; GSP, p. 89 ; NSV, p. 1045 ; NSVV, p. 277.].

Like Rāmabhadra, Viśvanātha and Rādhāmohana have explicitly declared this sentence to be a part of *Nyāyabhāṣya* :

(i) वृत्त्यनुपपत्तिं विवृणोति भाष्यकारः—"कृत्स्नैकदेशावृत्तित्वादवयवानामवयव्यभावः।" अवयवी हि एकैकावयवे कार्त्स्न्येन एकदेशेन वा ? नाद्यः, विषमपरिमाणत्वात् । अन्येऽपि तेनैवावयवेनान्येन वा ? नाद्यः, स्वस्मिन् वृत्तिविरोधात्; नान्त्यः, अवयवान्तरस्यावयवान्तरावृत्तेः ।
[NSV, p. 1045.].

This has been repeated almost *verbatim* by Rādhāmohana. [NSVV, p. 277.]

Vācaspati Miśra II has not mentioned this sentence, but he has made similar remarks while commenting on the *sūtra* वृत्त्यनुपपत्तेरपि etc.

(ii) अपिरवधारणे, प्रतिबोधाभिप्रायेण समुच्चये वा । वृत्त्यनुपपत्तेर्व्यतिरेकावधारणादेवासंशयः । तथा हि—अवयवी अवयवेषु कार्त्स्न्येन वर्तते एकदेशेन वा । नाद्यः, परिमाणवैषम्यात् । अन्त्येऽपि तेनैवान्येन वा ? नाद्यः, स्ववृत्तिविरोधात् । नान्त्योऽवयवस्यावयवान्तरावृत्तित्वादित्यर्थः ।
[NTĀ, Allahabad edn. p. 414.].

This has been repeated almost *verbatim* by Keśava Miśra Tarkācārya. [GSP, p. 89.].

(369) P. 256, l. 5 : This sentence has not been counted as a *sūtra* by Vācaspati Miśra II, Keśava Miśra Tarkācārya, Viśvanātha Pañcānana and Rādhāmohana Gosvāmi Bhaṭṭācārya. [NTĀ, allahabad edn. p. 414 ; GSP, p. 89 ; NSV, p. 1046 ; NSVV, p. 277.]. But while Vācaspati Miśra II and

Keśava Miśra Tarkācārya are totally silent about this *sūtra*, Viśvanātha and Radhāmohana have maintained that this is a sentence from *Nyāya-Bhāṣya*. They have also noted that according to some commentators, this sentence is a *sūtra*. Bhaṭṭa Vāgīśvara has adopted the reading पृथक् चावयवेभ्यः.

[NTD, p. 131.].

(370) P. 258, l. 7 and l. 10 : These two sentences have not been counted as *sūtras* in *Nyāyatātparyadīpikā* of Bhaṭṭa Vāgīśvara. [NTD, p. 132.].

(371) P. 259, ll. 8-9 : This sentence has not been treated as a *sūtra* in *Nyāyatātparyadīpikā* of Bhaṭṭa Vāgīśvara.

[NTD, p. 132.].

(372) P. 260, l. 2 : This sentence has not been counted as a *sūtra* in *Nyāyatātparyadīpikā* of Bhaṭṭa Vāgīśvara.

[NTD, p. 133.].

(372) P. 261, l. 1 : (*a*) Udayana has introduced this *prakaraṇa* in the following manner :

(*i*) एवमवयविप्रकरणं समाप्य तदुपोद्घातेन निरवयवपरीक्षा-प्रकरणमारभ्यते ...

[TTP, A.L. Thakur's Press Copy, Ch. IV, p. 105.]

(*b*) The introductory comments of Vācaspati Miśra II are as follows :

(*ii*) अथौपोद्घातिकं निरवयवप्रकरणम् । यद्यपि त्रुटेरनित्यत्वे परमाणोरप्यनित्यत्वेऽप्यवयविसिद्धिर्भवत्येवेति नोपोद्घातः किन्तु प्रसङ्ग एव, तथापि 'तदनुपपत्ति'रिति पूर्वपक्षसूत्रे 'न प्रलयोऽणुसदभावात्', 'परं वा त्रुटे'रिति सुत्रद्वयार्थस्य प्रकृतस्यैव निरवयवपरमाणोराक्षेपात् । तत्र मूर्तत्वं निरवयववृत्ति न वेत्यादि विप्रतिपत्तौ ... ...

[NTĀ, Allahabad edn. pp. 417-418.].

(*c*) The introductory comments of Uddyotakara and Viśvanātha are as follows :

(*iii*) अथेदानीमानुपलम्भिकः सर्वं नास्तीति मन्यमान आह ... ...
[NV, p. 1059.]

(*iv*) अथ विश्वस्य शून्यत्वात् क्व परमाणुसम्भावनेति मतनिरासाय निरवयवप्रकरणम् । [NSV, p. 1063.]

(374) P. 261, l. 12 : (*a*) Bhaṭṭa Vāgīśvara has not counted this sentence as a *sūtra.* [NTD, p. 133.]

(*b*) Vācaspati MisraII and Keśava Miśra Tarkācārya have read this *sūtra* as अन्तर्बहिश्च कार्यद्रव्यस्य कारणान्तरवचनादकार्ये तदभावः. [NTĀ, Allahabad edn. 418 ; GSP, p. 91.]

(375) P. 261, l. 19 : (*a*) Uddyotakara has read this *sūtra* as सर्वसंयोगशब्दविभवाच्च सर्वगतम् . [NV, p. 1062.]

(*b*) Bhaṭṭa Vāgīśvara has not counted this sentence as a *sūtra.* [NTD, p. 133]

(376) P. 262, l. 6 : (*a*) All other commentators, with the exception of Bhaṭṭa Vāgīśvara, have read this *sūtra* as अव्यूहाविष्टम्भविभुत्वानि चाकाशधर्माः .

Bhaṭṭa Vāgīśvara has not counted this sentence as a *sūtra.* [NTD, p. 133.]

(377) P. 263, l. 9 : All the other commentators have supported the reading संयोगोपपत्तेश्च. This seems to be the correct reading, since the additional च seems to be supported by the *Bhāṣya* passage यत्पुनरेतत संयोगोपपत्तेश्चेति ? स्पर्शवत्त्वाद्व्यवधानमाश्रयस्य चाव्याप्त्या भागभक्तिः । उक्तं चात्र स्पर्शवानणुः स्पर्शवतोरण्वोः प्रतिघाताद् व्यवधायको न सावयवत्वात [NB, p. 1065] and the *Tīkā* passage सूत्रान्तरमनुवृत्तिसहितं पठति संयोगोपपत्तेश्च इति [NVTT, p. 1065]. Thus, for Vācaspati Miśra I, the particle च indicates the *anuvṛtti* of the word अवयवसद्भावः from the earlier *sūtra.*

(378) P. 263, l. 15 : This sentence has not been counted as a *sūtra* by Bhaṭṭa Vāgīśvara. [NTD, p. 134]

(379) P. 265, l. 1 : (*a*) Udayana has also admitted *prasaṅgasaṅgati* in this case :

एवं द्वाभ्यां सावयवं निरवयवं चार्थं प्रसाध्य तत्प्रसङ्गागतं वाह्यार्थापह्नवनिराकरणार्थमिदं प्रकरणमारब्धव्यम् ।

[TTP, A.L. Thakur's Press Copy, Ch. IV, p. 109]

(*b*) Vācaspati Miśra II, while accepting this view, has also noted the fact that according to some commentators, the *saṅgati* in this case is *upodghāta* :

पूर्वप्रकरणार्थयोः सावयवनिरवयवयोः प्रसङ्गेन वाह्यार्थापह्नवनिराकरणप्रकरणम् । कश्चित्तु—विज्ञानैकशेषे क्वावयव इत्युपोद्घात एव । न च निमित्तानुव्यञ्जनसंज्ञाविरोध्यशुभसंज्ञाभावनोपदेशस्य प्रकृतस्य विज्ञाननये ज्ञानात्मकऽपि स्यादावविरोधान्नैवमिति वाच्यम् । उपदेशो हि न निरवयवप्रकरणविषयः किन्तु तत्पूर्वप्रकरणविषयः । अस्य च निरवयवप्रकरणेनैव प्रसङ्गसङ्गतिर्न तु पूर्वेणापि सा दृश्यते, अभिधानानङ्गत्वात् । पूर्वप्रकरणार्थश्च निरवयवोऽवयव इति भवत्येवोपोद्घातः । न च ज्ञानात्मकत्वेऽप्यवयवस्य न किञ्चिदनुपपन्नम् । न च ज्ञानभिन्नत्वमण्ववयवस्य पूर्वमुक्तं यन्निर्वाहायैतत् स्यादिति वाच्यम् । अन्तर्वहिश्च कार्यद्रव्यस्य कारणान्तरत्ववचनादकार्ये तदभाव (४।२।१८) इति सूत्रेणाणुद्रव्यत्वस्योक्तप्रायत्वात् । [NTĀ, Allahabad edn., pp. 422-423.]

(*c*) The introductory remarks of Vātsyāyana and Viśvanātha are also worth noting :

(*i*) यदिदं भवान् बुद्धीराश्रित्य बुद्धिविषयाः सन्तीति मन्यते, मिथ्याबुद्धय एताः, यदि हि तत्त्ववुद्धयः स्युर्वुद्ध्या विवेचने क्रियमाणे याथात्म्यं बुद्धिविषयाणामुपलभ्येत ... ... [NB, p. 1071.]

(*ii*) ननु वाह्यार्थाभावात् कुताऽवयवावयविव्यवस्थेति मतमपाकर्तुं बाह्यार्थभङ्गनिराकरणप्रकरणभारभते । प्रमेयत्वं ज्ञानत्वव्याप्यं न वेति संशयः ।... ... [NSV, p. 1072]

(380) P. 265, l. 21 : (*a*) This sentence has not been counted as a *sūtra* by Bhaṭṭa Vāgīśvara. [NTD, p. 135]

(*b*) while explaining this *sūtra*, Rāmabhadra has equated व्याघात with दृष्टान्ताभाव. Vātsyayāna and Uddyotakara have equated व्याघात with स्ववचनविरोध and सहासम्भव respectively:

(*i*) यदि बुद्ध्या विवेचनं भावानां, न सर्वभावानां याथात्म्यानुपलब्धिः । अथ सर्वभावानां याथात्म्यानुपलब्धिर्न बुद्ध्या विवेचनम् । भावानां बुद्ध्या विवेचनं याथात्म्यनुपलब्धिश्चेति व्याहन्येत । ... ...
[NB, pp. 1073-1074]

(*ii*) को व्याघातः ? सहासम्भवः । यदि बुद्ध्या विवेचनं भावानां न सर्वभावानुपपत्तिः । अथ सर्वभावानुपपत्तिर्न बुद्ध्या विवेचनं सर्वभावानामिति । [NV, p. 1074.]

Uddyotakara has explained व्याघात in an alternative manner as well :

(*iii*) सर्वभावानुपपत्तिरिति ब्रुवाणः प्रमाणं पर्यनुयोज्यः । यदि प्रमाणं ब्रवीति व्याहतं भवति । अथ न ब्रवीति अर्थोऽस्य न सिध्यति प्रमाणाभावात्।
[NV, p. 1074.]

(*c*) Vācaspati Miśra II has provided yet another explanation:

... बुद्ध्या विवेचनं बाह्याभावेऽहेतुः व्याहतत्वात् । न हि तत्त्वभावे ततो विविच्येत इति प्रसङ्गो घटते । तथा चावधिसत्त्वे तदसत्त्वे च न विवेचनाद् बाह्याभावः । एवं ज्ञानभिन्नस्योल्लेखानुल्लेखयोर्बुद्धिर्ज्ञानभिन्नं नोल्लिखतीत्यपि व्याहतम् । तथा च व्याघातादेव सिद्धं बाह्यमित्यर्थः ।
[NTĀ, Allahabad edn. pp. 421-422.]

(381) P. 266, l. 3 : This sentence has not been counted as a *sutra* by Bhaṭṭa Vāgīśvara. [NTD, p. 135.]

(382) P. 266, l. 16 : This sentence has not been counted as a *sūtra* by Bhaṭṭa Vāgīśvara. [NTD, p. 135.]

(383) P. 267, l. 3 : This sentence has not been counted as a *sūtra* by Bhaṭṭa Vāgīśvara. [NTD, p. 135.]

(384) P. 267, l. 18 :(*a*) This sentence has not been counted as a *sūtra* by Bhaṭṭa Vāgīśvara. [NTD, p. 135.] This may be due to the fact that Vātsyāyana has not explained it.

(*b*) Rāmabhadra has not explained this *sūtra*. Vācaspati Miśra I has explained this *sūtra* in the following manner :

(*i*) ननु स्वप्नप्रत्ययानामस्त्वेवंधर्मकत्वम्, ये पुनरमी जाग्रत्प्रत्ययाः स्तम्भ इति वा कुम्भ इति वा, किमायातं तेषामत्यन्तवैलक्षण्यादित्यत आह—मायागन्धर्वेति।... जाग्रत्प्रत्यया अप्येवंविधाः सहस्रशो दृश्यन्ते, न चैते स्तम्भकुम्भादिप्रत्ययास्ततो विलक्षणा इत्यर्थः। [NVTT, p. 1076.]

(385) This sentence has not been counted as a *sūtra* by Bhaṭṭa Vāgīśvara. [NTD, p. 93.] This *sūtra* has been explained in greater detail by Vātsyāyana and Vācaspati Miśra I in the following manner :

(*i*) स्वप्नान्ते विषयाभिमानवत् प्रमाणप्रमेयाभिमानो न पुनर्जागरितान्ते विषयोपलब्धिवदित्यत्र हेतुर्नास्ति। हेत्वभावादसिद्धिः। स्वप्नान्ते चासन्तो विषया उपलभ्यन्ते इत्यत्रापि हेत्वभावः। प्रतिबोधेऽनुपलम्भादिति चेत् ? प्रतिबोधविषयोपलम्भादप्रतिषेधः। यदि प्रतिबोधेऽनुपलम्भात् स्वप्ने विषया न सन्तीति, तर्हि य इमे प्रतिबुद्धेन विषया उपलभ्यन्ते उपलम्भात् सन्तीति। विपर्यये हि हेतुसामर्थ्यम्। उपलम्भात् सद्भावे सत्यनुपलम्भादभावः सिद्ध्यति, उभयथा त्वभावे नानुपलम्भस्य सामर्थ्यमस्ति, यथा प्रदीपस्याभावाद्रूपस्यादर्शनमिति, तत्र भावेनाभावः समर्थ्यते इति। स्वप्नान्तविकल्पे च हेतुवचनम्। स्वप्नविषयाभिमानमिति ब्रुवता स्वप्नान्तविकल्पे हेतुर्वाच्यः। कश्चित् स्वप्नो भयोपसंहितः, कश्चित् प्रमोदोपसंहितः, कदाचित् स्वप्नमेव न पश्यतीति। निमित्तवतस्तु स्वप्नविषयाभिमानस्य निमित्तविकल्पाद्विकल्पोपपत्तिः।

[NB, pp. 1077-1080.]

(*ii*) तदेतद् दूषयति—हेत्वभावादसिद्धिः । तद् व्याचष्टे भाष्यकारः—स्वप्नान्ते विषयाभिमानवदिति । अन्तशब्दोऽवयववचनोऽन्याश्रितत्वमात्रेणावस्थायां प्रयुक्तः। तेन स्वप्नावस्थायां जागरितावस्थायामित्यर्थः । एतदुक्तं भवति—स्वप्नज्ञानस्यायाथार्थ्यमिच्छता बाधकमन्तरेण तदनुपपत्तेर्जाग्रत्प्रत्ययोऽस्य बाधको वक्तव्यः। न चासावसमीचीनस्तद्बाधितुमुत्सहत इति समीचीनत्वं जाग्रत्प्रत्ययस्याभ्युपगन्तव्यम् । तथा च जागरितान्ते विषयोपलब्धिवदित्यनुपपन्नम् । ... ...[NVTT, p. 1077.]

As we can see, the interpretation of Rāmabhadra differs considerably from that offered by Vātsyāyana and Vācaspati Miśra I. A closer examination reveals that much of such disagreement stems from the ambiguity of the word हेत, which may stand for an inferential mark (अनुमापकलिङ्ग) or for a cause (कारण). Rāmabhadra has treated here हेतु as the same with प्रतीतिहेतु.

(*c*) Vācaspati Miśra II has noted a number of alternative interpretations of this *sūtra*.

(*iii*) सर्वबुद्ध्ययथार्थत्वस्यासिद्धिः हेत्वादिबुद्धीनामप्ययथार्थत्वेन हेत्वभावात । यद् वा— जाग्रद्धीवत् प्रमाणादिधीः समीचीनैव कस्मान्नेत्यत्र हेत्वभावात । यद् वा— दृष्टान्तीभूतस्य स्वप्नस्यासिद्धिः हेत्वभावात, सर्वबुद्ध्ययथार्थत्वे स्वप्नग्राहकधियोऽप्ययथार्थत्वादित्यर्थः ।
[NTĀ, Allahabad edn. p. 425].

This has been repeated almost verbatim by Keśava Miśra Tarkācārya. [GSP, p. 93].

(*d*) Viśvanātha Nyāyapañcānana has given two other alternative interpretations :

(*iv*) समाधत्ते— हेत्वभावादसिद्धिः । बाह्याभावस्याऽसिद्धिः, हेत्वभावात प्रमाणाभावात् । अथ वा— हेतोश्चक्षुरादेरनभ्युपगमे

घटोऽयमित्यादिज्ञानानामसिद्धिरित्यर्थः। न च वासनावशात् स्यादिति वाच्यम्, वासनाया अतिरिक्तत्वे बाह्योपगमप्रसङ्गात् । वासनायाः सन्तन्यमानतया चाक्षुषादेरपि सन्तानापत्तिरिति दिक् ।

[NSV, p. 1079].

(386) P. 368, l. 8 : (*a*) This sentence has not been counted as a *sūtra* by Bhaṭṭa Vāgīśvara. [NTD, p. 135].

(*b*) There is some disagreement among the commentators regarding the exact meaning of the term संकल्प. While Rāma-bhadra treats संकल्प as बाह्यमानसज्ञान, Viśvanātha regards it as उपनीतभान, and Uddyotakara treats it as पूर्वानुभूतविषयप्रार्थना :

(*i*) स्वप्नवद्विज्ञानभेदं यदि प्रतिपद्यते, सोऽपि दृष्टानुभूतानां भावानां भावनावशेन विज्ञानभेदं प्रतिपादयितव्यः । [NV, p. 1083]

(*ii*) नन्वसद्विषया अहेतुका अपि स्वाप्नप्रत्यया इव भावनाप्रत्यय इव परेऽपि प्रत्यया भवेयुरित्यत आह— स्मृतिसङ्कल्पवच्च स्वप्नविषयाभिमानः । पूर्वोपलब्धविषय इति शेषः । सङ्कल्पः उपनीतभानम् । ... ...

[NSV, p. 1086]

(387) P. 268, l. 17 : (*a*) This interpretation of Rāmabhadra does not tally with the interpretation offered by Vātsyāyana, Uddyotakara, Vācaspati Miśra I and Vācaspati Miśra II :

(*i*) ... तत्त्वज्ञानेन मिथ्याज्ञानो निवर्त्यते, नार्थः स्थाणुपुरुषसामान्यलक्षणः। यथा प्रतिबोधे या ज्ञानवृत्तिस्तया स्वप्नविषयाभिमानो निवर्त्यते नार्थो विषयसामान्यलक्षणः, तथा मायागन्धर्वमृगतृष्णिकाणामपि वा बुद्धयोऽतस्मिंस्तदिति व्यवसायास्तत्राप्यनेनैव कल्पेन मिथ्योपलब्धिविनाशस्तत्त्वज्ञानान्नार्थप्रतिषेध इति । [NB, p. 1087]

(*ii*) स्थाणौ पुरुषाध्यवसायो मिथ्योपलब्धिः, तत्त्वज्ञानेन मिथ्याज्ञानः स निवर्त्यते, नार्थः स्थाणुपुरुषलक्षणः । न ह्यसौ स्थाणुर्न भवतीति यथा

स्वप्नोपलब्धानां येऽध्यवसायाः ते जाग्रदवस्थोपलब्ध्या निवर्त्यन्ते, नार्थो विषयसामान्यलक्षण इति। ... ... [NV, pp. 1087-1088.]

(*iii*) मिथ्याज्ञानस्य प्रधानाश्रयत्वे मिथ्योपलब्धेर्विनाशस्तत्त्वज्ञानाद्बाधकात् स्वप्नविषयाभिमानप्रणाशवत् प्रतिषेधो न त्वर्थस्य सामान्यस्यापीति शेषः । ... ... [NVTT, p. 1088].

(*iv*) तत्त्वज्ञानाद् बाधकान् मिथ्योपलब्धेस्तदुल्लिखितवैशिष्ट्यस्य च विनाशो भवति न तु धर्मिणोऽपि तदुल्लिखितस्य स्वविषयभ्रमवदित्यर्थः । [NTĀ, Allahabad edn. p. 428]

(*b*) Viśvanātha Nyāyapañcānana offers a new and perceptive interpretation :

(*v*) मिथ्योपलब्धेर्मायागन्धर्वनगरादिज्ञानस्य तत्त्वज्ञानादनारोपितवस्तुप्रत्ययाद् विनाशो प्रतिरोधः भ्रमत्वज्ञानं वा, एवं स्वाप्नप्रत्ययस्यापि । दर्पणमुखविभ्रमस्य तत्त्वज्ञानेनाप्रतिरोधेऽपि भ्रमत्वज्ञानं भवत्येवेति भावः। [NSV, p. 1087]

(388) P. 269, ll. 1-3 : (*a*) Vātsyāyana, Uddyotakara, Vācaspati Miśra I, Bhaṭṭa Vāgīśvara, Vācaspati Miśra II and Viśvanātha Nyāyapañcānana have introduced this *sūtra* in a different manner :

(*i*) मिथ्याबुद्धेश्चार्थवदप्रतिषेधः । कस्मात् ? निमित्तोपलम्भात्, सद्भावोपलम्भाच्च । उपलभ्यते हि मिथ्याबुद्धिनिमित्तम्, मिथ्याबुद्धिश्च प्रत्यात्ममुत्पन्ना गृह्यन्ते संवेद्यत्वात्, तस्मान्मिथ्याबुद्धिरप्यस्तीति । [NB, p. 1088].

(*ii*) ... बुद्धेश्चैवं निमित्तसद्भावोपलम्भादप्रतिषेधःमिथ्याबुद्धेर्निमित्तमस्ति । किं पुनस्तत् ? सामान्यदर्शनं विशेषादर्शनमविद्यमानविशेषाध्यारोप इति । मिथ्याबुद्धि प्रतिपद्यमानेन तस्या निमित्तं वक्तव्यम । निमित्तं च प्रतिपद्यमानेनार्थोऽभ्युपेय इति । [NV, pp. 1088-1089]

(*iii*) यस्तु माध्यमिको मिथ्याबुद्धिदृष्टान्तेन बाह्यापह्नवं कृत्वा तेनैव दृष्टान्तेन विज्ञानाभावं कृत्वा विचारासहत्वं तत्त्वं भावानां व्यवस्थापयाम्बभूव तं प्रत्याह—

बुद्धेश्चैवं निमित्तसद्भावोपलम्भात् ।

अर्थे हि निषिद्धे भवेदप्येतत् । तद्व्यवस्थापने तद्वदेवाप्रत्यूहं बुद्धिसद्भावोऽपि सिध्यति । न चैवंवादिनः प्रमाणमस्ति, असता च प्रमाणेन विचारासहत्वं भावानां व्यवस्थापयन् श्लाघनीयप्रज्ञो देवानांप्रिय इति । न च कल्पनामात्रनिर्मित उपायस्तत्त्वज्ञानाय पर्याप्तः । न च वनस्पत्यादितत्त्वज्ञानस्य मिथ्याहस्तिज्ञानं निबन्धनमपि तु प्रणिहितमनस इन्द्रियार्थसन्निकर्षविशेषः । न चासौ मिथ्याज्ञानसमये आसीत् । न च मोहाभ्यासः समीचीनाय ज्ञानाय कल्पते, स हि मोहमेव द्रढयतीति सर्वमवदातम् । सोऽयं माध्यमिकोऽनुभूयमानां मिथ्याबुद्धिं नापह्नोतुमर्हति। तथा च मिथ्याबुद्धिं प्रतिपद्यमानेन तस्या निमित्तं वक्तव्यमित्युक्तम् ।

[NVTT, pp. 1088-1089].

(389) P. 270, ll. 1-3 : (*i*) According to Vācaspati Miśra II, the *saṅgati* here is निर्वाहकैक्य :

आत्मतत्त्वज्ञानोत्पत्तिप्रकरणे "दोषनिमित्तानां तत्त्वज्ञानादहङ्कारनिवृत्ति" (४।२।१) रित्युक्तम् । न चैतावत्ता कृतकृत्यता । तस्य साक्षात्कारिदृढभूमिसवासनमोहोन्मूलनासमर्थत्वात् । अतस्तदवच्छेदकसाक्षात्कारितत्त्वज्ञानपर्यन्तं यौक्तं तत्त्वज्ञानं विवर्द्धनीयमिति प्रकृतितत्त्वसाक्षात्कारोत्पत्त्युपपादकं तन्निर्वाहकत्वसङ्गत्या तत्त्वज्ञानविवृद्धिप्रकरणम् ।

[NTĀ, Allahabad edn. pp. 430-431]

(*ii*) This view has been accepted by Keśava Miśra Tarkācārya. [GSP, p. 94]

(390) P. 271, l. 9 : (*i*) The traditional reading of this *sūtra* is : न निष्पन्नावश्यम्भावात् ।

(*ii*) The initial न is missing in *Nyāyātatparyadīpikā* of Bhaṭṭa Vāgīśvara. [NTD, p. 138]

(391) P. 271, l. 13 : After this, the *Nyāyatātparyadīpikā* of Bhaṭṭa Vāgīśvara explains on more sentence as a *sūtra* :

प्रकृतमुपसंहरति—

तस्मात् सर्वदुःखविमोक्षोऽपवर्गः ।

यस्मात् सर्वं दुःखबीजं दुःखं चापवर्गेण विच्छिद्यते । तस्मात् सर्वेण दुःखेन विमुक्तिरपवर्ग इत्येतत् सुगममिति सूत्रार्थः । [NTD, p. 138]

As a matter of fact, the sentence तस्मात् सर्वदुःखविमोक्षोऽपवर्गः is a part of *Nyāya-Bhāṣya* (NB, p. 1095). Vātsyāyana has elaborated this as follows :

यस्मात् सर्वं दुःखबीजं सर्वदुःखायतनं चापवर्गे विच्छिद्यते तस्मात् सर्वेण दुःखेन विमुक्तिरपवर्गः। न निर्बीजं निरायतनं च दुःखमुत्पद्यत इति । [NB, p. 1095]

(392) P. 274, ll. 1-3 : (*a*) According to Vācaspati Miśra II, the *saṅgati* here is, once again, निर्वाहकैक्य :

(*i*) तदेवं तत्त्वज्ञानोत्पत्तिक्रमतद्विवृद्धिकथनेन नैरन्तर्येण ये उपाया निरन्तराभ्यासाभियोगातिशयादयो दर्शिताः । यावत्संशयाद्यपाकरणाय च वादो दर्शित इति यद्यपि सर्वं सुस्थं तथापि त्रयीवहिष्कतैरहंमानिभिः प्रावादुकैरधिक्षिप्ते तत्त्वे सर्वमिदं द्रागेव विघटयिष्यतीति अफल एवैतावान् प्रयासराशिरतः प्रकृतेन तत्त्वज्ञानोत्पत्तिप्रकरणेन चाव्यवहितेन निर्वाहकैकत्वसङ्गत्या तत्परिपालनप्रकरणम् ।

[NTĀ, Allahabad edn. p. 434]

(*ii*) This view is also shared by Keśava Miśra Tarkācārya. [GSP, p. 96]

The close resemblance between the remarks of Vācaspati Miśra II and Rāmabhadra may also be noted.

(393) P. 276, ll. 1-9 : (*a*) This section is very much influenced by *Tātparyaṭīkāpariśuddhi* of Udayana, as is evident from the following passage :

(*i*) इह हि विकल्पवहुत्वेन जातिनिग्रहस्थानयोर्वादिप्रतिवाद्यशक्तिसूचकयोः प्रकरणसमूहरूपाह्निकसमूहरुपाध्यायतत्समूहरूपग्रन्थव्युत्पाद्यतया प्रथमाध्यायभेदस्थितौ सत्यां तदनन्तरमेवाभिधाने प्राप्ते शिष्यापेक्षिततमत्वेन प्रमेयपरीक्षायाः प्रधानतया तिरस्कृतावसरत्वाद् विच्छेदो वृत्तः । एतदेव प्रतिपादयितुमसूत्रयच्च—तद्विकल्पाज्जातिनिग्रहस्थानवहुत्वम इति । अभावानुपयोगकारणान्तरशङ्कात्रये हि शङ्काद्वयं व्युदस्य पारिशेष्येण तृतीयः प्रकारोऽनेन सूच्यते । तदेतस्यार्थस्य परीक्षान्तरिततया विस्मृतस्य स्मारणेनावसरसङ्गत्या पञ्चमोऽध्याय आरभ्यते—साधर्म्यवैधर्म्याभ्यामित्यादिना । अनेन च भाष्येण "तद्विकल्पाद्" इति सूत्रैकदेशं वदता सकलसूत्रार्थः स्मारित इति रहस्यम् । यथाश्रुतेन त्वाह्निकार्थोऽपि दर्शित इति तदनुयायिनः, वार्त्तिककारस्याप्येतदेव विवक्षितम । तमिममर्थं विभावयन्नाह —यद्यपि जातिनिग्रहस्थानभेदा इति । एष चाध्यायो परीक्षापरो लक्षणस्य प्रथमाध्यायार्थत्वेन भेदकत्वानुपपत्तेः, तद्वदुत्तरसूत्रप्रणयनानुपपत्तेश्च । उत्तरसूत्राणि "गोत्वाद्गोसिद्धिवत्तत्सिद्धिः" (न्या. सू. ५।२।३) इत्यादीनि दुष्टत्वव्यवस्थापनेन सदुत्तरत्वशङ्कां व्युदस्यन्ति सन्ति लक्षणांश उपयुज्यते । स्वातन्त्र्येण तु परीक्षापरत्वेन तेषामर्थभेदादध्यायभेदापत्तिः । तथा च पञ्चाध्यायी व्याकुप्येत, व्यतिमिश्रो वाऽर्थः स्यात् । तथा च द्वितीयादिपरीक्षापर्वणोऽपि प्रथमाध्यायान्तर्भावः प्रसज्येत। तस्मात् परीक्षापरत्वे तस्य व्यवस्थितेऽस्य निराश्रयासौ मा प्रसांक्षीदिति हेतुत्वेन लक्षणानामनुप्रवेश इति सानातनिप्रभृतयः प्रतिपेदिरे । अन्ये तु "जातीनां सप्रपञ्चानाम्" इत्यादिवार्त्तिकदर्शनाल्लक्षणं पञ्चमाध्यायार्थ इति मेनिरे । किमत्र तत्त्वम् ? लक्षणमिति ब्रूमः । न हि लक्षणमध्यायार्थ इत्येतावतैव प्रथमपञ्चमयोः सङ्करः । तथा सति परीक्षाया अध्यायार्थत्वेन

त्रयाणामेकत्वप्रसङ्गात् । अथ परीक्षासाम्येऽपि तदवान्तरोपाधिभेदेनाह्निकसमूहानामध्यायभेदस्थितेरयमदोषः, स प्रकृतेऽप्यनुसन्धीयताम । उक्तञ्च यथा प्रथममेव जातिविशेषलक्षणनिग्रहस्थानविशेषलक्षणाभ्यामाह्निकभेदस्थितौ तत्समूहेनोपाधेर्वादिप्रतिवाद्यशक्तिलिङ्गविशेषस्यैकस्यास्य सम्भवात् प्रथमोऽपि पञ्चमाद् भिद्यत एव । न त्वेवं छलमपि पञ्चम एवान्तर्भवत्विति वाच्यम्, अनाह्निकार्थस्याप्रकरणार्थस्य चाध्यायेऽप्रवेशात् । प्रथमे तु तदन्तर्भावः प्रकरणत्वादेवेति न किञ्चिदनुपपन्नम । उत्तरसूत्रप्रणयनं परीक्षार्थत्वे लिङ्गमित्यपि नास्ति, द्वितीयाह्निकाव्याप्तेः । न हि निग्रहस्थानाह्निके लक्षणसूत्रेभ्योऽधिकं किञ्चिदस्ति, ततो भागासिद्धत्वादयमहेतुः । जात्याह्निकस्यैव पक्षीकरणेऽयमदोष इति चेत् ? न, तथा सत्यध्यायोपाधेरलाभात् । तस्माद् यथोक्तलक्षणमेवाध्यायार्थः ।

का गतिस्तर्हि "गोत्वाद्गोसिद्धिवत्तत्सिद्धिः" [न्या.सू. ५।२।३] इति सूत्राणाम ? या परीक्षामध्यवर्तिनां "व्यक्तिर्गुणविशेषाश्रयो मूर्त्तिः" [न्या.सू. २।२।६७] इति लक्षणसूत्राणाम्, या च लक्षणमध्यपतितानां "वाक्छलमेवोपचारच्छलं तदविशेषात" [न्या.सू. २।२।१५] इत्यादीनां परीक्षासूत्राणाम् । अध्यायानामन्यपरत्वेऽपि प्रसङ्गोपोद्घातादिनाऽप्रकृतार्थ-चिन्तादि कुत्रचित् क्वचित् क्रियत एव शिष्यहितैषिणा सूत्रकृतेति चेत् ? स इहापि समं समाधिः । न चेदेवम् ? "तद्विकल्पाज्जातिनिग्रहस्थानवहुत्वम्" [न्या.सू. १।२।२०] इत्यादि सूत्रं नारभ्येत । परीक्षाया यथाक्रमेणैव प्रवर्तने विलम्बानुपपत्तौ तत्समाधानानुपपत्तेः । तथा च तत्प्रतिज्ञातमनुस्मार्य इदानीं विशेषो वक्तव्य इत्यध्यायावतारोप्यनुपपन्नः स्यात् । स्वावसरातिक्रमे ह्यनवसरत्वोपाधिविगमादवसरप्रदर्शनमुपपद्यते, न त्वन्यथा । न चायमर्थः, यतः "तद्विशेषपरीक्षावसर एव विशेषलक्षणानि वक्ष्यामः"—इति विरोधात् । बहुत्वाद्धि परीक्षाबहिर्भूतानामेव लक्षणमुचितम्, दुरू-

हत्वेनाभ्यासतः प्रतिपत्तिसौकर्यात्, यथा प्रमाणादीनामेव षोडशाना-मिति। न तु लक्षणपरीक्षासाङ्कर्येण । एतत् सर्वमभिसन्धाय विभागमवधार्य व्याख्याय च "लक्षण त्वि"ति [न्या.भा. ५।२।२] प्राधान्येन लक्षणमवतारयति स्म भाष्यकारः । लक्षणादतिरिक्तानि च सूत्राणि च किमर्थमित्याशङ्क्य षट्पक्षीमुपसंहृत्य "यदा तु कार्यान्यत्व" [न्या.भा. ५।२।८३] इत्यादिना यथोक्तसदुत्तरे न षट्पक्षी प्रवर्त्तते, इतरथा तु षट्पक्ष्यामुभयोरसिद्धिः स्यात्—इति शिष्यशिक्षामात्रप्रयोजकान्येतानीति विभावयाम्बभूव । तदैवमेषामुत्थानं यदि जात्युत्तरमेतदित्युद्भाविते‌ऽपि 'तवैषा परिभाषा, मम तु सदुत्तरमेवे'ति जातिवादी ब्रूयात्, तदा किं प्रतिवक्तव्यमिति शिष्यापेक्षायामुपतिष्ठते "गोत्वादि"त्यादि । लक्षणमध्यायार्थ इति च द्वितीयाह्निकार्थस्य पूर्वाह्निकेन सहैकवाक्यतां दर्शयन्निरपवादमाह— "तानीमानि द्वाविंशतिधा विभज्य लक्ष्यन्त" [न्या.भा. ५।२।२] इति । अत एव त्रिविधां शास्त्रप्रवृत्तिमनुस्मृत्य जातय उद्दिष्टा लक्षिता अपि किमिति न परीक्षिता इत्याशङ्क्य वार्त्तिककृत् प्रथमाह्निकसमाप्तावाह— "एतास्तु जातयो नैव तत्त्वविवेकमुपकुर्वन्तीति भेदमात्रमासामुक्तम्" [न्या. वा. ५।१।४३] इति । अस्यायमर्थः । नाहत्य तत्त्वज्ञानं प्रयुज्यमान-तयोपकुर्वन्ति, निराकरणीयतया त्वासामुपकारकत्वम। अतो भेदमात्रं लक्षणमात्रमुक्तम् । मात्रशब्देन परीक्षां व्यवच्छिनत्ति । तमिमं न्यायसिद्ध-मध्यायार्थमुपसंहरन्नाह— "जातीनां सप्रपञ्चानाम्" [न्या.वा. ५।२।२४] इत्यादि । टीकाकारोऽपि सङ्गतिं दर्शयन्नेव निर्विचिकित्समेवाध्यायार्थ-मुक्तवान—"तदनन्तरमवशिष्टं जातिनिग्रहस्थानविशेषलक्षणं वर्तयति" [न्या. वा. ता. टी. ५।१।१] इति । तस्माल्लक्षणमेवाध्यायार्थ इति स्थितम।

[TTP, A.L. Thakur's Press Copy, Chapter V, pp. 1-4.]

(*b*) Bhaṭṭa Vāgīśvara, Vardhamāna Upādhyāya, Keśava Miśra Tarkācārya and Viśvanātha Nyāyapañcānana

also maintain similar views. [NTD, p. 141 ; ANTB, pp. 3-5 ; GSP, p. 98 ; NSV, p. 1004.]

(394) P. 275, l. 10— P. 276, l. 9 : (*a*) This seems to be abbreviated from the following portion of *Anvīkṣānayatattvabodha* (henceforth, ANTB) of Vardhamāna Upādhyāya :

का पुनर्जातिः ? तत्र सिद्धं दूषणासमर्थमुत्तरं जातिः । तथा हि— व्यपकृष्टमुत्तर द्विधा —दूषणसमर्थमप्यसिद्धम्, सिद्धमपि दूषणासमर्थम् । आद्यमपि कल्पितदूष्यम्, तत्तु च्छलम्, अकल्पितदूष्यन्तु निरनुयोज्यानुयोगः, शेषं जातिरिति न, असिद्धस्यापि दूषणासमर्थस्य जातित्वात् । 'यदि घटसाधर्म्यात् कार्यत्वादनित्य शब्दः, नित्यसाधर्म्याद् विभुत्वान्नित्यः किन्न स्यादि'ति प्रत्यवस्थानसम्भवात् ।

न चासङ्कीर्णोदाहरणमात्रपरमिदम्, सिद्धस्य दूषणासमर्थस्यापि हेत्वाभासान्तरसङ्कीर्णत्वात् । न च जातिच्छलयोरेव मिथोऽसाङ्कर्य विवक्षितम्, असिद्धस्य दूषणासमर्थस्य कल्पितदूष्यस्य छलसङ्कीर्णत्वात् ।

दूषणासामर्थ्यमात्रत्वं न जातिलक्षणम्, छलाभिव्यापकत्वात्, असदुक्तिव्यापनाच्च । तत्र वस्तुतो दूषणासामर्थ्यात् स्वव्याघातकमुत्तरं जातिरिति चेन्न, तद्धि न स्वव्याघातकप्रतिपादकत्वम्, जातिवादिनः स्वदोषाप्रतिपादकत्वात् ।... स्वव्याघातकत्वञ्च तस्य तज्जातीयस्य वा ? नाद्यः, व्यक्त्यभेदे व्याघातस्यासम्भवात् । नान्त्यः ; साजात्यं हि न साधर्म्यसमादित्वेन, अव्यापनात् ; न जातित्वेन, आत्माश्रयात् तस्यानिरुक्तेः ।

स्वासाधकत्वसाधनसमर्थोपस्थापकमुत्तरं जातिरिति चेत् ? न, जात्युत्तरस्य तत्रासामर्थ्यात् ।

स्वप्रतिपाद्यत्वोद्देश्यकदोषप्रयोजकत्वाभिमतरुपवत्प्रतिपादकवाक्यमुत्तरमिति चेत् ? न, सालम्बनानुमानप्रतिपक्षतयोपन्यस्ते 'निरालम्बनमिदं वस्तुत्वात्' इत्य'त्रेदमनुमानम् [अनैकान्तिकम्], अनुमानत्वादि'त्यत्र चोत्तरेऽतिव्याप्तेः ।

न च तयोर्जातित्वमेव, चतुर्विंशतिजातिष्वनन्तर्भावात् । किञ्च, समीचीन एवोत्तरे सत्प्रतिपक्षरूपे दोषप्रयोजकं सत्प्रतिपक्षत्वमस्तीत्यतिव्याप्तिः ।

व्याप्तिपक्षधर्मताऽन्यतरानङ्गीकारप्रवृत्तमुत्तरं जातिः, निरालम्बनत्वानैकान्तिकत्वानुमानयोः, सत्प्रतिपक्षे च तयोः पुरस्कारेण नातिव्याप्तिरिति चेत् ? न, 'तदिदमसाधकम्, प्रतिधर्मप्रतिहतत्वात्' — इत्यादेस्तत्पुरस्कारेऽपि जातित्वात्, अन्यतरत्वस्य व्यर्थविशेषणत्वात् ।

अङ्गवैकल्योपन्यासं विना प्रमाणदूषणोद्भावनं जातिरिति चेत् ? न, तद्ध्यङ्गवैकल्यतात्पर्यकोपन्यासः, अतत्प्रतिपादको वा ? नाद्यः, अतत्परत्वेऽप्युपन्यासदोषेण जातित्वात् । नान्त्यः, अधिकोद्भावनेऽपि जातित्वापत्तेः।

असाधकत्वाव्याप्येनासाधकतासाधनं जातिरिति चेत् ? न, असदुक्तिकाव्यापनात् ।

असाधकताव्याप्यत्वापुरस्कृतासाधकताव्याप्यादन्येनासाधकतासाधनं जातिरिति चेत् ? न, व्याप्त्यपुरस्कारवत् पक्षधर्मताऽपुरस्कारेऽपि जातिसम्भवे तदव्यापनात् ।

यदसाधकताव्याप्यं साधयति तद्व्याप्तपुरस्कृतगमकतौपयिकरूपविकलने स्थापनादूषणोद्भावनं जातिरिति चेत् ? न, अर्थान्तरसङ्कीर्णजातेरव्यापनात्।

हेत्वाभासव्यतिरिक्तो निरनुयोज्यानुयोगो जातिरिति चेत् ? न, तत्सङ्कीर्णजात्यव्यापनात् ।

जातित्वं वाक्यत्वावान्तरजातिभेदः, स च जात्यन्तरवदनुगतमतिमानकः; न हि व्यवस्थापकनियतैव जातिः, तदवान्तरभेदाश्च साधर्म्यसमत्वादय इति चेत् ? न, वाक्यार्थान्वयं विना वाक्ये जात्यनुदयात । तद्धीव्यङ्ग्यत्वे तु तत्काले शब्दस्याभावात् कथं प्रत्यक्षेण तद्ग्रहः ? वाक्यार्थद्वारकानुगतमतेश्च तत्कल्पकत्वे तेनैवान्यथासिद्धेः।

उच्यते—स्वासाधकाप्रयोजकरूपवता परासाधकतासाधनं जातिः, स्वव्याघातकत्वमपि तदेव विवक्षितम् । तथा हि —जात्युत्तरं हि येन रुपेण स्थापनां व्याहन्ति, तेनैव यदि स्वात्मानमपि, तदा स्वव्याघातकम् । निरालम्वनत्वाद्यनुमानं च स्वेन रूपेण प्रतिपक्षेण सत्प्रतिपक्षतया स्थापनां दूषयति, न तु स्वेनैव स्वप्रतिपक्षभावमालम्वत इति विशेषः ।

अन्ये तु — निरालम्वनत्वानुमानादेरपि जातित्वम् ; न च परिगणनभङ्गप्रसङ्गः, उपपत्तिसमाया आकृतिगणतया तत्रैवान्तर्भावात् । तथा हि —निरालम्वनत्वानुमानादेर्निरालम्वनत्वमेव, तच्च तस्य नान्यतः सिद्धम्, तथाविधसाधनानुपलब्धेरिति तत एव तद्वाच्यम्, अतः स्वव्याघातकत्वं तत्रेत्याहुः ।   [ANTB, Allahabad edn. pp. 6-7].

(*b*) Some similarity of these lines may also be found in the *Vādivinoda* of Śaṅkara Miśra :

अथ जातिः । व्याप्तिमपुरस्कृत्यासाधकत्वसाधनाभिप्रायेण प्रयुक्तमुत्तरं जातिः, साधकताप्रयोजकरूपेण परासाधकतासाधनं वा । न तु सिद्धदूषणासमर्थमुत्तरं जातिः, असिद्धस्यापि दूषणासमर्थस्य जातित्वात्, 'यदि घटसाधर्म्यात् कृतकत्वादनित्यः शव्द इति, नित्यसाधर्म्याद् विभुत्वान्नित्यः किं न स्यादि'ति प्रत्यवस्थानसम्भवात्। तत्र प्रथमं साध्यसमा । सा चैवं प्रवर्तते —'शव्दोऽनित्यः कृतकत्वाद् घटवदि'ति स्थापनायां 'यदि घटसाधर्म्यात् कृतकत्वादयमनित्यो हन्त ! आकाशसाधर्म्यात् प्रमेयत्वात् नित्य एव किं न स्यादि'ति । इयञ्च सद्विषया, स्थापनायाः सम्यक्त्वात्। अथाऽसद्विषया—'शव्दो नित्यः श्रावणत्वात् शव्दत्ववदि'त्यत्रासमीचीनायां स्थापनायां 'अनित्यसाधर्म्यात् अनित्य एव किं न स्यादि'ति । असदुक्तिका तृतीया—'नित्यः शव्दः श्रावणत्वादि'ति प्रयुक्ते 'श्रावणत्वान्नित्यसाधर्म्याद् यदि नित्यस्तदा कृतकत्वादनित्यसाधर्म्यादनित्य एव किं न स्यादि'ति । उक्तिमात्रमत्र दूष्यं न तु साधनमपि । यद्यप्यसदुक्तिकायामसद्विपयध्रौव्यम्,

तथाप्युक्तदोषादपि जातिः सम्भवतीति प्रदर्शनार्थं प्रकारत्रयाभिधानमकरोत् । [*Vādivinoda* (henceforth VV), p. 22.]

(395) P. 377, ll. 16-P. 378, l. 3 : (*a*) The word 'सम' occuring in this *sūtra* has received various interpretations, as is evident from the following remarks of Uddyotakara, Vācaspati Miśra I, Udayana, Vardhamāna Udādhyaya and Vācaspati Miśra II :

(*i*) समीकरणार्थं प्रयोगो समः, साधर्म्यमेव समं वैधर्म्यमेव सममिति समार्थः समीकरणार्थः प्रयोगो द्रष्टव्यः । समीक्रियतां परपक्षो मा वा कारि, अयं तु समीकरणार्थं प्रवर्तते यथा लोके कुटुम्बार्थं घटत इति । विशेषहेत्वभावो वा समार्थः, न भवता विशेषहेतुः कश्चिदपदिश्यते इति । एवमर्थमुररीकृत्य प्रवर्तते—यथाभूतं भवतः साधनं तथाभूतं ममापीति । न च सर्वापदेशव्याप्तिरव्यापकत्वात् । न हि सर्वापदेशे सर्वा जातयः प्रवर्तन्ते, न हि वैधर्म्येण स्थापनायामुत्कर्षापकर्षवर्ण्यविकल्पसमाः प्रयोक्तुं शक्यन्त इति । न च वादिप्रतिवादिनोस्तुल्यता समार्थः, जातेरसदुत्तरत्वात—नियमेनैव जातिवाद्यसद्वादी भवति, वादिनां तु सदसद्वादित्वे अनियम इति । [NV, p. 2004.]

(*ii*) ननु साधर्म्यसमादीत्युच्यते, न च वस्तुतः साधर्म्यसमादीनां साम्यमस्ति स्थापनया, तथा सत्यजातित्वप्रसङ्गादित्यत आह—समीकरणार्थं प्रयोग इति । आभिमानिकसाम्यं न वास्तवमित्यर्थः । साधर्म्यमेव समं यस्मिन् प्रयोग इति शेषः। तदिदमुक्तं समार्थः साधर्म्यसमार्थः समीकरणार्थः प्रयोगो द्रष्टव्य इति । एवं वैधर्म्यमेव सममित्यत्र विग्रहे स्वरूपेण साम्यमुक्त्वा विशेषहेत्वभावेत साम्यमाह— विशेषहेत्वभावो वेति । ये त्वाहुः सर्वेष्वेवापदेशेषु सर्वासामेव जातीनां प्रयोग इति, तान् प्रत्याह—सर्वापदेशव्याप्तिः सर्वजातिप्रयोगस्य । अपदेशो हेतुवचनम् । ये पुनः साधर्म्यसम इत्यादौ समशब्दस्तस्य साधनवादिजातिवादिनो-

स्तुल्यार्थत्वाद् यादृशो वादी तादृशः प्रतिवाद्यपि साधर्म्यैण द्वौ समाविति मन्यन्ते, तात् प्रत्याह—न च वादिप्रतिवादिनोस्तुल्यता समार्थः, प्रतिवादी जातिवादी विवक्षितः । [NVTT, pp. 2003-2004]

(*iii*) यद्यपि समोत्तरं हेतुतो नोत्कृष्टं तथापि तेन समीकरिष्यामीति प्रयोगः समः, तादर्थ्यात्तदभिप्रायपूर्वकत्वाद्वेत्याचायः । यदूचे—"समार्थः समीकरणार्थः प्रयोगो द्रष्टव्यः" [न्या. वा. ५।१।१] इति । एतेन बुद्धिपूर्वको जातिप्रयोगः साम्यापादनायेति सूचितं भवति । ... ...भाष्यकारस्तु विशेषहेत्वभावं साम्यमाह । यदवोचत्— "साधर्म्येण प्रत्यवस्थानमविशिष्यमाणम्" [न्या.भा. ५।१।१] इति । 'यथा हि त्वदुपन्यस्तं साधर्म्यं तथा मदुक्तमपि, यथेदमेतत्सहचरितभूपलब्धं तथेदमपी'त्याकारेण जातिवादिना प्रत्यवस्थानात्, तेन प्रत्यवस्थानस्वरूपं सर्वजातिसाधारणं सूचितम् । ... ... अन्य तु वक्तृधर्मं वचन उपचरन्ति । जातिवादी हि समः साधारणो नोत्कृष्टाऽपकृष्ट इति । स च साधर्म्याद्युत्तरद्वारैवोन्नीयत इति उत्तरमेव सममपकृष्ट मित्यर्थः । ...वय तु ब्रूमः, तत् त्रयम्, चतुर्थश्चायमर्थः यज्ञात्युत्तरं परसाधनमिव स्वात्मानमपि व्याप्नोतीत्यतः स्वपरसाम्यात् सममित्युच्यते । तथा च, स्वात्मव्याघातकत्वं नाम सर्वसाधारणं दुष्टत्वमूलमस्य सूचितं भवति । ... ...

[*Nyāyapariśiṣṭa* (henceforth NP), pp. 4-7]

(*iv*) लाघवाय द्वन्द्वः समासः । स च सर्वपदार्थप्रधान इति दूषकतायां परस्परानपेक्षतं सूचितम् । लक्षणसूत्रोपस्थापितलक्ष्यानुसारेण विग्रहः । समशब्दः प्रत्येकमभिसम्बध्यते । समशब्दार्थश्च वादिनोस्तुल्यता । जात्यत्तरस्य स्थापनादूषकत्ववत् स्वस्यापि दूषकत्वादिति जातीनां साधारणं दूषकत्ववीजं स्वव्याघातकत्वं सूचितम् । यद्वा—स्थापनायाः समीकरणाभिप्रायस्य जातिप्रयोगकारणत्वात् साम्यापादननियतबुद्धिपूर्वप्रयोगत्वं जातीनां व्यञ्जितम् । अन्यथा सदुत्तरापरिस्फुर्तावहमेवापकृष्टः स्यामित्यभिप्रेत्य

तत्प्रयोगात् । एतेनोक्तिसम्भवोऽपि दर्शितः । असाधारणं तु दुष्टताबीजं प्रत्युत्तरसूत्रेषु सूत्रकार एव वक्ष्यति । [ANTB, p. 12]

(v) तद्विकल्पाज्जातिनिग्रहस्थान बहुत्वमि" [न्या. सू. १।२।२०] ति संक्षेपेणोक्तं प्रपञ्च्यते । समाशब्दः प्रत्येकान्वितः । समेति लक्षणगतं जातिपदं विभक्तिव्यत्ययेनान्वीयते । साधर्म्येण समा स्वपरासाधकयोस्तुल्येति साधर्म्यसमेत्यादि नेयम् ।

अथ वा—समयितुं प्रयुज्यते समीकरणाय प्रयुज्यत इति समा । तादर्थ्यात्ताच्छब्द्यम् । किं वा समीकरणाभिप्रायेण प्रयुज्यत इत्येव समेति परिभाषा। यद्यपि समीकर्तुमशक्यैव, तथापि समीकरणाभिप्रायेण प्रयोगादेव समेत्यर्थः । समेव वा समा न परमार्थतः समा जातेरसदुत्तरत्वात्, स्थापनायाश्च सदुत्तरत्वात् ; तथापि साधर्म्येण स्थापना समेवेति साधर्म्य-समेत्यर्थः ।

यद्वा—'समौ स्यावे'ति वादिना स्वसमीकरणार्थं प्रयुक्ता जातिः समा । यदि ह्ययं वादी मदुक्तजात्युत्तरेणाकुलीकृतो निःप्रतिभः स्यादसद्वा ब्रूयात्तदा मम निरनुयोज्यानुयोगवदेतस्य पर्यनुयोज्योपेक्षणं निरनुयोज्या-नुयोगो वा स्यादिति समौ स्याव, अन्यथाहमेवापकृष्टः सदुत्तरास्फुरणतः स्यामित्यभिप्रायेण प्रयोगादिति । अत्र स्वसमेति प्रयोगापत्तौ साधर्म्यसमादिः परिभाषा ।

यद्वा सममाचष्ट (इति) समा, "तत् करोति तदाचष्ट" [गणसूत्र, under पा. सू. ३।४।१७] इति णिचि पचाद्यच्, समशब्दः साधारणवाचकः । तथा च जात्युत्तरं स्ववक्तारं समं न न्यूनं न वोत्कृष्टं गमयति । अवचने ह्यप्रतिभयाऽपकृष्ट एव स्यात् । सदुत्तरवचने चोत्कृष्ट एव स्यात् । जातिवचनेन च समस्तिष्ठतीति । तथा च साधर्म्येण समाभिधायिका साधर्म्यसमेति । [NTĀ, pp. 476-477.]

(396) P. 278, ll. 8-11 : This dispute about gender can also be found in the following passages from the works of Jayanta Bhaṭṭa, Vācaspati Miśra I, Udayana, Vardhamāna Upādhyāya, Vācaspati Miśra II and Viśvanātha Nyāyapañcānana :

(*i*) अत्र समा इति स्त्रियां पुंसि च तुल्यत्वान्निर्देशस्य जात्यपेक्षया स्त्रीनिर्देशो वा प्रतिषेधापेक्षया वा पुंनिर्देशो वर्णनीयः। विशेषलक्षणसूत्रेषु पुनः प्रायेण पुंलिङ्गनिर्देशो दृश्यते स तु प्रतिषेधापेक्षया तेषु व्याख्येय इति तद्व्याख्यानावसर एव वक्ष्यामः। [NM, Vol. III, p. 154.]

(*ii*) प्रतिषेधाविति सूत्रपूरणेन पुंलिङ्गं समर्थयते, अन्यथा जातेः प्रकृतत्वात् सामानाधिकरण्येन साधर्म्यवैधर्म्यसमे इति स्यात्।

[NVTT, p. 2005.]

(*iii*) प्रतिषेधभागसूचनाय पुंलिङ्गनिर्देशः। [NP, p. 8.]

(*iv*) ननु साधर्म्यवैधर्म्यसमाविति पुंलिङ्गनिर्देशो न युक्तः, प्रत्यवस्थानस्य विशेष्यत्वे नपुंसकत्वापत्तेः, जातिविशेष्यत्वे स्त्रीलिङ्गतापत्तेः, इत्यत आह— प्रतिषेधेति। न हि जातिः स्थापनरूपा, किन्तु प्रतिषेधरूपा ; निरनुयोज्यानुयोगरूपत्वाज्जातेरित्यर्थः। [NPP, p. 8]

(*v*) यद्यप्युद्दिश्यप्रत्यवस्थानपदपुरस्कारे नपुंसकत्वम्, जातिविशेष्यत्वे स्त्रीलिङ्गं सूचितम् ; तथापि साधर्म्यवैधर्म्यसमौ प्रतिषेधावित्यन्वयात् पुंलिङ्गनिर्देशः, निरनुयोज्यानुयोगविशेषतया जातेः प्रतिषेधरूपत्वात्, तेन प्रत्यवस्थानस्य स्वपक्षस्थापनापरपक्षप्रतिषेधात्मकत्वात् द्वितीयसूत्रभागस्य स्थापनासाधारण्येऽपि उत्तरकक्षापातिता लभ्यते। यद्यपि जातिपदं "क्तिच् क्तौ च संज्ञायाम्" [पा.सू. ३।३।१७४] इति सूत्रेण क्तिच्प्रत्ययान्तं पुंलिङ्गमेव युक्तमिति नाध्याहारापेक्षा ; तथापि ... ... भाष्यकृता "ताः स्वल्विमाः जातय" [न्या.भा. ५।१।१] इत्यभिधानात् वार्त्तिककृतापि "जातेः

संक्षेपेणोक्ताया" [न्या.वा.५।१।१] इत्यभिधानात् पूर्वेषामाचार्याणां क्तिन्नन्तमेव जातिपदमनुगतमिति तदनुरोधादध्याहार एव युक्तः।

[ANTB, pp. 13-14]

(*vi*) ... ... साधर्म्यवैधर्म्यसमौ जातिविशेषावित्यर्थवशप्राप्तेनान्वयः। न तु सामान्यलक्षणगतप्रत्यवस्थानमनुवर्तनीयम्, तथापि लिङ्गासङ्गतेः। न च स्वपक्षसाधनव्यवच्छेदेन प्रतिषेधभागः प्राप्यतामिति सूचनाय पुंलिङ्गनिर्देश इति युक्तम्। सामान्यलक्षणन्तु प्रत्यवस्थानपदस्य विशेषपरत्वात् तदनुवर्तनेनैव तल्लाभात्। किञ्च, विशेषलक्षणस्य तत्तद्विशेषपरत्वावश्यकत्वे तेनैव तत्सिद्धेः। एवञ्च सर्वत्रैव विशेषपरतया पुंलिङ्गनिर्देशो वैचित्र्यार्थः।

[NTĀ, p. 438]

(*vii*) अत्र च जातेर्विशेष्यत्वात् स्त्रीलिङ्गं समाशब्दं मन्वन्ते। भाष्यवार्त्तिकादौ समशब्दः। अग्रिमसूत्रेषु च समशब्दो निर्विवाद एव। तत्र जातिशब्दस्य स्त्रीलिङ्गतया यद्यपि नान्वयस्तथाऽपि प्रतिषेधो विशेष्य इति भाष्यादयः।

वयं तु—तद्विकल्पादिति सूत्रस्थ विकल्पस्यैव विशेष्यत्वम्। विविधः कल्पः प्रकारो विकल्पः। तथा चैते साधर्म्यसमादयो जातिविकल्पाः। एवमग्रिमसूत्रेष्वपि। इत्थं च जातेर्विशेष्यत्वे साधर्म्यसमेत्यपि ब्रूमः।

[NSV, pp. 2004-2005]

From a cursory examination of these passages, it is clear that Vācaspati Miśra II has rejected the solution offered by Udayana and Vardhamāna Upādhyāya. Subsequent writers like Jānakīnātha Cuḍāmaṇi and Keśava Miśra Tarkācārya have not accepted here the view of Vācaspati Miśra II [see GSP, p. 99]. Viśvanātha Nyāyapañcānana has given a new solution.

(397) P. 278, l. 17 : Here, the relevant portion of ***Nyāyavārttikatātparyaṭīkā*** is as follows :

तद्धर्मविपर्ययोपपत्तेः कृते साध्यविपर्ययोपपत्त्यर्थमित्यर्थः ।
[NVTT, p. 2004]

(398) P. 279, ll. 7-12 : (*a*) Here, the relevant remark of Udayana is as follows :

(*i*) अप्रयोजकविपक्षान्वयिधर्मवत्त्वं कारणमाद्यायाः, अप्रयोजकसपक्षव्यतिरेकिधर्मवत्त्वदर्शनं च द्वितीयाया इति विभावयितुं भेदेनोपन्यास इति । अन्यथा तु धर्मान्तरेण तद्धर्मविपर्ययोपपत्तेः प्रत्यवस्थानं प्रतिधर्मसमेत्येकैव स्यात् । कथं पुनः प्रतिधर्मसमप्रकरणसमयोर्भेद इति ? इयं वाधदेशनाभासा, 'तद्धर्मविपर्ययोपपत्ते'रिति वचनात्; सा सत्प्रतिपक्षदेशनाभासा, "प्रक्रियासिद्धे"रिति वचनादित्येके । एवं च मन्यन्ते—प्रमाणान्तरवाधचोदनाभासोऽप्येवं संगृहीतः स्यादिति । [NP, p. 10]

(*b*) Vardhamāna Upādhyāya has explained it in the following manner :

ननु यथा प्रकरणसमैकैव साधर्म्यवैधर्म्ये अनादृत्य उक्ता, तथा साधर्म्यवैधर्म्यसमे प्रतिधर्मसमेत्येकयोक्त्या किं नाभिधीयत इत्यत आह—अप्रयोजकेति। अप्रयोजकमापाद्य व्याप्यत्वानभिमतमित्यर्थः । शिष्यव्युत्पादनरसिकतया मुनेर्भेदोपन्यासादरो न ग्रन्थलाघवाग्रहः, प्रकरणसमे त्वनया दिशा विशेषो निरूपणीय इति मत्वा सतोऽपि साधर्म्यादिभेदस्यावचनम् ; अन्यथा विरोधिधर्मेण प्रत्यवस्थानं विरोधिसम इति साधर्म्यवैधर्म्यसमानामप्यैक्यं स्यादिति । यदि प्रतिपक्षवाधनादेशनाभासवैचित्र्यख्यापनाय भेदेन निर्देशस्तर्हि प्रकृतेऽपि तुल्यमिति भावः । इह जातित्वसाक्षाद्व्याप्यदूपकत्वोपाधिविभागः, स च यद्यपि प्रतिधर्मत्वमेव, तथापि प्रतिधर्मत्वमेव साधर्म्यवैधर्म्ये अप्रतिपद्य न गृह्यत इति भेदेनोपन्यास इत्यन्य, यदि लाघवायोक्तं विशेषमनादृत्य लक्षणपरत्वमेवास्य स्यात्, तथा च यथासूत्रं कर्तव्यम् । तदाह—अन्यथेति । दूष्यहेतुसाधर्म्याभावस्य प्रमाणेनोपपत्तेः सिद्धेर्व्यक्तं वाधकमाह । न हि सत्प्रतिपक्षे साध्यसिद्धिरित्यर्थः । प्रक्रियेति ।

प्रक्रियमाणो दूष्यहेतुसाध्यप्रत्यनीकपक्षस्तत्सिद्ध्यर्थं प्रत्यवस्थानमिति पर्यवसिते सुलभं प्रतिरोधदेशनाभासत्वमित्यर्थः । यद् वा— प्रक्रियमाणमुलभः तत्सिद्धौ विरोध इति प्रतिरोधमात्रप्राप्तेरित्यर्थः। प्रमाणान्तरेति । साधर्म्यवैधर्माभ्यामुपसंहारे कृते तद्धर्मविपर्ययोपन्यासेन येन केनचित् प्रत्यवस्थानमिति पर्यवसिते सुलभः प्रमाणान्तरवाध-देशनासंग्रहः। यदि च प्रकरणसमाजातिर्वाधदेशनाभासतयाङ्गीक्रियेत, तदा सूत्र "उभयसाधर्म्यादि"ति अनुमानमात्रवाधोन्नयनात् तत्संग्रहः स्यादित्यर्थः ।

[NPP, pp. 9-10.]

(399) P. 279, ll, 13-15 (*a*) Here we can see the influence of the following remark of Udayana :

प्रत्येकं त्रिधा चैते जाती, सद्विषये, असद्विषये, असदुक्तिके च, तत्राद्योदाहरणं वार्त्तिके । द्वितीयोदाहरणन्तु—'नित्यः शव्दः स्पर्शशून्यत्वादाकाशवदि'त्युपसंहारे—'नैतदेवम्, नित्योऽपि न स्यादविशेषात्' । यद् वा—'अस्त्याकाशेनैव वैधर्म्यमप्यस्मदादिवाह्यकरणग्राह्यत्वम्, ततः किं नानित्यो घटवत् । न चेदेवम्, नित्योऽपि न स्यादविशेषात्' । तृतीयोदाहरणं भाष्य । "उक्तिमात्रमत्र दुष्टं नार्थ" इति प्रदर्शनार्थं वार्त्तिकतात्पर्यमुपेक्ष्योक्ता तात्पर्याचायः, "सदुत्तरमप्युक्तिदोषेणैव जाति"रित्यस्यार्थस्य प्रतिदृष्टान्तप्रकरणसमादौ स्वयं स्फुटीकरणात् ।

[NP, pp, 9-10.].

(*b*) Vardhamāna Upādhyāya has explained this passage in the following manner :

सद्विषये इति । सदनुमानं प्रतिषेधतया विषयो ययोरेवमुत्तरत्र । असदुक्तिके चति । क्वचित् साधनमेवासंमर्थं यथाभासोक्तौ, क्वचिदुक्तिमात्रगतमसामर्थ्यं न तूच्यमानगतमित्यर्थः । यद्यप्यसदुक्तिकत्वमसद्विषयत्वविशेष एव, यत्र सद्विषये स्थापना समीचीना तत्रोत्तरस्यावश्यं दुष्टत्वात्, असद्विषये तूत्तरस्य समीचीनत्वासमीचीनत्वाभ्यामसदुक्तिकावकाशसम्भवात्,

तथापि गोवलीवर्दन्यायेन विभागो द्रष्टव्यः । तत्रेति । "यद्युत्पत्तिधर्मकत्वादनित्यः स्यान्नित्यसाधर्म्यादमूर्त्तत्वान्नित्य एव स्यादिति वार्त्तिकोक्तमित्यर्थः । तृतीयेति । "यदि क्रियाहेतुगुणयोगाल्लोष्टवदात्मा क्रियावान्, अस्त्वाकाशसाधर्म्याद्विभुत्वान्निष्क्रियोऽसौ, न च नास्ति विशेषहेतुरि"ति । तत्तावन्नासिद्धविरुद्धोद्भावनम्, तत्प्रयोजकरुपानुद्भावनात्; नानैकान्तिकत्वमाकाशादौ साध्याभाववति हेत्वभावात्, आत्मनस्तु पक्षत्वात्; नापि वाधः, यथोक्तरूपहेतोर्विभुत्वादुपजीवकत्वात्; नापि सत्प्रतिपक्षत्वम्, क्रियाहेतुगुणयुक्तस्यापि निष्क्रियस्याकाशस्य स्वयमुद्भावनात्—इत्युक्तिमात्रदुष्टमित्यर्थः । कथं तर्हि "उत्तरमेतन्न जाति"रिति टीका ? वस्तुगत्येति शेष इति समुन्नयनात् । ननु यद्येतद् भाष्यकारीयमुदाहरणं प्रकृतजातिरेव, किमिति टीकाकारो वार्त्तिककारस्योपेक्षां वर्णितवानित्यत आह—उक्तिमात्रमिति । उपेक्षा वार्त्तिककारतात्पर्यमुक्तेत्यर्थः । तात्पर्यमभिप्रायः । तथा च भाष्यकारीयोदाहरणे वार्त्तिककृतः कीदृशोऽभिप्रायो हानोपादानोपेक्षान्यतम इति जिज्ञासायां टीकाकृतोक्तम—उपेक्षेति । कथमयमभिप्रायस्त्वयोन्नीयत इत्यत आह— मदुत्तरमपीति । तथा च तुल्ययोगक्षेमतया प्रकृतेऽपि सम्मतिरुन्नीयत इति भावः ।

[NPP, p. 9.]

(400) P. 280, l. 11- p.281, l. 5 : (*a*) Here, Jānakīnātha has referred to the following passage from *Nyāyapariśiṣṭa* of Udayana :

"प्रत्युत्तरसत्रपर्यालोचनया व्यत्यय" इति तात्पर्यटीका । इह हि प्रत्युत्तरक्रमे विशेषं दर्शयति, तत्र तु प्रतिसाधने वाधमापादयति । किमत्र तत्त्वम् ? उत्तरम्—अनन्यथासिद्धः । न हि सत्प्रतिपक्षचोदनायां प्रतिसाधनवाधक आपाद्यते, सत्प्रतिपक्षत्वं चापन्नमपि न दोषाय, असाधनात्; प्रत्युत गुणाय, साम्यमात्रापादनप्रवृत्तत्वात् । न च समवलेन वाधाभिधायिनो

व्याघातमुपेक्ष्य विशेषदर्शनं ज्यायः, उद्भटापराधोपेक्षणायोगात् । तद्धर्मविपर्ययोपपत्तिप्रक्रियासिद्धी तु विपर्ययेणापि व्याख्यातुं शक्येते । प्रमाणान्तरबाधचोदनाभासवच्च प्रमाणान्तरप्रतिरोधचोदनाभासोऽपि संग्राह्यः, तथा च तदर्थमपि सूत्रमनुसन्धानीयमिति न कश्चिद्विशेषः ।

[NP, p. 11.]

(*b*) **Vardhamāna Upādhyāya has explained this passage in the following manner :**

व्यत्ययः पूर्ववैपरीत्यम् । इह हीति । अविशेषपुरस्कारेण प्रवृत्तस्य हि विशेषोपदर्शनमुपालम्भौपयिकमुपपद्यते । न च वाधदेशनायामविशेष-पुरस्कारः, दूष्याविशिष्टस्यादूषकत्वात्, सत्प्रतिपक्षदेशनाया एव ताद्रूप्यात । तत्र त्विति । तत्र प्रतिसाधनस्य तुल्य वलस्य बाधकत्वं दूष्यते, तत्तदैव सङ्गच्छते, यदि तुल्यबलेन प्रतिसाधनेन प्रतिवादी साधनं बाधेतेत्यर्थः । उत्तरमिति टीकाकारमतम्, प्रत्युत्तरसूत्रयोरन्यथासिद्धेरित्यर्थः । तामेव प्रकरणसमप्रत्युत्तरसूत्रस्याह— न हीति। यदि तुल्यवलमपि बाधकं तदा स्थापनयैव किं प्रतिसाधनं न बाध्यत इत्येतत्परं ततसूत्रं प्रतिरोधवादिनं प्रत्यनुक्तोपालम्भः स्यादित्यर्थः ।

ननु यदि तुल्यवलप्रतिसाधनप्रतिवन्धत्वादसाधकं स्थापनायास्तदा तुल्यबलस्थापनाप्रतिरूद्धं प्रतिसाधनमप्यसाधकमिति कथं प्रक्रियामात्र-सिद्धिः, ततश्च "प्रक्रियासिद्धेः प्रकरणसम" इति जात्युत्तरदूषकतया सङ्गच्छत एव तत्रत्यं प्रत्युत्तरसूत्रमित्यत आह— सत्प्रतिपक्षत्वमिति । 'परस्पर-प्रतिवन्धेनासाधकाविमौ हेतू' इति मन्यमानस्य पूर्वोक्तप्रसङ्ग इष्टापाद-नमित्यर्थः ।

ननु समानबलेन बाधाभिधायिनाऽप्यत्र प्रत्युत्तरसूत्रे विशेषदर्शनेन समवलत्वनिराकरणमुपपाद्यत इत्याशयेनात्रत्यप्रत्युत्तरसूत्रान्यथासिद्धि-मुपपादयति—न चेति । बाधं प्रत्यधिकरणस्य हेतुत्वात्, कारणं विना

कार्योत्पत्तिमङ्गीकुर्वतो यो व्याघातस्तस्य यदुभयवादिसम्मततया दृढत्वं तेन तस्यैवोद्भाव्यत्वात् तत्रत्यात्रत्यसूत्रयोर्विपर्यासो भाक्त इत्यर्थः।

ननु लक्षणसूत्रस्थ- 'तद्धर्मविपर्ययोपपत्तः'- 'प्रक्रियासिद्ध'रिति-पदयोरन्यथासिद्ध्या वैपरीत्यमेव कुतो नेत्यत आह— तद्धमति। "उपपत्त"-रिति तादर्थ्यषष्ठ्या प्रक्रिया प्रक्रियमाणं प्रत्यनुमानसाध्यं तत्सिद्धरितीत्थ-मपि तयोरूपपत्तेः, सूत्रैकदेशानन्यथासिद्धितः सूत्रानन्यथासिद्धेर्बलवत्त्वमेव विपर्ययव्याख्याने विनिगमकमित्यर्थः।

ननु प्रकरणसमस्य बाधदेशनाभासत्वे तत्र साधर्म्यमात्रपदस्वरसा-दनुमानमात्रबाधसंग्रहेण मानान्तरबाधदेशनाभाससंग्रहः स्यादिति न्यायोपष्टम्भात् सूत्रैकदेशानन्यथासिद्धिरेव बलीयसीत्यत आह— प्रमाणान्तरेति। अनुमानमेव मानान्तरेणापि प्रतिरोधदेशनाभासं भवतीति साधम्यपदात्तदसंग्रहस्तुल्यः। साधम्यपदं मानमात्रोपलक्षकमिति यदि, तदा बाधदेशनाभासत्वेऽपि नानुपपत्तिरिति तुल्यमित्यर्थः।

[NPP, pp. 10-11.]

(401) P.282, l.1 : The *Nyāyavārttika* passage concerned is as follows :

सेयं जातिर्विशेषहेत्वभावं दर्शयति। विशेषहेत्वभावाच्चानैका-न्तिकदेशनाभासा इति। [NV, p. 2006.]

(402) P. 284, l. 1 : Vardhamāna Upādhyāya has shown the *saṅgati* of this *prakaraṇa* in the following manner :

अथ वैचित्र्यात्मकविकल्पामां साधर्म्यादिनिरूप्यत्वात् साध्य-दृष्टान्तधर्मविकल्पप्रभवजातिषट्कप्रकरणम्। [ANTB, p. 18.]

(403). P. 284, ll 4-6. (*a*) Udayana's opening remarks on this *sūtra* are as follows :

वर्ण्यावर्ण्यसाध्यति भावप्रधानो निर्देशः । समाख्यानिमित्त-विशेषात् पञ्चलक्षणानि । उभयसाध्यत्वादिति षष्ठम् । [NP, p. 15.]

(*b*) The initial observations of Vardhamāna Upādhyāya may be considered as an elaboration of the comments of Udayana quoted above :

इह यद्यपि वर्ण्यं ज्ञाप्यम् ; तच्च हेतोः साध्यस्य वा ; नाद्यो हेतावनुवर्तनीयं साध्यम्, तेन च प्रत्यवस्थानमसम्भवि ; नान्त्यः, साध्यस्य साध्यान्तराभावात् केन प्रत्यवस्थेयम्; अत एव साध्यसमाऽपि विसंष्ठुला वर्ण्यसमपुनरूक्ता च; धर्मिणः स्वपरसाधारण्याभावात् । तथापि वर्ण्यावर्ण्यसाध्यसमेषु भावप्रधानो निर्देशः, तत्र कृत्यस्य साधुत्वात् । प्रकरणावच्छदकैकरूपलाभाय सर्वपदार्थ-प्रधानो द्वन्द्वः । तथाप्युत्कर्षादीनां लक्ष्यपदत्वात् साध्यदृष्टान्तयोर्द्धर्म-विकल्पादित्यस्य च जातिषट्कसाधारण्येनातिव्यापकत्वादनेकलक्षणपरतयापि तस्य व्याख्याने प्रकरणोपाध्यप्राप्तेर्लक्षणं किमासामिति चेत् ? न, ससाध्यानिरूक्तानन्वयं विशेषमाश्रित्य साध्यदृष्टान्तधर्मविकल्पानां तत्तज्जातिलक्षणत्वात् । ससाध्यार्थमात्रस्यालक्षणत्वात् । पक्षाविद्यमान-धर्मासञ्जनादेर्जात्यन्तरेऽपि सम्भवात् ।

तत्र धर्मविकल्पादित्यन्तेन पञ्च लक्षणानि, उभयसाध्यत्वादिति षष्ठ-मिति प्राञ्चः । उभयमपि सर्वत्रेति नव्याः ; उत्कर्षसमादिष्वप्युभयसाध्यत्वात्, साध्यसमस्यापि साध्यदृष्टान्तधर्मविकल्पादेवोत्थानात्, घटे दृष्टान्ते दृष्ट्वा तत्कृतकत्वाद्यथा शब्दे साध्यमनित्यत्वम्, तथा तत्रैव तस्य रूपसाहचर्य-मप्यस्तीति तत एव रूपवत्त्वमस्तु । न ह्युभयोः साध्यत्वेन विशेषोऽस्तीत्यु-भयसाध्यत्वेनोत्कर्षसमादीनामप्युत्थानात् । साध्यसमस्यापि साध्यविकल्प-वदुभयत्रोभयान्वये चकारः समुच्चयार्थः सङ्गच्छते । [ANTB, p. 18.]

(*c*) Vardhamāna Upādhyāya's explanation of the terms साध्य etc. is as follows :

साध्यं पक्षः दृष्टान्तो व्याप्यव्यापकतयाऽवधारितः, धर्मविकल्पो धर्मवैचित्र्यम् । सत्त्वासत्त्वमिति यावत् । तदस्य षट्कस्येतरव्यावृत्तानुगतरूपजिज्ञासायां धर्मवैचित्र्यमुत्कर्षादिष्वन्यथा दर्शनीयमतस्तत् प्रकरणावच्छेदकं यद्यपि न भवति, तथाप्युत्कर्षादिषु वैचित्र्यस्य नानाप्रकारकस्य वैचित्र्येणैव सामान्येन रूपेण समस्तविशेषप्रतिपादनम् । योग्यतया चोत्कर्षादौ क्वचित् किञ्चित् वैचित्र्यमन्वेति । आवृत्त्या वा प्रत्येकमुत्कर्षसमादिषु वैचित्र्यभेदानां प्रतिपादनम् । ... ... साध्यदृष्टान्तयोर्धर्मः, तस्य विकल्पा वैचित्र्यम् तस्मादनिष्टप्रसञ्जनमित्यर्थः । क्व प्रसञ्जनमित्यपेक्षायां साध्यदृष्टान्तयोरित्यन्वीयते, उपस्थितत्वात् ।

केचित्तु साध्यदृष्टान्तयारिति सप्तमी, धर्मस्याश्रयापेक्षायां साध्यदृष्टान्तयोरेवान्वयः, तत एवेत्याहुः ।   [ANTB, p. 19.]

(404)   P. 284, l. 18 –P. 285, l. 9 : (*a*) The relevant passage of *Nyāyapariśiṣṭa* is as follows :

कः पुनरयं धर्मविकल्प ? वैचित्र्यमन्यथाभावः सदसत्त्वमिति यावत । तत्रोत्कर्षसमे तावद्दृष्टान्ते साध्ये च व्याप्यव्यापकयोरन्यतरेण धर्मान्तरस्य योगवियोगौ । उभयत्रापि वियोगे योगे चोत्कर्षाभावात् । अनित्यं घटादि रूपादिमत् अश्रौत्रं वा दृष्टं शब्दोऽपि तथा स्यादविशेषात् । तथा च— विवक्षितविपरीतसाधनाद्विरुद्धो हेतुरिति । तदस्याः साध्यधर्मिणि वियुक्तस्य धर्मस्य दृष्टान्तधर्मिणि सिषाधयिषितधर्मयोगोपलम्भो व्यभिचारानुपलम्भो वा तन्निदानोपाध्यनुपलम्भमात्रं वा कारणम्, हेतुर्दूष्यः, विरुद्धत्वमारोप्यम्, तद्भ्रान्तिः फलम् । विशेषविरोधदेशनाभासा चेयम् ।

[NP, pp. 15-16.]

(405)   **P. 285, l. 19 - P. 286, l. 3 : The relevant comment of Udayana is as follows :**

अयमेव जनको धर्मोऽपकर्षसमेऽपि, केवलं व्यापकत्वाभिमानेनैक-धर्मनिवृत्त्या साध्ये सिसाधयिषितहेत्वोरन्यतरस्यापकर्षः। दार्ष्टान्तिके व्याप्त्यनभ्युपगमेन दृष्टान्ते तदपकर्षस्यासम्भवदुक्तिकत्वात् । धर्मान्तरापकर्षे प्रकृतादूषणे अर्थान्तरमतानुज्ञयोरन्यतरेणैव निग्रहात् । जातेश्च निरनुयोज्यानुयोगभेदतया ततो भिन्नत्वात् । [NP, pp. 16-17.]

(406) P. 286, ll. 7-11 : Here, Janakīnātha has referred to Vācaspati Miśra II as नव्याः, as is evident from the following passage of *Nyāyatattvāloka* :

साहचर्यमात्रमेव व्यापकताप्रयोजकमित्यभिमानेन किञ्चिद्धर्मव्यावृत्त्या हेतुसाध्ययोरन्यतराभावप्रसञ्जनमपकर्षसमा । यथा 'शब्दोऽनित्यः कृतकत्वाद् घटवदि'त्यत्र यद्यनित्यत्वधर्मसहचरितघटधर्मात् कृतकत्वादनित्यः शब्दस्तथा कृतकत्वानित्यत्वसहचरितरूपवत्त्वात्मकधर्मव्यावृत्तेः कृतकोऽप्यनित्योऽपि च न स्यादिति । अत्रादावसिद्धिदेशना, द्वितीये बाधदेशना, तदुभयदेशनाभासा चेयम् ।

ननु पक्षधर्मव्यावृत्त्या दृष्टान्तेऽपि हेतुसाध्यापकर्षदेशनात् साधनसाध्यवैकल्यदेशनाभासापीयमस्त्विवति चेत् ? अत्र परिशिष्टकतः— दार्ष्टान्तिके व्याप्त्यनभ्युपगमेन दृष्टान्ते तदपकर्षस्यासम्भवदुक्तिकत्वात् धर्मान्तरापकर्षे च प्रकृतादूषणऽर्थान्तरमतानुज्ञयोरन्यतरेणैव निग्रहादिति । तन्न, पक्षधर्मस्य गुणत्वश्रावणत्वादेर्व्यावृत्त्या घटे दृष्टान्ते हेतुसाध्यान्यतरव्यावृत्त्या साधनादिवैकल्योद्भावने यथोक्तदोषासंस्पर्शात् । अत एव वार्त्तिक "शब्दो वा अरूप इति घटोऽप्येवं प्रसक्त" इति विद्यमानधर्मापचयोऽपकर्ष इति सामान्यतो लक्षणमुक्त्वा उदाजहार । भाष्यकृतस्तु विशिष्य तथानुदाहरणं विस्तरभयात् । तथा चापकर्षसमालक्षणेऽपि पक्षदृष्टान्तयोरन्यतरस्मिन्निति कर्तव्यमेवेति । [NTĀ, Allahabad edn. pp. 441-442 ; emphasis on the first and last lines quoted here has been added.]

(407) P. 287, ll. 18-21 : (*a*) The relevant portion of *Nyaāyapariśiṣṭa* is as follows :

कः पुनरयं धर्मविकल्पः ? वैचित्र्यमन्यथाभावः सदसत्त्वमिति यावत ।
[NP, p. 15.]

(*b*) Vardhamāna Upādhyāya has explained it in the following manner :

नन्विदं कथमेकप्रकरणम्, साध्यदृष्टान्तविकल्पस्य प्रत्येकमन्यथात्वेनैकत्वाभावादित्याशयेन पृच्छति—कः पुनरिति । यद्यपि साध्यदृष्टान्तविकल्पपदस्य तद्वाच्यसमस्तविशेषोपस्थितावपि योग्यतया न तद्विशेषे तात्पर्यम्, तथापि साध्यदृष्टान्तविकल्पसमुत्थमेकं रूपमस्तीत्याशयेनोत्तरम्—वैचित्र्यमिति । विकल्पस्य तत्तद्भेदऽपि वैचित्र्यरूपमनुगतमेकोऽर्थ इत्यर्थः । [NPP, p. 15.]

(408) P. 288, ll. 9-13 : Here, Jānakīnātha has recorded a view which is stated also by Udayana and Vardhamāna Upādhyāya. It may be the case that Jānakīnātha has referred to Udayana and Vardhamāna as प्राञ्चः. The relevant comments of Udayana and Vardhamāna are as follows :

(*i*) ... पक्षधर्मतौपयिकरुपवद्धेतुमत्तया सिद्धस्यापि पक्षस्य दृष्टान्तविवक्षितरूपवद्धेतुमत्तयाऽसिद्धिर्धर्मविकल्पः । तस्मादवर्ण्यत्वेन प्रत्यवस्थानमवर्ण्यसमः । सिद्धार्थत्वमसन्दिग्धविषयत्वम् अप्रवृत्तसाध्यज्ञापनशक्तिकत्वं साध्यसाधनप्रमाणान्तरवत्ता स्वरूपविशेषश्चेति । एते हि हेतुधर्मा दृष्टान्ते विवक्षिताः न तु पक्षे । तदिदं द्वारम् , दूष्यो हेतुः, आश्रयासिद्धिस्वरूपासिद्धि-व्याप्यत्वसिद्धिश्चारोप्याः, तद्भ्रान्तिः फलम्, तदाभासा चेयम ।
[NP, pp. 19-20.]

(*ii*) इयमेव विपर्ययेण रीतिरवर्ण्यसमस्य । तथा हि—गमकतौपयिकरूपवद्धेतुमत्तया सिद्धस्यापि पक्षस्य दृष्टान्तत्वौपयिकरूपवत्ताविशिष्टहेतुमत्त्वनासिद्धिः धर्मविकल्पः । न चोक्तरूपपञ्चकविरह एव ।

उत्थानबीजन्तु—गमकत्वानुगुणदृष्टान्त-वृत्तिर्यावद्धर्मवान् पक्षो न वा। आद्ये न ख्यापनीयः सिद्धत्वादिति नायं पक्ष इत्यपक्षधर्मो हेतुः। न चेत्, तथापि न ख्यापनम् तथाविधहेतुभत्तयाऽनुपसंहारादिति हेतोः स्वरूपासिद्धिः। तेन दृष्टान्तमात्रवृत्तिसिद्ध्यर्थगुणधर्मयोगायोगान्यतरेण साध्यस्याख्यापनीयत्वप्रतिपादनमवर्ण्यसमः। किञ्चिद्धर्मविशिष्टसाध्येन पक्षस्य साध्यवत्तया निश्चितत्वापादनं वाऽवर्ण्यसम इति लक्षणम्। तत्रोक्तरूपो धर्मविकल्पो द्वारम्, हेतुर्दूष्यः, आश्रयासिद्धिस्वरूपासिद्धी आरोप्यः, तच्चोदनाभासाचयम। [ANTB, p. 23.]

(409) P. 288, ll. 16-20 : Here, Jānakīnatha is referring to Maṇikaṇṭha Miśra and Vardhamāna Upādhyāya as प्राञ्चः, as is evident from the following passages :

(*i*) विकल्पसमायां तु साध्यदृष्टान्तयोः धर्मो हेतु साध्यमेतद्भिन्नं चेति त्रिधा। तस्य विकल्पो व्यभिचारः। स च हेतुविषय एव, हेत्वाभासत्वात। साध्यदृष्टान्तयोरधिकरणत्वेनान्वययोग्यता ज्ञानाभावात्। व्यभिचारश्च त्रिधा—हेतोर्धर्मान्तरं प्रति वा, धर्मान्तरस्य साध्यं प्रति वा, धर्मान्तरस्य धर्मान्तरं प्रति वा। साध्यदृष्टान्तसम्बद्धिधर्मव्यभिचारबलेन हेतोर्व्यभिचारापादनं विकल्पसमः। किञ्चिद्धर्मव्यभिचारदर्शनमूलकप्रकृतसाध्यव्यभिचारापादनं वा स इति लक्षणम्। [ANTB, p. 23.]

(*ii*) एवं किञ्चिद्धर्मविकल्पप्रदर्शने हेतुमति साध्यविकल्पापादनं विकल्पसमः। उदाहरणं यथा—अत्रैवानुमाने कृतकत्वाविशेषेऽपि विभागजत्वं शब्दस्यैव व्यवस्थितम्, न विभागजत्वं घटस्य ; तथा नित्यत्वानित्यत्वयोरप्यस्तु—शब्दस्य नित्यत्वमेव, घटस्यानित्यत्वमेवेति। विकल्पश्च सव्यभिचारः, तदसत्त्वमिति यावत्। स च साध्यधर्मस्य धर्मान्तरं प्रति वा, धर्मान्तरस्य धर्मान्तरं प्रति वा, हेतोर्धर्मान्तरं प्रति वेत्यादिदोषत्वमेवात्र तन्त्रम्। अत एवानैकान्तिक हेत्वाभासदेशनाभासेयम।

उत्तरम् किञ्चिद्धर्मविकल्पनात् यदि पक्षः साध्यशून्यः स्यादसाधकतानुमानेऽप्येवमस्तु । अतोऽविषयवृत्तित्वम् ।

[*Nyāyaratna*, pp. 203-204]

(410) P. 288, l. 20 - P. 289, l. 2 : The *Nyāya-Bhāṣya* passage concerned runs as follows :

क्रियाहेतुगुणयुक्तं किञ्चिद्गुरु यथा लोष्टः, किञ्चिल्लघु यथा वायुः, एवं क्रियाहेतुगुणयुक्तं किञ्चित्क्रियावत् स्यात् यथा लोष्टः, किञ्चिदक्रियं यथाऽऽत्मा, विशेषो वा वाच्यः । [NB, p. 2010]

(411) P. 289, ll. 2-4 : (*a*) The *Nyāya-Vārttika* passage concerned runs as follows :

सत्यतस्मिन् उत्पत्तिधर्मकत्वे विभागजः शब्दो न विभागजो घटः, विभागजाविभागजविकल्पवच्च नित्यानित्यविकल्प इति विकल्पसमः ।

[NV, p. 2010.]

(412) P. 289, l. 18 - P. 290, l. 1 : The remarks of Udayana are as follows :

सिषाधयिषितस्तु पक्षेऽसिद्धः, तत एव सेत्स्यतीति तदिदं सिद्धमसिद्धमुभयं तत्त्वं धर्मविकल्पः, तत्समुच्चये चकारः ; तत्र सिषाधयिषितवत् सिद्धस्याप्यनुमेयत्वं साध्यत्वम्, तस्मादनुमानप्रयोगप्रसञ्जनं साध्यसमः ।

[NP, p. 21.]

(413) P. 292, l. 4 : There is considerable dispute about the inport of this *sūtra*. According to Bhaṭṭa Vāgīśvara, it intends to point out the defects of वर्ण्यसम, अवर्ण्यसम, विकल्पसम and साध्यसम ; according to Vācaspati Miśra I, Vardhamāna Upādhyāya, Keśava Miśra Tarkācārya and Viśvanātha Nyāyapañcānana, it intends to point out the defects of वर्ण्यसम, अवर्ण्यसम and साध्यसम; while according to Vācaspati Miśra II, it intends to point out the defect of साध्यसम alone. The relevant passages are quoted below :

(*i*) दृष्टान्तः साध्य इति ब्रुवता न दृष्टान्तलक्षण .... हि नामापीह तयोर्दर्शनविषयः । तथा च साध्यत्वमनुपपन्नम् । अथ दर्शनं विहन्यते, नासौ दृष्टान्ते लक्षणाभावादिति वर्ण्यावर्ण्यविकल्पसाध्यसमानामनुत्थानमिति सूत्रार्थः । [NTD, p. 143, lacuna in the text.]

(*ii*) षण्णां जातीनां प्रत्याख्यानमुक्त्वा वर्ण्यावर्ण्यसाध्यसमानामपरं प्रत्याख्यानमाह— साध्यातिदेशाच्च दृष्टान्तोपपत्तेः । [NVTT, p.2014.]

(*iii*) वर्ण्यावर्ण्यसाध्यसमेषु व्याघातान्तरमपि सूचयति—

॥ साध्यातिदेशाच्च दृष्टान्तोपपत्तेः ॥

अप्रतिषेधानुकर्षणार्थश्चकारः । इहैवं जातिवादी प्रष्टव्यः, किं भवान् वास्तवीं पक्षसपक्षलिङ्गानां स्थितिमास्थाय एवं प्रत्यवतिष्ठते व्यावहारिकीं कामपि, न चेत् किमनेन । स्वेच्छाप्रसूतकल्पनामात्रसुलभतयाऽनादेयत्वात्, सिद्धेन चातिदेशादवर्ण्यसिद्धस्येति (?) न्यायात् । कुतश्चित् सिद्ध एव दृष्टान्ताऽसिद्धश्च साध्यमिति तयोः । एवं सति दृष्टान्तोऽप्यसिद्धार्थत्वादीनामङ्गत्वमिच्छतो व्याघातः, तेषां यथोक्तस्थितिविरोधात् । न च यद्यत्सिद्धिविरोधि तदेव तस्यां लिङ्गमिति सम्भवति । तथा च यस्मिन् सति यन्न भवत्येव तत्सिद्धौ तदङ्गमिति ब्रुवतः कथं न व्याघातः । एवं साध्यस्थितिविरोध्येव सिद्धार्थत्वादि तदङ्गत्वमिति ब्रुवतोऽपि ।

सूत्रार्थस्तु— साध्यातिदेशाभ्युपगमाद् दृष्टान्तस्योपपत्तिरभ्युपगमो यतः, ततो न प्रतिषेधः । यद्वा— दृष्टान्तस्योपपत्तेः साध्यसाधनवत्त्वादिना सिद्धेः पक्षे साध्यस्यातिदेशो ज्ञापनं यतोऽतः प्रतिषेधो न युक्त इत्यर्थः । तथा च सिद्धस्य वर्ण्यत्वापादने असिद्धस्य वाऽवर्ण्यत्वापादने असिद्धस्य भावत्वापादने, मानान्तरसिद्धस्य तत्प्रयोगसाध्यत्वापादने च व्याघातः ।

केचित् षण्णामपि जातीनामिदं प्रत्युत्तरसूत्रम्, समुच्चयार्थे

चकारस्वरसात् । तथा हि— उत्कर्षसमे दृष्टान्तस्योपपत्त्या साध्यं व्यापकमतिदिश्यते । न च रूपादिमत्त्वं तथेति नोपसंह्रियत इत्यर्थः । एव मपकर्षसमे दृष्टान्तोपपत्तौ साध्यं व्यापकमतिदिश्यते । न च सहचरितमात्रव्यावृत्तिः सहचरिता-न्तरव्यावृत्तेः व्यापिकेत्यर्थः । एवं विकल्पसमेऽपि दृष्टान्तस्यव्याप्या व्यापकत्वेनोपपत्तेः प्रसिद्धेः साध्यस्य व्यापकस्यातिदेशः साधनम् । किञ्चिच्च कस्यचिद्व्याप्यं व्यापकं वा, एवं किञ्चित् प्रति किञ्चिद्व्यभिचारि, न सर्वः सर्वं प्रति, अन्यथा तवापि स एव व्याघातः इत्यर्थ इत्याहुः । [ANTB, pp. 26-27.]

Form this passage, we come to know that according to some commentators, the *sūtra* साध्यातिदेशाच्च दृष्टान्तोपपत्तेः indicates the defects in all the *jati*-s mentioned in the *sūtra* साध्यदृष्टान्तयोर्धर्मविकल्पादुभयसाध्यत्वाच्चोत्कर्षापकर्षवर्ण्यविकल्पसाध्यसमाः .

(*iv*) एतत् साध्यसमाप्रत्याख्यायकम् । 'यथा लोष्ट' इति 'यथा' शब्देन दृष्टान्ते साध्यमात्रम् अतिदिश्यते । तावतैव दृष्टान्ततोपपत्तिर्न त्वशेषो धर्मे येनैतत्प्रयोगसाध्यताऽप्यतिदिश्यत इति साध्यसमा स्यात् । सर्वधर्मातिदेशे ह्यभेद इव स्यादिति कोऽयथार्थः स्यादिति को यथार्थः स्यादित्यर्थः । [NTĀ, Allahabad edn. p. 444.]

(*v*) वर्ण्यावर्ण्यसाध्यसमेषु व्याघातान्तरमपि सूचयति—

॥ साध्यातिदेशाच्च दृष्टान्तोपपत्तेः ॥

दृष्टान्तस्योपपत्तेः साध्यासाधनवत्त्वादिना सिद्धेः । पक्षे साध्यास्यातिदेशो ज्ञपनं यतोऽतः प्रतिषेधो न युक्त इत्यर्थः । अप्रतिषेधानुकर्षणार्थश्चकारः ।

इहैवं जातिवादी प्रष्टव्यः, किं भवान् वास्तवीं स्थितिभास्थाय एवं प्रत्यवतिष्ठते, व्यावहारिकीं वा ? उभयथा अतिदेशनिमित्तं दृष्टान्तः, अतिदेशविषयश्च साध्यम् । सिद्धेन चातिदेशा भवन्त्यसिद्धस्येति न्यायात् । कुतश्चित् मानात् सिद्ध एव दृष्टान्तोऽसिद्धं च साध्यमिति तयोः स्थितिः ।

एवं सति दृष्टान्तेऽप्यसिद्धार्थत्वादीनामङ्गत्वमिच्छतो व्याघातः। तेषां यथोक्त-स्थितिविरोधात्। तथा च सिद्धस्य वर्ण्यत्वापादनेऽसिद्धस्य चावर्ण्यात्वापादने मानान्तरसिद्धस्य तत्प्रयोगसिद्धत्वापादने च व्याघातः।

[GSP, pp. 101-102.]

For a change, Keśava Miśra Tarkācārya has copied here from Vardhamāna Upādhyāya's ANTB, and not from NTĀ of Vacāspati Miśra II.

(*vi*) वर्ण्यावर्ण्यसाध्यसमामु समाध्यन्तरमप्याह--

साध्यातिदेशाच्च दृष्टान्तोपपत्तेः॥

दृष्टान्तोपपत्तिः साध्यातिदेशात्, दृष्टान्ते हि साध्यमतिदिश्यते, तावतैव दृष्टान्तत्वमुपपद्यते न त्वशेषो धर्मः, पक्षदृष्टान्तयोरभेदापत्तेः। पक्षादेरपि साध्यसमत्वमेतेन प्रत्युक्तम्। दृष्टोऽन्तो दृष्टान्तः पक्षः, 'तस्माद्वह्निमानि'त्यतः पक्षोत्कीर्तनात्। तथा च साध्यस्यातिदेशात् साधनात् पक्ष इत्युच्यते, न तु पक्षोऽपि साध्यतेऽतिप्रसङ्गादिति भावः। [NSV, p. 2015.]

It is clear that Viśvanātha takes च in this *sūtra* in the same sense as तु.

(414) P. 293, ll. 1-2 : (*a*) Vardhamāna Upādhyāya has indicated the *saṅgati* of this *prakaraṇa* in the following manner :

साध्यसमलक्षणज्ञानस्य सम्बद्धविषयत्वेन सम्बन्धविशेषणकप्राप्तिसमज्ञान-हेतुत्वं प्राप्तिज्ञानस्य चाप्राप्तिबुद्धाविति सङ्गत्या प्राप्त्यप्राप्तिविकल्पो-पक्रमजातिद्वयप्रकरणमारभते। [ANTB, p. 27.]

Thus, for Vardhamāna, the *saṅgati* here is *hetutā*.

(*b*) Vardhamāna has also commented on the suffix *lyap* in the words प्राप्य and अप्राप्य :

प्राप्य निरूप्य जातित्वं प्रकरणार्थः। प्राप्तिनिरूप्यत्वस्यातिप्रसक्तस्यापि

रूपस्य प्रकरणार्थतावच्छेदकत्वात्तात्पर्यविशेषस्य नियामकत्वात् । त्त्वाप्रत्ययस्य समानकर्तृकक्रियान्तरगर्भत्वात् कियान्तरापेक्षायां प्राप्याप्राप्य वेति विकल्पानन्तरं साधकत्वमिति प्रथमान्ताध्याहारे यद्यप्यनन्वयः, तथापि हेतोरित्यनन्तरं यदा तदेत्यध्याहार्यम् । तस्य सूत्र गुणत्वात् । यद् वा—साधकत्वे इति सप्तम्यन्तमध्याहार्यम् । यद्यपि लक्षणे विकल्पो व्यर्थः, तथापि जात्युत्थानकथनार्थं विकल्पोपक्रमः । प्रतिषेध इति प्रकृतम् । तदन्वयः साधर्म्यसमादिसूत्रवत् । [ANTB, pp. 27-28.]

Thus, Vardhamāna has also given some useful hints as to how this *sūtra* is to be construed.

(415) P. 293, ll. 10-13 : (*a*) A similar passage is found in *Nyāyavārttikatātparyaṭikā* of Vācaspati Mista I [NVTT, p. 201] and *Anvīkṣānayatattvabodha* of Vardhamāna Upādhyāya [ANTB, p. 28].

(*b*) Viśvanātha has recorded this view as an alternative explanation :

प्राप्तयोर्न जन्यजनकभावः प्राप्तत्वेन लवणोदकयोरिवाभेदादित्याशयः—इत्यन्य । [NSV, p. 2018.]

(416) P. 293, ll. 17-19 : Earlier writers like Udayana, Maṇikaṇṭha Miśra, Vardhamāna Upādhyāya and Vācaspati Miśra II have explained the term साध्य alternatively as कार्य and ज्ञाप्य :

(*i*) साधकत्वमिति विकल्पशेषः जात्युत्थानकथनाय विकल्पोपक्रमः। साध्यं कार्यं ज्ञाप्यं च । प्राप्तिः प्रत्यासत्तिः, सा च संयोग-समवाय-विशेषणत्व-व्याप्यत्व-विषयत्वाद्यनेकप्रकारेष्वेकतमा । अविशेषः सिद्धत्वं तच्च कार्यविषये सत्त्वं ज्ञाप्यविषये ज्ञातत्वम् । ... [NP, pp. 25-26.]

(*ii*) कारणज्ञापकान्यतरस्य कार्यज्ञाप्यान्यतरेण सह प्राप्त्यप्राप्ति-

विकल्पेन साध्यसिद्धावप्राप्तसाध्यसाधनऽतिप्रसङ्गमुद्भाव्य प्राप्त्या साधनेऽविशेषेण साधकस्य साध्यत्वापादनं प्राप्तिसमः। [*Nyāyaratna*, p. 275.]

(*iii*) सिद्धिरूत्पत्तिर्ज्ञप्तिश्च, तद्विषयः साध्यं कार्यं ज्ञाप्यश्च।

[ANTB, p. 28.]

(*iv*) हेतोरित्यनन्तरं साधकत्वमिति पूरणीयम्। विकल्पोपक्रमे एते जाती इति भेदविवक्षयैकसूत्रेणोपग्रहः। वस्तुतोऽभेदविवक्षयैकजातितयाप्युपपत्तिः। साधकत्वं च कारकज्ञापकसाधारणम्। [NTĀ, p. 445.]

Jānakīnātha admits the second interpretation in p. 293, ll. 16-18.

(417) P. 294, ll. 6-8 : (*a*) The dispute about the number of *Jāti-s* has also been noted by Uddyotakara, Vācaspati Miśra I, Udayana, Vardhamāna Upādhyāya, and Vācaspati Miśra II :

(*i*) प्राप्त्या प्रत्यवस्थानं प्राप्तिसमः, अप्राप्त्या प्रत्यवस्थानमप्राप्तिसमः। अनयोर्भेदेनोपदेशो विवक्षातः —भेदविवक्षायां प्राप्त्यप्राप्तिसमाविति। अभेदविवक्षायामेकमेवोत्तरम् —यथा वृक्षा वनमिति।

जातिलक्षणाभावान्नैवेयं जातिरिति चेत् —अथ मन्यसे यज्जातेर्लक्षणं तदस्या नास्ति, साधर्म्यवैधर्म्याभ्यां प्रत्यवस्थानमिति हि तत्, न च लक्षणेनासम्बद्धा जातिरिति शक्यं वक्तुम्, न हि गोलक्षणहीनोऽश्वो गौरिति ? न, सूत्रार्थापरिज्ञानात् —साधर्म्यवैधर्म्याभ्यां प्रत्यवस्थानं जातिरित्यस्य सूत्रस्यार्थो न व्यज्ञायीत्यनुत्तरमेतत्। एतेन त्रैकाल्यसमाद्याः प्रत्युक्ताः, सूत्रार्थापरिज्ञानात्। [NV, pp. 2016-2017.]

(*ii*) ननु प्राप्त्यप्राप्तिसमयोर्मिलितयोः साधनप्रतिषेधस्यैकत्वात् कथं प्राप्त्यप्राप्तिसमौ भिन्नावित्यत आह—अनयोर्भेदोपदेशो विवक्षात इति। साधनप्रतिषेधस्यैकत्वेऽपि प्राप्य वा अप्राप्य वेति विकल्पभेदाद्-

भेदविवक्षेत्यर्थः । अभेदविवक्षायां त्वेकमेवोत्तरम् । यथा वृक्षाणां बहुत्वं विवक्षित्वा बहुवचनप्रयोगो वृक्षा इति, तद्बहुत्वसंख्याया एकत्वं विवक्षित्वैकवचनम् —एकं वनमिति । उदाहरणेन साधर्म्यवैधर्माभ्यां प्रत्यवस्थानमिति जातिसामान्यलक्षणं मन्वानो देशयति —जातिलक्षणाभावादिति । परिहरति—न, सूत्रार्थापरिज्ञानादिति । सूत्रे नोदाहरणसाधर्म्यं विवक्षितमपि तु येन केनचित् साधर्म्यं विवक्षितम् । अत्र च येन केनचिद् विद्यमानेन असाध्येन साधर्म्यम्, अप्राप्तेन वा हेतुना साधर्म्यमिति न सामान्यलक्षणायोग इति । [NVTT, pp. 2016-2017]

(*iii*) साधनप्रतिषेधस्यैकत्वेऽपीति । युगनद्धवाहितामात्रमेकत्वमिह द्रष्टव्यम् । वस्तुगत्या त्वविशेषातिप्रसङ्गयोः प्रतिषेधयोर्भिन्नत्वात् । विकल्पभेदाद् भेदविवक्षेत्यादि । विकल्पयोर्विरोधादेकेनोत्तरेण निराकर्त्तुमशक्यत्वेन भेदविवक्षा परस्परासङ्कीर्णोत्तरविवक्षेत्यर्थः । तथा च विकल्पयोर्युगनद्धवाहित्वेऽपि गुणप्रधानभावेन जात्युत्तरयोः प्रवृत्तावेकोद्भावननियमः सङ्गच्छत इति भावः ।

[TTP, A.L. Thakur's Press Copy, Ch. V, p. 12.]

(*iv*) ननु प्राप्य वाऽप्राप्य वेति विकल्पानन्तर साधकत्वमिति प्रथमान्तस्य शेषत्वे सूत्रेऽनन्वयप्रसङ्गः । अत्र साधकत्व इति सप्तम्यन्तमध्याहार्यमित्येके । साधकत्वमिति प्रथमान्तमेव हेतोरित्यनन्तरं यदि तदेत्यपरः शेषो दातव्य इत्यन्ये । विकल्पक्रियाकर्मभूतः शेष इति मध्यपदलोपी समासस्तेन साधकत्वं विकल्प्येत्यन्वय इत्यपरे । विकल्पभागस्य लक्षणानुपयोगमाशङ्क्याह—साध्यमिति । न चैवमननुगम इति वाच्यम्, उत्थाननिमित्ताननुगमेऽप्यविशेषेण लक्षणे तदभावात् । तथाप्यविशेषस्य सत्त्वज्ञातत्वाभ्यां द्विरूपत्वात् तद्वत्त्वाननुगमः, टीकाकृदुक्तगङ्गासागरवदभेदात्मकाविशेषाव्याप्तिः । मैवम्, साम्यमविशेषश्चातन्निर्वाहश्च कृतं विषये सत्त्वेन ज्ञप्तिविषये

प्राप्यऽभेदेनेति प्रकारभेदेप्यविरोधात् । एते एवेति । कृतिज्ञप्ति-भेदविवक्षया द्विवचनम् । [*Nyāyapariśiṣṭaprakāśa* , pp. 25-26.]

(*v*) ननु प्राप्तिसमाऽप्राप्तिसमान्तर्भूतैव, प्राप्तेरत्रापि निरूपकत्वात्; नैवम्, प्राप्त्यप्राप्तिपुरस्काराभ्यां भेदात्, एकजात्युद्भावनस्यापरजात्युत्थान-बीजतयोपन्यासः।

[*Nyāyapariśiṣṭaprakāśa*, henceforth, NPP. p. 28.]

As we can see, Vardhamāna Upādhyāya has also noted three alternative views about the construal of this aphorism.

(*vi*) ... हेतोरित्यनन्तरं साधकत्वमिति पूरणीयम् । विकल्पोपक्रमे एते जाती—इति भेदविवक्षयैकसूत्रेणोपग्रहः । वस्तुतोऽभेदविवक्षयैक-जातितयाऽप्युपपत्तिः। साधकत्वं च कारकज्ञापकसाधारणम् ।

[NTĀ, Allahabad edn. p. 445.]

(*b*) Keśava Miśra Tarkācārya maintains that the *saṅgati* of this prakaraṇa with the previous one is *hetutā*:

साध्यसमलक्षणज्ञानस्य सम्बन्धविषयत्वेन सम्बन्धविशेषणकप्राप्तिसम-ज्ञाने हेतुत्वं प्राप्तिज्ञानस्य चाप्राप्तिबुद्धाविति सङ्गत्या प्राप्त्यप्राप्तिविकल्पोपक्रम-जातिद्वयप्रकरणमारभते — प्राप्य साध्यं ... प्राप्तिसमौ । प्रतिषेधाविति शेषः । अप्राप्त्या वेत्यनन्तरं साधकत्व इति सप्तम्यन्तमध्याहार्यम् । लक्षणं तु साध्यप्राप्तिबलेनाविशेषापादनात् साधकदोषाभिधानं प्राप्तिसमः । साध्याप्राप्तिबलेनातिप्रसङ्गात् साधकदोषाभिधानमप्राप्तिसमः । सिद्धिरुत्-पत्तिर्ज्ञप्तिश्च तद्विषयः । साध्यं कार्यं ज्ञाप्यं च । प्राप्तिः प्रत्यासत्तिः । ... ...

[GSP, p. 102.]

(*c*) Viśvanātha Nyāyapañcānana has noted some alternative explanations of this *sūtra*:

... हेतोरिति । साधकत्वमिति शेषः । प्राप्तिपक्षे दोषमाह— प्राप्त्याऽविशिष्टत्वादिति । द्वयोरपि प्राप्तत्वाविशेषात् किं कस्य साधकम् ?

अप्राप्तिपक्षे दोषमाह—अप्राप्त्येति । अप्राप्तस्य साधकत्वेऽतिप्रसङ्गात् । साधकत्वं चात्र कारकज्ञापकसाधारणम् । एवं च कारकज्ञापकलक्षणं साधनं कार्यज्ञाप्यलक्षणेन साध्येन सम्बद्धं तत्साधकं चेत्, तदा सत्त्वाविशेषान्न कार्यकारणभावः, तत्सम्बन्धस्य प्रागेव ज्ञातत्वान्न ज्ञाप्यज्ञापकभावः । वस्तुतो ज्ञापकत्वं ज्ञप्तिजनकत्वं तदपि तावतैव प्रत्युक्तम् ।

प्राप्तयोर्न जन्यजनकभावः, प्राप्तत्वेन लवणोदकयोरिवाभेदादित्याशय इत्यन्ये । तथा च प्राप्त्याऽविशेषादनिष्टापादनेन प्रत्यवस्थानं प्राप्तिसमा । यदि चाप्राप्तं लिङ्गं साध्यबुद्धिं जनयति, साध्याभावबुद्धिमेव किं न जनयेत्, अप्राप्तत्वाविशेषात् । तथा चाप्राप्त्या साधकत्वादनिष्टापादनमप्राप्तिसमा । प्रतिकूलतर्कदेशनाभासे चेमे ।   [NSV, pp. 2017-2018].

(418) P. 294, ll. 9-14 : (*a*) According to Maṇikaṇṭha Miśra, both प्राप्तिसमा and अप्राप्तिसमा are cases of विशेषणासिद्धिदेशनाभास :

उभयोरपि विशेषणासिद्धिदेशनाभासत्वम्, प्राप्तिसमायाः कारणतोचितपूर्वकालतापरित्यागात्, अप्राप्तिसमायाः प्राप्तिलक्षणस्य विशेषणस्य परित्यागात् ।   [*Nyāyaratna*, p. 206]

Vardhamāna Upādhyāya has endorsed this view of Maṇikaṇṭha.   [ANTB, pp. 28-29]

(*b*) According to Vācaspati Miśra II, these two are actually cases of प्रतिकूलतर्कदेशनाभास :—

उचितसमयरूपविशेषणाभावाद् विशेषणासिद्धिदेशनाभासाद्या, द्वितीया तु प्राप्तिरूपविशेषणासिद्धिदेशनाभासा । वस्तुतस्तु प्रतिकूलतर्कदेशनाभासे उभे ।   [NTĀ, Allahabad edn. p. 445]

Viśvanātha Nyāyapañcānana has admitted this view.   [NSV, p. 2018]

(*c*) Jānakinātha himself has followed the verdict of Udayana, as is evident from the passage quoted below :

तदत्र प्राप्तिसमाया द्वारमप्राप्तावसाधनत्वपरिशेष:; हेतुप्रयोगो दूष्य:, साधनन्यायातिपातेन असाधनत्वमारोप्यम्, तच्चोचितकाललक्षण-सहकारिविरहात् विशेषणासिद्धत्वम्, तद्देशनाभासा चेयमिति । अप्राप्तिसमायास्तु द्वारं प्राप्तावविशेष:, परिशेषो वा, अकारकत्वं वा; हेतुर्दूष्य:, प्राप्तिलक्षणविशेषणासिद्धिरारोप्या, तद्देशनाभासा चेयमिति ।

[NP, pp. 26-27]

Vardhamāna Upādhyāya's comments on this passage are as follows :

तदत्रेति । अतिप्रसङ्गादप्राप्तो न साधारणमत: प्राप्तो हेतु: परिशेषाद् वाच्य इत्येवं कृत्वा प्राप्तिसमेत्यत आह —तत्रेति । साध्यप्रागभाववान् काल: साध्यसिद्धौ सहकारीष्यते, तत्काले च साध्यसाधनयोरसम्बन्धा-दसंबद्धस्य च साधनत्वेऽतिप्रसङ्गात्, सम्बन्धावश्यकतायां द्वयोरपि सत्त्वे किं कस्य साधनमित्यर्थ:। प्राप्ताविति । प्राप्तयोरविशेषादसाधनत्वे परिशेषादप्राप्तयोस्तथात्वेऽतिप्रसङ्ग इत्यर्थ: । अकारकत्वं वेति । कृतकस्य करणायोगादकृतकस्य करणे नियमानुपपत्तेरकरणमेवायातमित्यर्थ: ।

[NPP, pp. 26-27]

(419) P. 296, l. 1 : Vardhamāna Upādhyāya has indicated the *saṅgati* of this *prakaraṇa :*

अप्राप्तिसमज्ञानस्याभावविषयतया तद्विशेषप्रसङ्गसमधीहेतुत्वं तद्वुद्धेश्च सम्बन्धविषयतया साध्यसाधनघटितप्रतिदृष्टान्तसमधीहेतुरूपतया सङ्गत्या सूत्रम ... [ANTB, p. 30]

Thus, the *saṅgati* is *hetutā.*

Keśava Miśra Tarkācārya has copied almost verbatim from Vardhamāna. [GSP, p. 102]

(420) P. 296, l. 16-22 : The relevant remarks of Udayana are as follows :

अनवस्थाभासः प्रसङ्गसमः, अनवस्था ज्ञप्तौ कृतौ च। तथा च दृष्टान्तपदं व्यवस्थितत्वमुपलक्षयति। तदयमर्थः—कृतिज्ञप्त्योर्व्यवस्थितत्वस्य कारणं व्यवस्थापकं तस्यानपदेशात् प्रत्यवस्थानं प्रसङ्गसमः। तत्र ज्ञप्तौ प्रमाणेऽपि किं प्रमाणमिति वा, दृष्टान्तेऽपि को दृष्टान्त इति वा प्रवर्तते। किं पुनरेतदुत्थानबीजम्? अनिश्चितस्यानिश्चायकत्वारोपः। व्यञ्जितश्चैतत् प्रमाणपरीक्षायां सूत्रकारादिभिः। [NP, p. 29]

(421) P. 297, l. 12 : As we can see, the *sūtra* bearing the number 5.1.9 has been split up into two parts, and each of these parts serves a different purpose. This technique is known as योगविभाग.

(422) P. 297, ll. 16-19 : (*a*) The relevant remarks of Udayana are as follows :

(*i*) प्रत्यवस्थानाच्च प्रतिदृष्टान्तेन प्रतिदृष्टान्तसमः। प्रतीपमवस्थानात् प्रतिपक्षावस्थानादिति प्रयोज्यव्यापारमभिप्रेत्य। प्रयोजकव्यापारचिन्तने तु प्रतिदृष्टान्तेन केवलेन प्रतिपक्षावस्थानादिति। स्थापनाहेतोः प्रतिषेधः प्रतिदृष्टान्तसम इति, एवं पञ्चम्युपपत्तिः। प्रयोजको हि प्रतिदृष्टान्तः, प्रयोज्यो हि जातिवादी, तस्य व्यापारः प्रतिषेधः। चस्त्वर्थो लक्षणभेदं सूचयति। [NP, p. 3]

The comments of Vardhamāna on this passage are as follows:

(*ii*) ननु सामान्यलक्षणस्थप्रत्यवस्थानपदावृत्त्या सर्वत्र सामञ्जस्ये प्रत्यवस्थानादिति पञ्चम्यन्तमनुपपन्नं किमर्थमित्यत आह—प्रतीपमिति। प्रतीपे प्रतिपक्षमालम्ब्य प्रतिदृष्टान्तेन कर्त्रा वादिप्रयोज्ये नानावस्थानाद-वस्थितभजनाद्य (?) प्रत्यवस्थानमिति पूर्ववत्। पूर्वकारणे घटे 'घटवन्तो देशा' इतिवत् प्रतिदृष्टान्तेन प्रतिपक्षभावमालम्ब्यावस्थानादिति क्रिया प्रधानम। प्रयोजकेति। प्रयोजको जातिवादी, तद्व्यापारो विवक्षा,

तत्रावस्थानादित्यन्तर्भावितण्यर्थम् । यद्यपि प्रतिषेधपदमत्र न श्रूयते, तदध्याहारे च गौरवम्, प्रत्यवस्थानादित्यस्य प्रथमाविपरिणामेनैवोपपत्तेः, तथापि प्रत्यवस्थानपदं सामान्यलक्षणस्थमन्यत्रेवात्राप्यनुवर्तनीयम्, विपरिणामापेक्षया तस्य लघुत्वात् क्लृप्तत्वाच्च ।

ल्यब्लोपे पञ्चमीति, तेन प्रतिदृष्टान्तप्रतिपक्षावस्थानमालम्ब्येत्यर्थः —इत्यन्ये । [NPP, p. 31.]

(*b*) As one can see, the fifth case-ending in the word प्रत्यवस्थानात् has posed some problems for the commentators. Keśava Miśra Tarkācārya has offered another interpretation:

प्रत्यवस्थानाच्च प्रतिदृष्टान्तेन प्रतिदृष्टान्तसमः । अत्र प्रथमार्थे पञ्चमी, अस्य केवलदृष्टान्तबलप्रवृत्तत्वात् प्रकरणसमादितो भेदः । तथा च प्रतिदृष्टान्तमात्रमालम्ब्य बाधप्रतिरोधान्यतराभिधानं प्रतिदृष्टान्तसम इति लक्षणम । [GSP, p. 103]

(423) P. 297, l. 20-P. 298, l. 2 : The *Nyāya-Bhāṣya* passage runs as follows :

... 'ऐन्द्रियकत्वादनित्यः शब्दो घटवदि'ति कृते अपर आह— 'दृष्टमैन्द्रियकत्वं सामान्ये नित्ये, कस्मान्न तथा शब्द' इति प्रत्यवस्थिते इदमाह—'यद्यैन्द्रियकं सामान्यं नित्यं कामं घटो नित्योऽस्त्वि'ति ।
[NB, pp. 1163-1164]

(424) P. 297, ll. 3-8 : (*a*) Here, the following comments of Udayana on प्रतिदृष्टान्तसमा may be noted :

इयञ्च बाधप्रतिषेधाभ्यां द्विधा । केवलप्रतिदृष्टान्तबलेन प्रवृत्तेः प्रतिधर्मप्रकरणसमाभ्यां भिद्यते । किं पुनरुत्थानबीजमत्र ? न हि युक्त्याभासमन्तर्भाव्य प्रतिदृष्टान्तमात्रेण प्रतिरोधबाधावभिधातुमर्हत्यतिप्रसङ्गात । सत्यमेवं हि मन्यते जातिवादी । येन धर्मेण यथात्वं दृष्टान्तस्य तेन तथात्व-मुपसंहर्तुमुचितं दार्ष्टान्तिकस्य । तद् यथा—'यथा देवदत्तो

दीर्घस्तथा यज्ञदत्तोऽपी'ति, न तु 'यथा चैत्रः काणस्ताथा मैत्रः खञ्ज' इति। तद्वचनेनापि वादिना 'यथाऽनित्यो घटस्तथा शब्दोऽपी'त्युपसंहार्यम्, न तु 'यथा घटोऽनित्यस्तथा चायं कृतकः शब्द' इति। न ह्यनेन साधनं प्रधानीकृत्य दृष्टान्तस्य यथात्वमुपदर्शितं तस्माद्धेतुवादेऽप्रधानमनङ्गमेवातिदेश इत्यभिमानो बीजमत्र। [NP, p. 31.]

(425) P. 300, ll. 1-8 : (*a*) Vardhamāna Upādhyāya has shown the *saṅgati* of this *prakaraṇa* in the following manner :

अभावोपरक्तानुत्पत्तिसमज्ञाने अभावविषयप्रतिदृष्टान्तज्ञानस्य हेतुत्वादनन्तरमनुत्पत्तिसमसूत्रम् ... [ANTB, p. 34]

Thus, the *saṅgati* is हेतुता. An identical remark has been made by Keśava Miśra Tarkācārya [GSP, p. 104.]

(*b*) Vardhamāna Upādhyāya has noted a few other interpretations of this *sūtra*, and he has rejected one of them :

यस्य कस्यचित् साधनाङ्गस्योत्पत्तेः प्राक् कारणस्य हेतोरभावात् प्रत्यवस्थानमनुत्पत्तिसम इति यथाश्रुतम्। यद्यपि ध्वंसावस्थायां हेत्वभावेन हेतुवैकल्योद्भावनेन प्रत्यवस्थानाव्यापकम्, तथापि असदवस्थायां तदवृत्तित्वेन तदङ्गवैकल्योद्भावनमनुत्पत्तिसमः। एवं धर्मिलिङ्गसाध्यदृष्टान्ततज्ज्ञानानां सत्त्वं व्याप्यते। ... एतद्विशेषणसम्बन्धयोरभिरेव संग्रहान्न प्रकारान्तरसम्भवः। ...

केचिद् यथा असत्त्वविशिष्टे शब्दे प्रयत्नानन्तरीयकत्वं न प्रवर्तत इति प्रसङ्गो जात्यन्तरं स्यादिति विशेषणान्तर्वर्तितदवृत्तित्वेन तत्प्रमाणाङ्गवैकल्योद्भावनमनुत्पत्तिसम इत्याहुः।

अपरे तु तत्तत्कारणात् तत्तदुत्पत्तिः, न कारणमात्रात्। तत्कार्योत्पत्तेः प्राङ् न तत्कारणम्, विशेषणाभावे विशिष्टाभावात्। उत्पन्ने च कार्ये तत्कारणसिद्धावपि किम्, उत्पन्नस्यानुत्पत्तेः। तेनोत्पाद्यमानकाले

तत्सम्बन्धाभावात् कारणत्वाभिमतानामकारणत्वापादनमनुत्पत्तिसमः, एतच्च कारणज्ञापकयोस्तुल्यमित्याहुः ।

अन्ये तूत्पत्तेः पूर्वं विवक्षितधर्मसम्बन्धविरहादुत्पन्नेऽपि तस्मिंस्तद्धर्मनिरसनमनुत्पत्तिसमः । ... ... तेनानुत्पन्नस्याभेदे विवक्षिते धर्मसम्बन्धनिरसन-मनुत्पत्तिसम इत्याहुः । तन्न, नित्यसमान्तर्भावस्यैवंविधे वक्ष्यमाणत्वात् । [ANTB, pp. 35-36.]

(426) P. 302, ll. 1-7 : Vardhamāna Upādhyāya and Vācaspati Miśra II have introduced and explained this *sūtra* in the following manner :

(i) संशयस्य विरोधिनिरुप्यत्वात् विरोधस्य चाभावगर्भत्वात् अभावविषयानुत्पत्तिसमस्य हेतुत्वेन तदनन्तरं संशयसमप्रकरणाय सूत्रम—

सामान्यदृष्टान्तयोरैन्द्रियकत्वे समाने नित्यानित्यसाधर्म्यात् संशयसमः॥ यद्यपि सामान्येत्यादिकं लक्षणानौपयिकम्, संशयस्वरुपादेवार्थात् तत्कारणसमानधर्मादिप्राप्तेः । सामान्यादिष्वप्यैन्द्रियकत्व नित्यानित्य-साधर्म्यमित्यर्थप्राप्तौ पौनरुक्त्यं, तथापि 'यदि शब्दे कृतकत्वमनित्य-हेतुरस्तीति तन्निर्णयः, हन्त नित्यानित्यसाधारणो धर्मः संशयहेतुरस्तीति स एव किं न स्यात्' । कस्तयोः साधारणो धर्म इत्यपेक्षायामैन्द्रिय-कत्वमुदाह्रियते । कथमिदं साधारणमित्यपेक्षायां सामान्यदृष्टान्तयोरिति सूत्रकृतैवोक्तम् । दृष्टान्त उदाहरणम्, स च दूष्यान्वायिहेतोरिति । समान इत्यन्तमुदाहरणार्थम्, शेषं लक्षणाय ।

केचित् नित्यानित्यसाधर्म्यादित्यन्तमुदाहरणार्थम । यथा सामान्यदृष्टान्तयोरैन्द्रियकत्वे समाने नित्यानित्यसाधारणे तदुभयसाधर्म्यात् प्रत्यवस्थानमेवं संशयसामग्र्यैकदेशवोधात् । संशयेन प्रत्यवस्थानं संशयसम इत्यर्थः । लक्ष्यनिरुक्त्या च सामान्यलक्षणसाहित्याल्लक्षणमित्यर्थ इत्याहुः । तन्न, समान इत्यनेनैवोदाहरणलाभेऽधिकवैयर्थ्यात्, लक्ष्यनिरुक्त्या च तत्कारणेन प्रत्यवस्थानस्य लाभात् । [ANTB, pp. 37-38]

(*ii*) संशेतेऽनेनेति संशयः समानधर्मोऽसमानधर्मो विप्रतिपत्तेश्चेति तैः समा संशयसमेति समाख्यालभ्यमेव लक्षणमनूद्यत—नित्यानित्यसाधर्म्यादिति। नित्यानित्यति सपक्षविपक्षलक्षणम्, साधर्म्यादिति संशयकारणोपलक्षणमजहत्स्वार्थलक्षणया, अवशिष्टमुदाहरणपरम्। साधर्म्यादित्यनन्तरं संशयापादनमिति पूरणीयम्। तथा च संशयसामग्र्यैकदेशमात्रात् संशयप्रसञ्जनं संशयसमा।

[NTĀ, Allahabad edn., p. 450.]

It seems that the view rejected by Vardhamāna Upādhāya was reaffirmed by a later commentator like Vācaspati Miśra II. It is also evident that according to Vardhamāna, the *saṅgati* here is हेतुता, a view that is also shared by Keśava Miśra Tarkācārya. [See GSP, p. 104.]

(427) P. 304, ll 1-6 : (*a*) Vardhamāna Upādhyāya has indicated the *saṅgati* of this *prakaraṇa* as follows :

वाधस्य विपरीतप्रमात्वाद्वैपरीत्यस्य च प्रतियोगिनिरूप्यत्वात्तस्य च संशयोपस्थित्या सूत्रम् .... [ANTB, p. 39.]

(*b*) Jānakīnātha has followed here the interpretation of Vardhamāna Upādhyaya, who has also recorded and rejected an alternative interpretation :

साधर्म्यादित्युपलक्षणम्। सिद्धिकारणमात्रोपस्थितेरावश्यकतया तत एव सामान्यलक्षणोपपत्तौ विशेषस्यानाकाङ्क्षितत्वात्। तेन वैधर्म्यादितः प्रत्यवस्थानं न जात्यन्तरम्। प्रक्रिया साध्यम्, प्रक्रियमाणत्वात्। उभयोः साधनप्रतिसाधनयोः साधर्म्यं तुल्यता। नैकस्याप्यधिकवलत्वम्। सिद्धेरिति पञ्चमी, निर्णयात [इत्यर्थः]। तेनाधिकवलवत्त्वानभ्युपगमेन हेतोर्वाधाभिधानं प्रकरणसमः।

केचिद् यत्र हेतुं विना स्थापनामात्रं प्रयुङ्क्ते, तत्र स्थापनायामुत्तरस्यानभ्युपगताधिकवलत्वेन वाधाभिधानाज्ञातेर्भवत्येव तदव्यापकत्वम्,

तस्मादपुरस्कृताधिकवलेन वाधाभिधानं प्रकरणसम इत्याहुः । तन्न, अवल एव सहचारादिना वलवत्त्वभानेऽप्यपुरस्कृताधिकवलेनापि प्रत्यवस्थान-सम्भवात्, तस्मात् प्रमौपयिकरूपवत्तयानभ्युपगतोत्कर्पवाधोद्भावनं प्रकरणसम इत्यन्य । [ANTB, pp. 39-40.]

(428) P. 305, ll. 1-3 : Jānakīnātha has not indicated the *saṅgati* of this *prakaraṇa,* nor has he shown how the definition of अहेतुसम proposed by him follows from the relevant *sūtra*. For this, the interpretations of Vardhamāna Upādhyāya and Vācaspati Miśra II may be consulted :

(*i*) प्रकरणस्य वाधदर्शनाभासमात्रनिरुप्यत्वादहेतुसमस्याप्यभाव-विशेषणत्वेन संगत्या सूत्रम् ... ... [ANTB, p. 41.]

Keśava Miśra Tarkācārya's statement on this point is not available in its entirety due to defect in manuscripts. The available portion is "... सत्त्वेनाभावनिरूप्यत्वात् अहेतुसमस्यापि तत्त्वेन सङ्गत्या सूत्रम् ... ..." [GSP, p. 105]

It thus seems that the *saṅgati* here is निर्वाहकैक्य or एकनिरूप्यत्व.

(*ii*) अहेतुना हेत्वभावेन समाऽहेतुसमेत्यन्वर्थसंज्ञाप्राप्तं लक्षणमनूद्यते वीजप्रतिपादनायैव— हेतोस्त्रैकाल्येऽपि कालत्रयेऽप्यसिद्धः प्रत्यवस्थानम् अहेतु-समेत्यर्थः । समयसम्वन्धमात्रानुपपत्त्या हेतोरहेतुतापादनमहेतुसमा । हेतुरत्र कारकज्ञापकसाधारणः । [NTĀ, Allahabad, edn. p. 453.]

(429) P. 305, l. 14–P. 306, l. 9 : Udayana's suggestions regarding the means of differentiating अहेतुसमा from प्राप्तिसमा and अप्राप्तिसमा have been criticized also by Maṇikaṇṭha Miśra and Vardhamāna Upādhyāya :

(*i*) कथं पुनरियं प्राप्त्यप्राप्तिसमाभ्यां भिद्यते ? तत्र परिशिष्टम् — "तयोः स्वरुपतः सन्निकर्षचिन्ता । इह कालतः । ते अर्थद्वारिके । इयं शब्दद्वारिका । ते द्विविकल्पोपक्रमे । इयं त्रिविकल्पोपक्रमा" इत्यादि ।

तन्न, तत्रापि कालसन्निकर्षचिन्तासम्भवात् । अत्राप्यर्थद्वारकत्व-द्विविकल्पोपक्रमत्वसम्भवाच्चेत्याद्यूह्यम् । तस्मादिदमत्र वाच्यम्— प्रत्यवस्थान-प्रकारभेदादस्यास्ताभ्यां भेदः । तत्र हि प्राप्तप्राप्ती पुरस्कृत्य प्रत्यवस्थानम्। इह तु सहभावासहभावौ । एते च परस्परभिन्ने एवेति न विवादः ।

[*Nyāyaratna*, p. 211.]

(*ii*) वस्तुतः तत्र प्राप्त्यप्राप्त्योः कारणतावच्छेदकत्वेनासहकारित्वेऽपि तयोः सहकारित्वमारोप्य दूषणम्, इह तु कारणतास्वरूपमेव दूष्यते । अपि च ते विशेषणासिद्ध्याभासे, प्राप्त्यप्राप्त्योः हेतुविशेषणयोर्दूषणात्; इयन्तूक्तरूपप्रतिकूलतर्कदेशनाभासा ।   [ANTB, p. 42.]

(430) P. 308, ll. 1-4 : (*a*) Bhaṭṭa Vāgīśvara has not counted or explained the previous *sūtra*, viz. प्रतिषेधानुपपत्तेश्च प्रतिषेद्धव्या-प्रतिषेधः.   [NTD, p. 146.]

(*b*) Vardhamāna Upādhyāya has explained this *sūtra* after indicating the *saṅgati* in the following manner :

अर्थापत्तेरनुपपत्तिविषयत्वेनाभावनिरूप्यत्वात्तन्निवृत्तिनिरूप्याहेतुसमाना-न्तरमर्थापत्तिसमप्रकरणमाह—

अर्थापत्तितः प्रतिपक्षसिद्धेरर्थापत्तिसमः ।

अर्थापत्तितस्तदाभासात् स्वव्याघातकत्वात् प्रतिपक्षसिद्धेः प्रत्यनीकसिद्धेर्यः प्रतिषेधः, सोऽर्थापत्तिसम इत्यर्थः ।

[ANTB, Allahabad edn. p. 43.]

This has been repeated verbatim by Keśava Miśra Tarkācārya [GSP, p. 106.] Jānakīnatha's comments are also quite similar.

(431) P. 309, ll. 3-10 : This may be compared with the following remark of Vardhamāna Upādhyāya :

किमनुक्तमात्रमर्थादापद्यते, उतोपपादकमनुक्तं वा ? आद्येऽनुक्त-

स्यानुक्तमात्रस्यार्थापत्तिर्यदि, तदा पक्षहानेस्त्वत्पक्षहानेरुपपत्तिः । कतोऽनुक्तत्वात् अनुक्तं यतः, तथा च स्वव्याघातः, स्वोक्तिव्यापनात् । नान्त्यः, अनैकान्तिकत्वादुक्तरूपाया अर्थापत्तेर्यतः । प्रकृतोक्तस्यानुपपादकत्वात्, अव्यापकस्य चानुपपादकत्वात् । च-कारेणानुक्तबाधादयः समुच्चीयन्ते ।

[ANTB, Allahabadedn., pp. 44-45.]

These lines has been repeated verbatim by Kiśava Miśra Tarkācārya [GSP, p. 107.] and they are also closely similar to the remarks of Jānakīnātha.

(432) P. 310, ll. 1-10 : Jānakīnātha has not indicated the *saṅgati* of this *prakaraṇa,* nor has he explained the terms एकधर्मोपपत्तेरविशेषे. For this, the following passages from Vardhamāna Upādhyāya, Vācaspati Miśra II and Viśvanātha Nyāyapañcānana may be noted :

(*i*) अर्थापत्तेरनुपपत्तिनिरुप्यत्वेनाभावनिरुप्यत्वमविशेषस्याप्यभावनिरुप्यत्वमित्येकनिरुप्यत्वसङ्गत्या सूत्रम—

एकधर्मोपपत्तेरविशेषे सर्वाविशेषप्रसङ्गात् सद्भावोपपत्तेरविशेषसमः ॥ एकः साध्यदृष्टान्तयोरभिन्नः साधनधमः, तस्योपपत्तेः सम्वन्धात् अविशेष साधर्म्यवत्तालक्षणस्तस्मिन्निति जातिवाद्यभिप्रायवर्णनं जात्युत्थानवीजप्रदर्शनाय, लक्षणपरत्वे व्यर्थत्वाद् व्यतिरेकिणा स्थापनायामव्याप्तेश्च । प्रत्यवस्थानप्रकारमाह—सर्वाविशेषप्रसङ्गात् । सर्वेत्यसङ्कोचापादकत्वात् समुदायपरम् । अविशेषः तादात्म्यमेकधर्मवत्त्वम्, एकजातीयधर्मवत्त्वं वा । तत् किं साधनधर्मोपपत्तेरेव, नेत्याह—सद्भावोपपत्तेः । सतो भावः सद्भावः तद्धर्ममात्रम् । तदुपपत्तेः तत्सम्वन्धात्, स एवोपपत्तिर्युक्तिस्ततो वा । सर्वत्र तादृशधर्माक्रान्ते यथोक्ताविशेषप्रसञ्जनात् प्रतिषेधोऽविशेषसम इत्यर्थः ।

.....

केचित् एकधर्मोपपत्तेरविशेष इत्यादि लक्षणपरमेव । तथाहि—अविशेष इति निमित्तसप्तमी । तेन साध्यदृष्टान्ताविशेषनिमित्तकधर्मान्तरनिवन्ध-

नमविशेषसमः । न च व्यतिरेकिस्थापनायामव्याप्तिः, जातिवाद्याशयोद्घाटनपरत्वेऽपि तुल्यत्वात् । तेन धर्ममात्रस्यैवानिष्टापादनसामर्थ्यमित्यभिधानात् । यत्किञ्चिद्धर्मवलेनाविशेषरूपानिष्टापादनमविशेषसम इति लक्षणम् । अतएव नोत्कर्षसमप्रतिधर्मसमसङ्करः । तत्रानुवृत्तव्यावृत्तधर्मपुरस्कारेण प्रत्यवस्थानात् । उपलक्षणन्तु समानमित्याहुः ।

अन्ये त —सतो भावः सद्भावः तद्धर्ममात्रमित्यसङ्कोचे जात्यन्तरसङ्करः स्यादित्यविशेषेऽविशेषापेक्षायां यावदुपात्तविशेषान्यपरत्वं गोवृषन्यायात्— इत्यस्या आकृतिगणत्वमाहुः । तन्न । अत्राविशेषेणैवापादनाज्जात्यन्तरे चान्यथेति विशेषात् ।

अपरे त—साधनत्वसामान्यापेक्षया दृष्टान्तसाम्यस्य साध्यवत्त्वलक्षणस्य सिद्धये किञ्चित्साम्यवलात् सामान्यतोऽनिष्टरुपेण वाधसत्प्रतिपक्षत्वाभिप्रायेणाविशिष्टत्वापादनमविशेषसम इत्याहुः । तन्न, अविशेषसमस्य सर्वदूषणाभासतायाः वक्ष्यमाणत्वात् । ....

केचित् इदं सूत्रमन्यथा व्याचक्षते । एकस्मात् साधनाभिमताद्धर्मात् पक्षदृष्टान्तयोः साध्यधर्मवत्तालक्षणाविशेषे सर्वप्रकारेणाविशेषः प्रसज्यते । सद्भावोपपत्तेः सद्भावस्य सर्वप्रकाराविशेषस्यापपत्तः। न हि तत्साधनमेकस्यैव साध्यधर्मस्य साधने समर्थम्, न तु तत्सहचरितान्यधर्मस्य। स च सर्वप्रकाराविशेषस्त्रिविधः, व्यक्तितो जातितः साध्यधर्मतश्च । यथा घटादौ कृतकत्वं तद्घटरुपत्वादिसर्वाकारसहचरितमुपलब्धं सर्वतोऽनुगमयेत् ... ... न चेदेवं, न गमयेदेवेति ।

मैवम्, उत्कर्षसमान्तर्भावादित्यन्ये । पक्षदृष्टान्तभेदस्थितावुत्कर्षसमप्रवृत्तिः, अत्र तु न तथेति चेन्न, अतादात्म्ये सति तादात्म्यस्यैवोत्कर्षणीयत्वादिति ।

तन्न, विशेषविरोधापादनाभिप्रायवैधुर्यात् । तस्मात् प्रागुपदर्शितात्रत्यो

दाहरणानामव्यापकमिदं व्याख्यानमित्येव बाधकं साधीयः, जात्यन्तरलक्षणेन तेषामसंग्रहात्, भाष्यादीनां प्रथमोपदर्शितव्याख्यानानुसारित्वाच्च ।

[ANTB, Allahabad edn. pp. 45-47.]

We find here a number of alternative interpretations not recorded elsewhere, that have been rejected by Vardhamāna due to one reason or other.

(*ii*) विशेषो भेदो न विशेषोऽभेद इत्यर्थः । तेन समा अविशेषसमा । तथा चान्वर्थसंज्ञालब्धं लक्षणमनूद्यते । एकस्य धर्मस्य कृतकत्वादेः पक्षे दृष्टान्ते चोपपत्त्या सत्त्वेन पक्षदृष्टान्तयोरनित्यत्वेनाऽविशेषे वादिनोच्यमाने सर्वेषामविशेषप्रसङ्गात् प्रत्यवस्थानमविशेषसमेत्यर्थः । ननु कथं सर्वाविशेष इत्यत आह—सद्भावोपपत्तेः । सतां प्रामाणिकाणां भावानां वा ये धर्माः प्रमेयत्ववाच्यत्वसत्त्वभावत्वादयस्तदुपपत्तेरित्यर्थः । एकपदेन यत्किञ्चित्-साधर्म्यमात्रमुक्तम् । ... ... सर्वदोषदेशनाभासा चेयम् ।

[NTĀ, Allahabad edn. p. 455.]

(*iii*) एकस्य धर्मस्य कृतकत्वादेः शब्दे घटे चोपपत्तेः सत्त्वात् यदि शब्दघटयोरनित्यत्वेनाविशेष उच्यते, तदा सर्वेषामविशेषप्रसङ्गः । कुतः ? सद्भावोपपत्तेः, सतः सन्मात्रस्य ये भावा धर्मा सत्त्वप्रमेयत्वादयस्तेषामुपपत्तेः सत्त्वात् । तथा च सर्वेषामभेदे पक्षाद्यविभागः, सर्वेषामेकजातीयत्वेऽवान्तर-जात्युच्छेदः, सर्वेषामनित्यत्वे जात्यादिविलय इत्यादि । तथा च सन्मात्रवृत्ति-धर्मेणाविशेषापादनमविशेषसमेति फलितम् । अत्र चाविशेषसम इति लक्ष्यनिर्देशः, सद्भावोपपत्तेः सर्वाविशेषप्रसङ्गादिति लक्षणम्, शेषं व्युत्पादकम । प्रतिकूलतर्कदेशनाभासा चेयम् । [NSV, p. 2135.]

(433) P. 311, l. 6 : There is some disagreement about the reading of this *sūtra*. The *Nyāyasūcīnibandha* reads it as क्वचित् तद्धर्मोपपत्तेः क्वचिच्चानुपपत्तेः प्रतिषेधाभावः. This is accepted by the editor of the Metropolitan edition, even though he has noted that in two other editions of *Nyāyavārttika*, the reading

क्वचित्तद्धर्मानुपपत्तेः क्वचिच्चोपपत्तेः प्रतिषेधाभावः is found [NV, p.2138 f.n. 8]. This is somewhat surprising, because *Nyāyavārttika* on NS 5.1.34 clearly states :

न च प्रतिपक्षस्यैवंभूतो धर्म उपपद्यते, तस्मात् प्रतिषेधो नोपपद्यते इति। उक्तं चात्र "क्वचित् तद्धर्मानुपपत्तेः क्वचिच्चोपपत्तेः प्रतिषेधाभाव" इति। यच्चाविशेषसम उत्तरं तदिहापि द्रष्टव्यम्। [NV, p. 1146.]

The reading क्वचित् तद्धर्मानुपपत्तेः क्वचिच्चोपपत्तेः प्रतिषेधाभावः is admitted also by Vardhamāna Upādhyāya, Vācaspati Miśra II and Keśva Miśra Tarkācārya [ANTB, p. 47; NTĀ, p. 456; GSP, p. 107.] Bhaṭṭa Vāgīśvara accepts the reading क्वचिद्धर्मोपपत्तेः क्वचिच्चानुपपत्तेः प्रतिषेधाभावः. [NTD, p. 147.]

(434) P. 311, ll. 7-9 : Vardhamāna Upādhyāya has recorded three alternative explanations of this *sūtra*, and they are as follows :

क्वचिदापादकत्वाभिमते सत्त्वादौ जातिवाद्यभिमते साधने तद्धर्मस्यापाद्य व्याप्यत्वस्यानुपपत्तेरसिद्धेः क्वचिच्च . कृतकत्वादौ तद्धर्मोपपत्तेरनित्यव्याप्यत्वोपपत्तेः।

यद् वा—क्वचित् त्रैलोक्याविशेषादौ तद्धर्मानुपपत्तेः सत्त्वादिसाधनव्यापकत्वानुपपत्तेः क्वचिदनित्यत्वादौ कृतकत्वव्यापकत्वोपपत्तेः प्रतिषेधस्य यथोक्तस्याभावः।

यद् वा—क्वचित् साहचर्यमात्रेण तद्धर्मापादनऽनुपपत्तेः प्रमाणविरोधात्, क्वचित्तद्धर्मस्य व्याप्तिवलेन साधकत्वोपपत्तः प्रतिषेधो नोपपद्यते इत्यर्थः। [ANTB, p. 47.]

All these three interpretations have also been recorded by Keśava Miśra Tarkācārya. [GSP, pp. 107-108.]

(435) P. 311, ll. 18-19 : This has been paraphrased from the comments of Vardhamāna Upādhyāya, whose remarks are as follows :

एतेनेति । यदि साध्यसहचरितमात्रात् कार्यमात्राददृष्टकर्तृसिद्धिः, तादृशात् पशुत्वादि [० त्वादेः] शशे विषाणं सिध्येदित्यत्र न कार्यत्वस्य कर्तृसाधकत्वं पशुत्वस्य विषाणसाधकत्वेन व्याप्तं येन प्रसङ्गः स्यादित्यर्थः । [NPP, p. 49]

Udayana's comments here are as follows :

एतेनेश्वरानुमाने पशुत्वेन शशादीनां विषाणित्वाविशेषप्रसङ्ग इति व्याख्यातम् । [NP, p. 49.]

(ii) एतेन — 'यद्युपलभ्यमानो कर्ता निरुपाधिसाहचर्योपलम्भबलेन कार्यत्वात् सिद्ध्यति, हन्त ! तादृशात् पशुत्वाद्विषाणित्वमपि शशस्य किं न स्यात्' — इत्यपास्तम् । न हि कार्यत्वस्य कर्तृसाधकत्वं पशुत्वस्य विषाणित्वसाधकत्वेन व्याप्तम् । [ANTB, p. 48.]

(436) P. 312, l. 1 : Vardhamāna Upādhyāya has indicated the *saṅgati* of this *prakaraṇa* in the following manner :

अविशेषसमोपपत्तिसमयोरुपपत्तिगर्भत्वात्तदानन्तर्यसङ्गत्या सूत्रम् ... ... [ANTB, p. 48.]

Thus, for Vardhamāna, the *saṅgati* here is निर्वाहकैक्य. This view is also shared by Keśava Miśra Tarkācārya. [GSP, p. 108.]

(437) P. 312, ll. 4-6 : Here, the second definition has been mentioned earlier by Maṇikaṇṭha Miśra :

यत्किञ्चिद्धर्मदर्शनेन यत्किञ्चिद्दूषणापादनमुपपत्तिसमः । [*Nyāyaratna*, p. 213.]

(438) P. 312, ll. 10-12 : The *Nyāya-Varttika* passage concerned reads as follows in the printed text :

नित्यकारणश्चानित्यकारणश्चैकत्रोपपद्यत इत्युपपत्तिसमः, नित्यानित्यपक्षाभ्यां प्रकरणसम इति भेदः । [NV, p. 1136.]

(439) P. 312, ll. 12-18 : Udayana's comments are as follows :

तदिदमेवं प्रवर्त्तते— अनित्यः शब्दः कार्यत्वादित्युक्ते यद्यनित्यपक्षे प्रमाणं कार्यत्वमस्तीत्यनित्यः, ननु नित्यपक्षेऽपि किञ्चित्प्रमाणं भविष्यति, मदुक्तत्वात्, त्वत्पक्षवत्, त्वत्पक्षमत्पक्षयोरन्यतरत्वात्, प्रकृतसन्देह-विषयत्वात्,विप्रतिपत्तिविषयत्वात्, मद्बुद्धिविषयत्वादित्येवमादिवृहस्पति-मतानुशिष्टमन्यदपि हेतुजातं प्रतिसन्धेयम्, तथा च त्वत्पक्षस्य बाधः प्रतिरोधो वा । तदस्याः सामान्यतः प्रमाणसम्भावना द्वारं हेतुर्दूष्यः वाधप्रतिरोधावारोप्यौ, तदाभासा चेयम् । [NP, p. 51.]

(440) P. 313, ll. 1-2 : (*a*) This alternative definition has been suggested earlier by Maṇikaṇṭha Miśra :

वस्तुतस्त्वितरजातिलक्षणानाक्रान्तजातित्वमेवैतल्लक्षणम् ।
[*Nyāyaratna*, p. 213.]

Thus, for Maṇikaṇṭha Miśra, उपपत्तिसम turns out to be आकृतिगण .

(*b*) Vardhamāna Upādhyāya has noted some alternative interpretations and rejected one of them :

(*i*) साम्यप्रदर्शनश्चोत्थानवीजप्रदर्शनाय, उभयग्रहणं प्रत्यवस्थान-प्रकारसूचनायेति केचित । तथा हि— यथा त्वत्पक्षे प्रमाणं तथा मत्पक्षेऽपि प्रमाणं भविष्यति । त्वत्पक्षे किञ्चिद्दूषणं स्यादित्येकोऽपि वाध [?] भवत्येव । तन्न, यत्र सामान्यतः कारणमुपपादयति तदव्याप्तेः, प्रतिपक्षप्रमाणोपदर्शनाद् यदि वाधो प्रतिरोधो वा, तदा सदुत्तरमेव । न च स्वव्याघातकत्वेन विशेष्यम्, अधिकवलेन साधनेन वाधाभिधाने प्रकरणसमत्वात्, प्रतिधर्ममात्रेण प्रतिरोधोद्भावने च प्रतिधर्मसमत्वात् ।[ANTB, p. 48.]

The printed text of ANTB has been emended in the light of *Nyāyaratna*, p. 213.

(*ii*) नवीनास्त—यथोक्तलक्षणस्य विशिष्टव्यतिरेकाणाम् अन्यजाति-

लक्षणसंगृहीतानामसंग्राहकत्वात् त्रयोविंशतिजात्यन्यजातित्वमुपपत्तिसमत्वमित्यत्रैव तेषामन्तर्भावः । ... ... सूत्रार्थस्तु उभयोः पक्षप्रतिपक्षयोः कारणं प्रमाणत्वाभिमतं तदेवोपपत्तिः, तद्बलात् प्रत्यवस्थानमुत्पत्तिसम इत्याहुः। [ANTB, p. 49.]

Here, we find the view of Maṇikaṇṭha, who treated उपपत्तिसमा as आकृतिगण.

(*c*) Keśava Miśra Tarkācārya has also given some interesting informations :

(*i*) उभयोः पक्षप्रतिपक्षयोः कारणं प्रमाणं तस्योपपत्तेरुपपादनात्, प्रत्यवस्थानमित्यनुषज्यते । तथा च स्वपक्षसाधनसिद्धिप्राधान्येन परसाधनदूषणमुपपत्तिसम इत्यर्थः । .... संशयविप्रतिपत्तिविषयत्वात् शङ्कापिशाची चात्रान्तर्भवतीति दिक् । महाविद्याप्यत्रैवेति एके । अयमेवाकृतिगण इति वृद्धाः । अनुपलब्धिसमा तथेति अन्ये । [GSP, p.108.]

From this passage, we come to know that according to some Naiyāyika-s, the mode of destructive argument known as महाविद्यानुमान that was formulated by Kulārka Paṇḍita can be brought under उपपत्तिसमा. We further learn that while according to the earliar Naiyāyikas उपपत्तिसमा is आकृतिगण, others accord this status to अनुपलब्धिसमा. We also gather that according to Keśava Miśra Tarkācārya, शङ्कापिशाचीसमा (which is a particular type of जात्युत्तर) need not be considered as a distinct kind of *jāti,* as it can be brought under उपपत्तिसमा.

(*ii*) ननु कथमेतस्या उक्तिसम्भवः, उन्मत्तकेलिप्रसङ्गात् ? परमेकान्तपराजयात् सन्देहोऽपि श्रेयानिति वासनया कथासञ्चारः । यद्वा— दोषवैचित्र्यात् कस्यचिद् बुद्धिरुत्पद्यते । यदाहुः —"प्रत्यक्षदृष्टो न चेदुपाधिरिहातीन्द्रियस्तर्हि भवतु । अतीन्द्रियोऽपि न निश्चितश्चेत् शङ्कितो भवत । शङ्कितोऽपि न चेदस्ति पिशाचायमानो भवत्विति, कदापि केनापि

कुत्राप्युपाधिरिह द्रक्ष्यत इत्येवमादीनामपि वचसां सन्दर्शनात्" इति।
[*Nyāyaratna*, p. 213.]

Manikantha Miśra has also made another interesting remark about उपपत्तिसमा :

इयमेव जातिः प्रायशो वेदान्तिनां सर्वस्वम्।
[*Nyāyaratna*, p. 214.]

(441) P. 314, l. 1 : Vardhamāna Upādhyāya has indicated the *saṅgati* of this *prakarṇa* in following manner :

उपपत्तिसमे कारणं निरुपकम्, इह तु तदभावः, तस्य च प्रतियोगिनिरुप्यत्वसङ्गत्या सूत्रम्– .... [ANTB, p. 51.]

This has been repeated verbatim by Keśava Miśra Tarkācārya. [GSP, p. 108.]

(442) P. 314, l. 8-12 : Here, the relevant comments of Udayana are as follows :

पञ्चमी त्वन्ययसम्भवे सद्दूषणमेवेति जातिसामान्यलक्षणव्यवच्छिन्नेति नातिप्रसङ्गः.........तदत्रावधारणविकल्पानुपपत्तिर्द्वारम्, हेतुर्दूष्यः, बाधोऽसिद्धिरुभयमव्याप्त्यतिव्याप्ती चेति यथायोगमारोप्याणि, तदाभासा चेयमिति। [NP, p. 314.]

(443) P. 314, l. 12-14 : Here, the *Nyāya-Bhāṣya* and *Nyaya Vārttikā* passages as found in the printed text run as follows :

(*i*) न कार्यस्य कारणनियमः (NB, p. 1139)

(*ii*) न साध्यायान्तराणां कारणं प्रतिषिध्यते (NV, p. 1139)

It may be noted here that Udayana in his *Nyāyapariśiṣṭa* quotes these *Nyāya-Bhāṣya* and *Nyaya-Vārttika* passages as "न तु नियम उच्यते" and "न साध्यान्तराणां कारणारन्तरं प्रतिषिध्यत" respectively. Jānakīnātha's quo‘ation from *Nyāya-Varttika* coincides with that of Udayana.

(444) P. 314, ll, 14-P. 315, l. 3 : Jānakīnātha has admitted *three* possibilities about the adoption of उपलब्धिसमा, while Udayana speaks of *five* possibilities—

(*i*) तदियं पञ्चधा–साध्याभावेऽपि धर्म्युपलभ्यत इति वाधः, साधनाभावेऽप्युपलभ्यत इत्यसिद्धिः, उभयाभावेऽपि धर्म्युपलभ्यत इत्युभयम्, साधनाभावेऽपि साध्यधर्म उपलभ्यत इत्यव्याप्तिः, साध्याभावेऽपि साधनधर्म उपलभ्यत इत्यतिव्याप्तिः। [NP, p. 54.]

This is also consistent with Udayana's remark "पञ्चमी त्वन्वयसम्भवे" etc. quoted in Textual Note no. 442.

Vardhamāna Upādhyāya's comments on this passage dealing with *five* possibililitic are as follows :

(*ii*) यद्यपि प्रथमद्वितीयसमाहाररूपा तृतीया तयोरेवान्तर्भवति, उक्तिमात्रभेदाद् भेदे प्रथमपञ्चमसमाहारस्यपि प्रकारान्तरत्वापत्त्या न्यूनत्वापत्तिः, तथापि गोवलीवर्दन्यायेनैतदुक्तम। अत्र तु धर्मिपदेन विशेष्यमात्रस्य सर्वस्य पक्षदृष्टान्तादेः, साध्यपदेन साधनान्यसकल-विशेषस्याभिधानम। [NPP, p. 54.]

(*d*) Vācaspati Miśra II has proposed a novel interpretation that depends on the meaning of the prefix उप, which he takes from a lexicon known as *Dharaṇikoṣa* :

(*iii*) उपलब्धिपदमत्र सामान्योक्तमपि साध्योपलब्धिमाह। तदर्थमेव न्यायप्रवृत्त्या तस्या एव प्रकृतत्वात। उप अधिके लब्धिर्लाभः। साध्यादेरूपलब्धिर्विधीयमानातिप्रसक्तिरिति यावत। "उप समीपवाचि स्यादुप हीनेऽधिकेऽप्युपे" ति धरणिकोषात। तथा चोपलब्ध्या समोपलब्धिसमेति समाख्यालभ्यमेव लक्षणमनूद्यत। कारणं ज्ञप्तेर्ज्ञापकं पक्षसाधनादि। तथा च निर्दिष्टज्ञापकाभावेऽपि ज्ञाप्योपलम्भात् प्रत्य-वस्थानमुपलब्धिसमा। उत्थानबीजं तु वाक्यस्यावधारणगर्भत्वाभिमानः। तथा च वाक्यार्थावधारणविकल्पदोषेण प्रत्यवस्थानमुपलब्धिसमा।

[NTĀ, Allahabad edn., p. 458.]

(445) P. 315, ll. 8-12 : Jānakīnātha has not shown how the interpretation offered by him follows from the wordings of the *sūtra* under discussion (कारणान्तरादपि etc.). Since Vardhamāna's comments on this *sūtra* are not available in their entirety, we are quoting here the relevant comments of Vācaspati Miśra II, Keśava Miśra Tarkācārya and Viśvanātha Nyāyapañcānana :

(*i*) धूमवत्त्वादेवाग्निमत्त्वादिप्रतिषेधो नोपपद्यत। कुत:? कारणान्तरादप्यालोकादेस्तस्य धर्मस्य साध्यस्योपपत्ते:। न ह्यवधारणगर्भं धूमवत्त्वादि वाच्यं यदुक्तदोष: स्यात्, मानाभावात। धूमवत्त्वात्तावदस्य वह्निमत्त्वमवबोध्यत। अन्यस्मादप्यस्यैवान्यस्य वाऽवगम्यताम। तावता न मद्वाक्यमसम्बद्धं भवति। [NTĀ, Allahabad edn., p. 458.]

(*ii*) कारणान्तरादपि प्रयोजकान्तरादपि तद्धर्मस्य व्यवच्छेद्याभिमतस्य साध्यादरूपपत्तरूपपन्नत्वात् तथैव दर्शनादित्यर्थ:। न हि सर्वत्र कृतौ ज्ञप्तौ वा व्यवच्छेदो वाक्यार्थ: पदार्थो वा। दूषणवाक्यस्याप्येतदवधारण-दोषेणानुत्थानापातात। किन्तु धूमो लिङ्गं तृणं कारणमित्येतावदेवेति दिक्। [GSP, p. 109.]

This is in all probability borrowed from Vardhamāna, whose comments also begin with exactly the same words कारणान्तरादपि प्रयोजकान्तरादपि तद्धर्मस्य व्यवच्छेद्याभिमतस्य, and then break off due to a lacuna in the manuscripts. [See ANTB, p. 53.]

(*iii*) कारणान्तरात् साधनान्तरादालोकादितोऽपि तस्य धर्मस्य साध्यस्योपलब्धेस्त्वदुक्त: प्रतिषेधो न सम्भवति। अयमाशय: – न हि वयमवधारणार्थं 'वह्निमान् धूमादि'त्यादिकं प्रयुञ्ज्महे, अपि तु सन्दिग्धस्य वह्ने: सिद्ध्यर्थम। अन्यथा त्वदुक्तमसाधकतासाधनमपि न स्यादसाधकतासाधकान्तरस्यापि सत्त्वात। [NSV, p. 2142.]

(446) P. 316, l. 1 : Keśava Miśra Tarkācārya has indicated the *saṅgati* of his *prakaraṇa* with the following words :

अनुपलब्धेः प्रतियोग्युपलब्धिनिरूप्यत्वादुपलब्धिसमानन्तरमनुपलब्धिसमलक्षणमिति सङ्गत्या सूत्रम् ... ... [GSP, p. 109.]

(447) P. 316, ll. 3-10 : Jānakīnātha has not indicated how this interpretation follows from the wordings of the *sūtra* concerned. In this respect, the comments of Vācaspati Miśra II are worth noting, because he has also recorded and evaluated the interpretations of Vātsyāyana, Vācaspati Miśra I and Udayana :

(*i*) अत्र तदिति सर्वनाम्नः प्रस्तुतप्रत्यवमर्शित्वात् प्रतिषेधिकात्मिकाया अनुपलब्धेः प्रतिषेध्याकाङ्क्षितत्वाच्च भाष्यकृत् सूत्रादस्मात् पूर्वमेव निषेध्यमाह–न प्रागुच्चारणाद्विद्यमानस्य शब्दस्यानुपलब्धिः किन्तु सत एवेत्यर्थः। कस्मात ? आवरणानुपलब्धेरिति। यद्येवन्तर्हि जलादेर्विभागादि(?)वच्छब्दस्यावरणमुपलभ्येत तदावरणसद्भावः स्यादिति तदपनयायोच्चारयितुः प्रयत्नो घटेत। तच्च नोपलभ्यत। अनुपलम्भाच्चावरणाभावे निश्चिते वहुप्रयत्नः(?) शब्दोत्पादक एवेति भाष्यार्थः।

अत्र जातिवादिनामनुपलब्धिसमसूत्रोत्थानम। तस्यार्थः–तदनुपलब्धेरावरणानुपलब्धेः अनुपलम्भाद्धेतोरभावस्य सिद्धौ सत्यां तद्विपरीताया उपलब्धेरावरणोपलब्धेर्यत् प्रत्यवस्थानं प्रागुच्चारणाद् विद्यमानस्यैव शब्दस्यानुपलम्भ इत्येवंरूपं तदनुपलब्धिसमेति।

नन्वनुपलब्धेर्यद्यनुपलब्धिः स्यात्तदैवं स्यादेव, न त्वेवम्, अनुपलब्धेर्ज्ञानाभावरूपाया आत्मनिष्ठाया मनसैव साक्षात्कारादिति चेत? न, साऽप्यनुपलब्धिरनुपलब्ध्यन्तरेण चेद्ग्राह्या, तदाऽनवस्था स्यादिति सैव स्वात्मन्यनुपलब्धिर्वाच्या। तथा च स्वात्मरूपयाऽनुपलब्ध्या तस्या एवानुपलब्ध्याऽनुपलब्ध्यसम्भवात् आत्मनि चानुपलब्धिरूपत्वाभावेऽनुपलब्धित्वस्यैव व्याहतिः, सविषयकधर्मस्य विषय इव स्वस्मिन्नपि स्वरूपाविशेषनियम इति वादिनोऽभिमानादिति टीकापर्यन्तस्वरसः।

परिशिष्टकृतस्तु जातिवादिनो यथोक्ताभिमानादेवानुपलब्धिपदेन विषयी धर्मः सर्वोप्युपलक्षितः, तेनानिष्टसमादेरप्युपग्रह इत्याहुः।

तेषां चायमाशयः। अनुपलब्धीत्यत्र पर्युदासे नञ। तेनोपलब्धिसदृशं विषयिमात्रमुच्यते, अब्राह्मण इति न्यायात। तेनोपलब्ध्यनुपलब्धी इच्छानिच्छे शक्त्यशक्ती द्वेषेद्वेषौ कृत्यकृतीत्यादिसंग्रहः। अन्यथा आसां जात्यन्तरप्रसङ्गो विभागव्याघातश्चेति। तथाचात्मनि तदतद्रूपताविकल्पेन स्वव्याघातकदोषाभिधानमनुपलब्धिसमेति लक्षणपर्यवसानम।

अयन्तु न सूत्राक्षरार्थः। एतन्मते त्वियमेवं प्रवर्तत। उपलब्धं लिङ्गादि गमकम्, उपलब्धश्चोपलब्धिविषयः। उपलब्धिश्च स्वात्मन्युपलब्धिरूपा न वा? आद्ये त्वात्माश्रयः। उपलब्धेरूपलब्धत्वे घटादिवदनुपलब्धित्व-प्रसङ्गः। द्वितीये तूपलब्धेरेवानुपलब्धिरिति तदभावाल्लिङ्गाद्युपलब्धिमेव न स्यादित्यसिद्ध्यादिप्रसङ्गः।... ... ...एवमन्यत्रापि विकल्पे दूषणमूहनीयम। सर्वदोषदेशनाभासा चेयम् ।

[NTĀ, Allahabad edn. pp 459-460.]

Vardhamāna Upādhāya has noted some alternative accounts of अनुपलब्धिसमा, and he has also rejected one of them :

(*ii*) यद्वा–विषयत्वेनेतरनिरूपणाधीननिरूपणा धर्माः विवक्षिताः। तेन सप्रतियोगिका अनुपलब्ध्यादयः, सावधिकाश्च पृथक्त्वादयःसंगृहीताः। स्ववृत्तित्वास्ववृत्तित्वखण्डनेन स्वात्मनि तद्गतरूपवैकल्यानु-पपत्त्या स्वव्याघातकमुत्तरमनुपलब्धिसम इति लक्षणम। ... ...

नव्यास्तु – अत्र यद्यनुपलब्धिरूपलभ्यते, सर्वथाऽनुपलब्धिर्नास्तीति दर्शितम। तथा चान्यत्रापि तुल्ययोगक्षेमत्वादात्मनि तदतद्रूपता-विकल्पानुपपत्त्या तन्निरासेन प्रत्यवस्थानमिति लक्षणम। एवञ्चावश्य-कतया स्वात्मन्युक्तानुपपत्त्या प्रत्यवस्थानमित्यन्वयेनौवोपपत्तौ नानुप-

लब्धेः लक्षणे प्रवेशः, अनाकाङ्क्षितत्वात्, व्यवच्छेद्यानध्यवसायाच्च। विशिष्य विषयिधर्मोत्कीर्तनं तूदाहरणस्फोरणाय। अन्वर्थसंज्ञा त्वेकदेश-पुरस्कारात्, अन्यथाऽनिष्टसमादीनामन्यानन्तर्भूतानां जात्यन्तरत्वापत्तेः। यद्यप्युलब्धिघटादिपदोपादानेऽप्येषा सम्भवत्येव, तथाप्युपलब्धिपदो-पादाने विषयित्वपुरस्कारभ्रमो घटादिपदोपादाने चाविषयित्वमेव तन्त्रमिति भ्रमो मा भूदित्यभिप्रेत्यानुपलब्धिपदोपादानम्। अत्र ह्युप-लब्ध्या विषयिणां नञा चाविषयिणामुपसंग्रहे सर्वसंग्रह इत्याहुः।

अन्ये तु – विषयित्वमेव तत्र धर्मिस्वरूपे, विकल्पार्थं धर्मापेक्षाया-मुपस्थितस्य विषयित्वस्यैवान्वयाल्लाघवात। न चैवमनुपलब्धिरपि विवक्षिता स्यात। सामान्यान्वये विशेषस्यानाकाङ्क्षितत्वात। अनुपलब्धिग्रहणं तु परम्परयापि विषयित्वसम्बन्धप्राप्त्यर्थमित्याहुः।

एतेन–यद्विषयिधर्मेष्वेव भावभागमाकृष्योपलब्धिसमालक्षणमभाव-भागमादायानुपलब्धिसमालक्षणं कैश्चिद्व्याख्यातं, तदपास्तम। पूर्वो-पदर्शितोपलब्धिसमोदाहरणाव्यापनात्, भाववदभावेऽप्यवधारणानु-पपत्तेः, स्वस्मिन् तत्तद्रूपतानुपपत्तेश्च तुल्यत्वेनोभयपुरस्कारात। अन्यथा तज्जात्यन्तरापत्तेः। अस्याश्चानुपलब्धिसमेत्युपलक्षणसमे विषयिधर्म-समेत्यन्वये नाम सूत्रकारस्य स्वमत्युन्नयनम्, अनिष्टसमादीनाम-प्युदाहरणसम्भवात्, तल्लक्षणान्तराप्रणयनात।

[ANTB, Allahabad edn., pp. 54-55.]

(448) **P. 316, ll. 11-19 : The relevant comments of Udayana are as follows :**

(*i*) अस्योपलक्षणमर्थः। अनुपलब्ध्या हि विषयी धर्म उपलभ्यते, तेन उपलब्ध्यनुपलब्धी इच्छानिच्छे द्वेषाद्वेषौ कृत्यकृती शक्त्यशक्ती उत्पत्त्यनुतपत्ती व्यवहृत्यव्यवहृती इत्यादयः संगृहीता भवन्ति। यद्यपि च विषयिधर्माणां मध्ये मूर्धाभिषिक्तत्वादुपलब्धिरेवोपलक्षणं वक्तुमुचिता,

तथाप्युपलब्धिसमानामसङ्करो मा भूदित्यनुपलब्धिरुक्ता ।

[NP, pp. 56-57.]

Vardhamāna's comments on this passage are as follows :

(*ii*) अनुपलब्धेः प्रतियोग्युपलब्धिनिरूप्यत्वात् सङ्गतिः। नन्वनुपलब्धिसमतुल्ययोगक्षेमत्वेनानिष्टसमादीनामपि सम्भवादत्र च तदन्तर्भावादव्यापकं सूत्रमित्यत आह–विषयीति। [NPP, p. 56.]

Maṇikaṇṭha Miśra also follows Udayana :

(*iii*) यत्किञ्चिदेतत्प्रतियोगिविषयत्वस्य स्ववृत्तिविकल्पेन या जातिः साऽनुपलब्धिसमा। उपलब्धिसमानामसाङ्कर्यभयादनुपलब्धिसमा नाम्नीयम। [*Nyāyaratna,* p. 215.]

(449) Vardhamāna Upādhyāya has noted two other views regarding the refutation of the *jāti* known as अनुपलब्धिसमाः

ननु मा भूदनुपलब्धिनिषेधकं प्रमाणम्, तद्विधेयं तु किञ्चिदुपेयम्, अन्यथा तदसिद्धिप्रसङ्गात। ततस्तदेव प्रमाणत्वाविशेषादभावेऽपि मानमस्तु, कृतं निषेधकादेवाभावसिद्धिरिति विभागेनेति, अभावस्वरूपविधायकेनैवाभावो गम्यतामितीष्टापादनं प्रत्यक्षादिचतुष्टयान्यतमेष्वपि। तथा–विधिमुखप्रत्ययजनकप्रमाणव्यक्त्या निषेधोऽपि विषयीकियतामित्यापादने विधिमुखप्रत्ययविषयत्वमभावेऽपि स्यादिति भाव एव न स्यात्, दूरे तद्ग्राहकचिन्ता।

अथ विपर्ययः कस्मान्न भवति? स्वभावविपर्ययप्रसङ्गात। ननु यदि स्वभावविपर्ययप्रसङ्गान्नाग्राहकगम्यो भावः, तत्कथं भावोपलब्धेरभावानुपलम्भान्वयाद्यनुविधानम। तथाप्यहेतुत्वे कथमभावोपलब्धावपि भावानुपलब्धिहेतुत्वमिति चेत्, इत्थम्–भावोपलब्धावभावोपलब्धेरन्ययव्यतिरेकावन्यथासिद्धा। तथा–घटाभावानुपलम्भो घटोपलम्भप्रागभावरूप एव घटोपलम्भे हेतुः, लाघवात्, स्वभावस्तु अंन्यथासिद्धः पृष्ठलग्नः, घटादिभावानुपलम्भे तु नैवम।

अन्ये तु–अभावानुपलब्धिपदेन पर्युदासवृत्त्या सप्रतियोगिकत्वाभावादित्याहुः। संसृष्टाधिकरणबुद्धेरन्याधिकरणबुद्धिरधिकरणसंसृष्टतया यो न भवत्येवम्भूतप्रतियोग्युपलब्धिर्वा विवक्षिता। सा चाभावोपलब्धावेव कारणं न भावोपलब्धौ, तस्य सप्रतियोगित्वाभावादित्याहुः।

अभावानुपलब्धौ [? अभावोपलब्धौ] भावानुपलम्भवद् भावोपलब्धौ अभावानुपलम्भः कारणमविशेषात्, शास्त्रे तु योग्यानुपलम्भादभावग्रह इत्येकदेशकीर्तनमिति नव्याः।

[ANTB, Allahabad edn, p. 58.]

(450) P. 318, l. 3 : This *sūtra* has not been counted as such by Vācaspati Miśra II. [NTĀ, Allahabad edn. p. 461.]

(451) P. 318, l. 8 : *Maṇimarīci* seems to be Jānakīnātha's commentary on Gaṅgeśa's *Tattvacintāmaṇi*. He has referred to this work in his *Nyāyasiddhāntamañjarī* as well :

विस्तरस्तु मणिमरीचावनुसन्धेयः।

[*Nyāyasiddhāntamañjarī*., p. 18.]

(452) P. 318, ll. 9-12 : (*a*) The comments of Udayana are as follows :

तथापि भावाभावयोः विधिनिषेधप्रमाणगोचरता कथमवधार्यत इत्यत आह–

ज्ञानविकल्पानां भावाभावसंवेदनादध्यात्मम् ॥

'अस्ति नास्ति' 'उपलभे नोपलभ' इति ज्ञानविकल्पाः तेषां भावाभावविषयसंवेदनात् अध्यात्मं मनसा, नोपपत्तिसाध्यमित्यर्थः।

[NP, p. 62.]

(*b*) Vardhamāna Upādhyāya has mentioned the view of Udayana as an alternative interpretation without referring to its source :

विकल्पो विशेषः 'इदमेतदात्मकमि'त्यादिधीविशेषाणां भावोऽ-

भावश्च, तयोः संवेदनमध्यात्मं मानसप्रत्यक्षसिद्धम्, नात्र मानान्तरापेक्षा। चकाराद् घटादेश्चक्षुरादिना यथासम्भवं भावाभावसंवेदनादित्यर्थः।

अथवा भावाभावयोः विधायकनिषेधकमानगम्यता कथं गम्यत इत्यत्रेदं सूत्रमुपतिष्ठत। 'अस्ति नास्त्युपलभते नोपलभत' इत्यादयो ज्ञानविकल्पाः, तेषामध्यात्मं भावाभावसंवेदनान्नेदमुपपत्तिसाध्यमित्यर्थः।

[ANTB, Allahabad edn., pp. 58-59.]

The first interpretation offered by Vardhamāna has been repeated *verbatim* by Keśava Miśra Tarkācārya. [GSP, p. 110.]

(*c*) Visvanātha has followed Udayana :

अध्यात्मम् आत्मन्यधि, ज्ञानविकल्पानां ज्ञानविशेषाणां भावाभावयोर्मनसा संवेदनात् 'घटं साक्षात्करोमि', 'न साक्षात्करोमि' 'वह्निमनुमिनोमि' 'नानुमिनोमी'त्येवं ज्ञानविशेषतदभावानां मनसैव सुग्रहत्वादिति भावः। [NSV, p. 1145.]

(453) P. 319, ll. 1-3 : (*a*) This has been taken from Udayana, whose comments are as follows :

सेयं जातिरन्ततः कीर्त्तिमपि व्यामोहितवती, यदाह—
"अप्रत्यक्षोपलम्भस्य नार्थदृष्टिः प्रसिद्ध्यति।" [NP, p. 62.]

Similar comments have also been made by Maṇikaṇṭha Miśra and Vardhamāna Upādhyāya :

(*ii*) तदनयोः कीर्त्तरपि वचनं व्यामोहनकृतम्, यदाह—

"अप्रत्यक्षोपलम्भस्य नार्थदृष्टिः प्रसिध्यति"—इति।

[*Nyāyaratna*, p. 216.]

(*iii*) सेयं जातिरंशतो"ऽप्रत्यक्षोपलम्भस्य नार्थदृष्टिः प्रसिद्ध्यती"ति वदन्तं कीर्त्तिमिपि व्यामोहितवती। तावता तदुपलम्भमात्रः सिद्धः, न तेनैवेत्यस्यापि सिद्धिः। न हि स्वाविषयत्वे वित्तेः नार्थविषयत्वं, येनो-

पलब्धिरात्मनि ताद्रूप्येण वर्तत इत्यभ्युपगम्येतेति।

[ANTB, Allahabad edn., p. 59.]

(*b*) The half-verse quoted here is quite well-known, and has been taken from *Pramāṇa-Viniścaya* of Dharmakīrti. This has been quoted by Jayanta Bhaṭṭa (*Nyāyamañjari* Vol. I, p. 47) and Bhāsarvajña (*Nyāyabhūṣaṇa*, p. 108 p. 134), among others. Cakradhara, while commenting on Jayanta's book, has explained this half-verse as follows :

(*i*) अप्रत्यक्षोपलम्भस्य नार्थदृष्टिः प्रसिद्ध्यति। अप्रत्यक्ष उपलम्भो यस्यार्थस्य तस्य दृष्टिर्दर्शनं न प्रसिद्ध्यतीत्यर्थः। सापेक्षेणाप्यर्थशब्देन गमकत्वात् समासः। [*Nyāyamañjarīgranthībhaṅga*, Vol. I, p. 47.]

Bhāsarvajña has refuted this half-verse in the following manner :

(*ii*) केयमर्थदृष्टेः प्रसिद्धिः–किमुत्पत्तिः आहोस्विदुपलब्धिः? कश्चोपलम्भोऽपि यस्याप्रत्यक्षत्वे सत्यर्थदृष्टिर्न प्रसिद्ध्यति–किं सैवार्थदृष्टिरूत तज्जनकं ज्ञानमिति? तद्यदि सैवार्थदृष्टिरूपलम्भस्तस्याऽप्रत्यक्षत्वे सत्युत्पत्तिर्न सम्भवतीति, तदयुक्तम् ; उत्पादे हि सति पश्चादर्थदृष्टेः प्रत्यक्षत्वं युक्तं न पूर्वमेव, न हि प्रत्यक्षेण पश्चादुत्पत्तिरित्ययं कमः क्वाप्युपलभ्यत। अथार्थदृष्टिजनकं ज्ञानमुपलम्भः, तस्याप्रत्यक्षत्वेऽर्थदृष्टिर्नोत्पद्यत इति ; तदयुक्तम्, चक्षुरादिवदप्रत्यक्षस्याप्युत्पादकत्वसम्भवात्, तीव्रस्पर्शादिना सुषुप्तप्रबोधे पूर्वज्ञानसंवेदनाच्च । न चार्थदृष्टेःप्रत्यक्षोपलम्भजन्यत्वेऽप्यर्थज्ञानयोरेकोपलम्भनियमः सिद्ध्यति। अथार्थदृष्टेः प्रसिद्धिरूपलब्धिः, तथाप्ययं वाक्यार्थोभवति–"अप्रत्यक्षोपलम्भस्य नार्थोपलम्भः प्रत्यक्षः" इति; नं वा तेन किञ्चित् साधितं भवति। अथ दृश्यत इति दृष्टिरर्थ एव, ततश्चा"प्रत्यक्षोपलम्भस्यार्थोऽपि प्रत्यक्षो न भवती"त्ययं वाक्यार्थः; न, उपलम्भादर्थान्तरत्वात। न चैकस्याप्रत्यक्षत्वे तदन्यस्याप्रत्यक्षत्वं न्याय्यम्, अतिप्रसङ्गात। अथोप-

लम्भस्याप्रत्यक्षत्वे सत्यर्थो दृष्ट इत्येवं प्रतीतिर्न भवति। एतदस्माकमप्यभिमतम्, 'नागृहीतं विशेषणं विशिष्टप्रतीतौ निमित्तमि'ति। न च सर्वत्र दर्शनविशिष्ट एवार्थो गृह्यते, 'शुक्लो गच्छति गौ'रिति—नात्र गोज्ञानं दर्शनमनुभूयते, अपि तु गुणक्रियाविशिष्टो गौरिति।

[*Nyāyabhūṣaṇa*, pp. 134-135.]

(454) P. 320, l. 1 : Vardhamāna Upādhyāya has introduced this *prakaraṇa* by showing *prasaṅgasaṅgati* :

अनुपलब्धिसमाऽनित्यसमयोरभावनिरूप्यतयैकनिरुप्यत्वप्रसङ्गसङ्गत्या सूत्रम् ... ... [ANTB, p. 59.]

(455) P. 320, ll. 3-9 : (*a*) Here, the relevant comments of Udayana are as follows :

(*i*) अस्याप्युपलक्षणमर्थः। साधर्म्यवद्वैधर्म्येणापि प्रत्यवस्थानसम्भवात्, तथा शब्दानित्यत्ववत् पर्वताग्निमत्त्वादावपि साध्यान्तरे सावकाशत्वात् ... ... तस्माद्दिगुपदर्शनमात्रमेतत। अत एवोपक्रमे साधर्म्यात् 'तुल्यधर्मोपपत्तेरि'त्याह, न 'त्वनित्यत्वोपपत्ते'रिति। तेनायं सूत्रार्थः—अनित्यत्वप्रयोगसाधर्म्यात् सर्वानित्यत्वप्रसङ्गवद्धर्मान्तरात् साधर्म्योपपत्तिप्रसङ्गेन प्रत्यवस्थानमनित्यसमः। अन्वर्थसंज्ञा तु साध्यधर्मसमेति। कथं पुनरियमविशेषसमातो भिद्यत ? तत्र पक्षादेरविशेषमात्रापादनात्, इह तु विपक्षस्य सपक्षत्वापादनाद्विशेषः, परिकरस्तु तद्वदेव।

[NP, p. 63.]

(*b*) Vācaspati Miśra II has made some pertinent remarks in his explanation of this *sūtra*, and he has also given an intelligible summary of Udayana's view :

अनित्येति भावप्रधानो निर्देशः। तेनानित्यत्वेन समाऽनित्यसमत्यन्वर्थसंज्ञाप्राप्तमेव लक्षणमनूद्यत। दृष्टान्तसाधर्म्यादव चेद् दृष्टान्तेन तुल्यो धर्मोऽनित्यत्वं पक्षे स्यात्तदा सर्वेषामेव दृष्टान्तसाधर्म्यं सत्त्वादि सम्भवतीति सर्वेषामनित्यत्वमायातमित्याकारेण प्रत्यवस्थानमनित्यसमति सूत्रार्थः।

परिशिष्टे तु साधर्म्यं वैधर्म्यस्याप्युपलक्षकम। तेन वाद्युक्तप्रयोजक-सामान्यमात्रेण विपक्षत्वाभिमतस्य सपक्षत्वप्रसञ्जनमनित्यसमेति फलितम। मात्रपदं प्राप्त्यनपेक्षार्थकं जातितानिर्वाहाय।

[NTĀ, Allahabad edn. p. 461.]

(*c*) Viśvanātha Nyāyapañcānana has rejected the interpretation of Vācaspati Miśra II without naming the source. He has also mentioned the view of Udayana, and pointed out a defect in it :

यदि दृष्टान्तघटसाधर्म्यात् कृतकत्वात् तेन सह तुल्यधर्मतोपपद्यते इत्यतः शब्देऽनित्यत्वं साध्यते, तदा सर्वस्यैवानित्यत्वं साध्यते, तदा सर्वस्यैवानित्यत्वं स्यात्, सत्त्वादिरूपसाधर्म्यसम्भवात। न चेदमर्थान्तर-ग्रस्तमिति वाच्यम्, सर्वस्यानित्यत्वे व्यतिरेकाग्रहादनुमानदूषणे तात्पर्यात्, परस्यान्वयव्यतिरेकिण एवानुमानत्वादित्याशयः। तथा च व्याप्तिमपुरस्कृत्य यत्किञ्चिद्दृष्टान्तसाधर्म्येण सर्वस्य साध्यवत्त्वापादन-मनित्यसमा। साध्यपदादविशेषसमातो व्यवच्छेदः, तत्र सर्वाविशेष एवापाद्यते, न तु सर्वस्य साध्यवत्त्वम।

यत्तु—अनित्यत्वेन समाऽनित्यसमेति भावप्रधानो निर्देशः, तथा च अन्वर्थलब्धमेव लक्षणमिति; तन्न, 'वह्निमान् धूमादि'त्यादौ 'महानस-साधर्म्यात् सत्त्वात् सर्वस्य वह्निमत्त्वं स्यादि'त्यस्या जात्यन्तरत्वापत्तेः।

आचार्यास्तु—साधर्म्यं वैधर्म्यस्याप्युपलक्षकम्, यथाऽऽकाशवैधर्म्यात् कृतकत्वाच्छब्दोऽनित्यस्तथाऽऽकाशवैधर्म्यादाकाशभिन्नत्वादितः सर्वमेवा-नित्यं स्यात्, इत्थं च लक्षणे यत्किञ्चिद्धर्मेणेत्येव वाच्यम्, इत्याहुः।

अत्र च वैधर्म्यस्य विपक्षावृत्तित्वान्न सर्वत्र साध्यवत्त्वापादनं किं त्वात्मादीनामप्यनित्यत्वं स्यादिति, तत्र चार्थान्तरमित्यवधेयम। प्रतिकूलतर्कदेशनाभासा चेयम। [NSV,pp. 2146-2147.]

(*d*) Vardhamāna Upādhyāya, while noting a dissenting view, has followed and defended Udayana :

साधर्म्यानित्यत्वपदे आपाद्यापादकधर्ममात्रोपलक्षणपरे, आपाद्यापादकसामान्योपस्थितेरावश्यकतयाऽऽकाङ्क्षितत्वेन च तदन्वयसम्भवे विशेषस्यानाकाङ्क्षितत्वेनानन्वयात। अन्यथा वैधर्म्येण साध्यान्तरेण च एतादृशप्रत्यवस्थाने जात्यन्तरत्वापत्तेः। अत्राद्ये प्रत्युत्तरसूत्र प्रतिषेधासिद्धिरिति सामान्यवचनात् विशिष्यानित्यत्वासिद्धिरित्यनभिधानात्, द्वितीये च धर्मस्येति सामान्यमभिधाय तस्य चोभयथा भावादित्यनेन साधर्म्यवैधर्म्यरूपत्वप्रकटनात् सूत्रकारानुमतिरनुमीयते, साधर्म्यादित्येकदेशानुवादः। अनित्यत्वमुदाहरणप्रदर्शनाय। पक्षसपक्षयोः साध्यपदेनोक्तत्वम्, अतः सर्वपदं विपक्षपरम। ... ... तथा च वाद्युक्तप्रयोगसाम्यमात्रेण विपक्षाभिमतस्य साध्यवत्त्वप्रसञ्जनमनित्यसम इति लक्षणम।.........सपक्षस्य तु विपक्षत्वापादनं जात्यन्तरमेवाकृतिगणान्तर्भूतम। सेयमुपलक्षणान्वर्थसंज्ञाभ्यां द्विनामा। उपलक्षणसंज्ञा—अनित्यसमा, अन्वर्थसंज्ञा—साध्यधर्मसमा। ... ... अन्ये उपलक्षणत्वमस्य सूत्रस्य न मृष्यन्ते जात्यन्तरसंग्रहाय, अवश्योपलक्षणीयोपपत्तिसम एव तत्संग्रहान्तर्भावात्; उक्तलक्षणं विना यत्र कथञ्चित् साधनदूषणं, सोपपत्तिसमेति सिद्धान्तात्। [ANTB, pp. 60-61]

(456) P. 320, ll, 9-13 : This is the view of Maṇikaṇṭha Miśra, to whom Jānakīnatha refers as अन्ये. The relevant comments of Maṇikaṇṭha are as follows :

साध्यवत्साधर्म्येण पक्षे साध्यवत्तासिद्धिवत् साध्यवद्वैधर्म्येण विपक्षेऽपि साध्यवत्तापादनमनित्यसमः। यथा—यद्यग्निमत्साधर्म्यात् पक्षोऽग्निमान्, हन्ताग्निमद्वैधर्म्यात् ह्रदादेरपि विपक्षस्याग्निमत्त्वमस्तु, अविशेषात। न हि महानससाधर्म्यात् पर्वतेऽग्निना भवितव्यम्, न तु तद्वैधर्म्यात् ह्रदेऽग्निना न भवितव्यमिति कश्चिदस्ति विशेषः।

नन्वविशेषसमातः कथमयं भिद्यत? अत्र परिशिष्टम्—"पक्षादेरविशेषमात्रापादनं तत्र। इह तु विपक्षस्य सपक्षत्वापादनमिति

विशेष:" इति। तन्न, तन्मतेऽविशेषसमायामेतदन्तर्भाव: स्यात्। अस्मन्मते तु तत्र साधर्म्यादविशेषापादनम। इह तु वैधर्म्यापादनमिति स्फुट एव विशेष:। उक्तिसम्भवस्तु साधर्म्यवत् वैधर्म्यस्यापि साध्यसाधनत्वमिति। प्रतिकूलतर्कदेशनाभासेयम। अनित्यत्वस्यानुपयुक्तत्वात् साध्यधर्मसमानामेयमित्यवगन्तव्यम। [*Nyāyaratna*, pp. 216-217.]

Here, Maṇikaṇṭha has rejected Udayana's suggestion regarding the means of distinguising अनित्यसमा from अविशेषसमा.

(457) P. 320, ll. 16-20 : These comments are similar to those of Vācaspati Miśra II, which are as follows :

असिद्धेरित्यनन्तरं स्वीकारे इति पूरणीयम। नित्यसाधर्म्यात् सत्त्वादनित्यत्वस्यासिद्धे: स्वीकारे प्रतिषेधस्यापि भवदुच्यमानस्यासिद्धि: स्यात। कुत:? प्रतिषेध्यसाधर्म्यात् प्रतिषेध्येन स्थाप्येन साधर्म्यात। अस्त्येव हि मम स्थाप्येन तव प्रतिषेध्येन प्रतिषेधस्य त्वद्वचनस्य प्रतिज्ञाद्यवयवयोग्यत्वं साधर्म्यमिति। अथ साधर्म्यमात्रं न साधकं किन्तु साधर्म्यविशेषो नियतं साधर्म्यं तन्मतप्रतिषेधे नास्तीति ब्रूषे, तदा सत्त्वमपि न नियतं नित्यत्वेनेति न नित्यस्य सिद्धिरपीति प्रत्यूहेनानित्यत्वनियतेन कार्यत्वेन नित्यत्वमेव सेत्स्यतीत्यर्थ:।

यद्वा—कृतकत्वमनित्यत्वासाधकं दृष्टान्तसमानधर्मत्वात् सत्त्ववदिति त्वद्वाक्यार्थ:। तथा च साधर्म्यादसिद्धे: समानधर्मत्वादनित्यत्वादनित्यत्वासिद्धेरसिद्धेरभ्युपगमे प्रतिषेधस्यापि त्वद्वचनस्याप्यसिद्धिरसाधकता। कस्मात? प्रतिषेध्यसाधर्म्यात् प्रतिषेध्येनैव साधर्म्यात् समानधर्मात्मकत्वात। मदुक्तसाधर्म्यस्य कार्यत्वस्य यथा साधकत्वं तथाऽसत्त्वस्यापि, समानधर्मत्वाविशेषात। प्रतिषेध्यं च तत् साधर्म्यं चेति कर्मधारयो वा। तथा च यथा मत्साधर्म्यं त्वया असाधकमुच्यते तथा त्वदुक्तं मयापीत्यर्थ इत्याहु:।

अत्र सामान्यमात्रमुक्तं भवति, न तु स्वव्याघातकत्वमिति नायमर्थः।
[NTĀ, Allahabad edn., pp. 462-463.]

As we can see, Vācaspati Miśra II has rejected the alternative interpretation noted by him.

(458)P. 321, ll. 2-6 : (*a*) Bhaṭṭa Vāgīśvara has not counted or explained this *sūtra*. [NTD, p. 149.]

(*b*) Jānakīnātha has followed here Udayana, whose comments are as follows :

... साधर्म्यवैधर्म्यमात्रमत्राविवक्षितम्, अपि तु नियमः, तत्प्रतिपादनार्थमाह–

दृष्टान्ते च साध्यसाधनभावेन प्रज्ञातस्य धर्मस्य हेतुत्वात् तस्य चोभयथाभावान्नाविशेषः॥

निगदव्याख्यातमेतत। धर्मस्येति तस्य चोभयथा भावादिति च वचनाल्लक्षणसूत्रमुपलक्षणं वोध्यम। अनेन नियमरूपयुक्ताङ्गहीनत्वं दर्शितम। अविशेषसमावच्च समाधेरूपकम इति। [NP, p. 65.]

(*b*) Vācaspati Miśra II has noted the view of Udayana as an alternative interpretation :

न साधर्म्यमात्रं गमकं येनाविशेषः स्यात्, किन्तु दृष्टान्ते साध्यसाधनभावेन साध्यव्याप्यत्वेन प्रज्ञातस्य प्रकर्षेण ज्ञातस्य प्रमितस्य तादृशस्य हेतुभावो हेतुत्वं यतोऽतो नाविशेषः।

ननु मदुक्तसाधर्म्यस्यापि नभसि दृष्टान्ते साध्यसाधनभावेन (?) एवेति यदि ब्रूयात्तत्राह–तस्य चोभयथाभावात। सहचारदर्शनव्यभिचारादर्शनाभ्यां सहचारदर्शनतर्काभ्यां वा सम्भवात। एतच्चोभयं कृतकत्वस्यानित्यत्वेनास्ति। न तु सत्त्वस्यानित्यत्वेन, व्यभिचारस्य स्फुटत्वादित्यर्थः।

परिशिष्टमते तु दृष्टान्तेऽन्वयदृष्टान्ते चोभयथाऽन्वयव्याप्तिव्यतिरेक-

व्याप्तिभ्यामित्यर्थः। [NTĀ, Allahabad edn., p. 463.]

(459) P. 322, l. 1 : (*b*) Vardhamāna Upādhyāya has indicated the *saṅgati* of this *prakaraṇa* in the following manner:

धर्मस्य तदतद्रूपताविकल्पे धर्मोपलब्धेः कारणात् तस्याश्च पूर्वभावित्वसङ्गत्या सूत्रम् ... ... [ANTB, p. 61.]

(460) P. 322, l. 3-13 : (*a*) We come across similar remarks in the explanations of Vardhamāna Upādhyāya, Vācaspati Miśra II and Keśava Miśra Tarkācārya :

(*i*) अनित्ये शब्दादौ नित्यं सर्वदा अनित्यभावोऽनित्यत्वं यतः, अतः शब्दादावनित्ये नित्यत्वोपपत्तिः सिद्धिः, जातिसमवायभिन्नधर्मनित्यत्वे धर्मिणोऽपि नित्यत्वात्, ततः प्रत्यवस्थानं नित्यसम इत्यक्षरार्थः।

यद्यपि सूत्रैकसमधिगम्या जातिः, तत्र चोदाहरणविशेषश्रवणादुपलक्षणत्वानुपपत्तिः, तथापि 'कर्तृत आरभ्येत, तदर्थपरत्वमेतस्य' इति व्याकरणसूत्रवदुपलक्षणार्थतया प्रसिद्धः तदर्थतयैव सूत्रं व्याख्येयम। तथा हि–अनित्यस्य भावोऽनित्यत्वमिति धर्मिविशेषोपस्थितौ तत्सामान्योपस्थितेरावश्यकत्वात्, प्राथमिकत्वात्, आकाङ्क्षितत्वाच्च तत्रैवान्वयात् उदाहरणान्तरेऽसङ्कोचापत्तेश्च नित्यत्वशब्देन सर्व एव विशेषणरूपा उपलक्ष्यन्ते। नित्यमनित्यभावादित्युत्थानवीजं तदतद्रूपताविकल्पोपलक्षणपरम। अनित्येऽनित्यताभिमते इत्यत्र धर्मिमात्रं विवक्षितम। नित्यत्वोपपत्तेरिति प्रसङ्गरूपतया तत्तत्साध्यानिष्टमात्रोपदर्शनपरमिति स्वीकृतविरुद्धोपपत्तिर्विवक्षिता। यद्यपि तदतद्रूपता तद्धर्मत्वातद्धर्मत्वे, सा च सारूप्यविकल्पप्रत्यवस्थाननियतेति वैरूप्यविकल्पप्रत्यवस्थानाव्यापकत्वम्, तथापि प्रकृतविवक्षितधर्मस्य यत्किञ्चिद्विरुद्धविकल्पद्वारा धर्मिणि तद्वैशिष्ट्यनिराकरणेन प्रत्यवस्थानं नित्यसम इति लक्षणम। ... ... अन्वर्थसंज्ञात्वमुदाहरणैकदेशमादाय क्वचित् केनाप्यर्थेनोपपद्यत।

[ANTB, pp. 61-62]

(b) नित्येति भावप्रधानो निर्देशः। तेन नित्यत्वेन समा नित्यसमेति समाख्यालभ्यलक्षणमनूद्यत। अनित्ये वस्तुनि नित्यं सर्वदाऽनित्यभावाद-नित्यत्वात् नित्यत्वोपपत्तेर्नित्यत्वापत्तेः प्रत्यवस्थानं नित्यसमेत्यर्थः।

परिशिष्टमते तु नित्यपदेनाजहत्स्वार्थलक्षणया सर्व एवाविशेषेण धर्मा उपलक्ष्यन्त। नित्यमनित्यभावादित्यनेन तदतद्विकल्पः। स च सारूप्यवैरूप्याभ्याः द्विरूपः। नित्यत्वोपपत्तेरित्यनेन विवक्षितानुपपत्ति-मात्रम। तेन विवक्षितरूपस्य यत्किञ्चिद्विरूद्धविकल्पद्वारा धर्मिणि तद्वैशिष्ट्यनिराकरणेन प्रत्यवस्थानान्नित्यसमा। प्रकृतविवक्षितधर्मस्य साध्यादेः किञ्चिद्विरूद्धम्, तद्विकल्पद्वारा धर्मिण्यपेक्षितस्य साध्य-वैशिष्ट्यस्य निराकरणेन प्रत्यवस्थानमित्यर्थः। तेन नित्यानित्य-भिन्नाभिन्नकार्याकार्याश्रितानाश्रितसत्यासत्यस्थिरास्थिरैकानेकानुवृत्त-विशेषणाविशेषणादिसंग्रहः। [NTĀ, Allahabad edn., p. 464.]

(c) अनित्ये शब्दादौ नित्यं सर्वदा अनित्यभावो अनित्यत्वं यतोऽतः शब्दादावनित्ये नित्यत्वोपपत्तिः सिद्धिः, जातिसमवायभिन्नधर्मनित्यत्वे धर्मिणोऽपि नित्यत्वात्, ततः प्रत्यवस्थानं नित्यसम इति वाक्यार्थ

वस्तुतस्तु—अनित्ये अनित्यताभिमते इत्यत्र धर्मिमात्रं विवक्षितम। नित्यत्वोपपत्तेरिति प्रसङ्गरूपतया तत्साध्यानिष्टमात्रोपदर्शनमात्र-परमिति स्वीकृतविरुद्धोपपत्तिर्विवक्षिता। तेन नित्यत्वानित्यत्वभिन्न-त्वाभिन्नत्वकार्यत्वाकार्यत्वाश्रितत्वानाश्रितत्वक्षणिकत्वाक्षणिकत्वसत्त्वा-सत्त्वादयस्तद्विशेषा घटत्वाघटत्वादयस्तद्विशेषाः सन्दिग्धत्वासन्दिग्ध-त्वादयाः सर्वे विकल्पाः संगृह्यन्त। [GSP, p. 111.]

From the statement of Vācaspati Miśra II, we come to know that the second interpretation noted in each of these cases was provided by Udayana, whose comments on the *sūtra* under consideration are as follows :

(*d*) अत्राप्यनित्यशब्देन सर्व एव विशेषणधर्मा उपलक्ष्यन्त। नित्यमनित्यभावादित्यनेन तदतद्रूपताविकल्पः। स च सारूप्यवैरूप्याभ्यां द्विरूपः। नित्यत्वोपपत्तेरित्यनेन विवक्षितानुपपत्तिमात्रम। तेनायमर्थः—विवक्षितधर्मस्य तदतद्रूपताविकल्पानुपपत्त्या धर्मिणस्तद्विशिष्टत्व-खण्डनं नित्यसमा। इयञ्च संज्ञा धर्मान्तरे सुखदुःखशब्दवद् गौणो। गुणयोगश्च लक्षणमुक्तम्—अन्वर्था तूपरञ्जकधर्मसमेति। तेन नित्यानित्य-भिन्नाभिन्न-कार्याकार्यास्तिनास्ति-सत्यासत्य-सदसत्-स्थिरास्थिरैकानु-वृत्ताननुवृत्त-विशेषणाविशेषण-सापेक्षानपेक्ष-क्रमाक्रम-वाच्यावाच्य-परोक्षापरोक्ष-वर्तमानावर्तमान-हेयाहेय-सहितासहित-विरुद्धाविरुद्ध-ज्ञाताज्ञातेष्टानिष्ट-द्विष्टाद्विष्ट-कृताकृत-शक्ताशक्तोत्पन्नानुत्पन्न-व्यवहृताव्यवहृतेत्याद्यवान्तर-घटाघट-सन्दिग्धासन्दिग्धादि-सर्व विकल्पोपक्रमाः संगृहीताः भवन्ति। ... ... [NP, pp. 66.]

Maṇikaṇṭha Miśra has also followed Udayana here :

(*d*) प्रकृतोपयुक्तस्य धर्मस्य स्ववृत्त्यवृत्तिविकल्पानुपपत्तिजनितं जातिसामान्यलक्षणवद्वाक्यं नित्यसमः। [*Nyāyaratna*, p. 217.]

Viśvanātha Nyāyapañcānana has noted the two interpretations recorded by others, but he has given an original interpretation as well :

अनित्यस्य भावः अनित्यत्वम्, तस्य नित्यं सर्वकालं स्वीकारे अनित्ये शब्दे नित्यत्वं स्यादित्यापादनं नित्यसमा। अयमाशयः – अनित्यत्वस्य नित्यत्वास्वीकारेऽनित्यत्वाभावदशायां तस्यानित्यत्वं न स्यात्—तस्यापि नित्यत्वापत्तिः, न हि दण्डाभावदशायां दण्डीत्युच्यत। अतोऽनित्यत्वं नित्यमेवास्तीत्यभ्युपगन्तव्यम्, तथा च शब्दस्यापि नित्यत्वापत्तिः। तेन बाधः सत्प्रतिपक्षो वा, तद्देशनाभासा चेयम। एवमनित्यत्वं यदि नित्यं कथं शब्दस्यानित्यतां कुर्यात्? न हि रक्तं महारजनं पटस्य नीलतां सम्पादयति। अथानित्यम्, तदा तदभावदशायामनित्यत्वं न स्यादित्या-दिकमूह्यम। एतदनुसारेण लक्षणमपि कार्यम्—इत्याचार्याः।

वयं तु – अनित्यस्य भावो धर्मस्तस्य नित्यमभ्युपगमऽनित्यत्वे-नाभ्युपगतस्य नित्यत्वं स्यात्, यथा–'क्षितिः सकर्तृके'त्यत्र क्षितेर्धर्मः सकर्त्तृकत्वं त्वया क्षितौ नित्यमुपयते न वा; न चेत्, तदा साध्याभावा-दंशतो बाधः; अथ क्षितौ नित्यमेव सकर्तृकत्वमुपेयते, तदा क्षितेर्नित्यत्वं स्यादिति सकर्त्तृकत्वं विरूद्धम्, तद्वेशनाभासा चेयमिति ब्रूमः।

[NSV, pp. 2148-2149.]

(461) P. 323, ll. 5-6 : Similar comments have made by Udayana, Maṇikaṇṭha Miśra, Vardhamāna Upādhyāya and Keśava Miśra Tarkācārya :

(*i*) बौद्धचार्वाकवेदान्तिनां चात्रैव निर्भरः।   [NP, p. 67.]

(*ii*) तदेतज्जातिप्रसङ्गादेकदण्डिसमुत्थानम।

[*Nyāyaratna*, p. 218.]

The word एकदण्डी here stands for the monastic order subscribing to Advaita Vedānta, because members of this order carry a single stick.

(*iii*) बौद्धचार्वाकवेदान्तिनां चात्रैव निर्भरः।   [ANTB, p. 64.]

(*iv*) बौद्धचार्वाकवेदान्तिनां चात्रैव निर्भरः।   [GSP, p. 112.]

(462) P. 323, ll. 11-19 : (*a*) Here, one comes across a lot of similarity with the remarks of Vardhamāna Upādhyāya, which are as follows :

त्वयाऽनित्यतया प्रतिषेध्ये शब्दे नित्यं सर्वदाऽनित्यभावान्नित्यः शब्द इति यो प्रतिषेधः तस्याभावः। न ह्यनित्यत्वं तत्र सर्वदा नित्यत्वञ्चेति सम्भवति। अथ सर्वदैवानित्यत्वं तत्र सिद्धं ततो हेत्वसिद्धिरित्यक्षरार्थः, तात्पर्यन्तु–स्तोक्तिव्यापकतया यथायथं स्वव्याघातः। अनित्यत्वञ्च नानित्यं, गुणादावनित्यधर्मो न स्यात्, एतदभावापत्तेः। न च धर्मनित्यत्वे धर्मिणो नित्यत्वम्, तयोर्भेदात्, काल्पनिकऽपि धर्मधर्मिभावे

तथात्वोपगमात्, तत्रैव तद्विशिष्टव्यवहाराभावात। न चातिप्रसङ्गः, यथादर्शनं स्वभावव्यवस्थापनात्, "सम्विदेव हि भगवती वस्तूपगमे नः शरणम्" इति न्यायात्, जातिमति घटादौ तदव्यभिचाराच्च, अन्यशा सत्त्वादिनित्यत्वे धर्मिणां सत्त्वान्निरीहं जगज्जायेतेति व्याघातः।

[ANTB, p. 64.]

(*b*) Vācaspati Miśra II has given two alternative interpretations of the *sūtra* under discussion, and he has also recorded the view of Udayana as another alternative :

योऽनित्यत्वस्य प्रतिषेधस्त्वया नित्यत्वापादनेन कृतस्तस्याभावोऽसम्भवः। कुतः? प्रतिषेध्येऽनित्यतया त्वया प्रतिषेधनीये शव्दे नित्यमेवानित्यभावादनित्यतायोगादनित्य नित्यत्वस्योपपत्तेः सम्भवादि-त्यर्थः। यत एवानित्ये सदैवानित्यत्वयोगो तत्र वा नित्यत्वमुपपद्यत। अनित्यत्वं ह्युभयान्तावच्छिन्नसत्तायोगित्वम्, तद्धि नित्यमेव, समवायात्मकत्वात्। न चैवं शव्दस्यापि नित्यता, समवायभिन्नत्वात। न ह्यन्यस्य नित्यतयाऽन्यस्य नित्यता भवति, अतिप्रसङ्गात। सम्बन्ध्यन्तरस्यासत्त्वे कथं सत्तासमवाय इति चेत। न, एकस्य शब्दस्य नाशे शब्दान्तरमादाय तत्सम्भवादिति।

यद् वा—नित्यत्वोपपत्तेरित्यनन्तरं विरोधादिति पूरणीयम। तथा च प्रतिषेधस्य भवदुक्तस्याभावोऽसम्भवः। कुतः? प्रतिषेध्ये नित्यमनित्यभावात् नित्यत्वोपपत्तेविरोधात। यत्र नित्यमनित्यत्वं भवति तत्र नित्यत्वं विरुद्धम। यदि नित्यत्वम्, कथं नित्यमनित्यभावः; अथानित्यभावः, कथं नित्यत्वम्, अनित्यत्वस्य नित्याधिकरणत्वं विरुद्धमिति चेत्? तत् किमनित्यस्यानित्यत्वाधिकरणत्वं मन्यसे, नित्यस्य वा नित्यत्वाधिकरणत्वम? नाद्यः, अनित्यत्वस्य नित्यत्वानित्यत्वयोस्त्वदुक्तदोषग्रासात। न द्वितीयः, तद्धि नित्यत्वयोगात् पूर्वमेव नित्यं तदुत्तरं वा? आद्ये नित्यत्वयोगात् पूर्वमेव स्यादित्यग्रे

नित्यत्वसम्बन्धानुपपत्तिः। अन्त्ये किं नित्यत्वस्याग्रेऽपि सम्बन्धेन, तं विनाऽपि नित्यतानिर्वाहात। तदपि नित्यत्वं नित्यमनित्यं वा? आद्ये नित्यत्वान्तरयोगान्नित्यं स्वयोगाद् वा नित्यत्वायोगादपि वा? प्रथमेऽन्योन्याश्रयाद्यनवस्थापर्यन्तम्, द्वितीये त्वात्माश्रयः, तृतीये त्वतिप्रसङ्गः।

अथ न मया प्रतिषेध्ये नित्यमनित्यभावोऽभ्युपगम्यते यन्मे विरोधः स्यात। किन्तु यदि त्वया तथाभ्युपगन्तव्यं तथा नित्यत्वं स्यादित्यनिष्टं तवापद्यत। तत् कुतो मे साधनस्वीकारकृतो विरोध इति चेत्? न, विकल्पस्यैवास्योत्थानासम्भवात। उभयान्तावच्छिन्नसत्तासमवायो ह्यनित्यता। नित्या च प्राप्तिः समवायः। तथा च नित्यः सम्बन्धो नित्योऽनित्यो वेति पर्यवसितः प्राप्तोऽनुन्मत्तस्य न सम्भवतीति।

परिशिष्टे तु – अनित्येऽनित्यत्वोपपत्तेः हेतोर्यः प्रतिषेधस्तस्याभाव इति योजनेत्यक्षरार्थ इति योजनीयम।

[NTĀ, Allahabad edn., pp. 465-466.]

(*c*) The initial portion of Udayana's comments on this *sūtra* is as follows :

अनित्यतया प्रतिषेध्ये शब्दे नित्यमनित्यभावादित्ययं हेतुर्यदि सिद्धः, प्रतिज्ञार्थो न सिध्यति, प्रतिज्ञार्थश्चेन्न हेत्वर्थः, व्याघातात। अनित्येऽनित्यत्वोपपत्तेर्यः प्रतिषेधः तस्याभाव इति योजना इत्यक्षारार्थः। तात्पर्यन्त्वस्य यथायथं व्याघातमात्रोपलक्षणे।

यत्तु तदाकारमतदाकारं वा न तदाकारमापादयेदतिप्रसङ्गात। तदसत्, धर्म एव धर्मिणस्तदाकारता, न तु तेनापाद्यमर्थान्तरम। तदिदमयुक्ताङ्गाधिकत्वम्, तदाकारापादकत्वमयुक्तमङ्गमधिकृत्य चोद्यप्रवृत्तेः। ... [NP, p. 68.]

Vācaspati Miśra II has referred to these remarks in his commentary.

(463) P. 324, l. 4 : The problem raised here has been discussed by a host of commentators from Udayana onwards, whose remarks are quoted below :

(*i*) विभागोद्देशकमातिकमस्तु नित्यानित्ययोः किमर्थम्—इति श्रीवत्सप्रश्ने अध्यायान्तरे क्रमस्य सतात्पर्यतया इहापि तच्छङ्का स्यात्, तन्निवृत्त्यर्थमित्युत्तरम। तेन हि न्यायप्राप्तः क्रमो न त्वत्रापि प्रयोजनप्राप्त इति गम्यत। वर्ण्यावर्ण्यसमवन्नित्यसमविपर्ययोऽनित्यसम इति भ्रमनिरासार्थमिति केचित। तदसत्, विभागोद्देश एव तादृक्क्रमप्रसङ्गात। न हि तत्रान्यथाकरणे किञ्चित् प्रयोजनमस्ति।

[TTP, A.L.Thakur's Press Copy, Ch. V, pp. 15-16.]

(*ii*) ननु नित्यानित्यसममोः विभागोद्देशक्रमातिक्रमः किमर्थः ?

तत्र वर्ण्यावर्ण्यसमवन्नित्यानित्यसमयोः मिथो विपर्ययात्मकत्वभ्रम-निरासार्थ इत्येके। तन्न, विभागोद्देशसूत्र एव तादृक् कमकरणतापत्तेः। न हि तत्रान्यथाक्रमकरणे किञ्चित्प्रयोजनमस्ति। तस्मादध्यायान्तरे प्रमाणादाविव वाक्यक्रमस्य सतात्पर्यकत्वेनेहापि तच्छङ्का स्यादिति तन्निवृत्तिनिमित्तः व्यतिक्रमः। तेनात्र न प्रयोजनपरवशः क्रमः, किन्तु "कमभावित्वाद्वाचां न्यायात्" इति सूचनार्थ इत्यन्य। तदपि न, न्यायप्राप्तक्रमसूचनार्थत्वपक्षेऽपि प्रथमजातावेवोद्देशविपरीतकमकरणा-पत्तेः। न हि तत्र यथोद्देशक्रमकरणे किञ्चित्प्रयोजनमस्तीति सा स्यात। अथान्यथाकृते प्रयोजनं मृग्यत। न हि प्रयोजनमस्तीत्यन्यथाकरणम। तदेतत् प्रकृतेऽपि समानम। तस्मादेवं वाच्यम। विशेषलक्षणप्रतिपादक-सूत्रादेव वर्ण्यावर्ण्यसमवदत्र क्रमो निरस्तः। कमव्यतिकमस्तु न प्रमाणादिवन्नियतप्रयोजनकः क्रमः, किन्तूक्तहेतुहेतुमद्भावादिनिबन्धनः। स च यद्यपि जात्यन्तरेऽपि सुबचः, तथापीदमयुक्तरूपमेवापेक्षा जात्युत्थितिरिति कृतिवैचित्र्यादेवोन्नेयम् ... ...

अथ भाष्यकारस्यैवायं क्रमविपर्ययो न तु सूत्रकारस्येत्येव किन्न स्यात। भाष्यकारेण किमर्थ एवं कृतमिति चेत्, स्वव्याख्यानानियमज्ञापनार्थमेव। तेन क्वचित् सूत्रं पठित्वा क्वचित्तदपठित्वा तद्व्याख्यानं समाहितं भवति।

मैवम्, सूत्रकारस्यैवायं कमविपर्यास इति पूर्वाचार्यैः सानातनिप्रभृतिभिरप्यभिधानात। [ANTB, p. 61.]

(*iii*) ... ... ननु नित्यानित्यसमयोर्विभागोद्देशातिकमः किमर्थः? तत्र वर्ण्यावर्ण्यवदनयोर्मिथो विपर्ययात्मकत्वभ्रमनिरासार्थ इत्येके। क्रमभावित्वाद्वाचां न्यायादेव कमो न तु प्रमाणादिवत् कमे बीजान्तरमस्तीति बोधनार्थ इत्यपरे। ननु भाष्य एव व्युत्क्रमो न सूत्र इति किन्न स्यात्? न स्यात्, सौत्रो विपर्यास इति सानातन्याद्यभिधानात।

[GSP, p. 111.]

(*iv*) नित्यानित्यसमयोर्व्युत्कमेण लक्षणकरणे किं बीजमिति चेत? इदम्–अस्ति क्रमः स नानर्थको न चेह तथेति ज्ञापनार्थम।

[NSV, Chowkhamba edn, p. 174. The editor has stated that this passage is not found in all the Mss. of NSV.]

Sānātani, whose name occurs in two of these passages, has been named by Vācaspati Miśra I as प्रौढगौडनैयायिक.

(464) P. 325, l. 1 : Vardhamāna Upādhyāya has shown the *saṅgati* of this *prakaraṇa* in the following manner .

पूर्वापरजात्योर्विकल्पसमुत्थत्वेनैककार्यत्वात् सङ्गतिः। वस्तुतो वक्तव्यजात्यन्तराभावे वक्तुश्च वक्तव्यतैव सङ्गतिः। [ANTB, p. 65.]

This has been repeated verbatim by Keśava Miśra Tarkācārya [GSP, p. 112.]

(465) P. 325, l. 3-7 : These lines bear a close resemblance to the following comments of Vācaspati Miśra II :

(*i*) वस्तुतस्तु कार्यशब्दः कृत्यर्हत्वं कर्तव्यत्वमभिदधानः कृतलक्षणानां जातीनामन्यत् स्वव्याघातकमुत्तरमाह। तथा च कार्येणानुक्तलक्षणेन समा कार्यसमा। ... ... तथा चास्य आकृतिगणत्वात् सूत्राक्षरानु-पदर्शितानां लक्षणया परिगृहीतानामन्यासां च जातीनामुपग्रहः।

[NTĀ, Allahabad edn., p. 467.]

This view has also been accepted by Viśvanātha Nyāyapañcānana :

(*ii*) तथा चाऽस्या आकृतिगणत्वात् सूत्रानुपदर्शितानामपि परिग्रहः।

[NSV, p. 2153.]

(466) P. 325, ll. 8-12 : Here, Jānakīnātha has rejected the interpretation provided by Uddyotakara ; which is as follows :

(*i*) अनित्यः शब्दः प्रयत्नानान्तरीयकत्वादित्युक्ते जातिः कार्यसमा प्रयुज्यते प्रयत्नकार्यमनेकधा दृष्टमिति ; किञ्चित् प्रयत्नान्तरं व्यज्यते, किञ्चित् प्रयत्नानन्तरमुत्पद्यते, प्रयत्नानन्तरमुपलब्धेर्हेतुत्वाध्यारोपेणा-नैकान्तिकदेशनात् कार्यसमः। 'कार्यः शब्दः प्रयत्नानन्तरमुपलब्धे'रिति हेतुमनैकान्तिकं चोदयति। प्रयत्नानन्तरमुपलभ्यमानं कार्यमकार्यं च दृष्टमिति। अथ प्रयत्नानन्तरं जन्म हेत्वर्थः, तथाप्यसिद्धदेशनेति।

[NV, pp. 2150-2151.]

This has been adopted by Bhaṭṭa Vāgīśvara [NTD, p. 150.], while it has been mentioned and rejected by Vardhamāna Upādhyāya, and Vācaspati Miśra II. Viśvanātha Nyāyapañcānana has recorded it as one of the possible interpretations. [ANTB, p. 65, NTĀ, p. 467, NSV, p. 2152.]

Keśava Miśra Tarkācārya has noted the interpretation offered by Sānātani and Jayanta :

(*i*) सानातनिस्तु प्रयत्नकार्यानेकत्वादित्यनेन दृष्टान्तानेकत्वमुक्तम्, तथा च साध्यत्वेनैव हेतुना दृष्टान्तान्तरेणानिष्टापादनं कार्यसमः। यथा

प्रयत्नानन्तरप्रदर्शनात् शब्दस्यानित्यत्वं साध्यते तत एवाभिव्यक्तिरपि किन्न साध्यते? साऽपि प्रयत्नकार्या यत इति प्रसङ्ग इति। जयन्तास्तु—पूर्वजातिवहिर्भूता जातिः कार्यसमा। सूत्रं तु—प्रयत्नकार्यस्य जातिरूपप्रत्यवस्थानस्य पूर्वजातिभिन्नस्य अनेकत्वात् नानाप्रकारत्वात् प्रत्यवस्थानं कार्यसम इति योज्यम्, अतः पूर्वजात्यन्यत्वमेव लक्षणमित्याहुः। [GSP, p. 112.]

Incidently, it may be noted that the interpretation ascribed to Jayanta by Keśava Miśra Tarkācārya is not found in Jayanta's *Nyāyamañjarī*. [See *Nyāyamañjarī*, Vol. III, p. 171.] It may also be noted that the two views recorded here have also been mentioned and rejected by Vardhamāna Upādhyāya, who have not ascribed these views to either Sānātani or Jayanta :

(*ii*) शिवादित्यमिश्रास्तु – प्रयत्नकार्यानेकत्वादित्यनेन दृष्टान्तानेकत्वमुक्तम। तथा च साध्यत्वेनैव हेतुना दृष्टान्तान्तरेणानिष्टापादनं कार्यसमः। यथा यदि प्रयत्नान्तरदर्शनाच्छब्दस्यानित्यत्वं साध्यते, तत एवाभिव्यक्तिरपि किं न साध्यते, सापि प्रयत्नकार्या यत इति प्रसङ्गः। न चेदं सदुत्तरमेव, व्यभिचारानुद्भावनादित्याहुः। तन्न, तस्योत्कर्षसमप्रपञ्चत्वात।

अन्ये तु—पूर्वजातिवहिर्भूता जातिः कार्यसमा। सूत्रन्तु—प्रयत्नकार्यस्य जातिरूपप्रत्यवस्थानस्य पूर्वजातिभिन्नस्यानेकत्वात् नानाप्रकारत्वात् प्रत्यवस्थानं कार्यसम इति योज्यम। अतः पूर्वजात्यन्यत्वमेव लक्षणमित्याहुः। तन्न, तत्संग्राह्याणां जातीनामाकृतिगणरूपोपपत्तिसमायामेवान्तर्भावात्, भाष्यादिविरोधाच्च। [ANTB, Allahabad edn. p. 66.]

(467) P. 325, l. 13—P. 326, l. 4 : The relevant comments of Udayana are.

(*i*) तदयमर्थः—पक्षहेतुदृष्टान्तेषु मध्ये कस्यचिदनुमानाङ्गस्यासिद्धत्व-

मुद्भाव्य तत्साधकतया किञ्चित् स्वयमुत्प्रेक्ष्य तद्दूषणेनैव तत्साधका-भावोपसंहारः कार्यसमा। [NP, p. 72.]

(*ii*) तत् कथमेतत ? यथाकरमेव। तथा हि–प्रयत्नस्य कार्यं विषयः। हेयोपादेयतया व्यवहर्तव्य इति यावत। तस्यानेकत्वं पारमार्थिकत्वा-पारमार्थिकत्वं तस्मात् प्रत्यवस्थानमिति। एवञ्च प्रवर्तते–'अनित्यः शब्दः कार्यत्वादि'त्युक्ते 'भवेदेवं यदि शब्दः कार्य इति परमार्थतो निश्चीयेत, तदेव तु दुर्लभं प्रमाणाभावात। प्रयत्नान्तरोपलब्ध्या हि तत् साधनीयं सा चानैकान्तिकी'ति। एवमियं सर्वव्यापिका स्यादपकर्षावर्ण्यसमाभ्यां च भिद्यत। न च प्रसङ्गसमेयम्, अनवस्थानुत्थानात। प्रमाणदूषण-व्यवस्थानाच्च। न च च्छलमिदम्, वाद्यभिप्रायवर्णनेऽपि शब्दार्थविकल्पो-पपत्तेरभावात। न च समर्थमिदं स्वयमुत्थापितस्य हेतोर्दोषेणानुत्था-पितस्य पराभिप्रेतस्य दूषयितुमशक्यत्वादिति। एवमेव भाष्यादेरपि तात्पर्यम। [NP, p. 71.]

For similar remarks, see ANTB, pp. 66-67.

(468) P. 326, l. 5—P. 327, l. 1 : (*a*) The relevant portion of *Nyāyanibandha* (i.e. *Tātparyaṭīkāpariśuddhi*) of Udayana is as follows :

ननु जातीनां विभागोद्देशोऽनुपपन्नः। चतुर्विंशतेरन्यासामपि सम्भवात। तद् यथा–विकल्पसमाविपर्ययेणाविकल्पसमा। यथा 'नेदं निरात्मकं जीवच्छरीरं प्राणादिमत्त्वात्, यत्पुनर्निरात्मकं न तत् प्राणादिमत् यथा घटः' इति प्रयुक्ते जातिवाद्याह–प्राणादिमत्त्वे तद्विरह-लक्षणवैधर्म्यव्यवस्थितावपि जीवच्छरीरघटयोर्यथा न सदसत्त्वविकल्पः, तथा सात्मकत्वनैरात्म्यकविकल्पोऽपि न सम्भवति। सेयमविकल्पसमा। साध्यसमाविपर्ययेणासाध्यसमा। तद् यथा–साध्यदृष्टान्तधर्मिणोस्तुल्यत्वे दृष्टान्तवत् साध्यस्यापि पञ्चावयवप्रयोगात् साध्यत्वप्रसङ्ग इति। तथा

प्रसङ्गसमाविपर्ययेणाप्रसङ्गसमा। तद् यथा—अनवस्थाभयेन प्रमाणं तावत् प्रमाणमन्तरेणैव सिद्ध्यतीत्यभ्युपगन्तव्यम्। तथा च, प्रमाणवत् प्रमेयस्यापि स्वतःसिद्धिप्रसङ्गः। एवं प्रत्यक्षसमोपमानसमाशब्दसमाः प्रत्यक्षभासादिबाधप्रतिरोधयोरुद्भावने द्रष्टव्याः। एवमव्याप्तिसमा। तद् यथा—धूमानलयोर्दृश्ययोर्वा व्याप्तिरदृश्ययोर्वा दृश्यादृश्यसाधारणयोर्वेति विकल्प्य, इह दृश्यव्याप्तौ कारीषो न सिद्ध्येत। अदृश्यव्याप्तौ च तार्णादि न सिद्ध्येत। साधारणव्याप्तौ चैत्रकजाठरावपि सिद्ध्येतामित्यादि। एवं प्रतिवन्दिसमा। तद्यथा—कार्यत्वाद्बुद्धिमत्त्वसिद्धौ शरीरादेरपि सिद्धिप्रसङ्गः। बुद्धिनित्यत्वे तदनुपयोगवद्वा प्रयत्ननित्यत्वे बुद्धेरप्य-सिद्धिप्रसङ्गः। एवं शङ्कापिशाचीसमा। सा तु प्रसिद्धैव। एवं विपरीत-प्रसक्तिसमा। तद्यथा—अघटं भूतलमिति साध्ये नाप्रसक्तं प्रतिषिध्यते, किन्तु प्रसक्तम्, प्रसक्तिश्च ज्ञानम। तथाच निषेधकं प्रमाणमनुपलब्धि-लक्षणं नास्तीति। एवमनुपकारसमा। तद् यथा—कार्यकारणभावा-दावुपकारनियमो वा स्यादन्यथा वेति विकल्पे उपकारेऽप्युपकारान्त-रापेक्षायाम् अनवस्था, द्वितीये तु सर्वं सर्वस्य कारणं कार्यं च स्यादिति। एवं सिद्धसाधनसमा। तद् यथा—बुद्धिमत्पूर्वकमिति साध्ये मीमांसकानां कर्मभिः सर्वजीवानां तत्सिद्धेः सिद्धसाधनापादनमिति। एवं संशयसमा-विपर्ययेणासंशयसमा। तद्यथा—सन्दिग्धे न्यायेन प्रवर्तितव्यम। तत् स्वात्मनि संशयस्ताद्रूप्येण वर्तते न वा। प्रथमे न पक्षः सन्दिग्धः, सन्दिग्धत्वात् संशयस्यैव। द्वितीये तु संशयो न स्यादेव, स्वात्मनि ताद्रूप्येणाप्रवृत्तेरिति। एवमुत्पत्तिसमाविपर्ययेणानुत्पत्तिसमा। तद् यथा—मत्पक्षवत् त्वत्पक्षेऽपि किञ्चिद्दूषणं भविष्यतीति। एवम-विशेषसमाविपर्ययेण विशेषसमा। तद् यथा—केवलव्यतिरेकिणि प्रयुक्ते प्राणादिमत्त्वविशेषाद् यदि नैरात्म्यव्यावृत्तिलक्षणे विशेषः स्यात् कुतश्चित् विशेषाद् विश्वस्यैव कश्चिद्विशेषः स्यादिति। एवं समुच्चयसमा।

तद् यथा—'पर्वतो वह्निमानि'त्युक्ते जातिवाद्याह—न तावत् पर्वत एवाग्निमानिति साध्यार्थः, महानसादीनामप्यनग्निमत्त्वप्रसङ्गात। ततः पर्वतोऽप्यग्निमानिति साध्यार्थो वाच्यः। तथा च समुच्चीयमानतया महानसादीनामपि प्रतिज्ञातैकदेशतया दृष्टान्ताभाव इत्येवमादयः।

[TTP, A.L.Thakur's Press Copy, Ch. V, pp. 17-19.]

(*b*) The problem stated here by Udayana was actually raised earlier by Bhāsarvajña in his *Nyāya-Bhūṣaṇa* :

एतेन जातिभेदप्रपञ्चाभिधानेन तद्दूषणप्रकाराश्च सुखेनैव व्युत्पादिता भवन्ति। यद्यन्येऽपि जातिभेदाः सन्ति, कस्मान्नोदाह्रियन्त ? सर्वेषामुदाहर्तुमशक्यत्वात। कस्मात ? सर्वाणि जात्युत्तराणि उदाहर्तुं न शक्यन्ते, आनन्त्यात। न चानन्तत्वाभ्युपगमे सूत्रविरोधः, सूत्राणामप्युदाहरणार्थत्वात। कुत एतद् गम्यते – सूत्राणामुदाहरणार्थत्वमेव, न पुनरेतावन्त एव जातिभेदा इत्यवधारणार्थत्वमिति गम्यत ? जात्यन्तरेण पूर्वपक्षकरणात। यद्यवधारणं विवक्षितं स्यात्तदा सूत्रकारः पूर्वपक्षं कुर्वंश्चतुर्विंशतिव्यतिरिक्तां जातिं न ब्रूयात। उक्तं च जात्यन्तरम। यथा—"अन्यदन्यस्मादनन्यत्वादनन्यदित्यन्यताभावः" [न्या॰ सू॰ २।२।३१]। शब्दानित्यत्वपरीक्षायां "अभ्यासात्" [न्या॰ सू॰ २।२।१६] इति पूर्वपक्षं कृत्वा "नाऽन्यत्वेप्यभ्यासोपचारात्" [न्या॰ सू॰ २।२।३०] इत्यनेन दूषितवान। पुनः पूर्वपक्षवाद्याह—यदिदमन्यदित्युच्यते, किमात्मनोऽन्यदुताऽनन्यदिति ? यद्यन्यत्तदात्महानान्नास्त्येव। अथानन्यत्तदानन्यत्वादेवान्यन्न भवतीत्यन्यताभावः। एषा अनन्यसमाजातिः।

तथा—"विप्रतिपत्तौ च सम्प्रतिपत्तेः" [न्या॰ सू॰ २।१।३] इति। यदि न विप्रतिपत्तिः सम्प्रतीयते, तदाऽस्तीति कथं वेत्सि ? अथ सम्प्रतीयते, तदापि सम्प्रतीयत इति सम्प्रतिपत्तिरेव सा, न विप्रतिपत्तिः। अथवा—यदि तदर्थो न सम्प्रतीयते, तदा म्लेच्छभाषावदप्रतीतार्थत्वान्न

संशयहेतुः। अथ सम्प्रतीयतेऽर्थः, तथापि स्वार्थं प्रत्याययन्ती सम्प्रतिपत्तिरेव—इत्येषा सम्प्रतिपत्तिसमा जातिः।

"अव्यवस्थात्मनि व्यवस्थितत्वाच्चाव्यवस्थायाः" [न्या॰ सू॰ २।१।४]। अत्र षष्ठीविवक्षायामभाव इत्यध्याहार्यम्, पञ्चमीविवक्षायां न संशय इति। यद्यव्यवस्थाऽत्मनि न व्यवस्थिता, तदात्महानान्तास्त्येव। अथात्मनि व्यवस्थिता, तदापि व्यवस्थानाद्व्यवस्थैवेयम्—इति व्यवस्थासमा जातिः।

तस्मान्न चतुर्विंशतिरेवेत्यवधारणं सूत्रकारस्य विवक्षितम् ... ...
[*Nyāya-Bhūṣaṇa*, pp. 356-357.]

(469) P. 327, ll. 2-4 : Udayana has solved the problem stated in the earlier note in the following manner :

अत्र केचिद् वदन्ति। विभागस्य न्यूनसंख्याव्यवच्छेदकतया एवमादीनां जातीनां पार्थक्येऽपि न दोषः। न चैवं सति प्रमाणादिविभागेऽप्येवं प्रसङ्गः। प्रमाणव्यतिरिक्तोपलम्भानुपलम्भाभ्यां व्यवस्थानादिति। तदसत्, विभागस्य विशेषविधित्वेन प्रसक्तशेषनिषेधे सामर्थ्यस्य तुल्यत्वात। अपारिभाषिकत्वाच्च। आपाततस्तद्यथार्थत्वप्रतिपत्तौ तत्त्यागेऽपसिद्धान्तात् तथापि तदनापत्तावपसिद्धान्तोच्छेदप्रसङ्गात। तस्मादुदाहृतानां यथोक्त एवान्तर्भावः कर्तव्यः, एतदेव हि सूचयितुं प्रमाणपरीक्षायां न्यूनत्वमधिकत्वञ्च द्वयमपि परीक्ष्य निराकृतत्वात।

क्व पुनः किमन्तर्भवति? यदि सत्त्वस्य नैरात्म्यव्यभिचारं दृष्ट्वा प्राणादिमत्त्वेऽपि तदापादयेत्, तदा अविकल्पसमा विकल्पसमैव, अन्ययव्यभिचारसञ्चारमात्रशरीरत्वात् तस्याः। अथ सात्मकत्वनैरात्म्यविकल्पं खण्डयता जीवच्छरीरस्यापि सत्त्वेन घटवन्नैरात्म्यमापाद्यते, तदा प्रतिरोधपक्षे साधर्म्यसमा, बाधपक्षे प्रकरणसमेति। अथ घटस्यापि विपक्षीभूतस्य सत्त्वेन सपक्षत्वमापादयेत्, तदा अनित्यसमेति। असाध्यसमा तु नास्त्येव, बीजाभावेनासम्भवदुक्तिकत्वात। तदसाध्यत्वसाहचर्य-

वीजत्वे उत्कर्षसमान्तर्भावात्, तदितरसाध्यत्वसाहचर्यस्यापि तथा-भावात। सिद्धत्वमात्रसाहचर्यस्याप्येवमेव। दृष्टान्तगतसिषाधयिषित-धर्मासाधकत्वमेव वीजमिह भविष्यतीति प्रकृतसाधकोऽयं हेतुर्दृष्टान्तगत-तज्जातीयवाक्यसाधकत्वादिति ह्यसाध्यसमावाक्यार्थ इति चेत। न। एवमप्युपपत्तिसमान्तर्भावात। प्रकृतहेत्वसाधकत्वं हि यो यत्र यथा-कथञ्चिद् हेतुप्रयोगेणोपपादयति स एवोपपत्तिसम इति वक्ष्यत। अप्रसङ्ग-समा तु यदि प्रमेयस्य स्वतःसिद्धतामात्रोक्तिस्तदाऽपार्थकं निग्रहस्थानम। 'पर्वतोऽग्निमान् धूमवत्त्वादि'ति प्रयुक्ते स्वतःसिद्धिव्युत्पादनस्य दूषणत्वे-नानन्वयात। अथ प्रमाणं नास्य साधकं भिन्नत्वाद् गवाश्ववदिति वाक्यार्थः, तदा नित्यसमान्तर्भूता, तदतद्रूपताखण्डनोपक्रमात। प्रत्यक्ष-समादयस्तु प्रतिप्रमाणप्रत्यवस्थानरूपतया साधर्म्यबैधर्म्यसमास्वन्त-र्भवन्ति। बाधप्रतिरोधोपकमानिर्वाहमात्रे तु केवलनिरनुयोज्यानुयोगः। अव्याप्तिसमा तु विवक्षितं तिरस्कृत्याविवक्षितपुरस्कारेण छलमेव। एकदेशस्तु दृश्ये दृश्येनैव सेद्धव्यमित्युपकर्षसमः। एवमदृश्येऽपि जाठरचैत्रकावपि सिद्ध्येतामिति सामान्यच्छलम। व्यापकं हि सिद्धिसम्भावनाभूमिर्न तु नियतसिद्धिकम। प्रतिबन्दिसमा तु मतानुज्ञा निग्रहस्थानम। नित्यप्रयत्नसिद्धौ तदुत्पादनोपयोगिनी बुद्धिर्न सिद्ध्येदिति इष्टस्यैवापादनात। एवं शङ्कापिशचीसमाऽप्युपपत्तिसमान्तर्भूतैव। त्वत्पक्षवत् मत्पक्षेऽपि किञ्चित् साधनं भविष्यति, साधनाभासान्तर-वत। त्वत्साधनेऽपि किञ्चिद्दूषणं भविष्यति (इति) उपपत्तिसामान्यो-पक्रमस्य तुल्यत्वात। विपरीतप्रसक्तिसमा तु प्राप्तिसमाप्रभेद एव। निषेध्यं प्राप्य वाऽप्राप्य वा इति विकल्पोपक्रमात। निषेध्यस्यापि च तन्निषेध्यतया साध्यत्वात। अनुपकारसमाऽपि विषयि-धर्मापेक्षयाऽनुपलब्धिसमाप्रभेदः। उपरञ्जकधर्मापेक्षयाऽनुपलब्धिसमाप्रभेदः। अनुपरञ्जकधर्मापेक्षया च नित्यसमाप्रभेदः—इत्यनुसन्धेयम। सिद्धसाधनसमा तु सुव्यक्तं वाक्छल-

मेव, बुद्धिमच्छब्दस्य सामान्यविशेषानेकार्थत्वात। असंशयसमाऽप्यनुपलब्धिसमाप्रभेद एव, स्वात्मनि ताद्रूप्येण वृत्त्यवृत्तिविकल्पोपक्रमात। अनुपपत्तिसमाऽपि शङ्कापिशाचीरूपत्वादुपपत्तिसमान्तर्भूतैव। एवं विशेषसमाऽपीष्टापादनरूपत्वात् मतानुज्ञेत्यवगन्तव्यम। समुच्चयसमा तु तद्वत्तामात्रेण समुच्चयापादनत्वात् तस्य साध्यत्वेन समुच्चीयमानत्वमारोप्य प्रवृत्तेर्वाक्छलमिति। एवमसदुत्तरानन्त्येऽपि तत्तल्लक्षणानुसन्धानेन तत्र तत्रान्तर्भावे यत्नः कर्तव्यः, न पुनः स्वीयाज्ञानमात्रेण मुनिवचनमनादरणीयमिति। न हि न्यूनसंख्यामात्रव्यवच्छेदे विभागस्यार्थवत्त्वं पश्यामः। अधिकलक्षणगत एव तत्सिद्धेः। न ह्यस्ति सम्भवो न्यूनं वस्तु मिथो व्यवच्छेदकानि च बहूनि लक्षणानीति। अधिकसंख्यासम्भवे तु न्यूनलक्षणविरोधः। न ह्यधिकसम्भवे न्यूनलक्षणस्य किञ्चिद्विरूध्यत। तस्मादधिकसंख्याव्यवच्छेदाय प्रवृत्तो विभागो विशेषविधितया न्यूनसंख्यामपि व्यवच्छिनन्ति, न पुनस्तद्व्यवच्छेद एवास्याभ्यर्हित इति।

[TTP, A.L.Thakur's Press Copy, Ch. V, pp. 19-21.]

This has been repeated almost verbatim in *Anvikṣānaya-tattvabodha* of Vardhamāna Upādhyāya [ANTB, Allahabad edn. pp. 68-70.]

(470) P. 327, ll. 5-17 : (*a*) The three verses quoted here have also been quoted in *Nyāyavārttikatātparyaṭīkā* and *Anvīkṣānayatattvabodha* [NVTT, p. 1151, ANTB, pp. 65-66.]

(*b*) The two verses quoted from *Pramāṇa-Vārttika* of Dharmakīrti have been explained by Manorathanandī in the following manner :

(*i*) ... ... साध्येनानित्यत्वेनानुगमाद् व्यापनात् कार्ये कृतकत्वे सामान्येनापि साधने कृते सम्बन्धिनोः साध्यधर्मिदृष्टान्तधर्मिणोर्भेदात् सम्बद्धस्य साधनस्य भेदोक्त्या 'यदि साध्यधर्मिगतं कार्यत्वं हेतुः, तदा नान्वयसिद्धिः; अथ दृष्टान्तगतं तदाऽसिद्धो हेतु'रिति यो दोषः, स

कार्यसमो मतः।

[*Pramāṇavārttikavṛtti*, Bauddha-Bharati edn. p. 14.]

(*ii*) ... वस्तुभेदे घटे प्रसिद्धस्य पुरुषपूर्वकत्वस्य सन्निवेश इति शब्द-साम्यादभेदिनः सन्निवेशमात्रात् पर्वतादौ न युक्तानुमितिः पाण्डुद्रव्यादिव हुताशन। यथा पाण्डुविशेषस्य धूमस्य कारणत्वेन दृष्टो पाण्डुशब्द-साम्यादभेदिनो यतः कुतश्चित् पाण्डुद्रव्याद् धूमादेरनुमानमनुचितम्, अतो यत्तद्बुद्धिमद्व्याप्तं सन्निवेशादि तद्धर्मिणि नास्तीत्यसिद्धिर्हेतूनाम।

[*Pramāṇavārttikavṛtti*, Bauddha-Bharati edn. p. 13.]

The first of these verses have been explained as follows in the *Nyāyālaṁkāra* of Abhayatilaka Upādhyāya :

(*iii*) अनित्यत्वरूपसाध्याविनाभावपरिकल्पितकार्यत्वसामान्यमात्रे हेतुतयोपन्यस्ते संवन्धिभेदेन कार्यत्वहेतोर्भेदापादनं कार्यसम इति कीर्तिश्लोकार्थः। [*Nyāyālaṁkāra*, p. 748.]

(471) P. 328, ll. 2-5 : (*a*) The relevant comment of Udayana is as follows :

यत्तावद् बौद्धेन—

साध्येनानुगमात् कार्यसामान्येनापि साधन।
सम्बन्धिभेदाद् भेदोक्तिर्दोषः कार्यसमो मतः॥

इति दर्शितम्, तद्व्यापकानुपलब्धिपर्यवसानमपकर्षसमसंगृहीतमेव। तथा हि, 'अनित्यः शब्दः कार्यत्वाद् घटवदि'त्युक्त 'घटस्याप्यन्यत् कार्यत्वं मृद्दण्डादिपूर्वकं शब्दस्याप्यन्यत् ताल्वादिसंयोगविभागपूर्वकमि'ति वदन् व्यक्तं मृद्दण्डादिव्यापकव्यावृत्तेर्व्याप्यकार्यत्वव्यावृत्तिरित्याह। तथा चापकर्ष एव। भेदोक्तिमात्रपर्यवसाने त्ववर्ण्यसम इति।

[NP, pp. 69-70.]

(*b*) In rejecting Udayana's view, Jānakīnātha Cūḍāmaṇi

has followed Maṇikaṇṭha Miśra, whose comments in this connection are as follows :

अत्र परिशिष्टे दूषणमुक्तम्—"मृदण्डादिव्यापकव्यावृत्तिरिति जातिवाद्याह। तथा चापकर्षसमः" इति। तन्न। सम्बन्धिभेदात् कार्यत्वं भिन्नमित्येव जातिवादिनोऽभिमतम्, न तु व्यापकव्यावृत्त्या व्याप्यव्यावृत्तिरिति नापकर्षसमः। अतएव अवर्ण्यसमोऽपि न।

[*Nyāyaratna*, pp. 219-220.]

(472) P. 328, ll. 7-9 : These lines bear similarity with the following remark of Vardhamāna Upādhyāya :

स्वचरितविरुद्धं चेदं लक्षणं दिङ्नागस्य, यदीश्वरानुमाने तरुगिरिसागरादीनामन्यत् कार्यत्वमन्यत् प्रासादाट्टालकगोपुरादीनामिति हेतुभेदादसाधारण्यमित्याह स्म।

[ANTB, Allahabad edn. p. 66.]

(473) P. 328, ll. 12-15 : Some alternative interpretations are found in the commentaries of Vardhamāna Upādhyāya and Vācaspati Miśra II :

(*i*) कार्यान्यत्वेऽभिव्यक्तिलक्षणे प्रयत्नस्याहेतुत्वम्। कुतः ? यत्रानुपलब्धिकारणस्यावरणादेरुपपत्तिर्भवति तत्र तथा ऽतः। न च शब्दस्यानुपलब्धिकारणं किञ्चिदुपलभ्यते, येनाभिव्यक्तौ शब्दस्य प्रयत्नाहेतुत्वं कल्प्येत। अन्यथा घटाद्युत्पत्तावपि तथात्वापत्तिरिति नासिद्धो हेतुरित्यर्थः। [ANTB, Allahabad edn. p. 67.]

(*ii*) शब्दस्य कार्यान्यत्वेऽकार्यत्वे प्रयत्नस्य त्वद्दूषणस्याहेतुत्वम् अकारणत्वं स्यादित्यर्थः। नन्वभिव्यक्तावेव शब्दस्य कारणं यत्नः स्यादित्यत आह—अनुपलब्धिकारणेपपत्तेरिति। अनुपलब्धेः कारण शब्दस्यानुत्पाद एवावरणाद्यभावात्, तस्योपपत्तेः सम्भवादित्यर्थः। अभावादिति वा शेषः।

यद् वा—कार्यान्यत्वे यदि प्रयत्नस्याहेतुत्वं तर्हि कार्यान्यत्वपक्षे

कस्माद्धेतुत्वं स्यादित्यत आह–अनुपलब्धिकारणोपपत्तेरिति। अनुपलब्धिकारणोपपत्तौ सत्यां तथा स्यादित्यर्थः।

आकृतिगणपक्षे तु–कार्याणां जातीनामन्यत्वे परस्परभिन्नत्वे प्रयत्नस्य तव दूषणस्याहेतुत्वं परासाधकतायामसाधकत्वम। कुतः? अनुपलब्धिकारणोपपत्तेः। उपलब्धेर्यत् कारणं निर्दोषं वाक्यं तस्यानुपपत्तेः, स्वव्याघातकत्वादेवेत्यर्थः। [NTĀ, Allahabad edn. p. 468.]

Keśava Miśra Tarkācārya has followed Vardhamāna Upādhyāya, while Viśvanātha Nyāyapañcānana has followed Vācaspati Miśra II. [See GSP, p. 112, NSV, p. 2153.]

(474) P. 328, l. 17—P. 329, l. 1 : The relevant comments of Udayana are as follows :

प्रयत्नशब्देनात्र तत्कार्यौ पारम्पर्येण तात्वादिसंयोगविभागौ गृह्येत। कार्यान्यत्वे अभिव्यक्तिलक्षणे प्रयत्नस्याहेतुत्वम। कुतः? अनुपलब्धिकारणोपपत्तेस्तथा स्यात्, न च शब्दस्यानुपलब्धिकारणं किञ्चिदुपपद्यत इत्यर्थः। एतेन कार्यत्वसिद्धावन्वयचरितार्थं संयोगविभागान्तरोपलब्धेरिति हेतुं दर्शयता असिद्धिः कण्ठतः परिहृता। अन्यदूषणस्यान्यो विषयो न भवतीति अविषयवृत्तित्वं च दुष्टत्वमूलमर्थतो दर्शितम। तदुत्थापितस्य चानभ्युपगमेन दूषणस्थितावपि न वादिनो हानिः काचिदिति प्रतिपादयतानुक्ते दूषणाभिधानमविषये प्रवर्तत इति सूचितमतोऽप्यविषयवृत्तित्वम। तस्मादुक्ते दूषणं वाच्यं तच्चेत्तद्विषयमेव स्यात्, अन्यथा तु व्याघात इति संक्षेपः। [NP, p. 73.]

(475) P. 329, ll. 1-3 : (a) Vardhamāna Upādhyāya has indicated the *saṅgati* of this *prakaraṇa* in the following manner :

(i) एवं "गोत्वाद्गोसिद्धिवत्तत्सिद्धि [न्या॰ सू॰ ५।२।३।] रि"त्यादि प्रत्युत्तरसूत्रप्रणयनात् परेण जातौ प्रयुक्तायां सदुत्तरेणैवोद्धारः कर्तव्यः,

तथा च कथाफलं व्यवतिष्ठते, अन्यथा च तन्नेति प्रदर्शनार्थं कथाभासप्रकरणम् । असदुत्तरनिरुप्यत्वात् सङ्गतिः । [ANTB, p. 70.]

Keśeva Miśra Tarkācārya has repeated this verbatim. [See GSP, pp. 112-113.]

(*b*) The comments of Vācaspati Miśra II are as follows :

तदेवं जात्युत्तरवादिनं प्रति स्थापनावादिना सर्वत्रैव समीचीनं समाधानं वक्तव्यम। एवमेव सति कथाफलं तत्त्वनिर्णयो वा विजयो वा भवति। समाधाने तु सदोषेऽभिहिते षट्पक्षी भवतीति न तत्त्वनिर्णयो न वा विजयः। किन्तूभावपि वादिनावसुज्ञौ ज्ञायेते इत्युभयोर्भङ्गे मध्यस्थ एव विजयते, अकुशलद्यूतकारयोर्भङ्गे सति क इवस्व (?) सुज्ञत्व-बोधनादिति शिष्यान् शिक्षयितुं सूत्रकारः षट्पक्षीमवतारयितुमाह ... [NTĀ, Allahabad edn. p. 468.]

(476) P. 330, ll. 5-12 : (*a*) The three interpretations offered here are also found in *Anvikṣānayatattvabodha* of Vardhamāna Upādhyāya :

वाद्युक्तो हेतुरसिद्धः, तत्सिद्धिहेतोः प्रयत्नानन्तरोपलब्धेरनैकान्तिक-त्वादिति योऽयं दोषः स प्रतिषेधेऽपि नित्यत्वसाधके त्वत्पक्षे समानः तुल्यः ... ... प्रयत्नव्यङ्ग्यत्वादित्यत्रापि हेतुरसिद्धः।

... ... अथवा – प्रतिषेधेऽपि प्रतिषेधहेतावप्यनैकान्तिकत्वा-दित्यत्र समानोऽनैकान्तिकलक्षणो दोषः। न हि सोऽप्यैकान्तिकः। एवं हि तथा स्याद् यदि सर्वमेव प्रतिषेध्येत, न वा किमपि। न चैवम्, स्वसत्ताया अनिषेधात्, स्थापनाया निषेधाच्चेति शब्दसाम्येन वाक्छलमाह।

यद् वा–तवापि पक्षे समानो दोष इति दोषवत्साम्यार्थं कथञ्चिद्-दोषमाहेति। ... ... [ANTB, Allahabad edn., p. 71.]

This has been also adopted by Keśava Miśra Tarkācārya. [GSP, p. 113.]

(*b*) Vācaspati Miśra II has offered two somewhat different interpretations :

यथाऽनैकान्तिकत्वात् प्रयत्नानन्तरीयकत्वं कार्यत्वासाधकं तथाऽयमप्यनैकान्तिकत्वदोषोऽनैकान्तिक एवेति न साधकः। न ह्यनैकान्तिकत्वात्मको दोषः सर्वस्यैवासाधकत्वं साधयति। स्वस्यैवासाधकत्वासाधकत्वात। अतएव तस्मिन्नदूषकतांश एव न नियत इत्यनैकान्तिकत्वात् प्रतिषेधेऽपि समानो दोष इति।

यद् वा—शब्दे प्रयत्नानन्तरीयकत्वं न कार्यत्वं गमयति, अभिव्यङ्ग्यमूलकीलकादावनैकान्तिकत्वादिति त्वयाऽस्मासु दोष उच्यत। तथाऽभिव्यङ्ग्यत्वमपि न गमयिष्यति, प्रयत्नकार्येणानैकान्तिकत्वादिति भवत्स्वपि मया दोषो वाच्य इत्यर्थः। [NTĀ, Allahabad edn. pp. 468-469.]

Viśvanātha Nyāpañcānana has adopted these two interpretations. [NSV, p. 2155.]

(477) P. 330, l. 17—P. 331, l. 11 : Here, the following remark of Udayana has been paraphrased by Jānakīnātha :

उभयासुज्ञत्वप्रतिपत्तिफला हि षट्पक्षी, तच्च फलं त्रिचतुःपञ्चपक्षीष्वपि समानम् ; तथापि किं चतुर्थादिपक्षावकाशदानेन, तृतीय एवोभयोरसुज्ञत्वावधारणादिति चेत् ? अत्र कश्चिदाह—मृदुमध्यातिमात्रप्रज्ञत्वान्निष्ठुरानिष्ठुरहृदयत्वाद्वा न द्रागित्येव सभ्या उभयोरसुज्ञत्वमुद्भावयन्तीत्यनियमादिति। कथं तर्हि ? अवसरापेक्षयेति ब्रूमः।

[NP, pp. 75-76.]

For a similar remark, see ANTB, p. 73.

(478) P. 332, ll. 10-14 : Here, the relevant remarks of Udayana are as follows :

यदि च चतुर्थादौ सदुत्तरं स्यात्, तदा वादे दुष्टपरिहारेण कथा प्रवर्तत एव। अन्यत्र हेत्वन्तरहानिसन्न्यासवदुत्तरान्तरप्रवृत्तेर्निग्रह एव।

तस्याप्यनुद्भावने त्ववष्टम्भविजयमात्रम्, एकस्यातिशयेनापकृष्टत्वात्, तदपेक्षया च द्वितीयस्योत्कृष्टत्वादिति संक्षेपः। [NP, p. 77.]

(479) P. 333, ll. 5-7 : This explanation offered by the author of *Nyāya-Bhāskara* is also reported by Vardhamāna Upādhyāya and Vācaspati Miśra II :

(*i*) प्रतिषेधं द्वितीयपक्षं सदोषं स्वीकृत्य तदविप्रतिषेधे मम प्रतिषेधे तृतीयपक्षतुल्यस्य दोषस्य प्रसङ्गस्त्वत्कृतोऽयं मतानुज्ञेति सूत्रार्थः।
[ANTB, Allahabad edn. p. 72.]

(*ii*) द्वितीयः पक्षः प्रतिषेधः, तं सदोषमभ्युपेत्य तत्र मदुक्तं दोषमनुद्धृत्य प्रतिषेधविप्रतिषेधे तृतीये पक्षे मदुक्ते समानं दोषं प्रसञ्जयतो भवतो मतानुज्ञा नाम निग्रहस्थानमापतितमिति पञ्चमः पक्षः।
[NTĀ, Allahabad edn. p. 471.]

(480) P. 333, ll. 7-8 : The relevant comment of Udayana is as follows :

द्वितीयः पक्षः प्रतिषेधः, तस्य दोषं मदुक्तमनुद्धृत्य प्रतिषेधविप्रतिषेधे मदुक्तं तृतीये पक्षे समानं दोषं प्रसञ्जयतो भवतो मतानुज्ञा निग्रहस्थानमापतितमिति पञ्चमः पक्षः। [NP, p. 78.]

(481) P. 333, ll. 9-13 : This problem has been discussed in detail by Vardhamāna Upādhyāya, who has also noted two other solutions offered by some other authors not identified by him :

ननु पञ्चमपक्षस्य मतानुज्ञोद्भावनतया मदुत्तरत्वेन षट्पक्षीबहिर्भावः स्यात। न च षष्ठेन पञ्चमस्य मतानुज्ञोद्भावनादमर्मीचीनत्वम्, मतानुज्ञायां मतानुज्ञात्वोद्भावनस्यापर्यनुयोज्यत्वात। तस्मात् प्रतिषेधं तृतीयं पक्षं सदोषमभ्युपेत्य तस्य प्रतिषेधस्य विप्रतिषेधे चतुर्थे पक्षे समानो दोषप्रसङ्ग इति मतानुज्ञोद्भावनरूपः पञ्चमः पक्ष इति सूत्रार्थः, अनिष्टभ्रमेणेष्टापादनात।

मतानुज्ञाग्रहणन्तु द्वितीयोत्तरपक्षाणां तथात्वख्यापनेनासदुत्तरत्व-ख्यापनायेति केचित्।

परोक्तं दोषमनुद्धृत्य समानदोषप्रसङ्गरूपस्य पञ्चमपक्षस्य मतानुज्ञा-त्वेनैव दृष्टत्वान्नैवम्; न च समानत्वमपि, एतन्मतानुज्ञात्वस्योत्तरसूत्रेणैव प्रदर्शनात्, दुष्टत्वख्यापनं षट्पक्षीमध्यपातादेवेत्यन्य।

[ANTB, Allahabad edn. p. 72.]

(482) P. 333, l. 20—P. 334, l. 2 : Here, Jānikīnātha has mentioned the view of Vardhamāna Upādhyāya, whose comments on this point are as follows :

स्वपक्षः स्थापनावादिन आद्यः पक्षः, तल्लक्षणः द्वितीयः पक्षः जात्युत्तरम्, स्वपक्षलक्षणीयत्वात्, तस्यापेक्षा उपेक्षाऽनुद्धारः, तदनन्तरमुपपत्तेः "प्रतिषेधेऽपि समानो दोषः" [न्या॰ सू॰ ५।२।३६] इत्यस्या उपसंहारे प्रतिपादनविषये यो दूषणरूपो हेतुर्मया निर्दिष्ट उक्तः चतुर्थकक्षास्थेन ; तत्र दोषमनुक्त्वा त्वया पञ्चमकक्षास्थेन यो मतानुज्ञारूपो दोष उक्तः, स तवापि समानः। तवापि मतानुज्ञा कुतः? परपक्षदोषाभ्युपगमात। तृतीयकक्षायां चतुर्थकक्षास्थेन मया यो दोष उक्तः, त्वया तदुपगमादिति सूत्रार्थः। [ANTB, Allahabad edn. p. 73.]

For a similar comment of Vācaspati Miśra II, see NTĀ, Allahabad edn. p. 471.

(483) P. 334, ll. 2-5 : Here, the relevant remarks of Udayana are as follows :

वादिनः स्वपक्षः स्थापना, तल्लक्षणो द्वितीयो पक्षो जात्युत्तरम्, तल्लक्षीकृत्य प्रवृत्तेः। तस्यापेक्षा उपेक्षा अनुद्धार इति यावत। ततः परपक्षेऽपि उपपत्त्युसंहारः परापादितदोषोपसंहारः "प्रतिषेधेऽपि समानो दोषः" [न्या॰ सू॰ ५।२।३६] इति इत्थमिति हेतुनिर्देशश्च तस्मिन्नु-पपत्त्युपसंहारहेतुनिर्देशे तवापि समानो मतानुज्ञा दोष इत्यर्थः।

[NP, p. 78.]

As we can see, Vardhamāna and Vācaspati Miśra II have followed here Udayana to a large extent.

(484) P. 335, ll. 1-15 : (*a*) Udayana's remarks in this connection are follows :

(*i*) निग्रहस्थानविशेषलक्षणमाह्निकार्थः। न च विभागमन्तरेण विशेषलक्षणावसरः। न च सामान्यलक्षणमन्तरेण विभागावतार इति तदर्थं सामान्यलक्षणपरं भाष्यम्–"निग्रहस्थानानि खल्वि"त्यादि। अत्र अवस्तुशब्दः स्वरूपवचनश्चेत्, "अपराधाधिकरणानी"ति भाष्यविरोधः स्यादत आह–पराजयो वसत्येष्विति। पराजयः प्रकृतवस्तुविषयः। प्रतियोगिव्यपेक्षया प्रतिपत्तेरपकर्षः, स येषु वसति, यदा यतो भवति, यदधीनप्रतिपत्तिरिति यावत्, तानि निग्रहस्थानानि। तदयं लक्षणार्थः–कथायामपकर्षलिङ्गं निग्रहस्थानमिति। न चैवं सूत्रविरोधः, "विप्रतिपत्तिरप्रतिपत्तिश्च निग्रहस्थानम्"–इति हि सूत्रम्। न, तत्रापि लिङ्गविषयाभ्यां विप्रतिपत्त्यप्रतिपत्तिभ्यां विषयिण एव लिङ्गस्य विवक्षितत्वात। अन्यथा निग्रहस्थानशब्दस्य प्रतिज्ञाहान्यादिसामानाधिकरण्यानुपपत्तौ न कश्चिद् विशेष इति।

नन्विदमनुपपन्नमेव, असाधनाङ्गवचनादोषोद्भावनाभ्यां प्रतिज्ञाहान्यप्रतिभादीनामसंग्रहात। विप्रतिपत्त्यप्रतिपत्तिभ्यां चैषामप्युपादानात। न, अभिप्रायापरिज्ञानात। अप्रतिभादीनां निग्रहस्थानत्वमग्रे व्युत्पादयिष्यन्त। तेनानिच्छा-[?]-हेतोरयुक्तत्वस्यासिद्धेर्युक्तत्वेनावश्याभ्युपगन्तव्यतया तत्संग्रहाय पर्युदासप्रसज्यवृत्तिभ्यां नञ्द्वयं यदि न व्याख्यायते, तदा शास्त्रस्य न्यूनत्वमापद्यत। तथा व्याख्याने तु इदमुपतिष्ठते न विशेष इति। तथा ह्यसाधनाङ्गवचनमिति साधनाङ्गवचनाभावः, एतदन्यवचनं चादोषोद्भावनमित्यनेनापि दोषोद्भावनाभाव तदन्यवचनं च विवक्षितम। तथा च विरुद्धप्रतिपत्तिर्यथार्थप्रतिपत्त्यभावाभ्यां न कश्चिद् विशेष इति। ... ...

अत्र केचिदाहुः—छलजातिनिग्रहस्थानानां कथावयवरूपत्वात् कथायाश्च वाक्यरूपत्वान्नियम एवायं यद्वाक्यद्वारेणैव पुरुषो निगृह्यत। न हि वचनावचनात्मकः समुदायो नाम। तस्मादप्रतिभादयो व्रीडयाऽनभिधाने "न मां प्रतिभाति किञ्चिदि"त्यन्तर्जल्परूपवाक्यधर्मा एव।

तदसत। छलजातिनिग्रहस्थानानि विचारणीयवस्तुवद्विषयतया कथायां व्यवतिष्ठन्त। तथा च तदुद्भावनवाक्यानि कथावयवाः। यदाह— छलजातिनिग्रहस्थानसाधनोपालभ्यः जल्पः। [न्या॰ सू॰] इति। न चायं नियमो यदन्तर्जल्पन्नेवाप्रतिभया निगृह्यन्त। चिरं प्रतिसन्दधानस्य तूष्णींभूतस्यापि तथा निग्रहात। तस्मादशक्तिसूचकं वाक्यमवाक्यं वा पुरुषं निग्राहयति।... ... ...

[TTP, A.L.Thakur's Press Copy, Ch. V, pp. 22-23.]

(*ii*) अथ निग्रहस्थानविशेषलक्षणमाह्निकार्थः। तद्विभागार्थं सूत्रम्—प्रतिज्ञाहानिरित्यादि निग्रहस्थानानीत्यन्तम। कथायामखण्डिताहङ्कारेण परस्याहङ्कारखण्डनमिह पराजयो निग्रहः। स एतेष्वियत्स्वेवंनामकेष्वेव तिष्ठतीति वाक्यार्थः। हेतुहान्युदाहरणविरोधादीनामेष्वेवान्तर्भावादवसरासङ्करेण सावकाशत्वाच्च। तथा च वक्ष्यामः। एकप्रयोजनानामप्यमीषां शिष्यहिततया व्यवहारोपयोगिप्रातिस्विकवैधर्म्यसूचनार्थमसमासः। स्वकार्ये परस्परनिरपेक्षत्वकथनार्थश्च। तच्च प्रतिलक्षणं वक्ष्यत। चस्त्वर्थः। तेनैतेषामेष कथाबाह्यानां कथायामप्यपस्मारोन्मादादिदशापन्नानां झटिति संवरणेन तिरोहितावसराणां पुरःस्फुर्त्तिकानधिकृतोद्भावितानां च व्यवच्छेदः। तथाविधानां तात्कालिकातत्त्वज्ञानलिङ्गत्वेऽपि प्रतियोगिव्यपेक्षया असुज्ञत्वलिङ्गत्वायोगात। तद्धि निग्रहस्थानस्य स्वरूपमन्यथाऽतिप्रसङ्गादिति।

[NP, p. 79-80.]

(*b*) Here, Janakīnātha has followed the opening remarks from *Avīkṣānayatattvabodha* of Vardhamāna Upādhyāya, which are as follows :

अथ जातिविशेषलक्षणानन्तरं निग्रहस्थानविशेषलक्षणम। यद्यपि छलजातीयानि अपि निग्रहस्थानानि एव, निरनुयोज्यानुयोगप्रभेदत्वात्, तथापि निग्रहस्थानत्वसाक्षाद्व्याप्यविशेषलक्षणमाह्निकार्थः। छलत्वादिकन्तु तद्व्याप्यनिरनुयोज्यानुयोगत्वव्याप्यमिति न तथा। छलत्वातिरिक्तत्वेन वा विशेषणीयम। विशेषलक्षणाभिधानं च तज्जिज्ञासायाम। सा च विशिष्टधर्म्युपस्थितौ च स्यात। सापि विशेषणाधीना। न च सामान्यलक्षणं विना तदवतार इति तद्वाच्यम।

तत्र न तावत् कथायामहङ्कारखण्डनं निग्रहः, पराजितस्याहन्त्वानपायात्, कथात्वस्य दुर्वचत्वाच्च। तथा हि – न तावत् नानाप्रवक्तृकविचारविषयकसन्दोहत्वं तत। नानाप्रवक्तृकत्वं नैकस्यापि वाक्यस्य सम्भवति । न हि समुदाय्यनन्वये समुदायान्वयः। विचारश्च यदि वचनं न तस्यैव तद्विषयता।

साधनदूषणे चेत्, प्रत्येकसमुदायाभ्यामव्याप्तिः। द्वितीयकक्षायां प्रतिवादिस्तम्भेन पर्याप्तायां कथायामव्याप्तिः, तत्र नानाप्रवक्तृकत्वाभावात् ।

नापि शब्दत्वावान्तरजातिभेदः, व्यञ्जकार्थभेदमप्रतीत्य तदप्रतीतेः, तस्य च निरूपयितुमशक्यत्वात।

नापि प्रकृतविषये विप्रतिपत्त्यप्रतिपत्ती निग्रहः, अननुगमात। न वा सर्वत्र निग्रहस्थाने विप्रतिपत्त्यप्रतिपत्ती, प्रकृतविषयसम्यग्ज्ञानवतोऽपि सभाज्ञोभादेरननुभाषणस्य क्रियाविरहरूपस्याज्ञानमाविष्कृत्यानुत्तरदानस्य च सम्भवात। यदि च प्रकृतं जानतोऽप्यप्रकृतज्ञानात्मकविप्रतिपत्तिमत्तया निग्रहः स्यात्, तदा वादिनोऽप्यप्रकृतावर्जनीयघटादि-

ज्ञानान्निग्रहः स्यादिति विप्लवः। कथकोद्देश्यकथात्मकशब्दसन्दर्भनिष्पादिकाप्रतिपत्तिस्त्वप्रतिपत्तिः, तद्विपरीता प्रतिपत्तिर्विप्रतिपत्तिः। तथा च तथाभूतव्यापारानिष्पादकं सम्यग्ज्ञानमपि विप्रतिपत्तिरिति चेत्। न, झटिति सम्वरणेऽतिव्याप्तेः। अत एव कथायां वादिप्रतिवादिनोः परस्परापेक्षया प्रकृतविषयापकर्षलिङ्गत्वं तत्, अपकर्षश्च कथाहेतु-प्रकृतहेतुसम्यग्ज्ञानविरह इति परास्तम्, सर्वत्राव्याप्तेः।

उच्यते—कथकोद्देश्यककथाफलप्रयोजककथाहेतुयथार्थज्ञानविरह-लिङ्गत्वं निग्रहस्थानत्वम। यत्र प्रकृतविषययथार्थज्ञानवतः सभाक्षोभादननुभाषणम्, यत्र चानूद्याऽप्रतिभा, तत्र कथाफलप्रयोजक-यथार्थज्ञानाभावोऽस्त्येवेति नाव्याप्तिः, सूत्रेऽप्यप्रतिपत्ति-विप्रतिपत्ति-शब्दाभ्यां तादृशं लिङ्गं लक्ष्यत। अन्यथा निग्रहस्थानशब्दस्य प्रतिज्ञाहान्यादिसामानाधिकरण्यानुपपत्तेः। कथात्वञ्च वादिप्रतिवाद्यन्याभिधान-स्थापना-वादिसाधनाभिधान-प्रतिवादिदूषणाभिधान-वृत्तिवाक्य-त्वाधिकरणनिष्पादनोद्देशप्रवृत्तवादिप्रतिवाद्यन्यतरसाधनदूषणान्यतराभिधानत्वम्, एकार्थत्वे युद्धवत् परस्परोद्देशात् मिथः कर्मतया साकाङ्क्षत्वादेकवाक्यत्वम। उक्तस्तम्भावसानेऽपि कथोद्देशप्रवृत्तेः सत्त्वात् न च कथावसरे षट्पक्ष्यां चातिव्याप्तिः, शब्दानुभवप्रयोजक-ज्ञानजनकत्वेन षट्पक्षस्यान्यत्वेन च विशेषणात।

[ANTB, Allahabad edn. pp. 76-77.]

As one can see, the two definitions of निग्रहस्थान given on p. 335, ll. 11. can be traced directly to the writing of Vardhamāna Upādhyāya, to whom Jānakīnātha refers with the expression केचित्.

(485) P. 336, ll. 1-3 : (*a*) Here, Jānakināthа has explicity rejected the interpretation of Vācaspati Miśra II, and he has also differed in part from the interpretation of Vardhamāna Upādhyāya, as in evident from the passages quoted below :

(*i*) निग्रहः खलीकारस्तस्य स्थानान्यधिकरणानीत्यर्थः। एतावता कथकाकौशलख्यापकत्वं निग्रहस्थानत्वमिति समाख्यालभ्यं सामान्यलक्षणम। असमासः वैचित्र्यार्थम्, न तु स्वकार्ये परस्परनिरपेक्षत्वमूचनार्थम्, प्रमाणादिविभागेऽपि तथाकरणप्रसङ्गात। चकारोऽप्यर्थः, तेन हेत्वाभासानां पृथगुपदिष्टत्वेन निग्रहस्थानत्वं नास्तीति भ्रमनिरासार्थं हेत्वाभासा अपि निग्रहस्थानानीत्युक्तम। ... ...

[NTĀ, Allahabad edn., p. 473.]

(*ii*) स्वकार्ये परस्परनैरपेक्ष्यसूचनाय वक्ष्यमाणप्रातिस्विकवैधर्म्यसूचनाय चासमासः। न च जातिष्वप्येतत् समानमिति तत्राप्यसमासापत्तिः। समपदावृत्तौ सूत्रगौरवात्, अनावृत्तौ संज्ञानापत्तेः। प्रतिज्ञाहानिवद्धेतुहानेः, प्रतिज्ञाविरोधवदुदाहरणविरोधस्य च सम्भवेऽपि न विभागानुपपत्तिः, एष्वेव तदन्तर्भावात। ... ... चस्त्वर्थः। तेन स्वयमुपन्यासे कथावाह्यानामवाह्यानामपस्मारोन्मादादिदशापन्नानां झटिति संवरणेन तिरोहितावसराणामनधिकृतोद्भावितानां च व्यवच्छेदः। ... ... कथायामेव निग्रह इति व्यवच्छेदफलमित्यन्य।

अत्र चकारोऽनुक्तदृष्टान्ताभासादिसमुच्चयार्थ इति केचित। तन्न, "हेत्वाभासाश्च यथोक्ताः" [न्या॰ सू॰ ५।२।२४] इत्यनेनैव तत्संग्रहात्, तेषां हेत्वाभासान्तर्भावस्य वक्ष्यमाणत्वात। अनन्तर्भावेऽप्यन्त्यसूत्रस्थचकारस्यानुक्तसमुच्चयार्थतया तल्लाभात।

तथाप्यनुक्तप्रत्यक्षाभासादिसमुच्चयार्थश्चकारः स्यात्, न च तेषां नापकर्षसूचकत्वम्, अनुमानाभासेनाविशेषात। न हि शङ्खपीतिम्नः प्रत्यक्षम्, चैत्यवन्दनस्यामुष्मिकेष्टसाधनत्वे सौगतागमः, गोसादृश्याविशिष्टस्य गवयपदवाच्यत्वे वोपमानं प्रमाणं यतः तदन्येऽभियोगहेतवः – इत्यन्ये। तन्न, प्रमाणन्तराभासानामपि कथादशायामनुमानच्छाययैव प्रयोगेण पृथगाभासत्वाभावात। [ANTB, Allahabad edn., pp. 77-78.]

As one can see, Vardhamāna has elaborately argued against the interpretation of च as समुच्चय, a view that has been admitted by Jānakīnātha. Rādhāmohana has admitted the interpretation of Jānakīnātha :

अत्र चकार : समुच्चयार्थस्तेनानुक्तानां दृष्टान्ते साध्यवैकल्यादीनां ग्रहणम। [NSVV, p. 331]

(486) P. 336, ll. 4-8 : (*a*) Here, the relevant remarks of Udayana are as follows :

चस्त्वर्थः। तेनैतेषामेव कथाबाह्यानां कथायामप्यपस्मारोन्मादादिदशापन्नानां झटिति संवरणेन तिरोहितावसराणां पुरःस्फुर्त्तिकानधिकृतोद्भावितानां च व्यवच्छेदः, तथाविधानां तात्कालिकातत्त्वज्ञानालिङ्गत्वेऽपि प्रतियोगिव्यपेक्षया असुज्ञत्वलिङ्गत्वायोगात् । तद्धि निग्रहस्थानस्य स्वरूपमन्यथाऽतिप्रसङ्गादिति। [NP, p. 80.]

(*b*) Vardhamāna Upādhyāya's comments on this passage are as follows :

चस्त्वर्थ इति । न चानुक्तप्रत्यक्षाद्याभाससमुच्चयार्थश्चकार इति वाच्यम्, दृष्टान्ताद्याभाससंग्रहार्थमन्त्यसूत्रे चकारस्यैव दर्शितत्वेनात्रापि तदर्थाकल्पनात। कथाबाह्यानामिति। स्वयमुपन्यासादौ, न च तत्रापि निग्रहस्थानमङ्गीकियत एवेति नातिव्याप्तिः, कथायामेव निग्रहाङ्गीकारात। प्रतियोगीति। न चैकस्यां कथायामपरकथाप्रतियोग्यपेक्षया अपकर्षलिङ्गं जयिनोऽपि स्यादिति वाच्यम्, पर्यनुयोज्योपेक्षणलक्षणग्रस्तान्यतदुदाहरणाभावात। [NPP, p. 80.]

Viśvanātha has recorded the view of Udayana, while Rādhāmohana has admitted it as an alternative interpretation. [NSV, p. 2163 ; NSVV, p.331.]

(487) P. 338, ll. 4-9 : This interpretation can be traced to Vardhamāna Upādhyāya, Śaṃkara Miśra and Vācaspati Miśra II, as can be seen from the passages quoted below :

(*a*) ... ... सम्वरणानवसरे कथायां विशेषोक्तस्वीकृतत्यागः प्रतिज्ञाहानिरिति लक्षणात। न च स्वीकृतत्यागमात्रस्यैवाशक्तिलिङ्गत्वेनोक्तपदवैयर्थ्यम्, तद्धि न तस्य लक्षणम्, अपसिद्धान्तस्य व्यावर्त्यत्वात। नाप्यशक्तिलिङ्गत्वम्, अशक्तिविशेषोन्नयनात।

[ANTB, Allahabad edn. p. 80.]

(*b*) स्वीकृतोक्तपरित्यागः प्रतिज्ञाहानिः। [*Vādivinoda*, p. 30.]

(*c*) हीयतेऽनेनेति हानिर्वचनविशेषः। प्रतिज्ञा स्वनिर्वाह्यनिर्देशः। स्वनिर्वाह्यविशेषविरोधि वाक्यं प्रतिज्ञाहानिः। सिद्धान्तस्तु न निर्वाह्य इति नापसिद्धान्तसाङ्कर्यम। तथा च समाख्यालभ्यमेव लक्षणम्, पूर्वभागस्तु निर्देशनाभिप्रायेणैव केवलम। स्वदृष्टान्ते विरोधिदृष्टान्तधर्माभ्यनुज्ञापकं वचनं यथेति पूरणीयम। ... ...

यद् वा—प्रतीपो दृष्टान्तो यस्मिन्निति प्रतिदृष्टान्तः परपक्षः। स्वः स्वीयो दृष्टान्तो यस्मिन्निति स्वदृष्टान्तः स्वपक्षः। तेन स्वपक्षे परपक्षधर्माभ्यनुज्ञेत्यर्थः। पक्षोऽपि स्वनिर्वाह्य एवेति पक्षहेतुदृष्टान्ततद्विशेषणादिहानयः सङ्गता भवन्ति। अत एव विशिष्टोक्तित्यागः प्रतिज्ञाहानिरिति वदन्ति। [NTĀ, Allahabad edn. p. 474.]

(488) P. 339, ll. 3-6 : This is the view of Vardhamāna Upādhyāya, whose view has been refered to under the expression कश्चित :

दूषणहानिस्तु निरनुयोज्यानुयोगोद्भावनान्तरं दूषणान्तरपरिग्रहे द्रष्टव्या। यथा—यदि न्यायसिद्धोऽस्तु तदा वाधित इत्यादि। कमहानिस्तु नाधिका, तत्तत्प्रकारकसाध्यादिहानावेवान्तर्भावात। विशेपणहान्यादीनामप्युक्त एवान्तर्भावः। [ANTB, Allahabad edn. p. 82.]

(489) P. 339, ll. 12-15 : Here, the relevant remarks of Udayana run as follows :

एतासां च हानीनां सांव्यवहारिकत्वान्नोक्तेरसम्भवः। शास्त्रव्युत्पन्ना नैवमभिदधतीति चेत्; न, शास्त्रेऽप्येवंरूपव्यवहारदर्शनात। प्रक्रान्तदोषपरिहारौपचारिकत्वाच्च। निःसीमा च प्रतिभाक्षयेण किंकर्तव्यतामोहमहिमेति पूर्वनिग्रहप्रवृत्तावनवसरत्वात् अप्रवृत्तौ त्यागायोगान्नेदं निग्रहस्थानमिति चेत्; न, त्यागेनैव पूर्वस्य परिहारात। न हि त्यक्तस्य दुष्टत्वे अस्य काचित् क्षतिरतिप्रसङ्गात। ततः पूर्वनिग्रहव्यवस्थापनाय त्याग एवोद्भाव्यः। तथा हि–तदर्थमेवास्योपयोग इति चेत्; न, स्वयमप्यशक्तिमूचकत्वात्, सन्यासवत। [NP, pp. 83-84.]

(490) P. 340, ll. 10-11 : (*a*) The comments of Vardhamāna Upādhyāya are as follows :

प्रतिज्ञातार्थे दूषिते तत्प्रतिचिकीर्षया विशेषणान्तरप्रक्षेपेण पुनर्वचनं प्रतिज्ञान्तरम। तथा हि–धर्मविकल्पो धर्मविशेषः। तस्य स्वज्ञानद्वाराऽभिलापप्रयोजकत्वात् हेतौ पञ्चमी। ज्ञानमेव वा विकल्पः, तत्र धर्मशब्दो विषयविशेषपरः। तथाचाभिलापप्रयोजकज्ञानविषयत्वेन धर्मविशेषनिर्देशलाभः। ल्यब्लोपे वा पञ्चमी, धर्मस्य विकल्पं विशेषं प्रक्षिप्येत्यर्थात् तदर्थस्य प्रतिज्ञातार्थस्य निर्देशलाभः। तेन परोक्तदोषपरिजिहीर्षामूलकतयैव तदुक्तिसम्भवः। तदुत्तरकक्ष्यापातित्वञ्चोक्तम। तेन परोक्तदूषणोद्धाराय पूर्वानुक्तविशेषणवतः पूर्वोक्तस्य साधनीयांशस्य प्रतिपादनमिति पर्यवसितं लक्षणम।

[ANTB, Allahabad edn. pp. 82-83.]

(*b*) Vācaspati Miśra II records this view as an alternative interpretation.

पूर्वप्रतिज्ञाया अन्यादृशी प्रतिज्ञा प्रतिज्ञान्तरम। यदि तु प्रतिज्ञान्यत्वमात्रेण प्रतिज्ञान्तरं स्यात् तदा प्रतिज्ञापुनरुक्तावतिव्याप्तिः। तथा च समाख्यालभ्यमेव लक्षणमुक्तिसम्भवनिर्देशनार्थमनूद्यत। प्रति-

ज्ञातो योऽर्थो वादिना तस्य प्रतिवादिना दोषाभिधानान्निषेधे कृते धर्मस्य विशेषणस्य भेदात् विशेषस्य विशेषणपक्षे तदर्थं तद्दोषप्रतिषेधार्थं यो निर्देशः पूर्वप्रतिज्ञायाः अन्यादृशं भाषणं तत् प्रतिज्ञान्तरमित्यर्थः। अत्रापि प्रतिज्ञा निर्वाह्यनिर्देश एव। हेतुश्च न निर्वाह्यनिर्देशः, किन्तु निर्वाहकनिर्देश इति हेत्वन्तरे नातिव्याप्तिः। अतएव परोक्तदूषणोद्धाराय पूर्वानुक्तविशेषणवतो हेत्वन्यपूर्वोक्तस्य वचनं प्रतिज्ञान्तरम्—इत्याहुः। निगमनव्यावृत्त्यर्थं परोक्तेत्यादि। निर्विशेषणभ्रमाद् दूषिते पूर्वोक्तमेव विशेषणं यत्राभिधत्ते तद्वारणाय पूर्वानुक्तेति। इदञ्च पक्षतद्विशेषण-साध्यतद्विशेषणप्रक्षेपात् चतुर्विधम। ... ...

[NTĀ, Allahabad edn, p. 475.]

(*c*) Śaṅkara Miśra also adopts this definition of प्रतिज्ञान्तर :

परोक्तदूषणोद्धाराय पूर्वानुक्तविशेषणवतः पूर्वोक्तसाधनीयांशस्य प्रतिपादनं प्रतिज्ञान्तरम। [*Vādivinoda*, p. 30.]

(491) P. 341, ll. 12-17 : Here, the relevant comments of Udayana are as follows :

(*i*) तदर्थेति। तस्यैवार्थस्य निर्देश इति वा, तदर्थं साध्यसिद्ध्यर्थं निर्देश इति वा, उभयथापि न कश्चिद् विशेषः। तदर्थनिर्देश इति तु वदता भाष्यकृता दोषपरिजिहीर्षाऽस्य मूलमिति दर्शितम। न हि तामन्तरेण स्वस्थो दूषिते विशेषणं प्रक्षप्तुमर्हति, अतिप्रसङ्गात। कथं 'नित्या वर्णः श्रावणत्वादि'त्युक्ते भागे सिद्धसाधनमिति च प्रत्युक्ते 'वर्णात्मकः शब्दो नित्य' इति पक्षविशेषणाधिकोक्तौ सिद्धसाधनतापरिहारात। 'अग्निमदिदं सुरभिमलिनधूमवत्त्वादित्युक्ते असमर्थविशेषणतया च प्रत्युक्ते 'साग्नि कृत्क्षरारूमदि'ति (? कृष्णागुरुमदिति) साध्यान्तराधिकोक्तौ विशेषणासामर्थ्यपरिहारात। 'विवादाध्यासितं बुद्धिमत्पूर्वकमि'त्युक्ते सिद्धसाध्यतया च प्रत्युक्ताभासे 'उपादानद्यभिज्ञापूर्वकमि'ति साध्य-

विशेषणाधिकोक्तौ सिद्धसाधनतापरिहारात। तदेतत् पक्षतद्विशेषण-साध्यतद्विशेषणप्रक्षेपेण चतुर्विधं दूषणान्तरपरिहारार्थमपि प्रवर्तते, अवान्तरभेदाच्चानन्त्यम। [NP, pp. 85-86.]

(*ii*) अत्र प्रतिज्ञातार्थः प्रतिज्ञैकदेशोऽपि विवक्षितः। तेन पक्षतद्-विशेषणसाध्यतद्विशेषणोदाहरणैकदेशतद्विशेषणनिगमनतद्विशेषणप्रक्षेपः। [TTP, A.L.Thakur's Press Copy, Ch. V, p. 24]

(492) P. 342, ll. 1-3 : Here, the relevant comments of Vātsyāyana are as follows :

प्रतिज्ञातार्थो'ऽनित्यः शब्द ऐन्द्रियकत्वाद् घटवदि'त्युक्ते योऽस्य प्रतिषेधः प्रतिदृष्टान्तेन हेतुव्यभिचारः – सामान्यमैन्द्रियकं नित्यमिति, तस्मिंश्च प्रतिज्ञातार्थप्रतिषेधे धर्मविकल्पादिति दृष्टान्तप्रतिदृष्टान्तयोः साधर्म्ययोगे धर्मभेदात् सामान्यमैन्द्रियकं सर्वगतम्, ऐन्द्रियकस्त्वसर्वगतो घट इति धर्मविकल्पात्, तदर्थनिर्देश इति साध्यसिद्ध्यर्थम। कथम ? यथा घटोऽसर्वगत एवं शब्दोऽप्यसर्वगतो घटवदेवानित्य इति।

[NB, Metropolitan ed. p. 2167.]

(493) P. 343, ll. 11-12 : This claim has been rejected by Viśvanātha Nyāyapañcānana :

यद्यपि 'काञ्चनमयः पर्वतो बह्निमान्', 'पर्वतः काञ्चनमयवह्निमान्' 'ह्रदो वह्निमान् ह्रदत्वात्', 'पर्वतो वह्निमान् काञ्चनमयधूमादि'त्यादौ हेत्वाभासान्तरसाङ्कर्यम् तथाप्युपधेयसङ्करेऽप्युपाधेरसाङ्कर्यान्न दोषः। न चासङ्कीर्णस्थलाभावः, 'पर्वतो वह्निमान्, धूमात्, यो यो धूमवान् स निरग्नि'रि त्युदाहरणे, 'निरग्निश्चायमि'त्युपनये च तत्सत्त्वात। एवं निगमनेऽपि बोध्यम। [NSV, Metropolitan edn. p. 2172.]

(494) P. 343, ll. 12-22 : (*a*) Here, Jānakīnātha has rejected the opinion of Vācaspati Miśra II, whose comments are as follows:

प्रतिज्ञा निर्वाह्यनिर्देशस्तस्य विरोधो येन केनापीति प्रतिज्ञाविरोधः। एतेन प्रतिज्ञापदप्रतिज्ञाहेतुप्रतिज्ञोदाहरणप्रतिज्ञोपनयप्रतिज्ञानिगमन-हेतुपदहेतूदाहरणहेतुदृष्टान्तदृष्टान्तपदादिप्रतिज्ञातर्कादिविरोधाः सङ्गृ-हीताः। समाख्यालभ्यमेव लक्षणं शेष उदाहरणार्थः। यथेति पूरणीयम। ... अत एवैकवाक्यांशयोर्विरोधः प्रतिज्ञाविरोध इत्याहुः। ... ... विरुद्धस्तु हेत्वाभासोऽर्थयोर्विरोधो न वाक्ययोरिति विशेषः। यद्यपि विरोधेऽवश्यं हेत्वाभासत्वप्रवेशस्तथापि विरोध एवोद्भाव्यो वचनगत-त्वेनोच्यमानग्राह्यत्वादिति। ... ...

[NTĀ, Allahabad edn. p. 476.]

(*b*) Here, the relevant comments of Uddyotakara are as follows :

सिद्धान्तमभ्युपेत्य तद्विरोधी विरुद्ध इति। कोऽस्य सूत्रस्यार्थः? अभ्युपगतार्थविरोधो विरुद्धः। तथा च सर्वानुक्तविरुद्धसंग्रहः—यावान् कश्चन विरुद्धभेदः सर्वोऽसावनेन संगृहीत इति, यस्मादभ्युपगतं वाधते अभ्युपगतेन वाध्यत। नन्वेवमेको हेत्वाभासो विरुद्धः प्राप्नोति? सत्यमेक एव हेत्वाभासो विरुद्धस्तत्र तु सामान्येन विरुद्धत्वेन संगृहीतस्य पञ्च-धोपदेशः, यथा प्रमेयमित्यनेन षोडश पदार्था इति। पृथगभिधानं तर्हि विरुद्धस्य न कर्तव्यम? न न कर्तव्यम्, सामान्यतोऽधिगतस्य विशेष-ज्ञापनार्थम्, यथा प्रमेयस्यैव। तत्रानैकान्तिकादिर्हेत्वाभासो द्विरूपो-ऽनैकान्तिकादिर्विरुद्धश्च। एतस्मिंस्तु विरुद्धतैवेत्यसाधारणतया तृणोलपादिन्यायेन निष्कृष्याभिधीयत। तस्मादनैकान्तिकादिषु निमित्त-द्वयसमावेशात् संज्ञाद्वयसमावेशः; विवक्षितजातीयान्यवृत्तित्वेनानैका-न्तिकत्वम्, हेतुविषयस्वरूपबाधारूपेण तु विरुद्धः। एवं सर्वत्र।...

प्रतिज्ञाहेत्वोर्वा विरोधः—यो वा प्रतिज्ञाहेत्वोर्विरोधः स विरुद्धो हेत्वाभासः। ननु प्रतिज्ञाविरोधः पृथगुपदिष्टो निग्रहस्थाने, पृथक् क्व

हेत्वाभासः, तस्मान्न प्रतिज्ञाहेत्वोविरोधो वक्तव्य इति ? नैष दोषः, उभयाश्रितत्वाद्विरोधस्य विवक्षातोऽन्यतरनिर्देशः – प्रतिज्ञाहेत्वोर्विरोध इति प्रतिज्ञाहेतू आश्रित्य उभयाश्रितो भवति, तत्र यदा प्रतिज्ञया विरोधो विवक्षितस्तदा प्रतिज्ञाविरोध इत्युच्यत ; यदा प्रतिज्ञाया हेतुविरोधो हेतोर्वा प्रतिज्ञाविरोधकत्वं तदा विरुद्धो हेतुरिति ; अतः प्रतिज्ञाविरोधो हेतुविरोधो वेत्यदोषः।

[NV, Metropolitan edn. pp. 377-380.]

(495) P. 344, ll. 10-11 : Here, Jānakīnātha has used the word आचार्य for referring to Vācaspati Miśra I, whose comments are as follows :

एवमुपनयेन विरोधोऽनैन्द्रियकश्च शब्द इति। अत्रापि वस्तुस्वभाव-पर्यालोचनयाऽनैन्द्रियकत्वासिद्धिः प्रतीयते, शब्दतस्तु विरोध इति। प्रमाणविरोधश्च प्रतिज्ञाहेत्वोर्वक्तव्यः।

[NVTT, Metropolitan edn. p. 2171.]

(496) P. 344, ll. 14-19 : Here, Jānakīnātha has employed the term परमन्यायाचार्य for referring to Udayana, whose remarks are as follows :

स च वहुप्रकारः, प्रतिज्ञापदयोः प्रतिज्ञाहेत्वोः प्रतिज्ञोदाहरणयोः प्रतिज्ञोपनययोः मन्दः (?), हेतुविरोधाविरोधाभ्यामनवकाशात। प्रतिज्ञानिगमनयोर्हेतुदृष्टान्तयोर्हेतूपनययोः दृष्टान्तस्वपदयोः (?) प्रतिज्ञा-तर्कयोः, एवं दूषणवाक्येऽपि स एव प्रपञ्चः। साध्यधर्मिनिषेधाद्वा, यथा–'नास्त्यात्मे'ति। धर्मनिषेधादा, यथा–'ईश्वरो न कर्त्ते'ति। धर्मि-विधेर्वा, यथा–'अतीतमस्ती'ति। धर्मविधेर्वा, यथा–परमाणवः साव-यवा' इति। स्वरूपतो वा, यथा–'हेतुव्यापारात् प्रागपि सत् कार्यं कार्यत्वात्' इति। विशेषणद्वारा वा, यथा–'मध्येऽप्यसत् कार्यम्, आद्यन्त-योरसत्त्वादि'ति। एवंविधानाञ्च परमतप्रतिषेधाभिप्रायदुःखलेपाद्वा

दृष्टान्ताभासलाभतरलतया वा प्रमादाद्वा सभाक्षोभाद्वा उक्तिसम्भवः। सोऽयं प्रथमकक्षादिपाती उत्तरकक्षोद्भाव्यो वादेऽपि, अन्यथा तत्त्वप्रतिपत्तिव्याघातात। शेषं पूर्ववत। मिथो व्याहतं न वदेदिति रहस्यम। |NP, p. 90.|

(497) P. 344, ll. 20-22 : (*a*) This view has been expressed by Vardhamāna Upādhyāya in his commentary on Udayana's *Nyāyaparīsiṣṭa*. The relevant passages are as follows :

ननु मिथो व्याघातः कथं विषयाप्रसिद्ध्या निरूप्यः कीदृशो वा विरोधः? न तावद् भावाभावरूपत्वम्, 'श्रमणा गर्भिणी'त्यादावव्याप्तेः। नापि सहानवस्थायित्वम्, गवाश्वादावतिव्याप्तेः, 'इदमसाधकमनुपलभ्यमानोपाधिशङ्काग्रस्तत्वादि'त्यव्याप्तेश्च। नापि परस्पराभावव्याप्यत्वम्, विरुद्धस्यैतद्विशेषापत्तेः। सहानवस्थायिनोरेकधर्मिनिरुप्यत्वं चाप्रसिद्धमेवेति।

अत्राहुः–यस्य हि येन रूपेण यदन्वयो नाभ्युपगतस्तस्य तेन रूपेण तदन्ययाभ्युपगमे विरोधः। स च पदादिभिरुन्नीयत इति पदादेस्तथा प्रतिपादकत्वाद् व्याघात उच्यत। न च 'यावज्जीवमहं मौनी' 'ज्ञानमविषयम्', 'अवाचकः शब्दः' इत्यादिषु विरोधप्रतिभेदेषु अनभ्युपगमानन्तरं येन व्याघातः स्यादित्यव्यापकत्वम्, मौनं हि वचनोच्चारणशक्तस्य तदनुच्चारणं, तत्रा'हं मौनी'ति शब्दोच्चारयितृत्वमात्मनोऽभ्युपगच्छति चेत्, व्यक्तमभ्युपगमान्तरम् ; न चेत्, न तर्हि प्रतिपादक इति स्वयमेवाप्रतिभास्वीकारात। एवम् 'अवाचकः शब्द' इत्याद्यप्यूहनीयम।

यद्वा–यद् यथा स्वीकृतं तत्तथात्वव्यतिरेकनियतो व्यापारो विरोधः, तथा च स्वक्रियाव्याघातादिसंग्रहः। यत्तु–'खण्डितं घटोऽस्ती'त्यंशस्य घटसत्त्वबोधकेन घटतदभावविरुद्धप्रतिपादके 'इह घटो

नास्ती'त्यत्रातिव्याप्तिरिति, तन्न, अस्तिना घटानन्वयात। 'नास्ती'त्यनेन तु घटोऽन्वीयत।

अप्रामाणिकाभिमानं विरोध इत्यन्य। [NPP, p. 89.]

It may be noted that Vardhamāna has rejected here the view of Maṇikantha Miśra, whose remarks are as follows :

सहानवस्थितयोरेकत्र वाक्ये एकनिष्ठतयेकेनाभिधानं प्रतिज्ञाविरोधः। [*Nyāyaratna*, p. 226.]

This is the second alternative rejected by Vardhamāna.

(*b*) Śaṃkara Miśra has also expressed a similar view in his *Vādivinoda* :

एकत्र वाक्ये तदंशयोरवान्तरवाक्ययोः पदयोर्वा मिथो व्याघातः प्रतिज्ञाविरोधः, प्रतिज्ञापदस्योक्तमात्रोपलक्षकत्वात। [*Vādivinoda*, p. 31.]

(498) P. 345, ll. 5-7 : The accusation levelled at Dharmakīrti in these lines is unjustified ; because Dharmakīrti has not spoken of कपोलवादन in the context of प्रतिज्ञासन्न्यास, as is evident from the following passages of *Vādanyāya* :

... ... किमनैरशक्तपरिच्छेदैः क्लीवप्रलापप्रचेष्टितैरूपन्यस्तैः। एवं हि अतिप्रसङ्गः स्यात। पक्षप्रतिषेधे तूष्णीम्भवतो तूष्णीम्भावो नाम निग्रहस्थानम्, प्रपलायमानस्य प्रपलायितं नामेति एवमाद्यपि वाच्यं स्यात। [*Vādanyāya*, Bauddhabhārati edn. p. 93.]

(499) P. 345, ll. 9-14 : There is some dispute about the number of the possible types of प्रतिज्ञासन्न्यास. According to Maṇikaṇṭha Miśra and Vardhamāna Upādhyāya, प्रतिज्ञासन्न्यास can be of *five* types, while Vācaspati Miśra II maintains that प्रतिज्ञासन्न्यास can be of *four* types :

(*i*) परोक्तदूषणोद्दिधीर्षया स्वोक्तापलापः प्रतिज्ञासन्न्यासः। तदयं पञ्चधा–'परपक्षोऽयं मयोक्त' इति वा, स्वोक्त एव 'त्वयेदमुक्तमि'ति वा, परोक्त एव 'मयेदमुक्तमि'ति वा, अनुक्त एव 'मयेदमुक्तमि'त्यादि।

[*Nyāyaratna*, pp. 227-228]

(*ii*) संन्यासोऽपि पञ्चविधः–प्रतिपादनापलापात्, यथा–'क एवमाहे'ति। प्रकारापलापाद्वा, यथा–'परपक्षोऽयं मयोक्त' इति। स्ववचने परकर्त्तृत्वसञ्चाराद्वा, यथा–स्वोक्त एव 'त्वयेदमुक्तमि'ति। परोक्तौ स्वकर्त्तृत्वसञ्चाराद्वा, यथा–परोक्त एव 'मयेदमुक्तमि'ति। पञ्चमस्तु यथा–अनुक्त एव 'मयेदमुक्तमि'ति।

[ANTB, Allahabad edn. p. 88.]

(*iii*) उक्तेऽनुक्तत्वाध्यारोपेण दोषपरिहाराभिधानं प्रतिज्ञासन्न्यास इति नवीनाः। सोऽयं चतुःप्रकारकः–'क एवमाहे'ति स्वोक्त एव, 'त्वयैवेदं दूषणमुक्तमि'ति वा, परोक्ते 'न मयेदमुक्तमि'ति वेति, च्छले प्रतिवादिना तात्पर्यारोपोऽत्र तूक्त एवारोपो वादिनेति विशेषः।

[NTĀ, Allahabad edn. p. 477.]

Jānakīnātha is non-commital here, as he simply says — सोऽयं बहुविधः.

(500) P. 345, l. 19—P. 346, l. 2 : A similar definition of हेत्वन्तर has been given by Śaṅkara Miśra :

अविशिष्टसाधनभागमभिधाय पुनर्विशेषणवत्तद्वचंन हेत्वन्तरम।

[*Vādivinoda*, p. 31.]

(501) P. 346, ll. 3-11 : The relevant remarks of Udayana are as follows :

तदिदं हेतुविशेषणादुदाहरणप्रयोजकांशविशेषणादुपनयविशेषणाद् दूषणविशेषणाच्चेति चतुर्विधम। तत्र प्रथमं यथाभाष्यम्, तदुत्तरद्वयं प्रतिज्ञान्तर उदाहृतम। चतुर्थन्तु हेतौ प्रयुक्त'ऽसाधकोयं सपक्षे सत्त्वादनित्यत्वे प्रमेयत्ववदि'ति प्रयुक्ते जात्युत्तरत्वेण। जात्युत्तरतया च

परिहृते 'विपक्षगतत्वे सति सत्त्वादि'ति यथा, एवं 'विपक्षव्यावृत्तत्वादि'त्युक्ते 'सपक्षव्यावृत्तत्वे सती'ति यथा। एवं 'सन्दिग्धत्वादि'त्युक्ते असिद्धतया च दूषिते 'व्याप्तत्वेने'ति यथा। एवं 'प्रत्यभिज्ञानवाधितत्वादि'त्युक्ते लूनपुनर्जातकेशादिना च प्रत्युक्ते 'अविसंवादिप्रत्यभिज्ञये'ति यथेत्यादि सर्वदूषणेषु स्वयमूहनीयम। एवञ्च स्थापनागतं दूषणगतं वा परोक्तदोषप्रतीकारे हेत्वन्तरमेव। अप्रतीकारे तु यद्यपि यथाक्रमं हेत्वाभासनिरनुयोज्यानुयोगौ सावकाशौ, तथापि हेत्वन्तरमेव वाच्यम्, विशेषणाभिधानेनाविशिष्टासामर्थ्यस्य सिद्धस्वीकारत्वात। तदुत्तरयोस्तु साध्यत्वात्, यथा—'अनित्यः शब्दः वाह्यकरणग्राह्यत्वादि'त्युक्ते योगिप्रत्यक्षैः परमाणुभिरनेकान्तेन च प्रत्युक्ते 'अस्मदादी'-तिमात्रपदविशेषणोक्तौ अदृष्टस्यैव दोषाभासदर्शनात। विशेषमिच्छतस्तु पर्यनुयोज्योपेक्षणसहवृत्तिकमिदं हानिवत् प्रतिज्ञान्तरवत। तद्वदेव च परिकरशुद्धिरस्येति। [NP, pp. 92-93.]

(502) P. 347, l. 1 : Vardhamāna Upādhyāya maintains that the *saṅgati* of this *prakaraṇa* with the earlier one is हेतुता:

सम्प्रति प्रकृतोपयोग्यर्थप्रतिपत्तिशून्यनिग्रहस्थानचतुष्कप्रकरणम। पूर्वापेक्षया हेतुहेतुमद्भावोऽवान्तरसङ्गतिः। [ANTB, p. 90.]

This view has also been accepted by Keśava Miśra Tarkācārya. [GSP, p. 116.]

(503) P. 347, l. 5 : The relevant remarks of Udayana are as follows :

अर्थान्तरमिति लक्ष्यनिर्देशः। अन्यदित्यध्याहारात् पञ्चम्युपपत्तिः, अन्यथा तृतीया स्यात। लक्ष्यपदावृत्तेर्वा ल्यव्लोपे वा प्रकृतमनपेक्ष्येत्यर्थः। [NP, pp. 93-94.]

(504) P. 348, ll. 9-13 : Here, the relevant remarks of Udayana are as follows :

अन्यथा तृतीया स्यात्। लक्ष्यपदावृत्तेर्वा ल्यब्लोपे वा प्रकृतमनपेक्ष्येत्यर्थः।
[NP, pp. 93-94.]

(504) P. 348, ll. 9-13 : Here, the relevant remarks of Udayana are as follows :

नन्वपूर्णे प्रकृते वाक्येऽर्थान्तरमभिदधतो न्यूनमेवोद्भाव्येत, पूर्णेऽप्यदुष्टे किमित्यर्थान्तरमवतारयेत। दुष्टेऽपि दोषमुपेक्ष्य नार्थान्तरोद्भावनस्योपयोगः। न चार्थान्तराभिधानेऽपि प्रतिज्ञान्तरवत् पूर्वदोषः परिहृतो भवेत् येनोपादीयेत। एवमेवाभिधाने चातिप्रसङ्गादिति। न, दुष्टतिरोधित्सायाः सुलभत्वात्, अदुष्टेऽपि दुष्टबुद्धेः कदाचित् सम्भवात। न्यूनस्याप्यन्यस्य वा दोषस्य तद्वादिन्युपरतवचने दत्तावसरे चोद्भाव्यत्वात। अन्यथा त्वतिप्रसङ्गात् । एतस्य चोच्यमानग्राह्यत्वात् ततस्तत्सम्भेदेऽप्येतदेवोद्भाव्यम् । अतएव न्यूनाद्यपेक्षायामुपेक्षा न निग्रहः। अवसरे हि तत्तथा स्यात्, अनवसरोद्भावनवदिति । प्रकृतोपयुक्तमेव वाच्यमिति रहस्यम् । [NP, p. 95.]

(505) P. 349, ll. 1-2 : This seems to be the view of Maṇikaṇṭha Miśra, whose comments are as follows :

नन्वर्थान्तरमर्थान्तरेणैव परिहरतः कथं कथाविच्छेदः स्यात् ? मूकीभावादेव । न चाप्रतिभा तदा स्यात् । अर्थान्तरवादिनोऽर्थान्तरेण निगृहीतोऽयमिति मध्यस्थावगमविषयत्वात् ।

[*Nyāyaratna*, p. 230.]

(506) P. 350, ll. 1-2 : The relevant remarks of Vardhamāna Upādhyāya are as follows :

उभयवादिगृहीतशक्तिकपदान्यपदप्रयोगो निरर्थकम् । व्याकरणादेः साधारणसङ्केतग्राहकतया संस्कृतमतेरेव कथाधिकारात् । शक्तिपदस्थाने वा वृत्तिपदं प्रक्षेप्यम् । तेन लौकिकलक्षणया वदतस्तदभावः, स्वकल्पितलक्षणया च वदतस्तदापाततो लभ्यते । प्रतिपादकतया वाच्यत्वेन

कथासमयविषयान्यशब्दाभिधानं वा तदिति विवक्षितत्वात्।

[ANTB, Allahabad edn. p. 99.]

(507) P. 351, ll. 1-8 : The relevant comments of Udayana are as follows :

कुतः पुनरेतन्निग्रहस्थानम्, एवमप्यर्थप्रतीतेः ? शब्दप्रयोगस्य च तावन्मात्रार्थत्वादिति चेत्, न; मीमांसकादिकं प्रति वाचकापभ्रंशविभागस्य सिद्धत्वात्। यस्याप्ययमसिद्धस्तेनापि समानसमयैरेव पदैर्वक्तव्यम्, अन्यथा कथावाक्यनिष्पत्तेस्तादर्थ्यव्याघातात्। के समानसमयाः शब्दा इति दुरूहम्, परबुद्धेरप्रत्यक्षत्वादिति चेत्। न, प्रागेव तदुपायव्याकरणादिव्यवहाराभ्युपगमात। न चैवम्भूतानां विपर्यासानां परिषत्प्रतिवादिसमानताऽस्ति, अर्थप्रत्ययस्तु मणिप्रभायां मणिबुद्धिन्यायेन भवन्नपि न तेषां सार्थकत्वमवस्थापयतीति युक्तमस्य निग्रहस्थानत्वम्। अन्यथाऽसामर्थ्यसंवरणार्थं दाक्षिणात्यस्य स्वदेशभाषया प्रत्यवतिष्ठमानस्य किं वक्तव्यं पाश्चात्त्यैरित्यज्ञानमेवोत्तरवादिनः सर्वत्रेति गतं कथाव्यसनेन। तस्मात् समानसमयैरेव पदैर्वक्तव्यमिति रहस्यम्। [NP, pp. 96-97.]

(508) P. 352, ll. 4-8 : A similar view has been recorded by Vardhamāna Upādhyāya in his commentary on *Nyāyapariśiṣṭa* :

अत्राहुः — यत्र कथायाः पूर्वं समयः क्रियते, वाचकैरेव वक्तव्यमिति, तत्र तमतिक्रम्य वचने कथं न निग्रहः। [NPP, pp. 96-97]

(509) P. 353, ll. 6-8 : This view is supported by Udayana and Vācaspati Miśra II :

(*i*) एकवाराभिधानं तावत् न्यायप्राप्तमेव। वारद्वयं चानवधानभेदप्रसिद्धिनिरासार्थम्।

[TTP, A.L. Thakur's Press Copy, Ch. V, p. 62.]

(*ii*) त्रिरभिधानं व्यासङ्गादिनाऽबोधनिरासाय।

[NTĀ, Allahabad edn. p. 479.]

(510) P. 354, ll. 8-9 : The interpretation rejected here has been suggested by Vardhamāna Upādhyāya, whose remarks are as follows :

पौर्वापर्यं विशेषणविशेष्यभावः पदार्थानां परस्परमन्वयः। तज्ज्ञानयोः कार्यकारणभावेन पौर्वापर्यादर्थेऽपि तत्त्वमुपचर्यते, तस्य तेन वाऽयोगाऽनन्वयः। स चाकाङ्क्षादिविरहात्। तस्मादप्रतिसम्बद्धार्थमनन्वितार्थं पदजातं वाक्यजातं वाऽपार्थकमिति सूत्रार्थः। [ANTB, Allahabad edn. pp. 101-102.]

(511) P. 355, ll. 6-7 : This view has been recorded by Udayana as well :

असमर्थविशेषणानन्वयं चतुर्थमपार्थकमस्तीति केचित्। तदशिष्यम्, असाम्प्रदायिकत्वादतिप्रसङ्गाच्च। हेत्वाभासान्तर्भूतं हि तदिति वार्त्तिकम्।

[NP, p. 99.]

(512) P. 355, ll. 8-12 : Vardhamāna Upādhyāya, Vācaspati Miśra II and Keśava Miśra Tarkācārya have classified अपार्थक in a different manner :

(*i*) ... ... यत्काले यत्रैकवाक्यताप्रयोजकरुपाभावस्तत्काले तदपार्थकमिति लक्षणम्। तद् द्वेधा —पदापार्थकं वाक्यापार्थकञ्च। तदपि प्रत्येक त्रेधा अनाकाङ्क्षया, अयोग्यतया, अनासत्त्या च। आद्यं मुख्यम्, सदैवान्वयबोधाभावात्। 'कुण्डमजाजिनं पललपिण्डं गौरश्वश्चे'त्यादि। द्वितीयम् 'अग्निरनुष्ण' इत्यादि। तृतीयम् — 'गच्छति पयसाऽश्वेन भुक्त्वा नगरं चैत्र' इत्यादि। [ANTB, Allahabad edn. p. 102.]

(*ii*) एतद् द्विधा—पदापार्थकं वाक्यापार्थकञ्च। एतदपि प्रत्येकं त्रिधा— अनाकाङ्क्षयाऽनासत्त्याऽयोग्यतया च। अनाकाङ्क्षया 'कुण्डमजाजिनं गौरश्वः' इत्यादि। अनासत्त्या 'गच्छति पयसाऽश्वेन भुक्त्वा नगरं चैत्र' इत्यादि। अयोग्यतया 'अग्निरनुष्ण' इत्याद्येवं नेयम्।

[NTĀ, Allahabad edn. p. 481.]

See also GSP, p. 113 for a similar division. The passage concerned has not been quoted here as it is corrupt, and contains some lacunae.

(513) P. 357, ll. 5-6 : The cryptic expression कृ तृ रा स etc. is the first line of a verse of an work on Astrology, and it was used as an example by Vācaspati Miśra in his *Tātparyaṭīkā*. The readings of this expression in all the available editions of *Tātparyaṭīkā* are corrupt, and hence, they do not convey any sense. The correct reading of this line, and the full verse of which it is a part, have been given by Abhayatilaka Upādhyāya in his *Nyāyālaṃkāra* :

कृ तृ रा स दिवा द र भूत दिवा

शु च रा ए दिवैक र पूर्ण दिवा ।

यदि चन्द्रगतिश्च तिथिश्च समा

इति विष्टिगणं प्रवदन्ति बुधाः ॥

[*Nyāyalaṃkāra*, p. 778.]

(514) P. 357, ll. 8-9 : For the relevant portion of *Tātparyaṭīkā*, see NVTT, pp. 2182-2183. *Maṇimarīci* seems to be Jānakīnātha's commentary on *Tattvacintāmani*, and he has referred to this work in his *Nyāyasiddhāntamañjarī*.

(515) P. 357, ll. 11-12. : For the relevant portions of *Tātparyaṭīkā* and *Anvīkṣānayatattvabodha*, see NVTT, p. 2183. and ANTB, pp. 104-106.

(516) P. 358, ll. 15-16 : The relevant remarks of Udayana are as follows :

अन्वितमुपयुक्तमपुनरुक्तं कृतकर्तव्यमभिधीयमानमधिकमिह ग्राह्यम । तदधिकं निग्रहस्थानं व्यवहर्तव्यम् । [NP, pp. 104-105.]

(517) P. 359, ll. 1-2 : This view has been recorded and rejected by Maṇikaṇṭha Miśra :

व्यर्थविशेषणमधिकेऽन्तर्भवतीति केचित् । तन्न । 'घटोऽनित्यः प्रमेयत्वे सति कृतकत्वात्' इत्यत्र न प्रमेयत्वमधिकम्, प्राथमिकत्वेन्नाकृतकर्तव्यत्वात् । नापि कृतकत्वमधिकम्, व्यभिचारवारणेन फलवत्त्वनियमात् । हेत्वाभासेऽन्तर्भावस्य दर्शितत्वात् । [*Nyāyaratna* p. 235.]

(518) P. 359, ll. 7-8 : Here, the following remark of Dharmakīrti may be taken into account :

यत्रैकसाधनवाक्यप्रयोगपूर्वको विचारस्तत्राधिकाभिधानमनर्थकमिति निग्रहस्थानम् । प्रपञ्चकथायां तु न दोषः, नियमाभावादिति ।

[*Vādanyāya*, Bauddhabhāratī edn. p. 10.]

(519) P. 360, l. 11 : Before this *sūtra,* some editions of *Nyāyavārttika* read another sentence अनुवादे त्वपुनरुक्तमर्थविशेषोपपत्तेः as another *sūtra*. See editorial notes in NV, (Metropolitan edn) p. 2187. This sentence has not been counted as a *sūtra* in *Nyāyasūcīnibandha* etc. In the Metropolitan edn. it has been read as a sentence of *Nyāyabhāṣya*.

(520) P. 360, l. 18- P. 361, l. 1 : The relevant comments of Udayana are as follows :

अर्थादापन्ने तु पूर्वपदाक्षिप्तोक्तिर्यथा 'अग्निनोष्णेन पर्वतो युक्तः', इयमेव विपर्ययेनोत्तरपदाक्षिप्तोक्तिः । वाक्येऽपि विध्याक्षिप्तनिषेधोक्तिर्यथा —'बहिरस्ति देवदत्त' इत्युक्त्वा 'गेहे नास्ती'ति; 'जीवन् गेहे नास्ती'त्युक्त्वा 'बहिरस्ती'ति निषेधाक्षिप्तविध्युक्तिरिति । [NP, p. 109.]

(521) P. 361, ll. 8-10 : The view recorded and rejected here belongs in all probability to Taraṇi Miśra, the author of *Ratnakoṣa,* as can be gleaned from the following remark of Vardhamāna Upādhyāya :

शब्दस्यार्थस्य च प्रयोजनं विनोच्चरणं प्रतिपादनञ्चेति रत्नकोषकृतः ।

[NPP, p. 109.]

(522) P. 362, ll. 8-11 : (*i*) This opinion of the author of *Nyāyabhāskara* is also shared by Taraṇi Miśra, the author of *Ratnakoṣa*, as can be seen from the following remark of Vardhamāna Upādhyāya.

न चैवमसंकीर्णोदाहरणाभावेन तयोरनिग्रहस्थानत्वम् । यत्र वादिवाक्यं सम्यगनूद्याज्ञानाविष्कारकथाविच्छेदौ, तत्र तयोरसङ्करादिति सङ्कीर्णोदाहरणाव्यापकत्वात् तद्व्यावर्तकं विशेषणं लक्षणे — इति रत्नकोषकृतः । [NPP, p. 110.]

(523) P. 362, ll. 11-13 : (*a*) The relevant remarks of Udayana are as follows :

वादिनोक्तस्य परिषदावबुद्धस्य पुनर्वादिना परिषदा वा अनूद्य दत्तस्यापि योग्यस्वस्थेनानवबोधमनाविष्कुर्वता कथामविच्छिन्दता अप्रत्युच्चारणमननुभाषणम् । नञ्द्वयं प्रसज्यपर्युदासवृत्ति । [NP, p. 110.]

(*b*) Vardhamāna Upādhyāya has explained the last sentence of this passage in the following manner :

नञ्द्वयमिति लक्ष्यलक्षणपदगतमित्यर्थः । तथा च प्रत्युच्चारणविरोधिव्यापारो लभ्यते । [NPP, p. 110.]

(*c*) Vardhamāna Upādhyāya has also adopted in his *Anvīkṣānayatattvabodha* the definition proposed by Udayana, and he has explained its constituent terms in the following manner :

अत्राद्येनाविज्ञातार्थव्यवच्छेदः । योग्यता प्रत्युच्चारणप्रयोजकान्तःकरणपाटवम् । स्वास्थ्यं तात्कालिकरोगाद्यभावः । अनवबोधमित्यादिनाऽज्ञानव्यवच्छेदः । कथामविच्छिन्दतेति विक्षेपव्युदासः ।

[ANTB, Allahabad edn. p. 113.]

(524) P. 362, ll. 14-15 : The remarks of Manikaṇṭha Miśra are as follows :

सम्पूर्णानुवादसहितदूषणविधानव्यतिरेकोऽननुभाषणम् । तदपि चतुर्धा—एकदेशानुवादेन, विपरीतानुवादेन, केवलदूषणोक्त्या, स्तम्भेन वेति ।
[*Nyāyaratna*, pp. 236-237.]

(525) P. 363, ll. 1 : The remarks of Udayana are as follows :

... तदित्यादिसर्वनाम्नाऽनुवादेन वा एकदेशानुवादेन वा विपरीतानुवादेन वा केवलदूषणोक्त्या वा स्तम्भेन वेति पञ्चधा विभाव्यत ।
[NP, pp. 110-111.]

(526) P. 363, ll. 7-9 : The relevant remarks of Udayana are as follows :

परिषद्विज्ञानवादित्रिरभिधानानुकर्षणार्थश्चकारः । तेन वादिनोक्तं परिषदा बुद्धं पुनर्वादिना परिषदा वा अनूद्य दत्तमपि प्रतिवादी न चेज्ञानीयात्तदाऽज्ञानं तस्य निग्रहस्थानम् । 'एतच्च न बुध्यते मया किमनेनोक्तमि'त्यभिधाय तिष्ठासोरिष्यते । एवम् अननुभाषणादस्य भेदः, अनवबोधमनाविष्कुर्वतो ह्यनुवादावसरः, अवसरे हि क्रियाभ्रंशो दोषाय । अन्यथाऽनुच्यमानदशायामननुभाषणोद्भावनप्रसङ्गात् । तस्मादबोधं विभाव्य तिष्ठासोर्नाननुभाषणावसरः । अतएव नाप्रतिभेत्यज्ञानमेवावशिष्यते । अविज्ञातं येन तस्याज्ञान मिति सूत्रार्थः। [NP, p. 112.]

(527) P. 364, ll. 1-3 : The relevant remarks of Udayana are as follows :

अनुवादानन्तरमेवैतदुद्भावनावसरः, अन्यथा अतिप्रसङ्गात् । तदा हि नाज्ञानमुद्भाव्यं सन्दिग्धत्वात् । स्वयमनाविष्काराच्च । नाननुभाषणम्, तस्य तत्क्रिययैवापास्तत्वात् । न विक्षेपः, कथाविक्षेपव्याजानुक्तेः । नार्थान्तरम्, प्रसक्तानुप्रसक्तेरभावात् । नापार्थकम्, अनुक्रमेणान्वयाग्रहणादिति । एतस्यां वेलायामवहितायां परिषदि वादिनि च श्रोतुमेकताने प्रतिवादी यद्युत्तरमददानः श्लोकं वा पठेत्, केशादिकं वा समारचयेत्,

आकाशं वा सूचयेत्, राजवार्तां वाऽवतारयेत्, यद्वा तद्वा कुर्यात् सर्वथाऽप्रतिभया निग्राह्यः, अन्यत्राहिदंशापस्मारभूतावेशोन्मादादिभ्यः। सत्साधने चेयमसङ्कीर्णा, अन्यत्र पर्यनुयोज्योपेक्षणसहचारिणी। अनुद्भाविताऽपि चेयं निग्रहाय, यथायथं स्मितस्वेदादिनाऽपि सुव्यञ्जितत्वात। कथाविरामेण तिरोधानासम्भवाच्च। अतो नैतस्यामक्षरैरनुद्भावितायामपि पर्यनुयोज्योपेक्षणमस्तीत्याचार्यदेशीयाः।

[NP, pp. 113-114.]

(528) P. 364, ll. 4-6 : The relevant comments of Maṇikaṇṭha Miśra are as follows :

स्वीयविपर्ययज्ञानाविष्करणमज्ञानम्। यथा—'भ्रान्तोऽहमस्मिन् विषये; विपरीतं मे ज्ञानम्' इत्यादि। न त्वन्यथाविष्करणमात्रम्। तथा सत्यप्रतिभातोऽस्य भेदो न स्यादित्यग्रे दर्शयिष्यते। अननुभाषणाद्यसंकरस्तु स्फुट एव। स्वीयसन्देहाविष्करणमप्रतिभा। यथा 'सन्देहोऽस्मिन् विषयेऽस्माकम्' इति। न तूत्तरस्याप्रतिपत्तिरप्रतिभा। सा हि केशसमारचनाकाशसूचनादिनाऽवसीयते ; राजवार्ताकथनावतरेण वा ; नाद्यः, स्तम्भरूपाननुभाषणान्तर्भावात्। न च वाच्यम्— तत्रानुवादे स्तम्भः, अत्रोत्तर इति ; व्यक्तिभेदस्यानुपयुक्तत्वात्। अन्यथा तद्विशेषचिन्तायां निग्रहस्थानानन्त्यं स्यात्। न द्वितीयः, राजवार्तादीनां प्रकृतानुपयुक्तत्वेनार्थान्तरत्वात्। ननु भवतामपि सम्यग्ज्ञानविरहस्याज्ञानप्रतिभयोरविशेषादेकनिग्रहस्थानापत्तिः। मैवम्। अप्रकृष्टत्वभेदात्; एकत्र विपर्ययः, अन्यत्र सन्देह इति। सन्देहे एककोटावपीष्टांशोऽस्ति, विपर्यये तु न सर्वथेति महान् विशेषः। अन्यथा सम्यग्ज्ञानाभावोन्नायकत्वात् सर्वेषामेव निग्रहस्थानानामैक्यं स्यात्।

परोक्तानवबोधार्हकरणमज्ञानम्, परोक्तानवबोधाविष्करणमप्रतिभेति केचित्।

[*Nyāyaratna*, pp. 237-238.]

(528) P. 366, ll. 2-3 : (*a*) This is the view of Udayana, whose remarks on this point are as follows :

साधुन्यसाधुनि वा साधने दूषणे वा प्रयुक्ते यदनिष्टभ्रमेणेष्टप्रसञ्जनं सा मतानुज्ञेति संक्षेपः । [NP, p. 117.]

(*b*) Maṇikaṇṭha Miśra has noted and rejected this view :

न त्वनिष्टभ्रमेणेष्टप्रसञ्जनमिति लक्षणम्, अव्याप्तेः ।
[*Nyāyaratna*, p. 239.]

(529) P. 366, ll. 8-11 : The relevant comments of Maṇikaṇṭha Miśra are as follows :

जातित्वमेवास्य न सम्भवति, स्वव्याघातकत्वाभावात् । तथा हि 'पुरुषत्वं चोरत्वासाधकम्, त्वय्यपि चोरत्वापादकत्वात्, प्रमेयत्वादिवत्' — इति प्रतिवादी वदति । अत्र न स्वव्याघातः ।
[*Nyāyaratna*, p. 240.]

(530) P. 366, ll. 10-13 : This view has also been reported by Vardhamāna Upādhyāya and Śaṅkara Miśra :

(*i*) केचित्तु—स्वपक्षे दोषमनुद्धृत्य परस्य दोषापादनं मतानुज्ञा ।
[ANTB, p. 117.]

(*ii*) स्वपक्षे दोषमनुद्धृत्य परस्य दोषापादनं मतानुज्ञा—इत्यके ।
[*Vādivinoda*, p. 35.]

(531) P. 367, ll. 7-12 : The relevant remarks of Udayana are as follows :

प्रतिज्ञाहानिप्रतिज्ञासन्न्यासादौ सदुत्तरेणापि प्रत्यवस्थाने अस्यावकाशात् । अप्रतिभायास्तत्राभावात् । ननु सदुत्तरं वदन् प्रौढतया क्षुद्रस्खलितं यद्युपेक्षितवान् किमेतावतैव निग्रहमर्हति ? अर्हत्येव, प्रतिज्ञासन्न्यासादीनामवश्योद्भाव्यत्वात् । अन्यथा पूर्वोपात्तं दुष्टं त्यजन् विशेषयन्नपह्नुवानो यद्युपेक्ष्येत, कथमपि कथाप्रतानविच्छेदो न स्यादिति। [NP, p. 119.]

(532) P. 367, ll. 13-15 : This is the view of Maṇikaṇṭha Miśra. Having quoted the passage ननु सदुत्तरं वदन्.... .... कथमपि कथाप्रतानतिच्छेदो न स्यात्, he makes the following observation :

तन्न, निग्रहस्थानान्तरैरविशेषात् । न हि प्रतिज्ञासन्न्यासाद्युपेक्षण-निग्रहस्थानान्तरोपेक्षणयोः कश्चिदस्ति विशेषः। तस्मात् स्तम्भोपेक्षणेऽस्यापि पृथग्भावोऽगन्तव्यः । [*Nyāyaratna*, p. 241.]

(533) P. 367, l. 17– P. 368, l. 2 : This passage closely resembles the following remarks of Maṇikaṇṭha Miśra :

उद्भावनार्हस्य परकीयनिग्रहस्थानस्यानुद्भावनं पर्यनुयोज्यो-पक्षेणम। न वाद्युद्भाव्यत्वमस्य । अपि तु मध्यस्थेनोद्भाव्यम । तेन न स्वकौपीनोद्घाटनदोषः । [*Nyāyaratna*, p. 241.]

(534) P. 368, l. 8 : The relevant comments of Udayana are as follows :

अतन्निग्रहस्थानापन्नो हि निरनुयोज्योऽत्र विवक्षितः । तस्यानुयोगेऽपि तन्निग्रहस्थानोद्भावनम्, एवं सर्वसंग्रहः, तथा चातन्निग्रहस्थाने तन्निग्रहस्थानाभियोगो निरनुयोज्यानुयोग इति । एतदेव हि महतः सूत्रस्य प्रयोजनम्, अन्यथा त्वनिग्राह्यनिग्रह इति प्रणयेत् ।

[NP, pp. 120-121.]

(535) P. 368, l. 9 : The view mentioned here was suggested by Maṇikaṇṭha Miśra, whose remarks are as follows :

विभ्रमान्निग्रहस्थानोद्भावनं निरनुयोज्यानुयोगः । तदयं द्वेधा भवति —अनिग्रहस्थाने निग्रहस्थानोद्भावनात्, अन्यनिग्रहस्थानेऽन्यनि-ग्रहस्थानोद्भावनाद्वा । [*Nyāyaratna*, p. 241.]

(536) P. 368, ll. 10-11 : The comments of Vardhamāna Upādhyāya are as follows :

(*a*) तन्निग्रहस्थानोद्भावनाभ्युपेतानवसरे तन्निग्रहस्थानोद्भावनत्वस्य निग्रहस्थानान्तरेणानुयोगानर्हत्वानुयोगो वा निरनुयोज्यानुयोगः ।

[*Nyāyapariśiṣṭaprakāśa*, p. 121.]

(*b*) अनिग्रहस्थानेनापि तन्निग्रहस्थानाभियोगो दोषत्वेन तदुद्भावनम । यद् वा —पर्युदासनञा निग्रहस्थानभिन्ने विषये निग्रहस्थानत्वेनोद्भावनं निरनुयोज्यानुयोग इत्यर्थः ।

यद्यप्येतद् यथाश्रुतमनवसरग्रहणव्यापकं, तत्रावसरप्राप्तनिग्रहस्थानापन्नस्यैव तन्निग्रहस्थानेनाभियोगात्, तथापि तन्निग्रहस्थानोद्भावनानवसरे तन्निग्रहस्थानोद्भावनोऽभ्युपेतावसरे तन्निग्रहस्थानोद्भावनं वा निरनुयोज्यानुयोगः । [ANTB, p. 122.]

These definitions of निरनुयोज्यानुयोग suggested by Udayana, Maṇikaṇṭha and Vardhamāna respectively have been mentioned by Śaṅkara Miśra as alternative definition of निरनुयोज्यानुयोग :

अनिग्रहस्थाने निग्रहस्थानानुयोगो निरनुयोज्यानुयोगः, अतन्निग्रहस्थाने तन्निग्रहस्थानोद्भावनं वा, अनुयोगानर्हानुयोगो वा, भ्रमान्निग्रहस्थानोद्भावनं वा । [*Vādivinoda*, p. 36.]

(537) P. 368, l. 18 : There is no unanimity regarding the types of निरनुयोज्यानुयोग. Udayana maintains that it may be of four types, while Maṇikaṇṭha Miśra says that it may be of *many* types:

(*i*) स चतुर्विधः, छलं जातिराभासोऽनवसरग्रहणञ्चेति ।[NP, p. 120.]

(*ii*) तदयं छलजात्याभासानवसरग्रहणाविषयवृत्तित्वादिभेदाद् बहुविधः। अविषयवृत्तित्वमाभास एवान्तर्भवतीति चेन्न, परिगणनवहिर्भावात् । [*Nyāyaratna*, p. 242.]

Jānakīnātha has adopted here the view of Udayana.

(538) P. 368, l. 19– P. 369, l. 4 : These lines have been virtually borrowed from *Nyāyapariśiṣṭa* of Udayana, where we come across the following lines :

अनवसरग्रहणन्तु यथोक्तावसरमप्राप्यातिक्रम्य वा ग्रहणम् । यथा 'त्यक्षसि चेत् प्रतिज्ञाहानिः, विशेषयिष्यसि चेत् हेत्वन्तरम्' —इति । अत्यन्तावदनेन दोषेण हेतुस्ते दुष्ट एवादुष्टो वा, तथापि पूर्वस्तावत् त्वया त्यक्त इति हानिः । विशिष्टस्तावदयमदुष्टः पूर्वत्वविशिष्ट एव त्वयोपात्त इति हेत्वन्तरमित्युक्तग्राह्यम्। तथोच्यमानग्राह्यमपशब्दाद्युक्तिपरिसमाप्तौ, अनुक्तग्राह्यमज्ञानाद्यननुभाषणाद्यवसरे सर्वं कक्षान्तरितम् ।

[NP, pp. 121-122.]

Here, the *nigrahasthāna-s* have been divided into three groups : (*i*) *uktagrāhya*, (*ii*) *anuktagrāhya* and (*iii*) *ucyamānagrāhya*. This classification has been neatly stated in a verse :

उक्तग्राह्याः केचिदन्येऽनुक्तग्राह्यास्तथा परे ।
उच्यमानदशाग्राह्या इति कालस्त्रिधा स्थितः ॥

Nigrahasthāna-s like *ajñāna* are grasped only when something is said by the *vādī*, and they are accordingly called *uktagrāhya*. Those like *hetvantara* are regarded as *nigrahasthāna* even when they are not pointed out by anyone, and hence, they are called *anuktagrāhya*. Those like the use of ungrammatical words are *nigrahasthāna*s by themselves, but they are recognized as such only when something is uttered by the *vādī*. These are known as *ucyamānagrāhya*.

(539) P. 670, ll. 8-9 : This statement of Jānakīnātha is not justified, because Dharmakīrti has tried to include *apasiddhānta* under *hetvābhāsa*, as is clear from his arguments for not regarding *apasiddhānta* as a distinct type of *nigrahasthāna* :

यथोक्तेन न्यायेन पूर्वोक्तस्यासाधनाङ्गस्यासिद्धस्य हेतोरविधानादेव

निग्रहः, नापि नियमात् कथाप्रसङ्गात् । इदमपि हेत्वाभासेष्वन्तर्भावान्न पृथग् वाच्यम् । [*Vādanyāya*, Bauddhabhāratī edn. p. 129.]

(540) P. 670, ll. 10-11 : While explaining this verse, Manorathanandī has made the following observations :

न हि कर्णनासमिव सिद्धान्तः प्राणिसहजः । नापि दोषोर्जितगुणोपपन्नः प्रमाणमिव विचारात् प्राक् सिद्धान्तः सिद्धः ।

[*Pramāṇavārttikavṛtti*, Bauddhabhārati edn. p. 382.]

(541) P. 670, ll. 12-13 : These lines bear a very close resemblance to the following remarks of Maṇikaṇṭha Miśra :

न हि शास्त्राश्रया वादा भवन्तीति नापसिद्धान्तो निगहस्थानमिति सौगताः। ननु शास्त्रमन्तरेण कथायामतिप्रसङ्गः । तथा हि—अस्फुर्तिमता नैयायिकेन क्षणभङ्गसाधने प्रयुक्ते यदि सिद्धसाधनमुद्भाव्य सौगतो निगृह्येत, तदा किं कुर्यात् ? [*Nyāyaratna*, pp. 242-243.]

(542) P. 370, l. 17 : While commenting on this *sūtra* Udayana has remarked as follows :

तथैव निग्रहस्थानत्वमिति शेषः । [NP, p. 125.]

While explaining this sentence, Vardhamāna Upādhyāya has furnished an important information regarding the views of the author of *Ratnakoṣa* :

तथैवेति । यथा येन रुपेणासिद्धत्वादिना तेषां हेतुदूषकत्वमुक्तं तदेव रुपं पुरस्कृत्य हेत्वाभासप्रयोक्तृतया कथकाशक्त्युन्नयनमपीति सूत्रार्थ इत्यर्थः। यद्यपि विप्रतिपत्त्युन्नायकत्वेन निग्रहस्थानत्वम्, न च तेन रूपेण ते लक्षिताः, तथापि हेत्वाभासाभिमतस्योद्देश्यानुमितिप्रतिवन्धकं यथार्थज्ञानविषयकत्वमेव रूपमत्र विवक्षितम् । अत एव— 'हेत्वाभासस्तर्हि दुरूहतया परीक्ष्यतामि'त्यपेक्षायामिदं सूत्रम्, "तथैव परीक्षिता" इति शेषो वक्तव्यः, तेन यथोद्दिष्टाः लक्षितास्तथेत्यर्थः, परीक्षा च "यत्र संशयस्तत्रैवमुत्तरो-

तरप्रसङ्ग" इत्यनेन कृतेति रत्नकोषकृतः, तदपास्तम्, अत्रोद्देशपरीक्षोत्कीर्तने प्रयोजनाभावाच्च । [*Nyāyapariśiṣṭaprakāṣa*, p. 125.]

(543) P. 371, ll. 14-15 : (*a*) The relevant comments of Udayana are as follows :

अनुक्तसमुच्चयार्थश्चकारः । विरोधादिनिग्रहसाधनोत्तीर्णस्य हि साधनप्रयोगस्य चतुर्धा दुष्टत्वं सम्भवति । हेतुतो यथा अनैकान्तिकमित्यादि । दृष्टान्ततो यथा साधनविकलमित्यादि । तर्कतो यथा आत्माश्रयेतरेतराश्रयादि । उक्तितो यथा अनुपदर्शितान्वयविपर्ययोपदर्शितान्वयादि । तत्र स्वशब्देन प्रथमविधायामुपात्तायामनुक्तत्रयमपि निग्रहस्थानत्वेन व्यवहर्तव्यमिति चकारार्थः । तत्र साधनविकले दृष्टान्तेऽसाधारणो हेतुः । साध्यविकले विरुद्धः । उभयविकले व्याप्यत्वासिद्धः । तथाऽश्रयसिद्धोऽपि । साध्याव्यावृत्तेरसाधारण्यम् । साधनाव्यावृत्तेर्विरोधः । उभयाव्यावृत्तेर्व्यतिरेकव्याप्तेरसिद्धिः । आश्रयासिद्धेऽपि तथा आत्माश्रये परस्पराश्रये चक्रकवृत्तौ त्वसिद्धिः । अनवस्थायामसिद्धिः, अनैकान्तिकत्वम्, कालात्ययापदेशो वा । अनिष्टप्रसङ्गे व्याप्त्यसिद्धिः । तथाऽनुकूलतर्काभावेऽपि । दुरुक्तौ तु वस्तुतोऽर्थस्य हेतोः शोभनत्वेऽप्युक्तानुसारेण दुष्टत्वमेव । अनुपदर्शितस्य सतो हेतुस्वरूपस्यागमकत्वात् । यथावचनं च तस्य रूपस्याप्रतीतेः ।

[NP, pp. 125-126.]

(*b*) This interpretation has been admitted by Vardhamāna Upādhyāya, Keśava Miśra Tarkācārya and Rādhāmohana Gosvāmi Bhattācārya :

(*i*) अनुक्तसमुच्चयार्थश्चकारः । विरोधादिनिग्रहस्थानोत्तीर्णस्य हि प्रयोगस्य चतुर्धा दुष्टत्वम् — हेतुतोऽनैकान्तिकत्वादिना, दृष्टान्ततः साध्यविकलत्वादिना, तर्कत आत्माश्रयत्वादिना, उक्तितोऽर्थपदाश्रितान्वयविपर्ययोपदर्शितान्वयादिना । तत्र प्रथमायां स्वशब्देनोपात्तायामनुक्तं विधात्रयं निग्रहस्थानत्वेन व्यवहर्तव्यमिति चकारार्थः । प्रतिज्ञाहान्या-

दिवदशक्तिसूचकत्वाविशेषेऽपि न ते पृथगुक्ता:, हेत्वाभासपर्यवसायित्वं तेषामिति ज्ञापनार्थत्वात् । [ANTB, p. 126.]

(*ii*) अनुक्तसमुच्चयाथश्चकार: । तेन साध्यविकलानुपदर्शितान्वय-विपरीतपदानुपदर्शितान्वयानुपदर्शितव्यतिरेकविपरीतोपदर्शितव्यतिरेकादय:, आत्माश्रयान्योऽन्याश्रयचक्रकानवस्थादयोश्चोद्भावनप्रकारा संगृहीता भवन्ति। [GSP, p. 123.]

(*iii*) चकारश्चानुक्तसमुच्चायक इति । [NSVV, p. 345.]

(*c*) P. 371, l. 16– P. 372, l. 2 : Apart from Jānakīnātha, the authors who have disagreed with Udayana here are Maṇikaṇṭha Miśra and Viśvanātha Nyāyapañcānana, whose comments are given below.

(*i*) Having quoted the remark of Udayana as given above, Manikaṇṭha Miśra criticizes it as follows :

तन्न, न हि दृष्टान्तस्य साधनविकलतामात्रेण हेतुरसाधारणो भवति, किन्तु सकलसपक्षव्यावृत्त्या, अन्यथा धूमवत्त्वादेरपि तथात्वप्रसङ्ग: । तत्रापि यदा दृष्टान्तत्वेनायोगोलकोऽभ्युपगम्यते, तदा भवत्येव साधनविकलता, न त्वसाधारण्यम् । तस्मात् प्रमाणान्तराभासानुकर्षणार्थश्चकार इत्यव गन्तव्यम । [NR, p. 245.]

(*ii*) Viśvnātha's remarks are as follows :

च: पुनरर्थे । हेत्वाभासा: पुनर्यथा येन रूपेण पूर्नमुक्तास्तेनैव रूपेण तेषां निग्रहस्थानत्वमिति न लक्षणान्तरभपेक्षितमिति ।

अत्र चकारस्य दृष्टान्ते साधनवैकल्यादिसमुच्चायकत्वमिति केचित् । तन्न, यथोक्ता इत्यस्याऽनन्वयापत्तेरिति । [NSV, p. 2200.]

The views of Vācaspati Miśra II on this controversial point could not be ascertained , as NTĀ on the aphorism हेत्वाभासाश्च यथोक्ता: is not available.

(544) After the aphorism हेत्वाभासाश्च यथोक्ताः, *Nyayasūtra-vivaraṇa* of Rādhāmohana Gosvāmi Bhattacārya reads another aphorism आम्नायार्थेत्यादि, which is not found in any other commentary. See NSVV pp. 343-344 for this aphorism and its explanation by Rādhāmohana.

Appendix I
List of authors, views and texts

Appendix II
List of quotations

Quotation	Source	Page No.
अग्निहोत्रं जुहुयात् स्वर्गकामः	[तैत्तिरीयब्राह्मणम्,२।१]	१११
अतन्निग्रहस्थाने तन्निग्रहस्थानोद्भावनम्	[न्यायपरिशिष्टम् ५।२।२२]	३६८
अथ परिव्राड्विवर्णवासा	[जावालोपनिषत् ५]	२४९
अनवस्थाभासः प्रसङ्गसमः	[न्यायपरिशिष्टम्,५।१।९]	२८६
अनिष्टधर्मेणेष्टापादनं मतानुज्ञा	[न्यायपरिशिष्टम्,५।२।२०]	३६६
अनुदिते जुहोति	[ ]	१०९
अनुविधेयस्थेयसभ्यपुरुषवती जनता सभा	[ ]	५३
अनैकान्तिकदेशनाभासेयम्	[न्यायवार्त्तिकम्,५।१।२]	२८२
अन्तेवासी वा जुहुयात्	[ ]	२४८
अप्रत्यक्षत्वप्रसङ्गात्	[बौद्धसूत्रम्]	९८
अप्रत्यक्षोपलम्भस्य नार्थदृष्टिः प्रसिध्यति	[प्रमाणविनिश्चयः]	३१९
अवयवान्तरावयविनो°	[बौद्धसूत्रम्]	९६
अभावाद्भावोत्पत्तिः	[न्या॰ सू॰ ४।१।१४]	२१०
अल्पाक्षरमसन्दिग्धं	[विष्णुधर्मोत्तर॰ ३।५।१]	७
आत्मसंयोगव्यतिरेक॰	[बौद्धसूत्रम्]	९७
आत्मा साक्षात्कर्तव्यः	[ ]	६
आप्यतैजसवायव्यानि	[न्यायभाष्यम् ३।१।२७]	१६२
इको यणचि	[अष्टाध्यायी ६।१।७७]	१३१
इति होक्त्वा याज्ञवल्क्यः प्रवव्राज	[बृहदारण्यकोपनिषत् ४।५।१५]	२१०
इदमहं पञ्चदशावरेण	[cp. शतपथब्राह्मण १।३।५]	११०
इयं सत्प्रतिपक्षदेशनाभासा	[न्यायपरिशिष्टम् ५।१।२]	२७९
उदिते जुहोति	[ ]	१०९
उपचयापचयप्रबन्धदर्शनात्	[न्यायभाष्यम् ३।१।३०]	१८०

Quotation	Source	Page No.
उपपन्नश्च तद्वियोगः कर्मक्षयोपपत्तेः	[न्यायभाष्यम् ३।२।९७]	२००
एकमेवाद्वितीयम्	[छान्दोग्य॰ ६।२।१]	२६८
एतत् सत्रं यदग्निहोत्रम्	[शतपथब्राह्मणम् १२।४।१।१]	२४६
एतस्य साभिधेयत्वान्निरर्थकासङ्करः	[न्यायपरिशिष्टम् ५।२।१०]	३५५
एष वा प्रथमो यज्ञानाम्	[cp. ताण्ड्यमहाब्राह्मणम् १३।१।२]	११२
कर्मभिर्मृत्युमृषयो निषेदुः	[वाजसनेयिसंहित्ता ३।१।१८]	२४८
कादाचित्की सभा वादे	[ ]	५३
कार्यत्वान्यत्वलेशेन	[दिङ्नागस्य]	३२७
कृत्स्नैकदेशावृत्ति॰	[न्यायसूत्र ४।२।७, treated by Rambhadra as a part of न्यायभाष्यम्]	२५५
कृ तृ रा स दिवा दर भूत दिवा	[राजमार्तण्डः, पृ॰९६]	३५७
गुरूत्वान्तरकार्याग्रहणात्	[बौद्धसूत्रम्]	९८
चत्वारः पथयो देवयानाः	[ ]	२४८
जरया ह वा एष	[शतपथब्राह्मणम् १२।४।१।१]	२४६
जातेः संक्षेपेनोक्तायाः	[न्यायवार्त्तिकम् ५।१।१]	२७८
जायमानो ह वै ब्राह्मणः	[तैत्तिरीयसंहिता ६।३।१०]	२४६
तज्जलानिति शान्त उपासीत	[छान्दोग्योपनिषत् ६।२।३]	२१८
तत्त्वबुभुत्सुकथा च वितण्डा चेति व्याहतम्	[तात्पर्यटीकापरिशुद्धिः १।१।३]	५७
तत्रात्मा तावत् प्रत्यक्षतो न गृह्यते	[न्यायभाष्यम् १।१।१०]	१६
तदत्यन्तविमोक्षोऽपवर्गः	[न्यायसूत्रम् १।१।२२]	२४६
तददृष्टकारितमिति चेत्	[Described by Rāmabhadra as a sentence of *Nyāyabhāṣya*. Vācaspati Miśra treats this as part of NS 3.2.68.]	२००

Quotation	Source	Page No.
तदुह स्म वै पूर्वे	[cp.बृहदारण्यकोपनिषत् ४।४।२२]	२५०
तन्निग्रहस्थानोद्भावनाभ्युपेत	[वर्द्धमानोपाध्यायस्य]	३६८
तमेव विदित्वाऽतिमृत्युमेति	[श्वेताश्वतरोपनिषत् ३।८,६।१५]	६
तस्माद्वा एतेन पुरा	[ ]	११२
तादृशसाधर्म्यादपि क्वचित्	[ ]	१०४
ताः खल्विमा जातयः	[न्यायभाष्यम् ५।१।१]	२७८
त्रयाणां पृथिव्यादीनां प्रत्यक्षत्व॰	[पदार्थधर्मसंग्रहः, साधर्म्यप्रकरणम्]	१६
त्रिः प्रथमामन्वाह	[cp.शतपथब्राह्मणम् १।३।५]	१०३,११०
त्वगवयवविशेषेण धूमोपलब्धिवत्	[न्यायभाष्यम् ३।१।५३]	१६८
द्रव्यान्तरगुणानां द्रव्यान्तर॰	[वौद्धसूत्रम्]	९७
द्रव्यान्तरेभ्यो द्रव्यान्तरानिष्पत्ते॰	[वौद्धसूत्रम]	९६
द्रव्यान्तरोत्पत्तिदेशा॰	[वौद्धसूत्रम]	९६
धातोरर्थान्तरे वृत्तेः	[वाक्यपदीयम् ३।७।८८]	३७७
न वादे प्राश्निकानामुपादानम्	[न्यायवार्तिकतात्पर्यटीका १।१।१]	५६
न हेत्वाभावादिति भाष्यम्	[न्यायवार्तिकतात्पर्यटीका ३।२।९]	१७८
नानेकान्तात्	[न्यायवार्तिकम् ३।२।९]	१७८
नासतो विद्यते भावः	[भगवद्गीता २।१६]	२४१
नित्यानित्यकारणश्चैकत्रोपपद्यत इत्युपपत्तिसमार्थः	[न्यायवार्तिकम् ५।१।२५]	३१२
निमित्तानुव्यञ्जनसंज्ञा॰	[cp.न्यायभाष्यम् ४।१।३]	२५३
नेन्द्रियार्थान्तरानुपलब्धेः	[न्यायभाष्यम् ३।१।५३]	१६८
नेह नानास्ति किञ्चन	[बृहदारण्यकोपनिषत् ४।४।१९]	१३८
पञ्चमी त्वन्वयसम्भवे जातिसामान्यलक्षणव्यवच्छिन्ना	[न्यायपरिशिष्टम् ५।१।२७]	३१४
पत्न्य उद्गायन्ति	[cp.ताण्ड्यमहाब्राह्मणम् २०।४।८] काठकसंहिता ३४।३	२४७

Quotation	Source	Page No.
पत्न्यवेक्षितमाज्यं भवति	[cp.तैत्तिरीयब्राह्मणम् ३।३।४।१]	२४७
परेण नाकं निहितं गुहायाम्	[तैत्तिरीय आरण्यकम् ३।१२।७]	२३८
पुत्रकामो यजेत	[ ]	२४३
पुनः स भविता कृष्णः	[ ]	२२१
पुनरुत्पत्तिः प्रेत्यभावः	[न्यायसूत्रम् १।१।१९]	१०६
पृथिव्यादीनां यथाविनियोगं गुणाः	[न्यायभाष्यम् १।१।१३]	२०
पृथिव्यां ते शरीरम्	[ ]	१६१
पृथिव्यां ते शरीरं स्पृणोमि	[ ]	१६१
प्रकृतिविवृद्धौ विकारविवृद्धेः	[न्यायसूत्रम् २।२।४०]	१३२
प्रतिग्रहेण धनमर्जयेत्	[ ]	३८०
प्रवृत्तिर्वाग्बुद्धिशरीरारम्भः	[न्यायसूत्रम् १।१।१७]	२०३
प्रसिद्धसाधर्म्यात् साध्यसाधनमुपमानम्	[न्यायसूत्रम् १।१।६]	१०४
प्राजापत्यामिष्टिं निरूप्य	[ ]	२४९
बाधनालक्षणं दुःखम्	[न्यायसूत्रम् १।१।२१]	२४४
ब्रह्मचर्यं समाप्य गृही भवेत्	[जाबालोपनिषत् ४]	२४६
ब्रह्मसंस्थोऽमृतत्वमेति	[छान्दोग्योपनिषत् २।१३।१]	२४९
ब्रह्मैवेदं सर्वम्	[मुण्डकोपनिषत् २।२।११]	२२८
ब्राह्मणो वै ब्राह्मणमुपधावति	[cp.साममन्त्रब्राह्मणम् १।४।१।४]	११२
भ्रमान्निग्रहस्थानोद्भावनं तत्	[ ]	३६८
मज्जामस्थ्नामथ प्लीहां	[cp.न्यायवार्तिकतात्पर्यटीका ४।२।३]	२५४
मय्येव सकलं जातं	[कैवल्योपनिषत् १९]	२२४, १२९
मृत्योः स मृत्युमाप्नोति	[बृहदारण्यकोपनिषत् ४।४।१९]	२३८
यदि चोपलभ्यमानं	[न्यायवार्तिकम् ४।२।३२]	२६६
रिक्तस्य जन्तोर्जातस्य	[प्रमाणवार्तिकम् ४।५४]	३७०
लघूनि सूचितार्थानि	[ ]	८

Quotation	Source	Page No.
वटे वटे यक्षः	[ ]	११५
वस्तुभेदे प्रसिद्धेऽपि	[प्रमाणवार्तिकम् १।१३]	३२७
विदेशस्थं पात्रमुद्दिश्य त्यक्ते	[ ]	३८०
विप्रतिपत्तिरप्रतिपत्तिश्च निग्रहस्थानम्	[न्यायसूत्रम् १।२।१९]	३२५
विवक्षातः कारकविभक्तयो नानाविधा भवन्ति	[ ]	३७९
व्याहतत्वादहेतुः	[न्यायभाष्यम् ३।२।५३]	१६८
शरीरादिषु फलव्यवहारो गौणः	[न्यायवार्तिकम् १।१।१३]	२८
शवलोऽस्याहुतिमभ्यवहरति	[ ]	१०९
श्यावशवलावस्याहुतिमभ्यवहरतः	[ ]	१०९
श्यावोऽस्याहुतिमभ्यवहरति	[ ]	१०९
सजातीयविजातीयनिष्ठाभाव॰	[न्यायनिवन्धप्रकाशे]	३१
सत्यन्यकर्तुरर्थान्तर॰	[बौद्धसूत्रम्]	९७
सन्धिग्धश्चाव्यतिरेकः	[न्यायभाष्यम् ३।१।५३]	१६८
सन्निहितानां तद्गुणोपलब्धेः	[न्यायवार्तिकम् ३।१।३०]	१६०
समयाध्युषिते जुहोति	[ ]	१०९
सम्बद्धं वर्त्तमानञ्च	[श्लोकवार्तिकम्, प्रत्यक्ष ८४]	१९३
संयोगप्राप्त्यभावात्	[बौद्धसूत्रम्]	९८
सर्वं खल्विदं ब्रह्म	[छान्दोग्योपनिषत् ३।१४।१]	२१८
सन्निहितानां तद्गुणोपलब्धेः	[न्यायवार्तिकम् ३।१।३०]	१६०
स्वयमेव दह्यमान॰	[कुट्टनीमतम् ४।४]	२५४
संयोगस्याप्रतिषेधात् सन्निहितानाम्	[न्यायभाष्यम् ३।१।३०]	१६०
साध्येनानुगमात् कार्य॰	[प्रमाणवार्तिकम् १।१६]	३२७

Quotation	Source	Page No.
सुखदुःखसंवेदनं फलम्	[न्यायभाष्यम् १।१।१९]	२८
सूर्यं ते चक्षुर्गच्छतात्	[ ]	१६१
सूर्यं ते चक्षुः स्पृणोमि	[ ]	१६१
स्मृत्यनुमानागमसंशयप्रतिभा॰	[न्यायभाष्यम् १।१।१५]	२४
हुत्वा वपामेवाग्रेऽभिधारयन्ति	[cp.शतपथब्राह्मणम् ३।८।२]	११२

Appendix III
Index of technical terms

Appendix IV

Index of *Nyāyasūtras* according to Rāmabhadra and Jānakīnātha

॥ प्रथमाध्यायस्य प्रथमाह्निकम् ॥

प्रमाणप्रमेयसंशयप्रयोजनदृष्टान्तसिद्धान्तावयवतर्कनिर्णयवादजल्पवितण्डाहेत्वाभासच्छलजातिनिग्रहस्थानानां तत्त्वज्ञानान्निःश्रेयसाधिगमः ॥ १ ॥ १ ॥

दुःखजन्मप्रवृत्तिदोषमिथ्याज्ञानानामुत्तरोत्तरापाये तदनन्तराभावादपवर्गः ॥ २ ॥ २ ॥

॥ इति प्रथमप्रकरणम् ॥

प्रत्यक्षानुमानोपमानशब्दाः प्रमाणानि ॥ ३ ॥ ३ ॥

इन्द्रियार्थसन्निकर्षोत्पन्नं ज्ञानमव्यपदेश्यमव्यभिचारि व्यवसायात्मकं प्रत्यक्षम् ॥ ४ ॥ ४ ॥

अथ तत्पूर्वकं त्रिविधमनुमानं पूर्ववच्छेषवत् सामान्यतो दृष्टञ्च ॥ ५ ॥ ५ ॥

प्रसिद्धसाधर्म्यात् साध्यसाधनमुपमानम् ॥ ६ ॥ ६ ॥

आप्तोपदेशः शब्दः ॥ ७ ॥ ७ ॥

॥ इति प्रमाणलक्षणप्रकरणम् ॥

आत्मशरीरेन्द्रियार्थबुद्धिमनःप्रवृत्तिदोषप्रेत्यभावफलदुःखापवर्गास्तु प्रमेयम् ॥ ८ ॥ ८ ॥

इच्छाद्वेषप्रयत्नसुखदुःखज्ञानान्यात्मनो लिङ्गम् ॥ ९ ॥ ९ ॥

चेष्टेन्द्रियार्थाश्रयः शरीरम् ॥ १० ॥ १० ॥

घ्राणरसनचक्षुस्त्वक्श्रोत्राणीन्द्रियाणि भूतेभ्यः ॥ ११ ॥ ११ ॥

गन्धरसरूपस्पर्शशब्दाः पृथिव्यादिगुणास्तदर्थाः ॥ १२ ॥ १२ ॥

बुद्धिरुपलब्धिर्ज्ञानमित्यनर्थान्तरम् ॥ १३ ॥ १३ ॥

युगपज्ज्ञानानुत्पत्तिर्मनसो लिङ्गम् ॥ १४ ॥ १४ ॥

प्रवृत्तिर्वाग्बुद्धिशरीरारम्भः ॥ १५ ॥ १५ ॥

प्रवर्तनालक्षणा दोषाः ॥ १६ ॥ १६ ॥

पुनरुत्पत्तिः प्रेत्यभावः ॥ १७ ॥ १७ ॥

प्रवृत्तिदोषजनितोऽर्थ फलम् ॥ १८ ॥ १८ ॥

बाधनालक्षणं दुःखम् ॥ १९ ॥ १९ ॥

तदत्यन्तविमोक्षोऽपवर्गः ॥ २० ॥ २० ॥

॥ इति प्रमेयप्रकरणम् ॥

समानानेकधर्मोपपत्तेर्विप्रतिपत्तेरूपलब्ध्यनुपलब्ध्यव्यवस्थातश्चविशेषापेक्षो विमर्शः संशयः ॥ २१ ॥ २१ ॥

यमर्थमधिकृत्य प्रवर्तते तत् प्रयोजनम् ॥ २२ ॥ २२ ॥

लौकिकपरीक्षकाणां यस्मिन्नर्थे बुद्धिसाम्यं स दृष्टान्तः ॥ २३ ॥ २३ ॥

॥ इति न्यायपूर्वाङ्गप्रकरणम् ॥

तन्त्राधिकरणाभ्युपगमसंस्थितिः सिद्धान्तः ॥ २४ ॥ २४ ॥

स चतुर्विधः सर्वतन्त्रप्रतितन्त्राधिकरणाभ्युपगमसंस्थित्यर्थान्तरभावात् ॥ २५ ॥ २५ ॥

सर्वतन्त्राविरुद्धस्तन्त्रेऽधिकृतोऽर्थः सर्वतन्त्रसिद्धान्तः ॥ २६ ॥ २६ ॥

समानतन्त्रसिद्धः परतन्त्रासिद्धः प्रतितन्त्रसिद्धान्तः ॥ २७ ॥ २७ ॥

यत्सिद्धावन्यप्रकरणसिद्धिः सोऽधिकरणसिद्धान्तः ॥ २८ ॥ २८ ॥

अपरीक्षिताभ्युपगमात्तद्विशेषपरीक्षणमभ्युपगमसिद्धान्तः ॥ २९ ॥ २९ ॥

॥ इति न्यायाश्रयप्रकणम् ॥

प्रतिज्ञाहेतूदाहरणोपनयनिगमनान्यवयवाः ॥ ३० ॥ ३० ॥

साध्यनिर्देशः प्रतिज्ञा ॥ ३१ ॥ ३१ ॥

उदाहरणसाधर्म्यात् साध्यसाधनं हेतुः ॥ ३२ ॥ ३२ ॥

तथा वैधर्म्यात् ॥ ३३ ॥ ३३ ॥

साध्यसाधर्म्यात्तद्धर्मभावी दृष्टान्त उदाहरणम् ॥ ३४ ॥ ३४ ॥

तद्विपर्ययाद् वा विपरीतम् ॥ ३५ ॥ ३५ ॥

उदाहरणापेक्षस्तथेत्युपसंहारो न तथेति वा साध्यस्योपनयः ॥ ३६ ॥ ३६ ॥

हेत्वपदेशात् प्रतिज्ञायाः पुनर्वचनं निगमनम् ॥ ३७ ॥ ३७ ॥

॥ इति न्यायस्वरूपप्रकरणम् ॥

अविज्ञाततत्त्वेऽर्थे कारणोपपत्तितस्तत्त्वज्ञानार्थमूहस्तर्कः ॥ ३८ ॥ ३८ ॥

विमृश्य पक्षप्रतिपक्षाभ्यामर्थावधारणं निर्णयः ॥ ३९ ॥ ३९ ॥

॥ इति न्यायोत्तराङ्गप्रकरणम् ॥

॥ इति प्रथमाध्यायस्य प्रथमाह्निकम् ॥

प्रमाणतर्कसाधनोपालम्भः सिद्धान्ताविरुद्धः पञ्चावयवोपपन्नः पक्षप्रतिपक्षपरिग्रहो वादः ॥ १ ॥ ४० ॥

यथोक्तोपपन्नश्छलजातिनिग्रहस्थानसाधनोपालम्भो जल्पः ॥ २ ॥ ४१ ॥

स प्रतिपक्षस्थापनाहीनो वितण्डा ॥ ३ ॥ ४२ ॥

॥ इति कथाप्रकरणम् ॥

सव्यभिचारविरुद्धप्रकरणसमसाध्यसमातीतकाला हेत्वाभासाः ॥ ४ ॥ ४३ ॥

अनैकान्तिकः सव्यभिचारः ॥ ५ ॥ ४४ ॥

सिद्धान्तमभ्युपेत्य तद्विरोधी विरुद्धः ॥ ६ ॥ ४५ ॥

यस्मात् प्रकरणचिन्ता स निर्णयार्थमपदिष्टः प्रकरणसमः ॥ ७ ॥ ४६ ॥

साध्याविशिष्टः साध्यत्वात् साध्यसमः ॥ ८ ॥ ४७ ॥

कालात्ययापदिष्टः कालातीतः ॥ ९ ॥ ४८ ॥

॥ इति हेत्वाभासप्रकरणम् ॥

वचनविघातोऽर्थविकल्पोपपत्त्या छलम् ॥ १० ॥ ४९ ॥

तत् त्रिविधं वाक्छलं सामान्यच्छलमुपचारच्छलञ्च ॥ ११ ॥ ५० ॥

अविशेषाभिहितेऽर्थे वक्तुरभिप्रायादर्थान्तरकल्पना वाक्छलम् ॥ १२ ॥ ५१ ॥

सम्भवतोऽर्थस्यातिसामान्ययोगादसम्भूतार्थकल्पना सामान्यच्छलम्

॥ १३ ॥ ५२ ॥

धर्मविकल्पनिर्देशे अर्थसद्भावप्रतिषेध उपचारच्छलम् ॥ १४ ॥ ५३ ॥

वाक्छलमेवोपचारच्छलं तदविशेषात् ॥ १५ ॥ ५४ ॥

न तदर्थान्तरभावात् ॥ १६ ॥ ५५ ॥

अविशेषे वा किञ्चित्साधर्म्यादेकच्छलत्वप्रसङ्गः ॥ १७ ॥ ५६ ॥

॥ इति छलप्रकरणम् ॥

साधर्म्यवैधर्म्याभ्यां प्रत्यवस्थानं जातिः ॥ १८ ॥ ५७ ॥

विप्रतिपत्तिरप्रतिपत्तिश्च निग्रहस्थानम् ॥ १९ ॥ ५८ ॥

तद्विकल्पाज्जातिनिग्रहस्थानबहुत्वम् ॥ २० ॥ ५९ ॥

॥ इति दूषणाभिप्रायप्रयुक्तदोषप्रकरणम् ॥

॥ इति प्रथमाध्यायस्य द्वितीयाह्निकम् ॥

॥ इति प्रथमाध्यायः ॥

॥ द्वितीयाध्यायस्य प्रथमाह्निकम् ॥

समानानेकधर्माध्यवसायादन्यतरधर्माध्यवसायाद्वा न संशयः १ ॥ ६० ॥

विप्रतिपत्त्यव्यवस्थाध्यवसायाच्च ॥ २ ॥ ६१ ॥

विप्रतिपत्तौ च संप्रतिपत्तेः ॥ ३ ॥ ६२ ॥

अव्यवस्थात्मनि व्यवस्थितत्वाच्चाव्यवस्थायाः ॥ ४ ॥ ६३ ॥

तथात्यन्तसंशयस्तद्धर्मसातत्योपपत्तेः ॥ ५ ॥ ६४ ॥

यथोक्ताध्यवसायादेव तदविशेषापेक्षात् संशये नासंशयो नात्यन्तसंशयो वा ॥ ६ ॥ ६५ ॥

यत्र संशयस्तत्रैवमुत्तरोत्तरप्रसङ्गः ॥ ७ ॥ ६६ ॥

॥ इति संशयपरीक्षाप्रकरणम् ॥

प्रत्यक्षादीनामप्रामाण्यं त्रैकाल्यासिद्धेः ॥ ८ ॥ ६७ ॥

पूर्वं हि प्रमाणसिद्धौ नेन्द्रियार्थसन्निकर्षात् प्रत्यक्षोत्पत्तिः ॥९॥६८॥

पश्चात्सिद्धौ न प्रमाणेभ्यः प्रमेयसिद्धिः ॥ १० ॥ ६९ ॥

युगपत्सिद्धौ प्रत्यर्थनियतत्वात् क्रमवृत्तित्वाभावो बुद्धीनाम् ॥११॥७०॥

त्रैकाल्यासिद्धेः प्रतिषेधानुपपत्तिः ॥ १२ ॥ ७१ ॥

सर्वप्रमाणप्रतिषेधाच्च प्रतिषेधासिद्धिः ॥ १३ ॥ ७२ ॥

तत्प्रामाण्ये वा न सर्वप्रमाणप्रतिषेधः ॥ १४ ॥ ७३ ॥

शब्दादातोद्यसिद्धिवत् तत्सिद्धिः ॥ १५ ॥ ७४ ॥

प्रमेया च तुलाप्रामाण्यवत् ॥ १६ ॥ ७५ ॥

प्रमाणतः सिद्धेः प्रमाणानां प्रमाणान्तरसिद्धिप्रसङ्गः ॥ १७ ॥ ७६ ॥

तन्निवृत्तेर्वा प्रमाणसिद्धिवत् प्रमेयसिद्धिः ॥ १८ ॥ ७७ ॥

प्रदीपप्रकाशसिद्धिवत् तत्सिद्धिः ॥ १९ ॥ ७८ ॥

क्वचित् तन्निवृत्तिदर्शनादनिवृत्तिदर्शनाच्च क्वचिदनैकान्तिकः ॥ २० ॥ ७९ ॥

विशेषहेतुपरिग्रहे सत्युपसंहाराभ्यनुज्ञानादप्रतिषेधः ॥ २१ ॥ ८० ॥

॥ इति प्रमाणसामान्यपरीक्षाप्रकरणम् ॥

प्रत्यक्षलक्षणानुपपत्तिरसमग्रवचनात् ॥ २२ ॥ ८१ ॥

नात्ममनसोः सन्निकर्षाभावे प्रत्यक्षोत्पत्तिः ॥ २३ ॥ ८२ ॥

दिग्देशकालाकाशेष्वप्येवं प्रसङ्गः ॥ २४ ॥ ८३ ॥

ज्ञानलिङ्गत्वादात्मनो नानवरोधः ॥ २५ ॥ ८४ ॥

तदयौगपद्यलिङ्गत्वाच्च न मनसः ॥ २६ ॥ ८५ ॥

प्रत्यक्षनिमित्तत्वाच्चेन्द्रियार्थयोः सन्निकर्षस्य पृथग्वचनम् ॥ २७ ॥ ८६ ॥

सुप्तव्यासक्तमनसाञ्चेन्द्रियार्थयोः सन्निकर्षनिमित्तत्वात् ॥ २८ ॥ ८७ ॥

तैश्चापदेशो ज्ञानविशेषाणाम् ॥ २९ ॥ ८८ ॥

व्याहतत्वादहेतुः ॥ ३० ॥ ८९ ॥

नार्थविशेषप्राधान्यात् ॥ ३१ ॥ ९० ॥

प्रत्यक्षमनुमानमेकदेशग्रहणादुपलब्धेः ॥ ३२ ॥ ९१ ॥

न प्रत्यक्षेण यावत्तावतोऽप्युपलम्भात् ॥ ३३ ॥ ९२ ॥

न चैकदेशोपलब्धिरवयविसद्भावात् ॥ ३४ ॥ ९३ ॥

॥ इति प्रत्यक्षपरीक्षाप्रकरणम् ॥

साध्यत्वादवयविनि सन्देहः ॥ ३५ ॥ ९४ ॥

सर्वाग्रहणमवयव्यसिद्धेः ॥ ३६ ॥ ९५ ॥

धारणाकर्षणोपपत्तेः ॥ ३७ ॥ ९६ ॥

सेनावनादिवद्ग्रहणमिति चेन्नातीन्द्रियत्वादणूनाम् ॥ ३८ ॥ ९७ ॥

॥ इत्यवयविपरीक्षाप्रकरणम् ॥

रोधोपघातसादृश्येभ्यो व्यभिचारादनुमानमप्रमाणम् ॥ ३९ ॥ ९८ ॥

नैकदेशत्राससादृश्येभ्योऽर्थान्तरभावात् ॥ ४० ॥ ९९ ॥

॥ इत्यनुमानपरीक्षाप्रकरणम् ॥

वर्तमानाभावः पततः पतितपतितव्यकालोपपत्तेः ॥ ४१ ॥ १०० ॥

तयोरप्यभावो वर्तमानाभावे तदपेक्षत्वात् ॥ ४२ ॥ १०१ ॥

नातीतानागतयोरितरेतरापेक्षासिद्धिः ॥ ४३ ॥ १०२ ॥

वर्तमानाभावे सर्वाग्रहणं प्रत्यक्षानुपपत्तेः ॥ ४४ ॥ १०३ ॥

कृतताकर्तव्यतोपपत्तेस्तूभयथा ग्रहणम् ॥ ४५ ॥ १०४ ॥

॥ इति वर्तमानकालपरीक्षाप्रकरणम् ॥

अत्यन्तप्रायैकदेशसाधर्म्यादुपमानासिद्धिः ॥ ४६ ॥ १०५ ॥

प्रसिद्धसाधर्म्यादुपमानसिद्धेर्यथोक्तदोषानुपपत्तिः ॥ ४७ ॥ १०६ ॥

प्रत्यक्षेणाप्रत्यक्षसिद्धेः ॥ ४८ ॥ १०७ ॥

नाप्रत्यक्षे गवये प्रमाणार्थमुपमानस्य पश्यामः ॥ ४९ ॥ १०८ ॥

तथेत्युपसंहारादुपमानसिद्धेर्नाविशेषः ॥ ५० ॥ १०९ ॥

॥ इत्युपमानपरीक्षाप्रकरणम् ॥

शब्दोऽनुमानमर्थस्यानुपलब्धेरनुमेयत्वात् ॥ ५१ ॥ ११० ॥

उपलब्धेरद्विप्रवृत्तित्वात् ॥ ५२ ॥ १११ ॥

सम्बन्धाच्च ॥ ५३ ॥ ११२ ॥

आप्तोपदेशसामर्थ्याच्छब्दादर्थे सम्प्रत्ययः ॥ ५४ ॥ ११३ ॥

पूरणप्रदाहपाटनानुपपत्तेश्च सम्बन्धाभावः ॥ ५५ ॥ ११४ ॥

शब्दार्थव्यवस्थानादप्रतिषेधः ॥ ५६ ॥ ११५ ॥

न सामयिकत्वात् शब्दार्थसम्प्रत्ययस्य ॥ ५७ ॥ ११६ ॥

जातिविशेषे चानियमात् ॥ ५८ ॥ ११७ ॥

॥ इति शब्दसामान्यपरीक्षाप्रकरणम् ॥

तदप्रामाण्यमनृतव्याघातपुनरुक्तदोषेभ्यः ॥ ५९ ॥ ११८ ॥

न कर्तृकर्मसाधनवैगुण्यात् ॥ ६० ॥ ११९ ॥

अभ्युपेत्य कालभेदे दोषवचनात् ॥ ६१ ॥ १२० ॥

अनुवादोपपत्तेश्च ॥ ६२ ॥ १२१ ॥

वाक्यविभागस्य चार्थग्रहणात् ॥ ६३ ॥ १२२ ॥

विध्यर्थवादानुवादवचनविनियोगात् ॥ ६४ ॥ १२३ ॥

विधिर्विधायकः ॥ ६५ ॥ १२४ ॥

स्तुतिर्निन्दा परकृतिः पुराकल्प इत्यर्थवादः ॥ ६६ ॥ १२५ ॥

विधिविहितस्यानुवचनमनुवादः ॥ ६७ ॥ १२६ ॥

नानुवादपुनरुक्तयोर्विशेषः शब्दाभ्यासोपपत्तेः ॥ ६८ ॥ १२७ ॥

शीघ्रतरगमनोपदेशवदभ्यासान्नाविशेषः ॥ ६९ ॥ १२८ ॥

मन्त्रायुर्वेदप्रामाण्यवच्च तत्प्रामाण्यमाप्तप्रामाण्यात् ॥ ७० ॥ १२९ ॥

॥ इति शब्दविशेषपरीक्षाप्रकरणम् ॥

॥ इति द्वितीयाध्यायस्य प्रथमाह्निकम् ॥

॥ द्वितीयाध्यायस्य द्वितीयाह्निकम् ॥

न चतुष्ट्वमैतिह्यार्थापत्तिसम्भवाभावप्रामाण्यात् ॥ १ ॥ १३० ॥

शब्द ऐतिह्यानर्थान्तरभावादनुमानेऽर्थापत्तिसम्भवाभावानामनर्थान्तरभावाच्चाप्रतिषेधः ॥ २ ॥ १३१ ॥

अर्थापत्तिरप्रमाणमनैकान्तिकत्वात् ॥ ३ ॥ १३२ ॥

नानर्थापत्तावर्थापत्त्यभिमानात् ॥ ४ ॥ १३३ ॥

प्रतिषेधाप्रामाण्यञ्चानैकान्तिकत्वात् ॥ ५ ॥ १३४ ॥

तत्प्रामाण्ये वा नार्थापत्त्यप्रामाण्यम् ॥ ६ ॥ १३५ ॥

नाभावप्रामाण्यं प्रमेयासिद्धेः ॥ ७ ॥ १३६ ॥

लक्षितेष्वलक्षणलक्षितत्वादलक्षितानां तत्प्रमेयसिद्धिः ॥ ८ ॥ १३७ ॥

असत्यर्थे नाभाव इति चेन्नान्यलक्षणोपपत्तेः ॥ ९ ॥ १३८ ॥

तत्सिद्धेरलक्षितेष्वहेतुः ॥ १० ॥ १३९ ॥

न लक्षणावस्थितापेक्षसिद्धेः ११ ॥ १४० ॥

प्रागुत्पत्तेरभावोपपत्तेः ॥ १२ ॥ १४१ ॥

॥ इति प्रमाणचतुष्ट्वपरीक्षाप्रकरणम् ॥

आदिमत्त्वादैन्द्रियकत्वात् कृतकवदुपचाराच्च ॥ १३ ॥ १४२ ॥

न घटाभावसामान्यनित्यत्वान्नित्येष्वप्यनित्यवदुपचाराच्च ॥ १४ ॥ १४३॥

तत्त्वभाक्तयोर्नानात्वस्य विभागादव्यभिचारः ॥ १५ ॥ १४४ ॥

सन्तानानुमानविशेषणात् ॥ १६ ॥ १४५ ॥

कारणद्रव्यस्य प्रदेशशब्देनाभिधानात् ॥ १७ ॥ १४६ ॥

प्रागुच्चारणादनुपलब्धेरावरणाद्यनुपलब्धेश्च ॥ १८ ॥ १४७ ॥

तदनुपलब्धेरनुपलम्भादावरणोपपत्तिः ॥ १९ ॥ १४८ ॥

अनुपलम्भादप्यनुपलब्धेः सद्भाववदावरणानुपपत्तिरुपलब्धेः ॥ २० ॥ १४९ ॥

अनुपालम्भकत्वादनुपलब्धेरहेतुः ॥ २१ ॥ १५० ॥

अस्पर्शत्वात् ॥ २२ ॥ १५१ ॥

न कर्मानित्यत्वात् ॥ २३ ॥ १५२ ॥

नाणुनित्यत्वात् ॥ २४ ॥ १५३ ॥

सम्प्रदानात् ॥ २५ ॥ १५४ ॥

तदन्तरालानुपलब्धेरहेतुः ॥ २६ ॥ १५५ ॥

अध्यापनादप्रतिषेधः ॥ २७ ॥ १५६ ॥

उभयोः पक्षयोरन्यतरस्याध्यापनादप्रतिषेधः ॥ २८ ॥ १५७ ॥

अभ्यासात् ॥ २९ ॥ १५८ ॥

नान्यत्वेऽप्यभ्यासस्योपचारात् ॥ ३० ॥ १५९ ॥

अन्यदन्यस्मादन्यत्वादन्यदित्यन्यताभावः ॥ ३१ ॥ १६० ॥

तदभावे नास्त्यनन्यताऽपि तयोरितरेतरापेक्षसिद्धेः ॥ ३२ ॥ १६१ ॥

विनाशकारणानुपलब्धेः ॥ ३३ ॥ १६२ ॥

अश्रवणकारणानुपलब्धेः सततश्रवणप्रसङ्गः ॥ ३४ ॥ १६३ ॥

उपलभ्यमाने चानुपलब्धेरसत्त्वादनपदेशः ॥ ३५ ॥ १६४ ॥

पाणिनिमित्तप्रश्लेषाच्छब्दाभावे नानुपलब्धिः ॥ ३६ ॥ १६५ ॥

अस्पर्शत्वादप्रतिषेधः ॥ ३७ ॥ १६६ ॥

विभक्त्यन्तरोपपत्तेश्च समासे ॥ ३८ ॥ १६७ ॥

॥ इति शब्दानित्यत्वप्रकरणम् ॥

विकारादेशोपदेशात् संशयः ॥ ३९ ॥ १६८ ॥

प्रकृतविवृद्धौ विकारविवृद्धेः ॥ ४० ॥ १६९ ॥

न्यूनसमाधिकोपलब्धेर्विकाराणामहेतुः ॥ ४१ ॥ १७० ॥

द्विविधस्यापि हेतोरभावादसाधनं दृष्टान्तः ॥ ४२ ॥ १७१ ॥

नातुल्यप्रकृतीनां विकारविकल्पात् ॥ ४३ ॥ १७२ ॥

द्रव्यविकारवैषम्यवद्वर्णविकारविकल्पः ॥ ४४ ॥ १७३ ॥

न विकारधर्मानुपपत्तेः ॥ ४५ ॥ १७४ ॥

विकारप्राप्तानामपुनरापत्तेः ॥ ४६ ॥ १७५ ॥

सुवर्णादीनां पुनरापत्तेरहेतुः ॥ ४७ ॥ १७६ ॥

तद्विकाराणां सुवर्णभावाव्यतिरेकात् ॥ ४८ ॥ १७७ ॥

वर्णत्वाव्यतिरेकाद्वर्णविकाराणामप्रतिषेधः ॥ ४९ ॥ १७८ ॥

सामान्यवतो धर्मयोगो न सामान्यस्य ॥ ५० ॥ १७९ ॥

नित्यत्वेऽविकारादनित्यत्वे चानवस्थानात् ॥ ५१ ॥ १८० ॥

नित्यानामतीन्द्रियत्वाद्धर्मविकल्पाच्च वर्णविकाराणामप्रतिषेधः ॥ ५२ ॥ १८१ ॥

अनवस्थायित्वे च वर्णोपलब्धिवद्विकारोपपत्तिः ॥ ५३ ॥ १८२ ॥

विकारधर्मित्वे नित्यत्वाभावात् कालान्तरे विकारोपपत्तेश्चाप्रतिषेधः ॥ ५४ ॥ १८३ ॥

प्रकृत्यनियमाद्वर्णविकाराणाम् ॥ ५५ ॥ १८४ ॥

अनियमे नियमान्नानियमः ॥ ५६ ॥ १८५ ॥

नियमानियमविरोधादनियमे नियमाच्चाप्रतिषेधः ॥ ५७ ॥ १८६ ॥

गुणान्तरापत्त्युपमर्दह्रासवृद्धिलेशश्लेषेभ्यस्तु वर्णविकारोपपत्तेर्वर्णविकाराः ॥ ५८ ॥ १८७ ॥

॥ इति परिणामप्रकरणम् ॥

ते विभक्त्यन्ताः पदम् ॥ ५९ ॥ १८८ ॥

व्यक्त्याकृतिजातिसन्निधानुपचारात् संशयः ॥ ६० ॥ १८९ ॥

याशब्दसमूहत्यागपरिग्रहसंख्यावृद्ध्यपचयवर्णसमासानुबन्धानां व्यक्ता-
वुपचारात् व्यक्तिः ॥ ६१ ॥ १९० ॥

तदनवस्थानात् ॥ ६२ ॥ १९१ ॥

सहचरणस्थानतादर्थ्यवृत्तमानधारणसामीप्ययोगसाधनाधिपत्येभ्यो
ब्राह्मणमञ्चकटराजसक्तुचन्दनगङ्गाशकटान्नपुरुषेष्वतद्भावेऽपि तदुपचारः
॥ ६३ ॥ १९२ ॥

आकृतिस्तदपेक्षत्वात् सत्त्वव्यवस्थानसिद्धेः ॥ ६४ ॥ १९३ ॥

व्यक्त्याकृतियुक्तेऽप्यप्रसङ्गात् प्रोक्षणादीनां मृद्गवके जातिः
॥ ६५ ॥ १९४ ॥

नाकृतिव्यक्त्यपेक्षत्वाज्जात्यभिव्यक्तेः ॥ ६६ ॥ १९५ ॥

व्यक्त्याकृतिजातयस्तु पदार्थः ॥ ६७ ॥ १९६ ॥

व्यक्तिर्गुणविशेषाश्रयो मूर्त्तिः ॥ ६८ ॥ १९७ ॥

आकृतिर्जातिलिङ्गाख्या ॥ ६९ ॥ १९८ ॥

समानप्रसवात्मिका जातिः ॥ ७० ॥ १९९ ॥

॥ इति शब्दशक्तिपरीक्षाप्रकरणम् ॥

॥ इति द्वितीयाध्यायस्य विभागपरीक्षाद्वारकसाङ्गप्रमाण-
परीक्षणं नाम द्वितीयाह्निकम् ॥

॥ इति द्वितीयाध्यायः ॥

॥ तृतीयाध्यायस्य प्रथमाह्निकम् ॥

दर्शनस्पर्शनाभ्यामेकार्थग्रहणात् ॥ १ ॥ २०० ॥

न विषयव्यवस्थानात् ॥ २ ॥ २०१ ॥

तद्व्यवस्थानादेवात्मसद्भावान्नात्मप्रतिषेधः ॥ ३ ॥ २०२ ॥

॥ इति इन्द्रियभेदप्रकरणम् ॥

शरीरदाहे पातकाभावात् ॥ ४ ॥ २०३ ॥

तदभावः सात्मकप्रदाहेऽपि तन्नित्यत्वात् ॥ ५ ॥ २०४ ॥

न कार्याश्रयकर्त्तृबधात् ॥ ६ ॥ २०५ ॥

॥ इति शरीरभेदप्रकरणम् ॥

सव्यदृष्टस्येतरेण प्रत्यभिज्ञानात् ॥ ७ ॥ २०६ ॥

नैकस्मिन्नासास्थिव्यवहिते द्वित्वाभिमानात् ॥ ८ ॥ २०७ ॥

एकविनाशे द्वितीयाविनाशान्नैकत्वम् ॥ ९ ॥ २०८ ॥

अवयवनाशेऽप्यवयव्युपलब्धेरहेतुः ॥ १० ॥ २०९ ॥

दृष्टान्तविरोधादप्रतिषेधः ॥ ११ ॥ २१० ॥

इन्द्रियान्तरविकारात् ॥ १२ ॥ २११ ॥

न स्मृतेः स्मर्त्तव्यविषयत्वात् ॥ १३ ॥ २१२ ॥

तदात्मगुणत्वसद्भावादप्रतिषेधः ॥ १४ ॥ २१३ ॥

॥ इति चक्षुरद्वैतप्रकरणम् ॥

नात्मप्रतिपत्तिहेतूनां मनसि सम्भवात् ॥ १५ ॥ २१४ ॥

ज्ञातुर्ज्ञानसाधनोपपत्तेः संज्ञाभेदमात्रम् ॥ १६ ॥ २१५ ॥

नियमश्च निरनुमानः ॥ १७ ॥ २१६ ॥

॥ इति मनोभेदप्रकरणम् ॥

पूर्वाभ्यस्तस्मृत्यनुबन्धाज्जातस्य हर्षशोकसंप्रतिपत्तेः ॥ १८ ॥ २१७ ॥

पद्मादिषु प्रबोधसंमीलनवत्तद्विकारः ॥ १९ ॥ २१८ ॥

नोष्णशीतवर्षाकालनिमित्तत्वात् पञ्चात्मकविकाराणाम् ॥ २० ॥ २१९ ॥

प्रेत्याहाराभ्यासकृतात् स्तन्याभिलाषात् ॥ २१ ॥ २२० ॥

अयसोऽस्कान्ताभिगमनवत्तदुपसर्पणम् ॥ २२ ॥ २२१ ॥

नान्यत्र प्रवृत्त्यभावात् ॥ २३ ॥ २२२ ॥

वीतरागजन्मादर्शनात् ॥ २४ ॥ २२३ ॥

सगुणद्रव्योत्पत्तिवत्तदुत्पत्तिः ॥ २५ ॥ २२४ ॥

न सङ्कल्पनिमित्तत्वाद् रागादीनाम् ॥ २६ ॥ २२५ ॥

॥ इति अनादिनिधनत्वसिद्धिप्रकरणम् ॥

पार्थिवं गुणान्तरोपलब्धेः ॥ २७ ॥ २२६ ॥

पार्थिवाप्यतैजसं तद्गुणोपलब्धेः ॥ २८ ॥ २२७ ॥

निःश्वासोच्छ्वासोपलब्धेश्चातुर्भौतिकम् ॥ २९ ॥ २२८ ॥

गन्धक्लेदपाकव्यूहावकाशदानेभ्यः पाञ्चभौतिकम् ॥ ३० ॥ २२९ ॥

श्रुतिप्रामाण्याच्च ॥ ३१ ॥ २३० ॥

॥ इति शरीरपरीक्षाप्रकरणम् ॥

कृष्णसारे सत्युपलम्भाद् व्यतिरिच्य चोपलम्भात् संशयः ॥ ३२ ॥ २३१॥

महदणुग्रहणात् ॥ ३३ ॥ २३२ ॥

रश्म्यर्थसन्निकर्षविशेषात्तद्ग्रहणम् ॥ ३४ ॥ २३३ ॥

तदनुपलब्धेरहेतुः ॥ ३५ ॥ २३४ ॥

नानुमीयमानस्य प्रत्यक्षतोऽनुपलब्धिरभावहेतुः ॥ ३६ ॥ २३५ ॥

द्रव्यगुणधर्मभेदाच्चोपलब्धिनियमः ॥ ३७ ॥ २३६ ॥

कर्मकारितश्चेन्द्रियाणां व्यूहः पुरुषार्थतन्त्रः ॥ ३८ ॥ २३७ ॥

मध्यन्दिनोल्काप्रकाशानुपलब्धिवत्तदनुपलब्धिः ॥ ३९ ॥ २३८ ॥

न रात्रावप्यनुपलब्धेः ॥ ४० ॥ २३९ ॥

बाह्यप्रकाशानुग्रहाद्विषयोपलब्धेरनभिव्यक्तितोऽनुपलब्धिः ॥ ४१ ॥ २४० ॥

अभिव्यक्तौ चाभिभवात् ॥ ४२ ॥ २४१ ॥

नक्तञ्चरनयनरश्मिदर्शनाच्च ॥ ४३ ॥ २४२ ॥

अप्राप्यग्रहणं काचाभ्रपटलस्फटिकाद्यन्तरितोपलब्धेः ॥ ४४ ॥ २४३ ॥

कुड्यान्तरितानुपलब्धेरप्रतिषेधः ॥ ४५ ॥ २४४ ॥

अप्रतिघातात् सन्निकर्षोपपत्तिः ॥ ४६ ॥ २४५ ॥

आदित्यरश्मेः स्फटिकान्तरितेऽपि दाह्येऽभिघातात् ॥ ४७ ॥ २४६ ॥

नेतरेतरधर्मप्रसङ्गात् ॥ ४८ ॥ २४७ ॥

आदर्शोदकयोः प्रसादस्वाभाव्याद्रूपोपलब्धिवत्तदुपलब्धिः ॥ ४९ ॥ २४८॥

दृष्टानुमितानां हि नियोगप्रतिषेधानुपपत्तिः ॥ ५० ॥ २४९ ॥

॥ इति इन्द्रियपरीक्षाप्रकरणम् ॥

स्थानान्यत्वे नानात्वादवयविनानास्थानत्वाच्च संशयः ॥ ५१ ॥ २५० ॥

त्वगव्यतिरेकात् ॥ ५२ ॥ २५१ ॥

न युगपदर्थानुपलब्धेः ॥ ५३ ॥ २५२ ॥

इन्द्रियार्थपञ्चत्वात् ॥ ५४ ॥ २५३ ॥

न तदर्थबहुत्वात् ॥ ५५ ॥ २५४ ॥

गन्धत्वाद्यव्यतिरेकाद्गन्धादीनामप्रतिषेधः ॥ ५६ ॥ २५५ ॥

विषयत्वाव्यतिरेकादेकत्वम् ॥ ५७ ॥ २५६ ॥

न बुद्धिलक्षणाधिष्ठानगत्याकृतिजातिपञ्चत्वेभ्यः ॥ ५८ ॥ २५७ ॥

भूतगुणविशेषोपलब्धेस्तादात्म्यम् ॥ ५९ ॥ २५८ ॥

॥ इति इन्द्रियनानात्वप्रकरणम् ॥

गन्धरसरूपस्पर्शशब्दानां स्पर्शपर्यन्ताः पृथिव्याः ॥ ६० ॥२५९ ॥

अप्तेजोवायूनां पूर्वपूर्वमपोह्याकाशस्योत्तरः ॥ ६१ ॥ २६० ॥

न सर्वगुणानुपलब्धेः ॥ ६२ ॥ २६१ ॥

एकैकश्येनोत्तरोत्तरगुणसद्भावादुत्तरोत्तराणां तदुपलब्धिः ॥ ६३ ॥ २६२ ॥

विष्टं ह्यपरं परेण ॥ ६४ ॥ २६३ ॥

न पार्थिवाप्ययोः प्रत्यक्षत्वात् ॥ ६५ ॥ २६४ ॥

पूर्वं पूर्वं गुणोत्कर्षात् तत्प्रधानम् ॥ ६६ ॥ २६५ ॥

तद्व्यवस्थानन्तु भूयस्त्वात् ॥ ६७ ॥ २६६ ॥

सगुणानामिन्द्रियभावात् ॥ ६८ ॥ २६७ ॥

न शब्दगुणोपलब्धेः ॥ ६९ ॥ २६८ ॥

तदनुपलब्धिरितरेतरद्रव्यगुणवैधर्म्यात् ॥ ७० ॥ २६९ ॥

॥ इति अर्थपरीक्षाप्रकरणम् ॥

॥ इति तृतीयाध्यायस्य प्रथमाह्निकम् ॥

॥ तृतीयाध्यायस्य द्वितीयाह्निकम् ॥

कर्माकाशसाधर्म्यात् संशयः ॥ १ ॥ २७० ॥

विषयप्रत्यभिज्ञानात् ॥ २ ॥ २७१ ॥

साध्यसमत्वादहेतुः ॥ ३ ॥ २७२ ॥

न युगपदग्रहणात् ॥ ४ ॥ २७३ ॥

अप्रत्यभिज्ञाने च विनाशप्रसङ्गः ॥ ५ ॥ २७४ ॥

क्रमवृत्तित्वादयुगपद्ग्रहणम् ॥ ६ ॥ २७५ ॥

अप्रत्यभिज्ञानञ्च विषयान्तरव्यासङ्गात् ॥ ७ ॥ २७६ ॥

न गत्यभावात् ॥ ८ ॥ २७७ ॥

स्फटिकान्यत्वाभिमानवत्तदन्यत्वाभिमानः ॥ ९ ॥ २७८ ॥

न हेत्वभावात् ॥ १० ॥ २७९ ॥

॥ इति बुद्धिविनाशित्वप्रकरणम् ॥

स्फटिकेऽप्यपरापरोत्पत्तेः क्षणिकत्वाद्व्यक्तीनामहेतुः ॥ ११ ॥ २८० ॥

नियमहेत्वभावाद् यथादर्शनमभ्यनुज्ञा ॥ १२ ॥ २८१ ॥

नोत्पत्तिविनाशकारणोपलब्धेः ॥ १३ ॥ २८२ ॥

क्षीरविनाशे कारणानुपलब्धिवद् दध्युत्पत्तिवच्च तदुपपत्तिः ॥१४॥२८३॥

लिङ्गतो ग्रहणान्नानुपलब्धिः ॥ १५ ॥ २८४ ॥

न पयसः परिणामगुणान्तरप्रादुर्भावात् ॥ १६ ॥ २८५ ॥

व्यूहान्तरद्रव्यान्तरोत्पत्तिदर्शनं पूर्वद्रव्यनिवृत्तेरनुमानम् ॥ १७ ॥ २८६॥

क्वचिद्विनाशकारणानुपलब्धेः क्वचिच्चोपलब्धेरनेकान्तः ॥ १८ ॥ २८७ ॥

॥ इति क्षणभङ्गभञ्जनप्रकरणम् ॥

नेन्द्रियार्थयोस्तद्विनाशेऽपि ज्ञानावस्थानात् ॥ १९ ॥ २८८ ॥

युगपज्ज्ञेयानुपलब्धेश्च न मनसः ॥ २० ॥ २८९ ॥

तदात्मगुणत्वेऽपि तुल्यम् ॥ २१ ॥ २९० ॥

सन्निकर्षाभावात्तदनुत्पत्तिः ॥ २२ ॥ २९१ ॥

नोत्पत्तिकारणानपदेशात् ॥ २३ ॥ २९२ ॥

विनाशकारणानुपलब्धेश्चावस्थाने तन्नित्यत्वप्रसङ्गः ॥ २४ ॥ २९३ ॥

अनित्यत्वग्रहणाद्बुद्धेः बुद्ध्यन्तराद् विनाशः शब्दवत् ॥ २५ ॥ २९४॥

ज्ञानसमवेतात्मप्रदेशसन्निकर्षान्मनसः स्मृत्युत्पत्ते र्नयुगपदुत्पत्तिः ॥ २६ ॥ २९५ ॥

नान्तःशरीरवृत्तित्वान्मनसः ॥ २७ ॥ २९६ ॥

साध्यत्वादहेतुः ॥ २८ ॥ २९७ ॥

स्मरतः शरीरधारणापपत्तेरप्रतिषेधः ॥ २९ ॥ २९८ ॥

न तदाशुगतित्वान्मनसः ॥ ३० ॥ २९९ ॥

न स्मरणकालानियमात् ॥ ३१ ॥ ३०० ॥

आत्मप्रेरणयदृच्छाज्ञताभिश्च न संयोगविशेषः ॥ ३२ ॥ ३०१ ॥

व्यासक्तमनसः पादव्यथनेन संयोगविशेषेण समानम् ॥ ३३ ॥ ३०२ ॥

प्रणिधानलिङ्गादिज्ञानानामयुगपद्भावाद्युगपदस्मरणम् ॥ ३४ ॥ ३०३॥

ज्ञस्येच्छाद्वेषनिमित्तत्वादारम्भनिवृत्त्योः ॥ ३५ ॥ ३०४ ॥

तल्लिङ्गत्वादिच्छाद्वेषयोः पार्थिवाद्येष्वप्रतिषेधः ॥ ३६ ॥ ३०५ ॥

परश्वादिष्वारम्भनिवृत्तिदर्शनात् ॥ ३७ ॥ ३०६ ॥

नियमानियमौ तु तद्विशेषकौ ॥ ३८ ॥ ३०७ ॥

यथोक्तहेतुत्वात् पारतन्त्र्यात् स्वकृताभ्यागमाच्च न मनसः ॥ ३९ ॥ ३०८ ॥

परिशेषाद्यथोक्तहेतूपपत्तेश्च ॥ ४० ॥ ३०९ ॥

स्मरणं त्वात्मनो ज्ञस्वाभाव्यात् ॥ ४१ ॥ ३१० ॥

प्रणिधाननिबन्धाभ्यासलिङ्गलक्षणसादृश्यपरिग्रहाश्रयाश्रितसम्बन्धानन्तर्य-
वियोगैककार्यविरोधातिशयप्राप्तिव्यवधानसुखदुःखेच्छाद्वेषभयार्थित्वक्रिया-
रागधर्माधर्मनिमित्तेभ्यः ॥ ४२ ॥ ३११ ॥

॥ इति बुद्ध्यात्मगुणत्वपरीक्षाप्रकरणम् ॥

कर्मानवस्थायिग्रहणात् ॥ ४३ ॥ ३१२ ॥

अव्यक्तग्रहणमनवस्थायित्वाद् विद्युत्सम्पाते रूपाव्यक्तग्रहणवत्
॥ ४४ ॥ ३१३ ॥

हेतूपादानात् प्रतिषेध्यव्याभ्यनुज्ञा ॥ ४५ ॥ ३१४ ॥

प्रदीपार्चिःसन्तत्यभिव्यक्तग्रहणवत्तद्ग्रहणम् ॥ ४६ ॥ ३१५ ॥

॥ इति बुद्धेरुत्पन्नापवर्गित्वप्रकरणम् ॥

द्रव्ये स्वगुणपरगुणोपलब्धेः संशयः ॥ ४७ ॥ ३१६ ॥

यावच्छरीरभावित्वाद्रूपादीनाम् ॥ ४८ ॥ ३१७ ॥

न पाकजान्तरगुणोत्पत्तेः ॥ ४९ ॥ ३१८ ॥

प्रतिद्वन्द्विसिद्धेः पाकजानामप्रतिषेधः ॥ ५० ॥ ३१९ ॥

शरीरव्यापित्वात् ॥ ५१ ॥ ३२० ॥

न केशनखादिष्वनुपलब्धेः ॥ ५२ ॥ ३२१ ॥

त्वक्पर्यन्तत्वाच्छरीरस्य नखादिष्वप्रसङ्गः ॥ ५३ ॥ ३२२ ॥

शरीरगुणवैधर्म्यात् ॥ ५४ ॥ ३२३ ॥

न रूपादीनामितरेतरवैधर्म्यात् ॥ ५५ ॥ ३२४ ॥

ऐन्द्रियकत्वाद् रूपादीनामप्रतिषेधः ॥ ५६ ॥ ३२५ ॥

॥ इति बुद्धेः शरीरगुणभेदपरीक्षाप्रकरणम् ॥

ज्ञानायौगपद्यादेकं मनः ॥ ५७ ॥ ३२६ ॥

न युगपदनेकक्रियोपलब्धेः ॥ ५८ ॥ ३२७ ॥

अलातचक्रदर्शनवत्तदुपलब्धिराशुसञ्चारात् ॥ ५९ ॥ ३२८ ॥

यथोक्तहेतुत्वाच्चाणु ॥ ६० ॥ ३२९ ॥

॥ इति मनःपरीक्षाप्रकरणम् ॥

पूर्वकृतफलानुबन्धात्तदुत्पत्तिः ॥ ६१ ॥ ३३० ॥

भूतेभ्यो मूर्त्त्युपादानवत्तदुपादानम् ॥ ६२ ॥ ३३१ ॥

न साध्यसमत्वात् ॥ ६३ ॥ ३३२ ॥

नोत्पत्तिनिमित्तत्वान्मातापित्रोः ॥ ६४ ॥ ३३३ ॥

तथा आहारस्य ॥ ६५ ॥ ३३४ ॥

प्राप्तौ चानियमात् ॥ ६६ ॥ ३३५ ॥

शरीरोत्पत्तिनिमित्तवत् संयोगनिमित्तं कर्म ॥ ६७ ॥ ३३६ ॥

एतेनानियमः प्रत्युक्तः ॥ ६८ ॥ ३३७ ॥

पुनस्तत्प्रसङ्गोऽपवर्गे ॥ ६९ ॥ ३३८ ॥

मनःकर्मनिमित्तत्वाच्च संयोगाव्युच्छेदः ॥ ७० ॥ ३३९ ॥

नित्यत्वप्रसङ्गश्च प्रायणानुपपत्तेः ॥ ७१ ॥ ३४० ॥

अणुश्यामनित्यत्ववत् स्यात् ॥ ७२ ॥ ३४१ ॥

नाकृताभ्यागमप्रसङ्गात् ॥ ७३ ॥ ३४२ ॥

॥ इति अदृष्टनिष्पाद्यत्वप्रकरणम् ॥

॥ इति तृतीयाध्यायस्य द्वितीयाह्निकम् ॥

॥ इति तृतीयाध्यायः ॥

॥ चतुर्थाध्यायस्य प्रथमाह्निकम् ॥

प्रवृत्तिर्यथोक्ता ॥ १ ॥ ३४३ ॥

तथा दोषाः ॥ २ ॥ ३४४ ॥

॥ इति प्रवृत्तिदोषसामान्यपरीक्षाप्रकरणम् ॥

तत्त्रैराश्यं रागद्वेषमोहान्तरभावात् ॥ ३ ॥ ३४५ ॥

नैकप्रत्यनीकभावात् ॥ ४ ॥ ३४६ ॥

व्यभिचारादहेतुः ॥ ५ ॥ ३४७ ॥

तेषां मोहः पापीयान्नामूढस्येतरोत्पत्तेः ॥ ६ ॥ ३४८ ॥

प्राप्तस्तर्हि निमित्तनैमित्तिकभावान्मोहोऽर्थान्तरभावो दोषेभ्यः ॥ ७ ॥ ३४९ ॥

न दोषलक्षणावरोधान्मोहस्य ॥ ८ ॥ ३५० ॥

निमित्तनैमित्तिकभावोपपत्तेश्च तुल्यजातीयानामप्रतिषेधः ॥ ९ ॥ ३५१॥

॥ इति दोषत्रैराश्यपरीक्षाप्रकरणम् ॥

आत्मनित्यत्वे प्रेत्यभावसिद्धिः ॥ १० ॥ ३५२ ॥

व्यक्ताद् व्यक्तानां प्रत्यक्षप्रामाण्यात् ॥ ११ ॥ ३५३ ॥

न घटाद् घटानिष्पत्तेः ॥ १२ ॥ ३५४ ॥

व्यक्ताद् घटनिष्पत्तेरप्रतिषेधः ॥ १३ ॥ ३५५ ॥

॥ इति प्रेत्यभावपरीक्षाप्रकरणम् ॥

अभावाद् भावोत्पत्तिर्नानुपमृद्य प्रादुर्भावात् ॥ १४ ॥ ३५६ ॥

व्याघातादप्रयोगः ॥ १५ ॥ ३५७ ॥

नातीतानागतयोः कारकशब्दप्रयोगात् ॥ १६ ॥ ३५८ ॥

न विनष्टेभ्योऽनिष्पत्तेः ॥ १७ ॥ ३५९ ॥

क्रमनिर्देशादप्रतिषेधः ॥ १८ ॥ ३६० ॥

॥ इति शून्यतोपादाननिराकरणप्रकरणम् ॥

ईश्वरः कारणं पुरुषकर्माफल्यदर्शनात् ॥ १९ ॥ ३६१ ॥

न पुरुषकर्माभावे फलानिष्पत्तेः ॥ २० ॥ ३६२ ॥

तत्कारितत्वादहेतुः ॥ २१ ॥ ३६३ ॥

॥ इति ईश्वरोपादानतानिराकरणप्रकरणम् ॥

अनिमित्ततो भावोत्पत्तिः कण्टकतैक्ष्ण्यादिदर्शनात् ॥ २२ ॥ ३६४ ॥

अनिमित्तनिमित्तत्वान्नानिमित्ततः ॥ २३ ॥ ३६५ ॥

निमित्तानिमित्तयोरर्थान्तरभावादप्रतिषेधः ॥ २४ ॥ ३६६ ॥

॥ इति आकस्मिकत्वनिराकरणप्रकरणम् ॥

सर्वमनित्यमुत्पत्तिविनाशधर्मकत्वात् ॥ २५ ॥ ३६७ ॥

नानित्यतानित्यत्वात् ॥ २६ ॥ ३६८ ॥

तदनित्यत्वमग्नेर्दाह्यं विनाश्यानुविनाशवत् ॥ २७ ॥ ३६९ ॥

नित्यस्याप्रत्याख्यानं यथोपलब्धि व्यवस्थानात् ॥ २८ ॥ ३७० ॥

॥ इति सर्वानित्यत्वनिराकरणप्रकरणम् ॥

सर्वं नित्यं पञ्चभूतनित्यत्वात् ॥ २९ ॥ ३७१ ॥

नोत्पत्तिविनाशकारणोपलब्धेः ॥ ३० ॥ ३७२ ॥

तल्लक्षणावरोधादप्रतिषेधः ॥ ३१ ॥ ३७३ ॥

न व्यवस्थानुपपत्तेः ॥ ३२ ॥ ३७४ ॥

॥ इति सर्वनित्यत्वनिराकरणप्रकरणम् ॥

सर्वं पृथग् भावलक्षणपृथक्त्वात् ॥ ३३ ॥ ३७५ ॥

नानेकलक्षणैरेकभावनिष्पत्तेः ॥ ३४ ॥ ३७६ ॥

तल्लक्षणव्यवस्थानादेवाप्रतिषेधः ॥ ३५ ॥ ३७७ ॥

॥ इति सर्वपृथक्त्वनिराकरणप्रकरणम् ॥

सर्वमभावो भावेष्वितरेतराभावसिद्धेः ॥ ३६ ॥ ३७८ ॥

न स्वभावसिद्धेर्भावानाम् ॥ ३७ ॥ ३७९ ॥

न स्वभावसिद्धिरापेक्षिकत्वात् ॥ ३८ ॥ ३८० ॥

व्याहतत्वादयुक्तम् ॥ ३९ ॥ ३८१ ॥

॥ इति सर्वशून्यतानिराकरणप्रकरणम् ॥

संख्यैकान्तासिद्धिः कारणानुपपत्त्युपपत्तिभ्याम् ॥ ४० ॥ ३८२ ॥

न कारणावयवभावात् ॥ ४१ ॥ ३८३ ॥

निरवयवत्वादहेतुः ॥ ४२ ॥ ३८४ ॥

॥ इति संख्यैकान्तवादनिराकरणप्रकरणम् ॥

सद्यः कालान्तरे च फलनिष्पत्तेः संशयः ॥ ४३ ॥ ३८५ ॥

न सद्यः कालान्तरोपभोग्यत्वात् ॥ ४४ ॥ ३८६ ॥

न कालान्तरे निष्पत्तिर्हेतुविनाशात् ॥ ४५ ॥ ३८७ ॥

प्राङ्निष्पत्तेर्वृक्षफलवत्तत् स्यात् ॥ ४६ ॥ ३८८ ॥

नासन्न सन्न सदसत् सदसतोर्वैधर्म्यात् ॥ ४७ ॥ ३८९ ॥

प्रागुत्पत्तेरुत्पत्तिधर्मकासदित्यद्धा उत्पादव्ययदर्शनात् ॥ ४८ ॥ ३९० ॥

बुद्धिसिद्धन्तु तदसत् ॥ ४९ ॥ ३९१ ॥

आश्रयव्यतिरेकाद् वृक्षफलवदित्यहेतुः ॥ ५० ॥ ३९२ ॥

प्रीतेरात्माश्रयत्वादप्रतिषेधः ॥ ५१ ॥ ३९३ ॥

न पुत्रपशुस्त्रीपरिच्छदहिरण्यान्नादिफलनिर्देशात् ॥ ५२ ॥ ३९४ ॥

तत्सम्बन्धात् फलनिष्पत्तेस्तेषु फलवदुपचारः ॥ ५३ ॥ ३९५ ॥

॥ इति फलपरीक्षाप्रकरणम् ॥

विविधबाधनायोगाद् दुःखमेव जन्मोत्पत्तिः ॥ ५४ ॥ ३९६ ॥

न सुखस्याप्यन्तरालसिद्धेः ॥ ५५ ॥ ३९७ ॥

बाधनानिवृत्तेर्वेदयतः पर्येषणदोषादप्रतिषेधः ॥ ५६ ॥ ३९८ ॥

दुःखविकल्पे सुखाभिमानाच्च ॥ ५७ ॥ ३९९ ॥

॥ इति दुःखपरीक्षाप्रकरणम् ॥

ऋणक्लेशप्रवृत्त्यनुबन्धादपवर्गाभावः ॥ ५८ ॥ ४०० ॥

प्रधानशब्दानुपपत्तेर्गुणशब्देनानुवादो निन्दाप्रशंसोपपत्तेः ॥ ५९ ॥ ४०१ ॥

समारोपणादात्मन्यप्रतिषेधः ॥ ६० ॥ ४०२ ॥

पात्रचयान्तानुपपत्तेश्च फलाभावः ॥ ६१ ॥ ४०३ ॥

सुषुप्तस्य स्वप्नादर्शने क्लेशाभावदपवर्गः ॥ ६२ ॥ ४०४ ॥

न प्रवृत्तिः प्रतिसन्धानाय हीनक्लेशस्य ॥ ६३ ॥ ४०५ ॥

न क्लेशसन्ततेः स्वाभाविकत्वात् ॥ ६४ ॥ ४०६ ॥

प्रागुत्पत्तेरभावानित्यत्ववत् स्वाभाविकेऽप्यनित्यत्वम् ॥ ६५ ॥ ४०७ ॥

अणुश्यामतानित्यत्वाद्वा ॥ ६६ ॥ ४०८ ॥

न सङ्कल्पनिमित्तत्वाच्च रागादीनाम् ॥ ६७ ॥ ४०९ ॥

॥ इति अपवर्गपरीक्षाप्रकरणम् ॥

॥ इति चतुर्थाध्यायस्य प्रथमाह्निकम् ॥

॥ चतुर्थाध्यायस्य द्वितीयाह्निकम् ॥

दोषनिमित्तानां तत्त्वज्ञानादहंकारनिवृत्तिः ॥ १ ॥ ४१० ॥

दोषनिमित्तं रूपादयो विषयाश्च सङ्कल्पकृताः ॥ २ ॥ ४११ ॥

तन्निमित्तं त्ववयव्यभिमानः ॥ ३ ॥ ४१२ ॥

॥ इति तत्त्वज्ञानोत्पत्तिप्रकरणम् ॥

विद्याऽविद्याद्वैविध्यात् संशयः ॥ ४ ॥ ४१३ ॥

तदसंशयः पूर्वहेतुप्रसिद्धत्वात् ॥ ५ ॥ ४१४ ॥

वृत्त्यनुपपत्तेरपि संशयानुपपत्तिः ॥ ६ ॥ ४१५ ॥

तेषु चावृत्तेरवयव्यभावः ॥ ७ ॥ ४१६ ॥

पृथक् चावयवेभ्योऽवृत्तेः ॥ ८ ॥ ४१७ ॥

न चावयव्यवयवाः ॥ ९ ॥ ४१८ ॥

एकस्मिन् भेदाभावाद् भेदशब्दप्रयोगानुपपत्तेरप्रश्नः ॥ १० ॥ ४१९ ॥

अवयवान्तराभावेऽप्यवृत्तेरहेतुः ॥ ११ ॥ ४२० ॥

केशसमूहे तैमिरिकोपलब्धिवत्तदुत्पत्तिः ॥ १२ ॥ ४२१ ॥

स्वविषयानतिक्रमेणेन्द्रियस्य पटुमन्दभावाद् विषयग्रहणस्य तथाभावो नाविषये प्रवृत्तिः ॥ १३ ॥ ४२२ ॥

अवयवावयविप्रसङ्गश्चैवमाप्रलयात् ॥ १४ ॥ ४२३ ॥

न प्रलयोऽणुसद्भावात् ॥ १५ ॥ ४२४ ॥

परं वा त्रुटेः ॥ १६ ॥ ४२५ ॥

॥ इति अवयविप्रकरणम् ॥

आकाशव्यतिभेदात्तदनुपपत्तिः ॥ १७ ॥ ४२६ ॥

आकाशासर्वगतत्वं वा ॥ १८ ॥ ४२७ ॥

अन्तर्बहिरिति कार्यद्रव्यस्य कारणान्तरवचनादकार्ये तदभावः ॥ १९ ॥ ४२८ ॥

शब्दसंयोगविभवाच्च सर्वगतम् ॥ २० ॥ ४२९ ॥

अव्यूहनाविष्टम्भविभुत्वानि चाकाशधर्माः ॥ २१ ॥ ४३० ॥

मूर्तिमतां च संस्थानोपपत्तेरवयवसद्भावः ॥ २२ ॥ ४३१ ॥

संयोगोपपत्तेः ॥ २३ ॥ ४३२ ॥

अनवस्थाकारित्वादनवस्थानुपपत्तेश्चाप्रतिषेधः ॥ २४ ॥ ४३३ ॥

॥ इति निरवयवत्वप्रकरणम् ॥

बुद्ध्या विवेचनात्तु भावानां याथात्म्यानुपलब्धिस्तन्त्वपकर्षणे पटानुपलब्धिवत् ॥ २५ ॥ ४३४ ॥

व्याहतत्वादहेतुः ॥ २६ ॥ ४३५ ॥

तदाश्रयग्रहणादपृथग्ग्रहणम् ॥ २७ ॥ ४३६ ॥

प्रमाणतश्चार्थप्रतिपत्तेः ॥ २८ ॥ ४३७ ॥

प्रमाणोपपत्त्यनुपपत्तिभ्याम् ॥ २९ ॥ ४३८ ॥

स्वप्नविषयाभिमानवदयं प्रमाणप्रमेयाभिमानः ॥ ३० ॥ ४३९ ॥

मायागन्धर्वनगरमृगतृष्णिकावद्वा ॥ ३१ ॥ ४४० ॥

हेत्वभावादसिद्धिः ॥ ३२ ॥ ४४१ ॥

स्मृतिसङ्कल्पवच्च स्वप्नविषयाभिमानः ॥ ३३ ॥ ४४२ ॥

मिथ्योपलब्धेर्विनाशस्तत्त्वज्ञानात् स्वप्नविषयाभिमानप्रणाशवत् प्रतिबोधे ॥ ३४ ॥ ४४३ ॥

बुद्धेश्चैवं निमित्तसद्भावोपलम्भात् ॥ ३५ ॥ ४४४ ॥

तत्त्वप्रधानभेदाच्च मिथ्याबुद्धेर्द्वैविध्योपपत्तिः ॥ ३६ ॥ ४४५ ॥

॥ इति बाह्यार्थभङ्गनिराकरणप्रकरणम् ॥

समाधिविशेषाभ्यासात् ॥ ३७ ॥ ४४६ ॥

नार्थविशेषप्राबल्यात् ॥ ३८ ॥ ४४७ ॥

क्षुदादिभिः प्रवर्त्तनाच्च ॥ ३९ ॥ ४४८ ॥

पूर्वकृतफलानुबन्धात्तदुत्पत्तिः ॥ ४० ॥ ४४९ ॥

अरण्यगुहापुलिनादिषु योगाभ्यासोपदेशः ॥ ४१ ॥ ४५० ॥

अपवर्गेऽप्येवं प्रसङ्गः ॥ ४२ ॥ ४५१ ॥

न निष्पन्नस्यावश्यम्भावित्वात् ॥ ४३ ॥ ४५२ ॥

तदभावश्चापवर्गे ॥ ४४ ॥ ४५३ ॥

तदर्थं यमनियमाभ्यामात्मसंस्कारो योगाच्चाध्यात्मविध्युपायैः ॥ ४५ ॥ ४५४ ॥

ज्ञानग्रहणाभ्यासस्तद्विद्यैश्च सह सम्वादः ॥ ४६ ॥ ४५५ ॥

तं शिष्यगुरुसब्रह्मचारिशिष्टश्रेयोऽर्थिभिरनसूयिभिरभ्युपेयात्
॥ ४७ ॥ ४५६ ॥

प्रतिपक्षहीनमपि वा प्रयोजनार्थमर्थित्वे ॥ ४८ ॥ ४५७ ॥

॥ इति तत्त्वज्ञानविवृद्धिप्रकरणम् ॥

तत्त्वाध्यवसायसंरक्षणार्थं जल्पवितण्डे बीजप्ररोहसंरक्षणार्थं कण्टकशाखा-
वरणवत् ॥ ४९ ॥ ४५८ ॥

ताभ्यां विगृह्य कथनम् ॥ ५० ॥ ४५९ ॥

॥ इति तत्त्वज्ञानपरिपालनप्रकरणम् ॥

॥ इति चतुर्थाध्यायस्य द्वितीयाह्निकम् ॥

॥ इति चतुर्थाध्यायः ॥

॥ पञ्चमाध्यायस्य प्रथमाह्निकम् ॥

साधर्म्यवैधर्म्योत्कर्षापकर्षवर्ण्यावर्ण्यविकल्पसाध्यप्राप्त्यप्राप्तिप्रसङ्गप्रतिदृष्टान्तानुत्-
पत्तिसंशयप्रकरणाहेत्वर्थापत्त्यविशेषोपपत्त्युपलब्ध्यनुपलब्धिनित्यानित्य-
कार्यसमाः ॥ १ ॥ ४६० ॥

साधर्म्यवैधर्म्याभ्यामुपसंहारे तद्धर्मविपर्ययोपपत्तेः साधर्म्यवैधर्म्यसमौ
॥ २ ॥ ४६१ ॥

गोत्वाद्गोसिद्धिवत्तत्सिद्धिः ॥ ३ ॥ ४६२ ॥

॥ इति सत्प्रतिपक्षदेशनाभासप्रकरणम् ॥

साध्यदृष्टान्तयोर्धर्मविकल्पादुभयसाध्यत्वाच्चोत्कर्षापकर्षवर्ण्यावर्ण्यविकल्प-
साध्यसमाः ॥ ४ ॥ ४६३ ॥

किञ्चित्साधर्म्यादुपसंहारसिद्धेर्वैधर्म्यादप्रतिषेधः ॥ ५ ॥ ४६४ ॥

साध्यातिदेशाच्च दृष्टान्तोपपत्तेः ॥ ६ ॥ ४६५ ॥

॥ इति जातिषट्कप्रकरणम् ॥

प्राप्य साध्यमप्राप्य वा हेतोः प्राप्त्याऽविशेषादप्राप्त्याऽसाधकत्वाच्च प्राप्त्य-
प्राप्तिसमौ ॥ ७ ॥ ४६६ ॥

घटादिनिष्पत्तिदर्शनात् पीडने चाभिचारादप्रतिषेधः ॥ ८ ॥ ४६७ ॥

॥ इति प्राप्त्यप्राप्तिसमजातिद्वयप्रारणम् ॥

दृष्टान्तस्य कारणानपदेशात् प्रत्यवस्थानाच्च प्रतिदृष्टान्तेन प्रसङ्ग-प्रतिदृष्टान्तसमौ ॥ ९ ॥ ४६८ ॥

प्रदीपोपादानप्रसङ्गविनिवृत्तिवत्तन्निवृत्तिः ॥ १० ॥ ४६९ ॥

प्रतिदृष्टान्तहेतुत्वे च नाहेतुर्दृष्टान्तः ॥ ११ ॥ ४७० ॥

॥ इति प्रसङ्गप्रतिदृष्टान्तसमप्रकरणम् ॥

प्रागुत्पत्तेः कारणाभावादनुत्पत्तिसमः ॥ १२ ॥ ४७१ ॥

तथाभावादुत्पन्नस्य कारणोपपत्तेर्न कारणप्रतिषेधः ॥ १३ ॥ ४७२ ॥

॥ इति अनुत्पत्तिसमप्रारणम् ॥

सामान्यदृष्टान्तयोरैन्द्रियकत्वे समाने नित्यानित्यसाधर्म्यात् संशयः ॥ १४ ॥ ४७३ ॥

साधर्म्यात् संशये न संशयो वैधर्म्यादुभयथा वा संशयेऽत्यन्तसंशयप्रसङ्गो नित्यत्वानभ्युपगमाच्च सामान्यस्याप्रतिषेधः ॥ १५ ॥ ४७४ ॥

॥ इति संशयसमप्रकरणम् ॥

उभयसाधर्म्यात् प्रक्रियासिद्धेः प्रकरणसमः ॥ १६ ॥ ४७५ ॥

प्रतिपक्षात् प्रकरणसिद्धेः प्रतिषेधानुपपत्तिः प्रतिपक्षोपपत्तेः॥१७॥ ४७६॥

॥ इति प्रकरणसमप्रकरणम् ॥

त्रैकाल्यासिद्धेर्हेतोरहेतुसमः ॥ १८ ॥ ४७७ ॥

न हेतुतः साध्यसिद्धेस्त्रैकाल्यासिद्धिः ॥ १९ ॥ ४७८ ॥

प्रतिषेधानुपपत्तेश्च प्रतिषेद्धव्याप्रतिषेधः ॥ २० ॥ ४७९ ॥

॥ इति अहेतुसमप्रकरणम् ॥

अर्थापत्तितः प्रतिपक्षसिद्धेरर्थापत्तिसमः ॥ २१ ॥ ४८० ॥

अनुक्तस्यार्थापत्तेः पक्षहानेरुपपत्तिरनुक्तत्वादनैकान्तिकत्वाच्चार्थापत्तेः ॥ २२ ॥ ४८१ ॥

॥ इति अर्थापत्तिसमप्रकरणम् ॥

एकधर्मोपपत्तेरविशेषे सर्वाविशेषप्रसङ्गात् सद्भावोपपत्तेरविशेषसमः ॥ २३ ॥ ४८२ ॥

क्वचित्तद्धर्मोपपत्तेः क्वचिच्चानुपलब्धेरप्रतिषेधः ॥ २४ ॥ ४८३ ॥

॥ इति अविशेषसमप्रकरणम् ॥

उभयकारणोपपत्तेरुपपत्तिसमः ॥ २५ ॥ ४८४ ॥

उपपत्तिकारणाभ्यनुज्ञानादप्रतिषेधः ॥ २६ ॥ ४८५ ॥

॥ इति उपपत्तिसमप्रकरणम् ॥

निर्दिष्टकारणाभावेऽप्युपलम्भादुपपत्तिसमः ॥ २७ ॥ ४८६ ॥

कारणान्तरादपि तद्धर्मोपपत्तेरप्रतिषेधः ॥ २८ ॥ ४८७ ॥

॥ इति अर्थापत्तिसमप्रकरणम् ॥

तदनुपलब्धेरनुपलम्भादभावसिद्धौ तद्विपरीतोपपत्तेरनुपलब्धिसमः ॥ २९ ॥ ४८८ ॥

अनुपलम्भात्मत्वादनुपलब्धेरहेतुः ॥ ३० ॥ ४८९ ॥

ज्ञानविकल्पानाञ्च भावाभावसंवेदनादध्यात्मम् ॥ ३१ ॥ ४९० ॥

॥ इति अनुपलब्धिसमप्रकरणम् ॥

साधर्म्यात्तुल्यधर्मोपपत्तेः सर्वानित्यत्वप्रसङ्गादनित्यसमः ॥ ३२ ॥ ४९१ ॥

साधर्म्यादसिद्धेः प्रतिषेधासिद्धिः प्रतिषेधसाधर्म्यात् ॥ ३३ ॥ ४९२ ॥

दृष्टान्ते च साध्यसाधनभावेन प्रज्ञातस्य धर्मस्य हेतुभावात् तस्य चोभयथा भावान्नाविशेषः ॥ ३४ ॥ ४९३ ॥

॥ इति अनित्यसमप्रकरणम् ॥

नित्यमनित्यभावादनित्ये नित्यतोपपत्तेर्नित्यसमः ॥ ३५ ॥ ४९४ ॥

प्रतिषेध्ये नित्यमनित्यभावादनित्यत्वोपपत्तेः प्रतिषेधाभावः ॥ ३६ ॥ ४९५ ॥

॥ इति नित्यसमप्रकरणम् ॥

प्रयत्नकार्यानेकत्वात् कार्यसमः ॥ ३७ ॥ ४९६ ॥

कार्यान्यत्वे प्रयत्नाहेतुत्वमनुपलब्धिकारणोपपत्तेः ॥ ३८ ॥ ४९७ ॥

॥ इति कार्यसमप्रकरणम् ॥

प्रतिषेधेऽपि समानो दोषः ॥ ३९ ॥ ४९८ ॥

सर्वत्रैवम् ॥ ४० ॥ ५९९ ॥

प्रतिषेधविप्रतिषेधे प्रतिषेधदोषवद्दोषः ॥ ४१ ॥ ५०० ॥

प्रतिषेधं सदोषमभ्युपेत्य प्रतिषेधविप्रतिषेधे समानदोषप्रसङ्गः मतानुज्ञा ॥ ४२ ॥ ५०१ ॥

स्वपक्षलक्षणापेक्षोपपत्त्युपसंहारे हेतुनिर्देशे परपक्षदोषाभ्युपगमात् समानो दोषः ॥ ४३ ॥ ५०२ ॥

॥ इति षट्पक्षीरूपकथाभासप्रकरणम् ॥

॥ इति पञ्चमाध्यायस्य प्रथमाह्निकम् ॥

॥ पञ्चमाध्यायस्य द्वितीयाह्निकम् ॥

प्रतिज्ञाहानिः प्रतिज्ञान्तरं प्रतिज्ञाविरोधः प्रतिज्ञासन्न्यासो हेत्वन्तरमर्थान्तरं निरर्थकमविज्ञातार्थमपार्थकमप्राप्तकालं न्यूनमधिकं पुनरुक्तमननुभाषणमज्ञानमप्रतिभा विक्षेपो मतानुज्ञा पर्यनुयोज्योपेक्षणं निरनुयोज्यानुयोगोऽपसिद्धान्तो हेत्वाभासाश्च निग्रहस्थानानि ॥ १ ॥ ५०३ ॥

प्रतिदृष्टान्तधर्माभ्यनुज्ञा स्वदृष्टान्ते प्रतिज्ञाहानिः ॥ २ ॥ ५०४ ॥

प्रतिज्ञातार्थप्रतिषेधे धर्मविकल्पात्तदर्थनिर्देशः प्रतिज्ञान्तरम् ॥ ३ ॥ ५०५ ॥

प्रतिज्ञाहेत्वोर्विरोधः प्रतिज्ञाविरोधः ॥ ४ ॥ ५०६ ॥

पक्षप्रतिषेधे प्रतिज्ञातार्थापनयनं प्रतिज्ञासन्न्यासः ॥ ५ ॥ ५०७ ॥

अविशेषोक्तहेतौ प्रतिषिद्धे विशेषमिच्छतो हेत्वन्तरम् ॥ ६ ॥ ५०८ ॥

॥ इति प्रतिज्ञाहेत्वन्यतराश्रितनिग्रहस्थानपञ्चकविशेषलक्षणप्रकरणम् ॥

प्रकृतादर्थादप्रतिसम्बद्धार्थान्तरम् ॥ ७ ॥ ५०९ ॥

वर्णक्रमनिर्देशवन्निरर्थकम् ॥ ८ ॥ ५१० ॥

परिषत्प्रतिवादिभ्यां त्रिरभिहितमप्यविज्ञातमविज्ञातार्थम् ॥ ९ ॥ ५११ ॥

पौर्वापर्यायोगादप्रतिसम्बद्धार्थमपार्थकम् ॥ १० ॥ ५१२ ॥

॥ इति प्रकृतोपयोगिवाक्यार्थप्रतिपत्तिशून्यनिग्रहस्थानचतुष्कप्रकरणम् ॥

अवयवविपर्यासवचनमप्राप्तकालम् ॥ ११ ॥ ५१३ ॥

हीनमन्यतमेनाप्यवयवेन न्यूनम् ॥ १२ ॥ ५१४ ॥

हेतूदाहरणाधिकमधिकम् ॥ १३ ॥ ५१५ ॥

॥ इति स्वसिद्धान्तानुरुपप्रयोगाभासनिग्रहस्थानत्रिकप्रकरणम् ॥

शब्दार्थयोः पुनर्वचनं पुनरुक्तमन्यत्रानुवादात् ॥ १४ ॥ ५१६ ॥

अर्थादापन्नस्य स्वशब्देन पुनर्वचनम् ॥ १५ ॥ ५१७ ॥

॥ इति पुनरुक्तप्रकरणम् ॥

विज्ञातस्य परिषदा त्रिरभिहितस्याप्यप्रत्युच्चारणमननुभाषणम् ॥ १६ ॥ ५१८ ॥

अविज्ञातञ्चाज्ञानम् ॥ १७ ॥ ५१९ ॥

उत्तरस्याप्रतिपत्तिरप्रतिभा ॥ १८ ॥ ५२० ॥

कार्यव्यासङ्गात् कथाविच्छेदो विक्षेपः ॥ १९ ॥ ५२१ ॥

॥ इति उत्तरविरोधिनिग्रहस्थानचतुष्कप्रकरणम् ॥

स्वपक्षे दोषाभ्युपगमात् परपक्षे दोषप्रसङ्गो मतानुज्ञा ॥ २० ॥ ५२२ ॥

निग्रहस्थानप्राप्तस्यानिग्रहः पर्यनुयोज्योपेक्षणम् ॥ २१ ॥ ५२३ ॥

अनिग्रहस्थाने निग्रहस्थानाभियोगः निरनुयोज्यानुयोगः ॥ २२ ॥ ५२४॥

॥ इति दोषनिरूप्यनिग्रहस्थानत्रिकप्रकरणम् ॥

सिद्धान्तमभ्युपेत्यानियमात् कथाप्रसङ्गोऽपसिद्धान्तः ॥ २३ ॥ ५२५ ॥

हेत्वाभासाश्च यथोक्ताः ॥ २४ ॥ ५२६ ॥

॥ इति कथकान्योक्तिनिरूप्यनिग्रहस्थानद्वयप्रकरणम् ॥

॥ इति पञ्चमाध्यायस्य द्वितीयाह्निकम् ॥

॥ इति पञ्चमाध्यायः ॥

Appendix VI

Alphabetical index of *Nyāyasūtras* explained by Rāmabhadra and Jānakīnātha

Errata

पृष्ठा	पंक्ति	अशुद्धम्	शुद्धम्
४	१४	निश्रेयसं	निःश्रेयसं
४	१९	°सम्बन्ध°	°सम्बन्ध
५	१६	तदधीना	तदधीन
६	८	तत्त्वज्ञानस्त	तत्त्वज्ञानस्य
१०	१७	शब्दमित्यर्थः	शब्दमित्यर्थः
१३	२	पूर्ववदा दिलक्षणं	पूर्वदादिलक्षणं
२२	१५	२४	१४
२३	१	°कारण स्वचक्षु°	°कारणस्वचक्षु°
२३	१८	संयोगपूर्तकत्वेन	संयोगपूर्वकत्वेन
२५	१	प्रयत्नत्रत्वं	प्रयत्नत्वं
२५	१४	प्रवर्तनालशना	प्रवर्तदालक्षक्षा
२८	१२	°प्रतिवत्ते°	°प्रतिपत्ते°
३२	१५	-जन्मासंशयोऽपि	-जन्मा संशयोऽपि
३२	२०	बुद्धिसामप्रीत	बुद्धिसामग्रीत
३५	१४	सद्धान्त	सिद्धान्त
३५	१५	सिधकानीति	साधकानीति
३७	५	अर्थस्थाभ्युपगमादेव	अर्थस्याभ्युपगमादेव
३९	५	-न्तायययवत्वं	-न्तावयवत्वं
४५	१३	तदव्यक्तित्वमेब	तदव्यक्तित्वमेव
४५	१७	द्वितीयीऽतिप्रसक्त°	द्वितीयोऽतिप्रसक्त°
४५	१९	°त्यादेप्युपपत्ता°	°त्यादेरप्युपपत्ता°
४६	२	निखिलव्यक्ति°	निखिलव्यक्ति°
४६	१२	तत्त्वज्ञानर्थं	तत्त्वज्ञानार्थं
४६	१५	व्यभिचारशङ्का°	व्यभिचारशङ्का°

पृष्ठा	पंक्ति	अशुद्धम्	शुद्धम्
४८	१	ह्रदो	ह्रदो
५१	११	साधारणस्य	साधारणस्य
६५	५	तद्वृक्षत्यादि-	तद्वृक्षत्वादि-
६५	१४	चलं	छलं
६५	१५	°विकल्पोपत्त्या	°विकल्पोपपत्त्या
६८	६	द्विशतं	द्विजशतं
८४	१४	हेतुत्वं	हेतुत्वं
८९	४	प्रत्यक्षण	प्रत्यक्षेण
९७	१४	तद्समवायि°	तद्समवायि°
१०७	११	°व्याप्यपरीक्षा-	व्याप्यपरीक्षा°-
११२	१४	स्तीममित्यादि	स्तीममित्यादि
१२३	६	तदुपलब्धेरनु°	तदनुपलब्धेरनु°
१२९	४	विभक्तिविभाग°	विभक्तिर्विभाग°
१२९	१४	शाब्द-	शब्द-
११०	१६	प्रयोजनान्तरभावो	प्रयोजनान्तराभावो
१११	२२	वदतीत्यर्यवाद	वदतीत्यर्थवाद
११२	१४	-स्तीममित्यादि	-स्तोममित्यादि
१२७	११	°व्यापकताताग्रहान्मेधेन	°व्यापकताग्रहान्मेधेन
१२१	५	°नित्ववदुपचाराच्च	°नित्यवदुपचाराच्च
१२३	६	तदुपलब्धेरनुपलम्भा°	तदनुपलब्धेरनुपलम्भा°
१२९	४	विभक्तिविभाग°	विभक्तिर्विभाग°
१२९	१४	शाब्द-	शब्द-
१३०	१६	°सम्बन्धादित्यर्यः	°सम्बन्धादित्यर्थः
१३७	१४	°जातीयविकारस्म	°जातीयविकारस्य
१४०	१२	नित्यात्वभावात्	नित्यत्वभावात्
१४५	२२	°र्जातिलिङ्गाया	°र्जातिलिङ्गाख्या
१४७	३	गोत्वाकृविशिष्ट	गोत्वाकृतिविशिष्ट°
१४९	१७	स्पर्शजन्यार्थग्रहणात्	स्पर्शजजन्यार्थग्रहणात्
१५२	११	द्वैतप्रतिषेधो	अद्वैतप्रतिषेधो
१५३	१३	स्मृतिहेतुत्यात्	स्मृतिहेतुत्वात्

पृष्ठा	पंक्ति	अशुद्धम्	शुद्धम्
१५४	१८	तदात्मत्वगुणत्व°	तदात्मगुणत्व°
१६०	१०	गन्धादीनास्वाश्रया°	गन्धादीनां स्वाश्रया°
१६१	१६	३२	३१
१८२	८	पूर्वद्रव्वनिवृत्ते°	पूर्वद्रव्यनिवृत्ते°
१८५	४	१६	१९
१६५	३	व्याभिचारं	व्यभिचारं
१६६	४	विशेपषान्त	विशेषणान्त
१९९	१०	तधा	तथा
१९९	१५	°वितित्वात्	°निमित्तत्वात्
१९९	१६	पुत्रदेह°	पुत्रदेह°
१९९	२०	प्राप्तौ	प्राप्तौ
२१५	१९	-णीयत्यमकरणे	-णीयत्वमकरणो
२२४	५	कण्टकतैक्ष्ण्यादि°	कण्टकतैक्ष्ण्यादि°
२२५	१४	इति	इति
२२५	२०	धिस्तरः	विस्तरः
२३०	१५	-पत्तेनित्यर्थः	-पत्तेरित्यर्थः
२३५	१७	धर्मरहित्वं	धर्मरहितत्वं
२४०	२	फअनिष्पत्तेः	फलनिष्पत्तेः
२४०	१४	नत्राप्रसिद्धमेव	तत्राप्रसिद्धमेव
२४२	१०	आत्रयव्यतिरेकाद्	आश्रयव्यतिरेकाद्
२६२	१५	निरामरोति	निराकरोति
२६५	२	°स्त्वन्त्वपकर्षणे	स्तन्त्वपकर्षणे
२६५	४	ज्ञानान्यत्वम्	ज्ञानानन्यत्वम्
२६६	३	३७	२७
२६६	११	३७	२७
२६७	१८	मायागन्धर्वनवर°	मायागन्धर्वनगर°
२६८	११	स्वप्नयिषयस्व	स्वप्नविषयस्य
२६८	१६	स्वप्नविवयाभिमानवत्	स्वप्नविवयाभिमानप्रणाशवत्
२९९	९	सत्त्वमप्रयो-	सत्त्वमनुमानप्रयो-
२९०	१०	°सिद्धधर्म्यादप्रतिषेधः	सिद्धेवैधर्म्यादप्रतिषेधः

पृष्ठा	पंक्ति	अशुद्धम्	शुद्धम्
३००	१७-१८	सेय-सेयमसिद्धयादिशाना	सेयमसिद्धयादिदेशना
३०५	१३-१४	प्राप्तिः समान [?]	प्राप्तिसमा न [?च]
३०६	४	कार्यसमसन्निकृष्टमेव	कार्यसन्निकृष्टमपि
३३४	११	इत्यद्यमाह्निमम्	इत्याद्यमाह्निकम्
३३५	१७	प्रयमतो	प्रथमतो
३४४	२२	-भूतेत्याहुः	-भूता इत्याहुः
३५२	५	ति समय°	इति समय°
३५३	४	द्वयन्तूत्ररमना°	द्वयन्तूत्तरमना°
३५७	१४	हीनमन्यतवेना°	हीनमन्यतमेना°
३५८	९	°मधिकम् ॥	°मधिकम् ॥ १३ ॥
३५८	११	तदुदाहरणादिकोदा°	तदुदाहरणाधिकोदा°
३६२	१७	केवलदूषणत्तया	केवलदूषणोक्तया
३७०	१९	चाननुगतलक्षणा-	चानुगतलक्षणा-
३७२	१३	°व्यापारानश्रयत्वमिति	°व्यापारानाश्रयत्वमिति
३७७	६	किमामभिदधत्	कियामभिदधत्

Prabal Kumar Sen (1946-) is Professor of Philosophy at the University of Calcutta. His main area of interest is Nyāya, Vaiśeṣika, Pūrva Mīmāṃsā, Buddhism and Vedānta. He has previously edited a number of hitherto unpublished texts of Nyāya Philosophy like *Ākhyāta-vādavyākhyā* and *Mokṣavāda* of Rāmabhadra Sārvabhauma, and he also has to his credit several research articles published in different journals, festschrifts and commemorative volumes.